CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द॰ नं॰ १६७८६

अथलघुनारदीयपुराणान्तर्गत रुक्माङ्गदचरितप्रारम्भः

मूल्य रु॰ २५।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विज्ञप्तिपत्रम् ॥

पुरा महर्षिवेदव्यासेन कलियुगोद्भवाः मनुष्याः विद्यायुर्द्रव्यैश्चानेकोपद्रवैर्यज्ञयागादिकर्मकरणे समर्था न भविष्यन्ति यज्ञादिना विना स्वर्लोकप्राप्तिस्तेषां कथं भविता इति विचार्य दयालुःपरमलोकोपकारिणः महर्षिणा ते मनुष्येभ्यो यज्ञयागादिना भवबन्धनेभ्यो मुक्तोभूत्वोत्तमलोकप्राप्ता भवेयुरित्यभिप्रायेणाष्टादशमहापुराणानि कृतवान् तेषु मध्ये कानिचिन् पुराणानि अतीवदुर्लभतरेण मुद्रिता नसन्ति तेषु दुर्लभतरेषुमध्येपि अष्टादशमहापुराणान्तर्गतलघुनारदीयपुराणोयं दर्शनेष्वपि दुर्लभिभूतेनायमन्धकाररूपकलेर्नाशनाय दीपस्वरूपभूतो लघुनारदीयपुराणान्तर्गत रुक्माङ्गदचरितस्य प्रकाशनाय च स्वार्यग्रन्थानां लोपोमाभूदित्यपेक्षया कलौ अपरवेदव्यासस्वरूप परमोपकारि श्रीगुरुपुरोधेति प्रसिद्ध रवजाञ्चीत्युपपद श्रीजनकराजशर्मणा द्विजेन्द्रेण सर्वप्रकारेणास्मत् सहायं दत्तवान् आर्यग्रन्थार्यदेशयोरुन्नतसमृद्धौ आर्यग्रन्थस्य स्वदेशादेव प्रकाशने सर्वभावेनास्मत्सहायं ददुः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आर्यग्रन्थानुरागिजनादपि आर्यग्रन्थं स्वभूषणोयं मत्वा आग्रहंचेत कुर्वंतु तदायं नारदीयपुराणस्यान्यखण्डानपि मुद्रयामस्तथाप्राचीन दुर्लभार्यान्य ग्रन्थानपि आर्यजनसहायेन प्रकाशयितुमिच्छामः ॥

आसास्महे यदस्मिन् विचारपूर्वकं संशोधितेऽपि ग्रन्थेऽज्ञानाद्दृष्टिदोषाद्वा स्थितमस्त्यशुद्धादि तत्सारासारविवेकविद्भिर्विद्वद्भिर्दयार्द्रदृष्ट्या संशोधनीयमिति. ॥

श्रीराजकीय पाठशालाध्यापक नेपालेत्युपनामक पं० जीवनाथशर्मणा संशोधिता ॥

वहुपरिश्रमेण कृत्वा लब्धत्वात्परिश्रमपूर्वक संशोधनीयकारितत्वाच्च ग्रन्थोयं पाशुपतयन्त्राधीशेन सर्वभावेन स्वायत्तीकृतमस्ति ॥

शुभाभिलाषि

पं० नरदेव, मोतिकृष्ण शर्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नारदीयपुराणान्तर्गत रुक्माङ्गदचरित खण्डस्थ बिषयाना सूचिः ॥

अध्याय.		पत्राङ्क.
१	वशिष्ठंप्रति मान्धातृप्रश्न द्वादशीमहात्म्यवर्णनं एकादश्या महत्वकथनं.	१
२	सूतंप्रति शौनकादि प्रश्नस्तिथिविवर्णंचेति.	१
३	सूतंप्रति शौनकादिप्रश्न रुक्मांगदेन पार्थिवेनासमुद्रान्ते समस्तजनैरेकादश्युपवासनीयामिति पटहं अवादयत् सर्वैर्लोकैरेकादशीसेवनानन्तरं सर्वनरकसून्यं अभवत् तद्राष्ट्रेयेकेचिद् मरन्ति ते गरुडारूढा विष्णोःपदं प्रयान्ति यमनारदसंवाद रुक्मांगदवर्णनं यमपारितापंचेति.	२
४	नारायणंप्रति यमचित्रगुप्तयोः सविनयं विलापः	५
५	समवर्तेः स्वेनैवात्मश्लाघा कथनं.	६
६	रुक्मांगदंप्रति ब्रह्मवाक्यं.	७
७	मोहिनी सृष्टिर्मोहिनी शिक्षा प्रस्थापनंचेति.	७
८	मोहिनीवरदानंमोहिनीमन्दरागमनंच.	१०
९	धर्मांगदवर्णनं धर्मांगदेराज्यलक्ष्मीस्थापनं रुक्मांगदमन्दरगमनं.	११
१०	मन्दरेवामदेवरुक्मांगदसंवादो नृपः केनकर्मणावासुन्दर्योमांमदनेवगति भाति.	१२
११	वामदेवेन रुक्मांगदपूर्ववृत्तान्तकथनं राजामन्दरपर्यटनावसरे मोहिन्या सप्तस्वरविसिष्टगीतश्रवणम् पश्चात् मोहिनिरुक्मांगदसमागमः	१४
१२	मोहिनी रुक्मांगदसंवादे स्ववंशवर्णनं मोहिनीवरदानं.	१६
१३	नगरंप्रति मोहिन्यानयनं.	१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्याय.	पत्रांक.
१४ ततो महारण्यंगच्छतस्तु कस्मिंश्चित् सुष्कपर्णपूरिगरंध्रेमुशली तिष्ठति दैवयोगेन शैन्धवखुरेण विदलीकृतासाहाहेत्यवदत् तदनंतरं सीतलतोयमानीय तामसिञ्चयत् चेतनाप्राप्तासाद्यात्मवृत्तंन्यवेदयत् नृपेण तस्मै विजयासंभवपुण्यंदत्तवान् सदनंतरं सादिव्यरूपाजातेति	१८
१५ नगरप्रवेशानंतरं पुत्रानुशासनं	२१
१६ पितुरादेशान्मोहिनीसेवनंमोहिन्याअनेकाभरणवस्त्रदानम् संध्यावलिप्रबोधनम् साकलपुराधिवासि ब्राह्मणगणिकयोर्वृत्तान्तकथनम्	२२
१७ मोहिनीभोजनेच्छया भांडवीक्षणम् षड्रसकरणम्, राजोपचितव्यंजनादिनाभोजनं मोहिनिसंध्यावल्योःसंवादे- मोहिनी एवंगुणान्वितस्यास्याहंजुगुप्साकर्तुंसमर्थाभवामीवान वेतिचिंता समाकुलाशीघ्रमाहरनृपतेन रहितामुहूर्तमपि नतिष्ठामीत्यब्रवीत्	२५
१८ नृपस्तदन्तिकंप्राप्य किंकारणेनाहूतासीत्यभाषत तच्छ्रुत्वा निष्प्रयोजनमानीताक्षीरसागरगह्वरात्: इत्यादिवाक्यैर्नृपं समर्थेतनयेपिराज्यभारंवीक्षसे संध्यावलीसमात्रैलोक्येनारीदुर्लभा पातिव्रता मांभस्मकरणेसमर्था वहुनाकिमिहोक्तेनतदनंतरं धर्मांगदेनसर्वामातरःसंबोधनम	२७
१९ रुक्माङ्गदक्रीडावर्णनं धर्माङ्गदप्रतापवर्णनं लोकसुखकथनंच	२९
२० धर्माङ्गदविद्याधरयोर्युद्धं धर्माङ्गदविजयोविद्याधरकन्याहरणंच	३०
२१ धर्मांगदविजयवर्णनं धर्मांगदविवाहकरणं प्रजापालनंच.	३१
२२ रुक्मांगदेन सर्वकर्मक्रियां त्यक्त्वाप्येकादशीसेवनंमत्यक्तवानितिवर्णनं.	३३

॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अध्याय.	पत्रांक.
कार्तिकमाससमाहात्म्यकथनंच.	
२३ चातुर्मास्यव्रतवर्णनम्	३५
२४ रुक्मांगदमोहिन्योः संवादेराजन्यदि मेप्रीतोसि चेद्धरिवासरे नृपव्रतभंगे मोहिनीउद्योग मोहिनीसंबोधनं भोजनंकुर्वित्यादिकथनं मोहिनी कथयाति गुर्विणिगृहस्थक्षीणरोगिशिशुचिरजातराजाभारवहसंग्रामाक्षितिसेविनां पतिव्रतानांच उपवासोनयुक्त इत्यादिकथनं.	३५
२५ हरिवासरेभोजनं विहाययदन्यद्वोचसे तत्सर्वं कर्त्तास्मीतिनृपवाक्यानंतरमेतद्व्यतिरिक्तं किमपिनेच्छामि वेदेष्वपिउक्तमस्तीत्यादि मोहिनीवाक्यं.	३८
२६ यदिपातालाच्छीर्यते पृथ्वीजलधिःशोषमायातिहिमवान् परिवर्तयेत् उष्णत्वं पावकस्त्यजेत् तथापिनाहं हरिवासर सेवनं नत्यजामि इत्युक्तएवंधर्मराज्योभवस्त्वकृतकृत्यागमिष्यामीतिब्रुवतिब्राह्मणैःसहजगाम एतस्मिन्नेवकाले धर्मांगदोवराश्वारूढः समाजगामकोलाहलं श्रुतवान् मोहिनीमपृच्छत देविकेनापमानितासि इत्युक्ते पूर्ववृत्तांतकथयाति.	४०
२७ ततो धर्मांगदःपितुःसमिपं गत्वाइदमूचे तात त्वां सानृतीवदति मयिजीवाति कस्मादनृती भविष्यसि दुर्लभतरमापि अस्यैप्रयच्छ नृपःप्राहकीर्तिर्नस्यतु अस्त्योवाभवाम्यापि हरिवासरे भोजनं नकरिष्यामीत्यादिकथनं.	४३
२८ ततो उभयोःसंविदंज्ञात्वा संध्यावलीमुवाच मातरेनां शांत्वय नृपस्य हरिवासरे भोजनायस्थितांश्लक्ष्णयागिरा संध्यावली सद्वीपवनकाननंराज्यं गृहाणेत्यादिवाक्यैर्बोध्यमानापिसानबुबुधे एवंतवममचमाणहरं तथालोकानांच	

CC-0. In Public Domain. Digitization by eGangotri

अध्याय.	पत्रांक.
प्राणहरंवाक्यं तेयशःभर्तुःकीर्तिः पुत्रप्रसंसाममधिग्विवादः	४३
२९ स कीदृशंवाक्यं ब्याहर आत्मनोनिधनोवा पुत्रस्यनिधनोवा भर्त्रर्थेकरोमि ममकौमारिभावे मत्पितुः काष्ठपाटकसखीभिःसहिता वनेकाष्ठपाटको यत्रास्ते तत्र मया काष्ठीलाकाष्ठमध्ये दृष्टा नवनीतनिभोदेहोमुखंचाञ्जनसंनिभं साध्वांक्षेण गृहीता सावेपमाना मूर्छनांप्राप्ता मया जलेन संसिक्ता चेतनान्विता मानुषींवाचं ब्याहरत् साकळेपुरे कौण्डिन्यइत्येवसर्वकर्मायिद्ब्राह्मण आसीत् तस्य दुहिताहं कुलीनायब्राह्मणाय ददौ मद् भर्ता राजमंदिरं ययौ तत्र वेश्याः नृपगृहं प्रविशत्यस्तेनैकावेश्या समानीता मया तस्याभरणादिकं हारितं सर्वमपि क्षेत्रभांडादिकं विक्रीय नदनदीपतिं नावमारुह्य तरसा लवणोदधिं प्रविष्टोगिरिशृंगमारुरोह ताल्वाधस्तात्ससुष्वाप तत्रागाद्राक्षसोघोरो गर्जमानेयथाघनस्तन्वंगीं काशिपतेःपुत्रींरत्नावलींमंकेनादाय आजगाम तस्य भार्या प्रश्रयोपेता अब्रवीत् पतिकामाहं पृच्छामीत्यनेकवाक्यालापकथनं.	४८
३० राक्षस्या ब्राह्मणविश्वमनं राक्षसवधकथनं काशीमहात्म्यवर्णनंचेति.	४९
३१ काशिपतये राक्षसस्य सर्ववृत्तान्त कथनं ब्राह्मणरत्नावल्योर्विबाहकरणं ब्राह्मणेन स्वज्येष्ठपत्नींप्रति भारवाहक प्रेषणं सखीभिर्ब्राह्मण्या निन्दाघर्णनं ब्राह्मणी स्वगृहगमनंचेति.	५०
३२ संध्याबलीकाष्ठिलोपाख्यानंमावस्नान माहात्म्यवर्णनं भीमैकादश्युपवाशफल कथनंच.	५४

॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्याय.	पत्रांक.
३३ एवंचेत् देहि पुत्रशिरो मह्यं यद्दिष्टं हृदयाधिकं इतिमोहिन्या बचनानंतरं धनजनादिकं सर्व त्यजामि किंतु द्वादशीसेवनं न त्यजामीति सन्ध्यावली वाक्य कथनम्.	५६
३४ राजन् धर्मपालय द्वादश्यां माभुङ्क्था पुत्रं व्यापादयेत्यादि कथनं.	५६
३५ मोहिनींप्रति राजवाक्यं राजानंप्रति धर्मांगदवाक्यं च.	५७
३६ पुत्रवचनं श्रुत्वा संध्यावल्या मुखंवीक्ष मोहिन्याः क्रूरं वचनं श्रुत्वा पुत्रनाशाय मतिं चकार शंखचक्रगदापद्महस्तो गरुडारूढो सर्वलक्षणलक्षितो नारायणदेहे सराजारुक्मांगदलीनो बभूवेत्यादि कथनं.	५९
३७ यमनारायणयोः संवाद मोहिनीसमागम वर्णनं च.	६०
३८ मोहिनी भस्मकरण वर्णनं.	६२
३९ मोहिनी भस्मकरणानंतरं विप्रप्रसादन वर्णनंचेति.	६३
४० मोहिन्यास्थानानिर्णयस्तिथिविवरणम् विघ्नविनाशिनीद्वादशी माहात्म्य वर्णनंतस्याःप्रभावकथनं चेति.	६४

इति

श्रीककारादिकालीकासहस्रनाम साङ्गोपाङ्ग

अद्य भवदग्रे हर्षदायकद्रव्यं नीत्वा ह्युपास्थितोस्मि. श्रीगुह्यकाल्या कृपया भवतां पूर्णसहायेन श्रीककारादिकालिकासहस्रनामाख्यपुस्तकं मुद्रितमस्ति सन्तिकाल्या ह्यनेकसहस्रनाम्नो लभ्यन्ते किन्त्वयं ककाराद्यप्रभृति नमुद्रित निम्नालिखितमप्यतिदुर्लभ दैववसाल्लब्धांप्यशुद्धत्वात् पाठकरणेतिकष्टः सदुखदूरीकरणायासीतिवर्षसंमितवृद्धेनापि पाठकरणेसमर्था भवेयुरित्यासयेन मुक्ताफलवन्मनोहर स्थूलाक्षरकीलकैः सुष्टुपत्रेषु ककारादिकालिकासहस्रनामाभिधानं मुद्रितमस्ति तस्मादार्यवरैरास्मिन्ग्रन्थे अवश्य प्रीतिपूर्वकसुदृष्टिंकरिष्यन्ति मूल्यमपि सर्वेषां सुखेच्छया विदेशीयकागजेषु दशाणकाः स्वदेशीयकागजेषु द्वादशाणकाः स्थापितमस्ति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ ॥ पान्तुवो जलदश्यामा शार्ङ्गज्यापातकर्कशाः ॥ त्रैलोक्य मण्डपस्तंभा श्चत्वारोहरिवाहनः ॥ सुरासुरशिरोरत्न निर्घृष्ट मणिरञ्जितम् ॥ हरिपादांबुज द्वंद्वमभीष्टप्रदमस्तुवः ॥ मान्धाताउवाच ॥ पापेंधनस्यघोरस्य शुष्कार्द्रस्य तुभ्यरिशः ॥ कोवह्निर्दहनेतेषां तद्भवान्वक्तुमर्हसि ॥ नाज्ञातंत्रिषुलोकेषु चतुर्मुखगृहौजसः ॥ विद्यतेतवविप्रेन्द्र त्रिविधश्चसुनिश्चितम् ॥ अज्ञातं पातकंशुष्कं ज्ञातमार्द्रमुदाहृतम् ॥ एष्यवाप्यथवातीतं वर्त्तमानंचतद्भवेत् ॥ वह्निनाकेनतद्भस्म भवेदेतद्ब्रवीहिमे ॥ वशिष्ठउवाच ॥ श्रूयतां नृपशार्दूल वह्निनायेननिर्दहेत ॥ शुष्कार्द्रपातकंघोरं एष्यातीतसमुद्भवम् ॥ संप्राप्य वासरंविष्णो र्योनरःसंयतेन्द्रियः ॥ उपवासपरोभूत्वा पूजयेन्मधुसूदनं ॥ मान्धातर्दानशीलश्च रात्रौजागरणान्वितः ॥ विशोधयति पापानि कितवश्चधनंयथा ॥ एकादशीसमुत्थेन वह्निनापातकेंधनम् ॥ भस्मतांयातिराजेन्द्र आजन्ममरणोद्भवम् ॥ नेदृशंपावनंकिञ्चित् नराणामिहविद्यते ॥ यादृशंपद्मनाभस्य दिनंपापप्रणाशनम् ॥ तावत्पापानिदेहेस्मिन् तिष्ठन्तिमनुजाधिप ॥ यावन्नोपवसेज्जन्तुः पद्मनाभदिनंशुभम् ॥ अश्वमेधसहस्राणि राजसूयशतानिच ॥ एकादश्युपवासस्य कलांनार्हतिषोडशीं ॥ एकादशेन्द्रियैःपापं यत्कृतंभवतिप्रभो ॥ एकादश्युपवासेन तत्सर्वंविलयंव्रजेत् ॥ एकादशीसमंपुण्यं पापत्राणंनविद्यते ॥ व्याजेनापिकृताराजन् नदर्शयतिभास्करी ॥ सर्वसौख्यप्रदाह्येषा सर्वारोग्यप्रदायिनी ॥ सुकलत्रप्रदाह्येषा राजन्पुत्रप्रदायिनी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नगङ्गानगयाभूप नकाशीनचपुष्करम् ॥ नचापिकौरवंक्षेत्रं नरेवानचदेविका ॥ यमुना चन्द्रभागाच पुण्याभूय हरेर्दिनात् ॥
अनायासेनराजेन्द्र प्राप्यतेवैष्णवंपदम् ॥ रात्रौजागरणंकृत्वा समुपोष्यहरेर्दिनम् ॥ दशैवमातृकेपक्षे दशराजेन्द्रपैतृके ॥ प्रि-
यायादशपक्षेषु पुरुषानुद्धरेन्नरः ॥ आत्मनासहराजेन्द्र नयनेवैष्णवंपदम् ॥ सर्वपापविनिर्मुक्तो विष्णुलोकेवसेन्नरः ॥ चिन्ताम-
णिमपिह्येषा अथवापिनिधेःसमा ॥ सकल्पपादपप्रख्या वेदवाक्योपमातथा ॥ द्वादशीतिप्रपन्नाहि नरानरवरोत्तमः ॥ तेद्वंद्ववा-
हवोजाता नागारिकृतकेतना ॥ तद्विद्यापीतवस्त्रीहि प्रयांतिहरिमन्दिरम् ॥ एषप्रभावोहिमया द्वादश्यापरिकीर्तिता ॥ पापेन्ध-
नस्यघोरस्य पावकाख्योमहीयते ॥ हरेर्दिनंसदायोष्यं नरैर्धर्मपरायणैः ॥ यदिच्छेद्विपुलान्कामान् पुत्रपौत्रादिकांस्तथा ॥ हरि-
दिनमुपवासी योनरःसंयतात्मा प्रविशतिनपुनर्वै भूपकोशेजनन्या ॥ बहुवृजिनसमेतः कामभोगाविभूतो व्रजतिपदमचिन्त्यं
लोकवन्द्यस्यविष्णोः ॥ २६ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते द्वादशीमाहात्म्ये प्रथमोध्यायः ॥ १ ॥ छ छ
बशिष्ठउवाच ॥ इममेवमहाप्रश्नं नैमिषारण्यबाशिनः ॥ पप्रच्छुरमलासूतं व्यासशिष्यंमहामुनिम् ॥ सचस्पृष्टोमहातेजा एकाद-
श्याःसविस्तरम् ॥ माहात्म्यंकथयामास उपवासविधिक्रमात् ॥ तद्वाक्यंसूतपुत्रस्य श्रुत्वाद्विजबरोत्तमाः ॥ माहात्म्यंचक्रिणोर्ह-
स्य सर्वपापःप्रशान्तये ॥ पुनःपप्रच्छुरमलाः सूतंपौराणिकंतदा ॥ अष्टादशपुराणानि भवाञ्ज्ञानातिमानद ॥ महाभारतमुक्ता- ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नि सकासात्कालिजस्यतु ॥ तत्रास्तियत्रवेदेषु पुराणेषुस्मृतिष्वपि ॥ चरितेरघुनाथस्य शतकोटिप्रविस्तरे ॥ सोस्माकंसंशयःक-
श्चिद् हृदयेपरिवर्त्तते ॥ तद्भवानचिरेणेह प्रब्रवीतुयथार्थतः ॥ तिथेःप्रान्तमुपोष्यंहि अहोस्मिन्मूलमुच्यताम् ॥ दैवेपित्रेसमाख्या-
हि नावेद्यंविद्यतेतव ॥ सूतउवाच ॥ तिथेःप्रान्तंसुराख्यंहि उपोष्यंकवयोविदुः ॥ पैत्र्यंमूलंतिथेःप्रोक्तं शास्त्रज्ञै धर्मकोविदैः ॥
अतःप्रान्तमुपोष्यंति तीर्थधर्मफलेसवः ॥ मूलंहिपितृतृप्त्यर्थं तिथेःप्रोक्तंमनीषिभिः ॥ पूर्वविद्धाप्रकर्त्तव्या तृतीयाषाष्ठिसंयुताः ॥
अष्टम्येकादशीभूता धर्मकामार्थवांछसि ॥ पूर्वविद्धाद्विजश्रेष्ठाः कर्त्तव्यासप्तमीसदा ॥ दर्शश्चपौर्णमासीच पितुःसांवत्सरंदिनम् ॥
पूर्ववद्धेमकुर्वाणो नरकंप्रतिपद्यते ॥ हानिश्चसन्ततेःप्रोक्ता दौर्भाग्यंसमवाप्नुयात् ॥ एतच्छ्रुतंमयाविप्राः कृष्णद्वैपायनात्पुरा ॥
ऋषीणांधर्मसंवाद स्तिथिसंदेहतेतथा ॥ आदित्योदयवेलायां यास्तोकापितिथिर्भवेत् ॥ पूर्णासात्वनुमन्तव्या प्रभूतानोदयंविना ॥
पारणेमरणेनृणां तिथिस्तात्कालिकीमता ॥ पैत्र्येस्तमयवेलायां स्पृशत्युच्चैवगम्यते ॥ नतत्रोदयनीग्राह्या दैवेत्युदयिनीतिथिः ॥
षडहंशोधयेत्प्राज्ञ स्तिथिंदैवज्ञचिन्तकान् ॥ तिथेःप्रमाणंविप्रेन्द्राः क्षपाकरदिवाकरौ ॥ पूर्वायासंगदोषेण नोयोष्यास्नानपूजने ॥
बर्जयन्तिनरास्तज्ज्ञायासान्तुचतुरोद्विजाः ॥ तदूर्ध्वस्नानपूजादि कर्त्तव्यंतदुपोष्यतैः ॥ नदिवाशुद्धिमाप्नोति तदारात्रौविधीयते ॥
दिनकर्मतुशेषंहि कर्त्तव्यंसर्वरीमुखे ॥ विधिरेष समाख्यातो नराणामुपवासिनाम् ॥ अन्यायामपिविप्रेन्द्रा द्वादश्यामरुणोदये ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नानार्चनक्रियाकार्या दानहोमादिसंयुता ॥ त्रयोदश्यांहिशुद्धायां पारणेपृथिवीफलं ॥ शतयज्ञादिकंचापि नरःप्राप्नोत्यसंशयं ॥
एतस्मात्कारणाद्विप्राः प्रत्यूषेस्नानमाचरेत् ॥ पितृतर्पणसंयुक्त मल्पांदृष्ट्वैवद्वादशीं ॥ महाहानिकराह्येषा द्वादशीलंघितानृणां ॥
करोतिधर्माहरणमस्नातेच सरस्वती ॥ क्षयेवाप्यथवावृद्धौ संप्राप्ते हरिवासरे ॥ उपोष्यद्वादशीपुण्या पूर्वविद्धां विवर्जयेत् ॥ ऋ-
षयऊचुः ॥ यदानप्राप्यतेसौते द्वादश्याःपूर्वसंभवा ॥ तदोपवासोहिकथं कर्त्तव्योमानवैर्वद ॥ उपवासदिनंसूत यदाभवतिपूर्वया ॥
द्वितीयेह्नियदानस्यात् स्वल्पाप्येकादशीतिथिः ॥ सन्देहेतत्रसञ्जाते द्वादश्येकादशीभवेत् ॥ तत्रोपवासोविहितः कथंतद्वदसूतज ॥
सूतउवाच ॥ यदानप्राप्यतेविप्रा द्वादश्यांपूर्ववासरः ॥ रविचक्रार्द्धमात्रापि तदोपोष्यं परंदिनम् ॥ बह्वागमविरोधेषु विवदत्सु
द्विजेषुच ॥ उपोष्याद्वादशीपुण्या त्रयोदश्यांतुपारणम् ॥ एकादश्यांतुविद्धायां संप्राप्तेश्रवणेतथा ॥ सोपोष्याद्वादशीपुण्या स-
र्वपापक्षयावहा ॥ एषवोनिर्णयःप्रोक्तो मयाशास्त्रविनिश्चयात् ॥ किमन्यच्छ्रोतुकामाहि तद्भवन्तो वदन्तुमे ॥ ऋषयऊचुः ॥ यु-
गादीनांविधिंसूत वदस्ववदतांवर ॥ रवेःसंक्रमयोगानां नावेद्यंविद्यतेतव ॥ अमावास्याष्टकाकार्या सापिचैकानिरर्थकैः ॥ ए-
वंनसंशयंस्पृष्ठो वक्तुमर्हसिसूतज ॥ सूतउवाच ॥ द्वेशुक्लेद्वेतथाकृष्णे युगाद्ये कवयोविदुः ॥ शुक्लेपूर्वाह्निकेग्राह्ये कृष्णेग्राह्येपरा-
ह्निके ॥ अयनंदिनभोगाढ्यं संक्रमःषोडशःकला ॥ पूर्वाक्रदक्षिणेभागे अतीतेचोत्तरायणे ॥ मध्यकालेतुविषुवे उदयाख्यःप्रकी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्त्तितः ॥ ज्ञात्वातिथिंनराःसम्यक् संवत्सरनिवेदिताम् ॥ कर्त्तव्यउपवासस्तु अन्यथा नरकंव्रजेत् ॥ पूर्वविद्धांप्रकुर्वाणो नरोधर्म्म निकृन्तनी ॥ सन्ततेस्तुविनाशाय संपदोहरणायच ॥ परवेधोपिविप्रेन्द्रा दशम्येकादशींत्यजेत् ॥ सुरायाविन्दुनास्पृष्टंगंगांभइव संत्यजेत् ॥ श्वदृष्ट्यापञ्चगव्यंच दशम्यादूषितांत्यजेत ॥ एकादशीद्विजश्रेष्ठाः पक्षयोरुभयोरपि ॥ पूर्वविद्धाःपुरादत्ता तिथयःकुशकेतुना ॥ दानवेभ्योद्विजश्रेष्ठाः प्रीणनार्थंमहात्मना ॥ अकालेयद्भवेद्दत्तं अपात्रेचद्विजोत्तमाः ॥ सक्रोधैश्चैवयद्दत्तं तद्दत्तमसुरेषुवै ॥ यदुच्छिष्टेनदत्तंवै यद्दत्तंपतितेषुच ॥ स्त्रीजितेषूच यद्दत्तमसूरेषुच यद्भवेत् ॥ यदेकवाससादत्तं यद्दत्तं जलवर्जितम् ॥ पुनःकीर्त्तनसंयुक्तं तद्दत्तमसुरेषुवै ॥ तस्माद्विप्रानविद्धाहि कर्त्तव्यैकादशीक्वचित् ॥ विद्धाहन्तिपुरापूर्वा श्राद्धेचवृषलीपतिः ॥ जप्तंदत्तंहुतंस्नातं तथापूजाकृतंहरेः ॥ पूर्ववेधेक्षयंयाति तमःसूर्योदयेयथा ॥ जीर्णपतिंयौवनगर्विता यथा त्यजन्तिनार्यो झषकेतनार्दिता ॥ तथाहिवेधं विबुधात्यजन्ति तिथेर्द्विजाधर्म विशुद्धयेसदा ॥ ४८ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गद चरिते तिथिविवरणं नाम द्वितीयोध्यायः ॥ २ ॥ ७ ७ ७ ७ ७ ७ ७ ७

ऋषयऊचुः ॥ विस्तरेणसमाख्याहि विष्णोराराधनक्रियां ॥ ययासन्तोषमायाति प्रददातीसमीहितम् ॥ पूजितापरयाभक्त्या पवित्रैरप्युपक्रमै ॥ लक्ष्मीकान्तोजगन्नाथो निःशेषाघौघनाशनः ॥ सूतउवाच ॥ भक्तिग्राह्योहृषीकेशो नधनैर्धरणीसुराः ॥ भक्त्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संपूजितोविष्णुः प्रददातिसमीहितम् ॥ तस्माद्विप्राःसदाभक्तिः कर्त्तव्याचक्रपाणये ॥ जलेनापिजगन्नाथः पूजितःकेशिहाहरिः ॥
॥ ३ ॥ परितोषंव्रजत्याशु तृषार्त्तःसुजलैर्यथा ॥ अत्रापिश्रूयतेविप्राः आख्यानंपापनाशनम् ॥ रुक्माङ्गदस्यसंवादं ऋषिणागौतमेनह ॥
आसीद्रुक्माङ्गदोराजा सार्वभौमश्रियान्वितः ॥ भक्तःश्रीरक्षयेदेव नित्यतृप्तेनिरञ्जने ॥ नान्यंपश्यतिदेवेशात् पद्मनाभान्महीप-
तिः ॥ वारणंपट्टनंयज्ञे ददातिहरिवासरे ॥ अष्टवर्षाधिकोमर्त्य स्त्वशीतिर्नहिपूर्यते ॥ योभुङ्क्तेमामकेराष्ट्रे विष्णोरहनि पापकृत ॥
समेबध्यश्चदण्ड्यश्च निर्वास्येविषयाद्धनम् ॥ पितावायदिवापुत्रो भार्यावाप्यथवासुहृत् ॥ पद्मनाभदिनेभुङ्क्ते निग्राह्योदस्युवद्भ-
वेत् ॥ ददध्वंविप्रमुख्येभ्यो स्नायध्वंजाह्नवीजले ॥ एवंमद्वचनंकुर्वन् नान्नंभुनक्तुमामकं ॥ वासरेवासरेविष्णोः शुक्लपक्षेमहीप-
तिः ॥ अशुक्लेतुविशेषेण पटहंवादयत्यसौ ॥ एवंप्रघुष्टपटहे सार्वभौमेद्विजोत्तमाः ॥ गच्छाद्भिःसंकुलामार्गः कृतालोकैर्हरेर्द्विजाः ॥
येकेचिन्निधनंयान्ति भूपालविषयेनराः ॥ प्रमदावाद्विजश्रेष्ठा स्तेयान्तिहरिमन्दिरम् ॥ अवश्यंवैष्णवोलोकः प्राप्यतेवैनरैर्ध्रुवं ॥
व्याजेनापिद्विजाःकृत्वा द्वादशींपापनाशिनीं ॥ सोश्नातिपार्थिवंपापं योश्नातिहरिवासरे ॥ प्राप्नोतिपरमंधर्म योनाश्नातिहरेर्दि-
ने ॥ ब्राह्मणोनैवहन्तव्यो इत्येषा वैदिकीश्रुतिः ॥ एकादश्यांनभुञ्जीत पक्षयोरुभयोरपि ॥ वैलक्ष्यमगमद्राजा रविसूनुर्द्विजोत्त- ॥ ३ ॥
माः ॥ लेख्यकर्मणि विश्रान्त श्चित्रगुप्तोभवत्तदा ॥ मार्जितानिचलेख्यानि पुण्यपापोद्भवानिच ॥ गच्छद्भिर्वैश्नवंलोकं स्वक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मैस्थैर्जनैः क्षणात् ॥ शून्यास्तुनरकाःसर्वे पापप्राणि विवर्जिता: ॥ भग्नोयाम्योभवन्मार्गो द्वादशादित्यतापितः ॥ सर्वेपिगरुडारूढा जनायांतिहरेःक्षयम ॥ दिवौकसस्तुयेलोकाः शून्यासर्वेतदाभवत् ॥ त्यक्तेवपितृदेवेभ्यो तीर्थदानादि सत्क्रियाः ॥ मुक्तेकांद्वादशींमर्त्या नान्यंजानन्तिचेदृशीं ॥ शून्येत्रिविष्टपे जाते शून्येपुनरकेषुच ॥ नारदोधर्मराजानं गत्वाचेदमभाषत ॥ नाक्रन्दः श्रूयतेकस्मान्नराणां नरकेतव ॥ नचापिक्रियते लेख्यं किञ्चिद्दुष्कृतकर्मणाम् ॥ चित्रगुप्तो मुनिरिव स्थितोयं मौनसंयुतः ॥ कारणं ब्रूहि राजेन्द्र नयान्ति तव मन्दिरम् ॥ मानवाः पापकर्माणो कलिमाया समन्विताः ॥ एवमुक्ते तु वचने नारदेन महात्मना ॥ प्राह वैवस्वतो राजा किञ्चित् दैन्य समान्वितः ॥ आर्य नारद भूपालः पृथिव्यां सांप्रतंस्थितः ॥ सद्भिभक्तो हृषीकेशे पुराणे पुरुषोत्तमे ॥ पुरोधयति विप्रेन्द्र सकलं पटहेनहि ॥ नभोक्तव्यं नभोक्तव्यं संप्राप्ते हरिवासरे ॥ यः कश्चिन्मनुजो भुङ्क्ते समेदण्ड्यो भविष्यति ॥ तद्भयाद्विजनाःसर्वे द्वादशींसमुपासते ॥ व्याजेनापिद्विजश्रेष्ठ द्वादशीसमुपोषिता ॥ प्रयातिवैष्णवंलोकं दाहप्रलयवर्जितम ॥ द्वादशीसेवनाल्लोकाः प्रयान्तिहरिमन्दिरम् ॥ तेनराज्ञाद्विजश्रेष्ठ सर्गोलुप्तो मयाधुना ॥ कृताहिनरकाःशून्या लोकाश्चत्रिदिवौकसां ॥ विश्रान्तंलेखकंलेख्यं लिखितंमार्जितंजनैः ॥ एकादश्युपवासस्य माहात्म्यंत्वीदृशंमुने ॥ ब्रह्महत्यादिपापानि नभुक्तानिजनैर्द्विज ॥ समुपोष्य दिनंविष्णोः प्रयान्तिपरमांगतिं ॥ सोहंकाष्ठम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योभूत्वा मृगाधिपइवाधुना ॥ निर्विषोनेत्रकर्णौवा सन्ध्याहीनोथवाद्विजः ॥ स्त्रीजितस्तुपुमान्यद्वत् षण्डोवाप्रमदापतिः ॥ त्य-
क्तुकामस्त्वहंब्रह्मन् लोकपालत्वमीदृशम् ॥ यास्याम्मि ब्रह्मभवनं धात्रेकथयितुंस्वयं ॥ निर्व्यापारोनियोगीतु नियोगे तिष्ठतेतु
यः ॥ स्वामिवित्तंसमश्नातः सयातिनरकंध्रुवम् ॥ सूतउवाच ॥ एवमुक्त्वायमोविप्रा नारदेनसमन्वितः ॥ ययौविरिंचिभवनं चि-
त्रगुप्तान्वितोविभुः ॥ सददर्शसमासीनं मूर्त्तामूर्तैःसमावृतम् ॥ वेदाश्रयंजगद्बीजं सर्वेषां प्रपितामहं ॥ स्वयंभूतान्जनिलयमों-
काराक्षरमव्ययं ॥ शुचिःशुचिपरंहंसं तुरीयंब्रह्मलाञ्छनं ॥ उपास्यमानंविबुधै र्लोकपालैर्दिगीश्वरैः ॥ इतिहास पुराणैश्च वेदैर्वै
विग्रहस्थितैः ॥ मूर्त्तिमद्भिःसमुद्रैश्च नदीभिश्चसरोवरैः ॥ देहवद्भिस्तथावृक्षै रश्वत्थाद्यैरशेषतः ॥ वापीकूपतडागैश्च मूर्तिमद्भिश्च
पर्वतैः ॥ अहोरात्रैस्तथापक्षै र्मासैःसंवत्सरैर्विभुः ॥ कलाकाष्ठानिमेषैश्च ऋतुभिश्चायनैर्युगैः ॥ मन्वन्तरैस्तथाकल्पै र्निमेषोन्मेष-
कैस्तथा ॥ ऋक्षैर्योगैश्चकरणैः पौर्णमास्यान्तमिक्षपैः ॥ सुखैर्दुःखैर्द्विजश्रेष्ठा लाभालाभैर्जयाजयैः ॥ अश्वमेधादिभिर्यज्ञै र्मूर्त्तिम-
द्भिरुपासितं ॥ सत्यानृताभ्यांपापेन धर्मेणोपास्यतेविभुः ॥ कर्मबद्धैश्चपुरुषै रात्मभूतैरुपास्यते ॥ सत्वेनरजसाचैव तमसाचपि-
तामहं ॥ शान्तमूढातिघोरैश्च विकारैःप्राकृतैर्विभुः ॥ इन्द्रियैर्विषयैश्चैव मूर्त्तिमद्भिरुपास्यते ॥ वायुनादेवदेवेशः श्लेष्मपित्तादि-
भिस्तथा ॥ आनन्दरूपेणविभुः परमेनसमन्वितः ॥ अनुक्तैरपिभूताद्यैः संवृतोलोककृद्विभुः ॥ देवविप्रैर्मुनिवरै रितिहासैःस-

॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मभिः ॥ दुरुक्तकटुवाक्यैश्च मूर्त्तिमद्भिरुपास्यते ॥ तेषांमध्येविशच्छौरिः सचीदेववधूर्यथा ॥ विलोकयं धरास्पृष्टं नालमुक्तुं किञ्चन ॥ तंप्रविष्टं यमंदृष्ट्वा सकायस्थंसनारदम् ॥ तेविस्मितामिथश्चोचुः किमयं भास्करिरिविह ॥ संप्राप्तो लोककर्त्तारं द्रष्टुंदेवं पितामहं ॥ निर्व्यापारःक्षणमपि योयंनास्तेरवेःसुतः ॥ सोयमद्यागतःकस्मात् कच्चित्क्षेमंदिवौकसां ॥ आश्चर्यातिशयंमन्ये संमार्जितपटस्त्वयं ॥ सलेखकस्तुसंप्राप्तो दैन्येनमहताव्रृतः ॥ नकेनाचित्पटोह्यस्य मार्जितोधर्मभूरिणा ॥ यन्नदृष्टंश्रुतंवापि तदिदैवप्रदृश्यते ॥ एवंकथयतांतेषां भूतानां भूतशासनः ॥ निपपातप्रतोभूमौ ब्राह्मणोरविनन्दनः ॥ मूलंकृतोयमाशाखी, त्राहि त्राहि रुदाभिच ॥ पटाभूतास्मि देवेश संमार्जितपटःकृतः ॥ त्वयानाथेनसकलं पश्यामिकमलासन ॥ सूतउवाच ॥ एवंब्रुवन्मुनिश्रेष्ठो वभूवद्विजसत्तमाः ॥ ततोहलहलाशब्दः सभयं समपद्यत ॥ योहिनोद्यते सर्वान् लोकांस्थावरजङ्गमान् ॥ सोयं रोदितिदुःखार्त्तः कस्माद्वैवस्वतोयमः ॥ सत्येयंलौकिकीगाथा सर्बथाप्रतिभातिनः ॥ जनसंतापकृत्ताप मचिरेण प्रपद्यते ॥ नहिदुष्कृतकर्त्ताहि नरःप्राप्नोतिशोभनं ॥ ततोनिवारयामास वायुस्तेषां वचस्तदा ॥ लोकानांसमवेत्तानां मतंज्ञात्वाहि वेधसः ॥ निवार्यलोकसंलापं शनैरुत्थापयंहरिः ॥ भुजाभ्यां साधुपीनाभ्यां लोकमूर्तिरुदारधीः ॥ विह्वलं तस्यचायान्तमासने संन्यवेशयत् ॥ सकायस्थमुवाचेदं व्योमव्यापी रवेःसुतं ॥ केनत्वमभिभूतोसि केनस्थानाद्विवासितः ॥ केनापमार्जितोदेव पटोलोक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 पटस्तव ॥ ब्रूहिसर्वमशेषेण कुशकेतोस्त्वमग्रतः ॥ यःप्रभुस्तात सर्वेषां सतेकर्त्तासमुन्नतिं ॥ अपनेष्यति मार्त्तण्डो दुःखन्तेहृ-
॥ ८ ॥ दिसंस्थितं ॥ सएवमुक्तस्तु समीरणेन दिनेशसूनुस्तमथाबभाषे ॥ विलोक्यवक्त्रं कुशकेतुसूनो सगद्गदं मन्दमुवाचमन्दः ॥
६६ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते यमपरितापो नामः तृतीयोध्यायः ॥ ३ ॥ छ छ छ छ छ
यमउवाच ॥ शृणुमेवचनं शंभो पितामहपितामह ॥ मरणादधिकंदेव यत्प्रतापस्यखण्डनं ॥ नियोगीनांनियोगंयः करोतिकम-
लासन ॥ प्रभोर्वेत नमश्नाति सभवेत्काष्ठकीटकः ॥ योहिलोभाद्धरेर्वित्तं प्रजाभ्योवामहामते ॥ नियोगीनरकंयाति यावत्क-
ल्पशतत्रयं ॥ निस्पृहोनाचरेद्यस्तु नियोगंपद्मसंभव ॥ कृमिकूपेखलुलुठन् सदासनरकेवसेत ॥ आत्मकार्यपरोयस्तु स्वामिकार्यं
विलुंपति ॥ भवेदश्मनिपापात्मा आखुः कल्पशतत्रयं ॥ नियोगीयस्तुभूत्वावै स्ववेश्मनिचयोजयेत् ॥ भक्त्यावैकर्मकरणे मा-
र्जारो जायतेनरः ॥ सोहंदेवतवादेशात् प्रजाधर्मेणशासयन् ॥ पुण्येनपुण्यकर्त्तारं पापान्यायेनकर्मणा ॥ सम्यग्विचार्यसुनिभि
र्भवद्भिश्चसदाप्रभो ॥ कल्पादौवर्त्तमानस्ययावदद्यदिनंगतं ॥ सोहंत्वदीयंहिविभो नियोगंनैवसक्नुयां ॥ रुक्माङ्गदेनतेभग्नो नि-
योगोभूभुजाक्षितौ ॥ भयाद्यस्यजगन्नाथ पृथिवी सागरांबरा ॥ नभुङ्क्तेवासरेविष्णोः सर्वपापप्रणाशने ॥ विहायसर्वधर्मास्तु वि-
हायपितृपूजनं ॥ विहायदेवपूजातु सर्वतीर्थादि सत्क्रियां ॥ योगसांख्यावुभौत्यक्त्वा तथाप्राणनिरोधनं ॥ त्यक्त्वास्वाध्यायहोमौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु कृत्वापापानिभूरिशः ॥ प्रयाति वैष्णवंलोकमुपोष्य हरिवासरे ॥ मनुजाःपितृभिःसार्द्धं तथैवचपितामहैः ॥ तेषामपीहपितरः पितृणांपितरस्तथा ॥ तथामातामहायान्ति मातुर्येजनकास्तथा ॥ तेषामपिजनेतारो जनितृणांचपूर्वशः ॥ एतद्दुःखं पुनर्देव मममस्तकभेदनं ॥ यत्पूर्वेपितरोयान्ति मार्जयित्वा लिपिंमम ॥ पितृणांवीजयोयेस्युः र्द्धात्र्याःकुक्षौ धृताविभो ॥ यदेकेन कृतंकर्म तदेकेनैवभुज्यते ॥ तंनिरस्यकृतंदेव वीजंधान्य समुद्भवं ॥ तारयेत्सउभौपक्षौ ध्वंसितोयस्यविग्रहः ॥ वीजभोक्ताभवेत्सोमो धाताधार्य विसोदरे ॥ एतस्यात्सक्षयुग्मंतु वारयेन्नरपुंगवः ॥ नभार्यायामभवेद्बीजं नभार्याकुक्षिधारणं ॥ कथंतस्याजगन्नाथ पक्षोयातिपरंपदं ॥ यामातुः पुण्यमाहात्म्यं नूनंमेशिरसोव्यथा ॥ नमेप्रयोजनंदेव योगेनशद्दशेनवै ॥ एकादश्युपवासीयः समांत्यक्त्वाहरिंव्रजेत् ॥ कुलत्रयं समुद्धृत्य स्वात्मनासहपद्मज ॥ त्यक्त्वातुममनार्गंतु प्रयान्ति हरिमन्दिरं ॥ नयज्ञैस्ताद्दशं देव गतिमाप्नोति मानवः ॥ नतीर्थैर्नापिदानाद्यै र्नव्रतैर्विष्णुवर्जितैः ॥ नजलैः पावकैश्चापि मृतःप्राप्नोतितांगतिं ॥ योगैर्वासं युगैर्वापि भृगोर्वा पतनैस्तथा ॥ याद्दशंसमवाप्नोति उपोष्यहरिवासरं ॥ गतिंगतिमतांश्रेष्ठ सत्यमेतदुदीरितं ॥ हरेर्दिनेधातृफलांगलिप्तो विमुच्यवांछारसभोजनोद्भवं ॥ प्रयातिलोकं धरणीधरस्य विभ्रष्टकर्मापिमनुष्यजन्मा ॥ सोहंनिरासस्तु विहीनकर्मा तवागतःपादसरोजयुग्मं ॥ विज्ञप्तमत्रादि यदाप्तकालं कुरुष्वसर्गस्थितिनाशहेतोः ॥ येस्युःसदापापकृतो विहीना यन्मामकैर्भु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तगणैर्मनुष्याः ॥ नियन्त्रिताःशृङ्खलरज्जुबन्धनैः समीपगास्तेवशगाभवेयुः ॥ भग्नस्तुमार्गो रवितापयुक्तः सदुःखदातातितरांज-
नेभ्यः ॥ विमुच्यकुंभी सकलाजनौघाः प्रयान्ति तद्धाम परात्परस्य ॥ २६ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते य-
म विलापोनाम चतुर्थोध्यायः ॥ ४ ॥ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७
यमउवाच ॥ दृश्यतांसमनुप्राप्तः पन्थादेवस्यचक्रिणः ॥ कुत्सितैर्गच्छमानैस्तु नरैस्त्रिभुवनार्चितैः ॥ अप्रमाणमहंमन्ये लोकंवि-
ष्णोर्जगत्पते ॥ योह्यपुण्यजनौघैस्तु नसंघोयातिखर्वतां ॥ माधवैःसेवनेहंस समस्तेन पितामह ॥ स्वकर्मस्थाजनाः सर्वे शुचयो
व्याप्यवृत्तयः ॥ उपोष्यवासरंविष्णो र्लोकंयान्ति नृपाज्ञया ॥ सोस्माकंचमहाशत्रु र्भवतांचविशेषतः ॥ निग्राह्योयंजगन्नाथ भ-
वेद्दण्ड्योमहीपतिः ॥ तेनवर्षसहस्रेण शासनात्क्षितिमण्डलं ॥ अप्रमेयोजनोनीतो वैकुण्ठंहरिवल्लभं ॥ आरोपयित्वागरुडे कृत्वादे-
हंचतुर्भुजं ॥ पीतवस्त्रपरीधानं स्रग्विणं चारुलोचनं ॥ यदिस्थास्यातिदेवेशे सोद्यत्वांमाधवप्रियः ॥ समस्तमेष्यतेलोकः पार्थि-
वोनात्रसंशयः ॥ एवं दण्डपटोह्येष तवपद्म्यांनियोजितः ॥ लोकपालत्वमेतत्तु मार्जितंतेनभूभुजा ॥ रुक्माङ्गदेन देवेश ध-
न्यासासधृतोयया ॥ सर्वदुःख विनाशाय मात्राजातोगुणाधिकः ॥ किमपत्येनजातेन मातुःक्लेशकरेणहि ॥ यो नतापयतेशत्रुं
ज्येष्ठमासीवभास्करः ॥ वृथास्त्रीभाववन्ध्यासौ जातावेवकुपूरुषः ॥ प्रोच्यते मातृहासद्भि र्वृथातस्यैवजीवितं ॥ यस्यनस्फुरतेकी- ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्ति र्धनस्थेवशतह्रदाः ।। यःपितुर्नोद्धरेत्पक्षं विद्ययावाबलेनवा ।। मातुर्जठरजोरोगः सप्रसूतोधगतले ।। धर्मेचार्थेचकामेच प्रती-
तोयोभवेत्सुतः ।। पापहासस्यते साद्धि मद्दूतागोचरोहिसः ।। एकैवीरसूर्लोके विरिंचेनात्रसंशयः ।। ययारुक्मांगदोजातो म-
लिपेमार्जनायवै ।। नेदंव्यवसितंदेव केनचित्क्षितिपेनहि ।। पुराणेपि जगन्नाथ नश्रुतंपदमार्जनं ।। सोहंनजीवामि जगत्पतेद्य
दृष्ट्वाक्षितीशं हरिततपरंतं ।। प्रवादयन्तं पटहंसुघोरं प्रलोपयन्तं ममदेशमार्गं ।। १७ ।। इतिश्री लघुना० रु० पञ्चमोध्यायः ।। ५ ।।
ब्रह्मोवाच ।। किमाश्चर्य्यंत्वयादृष्टं कथंवाखिद्यतेत्वया ।। सद्गुणेष्वपियस्तापः सतापोमरणांतिकः ।। यस्योच्चारणमात्रेण प्राप्यतेपर-
मंपदं ।। तदुपोष्यकथंशौरे नगच्छंति नरोदिवं ।। एकोपिकृष्णस्यकृतःप्रणामो दशाश्वमेधावभृथेनतुल्यः ।। दशाश्वमेधीपुनरेति
जन्म कृष्णप्रणामी नपुनर्भवाय ।। कुरुक्षेत्रेणकिंतस्य किंकाश्यासेवयाथवा ।। जिह्वाग्रेवर्त्ततेयस्य हरिरित्यक्षरद्वयं ।। ब्राह्मणःस्वा
पचींगच्छन्विशेषेणरजस्वलां ।। अश्नातिसुरयापक्वं मरणेहरिमुच्चरन् ।। प्राणहिंसारतासर्वे मिथ्यावादसमन्विताः ।। अभक्षाशनसं
जातं विहायाघौघसंचयं ।। हरेरुच्चारणादेव वैकुण्ठंप्रतियांतिहि ।। प्रयातिविष्णुसायुज्यं विमुक्तोभवकिल्विषैः ।। यस्योच्चारेभवे-
न्मोक्षः कथंतस्याउपोषणे ।। येनासौगीयतेसोपि विन्दते पुरुषोत्तमं ।। लीलयाप्राचरेदेवं शृण्वन्नापि जनार्द्दनं ।। गंगांभःप्लुत
पुण्यत्वे सनरःसमतांव्रजेत ।। अस्माकंतुजगन्नाथो जनितापुरुषोत्तमः ।। कथंदूषयासिप्राज्ञ तस्यवासरसेविनम् ।। यस्त्वंनचूर्णि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्तैस्तु यस्त्वंदद्धोनतैर्द्दढं ॥ तदस्माकंकृतंमान मेतत्वंनविबुध्यसे ॥ योनियोगीनजानाति नृपभक्तान्क्षिताविह ॥ सुहृत्स्वजन
संयुक्तः सतैर्निग्राह्यतेपुनः ॥ राजाज्ञानानियंतव्या सापराधानियोगिना ॥ स्वामीप्रसादाच्छुद्धास्ते नियच्छेयुर्नियोगिनं ॥ त-
थाहिपापकर्त्तारः प्रणतायेजनार्द्दने ॥ कथंसंपादितातेषां भवान्स्याद्धातु नन्दन ॥ शैवोभास्करभक्तोवा मद्भक्तोवा दिवाकरे ॥
करोतितवसाहाय्यं हरिभक्तो नभास्करे ॥ सर्वेषामेवदेवाना मादिष्ठामधुसूदनः ॥ मधुसूदनभक्तानां निग्रहोनोपपद्यते ॥ व्या-
जेनापिकृतायैस्तु द्वादशीपक्षयोर्द्वयोः ॥ अपमानेकृतेतैस्तु नतत्राहंसहायवान् ॥ कृतेतुमार्गे तवसूर्य्यसूनो भवेदनीतिर्मम हर्ष
हन्त्री ॥ विपर्य्ययोब्रह्मसदानपुण्ये कृतेविमर्द्दे सहविष्णुभक्तैः ॥ १८ ॥ इतिश्रीलघुनारदीय पु० रु० चरितेब्रह्मवाक्यं नाम ६
सूतउवाच ॥ स्वयंभुवोवचश्श्रुत्वा नारदोत्थाप्रपीडितं ॥ नष्टुक्तदेवदेवेश धर्मराजोमतिप्रभो ॥ वाक्यंस्वेताद्दशंवक्तुं नियोगेतव
संस्थितं ॥ सधर्मस्थापनेयुक्तं पापानांनिग्रहेरतं ॥ यमउवाच ॥ प्राप्तंतातमयासर्वं तदंघ्रिनमिताविह ॥ नाहंयास्येपुनःकर्तुं नि-
योगंतवपङ्कज ॥ प्रशासतिमहीपाले हाटकांगदसंज्ञके ॥ तमेकंदेवतंश्रेष्ठं संप्राप्ते हरिवासरे ॥ यदिचालयसेधैर्य्या त्ततोहंतवकिं-
करः ॥ समेशत्रुर्महाशंभो तेनलुप्तःसदामम ॥ तमेकंभोजयत्वंहि कार्ष्णेहनि महीपतिं ॥ कृतकृत्योभविष्यामि गयापिण्डकृतो
यथा ॥ अद्यप्रभृतिदेवेश यैर्नरैःसंस्मृतोहरिः ॥ उपोषितस्ततोवापि ननियस्या पितामहं ॥ हरिरितिसकृद्वच रन्तिदस्युच्छलव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शतोपिहियेजनाःकदाचित् ॥ जननिजठरमध्ये मुक्तमार्गा ममनालिपिंप्रविशन्तितेहिमर्त्या ॥ इत्युदीरितमाकर्ण्य देवर्षिर्नारदस्तथा ॥ प्रेरयामासदेवेश संसारार्थंयमस्यहि ॥ वशिष्ठउवाच ॥ नारदस्यचवाक्येन यमसंमाननायच ॥ चिंतयामास देवेशो विरिंचिःकुशलाञ्छनः ॥ चिन्तयित्वाक्षणंदेवः सर्वभूतैस्तुदूषितः ॥ भूतसंत्रासनंरूपं जगृहेसतदाविभुः ॥ तस्मिन्नुत्पादयामास प्रमदां लोकमोहिनीं ॥ सर्वयोषिद्वरादेवी मनसानिर्मितात्रिभोः ॥ सावभ्रुवाग्रतस्तस्य सर्वालङ्कारभूषिता ॥ दृष्ट्वापितामहस्तांतु रूपद्रविणसंयुता ॥ माचेतःपश्यतांह्येषा मामकं काममोहितं ॥ प्रत्यवायभयाद्ब्रह्मा चक्षुषीसंनिमीलयेत ॥ नसरागेणमनसा नसरागेणचक्षुषा ॥ चिन्तयेद्वा निरीक्षेद्वा जननींवाथवासुतां ॥ वधूंवाभ्रातृदारांवा गुरुभार्य्यांनृपप्रियां ॥ सयाति नरकं घोरंसंसारं चिन्तयेद्वयः ॥ दृष्ट्वापिप्रमदांह्येता यःक्षोभंव्रजतेनरः ॥ तस्यजन्मकृतंपुण्यं वृथाभवतिनान्यथा ॥ प्रसङ्गेदशसाहस्रं पुण्यमायाति संक्षयम् ॥ पुण्यस्यसंक्षयात्पापः पाषाणाश्चुर्भवेद्ध्रुवं ॥ तस्मान्नचिन्तयेत्प्राज्ञो नैवरागेणवीक्षयत् ॥ जनन्यामपिपादौतुनदद्याद्द्वादशाब्दिकः ॥ सुतस्त्वभ्यंगकरणे किंपुनर्यौवनेस्थितः ॥ षष्ठ्यतीनांसुतोऽभ्यंगे नियुंजीतविचक्षणः ॥ वृद्धोवापियुवावापि वध्वापादौ नदापयेत् ॥ उभयोःपतनंप्रोक्तं रौरवेंगारसंचये ॥ यावद्वधूर्दर्शयेद्व्यंगं विवृतंश्वसुरस्यहि ॥ पाणिपादमृतेगजन् कृमिभिर्भक्षतेचसा ॥ वधूहस्तेनयःपापः पादशौचंकरोतिच ॥ स्नानंवाप्यथवाभ्यंगं विवृतंश्वसुरस्यहि ॥ सूचीमुखैःकृष्णर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रै भक्षतेकच्छपसंस्थितः ॥ तस्मान्नवीक्षयेन्नारीं वधूंवास्वसुतामपि ॥ साभिलाषेणमनसा पततेनरकेयतः ॥ एवंसंचिन्तयित्वाच सूक्ष्मांदृष्टिंचकारह ॥ यदिदंवर्तुलंवक्रं सोन्नतंदृश्यतेशुभं ॥ अस्थिपञ्जरमेतद्धि चर्म्ममांसावृतंतथा ॥ वसामेदोस्थिनयने सोज्वलेस्त्रिषुसंस्थिते ॥ अत्युच्छ्रितमिदंमांसं यत्स्तनाख्यं व्यवस्थितं ॥ निर्मांसतांदर्शयति त्रिवलिजठराश्रिता ॥ पुनरेवाधिकांक्षिप्तमांसंजघनकर्म्माणि ॥ मूत्रद्धारमिदंगुह्यं यत्रमुग्धंजगत्त्रयं ॥ अपानवायुनाजुष्टं सर्वदैवातिकुत्सितं ॥ षडङ्गञ्चकृतातद्वज्जंघातद्वत्कृताध्रुवं ॥ गुल्फास्थितलितंमांसैः कथंसुन्दरतांव्रजेत् ॥ मांसमेदोवसासारं किंसारंदेहिनांवद ॥ विष्टामुत्रमयेकोषे कएवंरज्यतेबुधः ॥ एवंविरिंचिर्वहुधा विचार्य्यज्ञानचक्षुषा ॥ कृत्वाधैर्य्यमुवाचेदं तांनारींगजगामिनीं ॥ यथाहिमनसासृष्टा मयात्वंवरवर्णिनी ॥ तथाभूतासिचार्वंगि मनसोन्मादकारिणी ॥ तमुवाचहसन्वाला प्रणम्यचतुराननं ॥ पश्यमूर्च्छाशनं शम्भो जगत् स्थावरजङ्गमम् ॥ मोहितंममरूपेण स्वयोनिजमकल्मषं ॥ सनास्तित्रिषुलोकेषु यःपुमान्ममदर्शनात् ॥ भवन्तमादितः कृत्वा नक्षोभंयातिपद्मज ॥ आत्मस्तुतिर्नकर्त्तव्या केनचिच्छुभमिच्छता ॥ स्तवनान्नरकंयाति सुविद्वानपिमानवः ॥ तथापि स्तवनं ब्रह्मन् कर्त्तव्यंकार्य्यहेतुना ॥ साहंसृष्टात्वयातात कस्यचित्क्षोभनायवै ॥ तदादिशजगन्नाथ क्षोभयिष्येनसंशयः ॥ मांदृष्ट्वाचेतनोदेव भूधरोपिविलीयते ॥ किंपुनश्चेतनोपेतः श्वासोच्छ्वासीनरास्त्विह ॥ तथाचोक्तंपुराणेषु नरोवीक्षणकर्त्तनं ॥ उन्मादका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णंनृणां दुश्चरव्रतनाशनं ॥ सन्मार्गेतावदास्ते प्रभवतिपुरुषस्तावदेवेन्द्रियाणां लज्जांतावद्विधत्तेविनयमपिसमा लंवतेतावदेव ॥ भ्रूचापाकृष्टमुक्ताःश्रवणपथगतालीनपक्ष्माणएते यावल्लीलावतीनां हृदिनधृतिमुखादृष्टिवालापतन्ति ॥ धिक्कस्यमन्दमनसःक्कुक- वेःकवित्वं यस्त्रीमुखंचशशिनश्चसमीकरोति ॥ भ्रूक्षेपविस्मितकटाक्षनिरीक्षितानि कोपप्रसादसहितानि कुतस्तुचन्द्रे ॥ पीतंहिम- द्यंमनुजेनशम्भोः करोतिमोहंत्वविचक्षणस्य ॥ स्मृतावद्दृष्टायुवतीनरेण विमोहयेदेवसुराधिकाहि ॥ मोहनार्थंत्वयाकस्य निर्मि- ताप्रपितामह ॥ तदादिशजगन्नाथ त्रैलोक्यंमोहयाम्यहं ॥ ब्रह्मोवाच ॥ सत्यमुक्तंत्वयादेवि नासाध्यंभुवनत्रये ॥ त्वांपुरस्कृत्य सुभगे मत्तमातंगगामिनि ॥ सात्वंदूषयतेचेतो ममापिवरवर्णिनि ॥ तन्मयानिगृहीतन्तु भीरुज्ञानांकुशेनहि ॥ सात्वंकथंतुलो- कानां नचेतांस्यवतिष्ठसि ॥ दृष्ट्वावैताद्विशालाक्षि तवरूपैर्विमोहितं ॥ सममेवजगत्सर्वं निश्चेष्टमिवलक्षते ॥ यन्निमित्तंमयासृ- ष्टा तत्साधयवरानने ॥ वैदेशेनगरेराजा नाम्नारुक्मांगदःक्षितौ ॥ यस्यसंध्यावलीभार्य्या तवरूपोपमाशुभा ॥ यस्यांधर्मांगदो जातःपितुरप्यधिकोगुणैः ॥ दशनागायुतवलः प्रतापेतुरविप्रभः ॥ क्षमयायोधरातुल्यो गांभीर्य्ये सागरोपमः ॥ तेजसावह्निव- द्दीप्तः क्रोधेवैवस्वतोपमः ॥ योगेवैरोचनिर्यस्तु गतौचपवनोयथा ॥ सौम्यत्वेसोमतुल्यस्तु रूपेवैमन्मथोयथा ॥ काव्येपूशनस- स्तुल्यो योगीतेराजनन्दनः ॥ पित्राभुक्तंस्वकमिदं जम्बूद्वीपंवरानने ॥ धर्मांगदेनद्वीपानि सप्तभुक्तानिशोभने ॥ पितुस्तुपी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डयानेन नज्ञातंप्रमदासुखं ॥ स्वयंप्राप्ताःपरित्यक्ता येनभार्य्यास्त्वनेकशः ॥ योनवाक्याद्विचलति सदैवेहपितुःशुभे ॥ यस्यत्रीणिशतानीह मातृणांचारुहासिनि ॥ तथाहिकनकाभासे अविशेषेणपश्यति ॥ तस्यधर्मप्रतापस्य पुत्ररत्नान्वितस्यच ॥ समीपं गच्छचार्वंगि मन्दरे पर्वतोत्तमे ॥ तस्मिन्नेजतिराजासौ तुरगेणोपवाहितः ॥ तवगीतेनचार्वंगि मोहितोमुच्यवाजिनं ॥ आरोहंतिगिरेःशृंगं ससंगंयास्यतित्वया ॥ तत्रदेवित्वयावाच्यं मिलित्वाभूभुजासह ॥ भार्य्यातेहं भविष्यामि महाराजनसंशयः ॥ यद्यद्ब्रवीम्यहंनाथ तत्तत्कार्य्यंत्वयाध्रुवं ॥ मोहितस्तवरूपेण तथेतिप्रतिपत्स्यते ॥ ततस्त्वंशपथैर्गृह्यं दक्षिणेनकरेणवै ॥ वाक्यं कतिपयैःसुश्रु दिनैरापततस्त्विति ॥ सुरतेतवचार्वंगि यथामुग्धोहिलक्ष्यते ॥ तदाप्रहस्यराजानं स्मरणीयंपुरावचः ॥ यत्त्वया शपथाराजन् कृतंमद्वाक्यपालने ॥ तत्पालयमहीपाल सत्योयंशपथस्त्विति ॥ एवमुक्तेत्वयामुग्धे सराजासत्यगौरवः ॥ पालयामिनसन्देहो ब्रूहिकिंतेददाम्यहं ॥ एवमुक्तेतुवचने त्वयावाच्यो वरानने ॥ रुक्माङ्गदोमहीपालो धर्मांगदपिताशुभे ॥ नोपवासस्त्वयाकार्य्यः कथंचिद्धरिवासरे ॥ सुरतश्रमकारामे भवत्वंसमुपोषितः ॥ संमुखींयौवनोपेतां स्वभार्य्यांयोनसेवते ॥ सर्वोपेक्षीदुराचारः सयातिनरकंनरः ॥ त्रिरात्रमुपविद्धाहं त्वयाभूपउपोषणात् ॥ नाहंदिवसमेकन्तु शक्नोमिरहितात्वया ॥ श्राद्धकालेतुसंप्राप्ते उपविष्टेद्विजेकिल ॥ याचन्ती संगमंभार्य्या भोक्तव्यानृपपुंगव ॥ एवंसंबोध्यमानोसौ यदाराजावचस्तव ॥ न- ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करिष्यतिचार्वंगि तदावाच्यमिदंवचः ॥ यदिनत्यजसेराजन् उपवासंहरेर्दिने ॥ स्वपुत्रस्य शिरश्छित्वा सहसैव वरासिना ॥
धर्मांगदस्यराजेन्द्र ममोत्संगे क्षिपत्विह ॥ यद्येतद्भाषितंत्वंहि नकरिष्यसिभूपते ॥ धर्मक्षीणोभवान्गन्ता नरकं नात्रसंशयः ॥
श्रुत्वात्वदीयंवचनं वराननेनदास्यते प्राणसमंहिपुत्रं ॥ संगृह्यवाक्यंवसुधामराणां संप्रोक्षतेमाधववासरेसौ ॥ ततोजनो यास्य
तिपूर्वमार्गं यमान्तिकं किंकरपाशबद्धः ॥ लिपिप्रमाणं नरकाधिवासी भविष्यतेसाधुकृतेत्वयाहि ॥ निहन्तितनयंराजा यदि
सत्वेनसंयुतः ॥ तदशेषमघंत्यक्त्वा पद्मनाभपदंव्रजेत् ॥ ७७ ॥ इतिश्री लघु ना० पु० ह० मोहिनीशिक्षा प्रख्यापनं नाम ७
वशिष्ठउवाच ॥ साश्रुत्वा ब्रह्मणोवाक्यं नारीकमललोचना ॥ उवाचनाममेदेहि येनगच्छामिमन्दरं ॥ पित्रानामप्रकर्त्तव्यं अ-
पत्यानांजगत्पते ॥ नामपापहरं प्रोक्तं तत्कुरुष्व कुशध्वज ॥ तच्छ्रुत्वाच तदाब्रह्मा पुनरेवाब्रवीदिदं ॥ यस्मादिदं जगत्सर्वं
त्वयासुन्दरिमोहितं ॥ मोहिनीत्येव तेनाम स्वगुणाढ्यंभविष्यति ॥ मोहावस्थंजगत्सर्वं दर्शनात्तेभविष्यति ॥ यदिनप्राप्यतेसु-
भ्रू त्वत्संपर्कसुखावहं ॥ एवमुक्त्वा बरारोहा प्रणम्यकमलासनं ॥ वीक्ष्यमाणामरौघेण प्रतस्थेमन्दराचलं ॥ तृतीयेनमुहूर्त्तेण सं-
प्राप्ता गिरिमस्तकम् ॥ यस्यसंवेष्टनोनागो बासुकिर्नहिपूर्यते ॥ धृतोयोहरिणापूर्वं नधृतोदेवदानवैः ॥ षल्लक्षयोजनोसिन्धो य-
स्यवैगह्वरोभवेत् ॥ कूर्मदेहेन संपृक्तो योनभिन्नोगिरिर्महान् ॥ यततायेनराजेन्द्र सिन्धोर्गुह्यंप्रदर्शितं ॥ गताब्रह्माण्डमार्गेण प-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योधेश्चगिरिर्महान् ॥ कूर्मास्थिघट्टनेयेन पावकोजनितोमहान् ॥ यस्मिन्संवसतेदेवः सहभूतैर्दिगंबरः ॥ नदेवै र्दानवैर्वापि दृष्टं पृष्टंमहीपतेः ॥ दशबर्षं सहस्राख्ये कालेमहतिवर्त्तता ॥ केयूरघर्षणंयेन कृतंदेवस्यचाक्रिणः ॥ रत्नानांमन्दिरंयश्च बहुधातुसमन्वितः ॥ क्रीडाविहारायादिवौकसांसदा तपस्विनांयत्तपसःप्रबृद्धये ॥ सुरांगनानां रतिबर्द्धनंतदा महौषधीनांप्रभवोनरेन्द्रः ॥ सहस्रमेकं अयुतंचमूले तत्संख्ययावै पृथुतांगतासौ ॥ दैर्घेपि तावन्तिचयोजनानि त्रैलोक्ययष्टीसमुपस्थितासौ ॥ सकाञ्चनै रत्नभृतैस्तुश्रृंगैः प्रकाशयन्भूमितलंवियच्च ॥ यस्मिन्नभः कश्यपनन्दनाऽसौ इतस्तुतामेतिनिविष्टतेजाः ॥ काञ्चनंगिरिमत्युग्रं संप्राप्ताकाञ्चनप्रभा ॥ सूर्यतेजोपहन्त्रीसा मन्दरं चारुकन्दरं ॥ कुर्वन्ति नृपकामार्थं सुपविष्टाशिलातले ॥ नीलेकान्तेतदादिव्ये सप्तयोजन विस्तृते ॥ तस्यांशिलायांराजेन्द्र लिंगंतिष्ठतिकोटिशः ॥ दशलक्षप्रमाणानि तिष्ठन्तिकोटिकोटिशः ॥ कोटिलिंगेतिविख्यातं प्रासादंप्रसनंपरं ॥ तस्मिन्बाला महीपाल चक्रेगीतंमनोहरं ॥ तंत्रीलयसमायुक्तं नानास्वरकरंपरं ॥ समीपबर्तिनीतस्य भूत्वालिंगस्यभाविनी ॥ मूर्च्छनातालसहितं गान्धार ध्वनिसंयुतं ॥ तस्मिन्प्रवृत्तेराजेन्द्र गीतेमन्मथबर्द्धने ॥ सभूधराणांजाताहि स्पृहातस्यांमहीपते ॥ नैवचेदं मनोहारि गीतंतादृग्वभूवनः ॥ यादृशंमोहिनीगीतं सर्वजन्तुमनोहरं ॥ मृगयूथाधिपाःसर्वे तस्यागीतेलयंगता ॥ श्रुत्वैवगीतंतु दिगंबरस्तु तेनैवरूपेणबरांगनायाः ॥ चचालधैर्यादथभोक्तुकामो विमोहितो देवबरोभ्यधा- ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रत ॥ २४ ॥ इतिश्री लघुनारदीय पुराणे रुक्माङ्गदचरिते मोहिनी मन्दरागमनं नामाष्टमोध्यायः ॥ ८ ॥ ❀ ❀ ❀
बशिष्ठउवाच ॥ रुक्माङ्गदोपि राजेन्द्र भुक्ताभोगान्हिमानुषान् ॥ संपूज्यबहुशोदेवं पीतांबर धरंहरीं ॥ दत्वामूर्ध्निपदंभूप शत्रू-
णां रणशालिनां ॥ कृत्वाशून्यंयमपथं जित्वानैवस्वतंयमं ॥ वैकुण्ठंचपदंभूप कृत्वापूर्णंचमानवैः ॥ आहूयतनयंकान्तं धर्माङ्गद-
मभाषत ॥ एतां बसुमतींपुत्र बसुपूर्णांसमन्ततः ॥ परिपालयबीर्येण स्वधर्मेणकृतश्रमः ॥ पुत्रेसमर्थेयोराजा राज्यंनप्रतिपादये-
त् ॥ तस्यधर्मस्तथाकीर्त्ति र्विनश्यति नसंशयः ॥ समर्थेतनयेपुत्र योनयातिपितासुखं ॥ पापीयान्सतुविज्ञेयो धर्मांगदजगत्त्रये ॥
पितुर्भारक्षमःपुत्रो भारंनोद्वहतेपुनः ॥ मातुर्गोकर्णवज्जातो निर्वीर्यो विषवर्जितः ॥ सपुत्रोयोधिकः पुत्र पितुर्भवतिभूतले ॥ प्र-
काशयति सर्वत्र स्वकरैरिवभास्करः ॥ पुत्रदुर्नयजैर्दुःखै र्यस्यजागर्त्तिवैपिता ॥ सपुत्रोनरकंयाति यावदाभूतसंप्लवम् ॥ पितुर्व-
चनमाहृत्य सर्वंयः कुरुतेगृहे ॥ सयातिदेवसायुज्यं स्तूयमानोमहर्षिभिः ॥ सोहंप्रजाकृतैःपुत्र आसक्तः कर्मभिःक्षितौ ॥ नभुक्तं
नैवसुप्तंतु स्वेच्छयापालनेस्थितः ॥ समर्थेत्वयिशत्रुघ्न प्राप्तंसर्वंसुखंमया ॥ विष्णुवासरभोक्तृणां निग्रहेसंस्थितस्यमे ॥ केचिद्व्यव-
स्थितामार्गे सौरेकेचिद्व्यवस्थिताः ॥ विरिंचिमार्गगाश्चान्ये पार्वती संमतापरे ॥ सायंप्रातशिनास्त्वन्ये तथाचान्येग्निहोत्रिणः ॥
प्रवासेसंस्थिताश्चान्ये श्राद्धेष्वन्येव्यवस्थिताः ॥ बालोयुवाथ बृद्धोवा गुर्विणीवाकुमारिका ॥ रोगीवाविकलोवाथ नशक्तोम्यनु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पोषितुम् ॥ इत्येवंजल्पितंयैस्तु तान्निरस्यसमन्ततः ॥ वचोभिस्तुपुराणोक्तै र्दिवसैर्बहुभिस्त्वहं ॥ संबोधयित्वा बहुशः प्रजावैसुख
हेतवे ॥ निगृह्यतान्हरिदिने निराहारान्करोम्यहं ॥ शास्त्रदृष्ट्यातुविदुषो मूर्खंदण्डेनपुत्रके ॥ अनुशास्यकृताः सर्वे निराहारंहरे-
र्दिने ॥ अतोमे नसुखंकिंचि दवलीढंधरातले ॥ प्रजाःकाश्चिन्नदुःखेन भवित्रीकिलपुत्रके ॥ स्वेनधर्मेणवैपुत्र योरक्षेतप्रजानृपः॥
तस्यमेध्यक्षयालोकाः पुराणाः कवयोविदुः ॥ सोहंप्रजाकृतेपुत्र संस्थितोनात्मनिकर्हिचित् ॥ सौख्यमिच्छाम्यहंभोक्तुं मृगयादिस-
मुद्भवं ॥ नपानद्यूतजंपुत्र कामयेहं कदाचन ॥ उभयोर्भ्रंस्यतेराजा माभूतेतत्रचास्थितः ॥ त्वत्प्रसादादहंपुत्र मृगव्याजेनप-
र्वतान् ॥ वनानि सरितश्चैव सरांसिविविधानिच ॥ ऋष्याश्रमान्तथाद्रक्षे त्वत्प्रसादान्महीपते ॥ भोक्तुकामःप्रियान्कामान् त्व-
यिभारंनिवेश्यच ॥ एतत्सर्वं मयाप्रोक्तं यत्स्थितंहृदयेमम ॥ अस्मिन्कृतेमहत्कीर्ति रकृतेनरकंव्रजेत ॥ तस्मात्पालयमेसर्वाः प्रजा
धर्मेणपुत्रक ॥ धर्मांगदउवाच ॥ सर्वमेतत्करिष्यामि भुंक्ष्वभोगान्मनोरमान् ॥ गुर्वींराजधुरंतात त्वदीयामुद्वहाम्यहं ॥ नहिमे-
नास्त्यतोधर्म स्त्वद्वाक्यकरणंविना ॥ पितुर्वाक्यमकुर्वाणो नरोधर्मादधोव्रजेत ॥ तस्मात्करिष्येवचनं त्वदीयंप्राञ्जलिः स्थितः ॥
एवमुक्तेतुवचने राजाहृष्टोवभूवह ॥ मृगयां गन्तुकामस्तु लब्ध्वाज्ञांत्वात्मनस्तनुं ॥ धर्मांगदोपि हृष्टात्मा प्रजामाहूयचाब्रवीत ॥
पित्रानियुक्तोभवतां पालनाय हितायच॥ पितृकार्यंमहाकार्यं सर्वथाधर्ममिच्छता॥ नान्योधर्मोहिपुत्रस्य पितृकार्यात्परःप्रजाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयिदण्डधरेशास्ता भवतांनयमः क्वचित ॥ एवंज्ञात्वातुयुष्माभि राराध्यागरुडध्वजः ॥ ब्रह्मचर्यापयोगेन यष्टव्यस्तुजनार्दनः ॥
ममत्वंहि परित्यज्य स्वजातिविहितेनच ॥ येनवोह्यक्षयोलोका भवेयुर्नात्रसंशयः ॥ पितृमार्गाधिकोह्येष भवतांब्रह्मसंज्ञितः ॥
ब्रह्मार्पणक्रियायुक्ता भवन्तोज्ञानकोविदाः ॥ नभोक्तव्यं हरिदिने पैत्रोमार्गस्तुशाश्वतः ॥ विशेषेहिमयाजातो भवतांब्रह्मसन्ततिः ॥
प्रयुक्तःस्वात्मविषये पुनरावृत्तिदुर्लभः ॥ यदुपोष्यंहरिदिनं तदवश्यमितिस्थितिः ॥ अनुनीयप्रजाःसर्वाः समाश्वास्यपुनःपुनः ॥
नदिवा नचशर्वर्यां शेतेधर्मांगदःसदा ॥ सर्वत्रहरतेसौर्यात कुर्वन्निष्कण्टकांमहीं ॥ पटहोरटतेत्यर्थं मृगारिरिपुमस्तके ॥ उपोष्य
द्वादशींलोका ममत्वेनविबर्जिताः ॥ त्रिविधेषुच कार्येषु देवेशश्चिन्त्यतांहरिः ॥ हव्यकव्यवहेचैव तथात्मनि जनार्दनः ॥ तुरी-
येपिहृषीकेशो विशंकंजगतांपतिः ॥ स्वजातिविहितेष्वेवं सन्मार्गेचपितामहः ॥ स्मर्त्तव्योपि जनैःसर्वै धर्मकामार्थवाञ्छिभिः ॥
सएवभोक्ताभोक्तव्यः सएवपुरुषोत्तमः ॥ विनियोगस्तुतस्यैव सर्वकर्मसुपूज्यते ॥ एवंरटतिराजेन्द्र पटहोघननिस्वनः ॥ परंहर्षम-
वापोथ पिताधर्मांगदस्यच ॥ ज्ञात्वापुत्रंनयोपेत मात्मतत्वाधिकंनृपः ॥ उवाचभार्यांसंहृष्टः स्थितांलक्ष्मी मिवापरां ॥ धन्यास-
न्ध्यावलित्वंहि धन्योहंबरवर्णिनि ॥ उभाभ्यांजनितःपुत्रः शशाङ्कधवलःक्षितौ ॥ कर्णाभ्यांश्रूयतेमोक्षो नदृष्टः केनचित्क्वचित ॥
नोस्माभिरधिकोमोक्षः प्राप्तःसत्पुत्रसंभवः ॥ पुत्रे विनयसंपन्ने धृतिसौर्यसमन्विते ॥ प्रतापिनिवरारोहे पितुर्मोक्षोगृहेध्रुवं ॥ आ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्दं ब्रह्मणोरूपं सदानन्दिसुतेनयः ॥ पिताभवतिचार्वांगि सत्कर्मकरणैःशुभैः ॥ नतत्सौख्यंभवेद्देवि लोंकेस्थावरजंगमे ॥ स-
त्पुत्रः पितुरादाय भारमुद्वहतेस्वयं ॥ सोहंगमिष्ये करभोरुहृष्टो विहारलीलो मृगहिंसनार्थं ॥ स्वेच्छाचरश्चारु विशालनेत्रे वि-
मुक्तपापो जनरक्षणाय ॥ ५२ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते धर्मांगदाय राज्यदानंनाम नवमोध्यायः ॥ ९ ॥
वशिष्ठउवाच ॥ ततः प्राहविशालाक्षी भर्तृवाक्यंनिशम्यसा ॥ सत्यमुक्तंत्वयाराजन् पुत्रसौख्यंनतत्परं ॥ तुल्यंभवतिलोकेस्मिन्
शतपुत्रफलाधिकं ॥ पुत्रेभारस्त्वयान्यस्तः सप्तद्वीपसमुद्भवः ॥ मृगहिंसां परित्यज्य यजयज्ञैर्जनार्दनं ॥ भोगस्पृहां परित्यज्य
सेवस्वसुरनिम्नगां ॥ एवंत्याज्यस्तवविभो न्यायोनमृगनिग्रहः ॥ हृदये नखपङ्क्तिस्तु बृद्धायाभूपतेयथा ॥ तथा विषयसेवाहि
पितृणां पुत्रिणांविदुः ॥ गृहेस्थितोहृषीकेशं पूजयस्वमहीपते ॥ निर्दोषाणांनयुक्तंहि मृगानांभूपमारणं ॥ अहिंसा परमोधर्मः
पुराणेषुप्रकीर्तितः ॥ हिंसायां वर्त्तमानस्य व्ययोधर्मोभवत्यपि ॥ परैरपिहताञ्जन्तू न्नोपभुञ्जन्तिमानवाः ॥ षड्विधंनृपतेप्रोक्तं वि-
द्वद्भिर्जीवघातनं ॥ अनुमोदयितापूर्वो द्वितीयोघातकः स्मृतः ॥ विश्वस्ताचतृतीयस्तु चतुर्थोभक्षकःस्मृतः ॥ पञ्चमःपावकःप्रोक्तः
षष्ठोभूपे हविक्रयी ॥ अहिंसासहितोधर्मः सधर्मोनृपतेस्मृतः ॥ हिंसयासहितंधर्मं नधर्मंकवयोविदुः ॥ मापापंकुरुवैभूप पुत्रेभा-
रंनिधायच ॥ धर्मंसमाश्रयसम्यक् सञ्जातः पलितस्तव ॥ परित्यज्यस्वभारंत्वं नृपहिंसासमुद्भवं ॥ मृगशीलाहिराजानो विनष्टाः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शतशोनृप ॥ तस्माद् दुष्कृतकर्माणो मन्येहंमृगयातिनः ॥ दोषांकुरामृगाराज्ञां धर्मिणामिहभूपते ॥ निवारितोमयात्वंहि सर्वदाहितकाम्यया ॥ एवंब्रुवाणां तांभार्यां नृपोवचनमब्रवीत् ॥ नाहंहिंसेमृगान्देवि मृगव्याजेनकाननं ॥ पर्यटिष्ये धनुः पाणिः कुर्वन्कण्टकशाधनं ॥ वनमध्येसुखंभुज्य मरणेहंबरानने ॥ स्वापदेभ्यश्चदस्युभ्यः प्रजारक्ष्यामहीभृता ॥ आत्मनावाथपुत्रेण गोपनीयाःप्रजायतः ॥ प्रजामरक्षन्नृपतिः सधर्मोपिव्रजत्यधः ॥ सोऽहंरक्षणमुद्दिश्य गमिष्यामिवनंप्रिये ॥ विमुक्तभारोऽहमिति रुरुःशृंगोयथाशुभे ॥ एवमामंत्र्यतांभार्यां मारुरोह हयोत्तमं ॥ दोषांपातिसमंराज न्निर्दोषक्षितिभूषणं ॥ देववाहमिवाशुगं प्रभञ्जनमिवस्थितं ॥ अग्रेऽमरेभ्योभूपालः करंकृत्वाप्रदक्षिणं ॥ शतकोटिप्रभंभूप कामिनीकुचपालितं ॥ अशोकपल्लवाकारं चक्रांकुशविभूषितं ॥ संप्रतस्थेमहीपाल श्चालमानोमहीतलं ॥ शान्त्वमानोययौवेगात् काननंनिर्जनंस्वयं ॥ वाजिवेगेननिर्धूता वारणाः स्यन्दनाःहयाः ॥ पत्तयश्चनिपेतुस्ते मूर्च्छिताः क्षितिमण्डले ॥ सराजासहसाप्राप्तो मुनीनामाश्रमंप्रति ॥ योजनानांसमुत्तीर्य शतमष्टोत्तरंनृपः ॥ प्रविवेशाश्रमंपुण्यं कदलीखण्डमण्डितं ॥ अशोकवकुलोपेतं पुन्नागसमलंकृतं ॥ मातुलिंगैःकपित्थैश्च खर्जूरपनसादिभिः ॥ नारिकेलैस्तथातालैः केतकैसिन्दुवारकैः ॥ चन्दनैःस्यन्दनैरलैः प्रियालैर्जंबुकैर्धवैः ॥ कर्मदैर्दाडिमैश्चैव धात्रीवृक्षैःसमन्ततः ॥ निंवबृक्षैश्चबहुश स्तथाधैर्लोध्रपावकैः ॥ हरीतकीविभीताद्यैरन्यैर्बहुभिरावृतं ॥ हृष्टेनवायुनायुक्तं सुगन्धैःपुष्पपा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दर्पैः ॥ पश्यमानोमुनिंराजा ददर्शहुतभुक्प्रभं ॥ दृष्ट्वा प्रणम्यसहसा अवरुह्यतुरंगमात् ॥ वामदेवंमुनिवरं बहुशिष्यसमावृतं ॥
तेनापिमुनिना राजा अर्घ्याद्यैरभिपूजितः ॥ उपवेश्यासनेकौशे प्रोवाचहृष्टयागिरा ॥ अद्यमेपातकंक्षीण मद्यपुण्योयमाश्रमः ॥
यत्त्वयाविष्णुभक्तेन दिष्ट्याभूपविलोकितः ॥ कः करोतिनृपस्त्वन्य स्त्वांविना धरणीतले ॥ त्यक्त्वावैवस्वतं मार्गं लोकोनीतोहरेः
क्षयं ॥ उपोषयित्वा नृपते द्वादशींपापनाशनीं ॥ चतुर्भिस्त्वमुपायैस्तु प्रजाः संसाध्यभूतले ॥ स्वकर्मस्थाविकर्मस्था नीताःस-
र्वाभिदः पदं ॥ सोऽस्माकंद्रष्टुकामानां संप्राप्तंदर्शनंनृप ॥ स्वपचोपिमहीपाल विष्णुभक्तोद्विजाधिकः ॥ विष्णुभक्तिविहीनस्तु
द्विजोऽपि स्वपचाधमः ॥ दुर्लभाभूपराजानो विष्णुभक्तामहीतले ॥ नवैष्णवोभवेद्राजा क्षितिलक्ष्मीप्रशाशकः ॥ योराजानहरे-
र्भक्तो भक्तोऽन्येषुसुरेषुहि ॥ सपत्नींयुवतींत्यक्त्वा यथैवान्यासुरज्यते ॥ एवंव्यतिक्रमस्तस्य नृपतेर्भवतिध्रुवं ॥ यस्त्वयान्यायविहितं
कृतंविष्णोः प्रपूजनं ॥ राजोवाच ॥ क्षामयेत्वांद्विजश्रेष्ठ नाहंवन्द्यस्त्वयाविभो ॥ त्वत्पादपांशुनातुल्यो नवाविप्रभवाम्यहं ॥ न-
विप्रेभ्योऽधिकादेवा भवन्तीहकदाचन ॥ परितुष्टैर्द्विजैर्यस्माद्भक्तिर्भवतिमाधवे ॥ द्वेष्योभवतितैरुष्टैः सत्यमेतन्मयेरितं ॥ तमा-
हवामदेवस्तु ब्रूहिकिंतेददाम्यहं ॥ नादेयंविद्यतेराजन् गृहप्राप्तस्यमेधुना ॥ अभीष्टोसिमहीपाल योददासिमहीतले ॥ पटहान्वा-
सरेविष्णोः प्रजाभोजनवारणे ॥ तमाहनृपतिर्विप्रं कृताञ्जलिपुटस्तदा ॥ प्राप्तमेवमयासर्वं त्वदंघ्रियुगदर्शने ॥ एकोमेसंशयोब्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्मन् हृदयेपरिवर्त्तते ॥ कर्मणाकेनमेवश्या भार्यात्रैलोक्यसुन्दरी ॥ याविलोकयतीमांवै मन्यतेमन्मथाधिकं ॥ यत्रयत्रपदंदेवी
ददातिबरवर्णिनी ॥ तत्रतत्रनिधानानि प्रकाशयतिमेदिनी ॥ यस्याःस्पर्शेजराभ्रंशो वलीनांसंक्षयोभवेत् ॥ विनाग्निनाहियो-
ब्रह्मन् सिद्धमेत्येवशत्रुसं ॥ अन्नंददातिचार्वंगी यस्मिन्भुञ्जन्तिकोटयः ॥ नावज्ञाचकृताब्रह्मन् ययावाक्यासुरुष्टया ॥ तथाराजा
तुतनयो ममवाक्यकरःसदा ॥ अहमेवधरापृष्ठे पुत्रवान्द्विजसत्तम ॥ एकद्वीपपतिश्चाहं सचसप्तपतिस्त्वभूत ॥ मदर्थेयेनविप्रेन्द्र
समानीतानृपात्मजा ॥ विद्युल्लेखेतिविख्याता युधिजित्वामहीभुजः ॥ अयुतेनाधिकेद्वेतु वीर्यद्रविणशालिनी ॥ षण्मासेनरणे
जित्वा कृत्वासर्वान्निरायुधान् ॥ योगत्वाप्रमदाराज्यं जित्वासर्वास्तथारणे ॥ आजहारशुभास्तासां मध्यादष्टौवरांगनाः ॥ प्रददा
वपिताःसर्वा प्रणम्यचपुनःपुनः ॥ यानिवासांसिदिव्यानि यानिरत्नानिभूतले ॥ तानिमेप्रददौपुत्रो जनन्याश्चदृढव्रतः ॥ ए-
काह्नापृथिवींसर्वा मतीत्यबहुयोजनां ॥ पुनरायातिशर्वर्यां मत्पादाभ्यंगकारणात् ॥ निशीथेमर्दयित्वातु द्वारितिष्ठतिदंशितः ॥
प्रवोधयतिप्रैष्यान्स नमत्तोनिशिसंस्थितः ॥ तथायंरोगहीनोमे देहोदेहभृतांवर ॥ अप्रमेयोममुने विषयाश्चप्रियागृहे ॥ वा-
जिनोवारणाश्चैव धनधान्यमनन्तकं ॥ नृपाःसर्वेममैवाज्ञां पालयन्तिक्षिताविह ॥ केनकर्मविपाकेन ममेदंवशगंमुने ॥ कृताञ्ज-
लिपुटोब्रह्मन् यथावद्वक्तुमर्हसि ॥ देहेनरोगाःप्रवराःस्त्रियश्च गृहेविभूतिश्चहरौचभक्तिः ॥ विद्वत्सुपूजाद्विजदानयुक्तो मनोहर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीवसुतप्रसूतः ॥ ६२ ॥ इतिश्रीलघुनारदीयपुराणे रुक्माङ्गदचरिते वामदेवसमागमोनाम दशमोध्यायः ॥१०॥ वामदेवउवाच
॥ पुरात्वमवनीपाल शूद्रजातिसमुद्भवः ॥ वहुदोषसमायुक्तो दुष्टयाभार्य्ययातथा ॥ निवसन्दुःखसंयुक्तो वर्षाणिसुवहुन्यथ ॥
कदाचिद्विप्रसहित स्तीर्थयात्रांगतोभवान् ॥ तत्रस्थाणुपतेःश्लक्ष्णं श्रुतंधर्मविचारणं ॥ मन्दरेनृपशार्दूल पुराणोक्तंद्विजेरितं ॥ त-
च्छ्रुतंहित्वयाराजन् सत्यंहिशयनव्रतम् ॥ चतुर्भिःपारणंमासै र्य्यस्यनिष्पद्यतेविभोः ॥ येनचीर्णेनदेवेशो जीमूताभःप्रसीदति ॥
लक्ष्मीभार्य्योजगन्नाथ स्त्वशेषाघौघनाशनः ॥ तत्कृतंभवतासजन् पुनरत्यतिमन्दरे ॥ अशून्यशयनंपुण्यं गृहऋद्धिकरंपरम् ॥
अकृत्वायस्तुराजेन्द्र व्रतंपातकनाशनं ॥ गार्हस्थ्यमनुतिष्ठेत बन्ध्यावन्निष्फलंभवेत् ॥ श्रावणस्यतुमासस्य द्वितीयायांमहीपते ॥
अपिजात्यानुहीनेन अपिग्राह्यंव्रतंशुभम् ॥ चत्वारोवार्षिकान्मासान् मंसुत्येवैजनार्दनं ॥ व्रतंत्वशून्यशयनं करिष्येहंजगत्पते ॥
एवंनियमकृत्स्नात्वा मध्याह्नेसरिदादिषु ॥ पश्चात्पूजयेद्देवं निशिचन्द्रोदयेसति ॥ षोडशांगुलमानंतु स्थंडिलंचतुरस्रकं ॥ कृत्वा
तत्रन्यसेद्देवं लक्ष्मीभर्तारमच्युतं ॥ लक्ष्मीसौप्यमयींकृत्वा सौवर्णपुरुषोत्तमं ॥ स्थाप्यपञ्चामृतरसै र्गन्धचन्दनवारिणां ॥ स्नापयि-
त्वाथविधिना वेदमंत्रपुरःसरं ॥ लक्ष्मीयुक्तोजगन्नाथः पूजनीयोजनार्द्दनः ॥ फलैःपुष्पैस्तथादीपै श्चारुगन्धानुलेपनैः ॥ शय्या
दानैर्वस्तुदानै र्विप्राणांभोजनैस्तथा ॥ नैवेद्यैर्विविधाकारैः फेनिकापूपमोदकैः ॥ मुखवासादितांवूलैः प्रार्थयेद्देवमाशिषः ॥ श्रीव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सधारिश्रीकांत श्रीपतेश्रीधराव्यय ॥ त्वंलक्ष्मीसहितोदेव गृहाणार्घ्यंनमोस्तुते ॥ इत्यर्घ्यमंत्र ॥ गार्हस्थान्पापनाशंमे पातु धर्मार्थकामद ॥ अग्रपोमाप्रणश्यंति माप्रणस्यंतुर्देवताः ॥ पितरोमाप्रणस्यंतु मानैादंपत्यभेदना ॥ लक्ष्मीवियुज्यतेदेव नकदाचित्तथाभवेत् ॥ तथाकलत्रसंबन्धो मामेदेववियुज्यतां ॥ लक्ष्म्यानशून्यंवरद यथातेशयनंहरे ॥ शयामयाप्यशून्यातु तथैवमधुसूदन ॥ एवंप्राथ्यर्चदेवेशं प्रणिपत्यपुनःपुनः ॥ नक्तमक्षारलवणमश्नीयात्तदनन्तरं ॥ भोजयेद्द्विजदांपत्यं प्रतिमासंनृपोत्तम ॥ चातुर्मासिकमित्युक्त मशून्यशयनव्रतं ॥ चतुर्भिरेवमासैस्तु व्रतस्यास्यतुपारणं ॥ व्रतांतेशयनंदद्यात्सर्वोपस्कर संयुतं ॥ आसनं पादुकाछत्रं चामरव्याजिनानिच ॥ स्थंडितासर्वसंपूर्णा दर्पणंसप्तधान्यकं ॥ सुखसंजननितूली छादनाचपटीसिता ॥ कुण्डलेद्वेनृपश्रेष्ठ सुकपोलस्थलद्वयोः ॥ दीपिकावरमाल्यानि अञ्जनान्यनुलेपनं ॥ तस्योपरिवितानंतु पञ्चवर्णनरोत्तम ॥ पूर्वंतुचतुरोमासा स्थंडिलस्थंप्रपूजयेत् ॥ व्रतांतेशयनस्थंतु पूजयेत्पुरुषोत्तमं ॥ पुष्पधूपोपहारैश्च दीपमाल्यादिभूषितैः ॥ नैवेद्यैर्विविधाकारै लड्डुकापूपफेनिकैः ॥ अशोकवर्तिसोल्लाशैः खण्डकाद्यैरनेकशः ॥ देशकालोद्भवैर्मिष्टैः फलैःसंपूजयेद्धरिं ॥ अलंकृत्ययथाशक्त्या वस्त्रालङ्कारभूषणैः ॥ मिथुनंनृपशार्दूल वरमाल्यानुलेपनैः ॥ प्रणम्यद्विजदांपत्यं तंदेवंप्रतिपादयेत् ॥ साक्षतंसहिरण्यंच वस्नेत्रपटावृतं ॥ अर्चितंप्रार्चितंगन्धै र्जातरूपमयंशुभं ॥ कांस्यपात्रेणसहितं मोदकैःपरिपूरितं ॥ दद्यादेवंसमुच्चार्य्य श्रीधरःप्रीयता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिति ॥ गावोहिरण्यधान्यानि यद्यद्दिष्टतमंगृहे ॥ तद्देवंनृपशार्दूल तदेवाक्षयमिच्छता ॥ तत्त्वयासर्वमेतद्धि कृतंराजन्सुविस्तरं ॥
तस्यैवकर्मणोव्युष्टि रशून्यशयनस्यहि ॥ इयंममाग्रतःप्राप्ति स्तवोक्ताविस्तरान्नृप ॥ तुष्टेविष्णोसंपदोवै भवेयुर्वैविधाहिता ॥ पू-
र्वजन्मनिदेवेशो यस्त्वयापूजितोनृप ॥ अस्मिन्जन्मनिराजेन्द्र पुनरर्चयसेहरिं ॥ अवस्यंगंतुकामोसि तस्यसायुज्यतांध्रुवम् ॥
एषभावोमहाराज विख्यातस्तेसुनिर्मलः ॥ प्रभावसंपदेपाते जाताउत्कर्षदायिनी ॥ किमन्यंनेमहीपाल ददामीहकरोमिकिं ॥
त्वंसर्वयोग्योसिनृप भक्तिमांश्चजनार्द्दने ॥ राजोवाच ॥ समुत्सुकोहंविप्रेन्द्र मन्दरंपर्वतंप्रति ॥ तत्राश्चर्याणिसर्वाणि द्रष्टुकाम-
स्तवाज्ञया ॥ लघूंभूत्वागुरुंत्यक्त्वा पुत्रोपरिद्विजोत्तम ॥ राज्यानुशासनंभारं दुर्वहंतुक्तभूभुजैः ॥ स्वेच्छाचारस्त्वहंराजा मत्कृत्यंतेन-
योऽकरोत ॥ तच्छ्रुत्वावचनंराज्ञो वामदेवोऽब्रवीदिदं ॥ एतद्धिपरमंकृत्यं पुत्रस्यनृपपुङ्गव ॥ यत्क्लेशात्पितरंपुत्रा विमोचयतिसर्व-
था ॥ पितुर्वचनकारीयो विनयेसंस्थितःसुतः ॥ तस्यभागीरथिस्नान महन्यहनिजायते ॥ निरस्यपितृवाक्यंतु ब्रजेत्स्नातुंत्रिमा-
र्गगां ॥ नशुद्धिरत्रनिर्दिष्टा पुत्रस्यकवयोविदुः ॥ सत्वंगच्छयथाकामं कृतकृत्योमहीपते ॥ हरिप्रसादस्तेजातो वशेयस्यसुतः
स्थितः ॥ एवमुक्तःसमुनिना समारुह्यतुरंगमं ॥ ययौशिघ्रगतिश्रीमान् सदागतिरिवस्वयं ॥ पश्यमानोगिरिंश्रीमान् सरांसि-
सरितस्तथा ॥ मनोरमानिराजेन्द्र वनान्युपवनानिच ॥ सोऽचिरेणैवकालेन संप्राप्तोमन्दराचलं ॥ कामयित्वागिरिंश्चेदं गन्धमा- ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दनमेवच ॥ अतीत्यचमहामेरुं दृष्ट्वाचारूपमान्कुरून् ॥ शतसूर्य्यप्रतीकाशं सर्वत्रकांचनावृतं ॥ हतैर्द्विजैःसमाकीर्णं स्रवन्तं कांचनंरसं ॥ वहुवृक्षसमायुक्तं वहुधातुविभूषितं ॥ वहूनिसरसंयुक्तं वहुकन्दरभूषितं ॥ निम्नगायुतसंकीर्णं धौतंगङ्गाजलैःशुभैः ॥ वितुष्टैर्युवतिवृन्दैः कांचनाब्जोपशोभितैः ॥ प्रस्थितैःफललाभार्थं सदृशस्नानमोहितैः ॥ घटप्रमाणैर्नृपते पङ्कजैश्चसुगन्धिभिः ॥ क्षात्रैर्युवतिसंभूतैः कुचैरिविविभूषितैः ॥ द्विरेफगणसंयुक्तः कोकिलस्वरनादितः ॥ अनेकसत्वविरुतैः समन्तान्नादितोगिरिः ॥ सपश्यमानोनृपतिर्विवेश महागिरिंरत्नविभूषिताग्रं ॥ आरूढकामस्तुकुतूहलार्थ मन्वेषयन्केनपथाधिरोहे ॥ यावत्समीक्षांकुरुते समंतात् तावत्समस्तद्रुमपक्षिसंघैः ॥ विसर्प्पमानोध्वानिनागृहीतो विमोहिनीवक्त्रसमुद्भवेन ॥ उपप्लवंतत्तरसामहीप स्तेनैवराजासहसाजगाम ॥ तस्यापिकर्णेध्वनिराविवेश विमोहिनीयःस्वाविमुच्यवाहं ॥ त्रिविक्रमेणैवविलंवितस्तदा गिरिर्महाराजवरेणतेन ॥ क्षणेनराजासहसाददर्श गिरौस्थितांतप्तसुवर्णभासं ॥ कामस्ययष्टीवसुलेखितेयंयमस्यमायैवयशःस्वरूपिणी ॥ शक्रस्य लिङ्गगगनेप्रसस्तंसंपूजयन्तीतदवस्थितासा ॥ जनोयथाह्लादकरोनृणांप्रियःक्षमेवभूमेर्नृपआननन्द ॥ गिरेःसुतेवामरपूजिताच सिंधोस्तुवेलेवस्वरूपयुक्ता ॥ सत्कर्म्मकर्तुंमनसोभिलाषंव्यवस्थितामोहिनीरूपयुक्ता ॥ प्रतप्तचामीकरबद्विभातिदेवीशरीरंत्वभिमन्दराद्रिं ॥ विकर्षमाणासहसासुनेत्रंलिंगाश्रितालिंगविनोदनार्थं ॥ विमोहितोसौनिपपातराजाविमोहिनीसुन्दरनेत्रपातैः ॥ ज्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेणसंतप्तसमस्तदेहोविसंज्ञतांचैवजगामशीघ्रं ॥ संमूर्छितंभूमिपतिंसुनेत्राविलोकयामासकटाक्षदृष्ट्या ॥ विमुच्यवीणांविरराम गीतान्प्रासंचकार्य्यसहसैवमेने ॥ विद्रावयन्तीमृतपक्षिसंघामशोकरक्तांगुलिपल्लवाग्राः ॥ सुवाससागन्धभुजोनिवार्य्यशिलीमुखान्श्च ससुगन्धलुब्धान् ॥ जगामदेवीनृपतेःसमीपंमुक्ताहरंपूज्यतमंमहीप ॥ गत्वातुतत्पार्श्वसुमाररूपा विमोहिनीनीरजपत्रलोचना ॥ उवाचवाक्यंमधुरंमनोहरंरुक्माङ्गदंकामसरानुविद्धं ॥ उत्तिष्ठराजेशवशातवाहंकिंमूर्च्छयादेहमिमंक्षिणोषि ॥ यस्त्वंमहाभारमिमंमहान्तंसमुद्धरेथास्तृणवन्महीप ॥ समामकंरूपमवेक्ष्यराजन् किंरज्यतेदुर्वलगौरिवेह ॥ यद्यास्तिवांच्छातवभूपतीश ममाश्रयावैसुरतानुकूला ॥ आदायवैमांरतिधर्मयुक्तां भुक्ष्वस्वदासीमिवदृष्टिवित्तां ॥ ६६ ॥ इतिश्री लघुनारदीयपुराणरुक्माङ्गचरिते मोहिनीसमागमो नामैकादशोध्यायः ॥ ११ ॥ छ छ छ छ छ छ छ छ छ छ छ

वशिष्ठउवाच ॥ व्याहृतेशोभनेवाक्ये मोहिन्यानृपतिस्तथा ॥ उन्मील्यनेत्रेराजेन्द्र पद्मपत्रनिभतदा ॥ सगद्गदस्वरवादेचं मोहिनींकान्ताविग्रहां ॥ मयावलाःसुवहुशः पूर्णचन्द्रनिभाननाः ॥ अनुभुक्तास्तथादृष्टा नेदृग्दृष्टंवपुःक्वचित् ॥ यादृशंचपलापांगि तवसर्वांगसुन्दरि ॥ सोहंऽदर्शनमात्रेण त्वदीयेनवरानने॥ मनोभवशरेणैव पातितःसहसाक्षितौ ॥ अनूक्तवाक्योऽहंदेवि मोहितस्तत्रमायया ॥ कुरुप्रसादंकरभोरुमह्यं दास्यामिसर्व्वंविपुलंचतेवसुः ॥ नादेयमत्रत्वयिविद्यतेमे तवानुरागेणनिरुद्धचेतसः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इमांधरांभूधरभूषितांगीं समुद्रवस्त्रांशशिसूर्य्यनेत्रां ॥ घनस्तनींव्योमसुवद्धदेहां सह्यानानांसांगनिवासशीर्षां ॥ पातालगुह्यांव-
ह्नुनागपादां सप्तार्णवामद्यतवास्मिदाता ॥ सकोषरत्नांगजवाजिपूर्णां सामुद्रभक्तांनगरैःसमेतां ॥ आत्मानमपिदास्यामि तव-
चार्व्वंगिसंगमे ॥ किंपुनर्धनमानादि प्रसीदममशोभने ॥ तद्वचोमोहिनीश्रुत्वा भूपस्यमधुरंशुभं ॥ उवाचसंमितंध्यात्वा समु-
त्थाप्यनृपंतथा ॥ नधरांभूधरोपेतां प्रार्थयामिक्षितीश्वरं ॥ यत्प्रार्थयाम्यहंभूप तद्देयमविशंकया ॥ मत्प्रत्ययार्थंभूपाल वदस्वसम-
यंविभो ॥ राजोवाच ॥ येनत्वंतुष्यसेदेवि समयन्तंकरोम्यहं ॥ कृच्छ्रावस्थागतंत्वंमां सञ्जीवयसुलोचने ॥ मोहिन्युवाच ॥ दी-
यतांदक्षिणोहस्तो भूरिद्रविणदायकः ॥ अनेकक्रतुकर्त्ताच बहुपुण्यकरःकरः ॥ येनमेप्रत्ययोराजन् भवतीहतवोपरि ॥ राजन्त्वंध-
र्मशीलश्च धर्मकीर्तिर्जगत्त्रये ॥ नवक्तव्यानृतंकिञ्चित मार्गोवैलौकिकस्त्वयं ॥ एवंब्रुवाणांराजेन्द्रो मोहिनींकृच्छ्रयातुरः ॥ अब्र-
वीन्नृपतिःप्रेम्णा तवेदंभाषितंमया ॥ जन्मप्रभृतिवामोरु स्वैरेष्वपिकदाचन ॥ अथतेव्याहृतैर्वाक्यैः किमेभिःप्रत्ययात्मकैः ॥ त-
वह्येषमयादत्तः स्वहस्तश्चारुलाञ्छनः ॥ यन्मयासुकृतंकिञ्चित कृतमाजन्मिकंशुभे ॥ तत्सर्वंतववामोरु यदिकुर्यान्नतेवचः ॥ अ-
न्तरेत्वेषहस्तोवै भवभार्येवरानने ॥ तवरूपेणमेक्षोभः सहसाह्यभवच्छुभे ॥ दर्शनेनत्वदीयेन परायन्तंहिमेवपुः ॥ पूर्वंदृष्टापिनम-
या स्पृष्टाधर्मादिरक्षणे ॥ कात्वंकस्यसुताचासि किमर्थमिहचागता ॥ रुक्मांगदोहंनृपतिः ऋतध्वजसुतःशुभे ॥ इक्ष्वाकुवंशजः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीमान् धर्मांगदपितातथा ॥ मृगव्याजेनगहनं प्रविष्टःकाननंत्वहं ॥ ततोहृष्टोवनेदृष्टः कौशेयस्याश्रमोमहान् ॥ मुनिनाजल्पि-
तश्चाथ तेनचाहंविसर्जितः ॥ आरुह्यवाहनवरं मन्दरंद्रष्टुमागतः ॥ भ्रममाणेनचमया कौतूहलपरेणहि ॥ श्रुतंसुन्दरिगीतंतु
तववक्त्रविनिर्गतं ॥ गीतेनचाहमाकृष्ट स्त्वत्सकाशमिहागतः ॥ चक्षुःपदमनुप्राप्ता ममत्वंचारुलोचने ॥ ततोहंमूर्छितोदेवि विसं-
ज्ञःपतितःक्षितौ ॥ संप्राप्तचेतनायुक्त स्तववाक्यामृतेनहि ॥ पुनर्जातमिवात्मानं मन्येहंचारुलोचने ॥ इत्युत्तरप्रदानेन प्रसादंक-
र्तुमर्हसि ॥ केनचेहेदृशंरूपं त्रैलोक्यक्षोभनंशुभे ॥ कृतंतवसुचार्वंगी तत्सर्वंवक्तुमर्हसि ॥ एवमुक्तानृपेणाथ मोहिनीव्याजहार-
वै ॥ ब्रह्मणोहंसुताराजन् त्वदर्थमिहचागता ॥ श्रुत्वाकीर्तिंतुतेभूप मन्दरंसमुपागता ॥ परित्यज्यसुरान्सर्वान् दिगंवरपुरोगमा-
न् ॥ समाहितमनाभूप नियतातपसिस्थिता ॥ संपूजयन्तिदेवेशं गीतवाद्येनशंकरं ॥ परितुष्टःपशुपतिः त्रिदिनार्द्धेनभूपते ॥
गीतदानमहंमन्ये सुराणामपिदुर्लभं ॥ सर्वदानाधिकंभूप अक्षय्यगतिदायकं ॥ गीतज्ञायत्रगीतेन प्राप्नोतिपरमंपदं ॥ रुद्रस्या-
नुचरोभूत्वा तेनैवसहमोदते ॥ संतुष्टोयंपशुपतिः सद्यएवममानघ ॥ ईप्सितोयंमयाप्राप्तो भवानवनिपालक ॥ अभिप्रेतोसिमे-
राजन् अभिप्रेताह्यहंतव ॥ सकामायाःसकामेन संगमोगुणवान्भवेत ॥ तमेवमुक्ताद्विजराजवक्त्रा करंकरेणाथविगृह्यदक्षा ॥ उ-
त्थापयामासधरातलस्थं रुक्मांगदंसागजगामिनीतदा ॥ ३८ ॥ इतिश्री ल०ना० रुक्माङ्गदसंवादोनाम द्वादशोध्यायः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वशिष्ठउवाच ॥ उत्थापयित्वाराजानं मोहिनीवाक्यमब्रवीत् ॥ माशंकांकुरुराजेन्द्र कुमारींमामकल्मषां ॥ उद्वाहयमहीपाल गृह्योक्तविधिनाहिमां ॥ अविवाहितांतुकन्यां यदिगच्छन्विभर्त्यपि ॥ प्रसूयतिदिवाकीर्त्तिं सर्ववर्णविगर्हितं ॥ चाण्डालयोनयस्त्रिः पुराणाःकवयोविदुः ॥ कुमारीसंभवस्त्वेकः स्वगोत्रायांद्वितीयकः ॥ ब्राह्मण्यांशूद्रजनकस्तृतीयोनृपपुंगव ॥ एतस्मात्कारणाद्राजन् कुमारीमुद्वहेर्दिति ॥ ततस्तांचञ्चलापांगीं नृपोरुक्मांगदोगिरौ ॥ उद्वाह्यविधिवद्राजा बभाषेप्रहसन्निति ॥ नतथात्रिदिवप्राप्तिः प्रीणातिममानसं ॥ तवप्राप्तिर्यथाह्लादं करोतिममसुन्दरि ॥ मन्येपुरन्दरादेवि आत्मानमधिकंक्षितौ ॥ त्रैलोक्यसुन्दरींप्राप्य त्वांभार्यांचारुलोचने ॥ तस्माद्वदानुकूलंते किंकरोमिप्रसाधिमां ॥ इहैवरंस्यसेवापि अथवानगरेवद ॥ मलयेमेरुशिखरे वनेवानन्दनेशुभे ॥ तच्छुत्वामोहिनीवाक्यं मधुरंभूपतेस्तदा ॥ उवाचवाक्यंसुमुखी राजानंहाटकांगदं ॥ सपत्नीनांकटाक्षाणि क्रूराणिनगरेमम ॥ पतिष्यन्तिमहीपाल कथंगच्छामितेपुरं ॥ नासौसीमन्तिनीकाचित् भवेद्रूपक्षितावेिह ॥ यस्याःसपत्नीप्रभवं दुःखमामरणंभवेत् ॥ साहंत्यक्तामहीपाल तवकीर्त्यानुपुण्यया ॥ ज्ञात्वासपत्नीप्रभवं दुःखंभर्त्ताकृतोमया ॥ रंस्यामिपर्वतेश्रेष्ठे बह्वाश्चर्यसमन्विते ॥ नरंस्यसेहित्वंराजन् सन्ध्यावल्याविनाक्वचित् ॥ तस्याहिविरहैर्दुःखी सपुत्रायाभविष्यसि ॥ दुःखेनभवतोराजन् भूरिदुःखंभवेन्मम ॥ यत्रैवभवतःसौख्यं तत्राहमपिसंस्थिता ॥ यत्रत्वंरंस्यसेराजन् तत्रमेमन्दरोगिरिः ॥ भर्तुःस्थानेसुवस्तव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋद्धिहीनेपिभार्यया ॥ समेरुःकाञ्चनमय स्तंनिवासंप्रचक्ष्यते ॥ मनोरथानांसतरुर्यत्रत्वंरंस्यसेप्रभो ॥ भर्तृस्थानंपरित्यज्य सवित्तंवित्तवर्जितं ॥ पितृस्थानंचयानारी अर्थार्थमनुगच्छति ॥ इहापनुज्यनरकं पश्चाद्भवतिशूकरी ॥ एवंजानाम्यहंदोषान् कथंस्थास्यामिमन्दरे ॥ गमिष्यामित्वयासार्द्धमीशस्त्वंसुखदुःखयोः ॥ मोहिन्यास्तद्वचःश्रुत्वा सराजाहृष्टमानसः ॥ परिष्वज्यवरारोहामिदंवचनमब्रवीत् ॥ भार्याणांममसर्वासामुपरिष्टाद्भविष्यासि ॥ माशंकांकुरुवामोरु नतेदुःखंभविष्यति ॥ जीवनादधिकंसुभ्रु भविष्यसिगृहेमम ॥ गच्छावएहितन्वंगि सुखायनगरंप्रति ॥ भुंक्ष्वभोगान्मयासार्द्धं तत्रस्थास्वेच्छयाप्रिये ॥ साचेदमुक्ताशशिकान्तिगौरी रुक्मांगदेनात्मजनाशनाय ॥ संप्रस्थितान्नूपुरनादयुक्ता विकर्षयन्तीगिरिजातसंघान् ॥ २६ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते मोहिन्यानयनंनाम त्रयोदशोध्यायः ॥ १३ ॥ ⁂ ⁂ ⁂ ⁂ ⁂ ⁂

वशिष्ठउवाच ॥ संप्रस्थितावुभौभूय गिरिप्रस्थाद्धरातलं ॥ पश्यमानोवहून्भावान् गिरिजातान्मनोहरान् ॥ केचिन्नीलोत्पलप्रख्याः केचित्काञ्चनसप्रभाः ॥ केचिद्विद्रुमसंकाशाः केचिद्रजतसन्निभाः ॥ केचित्स्फटिकवर्णाभा हरितालनिभास्तथा ॥ अन्यानाश्लेषतांप्राप्ताः शनकैःशनकैर्द्रुमाः ॥ अवरुह्यतुशैलेन्द्रा त्तावुभौधरणीतलं ॥ संप्राप्यसुमहावीर्य्यं वाजिनंतदपश्यतां ॥ खन्यमानंखुरेणोर्वीं कुलिशाग्रेणवेगिना ॥ तस्यदारयतःपृथ्वीं सुतीक्ष्णेनखुरेणहि ॥ गृहगोधाभवेत्तास्मिन् रंध्रेमुखगताकिल ॥ निर्गच्छ- ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानानृपते खुरैंणविदलीकृता ॥ विचार्य्यमाणोनृपतिर्दयावान्समपश्यत ॥ अत्यधावतवेगेनहाहतेतिवदन्प्रियां ॥ वृक्षपत्रेततःसो-
थ कोमलेजगतीपतिः ॥ उद्धारयन्हयखुरान् प्राक्षिपज्जलजेक्षणः ॥ ततस्तांमोहिनींप्राह पश्यमूर्च्छांगतामिमां ॥ शीघ्रंचाहरचा-
र्वंगिजलंजलजलोचने ॥ येनेमांमूर्च्छितांसिंचे गृहगोधांविमर्द्दितां ॥ साभर्तुर्वचनाच्छीघ्रमाहरच्छीतलंजलं ॥ तेनाभिषिञ्चन्नृपति
र्गृहगोधांविमर्द्दितां ॥ सावापचेतनांराजन् शीतलेनजलेनच ॥ अभिघातेषुसर्वेषु शस्तंवारिषुसेचनं ॥ क्लिन्नेनचाथवस्त्रेण वन्ध-
नंहितमुच्यते ॥ साप्राप्यचेतनांभूयो गोधावचनमब्रवीत् ॥ निरीक्ष्यनृपशार्दूलं वेदनार्त्तांशनैःशनैः ॥ रुक्माङ्गदमहावाहो निवो-
धममचेष्टितं ॥ साकरेनगरेरम्ये भार्य्याहंद्विजजन्मनः ॥ रूपयौवनसम्पन्ना तस्यचाहंप्रियाविभो ॥ सदाविद्वेषसम्पन्नोमयिनिष्ठुर
जल्पकः ॥ नान्यस्यकस्यचिद्द्वेष्टामांसुमोचद्विजोनृप ॥ ततोहंक्रोधसंयुक्ता वशीकरणलम्पटा ॥ अपृच्छन्प्रमदाराजन् यास्त्य-
क्ताःपतिभिःकिल ॥ ताभिरुक्ताह्यहंभूप वश्योभर्त्ताभविष्यति ॥ अस्माकंप्रत्ययोजातो भर्तृत्यागीवरानना ॥ पूजिताभेषजैर्वश्या
जाताहिपतयोहिनः ॥ सात्वंपृच्छवरारोहे दास्यतिभेषजंशुभं ॥ विकल्पंकुरुमाभीरु भवितादासवत्पतिः ॥ ततोहंत्वरितागत्वा
तासांवाक्येनभूपते ॥ प्रसादःकथितस्तस्याः पृच्छंत्याममवैः ॥ शतस्तंभसमायुक्तः कुट्टिमःसुधयायुतः ॥ उपविष्टांसुतेज-
स्कां अपश्यंव्रतचारिणीं ॥ प्रावृतांदीर्घवस्त्रेण सवितेवविकर्त्तना ॥ दीर्घाभिःसाजटाभिस्तु संवृतादीप्तिसंयुता ॥ परिचारस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संयुक्ता वीर्य्यमानाशनैःशनैः ॥ अक्षसूत्रकरासाच जपन्तीभगमालिनीं ॥ सर्ववश्यकरंमन्त्रं क्षोभकंप्रत्ययात्मकं ॥ ततोहंप्रण-
ताभूत्वा पद्माांन्यस्तांगुलीयकं ॥ वज्रमाणिक्यखचित मतिरक्तंप्रभान्वितं ॥ ततोहृष्टामवद्दृष्ट्वा पादस्थंचांगुलीयकं ॥ अपृ-
ष्टयातयाज्ञातं ममभर्तृविमाननं ॥ तथोक्ताहंतयाभूप तापस्याप्रणतौस्थिता ॥ चूर्णोरक्षान्वितोह्येष सर्वभूतवशानुगः ॥ सुश्रुभ-
र्त्तरिसंयोज्य रक्षांकण्ठेतथाकुरु ॥ काकालयंचसंगृह्य विधिपूर्वमतःपरं ॥ मंत्रवानथशुचिर्भूत्वा शवाग्निश्चविनिर्दिशेत् ॥ भविष्य-
तिपतिर्वश्यो नान्यांयास्यतिसुन्दरि ॥ चूर्णंरक्षांगृहीत्वाहं प्राप्ताभर्तृगृहंपुनः ॥ प्रदोषेतपसायुक्तः चूर्णोभर्त्तरियोजितः ॥ ग्रीवा-
यांहिकृतोरक्षा नविचारःकृतोमया ॥ यदासपीतचूर्णस्तु भर्तामम नृपोत्तम ॥ तदैवक्षयरोगोभूत् पतिःक्षीणोदिनेदिने ॥ गुह्येषु
कृमयोजाताः क्षतदुष्टव्रणोद्भवाः ॥ राजन्दिनैःकतिपयै र्दीपद्राविणदर्शनात ॥ हततेजास्तथाभर्त्तामामुवाचाकुलेन्द्रियः ॥ क्रन्द-
मानोदिवारात्रौ दासोस्मितवशोभने ॥ त्राहिमांशरणंप्राप्तं नयास्येन्यांस्त्रियंकचित् ॥ तत्तस्यरुदितंश्रुत्वा भीताहमवनीपते ॥
निवेदितंमयातस्यां कथंभर्त्ताभवेत्सुखी ॥ तयामेभेषजंदत्तं द्वितीयंदाहशान्तये ॥ दत्तेचभेषजेतस्मिन् स्वस्थोभून्मेक्षणात्पतिः ॥
पूर्वचूर्णभवोदाहः शान्तस्तेनौषधेनहि ॥ ततःप्रभृतिभर्त्तामे वश्योभूद्वचनेस्थितः ॥ पञ्चत्वंचगताकाले तथानरकयातनां ॥ ता-
म्रभ्राष्ट्रेचदग्धाहं युगानिदशपञ्चच ॥ सूक्ष्मातिलप्रमाणानि कृत्वाखण्डान्यनेकशः ॥ किंचित्पातकशेषेषु धरायामवतारिता ॥ ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहगोधामयंरूपं कृत्वाभास्करजेनमे ॥ साहमवस्थिताभूप वर्षाणामयुतंसरुक् ॥ यान्यापियुवतीराजन् भर्तुर्वश्यंसमाचरेत् ॥ वृथाधर्म्माद्दुराचारा भर्ज्यतेताम्रभ्राष्ट्रके ॥ भर्त्तानाथोगुरुर्भर्त्ता भर्त्तावेदैवतंपरं ॥ तंवश्यंकुरुतेयातु सासुखंकथमाप्नुयात् ॥ तिर्यग्योनिशतंयाति कृमियोनिशतानिच ॥ तस्माद्भूपालकर्त्तव्यंस्त्रीभिर्भर्तृवचस्सदा ॥ साहंयास्येपुनर्योनिंकुत्सितांयातनान्वितां ॥ यदिनोद्धरसेराजन् अद्यमांशरणागतां ॥ सुकृतस्यप्रभावेन निजजन्मानितेनच ॥ यात्वयासंगमेपुण्या कृताश्रवणद्वादशी ॥ शरय्वाश्चैवगंगायाः संगमेपापनाशने ॥ प्रेतनिर्य्यातनीपुण्या इप्सितस्यचदायिनी ॥ यस्यांभूपालस्वगृहे स्नातोपिमनुजःकिल ॥ सर्वतीर्थफलप्राप्तिं लभतेनात्रसंशयः ॥ दत्तंजप्तंहुतंयच्च कृतंदेवार्चनादियत् ॥ सर्वंतदक्षयंज्ञेयं यत्कृतंविजयादिने ॥ एवंविधंफलं तस्या स्तदेवसकलंतव ॥ द्वादश्यामुपवासेन त्रयोदश्यांतुपारणे ॥ दशाब्दफलमाप्नोति नरःसम्यगुपोषणैः ॥ दयांकुरुमहीपाल धर्ममूर्त्तिर्भवान्क्षितौ ॥ वैवस्वतपथध्वंसीपरित्राहिसुदुःखितां ॥ गृहगोधावचःश्रुत्वामोहिनीवाक्यमब्रवीत् ॥ स्वकृतंजन्तवोश्नान्ति सुखदुःखादिकंविभो ॥ तस्मात्किमनयाकार्य्यं पापयाभर्तृक्षुद्रया ॥ ययाभर्त्तावशंनीतोरक्षाचूर्णादिभिर्नृप ॥ साधुभ्योयत्कृतंराजन् यशःस्वर्गकरंभवेत् ॥ शर्करामिश्रितंक्षीरंकाद्रवेयेनिवेदितं ॥ विषवृष्टिकरंदृष्टमेवंदुष्टेनियोजितं ॥ पापामिमांपरित्यज्यगच्छावोनगरायवै ॥ जनव्यापादयुक्तानामात्मसौख्यंविनश्यति ॥ रुक्माङ्गदउवाच ॥ ब्रह्मात्मजेकथंवाक्यमीदृशंव्याहृतंत्वया ॥ नसाधुनामि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दंबृत्तंभवेच्चारुविहासिनि ॥ आत्मसौख्यकराःपापा भवन्तिपरदारिकाः ॥ पिताजातोवरारोहे परोपकरणायते ॥ शशीसूर्य्योथपव-
नोमेदिनीहुतभुग्जलं ॥ चन्दनंपादपाःसन्तःपरोपकरणोस्थिताः ॥ श्रूयतेकिलराजाभूद्धरिश्चन्द्रोवरानने ॥ चाण्डालमन्दिरवासी
भार्य्यातनयविक्रयी ॥ असत्यवचनाद्भीतोदुःखाद्दुःखतरंगतः ॥ तस्यसत्येनसन्तुष्टा देवाब्रह्मपुरोगमाः ॥ वरेणशद्दशीचक्षुर्हरिश्चन्द्रं
महीपतिं ॥ तेनसत्यवताचोक्ता देवाब्रह्मपुरोगमाः ॥ यदितुष्टाहिविबुधा दातुकामोवरंमम ॥ एषाहिनगरीरम्यासद्रूपाससरीसृ-
पाः ॥ आवालवृद्धतरुणा सनारीससुतायदा ॥ प्रयांतुगतपापाहि स्वर्गतींनगरीःमम ॥ अयोध्यापातकंगृह्य गन्ताहंनगरंध्रुवं ॥
एकाकीनहिवांच्छन्ति परित्यज्यजनंक्षितौ ॥ स्वर्गंगन्तुंहिविबुधाः सत्यमेतन्मयेरितं ॥ तस्यतांधिषणांज्ञात्वा सहतेनैवतांपुरीं ॥
आनयन्त्रिदिवंदेवा ब्रह्मणासहिताःकिल ॥ सोद्यापिवसतेराजा स्वपौरेणसमन्वितः ॥ कामगेनविशालाक्षि पूज्यमानोदिवाल-
येः॥ अस्थिदानंकृतंदेवी कृपयाहिदधीचिना ॥ देवानामुपकारार्थं ज्ञात्वादैत्यैर्निराकृतान् ॥ कपोतार्थेस्वमांसानि सिविनाभूभु-
जापुरा ॥ प्रदत्तानिवरारोहे श्येनायक्षुधितायवै ॥ जीमूतवाहनोराजा पुरासीत्क्षितिमण्डले ॥ तेनापिजीवितंदत्तं गरुडाय
वरानने ॥ तस्माद्दयालुनादेवि भवितव्यंमहीभुजा ॥ शुचौवर्षतिदेवेशो अमेघेपिसमंशुभे ॥ चाण्डालंपतितंचन्द्रो ह्लादयच्चानि-
जैकरैः ॥ तस्मादहंवरारोहे गृहगोधांसुदुःखितां ॥ उद्धरिष्येनिजैःपुण्यै दौहित्रैर्नाहुषिर्यथा ॥ विमोहिनींनिराकृत्य गृहगोधामु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाचह ॥ दत्तंमयाकृतंपुण्यं विजयासंभवंतव ॥ गच्छविष्णोःशुभाल्लोकान् निर्द्धूताखिलकल्मषा ॥ तद्वाक्यंसहसाश्रुत्वा दिव्या-
भरणभूषिता ॥ विमुच्यदेहंतंजीर्णं गृहगोधासमुद्भवं ॥ द्वादशादित्यभाजाता दिव्यरूपामनस्विनी ॥ जगाममंत्र्यतंभूपं द्यो-
तयन्तीदिशोदश ॥ श्रीमन्तमिवकृवर्णा वैष्णवंपदमुत्तमं ॥ यद्योगिगम्यंहुतभुक्प्रकाशं वरंवरेण्यंपरमस्वरूपं ॥ यस्मादिमेदेव
शशिप्रकाशा जगत्प्रकाशायनृपःप्रसूतः ॥ ७६ ॥ इतिश्रीलघुनारदीयपुराणेरुक्माङ्गदचरिते गृहगोधासंवादोनामचतुर्दशः १४
वशिष्ठउवाच ॥ पातकान्मोचयित्वातां गृहगोधांसपार्थिवः ॥ उवाचमोहिनींवाक्यं शीघ्रमारुह्यतांहयः ॥ योजनायुतशोह्येष क्ष-
णात्कृष्णध्वजोयथा ॥ अद्यपश्यासिपुत्रस्य वक्त्रंपूर्णेन्दुसप्रभं ॥ धार्मिकस्यवरारोहे कृतज्ञस्यमहात्मनः ॥ सुखगामीहयोदेवि वि-
मानप्रतिमःशुभे ॥ तदाकर्ण्यवचोराज्ञो मोहिनीमदलालसा ॥ आरुरोहसमंभर्त्रा तंहयंवातवेगिनम् ॥ उवाचमोहिनीभूयो भ-
र्त्तारंप्रस्मयन्निति ॥ प्रतोदयेनमश्वंत्वं स्वपुरायमहीपते ॥ पुत्रवक्त्रंस्पृहाद्द्रष्टुं लंपटातववर्त्तते ॥ तवाधुनानृपश्रेष्ठ गंतुंचत्वरतेमनः ॥
मोहिन्यावचनंश्रुत्वा प्रतस्थेनगरंप्रति ॥ पश्यमानःसुसंहृष्टः पादपान्पर्वतान्नदी ॥ वनानिसुविचित्राणि मृगान्बहुविधानपि ॥
ग्रामान्घोषान्तथादुर्गान् नगराणिशुभानिच ॥ सरांसिचविचित्राणि महाभागान्मनोहरान् ॥ अचिरेणाश्रमंदृष्ट्वा वामदेवस्यभू-
पतिः ॥ आकाशस्थोमहीपालो नमस्कृत्यत्वरान्वितः ॥ ततोययौमहाराजो वायुवेगेनवाजिना ॥ पश्यमानोबहुन्देशान् धनधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यसमन्वितान् ॥ आससादपुरंराजा वैदेशेसुरसद्मवत ॥ तमायातंनृपंदृष्ट्वा चारैर्धर्मांगदस्ततः ॥ पितरंधर्मसंयुक्तं भूपालान्बा-
क्यमब्रवीत् ॥ एषाप्रकाशमायाति दिग्युदीचीनृपोत्तमाः ॥ मत्पितुर्वाजिनाक्रान्ता तेजसातस्यरञ्जिता ॥ तस्माद्गच्छामहेसर्वे सं-
मुखंनव्रजेत्सुतः ॥ यःसवैनरकंयाति घोरंनास्त्यत्रसंशयः ॥ संमुखंव्रजमानस्य सुतस्यापितरंप्रति ॥ पदेपदेयज्ञफलं प्राज्ञःपौरा-
णिकाद्विजाः ॥ उत्तिष्ठध्वंप्रयाम्येष भवद्भिःपरिवारितः ॥ अभिवादयितुंप्रेम्णा एषमेदैवतःपरं ॥ तथेत्युक्तस्तुतैःसर्वै र्भूमिपालैर्नृ
पात्मजः ॥ जगामसंमुखंपद्भ्यां क्रोशमात्रंपितुस्तदा ॥ वृतोराजसहस्रेण मूर्त्तिमानिवमन्मथः ॥ सगत्वादूरमध्वानमाससादनृ-
पात्मजः ॥ संप्राप्यपितरंस्नेहाज्जगामधरणींतदा ॥ शिरसाराजभिःसार्द्धं प्रणाममकरोत्तदा ॥ तंप्रणामगतंप्रेक्ष्य तनयंभूभुजेस-
ह ॥ अवरुह्यहयाद्राजा समुत्थाप्यसुतंविभो ॥ भुजाभ्यांसाधुवृत्ताभ्यां परिष्वज्यसभूमिपः ॥ मूर्द्ध्निचैनमुपाघ्राय उवाचतनयं-
तदा ॥ कच्चित्पासिप्रजाःसर्वाः कच्चिद्ध्वंसयसेरिपून् ॥ न्यायागतेनवित्तेन कोशंपुत्रविभर्षिवै ॥ कच्चिद्विप्रेधिकावृत्तिरस्तिपुत्र-
त्वयाकृता ॥ कच्चिद्देशान्तशीलत्वं कच्चिद्दुर्गोनानिष्ठुरः ॥ कच्चिद्गावोनदुह्यन्ते पुत्रचाण्डालवेश्मनि ॥ कच्चित्तेविषयेसत्वा विनी-
ताःपितृवत्सलाः ॥ श्वश्रूवाक्येवधूकच्चिद्वर्त्ततेभर्तृतत्परा ॥ कच्चिद्विश्वादान्विप्रैश्च सहपश्यासिपुत्रक ॥ कच्चिद्गावोनवाध्यन्ते वि-
षयेतृणवारिषु ॥ तुलामानानिसर्वाणि संपश्यासिदिनत्रये ॥ कुटुंविनःकरैःपुत्र पीडयन्नातिवर्द्धसे ॥ कच्चिन्नद्यूतपानादि वर्त्तसे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयेतव ॥ कश्चिद्विप्रवरैर्लोका भिन्नधान्यैःपुरेतव ॥ तथाविशीर्णैर्बर्णैश्च बञ्चयन्तिनमानवाः ॥ सुदृष्ट्यापुत्रकच्चिद्वै हस्त्यश्वंपरि-
पश्यसि ॥ कच्चित्तुमातृःसर्वावै नविशेषणपश्यसि ॥ कच्चिन्नवासरेविष्णोर्नरोभुङ्क्तेपुरेतव ॥ शशिक्षयेतुसंप्राप्ते कच्चिच्छ्राद्धकरोज-
नः ॥ कच्चिच्चापररात्रेषु निद्रांपुत्रविसर्जसे ॥ निद्रामूलमनर्थस्य निद्रापापप्रवर्त्तिनी ॥ निद्रादरिद्रजननी निद्राश्रेयोविनाशिनी ॥
नहिनिद्रान्वितोराजा चिरंभुङ्क्तेवसुन्धरां ॥ पुंश्चलीचयथाभर्त्तुर्लोकद्वयबिनाशिनी ॥ एवमुच्चरमाणेतु तनयोवाक्यमब्रवीत ॥ ध-
र्मांगदोमहीपालं प्रणम्यचपुनःपुनः ॥ सर्वमेतत्कृतंतात पुनःकर्त्तास्मितेवचः ॥ पितुर्वचनकर्त्ताच पुत्रोवन्द्योजगत्त्रये ॥ किंत-
स्मात्पातकंतस्य नकुर्याद्यःपितुर्वचः ॥ नतुतीर्थफलंकुर्यात यःकुर्यात्सेवनंपितुः ॥ त्वदधीनंशरीरंमे त्वदधीनंहिजीविनं ॥ त्वदधी-
नोहिमेधर्मस्तथात्वंदैवतंमम ॥ त्रैलोक्यस्यापिदानेन नशुद्धिर्मेऋणान्नव ॥ किंपुनर्देहवृत्ताभ्यां क्लेशदानादिभिर्विभो ॥ एवंब्रु-
वाणंतनयं वहुभूपालसंवृतं ॥ रुक्मांगदःपरिष्वज्य पुनराहसुतंवचः ॥ सत्यमेतत्त्वयापुत्र व्याहृतंवेदसंमितं ॥ पितुरत्यधिकंकिं-
चिद्दैवतंनसुतस्यहि ॥ देवाःपराङ्मुखास्तस्य पितरंयोवमन्यते ॥ सोहंमूर्ध्निस्त्वयापुत्र धृतस्तुक्षितिरक्षणात् ॥ जित्वाद्वीपवतींपृथ्वीं
बहुभूपालभूषितां ॥ एतत्सौख्यंपरंलोके स्वर्गस्यैतत्पदंतथा ॥ पितुरत्यधिकःपुत्रो यद्भवेत्क्षितिमण्डले ॥ सोहंपुत्रकृतार्थस्तु कृतः
सद्गुणवर्त्तिना ॥ त्वयासाधयतांपुत्र तथाहरिदिनंशुभं ॥ तत्पितुर्वचनंश्रुत्वा पुत्रोधर्मांगदोब्रवीत ॥ कृतस्तुभवान्राजन् निवेद्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ना०पु० मयिभूधुरं ॥ कस्मिन्स्थानेस्त्वियंप्राप्ता सूर्यायुतसमप्रभा ॥ मन्येनिर्वेदमापन्न इमांकृत्वाप्रजापतिः ॥ नेदृग्रूपामहीपाल नारीत्रै-
लोक्यमध्यतः ॥ मेध्यभूधरजादेवी अथवासागरोद्भवा ॥ मायावामयदैत्यस्य प्रमदारूपधारिणी ॥ अहोधातासुनिपुणो येनेयं- प० १६
॥ २२ ॥ निर्मितापुरा ॥ कलाग्रशतभागंतु व्यलीकंनैवदृश्यते ॥ इयंहियोग्याकनकाब्जभासा तथैवधन्याजगतीपतीश ॥ एवंविधामेज-
ननीयथास्यात् कोन्योस्तिमत्तःसुकृतीनरेन्द्रः ॥ ४९ ॥ इतिश्री ल० ना० पु रु० पुत्रानुशासनं नाम पञ्चदशोध्यायः ॥ १५ ॥
वशिष्ठउवाच ॥ धर्म्मांगदवचःश्रुत्वा तद्दृष्टोरुक्मांगदोब्रवीत् ॥ सत्यंतेजननीपुत्र संप्राप्तामन्दरेमया ॥ विधानात्पुत्रबालेयं मदर्थे-
कृतनिश्चया ॥ कुर्वतीदारुणंकिंचि त्तपःपरमदुष्करं ॥ ततःपञ्चदशाहेन हयमारुह्यवेगितः ॥ मन्दरंपर्वतंश्रेष्ठं गतोहंधर्मभूषण ॥
तन्मूर्ध्निमहाभागा तोषयन्तीदिगंबरं ॥ मयादृष्टासमारुह्य पश्चांक्षीरोदगह्वरं ॥ ततोहंमूर्च्छयायुक्तः पतितोधरणीतले ॥ अनंग
मार्गणैर्विद्धो व्याधविद्धोमृगोयथा ॥ ततोहमनयादेव्या शांत्वितश्चारुनेत्रया ॥ उक्तोहंभवभर्त्तामे किंचित्प्रार्थनयासह ॥ मया
चापिप्रतिज्ञातं सदक्षिणकरान्वितं ॥ सेयंभार्य्याविशालाक्षी स्थितामन्दरमस्तके ॥ ततोवतीर्यभूपृष्ठं समारुह्यतुरंगमं ॥ तृतीयेन
दिनेनाहं संप्राप्तस्तवमन्दिरं ॥ पश्यमानोगिरिन्देशान् सरांसिसरितस्तथा ॥ इयंतेजननीपुत्र ममभार्य्यासुशोभना ॥ अभिवा-
दयचार्वंगी मिमांसन्ध्यावलीमिव ॥ ततपितुर्वचनंश्रुत्वा चाग्रसंस्थामवन्दत ॥ शिरसात्ववनींगत्वा विनयेनमहाशयः ॥ उवाच ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोहिनीतत्र प्रहसन्निवभूपते ॥ नमस्करोमित्वामंब सहैभिर्वसुधाधिपैः ॥ प्रसादंकुरुमेदेवि प्रणतस्यकृतांजलेः ॥ तंपुत्रमवनीप्रा-
प्तं मोहिनीप्रेक्ष्यभूपते ॥ दाक्षिण्येनतुसाभर्तु रवतीर्य्यतुरंगमात् ॥ अवगृह्यचवाहुभ्यां उत्थाप्यविनतंतुतं ॥ परित्यक्तस्तथामात्रा
पुनरेवाभ्यवादयत् ॥ ततस्तांसुमनोज्ञैस्तु चारुवस्त्रैःसुभूषणैः ॥ भूषयित्वासमारोप्य पुनरेवहयोत्तमं ॥ सपृष्ठेचरणौकृत्वा तस्या
राजीवलोचनः ॥ तेनैवविधिनाभूप पितरंचाप्यरोपयत् ॥ वृतोभूपालसंघैश्च पद्भ्यांधर्म्मांगदोययौ ॥ अश्वस्याग्रेतदात्हृष्टो जन-
नींप्रेक्ष्यमोहिनीं ॥ श्रावयन्सुजनंसर्वं मेघगंभीरयागिरा ॥ धन्यःसतनयोलोके मातरोयस्यभूरिशः ॥ सर्वलक्षणसंपूर्णः पितुरिष्टो
महावलः ॥ यस्यैकाजननीलोके पितातस्येहदुःखभाक् ॥ पितुर्दुःखेनपुत्रस्य नचसौख्यंभवेन्महत् ॥ एकस्यावन्दनेमातुः पृथि-
वीफलमश्नुते ॥ मातृणांवहुलेसत्यं महत्पुण्यंभविष्यति ॥ दिवसेदिवसेपूजां कुर्वतस्त्वक्षयंफलं ॥ एवमुच्चार्य्यमाणोसाववनीप-
तिसंवृतः ॥ प्रविष्टोनगरंरम्यं वेदिशंऋद्धिसंयुतं ॥ हयस्थेनैवपित्रावै सपद्भ्यामेवभूपते ॥ ततोगृहवरंप्राप्य गृह्यमाणोजनैर्नृपः ॥
अवरुह्यहयात्तस्मात् मोहिनींवाक्यमब्रवीत् ॥ धर्मांगदगृहंगच्छ मत्सुतस्यमनोहरं ॥ एषतेगुरुसुश्रूषां करिष्यतिवरानने ॥ नस-
र्वानैवदासीते सुश्रूषामाचरेत्तथा ॥ साह्येवमुक्तापतिना प्रतस्थेसुतमन्दिरं ॥ धर्मांगदेनसातुष्टा गच्छन्तीमन्दिरायवै ॥ दृष्ट्वास-
र्वानैवदासीते सुश्रूषामाचरेत्तथा ॥
चमहाभाग स्तानुवाचमहीभुजः ॥ तिष्ठध्वंपितुरादेशात सुश्रूषेजननीमहं ॥ तानेवमुक्तानीत्वाच स्वगृहंगजगामिनीं ॥ आरो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पयामासचतां पर्य्यंकेसुमनोहरे ॥ काञ्चनेपट्टसूत्रेण रचितेकोमलेदृढे ॥ सुखास्तरणसंयुक्ते मणिविद्रुमभूषिते ॥ रत्नदीपैश्चबहुशो भाषितेसूर्य्यसन्निभैः ॥ पादप्रक्षालनंचक्रे ततोवैधर्मभूषणः ॥ सन्ध्यावल्यागुरुत्वेन तामपश्यतसुन्दरीं ॥ नैवतस्याभवद्दृष्टं मोहिनींप्रतिमानसं ॥ सुकुमारीसुतत्वंगी पीनोरुजघनस्थली ॥ मेनेवर्षायुतसमा मात्मानंहित्रिवार्षिकं ॥ प्रक्षाल्यचरणौतस्या स्तज्जलंचाप्यवन्दयत ॥ पादोत्थंपरयाभक्त्या कृतकृत्योस्मिभाविनि ॥ ततस्तांस्नापयामास अक्षुब्धेनहृचेतसा ॥ स्वयंचवरनारीभिः श्रमक्लमहरायवै ॥ सर्वभोगैस्तदादेवीं चक्रेधर्मांगदःसुतः ॥ क्षीरोदमथनेजाते मन्दरेचामृतालये ॥ येलब्धदानवान्जित्वा पातालेरत्नसूत्तिके ॥ मोहिन्याःकर्णयोश्चक्रे स्वयमेववृषांगदः ॥ जांबूनदस्यशुद्धस्य निष्कंकुलिशभूषितं ॥ हारादनंतरंमातुर्ददौभूपसुतस्तदा ॥ अष्टोत्तरसहस्रेण धात्रीफलनिभैःशुभैः ॥ मौक्तिकैराचितःशुभ्रो हारोदेव्याःक्षिपद्धृदि ॥ निष्कपलशतैर्बद्धः कुलिशायुतभूषितः ॥ हारालघुतरंचक्रे मातुर्नृपसुतस्तदा ॥ वलयावज्रखचिता द्विरष्टौकरयोर्दधत ॥ एकैकेनिस्ककोटिर्हि कृतासुल्यविदैर्नरैः ॥ केयुरनूपुरंतस्या अनन्तोयंनृपात्मजः ॥ प्रददौपितुरिछायां अनेकाभरणंनृपः ॥ कटिसूत्रंचसर्वाण्या यदासीत्तारकप्रभं ॥ तद्दृष्टंभयभीतायाः संग्रामेतारकामये ॥ कालनेमिस्थितेराज्ये पतितंमलयाचले ॥ तद्गृहीतंतुदैत्येन शतमायेनमायिना ॥ तंहत्वामलयेदैत्यं दैत्यकोटिशतावृतं ॥ सँवत्सररणेघोरे पितुर्वचनकारणात् ॥ अवापकटिसूत्रंतद्दैत्यराजप्रियास्थितं ॥ तद्ददौपि-

CC-0. In Public Domain. Digitization by eGangotri

तुराज्ञायाः सानन्दपुलकोनृपः ॥ हिरण्यकशिपोःपूर्वं याभार्य्यालोकसुन्दरी ॥ तस्यासीमन्तकस्यासीच्छतविद्युत्समप्रभः ॥ साप्रविष्टाहिपतिना सहपावकमध्यतः ॥ समुद्रक्षिप्यसीमन्तं दुःखेनमहतान्वितः ॥ सागरस्तत्रसंपूज्य रत्नश्रेष्ठमिदंकिल ॥ ददौ धर्मांगदेरत्नं समुद्रोवीर्य्यतोषितः ॥ जनन्यैप्रददौसोपि सूर्य्यकोटिसमप्रभं ॥ अग्निशौचेशुभेवस्त्रे सकाञ्चनमनोरमे ॥ सहस्रकोटितुल्येतु मोहिन्याःसानिवेदयत् ॥ देवमाल्यंसुगन्धाढ्यं तथादेवविलेपनं ॥ लब्धंदेवगुरोःपूर्वं सिद्धहस्तात्सुहृद्यकं ॥ धर्मांगदेन वीरेण द्वीपानामधिपेनच ॥ तच्चापिप्रददौदेव्या मोहिन्याःकामवर्द्धनं ॥ संपूज्यपरयाभक्त्या पश्चातषड्रसभोजनं ॥ स्वीकृतंमातृहस्तेन भोजयामासभूमिपः ॥ पुरस्तादेवजननीं वाक्यैःसंबोध्यभूरिशः ॥ उवाचमधुरंवाक्यं शिरसोच्यप्रणम्यवै ॥ मयात्वया चकर्त्तव्यं राज्ञोवाक्यंनसंशयः ॥ यात्विष्टानृपतेर्देवि सास्माकंतुगरीयसी ॥ यात्विष्टाभवतेभर्त्तु स्तस्यांयानिष्ठमाचरेत ॥ सपत्नी नरकंयाति यावदिन्द्राश्चतुर्द्दश ॥ सपत्नभावंयाकुर्य्या द्भर्त्तुप्राणप्रियातुया ॥ तस्याःस्नेहवशात्सापि पच्यतेताम्रभ्राष्ट्रके ॥ यथा सुखेवसेद्भर्त्ता तथाकार्य्यंहिभार्य्यया ॥ अनुकूलहितंकार्यं भर्त्तुरिष्टाहिसाभवेत् ॥ यथाभर्त्तातथातांहि वश्येतवरवर्णिनि ॥ हीतायामपिशुश्रूषां कृत्वायातित्रिविष्टपं ॥ पश्चात्स्थानेभवेत्स्याहि यस्मिन्साह्यभवत्पुरा ॥ ॥सर्वभोगानवाप्नोति भर्त्तुरिष्टाप्रजायते ॥ ईर्ष्यागर्वपरित्यागा त्सर्वेश्वरपदंलभेत् ॥ सपत्नीयासपत्न्याश्च शुश्रूषाकुरुतेसदा ॥ भर्त्तुरिष्टांसमीक्षेत लोकास्तस्याःसदाक्षयाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इष्टापुराब्राह्मणस्य वेश्याभूत्शाकलेपुरे ॥ शूद्राचारप्रदुष्टस्य परित्यक्तक्रियस्यच ॥ तस्यैवतुमहाभागा भार्य्यासाध्वीपतिव्रता ॥
साधुपर्य्यचरत्साधु सवश्यंब्राह्मणाधमं ॥ उभयोश्चालयेत्पादा वुभयोःप्रियकारिणी ॥ उभयोरप्यधःशेते तयोश्चवचनेस्थिता ॥
वेश्ययावार्य्यमाणानि सर्वप्रायछताधिकं ॥ एवंशुश्रूषयंत्याहि भर्त्तारंवेश्ययासह ॥ जगामसुमहान्कालो दुःखितायामहीपते ॥
अपरास्मिन्दिनेभर्त्तामाहिषंमूलमास्थितं ॥ अभक्षयत्सुधर्मेणानिःपावांतिलमिश्रितान् ॥ तदापथ्यमाशित्वाथअवमन्यपतिव्रताम् ॥
अभवद्दारुणोरोगः स्त्रीजितस्यभगन्दरः ॥ पीड्यमानस्तुसतदा दिवारात्रौतदातुरः ॥ यावदस्तिगृहेवित्तं तावद्वेश्याहिसर्वशः ॥
गृहीत्वाद्विगुणंवित्तं गतायायान्यमन्दिरं ॥ अन्यस्यचतथासायं गतापार्श्वमनिन्दिते ॥ ततःसदीनवदनो व्रीडयाधोमुखास्थितः ॥
उवाचसरुदन्भार्य्यां रुजाव्याकुलचेतनः ॥ परिपालयमांदेवि वेश्यासक्तंसुनिष्ठुरं ॥ नमयोपकृतंकिञ्चि त्तवसुन्दरिपापिना ॥
योभार्य्यांप्रणतांपापो नानुमन्येतगर्वितः ॥ सषंढोभवतेभद्रे जन्मानिदशपञ्चच ॥ दिवाकीर्त्तिगृहंप्राप्य गर्भितंसाधुभिर्जनैः ॥
पापांयोनिमवाप्स्यामि देवित्वामवमन्याहि ॥ तवक्रोधेनदग्धोस्मि त्राहिमांपापिनंशुभे ॥ त्राणंमेकुरुभर्त्तारमब्रवीत्सापतिव्रता ॥
नदैन्यंभवताकार्य्यं नव्रीडाकार्यमांप्रति ॥ नचापित्वयिमेक्रोधो येनदग्धानिवक्ष्यासि ॥ पुराकृतानिपापानि दुःखानिप्रभवन्तिहि ॥
॥ २४ ॥
तानियःक्षमतेविद्वान् सज्ञेयःपुरुषोत्तमः ॥ यन्मयापापयापापं कृतंवैपूर्वजन्मनि ॥ तद्भुंजत्यानमेदुःखं नाविसादश्चकश्चन ॥ इ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्येवमुक्त्वाभर्त्तारं सासुभ्रूःसमयालयत् ॥ आनीयजनकाद्वित्तं वन्धुभ्योवरवर्णिनी ॥ क्षीरोदनिलयावासं भर्त्तारंसानुमन्यते ॥ मोचयंतिदिवारात्रौ पुरीषंमुत्रएवच ॥ रजन्यांचैववृक्षोत्थं गृह्यनिर्ज्जासजंजलं ॥ नखेनपातयामास क्रमिन्कृष्णान्शनैःशनैः ॥ नसास्वपितिवैरात्रौ नदिवावरवर्णिनी ॥ भर्त्तुर्दुःखेनसातप्ता पश्यन्तीज्वलितंजगत ॥ भोदेवाश्रूयतांसर्वे पितरोयेचाविश्रुताः ॥ कुर्वतुरोगहीनंमे भर्त्तारंगतकल्मषं ॥ चण्डिकायैप्रदास्यामि रक्तमाम्ससमुद्भवं ॥ अजाविमाहिषोपेतं भर्तुरिष्टाहिमेभवेत् ॥ साद-रात्कारयिष्यामि उपवासंतथादश ॥ जननीस्थापयिष्यामि शून्यकण्टकसंस्तरे ॥ नोपभोक्ष्यामिमधुरं नोपभोक्ष्यामिवैघृतं ॥ अ-भ्यङ्गरहितावस्थां रम्येहंनात्रसंशयः ॥ जीवतांरोगहीनस्तु भर्त्तामेशरदांशतं ॥ एवंसाव्याहरद्देवि वासरेवासरेतदा ॥ ततःकाले-नचान्येन सन्निपातोभवत्पतेः ॥ तस्यापिकटुकंप्रादा दास्येनिःक्षिप्यदेशिनी ॥ तद्दीयमानेकटुके अंगुलींतामखण्डयत ॥ वेश्यां दृष्ट्वातदाभीत स्तद्गतेनांतरात्मना ॥ उभयोर्द्दन्तयोश्लेषः सहसासमपद्यत ॥ तांखण्डमंगुलींवक्त्रे स्थितांभर्तुःस्वकोमलां ॥ खण्ड-यित्वांगुलींभर्त्ता पञ्चत्वमगमत्तदा ॥ शय्यायांलीनमुक्तायां स्मरन्तांपुंश्चलींतदा ॥ मृतंविज्ञायभर्त्तारं साभार्य्याभर्तृतत्परा ॥ वि-क्रियांगतमेवन्तं गृहीत्वाचैवसातदा ॥ सर्पिर्युतांचितांचक्रे मध्येकृत्वापतिंतदा ॥ अनुगृह्यपदाभ्यांसा पद्भ्यांदत्वातुपावकं ॥ मु-खेमुखंसमाधाय हृदयेहृदयंतथा ॥ जघनेजघनंदेवी भर्तुःसासंनिवेश्यह ॥ दाहयामासकल्याणी भर्तुर्देहंरुजान्वितं ॥ आत्मना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहचार्वंगी ज्वलितेजातवेदसि ॥ विमुच्यदेहंसहसाजगाम पतिंसमादायसुराधिलोकं ॥ विशोषयित्वाबहुपापसंघान् स्वकर्मणा
तेनचदुःकरेण ॥ ६४ ॥ इतिश्रीलघुनारदीयपुराणे सन्ध्यावलीप्रवोधन्नाम षोडशोध्यायः ॥ १६ ॥ ७ ७ ७ ७ ७
पुत्रउवाच ॥ तस्मादीर्ष्यांपरित्यज्य मोहिनीमन्नभोजय ॥ नमातरीदृशंपुण्यं त्रैलोक्येप्राप्यतेक्वचित् ॥ गृहस्थेनप्रियांभार्यां भ-
र्तुर्याहिविभोजयेत् ॥ सपत्न्योहिसपत्न्यैतु यद्भक्तंप्रददातिवै ॥ तेनानेनभवेद्देवि प्रीतःकमलजःशुभे ॥ पितुर्मनोरमेतत्वं प्रसीद-
स्वममानघे ॥ तस्यास्तुसौख्यंकर्त्तव्यमावाभ्यांबरवर्णिनी ॥ भवेत्पापक्षयश्चैव स्वर्गप्राप्तिस्तुवाक्षया ॥ श्रुत्वातद्वचनंसातु देवीस-
न्ध्यावलीतथा ॥ अभिनन्द्यपरिष्वज्य तनयंगजगामिनी ॥ मूर्द्ध्निचैवमुपाघ्राय वचनंचेदमब्रवीत् ॥ करिष्येवचनंपुत्र धर्म्यंहि-
तवमानद ॥ ईर्ष्यामानंपरित्यज्य भोजयिष्यामिमोहिनीं ॥ सदपत्यात्वहंपुत्र त्वयैकेनमहामते ॥ नियमैर्बहुभिर्जातस्तथैवबहुभि-
र्व्रतैः ॥ व्रतराजेनचीर्णेन जातस्त्वमसिपुत्रक ॥ नहीदृशंव्रतवरं पुत्रलोकेषुविद्यते ॥ सद्यप्रत्ययकृद्वत्स महापातकनाशनं ॥ किं-
कार्यंबहुभिःपुत्रैः शोकसन्तापकारकैः ॥ वरमेकःकुलालम्बी यत्रविश्रमतेकुलं ॥ त्रैलोक्यादुपरिष्टाच्च स्थिताहंतवसद्गुणैः ॥ जनयि-
त्वातुत्वांपुत्र धर्मचारिञ्यभूषण ॥ नकिंचित्कामयेवत्स तृप्तातवगुणत्रयैः ॥ धन्यान्मितानिपुण्यानि यैर्जातस्त्वांममानघ ॥ सप्त
द्वीपपतिःप्राज्ञः पितुराज्ञाकरस्तथा ॥ नाह्लादयातियस्तातं जननीम्वाथपुत्रक ॥ तंपुत्रंकवयःप्राहुर्महापातकसूचकम् ॥ एवमुक्त्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुतनयं देवीसन्ध्यावलीतदा ॥ दीक्षांचक्रेचभाण्डानां षड्रसस्यकृतेततः ॥ तस्यावीक्षितमात्रेण परिपूर्णानिभूपते ॥ षड्रसस्यतथो-क्षस्य मोहिनीभोजनेच्छया ॥ जलस्यामृतकल्पस्य शीतलस्यमहीपते ॥ घटापूर्णास्तथाचक्रे राज्ञांसन्ध्यावलीनृप ॥ ततःसार्चि-षमादाय काञ्चनंरत्नसंभवं ॥ तांपर्यवेक्ष्यदव्यग्रे मोहिनींप्राहसत्ततः ॥ काञ्चनेभाजनेश्लक्ष्णे सुस्वादान्नंवरानने ॥ शनैःशनैश्चभु-ञ्जाना राजीवदललोचना ॥ उपविश्याशनेरम्ये शातकुंभमयेशुभे ॥ वीज्यमानावरारोहा व्यजनेननराधिप ॥ धर्मांगदगृहीतेन शिखिपिच्छकृतेनच ॥ साभुक्त्वाब्रह्मतनया तदन्नममृतोपमं ॥ चतुर्गुणंसुशीतेन कृत्वाशौचंजलेनतु ॥ जगृहेपुत्रदत्तंसा तांबूलं सुरसुन्दरी ॥ वरचन्दनदिग्धेन हस्तेनपरयामुदा ॥ ततःप्रहस्यशनकैः प्राहसन्ध्यावलींनृप ॥ जननीकिंतुदेवित्वं रुक्मांगदनृप-स्यतु ॥ नमयाहिपरिज्ञातं श्रमखेदतयाशुभे ॥ तामेवंवादिनींदृष्ट्वा तदासन्ध्यावलींप्रति ॥ धर्मांगदोथनृपतिरिदंवचनमब्रवीत् ॥ उदरेत्वनयादेव्या धृतःसंवत्सरत्रयं ॥ तवभर्तुःप्रसादेन वृद्धिंप्राप्तोहमस्यतु ॥ सन्त्यनेकानिमातॄणां वर्गाणिममसुन्दरि ॥ अस्याः पीतंपयोदेवि मयासुकृतिनाशुभे ॥ अनयासारुषातीव्रा संप्राप्ताप्रसवात्मिका ॥ जनयित्वातुमांदेवी जातापूर्णमनोरमा ॥ त-न्नास्तित्रिषुलोकेषु येनानृण्यमवाप्नुयात् ॥ मातुस्त्वहंसुचार्वंगि सत्यमेतन्मयोदितं ॥ सोहंधन्यतरोलोके नास्तिमत्तोधिकःपु-मान् ॥ योहमुत्सङ्गमारूढो मातॄणांयस्यनित्यशः ॥ नोत्सङ्गंयोहिमातॄणां विशतेसाविहक्वचित् ॥ मातृसौख्यंनजानाति कुमारी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भर्तृकंयथा ॥ नसोस्तिभूतलेदेवि पितृमातृवहिःकृतः ॥ मातुरुत्संगमारूढः पुत्रोधर्मान्वितोभवेत् ॥ हरोत्तमागंहंतुंतु कराभ्याम-
 भिवाञ्छति ॥ पाल्यमानोजनन्याहि पित्राहीनोपिगर्वितः ॥ समीहतेजगद्भर्त्तुं सवीर्यंमातृजंपयः ॥ अनयाजठरेनोढो भवतीनां
 सुतस्त्वहं ॥ अम्बाचभवतीनाम्बा विशेषानास्तिमेशुभे ॥ सत्येनानेनमेतातो जीवतांशरदांशतं ॥ एवंब्रुवतिराजेन्द्रे मोहिनीत्रि-
स्मयंगता ॥ कथंविरुद्धमेतस्य मयाकार्यंसुपापया ॥ धर्मज्ञस्यविनीतस्य मातृभक्तस्यचैवहि ॥ पितृभक्तिपरस्यास्य नचास्यस-
दृशःक्षितौ ॥ एवंगुणान्वितस्याहं कथंकुर्याज्जुगुप्सितं ॥ पुत्रस्यधर्मशीलस्य भूत्वातुजननीत्वहं ॥ एवंविमृष्यबहुधा मोहिनीलो-
कसुन्दरी ॥ उवाचवचनंवाला शीघ्रमानयमेपतिं ॥ नशक्नोमिविनातेन मुहूर्त्तमपिजीवितं ॥ ततःसत्वरितोगत्वा प्रणम्यपितरं
नृपः ॥ उवाचपितरंधीमान् सतदानतकंधरः ॥ कनिष्ठाजननीतात शीघ्रमाह्वयतेशुभा ॥ त्वंमहाराजतस्यास्तु समीपंगंतुमर्हसि ॥
तत्पुत्रवाक्यान्नृपतिस्तत्क्षणाद्गन्तुमुद्यतः ॥ प्रहृष्टतनयोराजा तयाजुष्टंगृहंविशेत् ॥ सम्प्रविश्यमहाराजा ददर्शशयनस्थितां ॥ मो-
हिनींमोहसंयुक्तां तप्तकाञ्चनसन्निभां ॥ उपास्यमानांप्रियया सन्ध्यावल्याशनैःशनैः ॥ पुत्रवाक्यात्परित्यज्य द्वेषंसापत्नजंतदा ॥
दृष्ट्वारुक्माङ्गदंप्राप्तमुत्थितामोहिनीद्रुतं ॥ उत्थायचाब्रवीद्दृष्ट्वा राजानंभूरिदाक्षिणं ॥ इहोपविश्यतांकान्त पर्यङ्केमृदुकाञ्चने ॥ क-
स्मान्निरीक्षतेराजन् राज्यंतत्रतवाधुना ॥ ज्ञातंमयातवाद्यापि राज्येच्छानिवर्त्तते ॥ मन्येदुष्कृतिनंभूप त्वामहंधरणीतले ॥ यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समर्थंसुतंप्राप्य मातृभृत्यसुहृत्सुच ॥ दक्षेष्वन्येषुधीरेषु स्वयमीक्षेद्यशःश्रियं ॥ तस्माद्दुःखाधिकंनास्ति पापमेवपदेपदे ॥ समर्थेयःसुतेभारं नादत्तेभूपमन्दभाक् ॥ सुखिनारात्रयोयान्ति पुत्रार्पितकुटुंविने ॥ केवलंफलभोक्तॄणां विषयासक्तचेतसां ॥ पुत्रानुजपितृभ्रातृ मातृभृत्यमहत्सुच ॥ दक्षेष्वन्येषुवीरेषु बलवत्सुस्थितेषुच ॥ धर्मादिपालनेभूप कथंवीक्षयसेश्रियम् ॥ परित्यज्य प्रियासौख्यं कालाशइवदुर्वलः ॥ यदिपालयसेराज्यं किंमयातेप्रयोजनं ॥ अप्रयोजनमानीता क्षीरगह्वरमस्तकात् ॥ विटभोज्याभविष्यामि आमिषंत्विवपक्षिभिः ॥ योभार्यांयौवनोपेतां नसेवयतिदुर्मतिः ॥ कृत्यासक्तस्तुदुर्मेधाः कुतस्तस्यभवेत्प्रिया ॥ असेविताव्रजेद्भार्या तथादत्तंधनंव्रजेत् ॥ अरक्षितंव्रजेद्द्रव्यमनभ्यस्तंश्रुतंव्रजेत् ॥ नालसैःप्राप्यतेविद्या नभार्यासंस्थितव्रतैः ॥ अनुष्ठानादिनालक्ष्मीर्नाभक्तैःप्राप्यतेनृप ॥ नाज्ञानैःप्राप्यतेमोक्षो नात्यागैःप्राप्यतेयशः ॥ नादमीसुखमाप्नोति नाभार्यःसन्ततिंक्वचित ॥ नालक्ष्मीःपालयेत्पृथ्वीं नागजीसंगरंव्रजेत ॥ नचागोर्मिष्टमश्नाति नाविद्योभाषतेप्रियं ॥ अपृष्ठोनैवजानाति अगण्ठन्नव्रजेत्क्वचित् ॥ अकुर्वन्नप्रियम्वेत्ति ननिद्रामेतिजागरी ॥ तस्माद्भूपालमांत्यक्त्वा धर्मांगदगृहंशुभे ॥ वीक्ष्यसेराज्यपदवीं समर्थेतनयेविभो ॥ एवंब्रुवाणांविबुधेशपुत्री मतिप्रियांचारुविशालनेत्रा ॥ व्रीडान्वितःपुत्रसमीपवर्ती उवाचहृद्यंनृपतिःप्रियान्ताम् ॥ ६२ ॥

इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते मोहिनीवाक्यन्नाम सप्तदशोध्यायः ॥ १७ ॥ ७ ७ ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजोवाच ॥ नाधिकारोमयाभीरु कृतोनृपपरिग्रहे ॥ श्रमातुरस्यमेनिद्रा प्रवृत्तासुखदायिनी ॥ धर्मांगदोमयात्यक्तो मोहिनींन-
यमंदिरं ॥ पूजयस्वयथान्यायमेषापत्नीप्रियामम ॥ निजंकमलपत्राक्ष सर्वरत्नसमन्वितं ॥ वातायनैश्चसंयुक्तं मनोहारिसुखप्रदं ॥
एवंब्रुवन्कृतोदेवि निद्रयाशुभलोचने ॥ अवाप्यशयनंश्लक्ष्णं मंदभाग्योदिनंयथा ॥ विबुद्धमात्रःसहसा त्वांप्राप्तःपद्मलोचने ॥
यद्ब्रवीषिवचोदेवि तत्करोमिनसंशयः ॥ ॥ मोहिन्युवाच ॥ प्रसांतयस्वराजेन्द्र इमेदाराःसुदुःखिताः ॥ ममोद्वाहेननिर्विण्णा
निराशाःकामभोगयोः ॥ ज्येष्ठानांरूपयुक्तानां कलत्राणांहिभूपते ॥ मूर्ध्निकीलंप्रियाख्यंहि यद्राजंतन्निपातयेत् ॥ स्वर्गतिर्नभ-
वेत्तस्य नचान्याविद्यतेगतिः ॥ पतिव्रतासुरुष्टासु कामेशान्तिर्भविष्यति ॥ जानितारंहिपुत्रेमे भस्माकुर्युःपतिव्रताः ॥ किंपुनःप्रा-
कृतामांहि तववाक्यानुरोधिनीं ॥ संध्यावलिसमानारी त्रैलोक्येनास्तिभूमिप ॥ तवस्नेहेनसामांतु भुंजापयातिषड्रसैः ॥ प्रिया-
णिचात्रवाक्यानि वदतेतवगौरवात् ॥ एवंविधाहिशतशो नार्य्यःसंतिगृहेतव ॥ यासान्नपादरजसस्तुल्याहंभूपतेक्वचित् ॥ मो-
हिन्यावचनंश्रुत्वा व्रीडितोह्यभवन्नृपः ॥ सपुत्रायाःसमीपेतु सन्ध्यावल्यानृपोत्तमः ॥ इङ्गितज्ञस्तुतनयो ज्ञात्वावस्थांमनोभवां ॥
पितरंकामसंतप्तं मोहिन्यायोविमोहितः ॥ आहूयमातृस्ताःसर्वाः सन्ध्यावलिपुरोगमाः ॥ कृतांजलिपुटोभूत्वा मातृणांसन्निधौत-
दा ॥ उवाचवाक्यंमतिमान् पितुरर्थेचमातरः ॥ विमोहिनीयाजननी व्यूढापित्राशुभानना ॥ साचप्रार्थयतेदेवी राजानंरहसि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितं ॥ क्रीडार्थमात्मनःसुभ्रू स्तामनुज्ञातुमर्हथ ॥ मातरऊचुः ॥ मामैवंव्याहरारिघ्न नैतत्कर्तुंहिशक्नुमः ॥ कोनुमोदयतेपुत्र सर्वभक्षणमात्मनः ॥ कोहिदीपयतेवह्निं स्वदेहेवेदिनांवर ॥ कोभक्षयेद्विषंघोरं कश्छिद्यादात्मनःशिरः ॥ कस्तरेत्सागरंवध्वा ग्रीवायांदारुणांशिळां ॥ कोगच्छेत्सर्पभवनं कःकेशाश्वहरेर्द्धुनेत् ॥ कोनिषीदातिधारायां खड्गस्यनिशितस्यच ॥ गंतुंमोदयतेकान्तमन्यानारीयदिध्रुवं ॥ सर्वस्वंशक्यतेदातुं नतच्छक्यंकथंचन ॥ वरंहिशिरसश्छेद स्तत्क्षणाच्चवराशिना ॥ नेदृशंदयितंकान्तं निरीक्षेदन्ययावृतं ॥ नासौसीमंतिनीकाचित मन्यतेतातकुत्रचित् ॥ यातुप्राणसमंकान्त मन्यस्त्रीकुचमर्दिनं ॥ विन्दतेतत्स्वरावाधा किंपुनर्वास्वचक्षुषा ॥ सर्वेषामेवदुःखानां दुःखमेतदनन्तकं ॥ भर्त्तायदन्ययायुक्तो दृश्यतेस्वेनचक्षुषा ॥ मरणंत्वभिनन्दन्ति युगपन्मातरस्तव ॥ ननुमोहिनिसंयुक्तां द्रष्टुंशक्योहिभूपतिं ॥ धर्मांगदउवाच ॥ यदिमेनपितुःसौख्यं कुरुध्वंसर्वमातरः ॥ विषमालोड्यपास्यामि सौख्यंवोस्तुमृतेमयि ॥ कर्मणामनसावाचा यःपितुर्दुःखमाचरेत् ॥ समेशत्रुःस्वयंवध्यो ह्यवध्योसिवरासिना ॥ सर्वासामधिकादेवी मोहिनीमेपितुःप्रिया ॥ क्रीडार्थमाहृतापित्रा मन्दराच्चारुकन्दरात् ॥ तत्पुत्रवचनंश्रुत्वा वेपमानाहिमातरः ॥ ऊचुर्द्धर्मांगदंवाक्यं हितार्थंतनयस्यहि ॥ अवश्यंतववाक्यंहि कर्त्तव्यंन्यायसंयुतं ॥ किंचिद्दत्वाततःस्वस्थो मोहिनींयातुतेपिता ॥ भार्यामुद्वाहयेद्भर्त्ता द्वितीयांयदिपुत्रक ॥ विवाहवित्ताद्विगुणं देयंतस्यभवेद्ध्रुवं ॥ अन्यथाऋणवान्भर्त्ता ज्येष्ठायाभवतेनघ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्रेच्छयाचयोभर्त्ता अन्यामुद्वाहयेत्प्रियां ॥ ज्येष्ठायांहिमतंदेयमेषधर्मविनिश्चयः ॥ इष्टापूर्त्तैर्वृथातस्य नज्येष्ठांयोहितोषयेत ॥ धर्मंधर्मभृतांश्रेष्ठ नतेमानयतेपिता ॥ तच्छ्रुत्वामातृवचनं प्रहृष्टेनांतरात्मना ॥ एकैकस्यांददौसाग्रं कोटिमष्टादशस्यतु ॥ पृथक्पृथक्चग्रामाणां संचंसंप्रददौतदा ॥ युक्तानश्वतरीभिस्तु चतुर्भिस्तुनृपात्मजः ॥ एकैकस्यांददौचाष्टौ रथान्काञ्चनमालिनः ॥ वाससामयुतंप्रादान्महामुल्यंसधार्मिकः ॥ जांबूनदस्यशुद्धस्य मातृणांप्रददौतदा ॥ लक्षमेकैकशोराजन् पितृभक्त्यामहामतिः ॥ दासानांचेटिकानांच सहस्राणिशतानिच ॥ कुम्भायुतंसर्पिषस्तु तैलस्यचतदेवहि ॥ अजाविकमसंख्यातमेकैकस्यांन्यवेदयेत ॥ सहस्रणेसुवर्णस्य कृत्वावैभूषणंमहत ॥ आखण्डलस्यशस्त्रेण भूषितंमणिभिस्तदा ॥ माणिक्यादिमहाराज प्रददौचपृथक्पृथक् ॥ धात्रीफलनिभान्हारान् मातृणामातृवत्सलः ॥ ददावेकैकशस्तासां तुष्ट्यर्थमनुजर्षभ ॥ वलयानिमहार्हाणि भूषणानितथैवच ॥ कटिसूत्राणिशुभ्राणि प्रददौमातृवत्सलः ॥ चन्दनंभूरिकर्पूरं प्रददौप्रस्थसंख्यया ॥ मातृणामविशेषेण पितुःप्रियहितेरतः ॥ भोजनालिविचित्राणि जलपात्राण्यनेकशः ॥ घृतक्षीरस्यपात्राणि पेयस्यविविधस्यच ॥ प्रददौसमहाभागो ह्येकैकस्याःसभूपतिः ॥ स्थालिनांकांचनीनांच कुंभानांसनृपात्मजः ॥ एकैकस्यददौराजन् शतानित्रीणिपंचच ॥ करेणूनांप्रवेगानां सुरूपाणांतथैवच ॥ विंशतिंविंशतिंप्रादादुष्ट्राणांचशतंशतं ॥ शिविकांचतथाप्रादात्तदाधर्मविभूषणः ॥ मातृणांतुचतुष्ट्यर्थं सुखार्थमरिकर्षणः ॥ एवंद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वावहुविधं धनंताभ्यःसुभ्रूरिशः ॥ वभूवानन्दवान्राजा कृत्वातासांप्रदक्षिणं ॥ कृत्वाभिलषितंतासां कृताञ्जलिपुटोब्रवीत् ॥ म-
मापरोधाक्रियतांतथैवं सर्वास्तुसंभूयत्वदर्थकंहि ॥ ब्रुवन्तुसत्यंपितरंनरेन्द्रं भुंक्ष्वत्वमेतांनृपमोहिनीमिति ॥ ममोपराधाद्भवतीयु-
वत्यः पतिंतमुद्दिश्ययथैकपश्यां ॥ एवंतुसर्वाः पितरंममाघस्तेनेहतांभुङ्क्ष्वनृपेशमोहिनीम् ॥ तवास्मदीयाभवताहिलज्जा स्वल्पा-
पिकार्यामनंसानरेन्द्र ॥ विमोहिनींब्रह्मसुतांसुशीलां गत्वारमत्वंशरदःशतानि ॥ तत्पुत्रवाक्यंहिनिशम्यसर्वा हृष्टास्तदातंनृपरा-
जपत्न्यः ॥ रमस्वराजेन्द्रविमोहिनीमिमां विदेहपुत्र्यासयथाहरिश्च ॥ तच्छालपभूताकुशकेतुपुत्री स्वसेयमस्माकमिहास्तुराज-
न् ॥ पुत्रेणचानेनविमुक्तशोकाः कृतास्तुवाक्यैःप्रतिबोधिताःस्मः ॥ ५५ ॥ इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते मातृ-
संबोधनंनामाष्टादशोध्यायः ॥ १८ ॥ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ
वशिष्ठउवाच ॥ सोनुज्ञातोमहीपालः प्रियाभिःप्रियकामुकः ॥ प्रहर्षमतुलंलेभे धर्मांगदमुवाचह ॥ एतांद्वीपवतींपृथ्वीं परिपाल-
यपुत्रक ॥ दुष्टानांनिग्रहंकृत्वा अप्रमत्तंसदास्थितः ॥ विष्णुवासरभक्तश्च स्वर्गद्वारावलोककः ॥ धर्मवेतनमादाता सदेन्द्रानुज-
वल्लभाः ॥ सदाभ्रमणशीलश्च सदादानमतिर्भव ॥ भवान्कौटिल्यहीनेन सदाचारवतातथा ॥ तथापरंशृणुष्वाथ यत्कर्त्तव्यंत्व-
याधुना ॥ अधिष्ठानञ्चसर्वत्र भूमिपानांप्रसस्यते ॥ कोषस्यचपरिज्ञानं जनानांजनवत्सल ॥ रसवद्द्रव्यमाकृष्यात् पुष्पेभ्यइव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षट्पदाः ॥ त्वयापुत्रेणमेप्राप्तं पुनरेवेहयौवनं ॥ इमामपूर्वांयुवतींविमोहिनीमासाद्यभार्यांद्विजराजवक्राम् ॥ सुखेनरम्येत्वमिमां-महींतु वोढासिभारंपरिपालयाश्रयम् ॥ व्रीडाकरंताताममनुष्यलोके बृद्धस्यजन्तोःसुरताभिलाषः ॥ भवेज्जनानामतिहास्यकारी जीर्णत्वचःश्वेतशिरोरुहस्य ॥ जीर्णोप्यजीर्णस्तवसौख्ययुक्तो वाञ्छामिचैनामुपभोक्तुमंगनां ॥ संत्यज्यदेवानियमागतास्तु अनं-गवाणानिहितासुतन्वी ॥ सम्यग्चरिष्याम्यहमेतयाविभो ह्येकान्तशीलःपरिपूर्णदेहः ॥ तदद्रिपृष्ठोवननिर्झरौघे रम्येषुदिव्यौघन-दीतटेषु ॥ इयंपुरंध्रीममजीविताधिका सुखेनभार्यात्रिदिवैकचारिणी ॥ अस्यास्तिहेतोर्विबुधाविमूढा यथार्द्धिहेतोर्हिनिधानसं-घाः ॥ तद्वाक्यमाकर्ण्यपितुःसुबुद्धिः प्रणम्यभक्त्याजननीसमेतां ॥ नृपोत्तमंतंनृपसत्तमोसौ दिदेशभोगार्थमनेकवित्तं ॥ आ-ज्ञाविधेयान्सहिर्संनियोज्य दासाश्चदासीचहिरण्यकण्ठीः ॥ कृत्वाविधेयान्स्वपितुस्तदर्थे ततोमहींरक्षणमाचचार ॥ नृपोत्तमोधर्म-विभूषणोसौ शशासतीद्वीपवतींसमग्रां ॥ रक्षांतुतस्याचरितःपृथिव्यां नपापबुद्धिर्भविताजनोहि ॥ नचाफलःपुष्पविनाकृतोन-गो नचापिक्षेत्रंयवशालिहीनं ॥ कुंभप्रमाणंसुसुचुश्चगावो कृताधिकंशर्करवत्प्रमिष्टं ॥ क्षीरंस्वपेयंसकलार्त्तिनाशं पापापहंपुष्टिवि-वर्द्धनञ्च ॥ जनोनचासीद्विभवप्रणोष्टो नचापिभार्याविभवप्रभाषिणी ॥ पुत्रेविनीतोदुहितानगेहे वधूःस्थिताहस्तपुटेनसुप्ता ॥ निजोपदेशेहिजनोव्यवस्थितस्त्वन्योपदेष्टुर्हिशिरोनिकृत्यते ॥ नभुञ्जतेमाधववासरेजना नशोषमायांतितथैवनिम्नगाः ॥ संभु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्यमानानहियान्तिसंपदः प्रदानयुक्तैरपिमानवैःसदा ॥ विबृद्धिमायान्तियथानरेन्द्र वर्षासुदुर्वाबहुविस्तरान्विताः ॥ सुरक्षितस्ते-
ननरेन्द्रसूनुना धर्मांगदेनातुलविक्रमेण ॥ सौख्यानिभुक्त्वानृपयान्तिमानवाः पदंहरेर्द्वादशिसेवनेन ॥ नदस्युभूतामनुजागृहे-
षु स्वर्पत्तिहृष्टामुदिताःसदानघ ॥ गावस्तुगोपैर्हिविनागुहार्यां स्वेच्छाचरागन्दिरमाव्रजन्ति ॥ क्षीरंक्षरन्त्योघृतवत्सुभूरि वत्स-
प्रियाश्चैवतुताःसुशीलाः ॥ अकृष्टपच्याधरणीसमस्ता धर्मांगदेशासतिभूमिपाले ॥ मातुःपयोभिःशिशवःसुपुष्टा भोगैश्चभर्तुःप्रम-
दाश्चपुष्टाः ॥ सुराष्ट्रगुप्ताश्चनृपाःसुपुष्टाः सत्येनयुक्तःसबृषःसुपुष्टः ॥ एवंजनेकर्मणिसंप्रवृत्ते धर्मांगदेनाथसुरःप्रमाणः ॥ रुक्मांग-
दोतीवविमोहितोसौ विमोहिनीचेष्टितसौख्ययुक्तः ॥ दिनंनजानातिनचापिरात्रिं मासंनपक्षंनचवत्सरंगतं ॥ अतीवसौख्यंतुर-
तेनतेन विरिञ्चिपुत्र्याःप्रवभूवतस्य ॥ विमोहिनीसंगमनेनृपस्य वभूवशक्तिःप्रचुराहिकामे ॥ यथायथासेवतितांसुरूपां तथातथा-
वर्द्धतिवीर्यमस्य ॥ चन्द्रोयथाशुक्लपक्षेतुबृद्धिं गच्छेदेवंकामयातश्चकामः ॥ वृन्दारकाप्रीतिहितान्वितस्तु संस्पृश्यमानस्तुपुनर्न-
रोसौ ॥ पिवन्तिपानंसुमनोहरंतदा शृण्वन्हिगीतंहृदयंगमंतदा ॥ पश्यन्हिनृत्यंसुनितंविनीनां समास्पृसन्मोहिनिवक्त्रचन्द्रम् ॥
विमर्दमानोह्युरसाचतन्व्याः स्तनौसुपीनौसुनिमग्नचूचुकौ ॥ घनौतथाकाञ्चनकुंभतुल्यौ निरंतरौहारविभूषणेन ॥ वलित्रयंनाभियु-
तंसुशोभनंमनोहरंरोमसुराजिचित्रितं ॥ संस्तंभितायावलिराजिरूपयातयातुदेव्यानृपकान्तयातदा ॥ नहीदृशंचारुतरंशरीरं नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंविनीनांमनसोभिरामं ॥ याद्दग्विधात्राचतद्वाविनिर्ममे राज्ञश्चसामोहविबर्द्धनाय ॥ मृगेन्द्रशत्रोःकरसंनिकाशे ऊरूतदाकाञ्चन
संनिभेसमे ॥ जंघउभेचैवसुरूपयुक्ते निगूढगुल्फेजनमोहनार्थं ॥ नचापिदेहेनृपतिर्विरूपतां संपश्यतेचारुविशालनेत्रयाः ॥ मे-
नेसुराणामधिकञ्चराजा कृतार्थमात्मानमतीवहर्षात् ॥ इयंसुरूपांसुरसुन्दरींशुभां दास्याम्यहंभूरिधनंनचाल्पं ॥ त्रैलोक्यदानंतृ-
गवन्मनोमे ददामिकिंयाचतिमेदुराङ्गीं ॥ एषापदायाचतिजीवितंमे शुभानवद्यानवहेमवर्णा ॥ दास्यामिचैनंनविचारयामि पुत्रं-
विनासर्वमहंचदास्यं ॥ एवंराजाचिंतयित्वामहात्मा पुत्र्याःसर्वचेतसापङ्कजस्य ॥ ३५ ॥ इतिश्री ना० रुक्मांगदक्रीडनंनाम १९
वशिष्ठउवाच ॥ एवंस्मरविमूढस्य राज्ञोरुक्मांगदस्यच ॥ त्रीणिवर्षाणिपञ्चैव व्यतीतानिसुखेनवै ॥ संप्राप्तेनवमेवर्षे पुत्रोधर्मा-
गदोवली ॥ जित्वाविद्याधरात्पञ्च सर्वकामप्रदान्शुभान् ॥ आजहारमणिन्पञ्च सर्वकामप्रदान्शुभान् ॥ कांचनस्यप्रतप्तस्य एवं
कोटिप्रदंशुभं ॥ वस्त्रप्रदंद्वितीयंच सहस्रशतसंख्यया ॥ तृतीयममृतस्रावि पुनर्यौवनदायकं ॥ गृहप्रसादजननं चतुर्थंचान्नसा-
धनं ॥ पंचमंब्योमगदितं त्रैलोक्यपरिमर्षणं ॥ तान्मणीन्गृह्यतरसा विद्याधरसमन्वितः ॥ स्त्रीभिर्विद्याधराणांच साश्रुभिस्ता-
भिरावृतः ॥ ववन्देचरणौमातु स्तथारुक्मांगदस्यच ॥ आगत्यमलयाच्छूर स्तान्मणीन्प्रददौतदा ॥ इमेजितामयातात पञ्चवि-
द्याधरारणे ॥ मलयेभूधरेश्रेष्ठे वैष्णवास्त्रेणभूपते ॥ तइमेप्रेक्षतान्तात प्राप्तास्तवमहामते ॥ एषांदाराःसमेतायै विधेयास्तवभूपते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ तथेमेप्रणयाद्देवीं भूषयंतुतवप्रियां ॥ सर्वकामप्रदास्तात मणयोयौवनःप्रदा ॥ जीर्णादंताःपुनर्बाला भवंतिमणिधारणात् ॥
श्वेताश्चकृष्णतांयान्ति केशानास्त्यत्रसंशयः ॥ वस्त्रहर्म्यसुवर्णानां धनानांचिन्तितस्यच ॥ दातारःसुप्रभाःशुद्धा श्चिन्तामणयइ-
त्युत ॥ त्रिंशद्दिनमभूद्युद्धं गन्धर्वाणांमयासह ॥ तवैवतेजसापञ्च जितास्तातमयारणे ॥ कृत्स्नानितानीहमया राज्ञायानिवला-
निच ॥ वरदानिसमस्तानि कृतानितवतेजसा ॥ समुद्रंचप्रविष्टस्य गतःसंवत्सरोमम ॥ जिताभोगवतीनाम मयानागशताकृ-
ता ॥ आहूयतानागकन्या मयातत्रसुविस्तराः ॥ ताभिश्चराजरत्नानि सुवहून्याहृतानिमे ॥ गतोहंपुनरेवाथ तदादानवमन्दिरं
॥ तत्रदानवकन्यानां सुरूपाणांसुवर्चसां ॥ आहूतानिसहस्राणि मयात्रीणिचपञ्चच ॥ दशकोट्यस्तुरत्नानि सुवहून्याहृतानिमे
॥ सस्तुदीपामहीपाल रत्नानांतवमन्दिरे ॥ ततोहंवारुणंलोकं रसातलतलस्थितं ॥ गतोवीर्यवलोपेतं रत्नानामालयंशुभं ॥ तत्रा-
पिवरुणोदेवः स्थीयतांशासनेपितुः ॥ रुक्मांगदस्यनृपतेर्यदिजीवितुमिच्छसि ॥ कुपितोममवाक्येन वरुणोयुयुधेमया ॥ सहते
नचमेयुद्धमभूत्तातरसातले ॥ जितोनारायणास्त्रेण मयासम्वत्सरात्प्रभो ॥ नहतःप्रमदावाक्यैः परिरक्षणतत्परैः ॥ निर्जितेना-
युतंदत्तं वाजीनांवातरंहसां ॥ एकतःश्यामकर्णानां शुद्धानांचन्द्रवर्चसां ॥ तृणतोयविहीनाये जीवंतिवहुलाःसमाः ॥ एका-
कन्यासुरूपाया पुष्कराभाननाशुभाः ॥ भार्यार्थेवरुणःप्रादान्नवोढासाशुभामया ॥ कुमारीतुसमानीता वहुवित्तसमन्विता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंनास्तित्रिषुलोकेषु स्थानंनृपतिसत्तम ॥ यन्मयानिर्जितंतात तेजसापगलितेनते ॥ तद्वुत्तिष्ठनिरीक्षस्व मयाचोपार्जितांश्रियं ॥
प्रयच्छस्वयथान्यायं एषांवांछसिभ्भूपते ॥ पादांकांकुरुराजेन्द्र यत्तुतावर्जिताप्रियाः ॥ अहंतुसंपदःसर्वा स्त्वदधीनानसंशयः ॥ यः
॥ ३१ ॥ पुत्रःपितुरग्रेतु वहुलक्ष्मीमुपार्जितां ॥ नदद्याद्भूमिदेवेभ्यः सयातिनरकंध्रुवं ॥ स्वीकारस्तुचकर्त्तव्यः पित्रासहसुतेनहि ॥ कुठार
दातृवज्ज्ञेयः पुत्रस्यनिधिसंचये ॥ पितुःशौर्येणपुत्रस्तु सर्वमर्जयतेधनं ॥ गृहीतस्तेजसादात्रं लुनातिपितृसंचयात् ॥ वायुना
पूरिताभस्त्रा तारयेन्पुरुषंतले ॥ यदादारुमयीयोषित् सूत्रयोताविचष्टये ॥ एवंहिपितृवर्येण पुत्रास्तेजोवलान्विताः ॥ तस्मा-
दिमांमाधवदेववल्लभां विलोकयस्वाद्यमयाभिजाता ॥ आत्मेच्छयायच्छत्रिमोहनाया इयंहिमेमातृसमूहचर्या ॥ ३६ ॥ इतिश्री
लघुनारदीयपुराणे रुक्माङ्गदचरिते धर्माङ्गद विजयोनामविंशातितमोध्यायः ॥ २० ॥ ൠ ൠ ൠ ൠ ൠ
मान्धातोवाच ॥ पुत्रस्यवचनंश्रुत्वा किंचकारमहीपतिः ॥ साचापिमोहिनीब्राह्मी किंचक्रेतेनपूजिता ॥ विचित्रेयंकथाब्रह्मन् प्र-
भावोहिमनोहरः ॥ तत्रवक्रेरितापुण्या धर्मसंशयछेदिनी ॥ वसिष्ठउवाच ॥ तस्यतद्वचनश्रुत्वा प्रहृष्टोनृपपुंगवः ॥ उदतिष्ठन्प्रिया-
युक्तस्तांश्रियंचावलोकयत् ॥ अवलोक्यहेरेरिष्ठामप्रमेयांहरिप्रभां ॥ नागकन्याहिताःसर्वा वारुणीसहिताःप्रभो ॥ प्रददौतनयस्यैव ॥ ३१ ॥
भार्यार्थंशुभलोचनाः ॥ शेषंदानवनारीभि र्वित्तरत्नसमन्वितं ॥ मोहिन्यैप्रददौराजा सोनंगशरमोहितः ॥ संविभज्यनृपोवित्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मांगदसमाहृतं ॥ पुरोहितमुवाचेदं कालेनाहूयभूपतिः ॥ सर्वासांतनयोमेहि पाणिंगृह्णातुमन्त्रतः ॥ कुमारीणांकुमारोयं मद्वा-
क्येचस्थितोह्ययः ॥ सुतिथौसुमुहूर्त्तेच नक्षत्रेसर्वकामदे ॥ वाचयित्वाद्विजवरान् मंगलानिसहस्रशः ॥ विवाहंकुरुपुत्राय एतत्कृ-
त्योत्तमंमम ॥ यःपुत्रंयौवनोपेतं नाविवाहयतेसुधीः ॥ समज्जेनरकेघोरे यस्मान्नावर्त्ततेपुनः ॥ तस्मादुद्वाहयेत्पुत्रं वलादपिप्रयत्न-
तः ॥ आत्मासंस्थापितस्तेन येनसंस्थापितःसुतः ॥ कृतोद्वाहेसुतेब्रह्मन् पितुश्चकृतकृत्यता ॥ पुत्रस्यगुणयुक्तस्य निर्गुणस्यापि-
मानद ॥ अरूढतनयोयस्य युवासन्तिष्ठतेगृहे ॥ नपुमान्सतुविज्ञेयः परलोकजुगुप्सितः ॥ तस्मात्पित्रासदाकार्याः पुत्रादारसम-
न्विताः ॥ रमन्तेचयथासौख्यं सन्तुष्टासुप्रियासुच ॥ एतच्छ्रुत्वातुवचनं पुरोधाहर्षसंयुतः ॥ धर्मांगदविवाहार्थं मतिंचक्रेद्विजर्षभः ॥
अनिच्छमानोपितदा स्त्रीशंकेतंनृपात्मजः ॥ नृपवाक्याच्चकाराथ दारसंग्रहणंतदा ॥ वरुणात्मजयासार्द्धं नागकन्यामनोहराः ॥ उ-
पयेमेमहाबाहुःकृतहोमःपुरोधसा ॥ उद्वाहयित्वासर्वास्ता युगपद्योषितांवराः ॥ ववन्देपितरंपश्चात् मोहिनींमातरन्तथा ॥ ततःस-
न्ध्यावलींदेवींप्रभिवन्देहसन्निव ॥ पितुर्वाक्येनमेदेवी सञ्जातोदारसंग्रहः ॥ नैतन्मेमनसोजातो पित्रानुरोधितोह्यहं ॥ अव्यग्रः
पितरंदेवि सुश्रूसेहंनसंशयः ॥ दारैर्भोगैर्नमेकिंचित् स्वर्गेणापिप्रयोजनं ॥ कार्यामेपितृसुश्रूषा तवदेविदिवानिशं ॥ सन्ध्याव-
ल्युवाच ॥ चिरंजीवस्त्वमेवत्स भुंक्ष्वभोगान्मनोगतान् ॥ पितुःप्रसादाद्दीर्घायुर्भवपुत्रसदानघ ॥ सत्पुत्रेणत्वयापुत्र जाताहंपुत्रि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्णीक्षितौ ॥ नपत्नीनांहिसर्वासां हृदयेसंस्थितस्तथा ॥ एवमुक्त्वापरिष्वज्य मूर्ध्निचाघ्रायचासकृत ॥ विसर्ज्यचततःपुत्रं राज्यतंत्रे त्वरान्विता ॥ विसर्जितस्तथामात्रा प्रणम्यान्यास्तुमातरः ॥ चक्रेराज्यंमहाराजः पित्रोश्चहितकाम्यया ॥ दुष्टनिग्रहणंचक्रे शिष्टानांपरिपालनं ॥ अटनंसर्वदेशेषु वीक्षणंसर्वकर्मणां ॥ तथैवसर्वकार्याणामासमाप्तेनिवर्त्तनं ॥ हस्त्यश्वपोषणंचक्रे वारंचक्रेपरेणवै ॥ वाजिनांवीक्षणंचक्रे तुलामानानुवेदनं ॥ गृहेनवैधराप्राप्ते चक्रेसंवीक्षणंनृपः ॥ कश्चिद्बालस्तुनपायी स्तनहीनोनरोदिति ॥ कश्चिद्वध्वाचस्वश्रूत्र रुदतानावमानिता ॥ कश्चित्समर्थस्तनयः पितरंनहियाचते ॥ नधर्मशङ्करोराज्ये कश्चिन्ममभवेत्पुनः ॥ वभूवविभवोलोके शासनात्तस्यभूपतेः ॥ नकंचुकेनरहिता गच्छेन्नारीसभर्तृका ॥ गृहानिःक्रमणंस्त्रीणांनाभूद्राष्ट्रेतदात्मके ॥ नसकेशाहि विधवा स्वकेशानहिभर्तृकाः ॥ साव्रतीस्यात्महाकेशीमारण्यान्नगराश्रयाः ॥ अप्रदाताधनीमाभूद्राष्ट्रेमानिर्घ्रिणोजनः ॥ गोपालोनगराकांक्षी गुरुर्यस्तुनदेशकः ॥ शास्तिशास्त्रंविनाऋत्विक् सुरान्तोषयतेनरः ॥ योहिविक्रयतेनीलं नीलरक्तंनिषेवते ॥ निर्वास्यौतावुभौपापै यस्तुमद्यंपिवेत्सदा ॥ वृथामांसंतुयोश्नाति पृष्टमांसप्रियोहिसः ॥ तस्यवासोनविषये सुकलत्रंत्यजेत्तुयः ॥ विष्णुंविहायप्रवरंसुराणां संपूजयेदन्यतमंहिदेवं ॥ निन्देतयोदेववरंमुरारिं दण्ड्यश्चवध्यश्चवहिर्विधास्याः ॥ ३९ ॥ इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते धर्मांगदविवाहः प्रजापालनमेकविंशोध्यायः ॥ २१ ॥ ७ ७ ७ ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वसिष्ठउवाच ॥ एवंधर्माङ्गदोराजा चकारवसुधातले ॥ पितुर्नियोगाद्राजेन्द्र पालयन्हरिवासरे ॥ नवभूवजनःकश्चिद्योन्यधर्मव्य-
वस्थितः ॥ नासुखीनाप्रजाकाचित करपीडितमानसा ॥ हृष्टपुष्टजनेतस्मिन् क्षमावतिसुधार्मिके ॥ घटोध्नीनृपतेतस्मिन् द्रुप्तव-
त्सासुधेनुषु ॥ पुटकेपुटकेक्षौद्रे द्रोणमात्रेद्रुमेद्रुमे ॥ फलानिसन्तिभेदिन्यां सर्वधान्यसमुद्भवः ॥ कृतेयुगेचत्रेतान्ते युगेचद्वापरा-
गमे ॥ व्यतीतजलदेव्योम्नि विराजेशशिमण्डले ॥ सुगन्धौशालिकेदारे कुंभोद्भवविलोकने ॥ मध्यप्रवाहसंयुक्ताः सरितश्चसमं-
ततः ॥ तीरोत्थैःकाशकुसुमैः शुक्लकेशोइवाङ्गनाः ॥ चन्द्रांशुधवलेलोके नातितीव्रेदिवाकरे ॥ पद्मिनीपत्रसवलैर्जलस्यान्तेविराजि-
ते ॥ रात्र्युत्सुक्यात्प्रयातैस्तु भूमिपालैःसमंततः ॥ प्रबोधसमयेविष्णोराश्विनान्तेजगद्गुरोः ॥ मोहिनीरमयामास संयुक्ताहृदया-
न्वितं ॥ राजानंविविधैःसौख्यैःसर्वभावनसुन्दरी ॥ वनेषुगिरिशृंगेषु नदीनांसंगमेषुच ॥ पद्मिनीकुसुमाढ्यासु शरत्सुविविधेषुच ॥
मलयेमन्दरेविन्ध्ये महेन्द्रेविबुधालये ॥ सह्यप्रालयसंज्ञेच दिगंवरगिरौशुभे ॥ अन्येष्वपितुराजानं मनोज्ञेषुशुभेषुच ॥ रमयामा-
सराजेन्द्र दिव्यरूपादिनेदिने ॥ राजापिमोहिनींप्राप्य कृत्यंसर्वमथात्यजत् ॥ मुक्त्वैकंवासरंविष्णोर्जन्ममृत्युनिकृन्तनं ॥ नतल्लो-
पयतेनित्यमतिमुग्धोपिपार्थिवः ॥ दशम्यादिमहीपाल त्रिदिनंपरिवर्जयेत् ॥ गन्धतांबूलपुष्पाणि स्त्रीभोगञ्चमहामतिः ॥ एवं-
संक्रीडतस्तस्य बहुसंवत्सरेगते ॥ कालेकालवतांश्रेष्ठः संप्राप्तःकार्त्तिकःशुभः ॥ निद्राच्छेदकरोविष्णोर्मासःपुण्यप्रदायकः ॥ य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 स्मिन्कृतंहिसुकृतंविष्णवर्थंमानवैर्नृप: ॥ अक्षयंभवतेसर्वंविष्णुलोकप्रदायकं ॥ नकार्त्तिकसमोमासोनकृतेनसमंयुगं ॥ नवेदेनसमं
॥ ३३ ॥ शास्त्रंनतीर्थंगंगयासमं ॥ नजलेनसमंदानंनसुखंभार्ययासमं ॥ नकृष्णेनसमंवित्तंनलाभःसुरभीसमः ॥ तपोदानसमायुक्तंनधर्मा-
त्परमंसुखं ॥ नधर्मोऽस्तिदयातुल्यो नज्योतिश्चक्षुषःसमं ॥ नतृप्तिरशनादन्यानवाणिज्यंकृषेःसमं ॥ नधर्मेणसमंमित्रनसत्येनसमंय-
शः ॥ सर्वसौख्यंसमुत्थानंनमित्रंभार्ययासमं ॥ नक्षेत्रंकाशिकातुल्यंनपुत्रेणसमःसुहृत ॥ नकार्तिकसमंलोकेपवित्रंकवयोविदुः ॥
कार्त्तिकःप्रवरोमासोविष्णुवादिषुवैसदा ॥ अव्रतेनक्षिपेद्यस्तुमासंदामोदरप्रियं ॥ तिर्यग्योनिमवाप्नोतिधर्माधर्मवहिःकृतः ॥ मा-
न्धातोवाच ॥ संप्राप्यकार्त्तिकंमासं राजारुक्मांगदोमुने ॥ मोहिनीमोहसंयुक्तः कथंतुवुभुजेवद ॥ विष्णुभक्तःशुचिपरः प्रवरःसम-
हीभृतां ॥ तस्मिन्पुण्यतमेमासितस्मिन्किमकरोन्नृप ॥ वसिष्ठउवाच ॥ संप्राप्तंकार्त्तिकंदृष्ट्वाप्रबोधकरणंहरेः ॥ अतिमुग्धोप्यसौ-
राजा मोहिनींवाक्यमब्रवीत् ॥ नीतंदेवित्वयासार्द्धंवहुसंवत्सरंमया ॥ तवापमानस्यभयात् नैवमुक्तामयाकचित् ॥ सांप्रतंवक्तु-
कामोहंतंनिबोधवरानने ॥ शय्याशक्तस्यमेदेविवहवःकार्त्तिकागताः ॥ नव्रतीकार्त्तिकेजाते शुक्लैकंहरिवासरं ॥ सोहंकार्त्तिकमि-
च्छामि व्रतेनपरिसर्पितुं ॥ अव्रतेनगतोह्येषां कार्त्तिकोमर्त्यधर्मिणां ॥ इष्टपूर्तंवृथातेषां धर्माधर्मभृतांवरे ॥ मांसाशिनोहिभूपाला ॥ ३१ ॥
अत्यन्तमृगयारताः ॥ तेमासंकार्त्तिकंत्यक्त्वा गतोविष्णवालयंशुभे ॥ प्रवृत्ताणांहिभक्ष्याणां कार्त्तिकेनियमेकृते ॥ अवश्यंविष्णु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सायुज्यं प्राप्नुवन्तिमुमुक्षवः ॥ तिष्ठन्तिबहुवित्तानि कृत्यानिवरवर्णिनि ॥ हृदयेविहितंलोके दीपदानंदिवंनयेत् ॥ तस्याप्यलभेशुभगे परदीपप्रतोदनं ॥ कर्त्तव्यंभूतिकामेन सर्वदानाधिकंचतत ॥ एकतःसर्वदानानि दीपदानानिचैकतः ॥ कार्त्तिके नसमंप्रोक्तं दीपदस्त्वधिकःस्मृतः ॥ कार्त्तिकेकार्त्तिकीभूत्वा विष्णोर्नाभिसरारुहे ॥ आजन्मविकृतात्पापात् मुच्यतेनात्रसंशयः ॥ व्रतोपवासनियमैः कार्त्तिकोयस्यगच्छति ॥ देवोवैमानिकोभूत्वा सयातिपरमंपदं ॥ तस्मान्मोहिनिमोहंतु परित्यज्यममोपरि ॥ तवभूधरपूजायां निरतोनीरजेक्षणे ॥ अहंव्रतपरश्चैव भविष्येहरिपूजकः ॥ मोहिन्युवाच ॥ विस्तरेणमयाख्याहि माहात्म्यंकार्त्तिकस्यहि ॥ सर्वपुण्याधिकःप्रोक्तो मासोयंनृपसत्तम ॥ विशेषतःपुष्करेतु द्वारवत्याञ्चशौकले ॥ श्रुत्वाकार्त्तिकमाहात्म्यं करिष्येहंयथेप्सितं ॥ रुक्मांगदउवाच ॥ माहात्म्यमभिधास्यामि मासस्यास्यवरानने ॥ येनतेभवतेकीर्त्तिर्भक्तियुक्तार्चनेहरेः ॥ कार्त्तिकेकृच्छ्रसेवीयः प्राजापत्यचरोथवा ॥ एकान्तरोपवासीच त्रिरात्रोपोषितोथवा ॥ षड्वाद्वादशरात्रंवा मासंवावरवर्णिनि ॥ क्षपयित्वानरोयाति तद्विष्णोःपरमंपदं ॥ एकभक्तेतथानक्ते तथासुभ्रुअयाचिते ॥ अकृतेवैधराप्राप्तिर्भवतेनात्रसंशयः ॥ तस्मिन्हरिदिनेपुण्ये क्रियतेभीष्मपञ्चकम् ॥ सर्वपापप्रशमनं हरेरिष्टंमहाव्रतं ॥ तत्कृत्वामनुजादेवि नभूयस्तनयोभवेत ॥ प्रबोधनंनरःकृत्वा जागरेणशुभानने ॥ श्रवणेनपुराणानां भक्त्यादेवस्यचक्रिणः ॥ पूजयासुभगेरात्रिर्येषांयातिवरानने ॥ नमातृज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ठेयान्ति तेपिपारन्वितानराः ॥ तस्मिन्दिनेबरारोहे मण्डलंयस्तुपश्यति ॥ विनासाख्येनयोगेन सयातिपरमंपदं ॥ कार्त्तिके-
मण्डलंदृष्ट्वा शौकरेशूकरंतथा ॥ दृष्ट्वाकोकाबराहश्च नभूयस्तनयोभवेत् ॥ त्रिविधस्यापिपापस्य दृष्ट्वामुक्तिर्भवेन्नृणां ॥ तथाकु-
ब्जाम्रकेदेवि दृष्ट्वादेवंजनार्दनं ॥ कार्त्तिकेवर्जयेत्तैलं कार्त्तिकेवर्जयेन्मधु ॥ कार्त्तिकेवर्जयेत्कांस्य कार्त्तिकेशुक्तशिंविकम् ॥ नि-
ष्पावान्कार्त्तिकेदेवि योभक्षयतिपापकृत् ॥ सम्वत्सरकृतात्पुण्यात् तत्क्षणादेवमुच्यते ॥ प्राप्नोतिराजकिंयोनिं सकृदेवतुभक्षणा-
त् ॥ अतश्चकार्त्तिकेमासि निष्पावान्वर्जयेद्बुधः ॥ कार्त्तिकेशौकरंमांसं यस्तुखादतिदुर्मतिः ॥ षष्ठिवर्षसहस्राणि रौरवेपरिपच्य-
ते ॥ तन्मुक्तोभवतेपापो विष्टाशीग्रामशूकरः ॥ नमत्स्यंभक्षयेन्मांसं नकौर्मंनान्यदेवहि ॥ चाण्डालोभविताराजन् कार्त्तिकेमां-
सभक्षणात् ॥ कार्त्तिकःसर्वपापघ्नः किंचिद्व्रतपरस्यहि ॥ कार्त्तिकेतुकृतादीक्षा नृणांजन्मनिकृन्तति ॥ तस्मात्सर्वप्रयत्नेन दी-
क्षाकुर्वीतकार्त्तिके ॥ अदीक्षितस्यवामोरु कृतंसर्वंनिरर्थकं ॥ पशुयोनिमवाप्नोति दीक्षयाचमहाकुले ॥ जन्मप्राप्नोतिसुभगे पञ्च-
रात्रविदोनरः ॥ नगृहेकार्त्तिकंकुर्याद्विशेषेनतुकार्त्तिकी ॥ तीर्थेषुकार्त्तिकींकुर्यात् सर्वयत्नेनभाविनि ॥ कार्त्तिकेशुक्लपक्षस्य कृ-
त्वाचैकादशींनरः ॥ प्रातर्दत्वा शुभान्कुंभान् प्रयातिहरिमन्दिरं ॥ संवत्सरव्रतानाञ्च समाप्तिर्विधिसंस्मृता ॥ चातुर्मास्यव्रता-
नाञ्च समाप्तिस्तत्रचेष्यते ॥ विवाहश्चैवदृश्यन्ते विष्णोर्नाभिसरोजजे ॥ दिनानित्रीणिचत्वारि तथैकंबरवर्णिनि ॥ उत्तरायणही- ॥ ३४ ॥

CC-0. In Public Domain. Digitization by eGangotri

नेपि शुद्धिर्लभेविनाशुभे ॥ दृश्यन्तेयत्रसंपन्ना पुत्रपौत्रविवर्द्धनाः ॥ तस्मान्मोहिनिकर्त्तास्मि कार्त्तिकेव्रतमुत्तमं ॥ अशेषपापनाशाय धनप्रीतिविवर्द्धनं ॥ भुक्तिमुक्तिप्रदातारं धर्मस्यपरमंपदं ॥ वैकुण्ठदायिकंमासं कार्त्तिकञ्चवरानने ॥ ६८ ॥ इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते कार्त्तिकमाहात्म्यं द्वाविंशोध्यायः ॥ २२ ॥ छ छ छ छ छ छ

मोहिन्युवाच ॥ अहोमहात्म्यमतुलं कार्तिकस्यत्वयोदितं ॥ चातुर्म्मास्यव्रतानाञ्च तद्योगकरणम्वद ॥ पूर्णताचभवेद्येन व्रतानामवनीपते ॥ अवैकल्पंभवेद्येन व्रतेपूर्णेफलस्यच ॥ कानिदानानिदीयंते कृत्वातान्यवनीपते ॥ राजोवाच ॥ षड्रसंभोजनंदद्यान्नक्तभोजीतुसुन्दरि ॥ अयाचितेप्यनड्वाहं दद्याच्चसहिरण्यकं ॥ एकभक्तंतथाकुर्य्याद् ब्राह्मणानाञ्चभोजनं ॥ अमांसाशीभवेद्यस्तु मांसंदद्यात्सदक्षिणं ॥ जलत्यागेमणिंकुंभान् दद्याद्वैअन्नपात्रकं ॥ सहिरण्यंतिलैर्युक्तं वस्त्रयुग्मसमन्वितं ॥ धात्रीस्नानोदकंदद्या द्दधिमाक्षिकमेवच ॥ फलानांनियमेसुभ्रु फलदानंसमाचरेत् ॥ तैलत्यागेघृतंदेयं घृतत्यागेपयःस्मृतं ॥ दधित्यागेसुवर्णञ्च पयसोरूप्यमेवच ॥ धान्यानांनियमेधान्यमथवाशालयःस्मृताः ॥ दद्याद्भूमिशयीशय्यां सदृशींकन्दुकान्वितां ॥ पत्रभोजीनरोदद्याद्भाजनंघृतसंयुतं ॥ मौनीघंटांस्तिलांश्चापि सहिरण्यान्प्रदापयेत् ॥ दंपत्योर्भोजनंकार्यंसुभगोःशयनान्वितं ॥ सभागंदक्षिणोपेतं व्रतस्यपरिपूरये ॥ नित्यस्नानेहयंदद्या न्निर्स्नेहेघृतमेवच ॥ केशस्यरक्षणाद्देवि आदर्शंचविकल्प्यच ॥ उपानहौप्रदद्याच्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उपानत्परिवर्जनात् ॥ लवणस्यतुसंत्यागे दद्याच्चलवणंवहु ॥ आमिषस्यपरित्यागे दातव्याकपिलाशुभा ॥ नित्यदीपप्रदोयस्तु भवेद्दैविबुधालये ॥ दीपंतुसघृतंदद्या त्काञ्चनंवाससायुतं ॥ प्रदेयंविष्णुभक्ताय व्रतानांपरिपूर्णये ॥ एकान्तरोपवासिच सीरोन- ड्वांप्रदापयेत् ॥ शिलापात्रेतुयोभुक्ते शैर्य्यपात्रंप्रदापयत ॥ ताम्रेभुक्तेततोदद्यात्ताम्रंमधुसमन्वितं ॥ गुडत्यागेगुडंदद्या न्मधुत्या- गेमधुस्मृतं ॥ तांबुलंवर्जयेद्यस्तु मौक्तिकानिप्रदापयेत् ॥ सवस्त्रांकञ्चनोपेतां सुशय्याञ्चकृतांशुभे ॥ त्रिरात्रमालकंदद्या च्छत्रो- पानत्सुसंयुतं ॥ अनड्वाहंतथापीनं सीरस्याकर्षणक्षमं ॥ एकान्तरेत्वजादेया फलाहारेतुशालयः ॥ शाकाहारेघृतंदद्यात् पात्रं- राजतमेवच ॥ सर्व्वेषामप्यलाभेतु यथोक्तकरणंविना ॥ विप्रवाक्यंस्मृतंसुभ्रू व्रतस्यपरिपूर्णये ॥ तथाविभवहीनस्तु व्रतंकुर्यात्स- दक्षिणं ॥ विप्रवाक्यम्बृथायस्तु गृह्णातिमनुजःशुभे ॥ अदत्वादक्षिणांचापि सयातिनरकंध्रुवं ॥ व्रतवैकल्पमासाद्य कुष्टीचान्धप्र- जायते ॥ धरामराणांवचनेव्यवास्थिता दिवौकसस्तीर्थफलैःसमेताः ॥ कोलंघयेत्सुभ्रुवचोहितेषां श्रेयोभिकामीमनुजःसुविद्वान् ॥ इदंमयाधर्मरहस्यमुक्तं वेदाश्रितंपापविमोक्षणार्थं ॥ फलप्रदंमाधवतुष्टिहेतो र्विकल्पेहतोमनसोभिरामं ॥ २५ ॥ इतिश्री लघु- नारदीयपुराणे रुक्माङ्गदचरिते चातुर्मास्यव्रतवर्णनो नामत्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मोहिन्युवाच ॥ वाक्यमुक्तंत्वयासाधु कार्तिकंप्रतिमानद ॥ व्रतादिकरणंराज्ञां नेष्टंकिंचिन्महीपते ॥ मुक्तैकंरक्षणंलोके परलो-

॥ ३८ ॥

CC-0. In Public Domain. Digitization by eGangotri

कजयैषिणा ॥ दानंपानंचयुद्धंच त्रितयंभूभुजाःस्मृतं ॥ नव्रतंहित्वयाकार्य्यं यदिमामिच्छसिप्रियं ॥ मुहूर्त्तमपिराजेन्द्र नशक्नोमित्वयाविना ॥ स्थातुंकमलपत्राक्ष किंपुनर्मासंसंख्यया ॥ यत्रोपवासकरणं मन्यसेत्वंमहीपते ॥ तत्रैवभोजनंदेयं द्विजातीनांमहात्मनां ॥ अथवाज्येष्ठपत्नीया साकरोतुव्रतक्रियां ॥ एवमुक्तेतुवचने मोहिन्यारुक्मभूषणः ॥ आजुहावप्रियांभार्य्यां नाम्नासन्ध्यावलींशुभां ॥ आहूतातत्क्षणात्प्राप्ता राजानंभूरिदक्षिणं ॥ आशीनंशयनेदिव्ये मोहिन्यावाहुसंवृतं ॥ शुभंस्पृष्टंकुचाग्रेण पूर्णकुंभनिभेनवै ॥ वामेनवामनेत्रायाः सकामायामहीपते ॥ कृताञ्जलिपुटोभूत्वा भक्त्योन्नमितकन्धरा ॥ सन्ध्यावल्याहनृपतिं किमाहूताकरोम्यहं ॥ तववाक्येस्थिताभूप सपत्नीदुःखवर्जिता ॥ यथायथाहिरमसे मोहिन्यानृपसत्तम ॥ तथातथाममप्रीतिर्वर्द्धतेनात्रसंशयः ॥ भर्तुःसौख्येनयानारी सौख्ययुक्तानजायते ॥ साशुनीभवितराजन् त्रीणिजन्मानिपञ्चच ॥ आदेशंदेहिराजेन्द्र मात्रीडांकुरुशाधिमां ॥ राजोवाच ॥ जानामितवशीलंवै कुलंजानामिभाविनि ॥ तववाक्येनहिचिरं मोहिनीरमतामया ॥ रममाणस्यसुचिरं वहवःकार्तिकागताः ॥ प्रियासौख्येनमुग्धस्य नगतोहरिवासरः ॥ सोहंतृप्तिमनुप्राप्तः सौख्यऋद्धःपुनःपुनः ॥ एवंचवर्त्तमानेन कामांधेनमयाशुभे ॥ ज्ञातोयंकार्तिकोमासः सर्वपापक्षयंकरः ॥ कर्तुकामोव्रतंदेवि कार्तिकाख्यंसुखःप्रदं ॥ अनयावारितोदेवि मोहिन्यामोहयुक्तया ॥ अस्यानविप्रियंकार्य्यं सर्वथावरवर्णिनि ॥ मामकंव्रतमाधत्स्व कृच्छ्राख्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णतुष्टिदं ॥ सात्वेवमुक्तानृपहेमवर्णा भर्तातदापीनपयोधराशुभा ॥ उवाचवाक्यंद्विजराजवक्त्रा व्रतंकरिष्येतवधर्महेतोः ॥
कृतेनयेनाद्यभवेद्यशस्ते कीर्तिश्चसौख्यंतवभूमिनाथ ॥ करोमिसर्वंतवदेवनाथ विशाम्यहंवैज्वलनंत्वदर्थं ॥ नकार्य्यमास्तेममभू-
मिनाथ वाक्येनतेहन्मिसुतंगुणज्ञं ॥ किंत्वेवमेतद्व्रतमेवराजन् करोमितेधर्म्ममनुत्तमंहि ॥ इत्येवमुक्त्वारविपुत्रशत्रुं प्रणम्यसातत्र
विशालनेत्रा ॥ व्रतंचकाराथतदाहिदेवी चाशेषपापौघविनाशनाय ॥ व्रतेतुदत्तेवरकृच्छ्रसंज्ञेप्रियाकृतेहर्षमवापराजा ॥ उवाचवा-
क्यंकुशकेतुपुत्रीं कृतंवचःसुभ्रुमयात्वदीयं ॥ रमस्वकांतंमयिहर्षयुक्ते संपूर्णकामाकरभोरुहृष्टा ॥ विमुक्तकार्यस्तवसुभ्रुहेतोर्नान्या-
स्तिनारीममसौख्यहेतुः ॥ साचैवमुक्तापतिनासुरूपा प्रहर्षमभ्येत्यउवाचवाक्यं ॥ ज्ञात्वाभवंतंबहुवीर्य्ययुक्तं त्रिपिष्टपान्नाथसमा
गताहं ॥ त्यक्त्वामरान्दैत्यवरांस्तुसर्वान् गन्धर्वनागोरगरक्षसांश्च ॥ तार्क्षांस्तथान्यांस्तुविहायभूपान् स्नेहात्तदाचात्रसमागताहं
॥ एतत्कामफलंलोके यद्द्वयोरेकचित्तता ॥ अन्यचित्तेकृतेकामः कुतोभूयस्तुसंगमः ॥ सफलाहितनुर्मेद्य सफलंरूपमेवहि ॥ त्व-
याकामयताकांत दुर्लभंनजगत्त्रये ॥ प्रोन्नताभ्यांकुचाभ्यांहि कामिनोहृदयंदृढं ॥ संस्पृष्टेनहिशीर्येत मन्येवज्रतमोदृढं ॥ तदेव
मसृतंलोके यत्पुरंध्रीवरासवं ॥ कुचाभ्यांहृदिलग्नाभ्यां मुग्धेनपरिणीयते ॥ एवमुक्तापरिष्वज्य राजानंरहसिस्थितं ॥ रमयामा-
सतन्वंगी मुहूर्जनाविधानतः ॥ तस्यैवंक्रीडमानस्य मोहिन्यासहपार्थिव ॥ रुक्माङ्गदस्यश्रोत्राभ्यां पटहध्वनिरागतः ॥ मत्तेभ ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुंभसंस्थस्तु धर्माङ्गदसुतेजितः ॥ प्रातर्हरिदिनंलोका तिष्ठध्वंचैकचेतताः ॥ अक्षारलवणाःसर्वे हविष्यान्ननिषेविनः ॥ अवनीतल्पशयनाः प्रियासंगविवर्जिताः ॥ स्मरतोदेवदेवेशं पुराणंपुरुषोत्तमं ॥ सकृद्भोजनसंयुक्ता ह्युपवासाभविष्यथ ॥ तेकृतश्राद्धनिचयाः कृतपिण्डोदकक्रियाः ॥ गयाश्राद्धंकृतंतैर्यैर्हरेर्दिनमुपोषितं ॥ एषांवैकार्त्तिकीशुक्ला हरेर्निद्राव्यपोहनी ॥ भवत्येकादशीप्रातर्माकुर्युर्युंगभोजनं ॥ ब्रह्महत्यादिपापानि कामचारकृतानिच ॥ तानियास्यन्तितनिलये उपोषोगांप्रबोधिनीं ॥ प्रबोधयतिधर्मस्तु पापंभस्मीकरोतिच ॥ हरेःप्रबोधमाधत्ते तेनैषाहिप्रबोधिनी ॥ सकृच्चोपोषयत्वेमां निद्रोद्भेदकरींहरेः ॥ स्तनयोन भवेन्मर्त्यो नयोनौविवसेदिति ॥ कुरुध्वंचक्रिणःपूजमात्मवित्तेनमानवाः ॥ वस्त्राभरणधूपैश्च वरचन्दनकुंकुमैः ॥ सकृद्यपुष्पजातीभि र्यदीच्छथहरेःपदं ॥ योनकुर्यांद्वचोस्माकं धर्मंविष्णुगतिप्रदं ॥ समेवध्यश्चदंड्यश्च निर्वास्योविषयाद्धनं ॥ एवंविधेवाद्यमाने पटहेमेघनिस्वने ॥ मुमोचहस्तात्तांबूलं कर्पूरंश्चनृपोत्तमः ॥ मोहिन्याःकुचयोर्लग्नमाकृष्यहृदयंतुवै ॥ उदतिष्ठन्महीपालःशय्याच्चहाटकाङ्गदः ॥ मोहिनींप्राहकामार्तां सान्त्वयन्सुक्ष्मयागिरा ॥ देविप्रातर्हरिदिनं भविष्यत्यघनाशनं ॥ संयतोहंगमिष्यामि क्षमांकुरुवरानने ॥ तवाज्ञयानैवकृतं व्रतंकार्त्तिकसंभवं ॥ इयमेकादशीकार्या प्रबोधकरणीमया ॥ अशेषंसर्वपापस्य छेदिनीगतिदायिनी ॥ त्रयाणामपिलोकानां महोत्सवकरीशुभा ॥ तस्माद्धविष्यंभोज्यंहि नियतोगजगामिनि ॥ मयासहविशा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लाक्षि त्वंचापितनुमध्यमे ॥ आराधयहृषीकेशमुपवासपरायणा ॥ येनयास्यसिनिर्वाणं दाहप्रलयवर्जितं ॥ मोहिन्युवाच ॥
साधूक्तंहित्वयाराजन् पूजनंचक्रपाणिनः ॥ जन्ममृत्युजराच्छेद कारकंनात्रसंशयः ॥ वक्ष्येकिंचिदहंभूप तच्छृणुष्वसमाहितः ॥
याप्रतिज्ञाकृतापूर्वं त्वयामन्दरमस्तके ॥ वरप्रदानसहिता भवताहाटकांगद ॥ तस्यास्तुसमयःप्राप्तो दीयतांममानद ॥ जन्म
प्रभृतियत्पुण्यमश्वमेधशतार्जितं ॥ क्षयंयास्यतियत्सर्वं नतेकर्त्ताभवेद्वचः ॥ रुक्माङ्गदउवाच ॥ ब्रूहिचार्वंगिकर्त्तास्मि यत्तेमन-
सिवर्तते ॥ नादेयंविद्यतेकिंचिदपिजीवितमात्मनः ॥ किंपुनर्ग्रामवित्तादि धराराज्यंचभाविनि ॥ मोहिन्युवाच ॥ कान्तप्रभो-
महाराज जीवितेशरतिप्रिय ॥ नोपोष्यावासरेविष्णो भोंग्यराजन्ह्यहंप्रिया ॥ नचतेनविनाराजन् मुहूर्तमपिकामये ॥ नाद्यापि
ममतृप्तिभिस्तवसंयोगजाविभो ॥ एषएववरोदेव योमयाप्रार्थितःपुरा ॥ नचेद्दास्यसिराजेन्द्र भविष्यस्यनृतीविभो ॥ यास्यसेन-
रकंघोरं यावदिन्द्राश्चतुर्दश ॥ राजोवाच ॥ मैवंवदस्वकल्याणि नैतत्त्वय्युपपद्यते ॥ ब्रह्मणस्तुनपापात्वं धर्मविघ्नकरोषिकिं ॥ स्मृ-
तिप्राप्तेनाहिमया नभुक्तंहरिवासरे ॥ सोहमद्यकथंदेवि संजातपलितःशुभे ॥ मर्त्यस्ययौवनेतीते क्षीणेन्द्रियरणस्यहि ॥ स्वच्छंदुनी
सेवनंयुक्तमथवाहरिवासरं ॥ कृतंयन्नमयाबाल्ये यौवनेनकृतंचयत् ॥ तदहंक्षीणवीर्यस्तु कथंकुर्यांजुगुप्सितं ॥ प्रसीदचपलापांगि
प्रसीदवरवर्णिनि ॥ माकुरुव्रतभंगंमे दाताहंराज्यसंपदं ॥ अथवानेच्छसेयच्च करोम्यन्यत्सुलोचने ॥ आरोप्यशिविकायांवा त्वा- ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महंगजगामिनि ॥ कलत्रौघेणनेष्यामि विमानप्रतिमांहितां ॥ यत्रकामयसेसुभ्रु त्वाद्भिश्चतदहंव्रजे ॥ अथवानेच्छसेतच्च मोहमानंमयाकृतं ॥ कृत्वास्वर्णमयौस्तंभौ वक्षाविद्रुमभूषितौ ॥ मुक्ताफलमयीन्दोलां करिष्येहंतवप्रियं ॥ धात्रीफलप्रमाणानां शतलक्ष्यादिसंख्यया ॥ तत्रत्वांदोलयिष्यामि वहून्माशानहर्निशं ॥ व्रतभङ्गंवरारोहे माकुरुष्वशुभव्रते ॥ भोक्तुंस्वमांसहिवरं श्वमांसंहिवरानने ॥ तनयस्यनतैर्भुक्तं नाभुक्तंहरिवासरे ॥ त्रैलोक्यहननेपापं मैथुनेशशिनःक्षये ॥ नृणांव्यवस्थितंदेवि भूतानांक्रूरकर्मणि ॥ भोजनंवासरेविष्णो र्नतेषष्ठ्यांव्यवस्थिता ॥ लवणेतुतृतीयायामष्टम्यांपिशितेशुभे ॥ अक्षेषुपूर्णमास्यांतु सुरायांरविसंक्रमे ॥ गोप्रचारप्रलोपेच कूटसाक्ष्यःप्रदायके ॥ भूमेरंगुलिहारेच मिथ्याविक्रयवादके ॥ निःक्षेपस्यापहारेच कुमारीविघ्नकारके ॥ विल्वस्तमालकेचैव मृतवत्साप्रदोविधिः ॥ दास्यामीतिद्विजंश्राव्य नददातिहियोनरः ॥ ग्रामंक्षत्रंगृहंवापि दीयमानस्यदुर्मतेः ॥ निर्णयेसमनुप्राप्ते वदतोह्यनृताक्षरं ॥ मानकूटस्तुलाकूटः कन्यानृतगवानृते ॥ संस्थितंकनकाभासे कथंभोज्यंहरेर्दिने ॥ मोहिन्युवाच ॥ एकभक्तेननक्तेन तथैवायाचितेनच ॥ उपवासेनदानेन द्वादशींनहिलंघयेत ॥ गुर्विणीनांगृहस्थानां क्षीणानांरोगिणांतथा ॥ शिशूनांचिरजातानां नयुक्तंसमुपोषणं ॥ राज्ञांभारवहीनांच संग्रामाक्षितिसेवितां ॥ पतिव्रतानांराजेन्द्र नयुक्तंसमुपोषणं ॥ एतन्मेगौतमःप्राह स्थितायामन्दराचले ॥ नव्रतेनदिनंविष्णोर्न्नयंमनुजदुर्लभं ॥ तेगृस्थाद्विजांज्ञेया येषामग्नेःपरिग्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हः ॥ राजानन्तेतुविज्ञेया येप्रजापालनेस्थिताः ॥ गुर्विण्योज्येष्टमासस्थाः शिशवोज्येष्टवत्सराः ॥ अतिलंघननिर्क्षीणा यन्नभा-
गोघनाश्रये ॥ त्रिविधेनप्रकारेण भर्तुर्याभिहितेरताः ॥ पतिव्रतास्तुविज्ञेया नज्ञेयायोनिरक्षणात ॥ किमन्यैर्बहुभिर्भूप वाक्या-
लापैःकृतैर्मया ॥ भोजनेतुकृतेप्रीति रेकादश्यांत्वयानृप ॥ नप्रीतिर्यदिमेछित्वा शिरस्त्वंहिप्रयच्छसि ॥ तृणतुल्यानहंमन्ये त्रि-
लोकान्मनुजाधिप ॥ यत्प्रदास्यसितुष्ट्यर्थं ममराजीवलोचन ॥ स्वयंकृत्वाप्रतिज्ञात्वं सदक्षिणकरान्वितां ॥नाद्ययच्छसिराजेन्द्र
नाहंसंसर्पयामिते ॥ वर्णानामाश्रमाणांच सत्यंराजेन्द्रपूज्यते ॥ विशेषाभूमिपालानां त्वद्विधानांमहीपते ॥ सत्येनतपतेसूर्यः
शशीसत्येनरोचते ॥ सत्येस्थितिक्षितिर्भूप सत्यंधारयतेजगत ॥ सत्येनवहतेवायुः सत्येनज्वलतेशिखी ॥ सत्याधारमिदंसर्वं जग-
त्स्थावरजङ्गमं ॥ नसत्याच्चलतेसिन्धुर्नविन्ध्योवर्द्धतेविभो ॥ नगर्भंयुवतीधत्ते वेलातीतंकदाचन ॥ ऋतवःसंस्थितासत्ये फल-
पुष्पार्थदर्शिनः ॥ द्रव्यादिसकलंवस्तु सत्याधारंमहीपते ॥ अश्वमेधसहस्रंच सत्यंचतुलयाधृतं ॥ अश्वमेधसहस्राद्धि सत्यमेवाति-
रिच्यते ॥ सत्याद्धिमुक्तोनृपतेमनुष्यः सुरापतुल्योभवतीतिसत्यं ॥ व्रतेनशुद्धिर्यदिवाप्युपैति सत्याच्च्युतोनैतिकृतेनतेन ॥ ६५ ॥
इतिश्रीलघुनारदीयपुराणे रुक्माङ्गदचरिते मोहिनीसम्वादो नामचतुर्विंशोध्यायः ॥ २४ ॥ ७ ७ ७ ७ ७
रुक्मांगदउवाच ॥ यत्त्वयाऽव्याहृतंवाक्यं ममेदंगौतमेरितं ॥ मन्दरेपर्वतेश्रेष्ठे हरिवासरभोजनं ॥ अजानतापुराणार्थं व्याहृतञ्च-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजन्मना ॥ क्षुद्रशास्त्रानुसारेण लोलुपेनवरानने ॥ पुराणेनिर्णयोह्येष विद्वद्भिःसमुपाहृतः ॥ नशङ्कनपिवेत्तोयं नहन्यात्कूर्मशू-
करौ ॥ एकादश्यांनभुञ्जीत पक्षयोरुभयोरपि ॥ अगम्यागमनेदेवि तथाऽभक्ष्यान्नभक्षणे ॥ अकार्यकरणेजन्तोर्गोसहस्रबधःकृतः ॥
तत्कथंन्नायमानोहं भोक्ष्यामिहरिवासरे ॥ अभक्षःसर्वथाप्रोक्तः किंपुनस्त्वन्नसंस्क्रियां ॥ अनुकल्पोनृणांप्रोक्तः क्षीणानांवरवर्णि-
नि ॥ मूलंफलंपयस्तोयमुपभोग्यंभवेच्छुभे ॥ नत्वेवंभोजनेकैश्चिदेकादश्यांप्रकीर्त्तितं ॥ ज्वरिणांलंघनंशस्तं पापीनांसमुपोषणं ॥
मनःप्रकोपसुभगे संप्राप्तेहरिवासरे ॥ ज्वरमध्येकृतंपथ्यं निधनायविधीयते ॥ वैष्णवेतुदिनेभुक्ते नरकायप्रकल्पते ॥ माग्रहंकुरुवा-
मोरु व्रतभंगोभवेन्मम ॥ यद्यद्वरोचतेतुभ्यं तत्तत्कर्त्तास्मिसुन्दरि ॥ मोहिन्युवाच ॥ नचान्यद्रोचतेराजन् विनावैभोजनक्रियां ॥
जीवितस्यापिदानेन नमेकिञ्चित्प्रयोजनं ॥ माचेरर्भूपदृष्टोयं नमेकिञ्चित्प्रयोजनं ॥ अभिमन्तोनविद्वांसो नमन्येसमुपोषणं ॥
वेदवाक्यंकथंकर्म भवान्वैकर्तुमर्हसि ॥ वसिष्ठउवाच ॥ तामाहनृपतिःक्रुद्धो वेदोयम्बहुधास्थितः ॥ यज्ञकर्मक्रियावेदः पुराणेषुप्र-
तिष्ठितः ॥ पुराणपुरुषाज्जातं यथेदंजगदद्भुतं ॥ यथाहिवाग्मयंज्ञानं पुराणेभ्योनसंशयः ॥ वेदार्थादधिकंमन्ये पुराणार्थंवरानने ॥
वेदाःप्रतिष्ठिताःदेवि पुराणेनात्रसंशयः ॥ वित्पत्यल्पश्रुताद्वेदो मामयंघातयिष्यति ॥ इतिहासपुराणैस्तु तद्दृष्टंस्मृतिभिःशुभे ॥
उभाभ्यांयमदृष्टंहि तत्पुराणेषुगीयते ॥ नवेदेग्रहसंचारो लग्नशुद्धिर्नभाविनि ॥ तिथिवृद्धिःक्षयोवापि याज्यायाज्यौनदृश्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रायश्चित्त्यंनहत्यायामातुरस्यौषधींप्रिये ॥ नचापिपापशुद्धिस्यादात्मानोवापरस्यवा ॥ यदंगैर्दीयतेसुभ्रु तथोपागैश्चगीयते ॥ पुराणैःस्मृतिभिर्यस्तु वेदोयंपरिपठ्यते ॥ वदन्तीहपुराणानि भूयोभूयोवरानने ॥ नभोक्तव्यंनभोक्तव्यं संप्राप्तेहरिवासरे ॥ पुराणमन्यथाकृत्वा तिर्यग्योनिमवाप्यते ॥ प्रशान्तोपिस्वदान्तोपि नगतिंप्राप्नुयात्क्वचित् ॥ पितरंकोनवन्देत मातरंकोनपूजयेत् ॥ कोनगच्छेत्सरिच्छ्रेष्ठां कोभुंक्तेहरिवासरे ॥ कोहिदूषयतेवेदं ब्राह्मणान्कोजिघांसति ॥ परदारांहिकोगच्छेत्कोभुंक्तेहरिवासरे ॥ नहीदृशंपापतरंजगत्त्रये विमूढजन्तोर्हरिभिर्दिनेशुभे ॥ करोतिदेहस्यविवृद्धहेतोर्भुजिक्रियामेषनरःसदैव ॥ मोहिन्युवाच ॥ पूर्णिकेशीघ्रमाहूय ब्राह्मणान्वेदपारगान् ॥ तेषांवाक्येनपूतोयं करोत्वन्नभुजिक्रियाम् ॥ सातद्वाक्यात्त्वरन्तीच ब्राह्मणान्वेदपारगान् ॥ आहूयचानयामास यत्रतिष्ठतिमोहिनी ॥ तानागतान्ततोदृष्ट्वा वेदवेदाङ्गपारगान् ॥ मोहिनीपतिनासार्द्धं ववन्देभूमिदेवतान् ॥ उपविष्टास्तुतेसर्वे शातकुंभमयेष्वपि ॥ आसनेषुमहीपाल ज्वलनार्कसमप्रभाः ॥ तेषांमध्येवयोवृद्धो गौतमोवाक्यमब्रवीत् ॥ किंनिमित्तंवयंदेवि समाहूतावदस्वनः ॥ सर्वसंशयछेत्तारः प्राप्तास्मोमत्तगामिनि ॥ मोहिन्युवाच ॥ छान्दसस्तुजनोह्येष अर्थवाक्यहतोयथा ॥ सोयंवदतिमोहान्धो नाहंभोक्ष्येहरेर्दिने ॥ अन्नाधारमिदंसर्वं जगत्स्थावरजंगमं ॥ मृताह्यप्यन्नदानेन प्रीयन्तेपितरोदिवि ॥ कर्कन्धुमात्रंविप्रेन्द्राः पुरोडाशंहिदेवताः ॥ कामयन्तेद्विजश्रेष्ठा अन्नंचैवामृतोपमं ॥ पिपीलिकापि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षुधिता सुखेनादायतण्डुलान् ॥ चिरंनयतिदुःखेन चान्नंकस्यनदीयति ॥ सोयंविद्धिषयत्यत्र संप्राप्तेहरिवासरे ॥ नितंधर्मपरित्य-ज्य यतिधर्मेव्यवस्थितः ॥ विधवाचार्यतीनांहि युक्तव्रतनिषेवणे ॥ अव्रताविधवायातु मुनयश्चाव्रतस्तथा ॥ अन्धेतमशिम-ज्जंते यावादिन्द्राश्चतुर्दश ॥ उपवासादिकरणं भूभुजान्नोदितःक्वचित् ॥ मुक्तेकंपालनंराज्ञां चतुर्वर्गप्रसाधनं ॥ नारीणांभर्तृशु-श्रूषा पुत्राणांपितृसेवनं ॥ शूद्राणांद्विजशुश्रूषा लोकरक्षामहीभृतां ॥ स्वकंकर्मपरित्यज्य यदन्यत्कुरुतेक्वचित् ॥ अज्ञानाद्वाप्र-मादाद्वा पतितःसनसंशयः ॥ सोयमद्यमहीपालो जातिधर्मासमीहते ॥ अव्यापाराहियुवती अमनस्वीसुतस्तथा ॥ एकान्तशी-लोनृपतिर्भृत्यःकर्मविवर्जितः ॥ सर्वेतेनरकंयान्ति अप्रतिष्ठंद्विजोत्तमाः ॥ अयंहिनियमोपेतो हरिपूजनतत्परः ॥ आक्रन्देवर्त्तमा-नेवै कथमेषोभिधास्यति ॥ व्युत्पाद्यहरिपूजान्तु ब्रह्महत्याम्व्यपोहति ॥ क्षीणदेहोरिपूनेष कथंसंयमयिष्यति ॥ अन्नतोभवतिप्रा-णः प्राणाद्देहविचेष्टितं ॥ चेष्टायांरिपुनाशस्तु ततोन्नंपरिरक्ष्यते ॥ एवंज्ञात्वामयाराजा बोध्यमानोनबुध्यते ॥ निजधर्मपरित्यज्य जातिधर्मेव्यवस्थितः ॥ विधवानांव्रतीनांहि युक्तंव्रतनिषेवनं ॥ अव्रताविधवायातु मुनिश्चैवस्तुचाव्रतः ॥ अन्धेतमसिमज्जन्ते या-वदिन्द्राश्चतुर्दश ॥ एतदेवनृपेन्यायं यत्प्रजारक्षणंपरं ॥ नव्रतंकिञ्चिदेवेह पुत्रस्त्रीषुनृपेषुवा ॥ किंदेवकार्येणनराधिपस्य रक्षामकृ-त्वाविषयस्थितानां ॥ तदेवकार्यंसचयज्ञहोमो यदश्रुपातानयनंहिराष्ट्रे ॥ ५० ॥ इतिश्री ना० पु० मोहिनीवाक्यंनाम ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वशिष्ठउवाच ॥ तद्वाक्यंब्राह्मणाःश्रुत्वा मोहिन्याःसमुपाहृतं ॥ तथ्यमित्येवमुक्कातं राजानंवाक्यमब्रवीत् ॥ ब्राह्मणाऊचुः ॥ यः
पुरानृपतेपुण्यः कृतोयंसमयःकिल ॥ एकादश्यांनभोक्तव्यं पक्षयोरुभयोरपि ॥ नकृतःशास्त्रदृष्ट्याहि स्वबुध्यावेत्वयाकृतः ॥ सा-
ग्नीनांप्राशनंप्रोक्तमुभयोःसन्ध्ययोःकिल ॥ मोहादुत्सृष्टभोक्तारस्त्रयोवर्णाःप्रकीर्त्तिताः ॥ विशेषाद्भूमिपालानां कथंयुक्तउपोषणं ॥
सर्वत्रोद्यतशस्त्राणां दुष्टसंयमिनांप्रभो ॥ शास्त्रतोशास्त्रतोवापि यःकृतःसमयस्त्वया ॥ परिपूर्णोभवत्वेष वाक्येनाद्यद्विजन्मना ॥
व्रतभंगोनतेस्तीह भुंक्ष्वविप्रानुशासनात ॥ परितापोनकर्त्तव्यो विप्रवाक्यंमहत्तरं ॥ योन्यथामन्यतेतेषां वाक्यंनृपतिपुंगव ॥ स-
यातिरासभियोनिं जन्मानिदशपञ्चच ॥ तच्छ्रुत्वावचनंरौद्रं राजाकोपसमान्वितः ॥ उवाचस्फुरमाणौस्तान् विप्रांश्चश्लक्ष्णयागिरा ॥
सर्वेषामेवभूतानां भवन्तोमार्गदर्शिनः ॥ विमार्गस्थाभवन्तोहि कथंवदथमूर्खतां ॥ यतीनांविधवानाञ्च उपवासउदाहृतः ॥ मि-
थ्यैतत्सर्वदाचैव उपोष्योहरिवासरः ॥ यद्भवद्भिरिदंवाक्यं प्रोक्तंराज्ञामुपोषणे ॥ तन्नास्तिसर्वभूतैस्तु कार्यमेवमुपोषणं ॥ पुराणे-
श्रूयतेचेयं गाथेयंपापकृन्तनी ॥ नशङ्खनपिवेत्तोयं नहन्यात्कूर्मशूकरौ ॥ एकादश्यांनभोक्तव्यं पक्षयोरुभयोरपि ॥ सुरापानंन-
कर्त्तव्यं नहन्तव्योद्विजस्तथा ॥ नाक्षैर्क्रीडेदधर्मंवै नभुञ्जीतहरेर्दिने ॥ अभक्ष्यभक्षणंचैव वर्णाश्रमविवर्जितं ॥ परदाराभिगमनं य-
तेश्चैतद्विगर्हितं ॥ अथवासर्ववर्णानां किंवामन्यथभूसुराः ॥ योषित्प्रसंगसदृशं संप्राप्तेशशिनःक्षये ॥ भोजनंवासरेविष्णोः सद्धि- ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विंप्राविगर्हितं ॥ कृत्वातुकार्यंजीवेत अप्रमत्तःशरच्छतं ॥ कोहिवैवेष्टमानस्य योभुक्तेहरिवासरे ॥ चतुष्पदेभ्योमनुजैर्न्नान्नंदत्तंहरे-
र्द्दिने ॥ उपवासस्थितैर्विप्रा विष्णुधर्मपरायणैः ॥ सोहंकथंकरिष्यामि यत्कृतंनकदाचन ॥ नवोमचःकरिष्यामि नमयाहिनिमं-
त्रिताः ॥ नन्वहंक्षीणदेहस्तु नचरक्षाविबर्जितः ॥ धर्मभूषणसंज्ञेतु रक्षपालेधरातले ॥ प्रशाशतिसुरश्रेष्ठः कोविपक्षोभवेन्मम ॥ ए-
वंज्ञात्वाद्विजश्रेष्ठा नवाच्यंकिंचिदेवहि ॥ अनिच्छमानेयेदद्युः प्रायश्चित्तंद्विजातयः ॥ तेषामेवाहितत्पापं स्मृतिर्वैकलिपसंभवं ॥
देवोवादानवोवापि यक्षोगन्धर्वराक्षसा ॥ बृद्धोवाब्राह्मणोवापि पितास्माकमथापिवा ॥ हरिर्वापितरौवापि मोहिनीजनकोपिवा ॥
दिनकृच्छीतकर्त्तावा तुष्यतिनृपतोयदि ॥ नभुंक्तेभूसुराराजन् नाम्नारुक्मांगदस्तुयः ॥ पातालाच्छीर्यतेपृथ्वी हिमवान्परिवर्त्तये-
त् ॥ जलधिःशोषमायाति उष्णत्वंपावकस्त्यजेत् ॥ नाहंत्यजेयंविप्रेन्द्रा एकादश्यानिषेवनं ॥ प्रसिद्धरेखाभुवनत्रयेपि शरद्यतेमे-
पटहेतिमात्रं ॥ ग्रामेथवर्गेविषयेपुरेवा विष्णुष्पतेरुक्मविभूषणस्य ॥ दण्ड्यश्चबध्यश्चसपत्नभूतो नचापिवासोविषयेषुतस्य ॥ हरे-
र्द्दिनेसर्वमखप्रधाने पापापहेधर्मविवर्द्धनश्च ॥ मोक्षप्रदेजन्मनिकृन्तनाख्ये श्रेयोनिधौसर्वजनप्ररूढैः ॥ एवंविधःसंयमसंयुतोहं य-
द्यस्मिकर्त्तावृजिनंहिविप्राः ॥ अमेध्यलिप्तःपटहोभवेन्मे संछादितानीलपटेनवाससा ॥ उत्पाद्यकीर्त्तिस्वयमेवजन्तोर्निकृन्ततेका-
मभयाद्वयोनरः ॥ सयातियोर्निंकृमिकीटजुष्टां विष्ठामयेपञ्चयुगानिसप्त ॥ वृथाशिशूनामपिवैजनित्री भविष्यतेपुत्रवरोनिराशा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैवस्वतेहर्षमुपागतेहि सलेखकेभूतपटेप्रपन्ने ॥ किंतेजनातेनपुरात्मनाहि ददातिहर्षंरिपुसुन्दरीणां ॥ कुकर्मणापापमतिंकरोति
॥ ४१ ॥ कृतन्नधात्रंपुनरेवयोत्र ॥ शास्त्रंनशास्त्रंनचतत्पुराणं नचापिसन्तःस्मृतयोनचैव ॥ वेदाह्यवेदाश्वभवन्तिविप्रा शुश्रूक्रियांयःकुरुते-
त्रवासरे ॥ श्राद्धपितेनापिनतृप्तिरस्ति यद्धुह्यतेवैपितृशेषमन्नं ॥ प्राप्तेह्निन्नूनंमधुसूदनस्य पित्र्यंहिकर्मेष्टतमंनभाति ॥ बशिष्ठउ-
वाच ॥ श्रुत्वैतद्वचनंभूप मोहिनीप्रज्वलत्यथ ॥ क्रोधसंरक्तनयना भर्त्तारंपर्यभाषत ॥ नकरोषिवचोमह्यं धर्मराज्योभविष्यति ॥
धर्मराजस्तुपुरुषः पांशुनासमतांव्रजेत् ॥ पांशुनापूर्यतेगर्त्तः सगर्त्तोहिनजायते ॥ कृतकृत्यागमिष्यामि प्राप्तोधर्मस्त्वदुद्भवः ॥
नोपधानंकरिष्यामि सुबाहुंचतवाधुना ॥ धिक्त्वांचदक्षिणकरं स्ववाक्यपरिलंघनं ॥ म्लेच्छोसिनचराजात्वं म्लेच्छेप्येतन्नविद्यते ॥
सत्याद्यलितमद्यत्वां परित्यज्यस्वपापिनं ॥ एवमुक्त्वावरारोहा उदतिष्ठत्त्वरान्विता ॥ सतीवेशंपरित्यज्य सर्वालंकारभूषिता ॥ प्र-
स्थितासातदातन्वी भूसुरैःसहभूमिप ॥ वदन्तीपरुषंवाक्यं पार्थिवंप्रतिभाविनी ॥ बरंह्यमेध्यसंस्पर्शो नास्यसंगोनृपस्यहि ॥ व-
रंनीलांबरस्पर्शो नास्यधर्मच्युतस्यहि ॥ बरंह्युदक्याशंस्पर्शो नास्यसत्यच्युतस्यहि ॥ एवंविमोहिनीरुष्टा प्रलपन्तीतदाभृशं ॥ गौ-
तमाद्यैःपरिवृता निर्जगामगृहाद्वहिः ॥ निर्गच्छन्तीसुसंक्रुद्धा साक्रोशन्तीतदानृपं ॥ अतिश्वासकलामूर्वीं प्राप्तोधर्मविभूषणः ॥
संमुखोहिजनन्यास्तु बराश्वोपरिसुस्थितः ॥ कर्णाभ्यांतस्यशब्दोसौ विश्रान्तपितृवत्सलः ॥ मोहिनीवक्त्रसंभूतो विप्रवाक्योपबृं- ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हितः ॥ सश्रुत्वाताद्दृशंवाक्यं जनन्याधर्मभूषणः ॥ अवरुह्यहयात्क्षिप्रं ववन्देमोहिनींतदा ॥ ब्राह्मणानांचसर्वेषां प्रणाममकरो-
त्तदा ॥ अनुमन्यचतान्सर्वान् मोहिनींवाक्यमब्रवीत ॥ केनापमानितादेवि कस्मात्वंगर्हसेनृपं ॥ धरासुरैःसमेतात्वं ब्रूहिकिंक-
रवाणिते ॥ धर्मांगदवचःश्रुत्वा मोहिनीवाक्यमब्रवीत् ॥ अनृतोयंतवपिता करोयेनवृथाकृतः ॥ यःकृतंसुकृतंभीरु रुक्माशोकाकृ-
तिःशुभः ॥ ध्वजांकितोबरश्रीमान् दक्षिणःकनकांगदः ॥ रुक्मांगदेनपित्राते नाहंवस्तुंसमुत्सहे ॥ धर्मांगदउवाच ॥ यद्ब्रवीषि
वचोदेवि तत्कर्त्ताहंनसंशयः ॥ माकोपंकुरुदेवित्वं निवर्त्तस्वपितुःप्रिये ॥ मोहिन्युवाच ॥ अनेनसमयेनाहं पित्रोदातेमहामते ॥
मन्दरेपर्वतेश्रेष्ठे सन्निधौधूर्जटेस्तदा ॥ समयात्प्रच्युतस्त्वद्य पितातेराजनन्दन ॥ नप्रयच्छतिमेदेयं तस्यैवचविवृद्धये ॥ नयाचे-
कानिचिद्वस्तु हस्त्यश्वंरत्नवाससी ॥ येनतस्यभवेद्धानिस्तन्नयाचेनृपात्मज ॥ येनासौप्रीणयेद्देवं स्वकीयंवेदिनाम्वर ॥ तन्मया
प्रार्थतेपुत्र समोहात्नप्रयच्छति ॥ उपकारायतस्यैव देहंसंप्रीणनायवै ॥ याचितोब्राह्मणैःसार्द्धं मयानृपतिपुंगव ॥ स्थितोसावनृ-
तेघोरे सुरापानंसमेत्यवै ॥ सत्यच्युतंनिष्ठुरवाक्यभाषिणं विमुक्तधर्मंनृपतस्करंच ॥ परित्यजेयंजनकंतवाधुना नसंगतिर्मेभवि-
ताहितेन ॥ तच्छ्रुत्वामोहिनीवाक्यं तदाधर्मांगदोब्रवीत् ॥ मयिजीवतितातोमे नभवेदनृतःक्वचित् ॥ निवर्त्तस्वधरातुल्ये क-
रिष्येहंतवेप्सितं ॥ तत्रात्मनानृतन्देवि पूर्वमुक्तंकदाचन ॥ सकथंताद्दृशोजातो भविष्यतिनृपोत्तमः ॥ यस्यसत्येनलोकाहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितावसुमतीतथा ॥ वैवस्वतगृहंयेन शुन्यंसर्वांरिणाकृतं ॥ यस्यविस्फुरतेकीर्त्तिः सर्वद्वीपेषुधर्मिणः ॥ सकथंजायतेराजा त्व-
सत्यवचनान्वितः ॥ क्वनुश्रुतंत्वयादेवि श्रुतंभूमिपतीरितं ॥ येनत्वंभाषसेभीरु निन्दसेपितरंमम ॥ कृत्वाममोपरिदयां निवर्त्तस्व
वरानने ॥ एतद्धर्मांगदवचः श्रुत्वादेवीविमोहिनी ॥ निवर्त्ततमहीपालः पुत्रस्कन्धावलंबिनी ॥ यत्ररुक्मांगदःशेते मृतकल्पो-
रविप्रभः ॥ तस्मिन्निवेशयामास शयनेकाञ्चनान्विते ॥ दीपरत्नैःसुखचिते मणिवैडूर्यभूषिते ॥ आखण्डलस्यशस्त्रेण कृतपादेसु-
कोमले ॥ विस्तरायामसंपन्ने सुरम्येसुमनोहरे ॥ उवाचप्रणतोभूत्वा पितरंश्लक्ष्णयागिरा ॥ तातैषाजननीमह्यं तांवदत्यनृतीत्वि-
ति ॥ मयिजीवतिकस्मात्वं भविष्यस्यनृतीपितः ॥ सकोषरत्नविषये गोगजाश्वसमाकुले ॥ राज्येप्रशास्यमानेतु ससोदधिविभूषि-
ते ॥ देहित्वंसकलंह्यस्या यत्त्वयासमुदीरितं ॥ मयिचापधरेतात व्यलीकंकःकरिष्यति ॥ देहिशक्रपदंदेव्या जितंचैवपुरन्दरं ॥
नचेतुष्यतिकल्याणी तेनशक्रपदेनहि ॥ वित्तेशंवारुणंवापि याम्यंवापृथिवीपते ॥ आग्नेयंनैरृतंवापि वायव्यंवाशिवस्यच ॥ वि-
रिंचिंदुर्लभंवापि योगिगम्यंनिरञ्जनं ॥ जित्वापदंप्रदास्यामि उपास्याराध्यपद्मजं ॥ समीहतेयजननी ममाद्यधरणीतले ॥ त्रि-
पिष्टपेवाथपरेपदेवा दास्यामिजित्वादनुजेशमर्त्यान् ॥ भृत्योस्मिदासोस्मिनराधिपेन्द्र मातुस्तथाचाहमदीनकीर्तिः ॥ यद्दुष्करं-
भूमिपदेत्रिलोके तच्चापिदास्यामितवप्रभावात् ॥ तंचापिराजेन्द्रददस्वदेव्या यज्जीवितंवाञ्छतितद्ददस्व ॥ भवस्वनान्योनृपना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थलोके माकीर्त्तिजंपापमिदंवदस्व ॥ प्रकाशयित्वास्वगुणैर्जनौघं करैरिवात्मप्रभवैःखखोल्कः ॥ कीर्त्तिःप्रसंगेतवभूमिपाल प्रजा-बधोयंनहिसंशयोत्र ॥ उत्पादयित्वाविमलामनन्तां कीर्तिंप्रभोस्वर्गगणानुसारिणीं ॥ नयुक्तमेतत्तवभूमिपाल वाक्यंमृषाकर्तुमि-हेन्द्रकल्प ॥ ८० ॥ इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते धर्मांङ्गदवचः षड्विंशतितमोध्यायः ॥ २६ ॥ ७ ७ ७

राजोवाच ॥ कीर्त्तिर्नश्यतुमेपुत्र असत्योवाभवाम्यहं ॥ गंतावानरकंघोरं नभोक्ष्येहरिवासरे ॥ वदत्येषासुद्धर्मेधा भूयोभूयःसुवा-लिशा ॥ समयेकामयेपुत्र वदस्वान्यत्कथंचन ॥ मुक्त्वैकंभोजनंविष्णोर्वासरेपापनाशने ॥ यद्यहंकुत्सितंयोनिं व्रजेयंकृमिसंयु-तां ॥ कार्यंतथापिनैवाहं भोजनंहरिवासरे ॥ एषाचैवगुरुर्भूत्वा लोकानांशिक्षयान्विता ॥ सुमतिर्भारतिर्यासीत्साकथंचित्तथाभ वेत ॥ अभक्ष्यभक्षणंकृत्वा ह्यगम्यगमनंतथा ॥ पीत्वापेयन्तुयज्जीवेत् किंतेनवदपुत्रक ॥ कृत्वापांशुसमःपुत्र त्यक्तोहमनयाक्षि-तौ ॥ धिक्कृतोहिजनैःसर्वैः नभोक्ष्येहरिवासरे ॥ प्रयातुविलयंदेवी मोहिनीब्रह्मणोन्तिकं ॥ वियोगेचपलापद्मां वरंमृत्युर्नभोज-नं ॥ कथंहर्षमहंकर्त्ता मार्तण्डतनयस्यहि ॥ निरुद्धोयस्यवैमार्गो हरिवासरसेवनात ॥ याश्चशून्याःकृतास्तात मयानरकपङ्क्तयः ॥ परिपूर्णाभविष्यन्ति जनस्ताबृजिनेकृते ॥ यास्मसीमन्तिनीकाचित् कुक्षौसंधारयेत्सुतं ॥ यःशत्रून्संमुखात्कुर्यान्मित्रद्वेषंक-रोतिकिं ॥ सोहंदेवमनुष्याणां कृत्वामूर्द्धिपदंनृप ॥ आपूर्यवैष्णवंलोकं जनोघैःसमुपोषितैः ॥ कथमन्यंचरेद्धर्म भार्याहेतोःस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामुकः ॥ नान्यमिच्छातिदुर्मेधा धरंशक्रनिसूदनं ॥ भोजनंवासरेविष्णोरेतदेवह्रियाचते ॥ तंनदास्यामिमोहिन्या याचितोपि-
सुरासुरैः ॥ पिबेविषंविशेवह्निं निपतेपर्वताग्रतः ॥ खड्गेनवाशिरश्छिन्द्यां नभोक्षेहरिवासरे ॥ रुक्मांगदेतिमेनाम प्रसिद्धंभुवन-
त्रये ॥ एकादश्युपवासेन मयाचोपार्जितंयशः ॥ सकथंभोजनंकृत्वा सर्वसंमार्ज्जयेह्यहं ॥ यदिव्रजतिदलतिविलयति तिर्यक्सं-
चरतिखण्डशोयाति ॥ विरमातितदपिनचेता मामकमिहमोहिनिहेतोः ॥ परित्यजामेवनिजंहिजीवितं राज्येनकिंमेस्वजनैःसुते-
न ॥ नत्वेवकर्त्तामधुसूदनस्य दिनेसुपुण्येऽन्ननिषेवनंहि ॥ १८ ॥ इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते सप्तविंशोध्यायः
वशिष्ठउवाच ॥ ततपितुर्वचनंश्रुत्वा तदाधर्मविभूषणः ॥ आनयामासजननीं तदासंध्यावलिंशुभां ॥ सूर्यायुतशतप्रख्यां तेज-
सासंहतस्तनीं ॥ सययौमन्दिरंदेव्याः पितुर्दुःखेनदुःखितः ॥ चालमानाधरांसर्वां पदविन्यासविक्रमैः ॥ पुत्रस्यवचनात्प्राप्ता त-
त्क्षणात्सानृपान्तिकं ॥ धर्मांगदउवाच ॥ श्रुतंतेमोहिनीवाक्यं पितृवाक्यंतथैवच ॥ उभयोःसंविदंज्ञात्वा मनुःशांत्वयमोहिनीं ॥
भोजनायस्थितामेनां नृपस्यहरिवासरे ॥ यथानच्यवतेसत्याद्यथाभुंक्तेनमेपिता ॥ तथाविधीयतामद्य कुशलंस्याद्यथोभयोः ॥
तत्पुत्रवचनंश्रुत्वा देवीसन्ध्यावलीनृप ॥ उवाचश्लक्ष्णयावाचा प्राहब्रह्मसुतांतथा ॥ माग्रहंकुरुमाभीरु नृपतेर्द्धर्मनाशने ॥ ना-
स्वादयातिपानान्नं संप्राप्तेहरिवासरे ॥ अनुवर्त्तयराजानं गुरुरेषसनातनः ॥ नभार्याबचनेभर्तुर्नारीभवतिभाविनि ॥ तस्यालोकाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभाः प्रोक्ता सावित्र्यास्तु यथामलाः ॥ यद्यनेनपुरादेवि तवदत्तकरोगिरौ ॥ कामार्त्तेनविमूढेन नचतद्वै विचिन्तयेत् ॥ यद्देयंतद्ददात्वेष अदेयंप्रार्थयस्वमा ॥ विपत्तिरपिचश्लाघ्या सन्मार्गेसंस्थितस्यहि ॥ नभुक्तंयेनशुभगे शैशवेपिहरेर्द्दिने ॥ सोयंशिशुत्वाभावेच कथंभोक्षतिसांप्रतं ॥ कामंवरयभद्रेन्यं निवृत्तोभवभोजने ॥ यदिमांमन्यसेदेवि धर्मांगदविमोहिनीं ॥ राज्यंवाजीवितंवास्य वरंयाचयभाविनि ॥ राज्यंगृहाणवामोरु सद्वीपवनकाननं ॥ अथवातेशुभेभद्रे वदान्यत्करवाणिते ॥ ज्येष्ठाहंवाकनिष्ठायाः करिष्येपादधावनं ॥ भर्तुरर्थेविशालाक्षि प्रसीदतनुमध्यमे ॥ वाचाशपथकोशैस्तु संनिबध्याथतंहिया ॥ अकार्यकारयेत्पत्यौ सानारीवाग्गुरीभवेत् ॥ प्रत्युतानरकान्घोरान् पञ्चजन्मानिसप्तच ॥ ज्ञात्वाहमेवंसुभगे विक्रियांपापसंभवां ॥ निवारयाम्यकार्यत्वात् सखीभावेनसुन्दरि ॥ विपक्षस्यापिसद्बुद्धिर्दातव्याधर्मबुद्धिना ॥ किंपुनःसख्ययायुक्तास्तवपद्मशुभानने ॥ सन्ध्यावल्यावचःश्रुत्वा मोहिनींमोहसंयुता ॥ उवाचकनकाभासा भर्तुर्ज्येष्ठांप्रियान्तदा ॥ माननीयासिमेसुभ्रु करोमिवचनन्तव ॥ द्वन्द्ववृत्तिर्विवादस्तु गीयतेनारदादिभिः ॥ यदेतन्नाचरेद्राजा भोजनंकृष्णवासरे ॥ क्रियतामपरन्देवि मरणादधिकंतव ॥ ममापि दुःखैर्दह्येत नतवैववदामिते ॥ कस्येष्टमात्महननं कस्येष्टंबिषभक्षणं॥ पतनंगिरिशृंगाद्वा सर्प्पैःक्रीडाथवाशुभे ॥ व्याघ्रसिंहाभिगमनं समुद्रतरणंतथा ॥ द्विरुक्तोनृपवाक्यंवा परदारगमस्तथा ॥ अपथ्यभक्षणंलोके तथैवामक्षभक्षणं ॥ मृगयापानमक्षैर्वा क्री-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डनंसाहसैस्तथा ॥ छेदनंतृणकाष्ठानां लोकानांखण्डनंतथा ॥ हननंसूक्ष्मजीवानां जलपावकक्रीडनं ॥ निष्ठादेशवरारोहे नरःस-
र्वंकरोतिहि ॥ साहंपापादुराचारा वक्तुकामासुनिर्घृणा ॥ यादृशेनहिभावेन योनौरेतःसमुत्सृजेत् ॥ तादृशेनहिभावेन अपत्यं
जायतेकिल ॥ भ्रंशनार्थमहंराज्ञो देविरुक्मांगदस्यहि ॥ जाताजलजजातेन स्त्रीरूपावरवर्णिनी ॥ दुष्टभावासमुत्पन्ना दुःखार्थं
तनयस्यते ॥ नलभंनग्रहादेवि नाहोवापुण्यदर्शिनी ॥ तत्कालभावनातग्राह्या तद्भावाज्जायतेसुतः ॥ तेनभावेनयुक्तेन दाक्षिण्य
रहितस्यच ॥ नस्नेहोनचव्रीडावै नधर्मादेर्विविद्यते ॥ युक्तायुक्तंमन्यमानः स्वभावमनुवर्त्तते ॥ वक्ष्येवचःप्राणहरन्तवाधुना भर्तु-
श्चलोकस्यचदारुणंच ॥ धर्मापहंघोरतरंममैव कर्तुंनशक्यंमनसेवभीरु ॥ करोषिवाक्यंयदिमामकंत्वं भवेत्सुकीर्तिर्महतीसुलोके ॥
भर्तुर्यशःस्यात्त्रिदिवेगतिस्तु पुत्रेप्रसंसाममाधिग्विवाद ॥ ३५ ॥ इतिश्री ल० ना० पु०रु०मोहिनीवाक्ये अष्टाविंशोध्यायः २८
वशिष्ठउवाच ॥ मोहिन्यावचनंश्रुत्वा देवीसन्ध्यावलीतदा ॥ धैर्यमालंव्यतांतन्वी ब्रूहिब्रूहीत्यभाषत ॥ कीदृशंतद्वचोदेवि येन-
दुःखंभवेन्मम ॥ भर्तुर्मेसत्यकरणे नमेदुःखंव्यथाक्वचित् ॥ आत्मनोनिधनोवापि पुत्रस्यनिधनोपिवा ॥ भर्तुर्वाक्यपरायामे रा-
ज्यनाशेनचव्यथा ॥ यस्याःकृतेभवेद्भर्ता दुःखप्रहतचेतनः ॥ नार्याःसुन्दरिपापायास्तस्याःप्रोक्ताशुभागतिः ॥ मज्जतेनरकेघोरे
प्रपारूयेजन्मसप्ततिः ॥ विमुखींयोनिमासाद्य तिष्ठतेवत्सरत्रयं ॥ भर्तुरर्थेहियावित्तं विद्यमानंनयच्छति ॥ जीवितंवावरारोहे सा- ॥ ४४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्ठायांभवेत्कृमिः ॥ कृमियोनिविमुक्तास्तु काष्ठीलाभवतेशुभे ॥ ममकौमारिभावेतु मेपितुःकाष्ठपाटकः ॥ अग्निःप्रज्वलनार्थाय जातुकाष्ठंन्यपातयत ॥ सखीभिःसहितातत्र रममाणाशुभानने ॥ गतोहंतत्रयत्रास्ते सवनीकाष्ठपाटकः ॥ काष्ठंपाटयतस्तस्य पार्श्वेतुस्थितवत्यहं ॥ तत्रतुसामयादृष्टा काष्ठीलाकाष्ठमध्यतः ॥ नवनीतनिभंदेहं मुखञ्चाञ्जनसंनिभं ॥ कनिष्ठिकांगुलीतुल्या स्थौल्यांमांसत्वचान्विता ॥ तांदृष्ट्वापतितांहन्तुं वेगाद्ध्वांक्षःसमागतः ॥ यावद्गृह्णातिवक्रेण काष्ठीलांक्षुधितःशुभे ॥ तावन्निवारितोध्वांक्षो मयालोष्टेणतत्क्षणात् ॥ साचतेनपरित्यक्ता वायसेनवरानने ॥ वक्रप्राप्तापिभीतेन वायसेनपलायता ॥ ततःसावेपमानाच चंचुस्पर्शसुदुःखिता ॥ मयाजलेनसंसिक्ता तत्क्षणाच्चेतनान्विता ॥ ततःसावेपमानाच मेवचोवरवर्णिनि ॥ उवाचमांवरारोहे व्यक्तंमधुरयागिरा ॥ काष्ठिलोवाच ॥ सन्ध्यावलियथापूर्वमहमासीन्निशामय ॥ आसीत्कौण्डिल्यइत्येवं ब्राह्मणःसर्वकर्मवित ॥ तस्याहंदुहिताभीरु सुप्रियाचारुलोचने ॥ न्यवसंकान्यकुब्जेतु सर्वैःकामैःप्रपूजिता ॥ जनन्यावन्धुवर्गस्य पितुरिष्टतमाभवत् ॥ ततोहंविप्रपुत्राय प्रदत्तालंकृतातदा ॥ कुलीनायसुरूपाय स्त्रीसंगरहितायच ॥ श्वशुरेणचमेदत्तं मणिमुक्ताफलंबहु ॥ अयुतञ्चसुवर्णञ्च पाणिसंग्रहणेतदा ॥ पितृश्वशुरवित्ताभ्यां परिपूर्णाभवंस्त्वहं ॥ गोमहिष्यादिसंयुक्ता धनरत्नसमन्विता ॥ इष्टादत्तात्वहन्देवि सुशीलस्यजनस्यच ॥ कालेनपञ्चतांप्राप्तः श्वशुरोवेदतत्त्ववित ॥ तंमृतंतुपतिंदृष्ट्वा श्वश्रूसामेपतिव्रता ॥ विवेशाग्नौतदादीप्ते भर्त्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहशुभव्रता ॥ भर्तामेसजलंदत्वा पित्रोःश्राद्धमथाकरोत् ॥ गतेमासद्वयेदेवि भर्तामेराजमन्दिरं ॥ ययौनिमित्तेकस्मिंश्चित् पि-
तृहीनोनिराश्रयः ॥ तत्रवेश्याःसुवर्णाख्या यौवनिन्यःशुभानना ॥ प्रविशन्त्योनृपगृहं दृष्टस्तेनाद्विजन्मना ॥ तासांमध्येसुरू-
पैका सुन्दरीसुस्तनीशुभा ॥ आनीतास्वगृहेतेन रत्यर्थमसितेक्षणा ॥ तयासदैवबुभुजे विषयान्विषयप्रियः ॥ तेनैवकर्मणासार्द्ध
वित्तंनीतंक्षयंशुभं ॥ वर्षत्रयेगतेवित्तं हारीतश्चदुरोदरे ॥ ततोमांप्रार्थयामास देहिमेभूषणंस्वकं ॥ दुरोदरेमयावित्तं हारितंचारुहा-
सिनि ॥ तन्मयातस्यवित्तंन दत्तंस्वस्वामिनेतदा ॥ सर्ववस्तुमयादाय यातार्हंपितृमन्दिरं ॥ ततोभर्तागृहंकुड्यं सप्तकक्षकमद्भुतं ॥
विक्रीयतच्चवेश्याया दत्तंकिंचिद्दुरोदरे ॥ क्षेत्रंधान्यादिसहितं सभाण्डंसपरिच्छदं ॥ स्वल्पमूल्येनदत्तातु गतोनदनदीपतिं ॥ आ-
रुह्यनावंतरसा प्रविष्टोलवणोदधिं ॥ सगतोदूरमध्वानं पश्यमानोद्भुतानिच ॥ समुद्रजातानिशुभे जीवचेष्टानितानिच ॥ प्रभञ्ज-
नवशात्तौतु तन्मार्गेणगताभृशं ॥ तदासप्तशतानीह योजनानांगताहिसा ॥ तत्राम्येपञ्चतांयाताः क्षुत्पिपासार्दितानराः॥ वि-
मुच्यवित्तंभाण्डानि निषादैःसहभाविनि ॥ तत्रैकोदैवयोगान्मे नमृतोह्यिपतिःशुभे ॥ वायुनानीयमानोसौ प्राक्कर्मवशगेनहि ॥
आससादचलंदेवि बहुशृंगविभूषितं ॥ बहुनिस्सरणोपेतं बहुधातुविभूषितं ॥ बहुवृक्षसमाकीर्णं बहुपुष्पफलान्वितं ॥ उल्लिखन्तं
हिशिखरैर्मध्यमंयद्धरेःपदं ॥ तंदृष्ट्वापर्वतंदिव्यं त्यक्त्वानावंसमेपतिः ॥ आरुरोहगिरिंश्रेष्ठं क्षुधार्तःशुभलोचने ॥ विश्रम्यचमुहूर्त्तंतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षुधापरिगतस्तदा ॥ उदतिष्ठतभक्षार्थं भूधरंतंव्यलोकयत् ॥ तत्रापश्यत्समृद्धीकां सपंकागौस्तनीमिव ॥ श्रवमाणारसंदिव्यं जरारोगविनाशनं ॥ अभक्षयत्तदाद्राक्षां षड्विंशद्दिनसंख्यया ॥ सोपीतशीतलंतोयं सुरसंनिर्मलंशुचि ॥ तत्पीत्वानिपुनच्छायां सोपश्यच्छाखिनांपरं ॥ शालंनीलघनप्रख्यं पञ्चाशत्पुरुषोच्छ्रयं ॥ तस्याधस्तात्ससुसुष्वाप उत्तरीयंप्रसार्यहि ॥ मेदिन्यांहेगगर्भाभोनिद्राघूर्णितलोचनः ॥ तावत्सुप्तःसुखेनासौ यावत्सूर्यास्तमोगतः ॥ सूर्यास्तमनसंप्राप्ते उन्मीलतिनिशामुखे ॥ तत्रागाद्राक्षसोघोरो गर्जमानोघनोयथा ॥ अंकेनादायतन्वंगीं सीतामिवदशाननः ॥ सुप्तांकाशीपतेःपुत्रीं नाम्नारत्नावलीशुभा ॥ शुभगेविपरीतन्तु शयनेवैशिरःकृतं ॥ पतिकामकुमारीसा नाविन्दत्दशद्दशंपतिं ॥ सर्वयोषिद्वरावाला रुदतीनिद्रयाहृता ॥ तस्याःकृतेतदादेवी चिन्ताकुष्टाह्यहर्निशं ॥ दीपच्छायासमाश्रित्य शयनात्सातदाकिल ॥ अटमानेनपापेन दृष्टासारक्षसाशुभा ॥ वज्रवैडूर्यखचिते धारयन्तीचकंकणे ॥ उभाभ्यांदशरत्नानि निष्केथदशसप्तच ॥ सीमन्तेसप्तरत्नानि केयूरेष्टौचसप्तच ॥ एवंरत्नान्वितांवालां शतह्रदसमप्रभां ॥ जहारराजभवनात तांतदाचारुहासिनीं ॥ वायुमार्गसमाश्रित्य क्षणात्प्राप्तःस्वमालयं ॥ तत्पर्वतेशयानस्तु पतिर्मेशालमाश्रितः ॥ तत्रतस्यगुहारम्या सर्वैस्वर्यसमन्विता ॥ पश्यमानःपतिंरक्षः प्रविवेशगुहांशुभां ॥ अनेकैर्मयविन्यासैः संयुक्तांचित्रमन्दिरं ॥ बहुद्रव्यसमोपेतं सज्जनासनसंभृतं ॥ भोजनपानपात्रैस्तु भक्ष्यभोज्यैरनेकधा ॥ चित्रितंबहुरत्नैश्च बहुवृक्षम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्वितं ॥ तस्यमध्येनदीपुण्या पद्मोत्पलविभूषिता ॥ हंसकारण्डवाकीर्णा चक्रवाकोपशोभिता ॥ वनानिचसुरम्याणि तत्रवैरा-
क्षसीशुभे ॥ आसीनातस्यदुष्टस्य भार्यापरमसंपदा ॥ एवंमनोरमांतान्तु समासाद्यसराक्षसः ॥ सप्रविश्यमुमोचाथ शय्यायांवरलो-
चना ॥ रुदतीभयसंयुक्ता पीनश्रोणिपयोधरा ॥ सातुतद्रुदितंश्रुत्वा आजगामत्वरान्विता ॥ तांदृष्ट्वाहेमगर्भाभां सुरूपांगजगा-
मिनीं ॥ पप्रच्छसाहिभर्तारं किमर्थमिहमाहृता ॥ जीवन्त्यांमयिदुष्प्राज्ञ प्रियमन्यांसमीहसे ॥ नहिभार्यातवेदानीं सपत्नीमित्वया-
कृता ॥ एवंब्रुवाणांतांसुभ्रू तदाकोपसमन्वितां ॥ उवाचराक्षसस्तत्र तांप्रियांचारुलोचने ॥ भक्षार्थमाहृतेयन्ते प्रसादंकुरुमेशुभे ॥
मयापिदैवैरुद्दिष्टो भक्ष्योद्वारिस्थितोद्विजः ॥ सालवृक्षसमाश्रित्य पश्यत्वमसितेक्षणे ॥ तमानयस्वयंगत्वा येनाहंभक्षयेशुभे ॥ रा-
क्षसस्यवचःश्रुत्वा साकुमारीतदाब्रवीत् ॥ मिथ्याराक्षसिभर्तांते वाक्यमीरितवानिदं ॥ गृहात्पितुःसमानीता भार्यार्थेपतिनातव ॥
जरयात्वांपतिर्ज्ञात्वा विरूपामक्षमांरतेः ॥ विक्रम्यरुदतीरात्रौ रत्यर्थमहमाहृता ॥ तस्यास्तद्वचनंश्रुत्वा राक्षसीक्रोधसंयुता ॥ हृ-
दयेनावधार्यार्थं तस्यारूपंविलोक्यच ॥ चिन्तयामासतन्वंगी राक्षसीसासुदुःखिता ॥ अवश्यंमूर्ध्निमेकीलं विधास्यतिहिराक्षसः ॥
एवंगतोमयातस्य कर्तव्यंवैरयातनं ॥ भास्मसीमन्तिनींकाचित् भवेद्धिभुवनत्रये ॥ याहिसापत्नकीलेन ताड्यमानेषुजीवति ॥
सर्वेषामेवदुःखानामेतद्दुःखमहत्तरं ॥ समतानद्विभार्यस्य कदाचिदिहवर्त्तते ॥ तस्यैष्टासुखिनीज्ञेया अनिष्टापरिभूयते ॥ एवंसा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहुशश्चिन्त्य भर्तारंवाक्यमब्रवीत् ॥ भक्षार्थंचेदिहानीता ममकान्तत्वयाधुना ॥ आनयिष्याम्यहंविप्रं हत्वाब्राह्मणमागतं ॥ शा-
लवृक्षेशयानंतु प्रयाणन्तुसुलक्षणं ॥ रूपंमनोहरंकृत्वा तदाषोडशवार्षिकं ॥ अब्रवीत्तत्प्रहृष्टासा वाक्यंरक्षःसुलोचना ॥ ततःसरा-
क्षसःप्राह गच्छगच्छेतिभाविनि ॥ शृंकणीस्फुरितात्यर्थं तस्यभक्षणकाम्यया ॥ सानिर्गत्यगुहायांस्तु अपश्यद्द्विजसत्तमं ॥ भर्ता-
रंमेवरारोहा स्वपतिंकर्तुमागता ॥ तांदृष्ट्वाराक्षसींदेवी भर्तामेभवदाकुलः ॥ अब्रवीत्प्रश्रयोपेता भर्तारंतत्रसंस्थितं ॥ राक्षस्युवाच ॥
कस्माद्देशात्समायातः किमर्थमिहतिष्ठसि ॥ पृच्छामित्वांसकामाहं राक्षसीकृच्छयातुरा ॥ निराकृतासुभर्त्राहं त्वांपतिंकर्तुमागता ॥
तच्छ्रुत्वावचनन्देवि भर्तामेभयसंयुतः ॥ रक्षोमानुषसंयोगः कथंराक्षसिसंभवेत् ॥ मानुषाहिस्मृताभक्षा राक्षसानांनसंशयः ॥ सा-
पतिंमेपुनःप्राह संमितंमधुराक्षरं ॥ असंभाव्यमपीहात्र संभवेद्द्विजसत्तम ॥ पुराणेश्रूयतेह्येतत् भविष्येभारतेप्रभो ॥ हिडिंबारा-
क्षसीभार्या भवित्रीखलुमारुतेः ॥ तस्याश्चापिमहावीर्यो भविष्यतिघटोत्कचः ॥ अवध्यःसर्वशत्रूणां शक्त्यामृत्युमवाप्स्यति ॥ या-
चेयंतिष्ठतेशक्तिर्वासवीशालसंस्थिता ॥ पुरन्दरात्समानीता मद्भर्त्रादस्युकर्मणा ॥ शक्रेगतेमर्त्यलोकं वैरोचनजिघांसया ॥ से-
यमेकमहत्वातु नगच्छन्तिपुरन्दरं ॥ यस्येयंक्षिप्यतेशक्तिः सोमरोपिविनश्यति ॥ सोयमारुह्यशालाग्रं शक्तिमादायपाणिना ॥
तवदास्यामिभद्रंते भर्तुर्निधनकांक्षया ॥ यदित्वमनयाशक्त्या नहन्तासिनिशाचरं ॥ तदात्वांसतुदुर्मेधा भक्षयिष्यत्यसंशयं ॥ त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षशत्रुरयंक्षुद्रो हनिष्यतिनसंशयः ॥ सपत्नीसमयेनापि कृत्वादुर्बुद्धिनातदा ॥ ममाद्यदुःखंसुमहत् कृतंतेनदुरात्मना ॥ व्यापा-
दितःपुनःसंगमावयोर्हिभविष्यति ॥ यद्यन्यथावदेयंचेत् त्वामहंद्विजसत्तम ॥ जन्मार्जितस्यपुण्यस्य नभवामिचभाविनी ॥ या-
गतिर्ब्रह्महत्यायां प्राप्यतेकुत्सितानरैः ॥ गच्छेयंतामहंब्रह्मन् यद्येतदनृतंवदे ॥ मद्यपानेहियत्पापं ब्राह्मणस्यदुरात्मनः ॥ विहितो-
वेदशास्त्रज्ञे तत्पापमहमाप्नुयां ॥ पुराणेयानिपुण्यानि प्रोक्तानिमुनिपुंगवैः ॥ अन्यथामन्यतेयेन तत्पापंममनिश्चितं ॥ गुरुदा-
रप्रसक्तस्य जंतोःपापंयदुच्यते ॥ तेनपापेनलिप्येयं यद्येहंदुष्टमाचरेत् ॥ वंधुन्यासापहरणे मेदिनीहरणेतथा ॥ आत्मनोहत्यया-
याहि विहितामुनिभिर्विभो ॥ गच्छेयंतांगतिंविप्र यद्येतदनृतंवदे ॥ पञ्चम्यांगोचरवरे यत्पापंविहितंस्त्रियां ॥ तरुच्छेदेनवम्यांतु
पर्वणिस्त्रीसमागमे ॥ तेनपापेनलिप्येयं यद्येतदनृतंवदे ॥ यदुच्छिष्टेघृतंदद्यादंगुल्याकर्षयोद्विजान् ॥ पुण्येह्निमैथुनंकर्त्तां तत्पा-
पंभवितामम ॥ चरंतीविधवायातु द्विकालंभोजनंविभो ॥ पात्रेकांस्यस्यसंज्ञेतु सतांबूलसतल्पगं ॥ वैश्वदेवमकुर्वाणो गृहस्थो-
भोजनंचरेत् ॥ निर्वायभिक्षांभिक्षुभ्यो ह्यसत्तर्प्यपितृन्नपि ॥ तेनपापेनालिप्येयं यद्येतदनृतंवदे ॥ तैलेनसंक्रमेस्नाति तीर्थंगोभि-
र्व्रजेत्तुयः ॥ पावकेप्युदमानेषु समुद्धृत्यमृदंनरः ॥ करोत्याप्लवनंयस्तु योन्यथावचनंवदेत् ॥ कुशकाशेशिकाभिस्तु क्रियतेचतत्र-
चंविना ॥ दंतकाष्ठंकरोत्येवं तस्ययद्विहितंत्वघं ॥ तस्याहंभागिनीब्रह्मन् यदिमिथ्यावदामिते ॥ संन्यस्यगांनिजगृहे अदत्वातृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णवारिच ॥ तस्ययद्विहितंपापं तन्मह्यंभवताध्रुवं ॥ देवार्चामासुरेकाष्ठे उपदेशंकरोतियः ॥ श्राद्धंवाद्विजशार्दूल तत्पापंभविता-
मम ॥ गोहीनांमाहिषींयस्तु गृहेधारयतेद्विजः ॥ तस्यपापेनलिप्येयं यद्येतदनृतंवदे ॥ छिन्नासंवीतवस्त्रेण देवार्चाचकरोतियः ॥
यंवृतोधौतदग्धेन पावकेनविशेषतः ॥ तेनपापेनलिप्येयं यद्येतदनृतंवदे ॥ स्वपचारामजातैस्तु कुसुमैरर्चयेत्सुरान् ॥ तेनपापेन
लिप्येयं यद्येतदनृतंवदे ॥ बधूविलोकनेपापं परदारविलोकने ॥ सस्पृहंपरदाराणां यत्पापमवलोकने ॥ तनपापेनलिप्येयं यद्ये-
तदनृतंवदे ॥ सत्कथायांप्रवृत्तायां विघ्नमाचरतांनृणां॥ तत्पापंतुभवेत्सद्यो यदेतदनृतंवदे ॥ विधवाकंचुकोपेता बधूटीकंचुकंवि-
ना ॥ उभयोःपातकंयच्च तन्मह्यंभविताध्रुवं ॥ हीनयालिंगवेषेण अलिंगीब्राह्मणस्तथा ॥ उभयोपातकंमह्यं यद्येतदनृतंवदे ॥
कूटसाक्षिषुयत्पापं यत्पापंहयविक्रये ॥ स्वजानिर्विक्रयेचैव तत्पापंभवितामम ॥ एवमादीनिपापानि अनुक्तान्यपियानिच ॥ तैं-
स्तैःपापैरहंलिप्ये यद्येतदनृतंवदे ॥ एवंसंबोधितंदेवि भर्त्तामेपापयातया ॥ तथेतिनिश्चयंचक्रे भावितार्थेनमोहितः ॥ निर्द्रव्यो
व्यसनंचैव भर्तामेचारुहासिनि ॥ मद्वाक्यकलुषींचैव राक्षसींवाक्यमब्रवीत् ॥ शीघ्रमानयतांशक्तिं करोमिवचनन्तव ॥ दातव्यं
मेत्वयासर्वं राक्षसापसदेहते ॥ द्रव्याशयाप्रविष्टोस्मि सागरंतिमिसंकुलं ॥ सैवमुक्तातदाभर्त्ता तथेत्युक्तावरानने ॥ तत्क्षणाद्राक्ष-
सीगृह्य शक्तिंवृक्षाग्रसंस्थितं ॥ ददौसागृह्यविप्राय विमुंचातिमहार्चिषं ॥ एतस्मिन्नंतरेरक्षस्तदाकामेनमोहितः ॥ भोक्तुकामःकु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मारींतां सामिताबाक्यमब्रवीत् ॥ कुमारीसेवनेरक्षो महत्पापंविधीयते ॥ छलेनाहंहृतासुप्ता त्वयाहंपितृमन्दिरात् ॥ नदोषोभवतो ह्यस्ति ममभाग्यमिहेदृशं ॥ गुहामध्यगतीरक्षः कोमेत्राताभवेदिह ॥ पूर्वदत्तोभवेद्भर्ता पूर्वदत्ताप्रियाभवेत् ॥ पूर्वदत्ताभवेद्विद्या- द्विजस्थानंक्रियागृहं ॥ शय्यायाश्चतथादानं वृथाभवतिनिर्ऋतः ॥ प्रतिकूलेविधौपुंसामाहवैनारदोमुनिः ॥ विधिनानीमयानस्तु जनःसर्वत्रगच्छति ॥ वृथाचेष्टाहिरक्षेन्द्र बन्ध्यायामैथुनंयथा ॥ अवश्यंभविताभर्त्ता त्वमेवरजनीचर ॥ विधानविहितेमार्गे किं- करिष्यंतिपण्डिताः ॥ तस्माद्दानपवित्रात्वं शालवृक्षाश्रितास्त्विह ॥ अयमग्निर्ज्वलन्नेतद्दर्भान्विप्रंसमानय ॥ विनादर्भैर्विनातो- यैर्विनावैपावकेनच ॥ ब्राह्मणस्यतुवाक्येन विवाहसफलोभवेत् ॥ नहतोयदिविप्रासौ भार्यायातवराक्षस ॥ निर्वृत्तेहोमकरणे तं रक्षययथासुखं ॥ एवमुक्तेतुवचने निर्ज्जगामसराक्षसः ॥ सत्वरोत्हृदयाविष्टो निर्ज्जगामगुहामुखात् ॥ चिन्तयामाससतदा नहि सत्यद्यमेप्रिया ॥ तंब्राह्मणंमहाभागं ततोमेवांछितंभवेत् ॥ एवंविलोक्यसहसा निर्ययौसमहाबलः ॥ तस्यानिर्गच्छतोदेवि स्वकं जातंक्षतंकिल ॥ सव्यंचप्रास्फुरंनेत्रं स्ववर्णस्खलितंतदा ॥ अनादृत्यतुतंसर्वं निर्ज्जगामत्वरान्वितः ॥ शालवृक्षसमीपस्थामपस्य- न्तनुमध्यमां ॥ बिभ्रतींमानुषंरूपं तांभार्यांसुमनोहरां ॥ घटयन्तीचसामर्थ्यं भर्तृभार्यानुगंतथा ॥ परित्यजेयंतंपापं राक्षसंक्रूरका- रिणं ॥ मानुषीप्रमदाशक्तं मच्छरीरविदूषकं ॥ तच्छ्रुत्वादारुणंवाक्यं भार्ययासमुदाहृतं ॥ कोपामर्षविवृत्ताक्षस्तामधावतराक्षसः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसार्यवक्रंसमुदीर्यबाहुं हन्तुंतथातांसुमहाबलोसौ ॥ समभ्यधावत्पवनोयथैव समुच्चरद्वाक्यमनर्थयुक्तं ॥ १४० ॥ इतिश्री लघु-
नारदीय पुराणे रुक्मांगदचरिते काष्ठीलोपाख्यानमेकोनत्रिंशोऽध्यायः ॥ २९ ॥ ७ ७ ७ ७ ७ ७
काष्ठीलोवाच ॥ राक्षसंधावमानन्तु कालान्तकयमोपमं ॥ राक्षसीप्राहभर्तारं साक्षुधाभयकंपिता ॥ क्षिपस्वह्यनलप्रख्यां शक्ति-
वासववल्लभां ॥ येनायंपञ्चतांयाति दिगंवररिपुःप्रिय ॥ तस्यावाक्यात्पतिर्मह्यं पौरुषेस्वेऽव्यवस्थितः ॥ विमोचविपुलांशक्तिं रक्षो-
वक्षःस्थलंप्रति ॥ ज्वलन्तीज्वलनप्रख्या द्योतयन्तीदिशोदश ॥ शक्त्यानिहत्यभर्तारं द्विजहस्तप्रमुक्तया ॥ कृतकृत्यमिवात्मानं
मेनेसारजनीचरी ॥ अथोवाचद्विजवरं भर्तारंहृष्टयागिरा ॥ एहिकान्तगृहांरम्यां प्रविशस्वयदृच्छया ॥ भुंक्ष्वभोगान्मयासार्द्धं
येदेवायेचमानुषाः ॥ तथेतिकुर्वन्पुरुषः प्राहहृष्टवपुस्तदा ॥ गृहीत्वासाकरेकान्तं प्रविष्टाथगुहांशुभां ॥ अनवेक्षैवतद्भस्म भर्तृ-
देहसमुद्भवं ॥ कुचाभ्यांसापतिंदेवि सोन्नताभ्यामपीडयत् ॥ दर्शयामासतांतन्वीं कुमारींशयनेस्थितां ॥ इमांपश्याशितापांगीं
विंबोष्ठींकाञ्चनप्रभां ॥ विवाहार्थंसमानीतां वाराणस्याःद्विजोत्तम ॥ यस्याःसीमांनलंघंति सर्वपापान्यदोषतः ॥ दूषरंयत्परंबा-
हुः पुण्यपापक्षयंकरं ॥ यद्गृहंत्रिपुरारेस्तु पञ्चगव्यूतिसंख्यया ॥ शिवस्यविष्णोर्धातुश्च भास्करस्यतथैवच ॥ तस्मिन्मृताःपुन-
र्मातुर्जठरंनव्रजन्तिवै ॥ अप्रकाशंचमुनयो हर्म्यमार्गंहरस्ययत् ॥ अक्षीणकर्मबन्धास्तु यस्यांसिध्यन्तिमानवाः ॥ तत्रस्थयंवरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोहा सुभगाचारुहासिनी ॥ कामिनीरक्षसातेन इहानीताद्विजोत्तम ॥ एनांत्वमद्यस्वगृहं पित्र्यंनयसुलोचन ॥ इमानितवरत्ना-
नि शयनान्यासनानिच ॥ तथाचाहंतवाधीना कुरुनाथयदिच्छसि ॥ त्वदर्थंराक्षसोघोरो मयाब्रह्मन्निसूदितः ॥ कुमारिकाकृते-
भर्त्ता योमयाब्राह्मणर्षभ ॥ समयानिहतोविप्र दृष्ट्वारूपंतवोत्तमं ॥ तस्मान्ममोपरिविभो कुरुविश्वासमात्मना ॥ भजत्वंमांविशाला-
क्ष भक्षादीनांनसंशयः ॥ श्रुत्वैतद्वचनंभीरु भर्त्तामेचारुलोचने ॥ राक्षस्याःसान्त्वसंयुक्तं कुमारीसन्निधौतदा ॥ उवाचराक्षसींत-
त्र साशंकंसतदावचः ॥ नीतिशास्त्रेषुसुभगे अविश्वासास्तुयोषितः ॥ स्वकंत्वयापतिंहिंसि साकथंमांनहिंससि ॥ मत्तोरूपाधि-
कंदृष्ट्वा मांचाप्येवंनिपातयेत ॥ सोहंसर्वान्महाभीरु विश्वस्तस्तेनसंशयः ॥ यदिष्टंतवसुश्रोणि तंकुरुष्वममाद्यवै ॥ अद्यवाश्वःप-
रश्वोवा भक्षयस्वनिसाचरि ॥ तवाधीनोस्मिसुभगे कुरुयत्तवरोचते ॥ एतदेवमयाकार्यं न्यायंचोपकृतेत्वया ॥ आत्मानंसर्वथा-
देयं नान्यथाहिकृतंभवेत ॥ मदर्थेनिहतोभर्त्ता त्वयानिःशंकयायतः ॥ ततोहंनान्तरंदद्मि तवभीरुशुभानने ॥ राक्षस्युवाच ॥ वि-
श्वस्तहननेब्रह्मन् ब्रह्महत्यागतिर्भवेत ॥ यद्यप्येवंराक्षसींमां क्रूरांपतिविघातिनीं ॥ मन्यसेनहितत्कर्म विश्वस्तंकाचघातयेत ॥ द-
ग्धाहंपतिनाविप्र इमामाहरतापुरा ॥ भार्यार्थंपापिनाब्रह्मन् तेनव्यापादितोमया ॥ विश्वस्तोसियतस्त्वंहि ममसर्वेणचेतसा ॥
ततस्त्वंगोपयिष्येहं सर्वभावेनकामुक ॥ एषतेसमयःसत्यं पञ्चभूतापसाक्षिकः ॥ हृत्पद्मपुरुषस्येह सन्निधौव्याहृतंमया ॥ नकुरु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्वद्विजश्रेष्ठ अन्यदासविदंक्वचित् ॥ स्थैर्यंकार्यंहिमद्वाक्ये सर्वकृत्येषुमानद ॥ तच्छ्रुत्वावचनंदेवी राक्षसीपरिभाषितं ॥ प्रति-
वाक्येवचःसर्वं यदुक्तंहितयातदा ॥ ततःसाराक्षसीसर्वं संहृत्यचगृहाधनं ॥ करेणुरूपिणीभूत्वा पृष्ठेकृत्वापतिंमम ॥ तयासहवि-
शालाक्ष्या याहृताशिवमन्दिरात् ॥ काशीशतनयालोके प्रख्यातारत्नग्रन्थिका ॥ सुखयानाहियाभूत्वा उवाहपतिमंजसा ॥ तृती-
येनमुहुर्त्तेन संप्राप्ताशंकरालयं ॥ उवाचतांपुरींप्राप्य भर्त्तारमसितेक्षणा ॥ इयंपापमतांकान्त कुठारीसंप्रकीर्त्तिता ॥ तथेयंभव-
गेहस्य चित्रभानुःप्रकीर्तितः ॥ साभूमिःकाञ्चनस्यैषा कान्तश्रासद्रुगोदरं ॥ कर्मवीजोपराज्येषा सर्वेषांसुखदायिनी ॥ आद्यंहिवै-
ष्णवांस्थनं पुराणेपरिपठ्यते ॥ नावैष्णवेभवेन्मुक्तिः सर्वेणाप्युषितेपिच ॥ हत्याविमुक्तोदेवेशो यदासित्रिपुरान्तकः ॥ क्षत्रप्रवि-
ष्टमात्रोपि वैष्णवेपापनाशने ॥ तदाहरेणदेवेशः प्रार्थितोदैत्यसूदनः ॥ सीमायांतिष्ठतोदेव वहिर्हत्यास्थितामम ॥ वस्तुमि-
च्छाम्यहंक्षेत्रे तवचक्रगदाधर ॥ सत्वयामेजगन्नाथ देहिक्षेत्रेसदैवमे ॥ ममनिर्गमनेहत्या पुनरेवप्रवर्त्तते ॥ त्वत्क्षेत्रपावितोह्यद्य
पूजांयास्येजगत्त्रये ॥ तथेतिप्रददौदेवः क्षीरसागरजाप्रियः ॥ ततःप्रभृतिविप्रेन्द्र क्षेत्रंशैवञ्जिगद्यते ॥ आद्यंहिकेशवक्षेत्रं पुराणे-
कवयोविदुः ॥ तत्रधर्मादयोदेवाः पश्यन्तेतांविहायसा ॥ सूर्यायुतसमप्रख्यां दिगंबरनिषेविताम् ॥ विघ्नानिशूलिनाकान्त हृता-
न्यन्यानिषेवने ॥ यैर्विघ्नैरावृतामर्त्या यान्तिवैमन्दिरंस्वकं ॥ बहुपुण्यभृतःसन्ति वसन्त्यस्यांद्विजोत्तम ॥ तत्राशितैर्नरैःकान्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितिःकार्यापुरोत्तमे ॥ नात्रस्नानंप्रशंसन्ति नमौनंनसुरार्चनं ॥ नापिमानंद्विजश्रेष्ठ प्राणत्यागसृतेविभो ॥ मृत्युंप्राप्यतुकाश्यांवै
कृतकृत्योभवेन्नरः ॥ अविधेयेतुमनसि उपायोकोषमुक्तये ॥ सेयंपुरीमयाप्राप्ता वहुप्राकारतोरणा ॥ भोगिनामपिमोक्षाय किंपुन-
र्व्रतचारिणां ॥ सेयंपुरीपापहरा नाम्नावाराणसीविभो ॥ रत्नावल्याःपिताविप्र काशिराजःप्रतापवान् ॥ अधिपोत्रमहावाहुर्धर्मज्ञः
प्रियदर्शनः ॥ समर्पयेमांत्वंवालां काशीशस्यमहात्मनः ॥ विपोधिताह्रियापूर्वं तेनदुष्टेनरक्षशा ॥ आत्मनःसुरतार्थाय कुमारीनि-
द्रयाहृता ॥ एषप्रभावोभिहितः शिवक्षेत्रस्यसत्तम ॥ नवधूतीहकर्माणि योवसेदत्रमानवः ॥ शुभाशुभप्रभूतानि ज्ञानतोज्ञानतो
पिवा ॥ एषापुरीकर्मविनाशनाय कृष्णेनसर्वेणविनिर्मिताभूत् ॥ यस्यांमृतावन्धुवहिःकृतावा नतेपुनर्यान्तिभवंसपापा ॥ ५७ ॥
इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते काष्ठीलोपाख्याने काशीमाहात्म्यंनाम त्रिंशोध्यायः ॥ ३० ॥ ७ ७ ७
काष्ठीलोवाच ॥ भर्त्तामेतद्वचःश्रूत्वा राक्षस्याधर्मसंहितं ॥ अवतीर्यतयासार्द्धं रत्नावल्याशुभानने ॥ अवतीर्णेचमेकान्ते वभूव
प्रमदावधूः ॥ क्षपाचरीसुरूपातु पीनोन्नतपयोधरा ॥ साकुमारीपुनर्दृष्ट्वा स्वपितुस्तत्पुरंशुभं ॥ वभूवानन्दितातत्र रात्रौप्राप्ताशु-
भान्विता ॥ अथाजग्मूनिशीथेतु रक्षपालामहावलाः ॥ प्रस्खलंतोथधावंतो वन्धतश्चतथापरे ॥ कोलाहलंप्रकुर्वंतो भर्त्तारंप्रतिमे
नघे ॥ तांदृष्ट्वासहसाप्राप्ता कुमारीसाशुभानना ॥ काशिराजस्यदुहिता संप्राप्तामत्तगामिनि ॥ रात्रीचरानुवाचेदं अहंनृपसुते- ॥ ९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिच ॥ निचयैस्तंवृतंशूरैर्दृष्ट्वामुख्यमुवाचसा ॥ ब्रूहितंसत्वरंगत्वा पितरंमेजनाधिपं ॥ रत्नावलीतवसुता याहृतांतत्पुरात्पुरा ॥ र-
क्षसादुष्टभावेन संप्राप्तासाद्विजानृप ॥ अदूषिताजीवमाना समाश्वासिहिमाशुच ॥ संमुखंयाहितस्यास्त्वं मानसंवर्द्धनंकुरु ॥ ब्रा-
ह्मणस्यमहाभाग अर्घपात्रपुरस्कृतः ॥ देवानतकृतौमूर्द्ध्नि चरणौशत्रुभिर्नृप ॥ नावलीदंहविर्ध्वांक्षै शाशनेननगतास्रजः ॥ स्वाभि-
र्न्निपीतंनृपतेः पञ्चगव्यंतवेप्सितं ॥ अविप्लुतांहिसंप्राप्ता गंगांभइवनिर्मलां ॥ तवप्रसादाद्राजेन्द्र जनन्याःशुद्धिकारिणी ॥ त-
त्क्षणात्सवचःश्रूत्वा रक्षपालस्त्वरान्वितः ॥ सुवाहुरितिविख्यातः प्रविवेशनृपक्षयं ॥ सर्वतःश्रावयामास बाक्यंवाक्यविशारदः ॥
तदद्भुतमंश्रूत्वा निशापालस्यभाषितं ॥ सामात्यसकलत्रश्च सपुरोधाययोनृप; ॥ सतुगत्वापुरद्वारं गंगातीरेव्यवस्थितां ॥ अप
श्यत्सद्दुहितरं द्विजवर्यसमीपतः ॥ सहजेनैववेषेण भूषितांभूषणप्रियां ॥ अम्लान्कुसुमितान्देवीं तप्तकाञ्चनसुप्रभां ॥ रोरूयमा-
नापितरं साचैवपरिषस्वजे ॥ चिरंरुदित्वापितरं ववन्देचरणौपितुः ॥ शिरसाचारुसर्वांगी द्विरेफसदृशेनहि ॥ कामायुधनिगू-
ढेन मृदुनाकनकप्रभे ॥ सानमस्कृत्यपितरं इदंवचनमब्रवीत् ॥ सुप्ताहंमन्दिरेतात सखीभिःपरिवारिता ॥ कृत्वाप्रान्तेशिरस्तात
अधौतचरणातथा ॥ गच्छवंतीनृपंयोगं निजार्थेरक्षसाहृता ॥नीताश्वमालव्यंतेन स्वक्षमाधरमध्यगं ॥ मामुद्वहतुमिच्छावै चक्रेहृ-
दयपीडितः ॥ नह्रिमांप्राप्तवान्राजन्शूद्रावेदश्रुतीमिव ॥ तस्याभार्यात्वियंसुश्रूर्यातिष्ठातितवाग्रतः ॥ विभ्रुतीमानुषंरूपं राक्षसीरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षसाप्रिया ॥ अनयाबुद्धियोगेन घातितोसौमहाबलः ॥ शक्त्याकुलिशहस्तस्य रौद्रयानृपपुंगव ॥ तत्रैवब्राह्मणःपूर्वं समायातो भवान्किल ॥ शालवृक्षसमाश्रित्य स्वपन्तस्थौमहामतिः ॥ इयंचनिकृतातेन दुष्टभावेनरक्षसा ॥ सापत्न्यकोतुनिर्विण्णा प्रेषिता- तेनचांतिकं ॥ ब्राह्मणानयनेभूप ततोपश्यतवैद्विजं ॥ रूपयौवनसंपन्नमभवद्वृक्षयान्विता ॥ पतिमेनंद्विजंकृत्वा स्वपतिंचनि- हत्यवै ॥ भूत्वाकरेणूराजेन्द्र कृत्वामांपृष्ठतःशुभा ॥ सरन्नासद्विजाप्राप्ता तवभूपालवैपुरीं ॥ अनयारक्षितातस्माद्राक्षस्याराक्षसा- धमात् ॥ ताभिमांपूजयस्वेह सत्कारेणमहीपते ॥ ब्राह्मणंचमहाभागं सत्कुरुस्वममाग्रवे ॥ अस्यामतेनमान्देहि विप्रायास्मैम- हामते ॥ एषमेसम्मतोभर्त्ता भविष्यतिनसंशयः ॥ तथाचश्रूयतेलोके पुराणेसुमहामते ॥ नान्यस्यविहितंरूप नान्योभोक्तुमि- हार्हसि ॥ यद्यस्यविहितंलोके तस्यचोपनयेत्सदा ॥ साभिलापेतनाचित्तमेतंप्रतिजनाधिप ॥ धर्मतस्तुपतिर्ग्राह्यो भवेद्वैराजस- त्तम ॥ नान्यंकरोमिभर्त्तारं शास्त्रागमनिदर्शनात् ॥ इमांप्रसादयित्वात्वां खद्योतकक्षयकारिणीं ॥ देहिमांनृपतिश्रेष्ठ ब्राह्मणायम- हात्मने ॥ सुरूपोयंगुणाशायमुत्पन्नश्चमहाकुले ॥ तस्माद्विशंकांकुरुमां राजेन्द्रसुमहामते ॥ तद्वाक्यंनृपतिःश्रुत्वा दुहितुर्द्धर्मवि- त्तदा ॥ राक्षसीपूजयामास अक्षयावनतस्तदा ॥ एषासुतामसुभगा त्वामेवशरणंगता ॥ यदर्थेनिहतःशत्रु स्त्वयापूर्वतरःकिल ॥ कामवाणार्त्तयाभीरु कृतमेतद्विगर्हितम् ॥ सेयमिच्छतिभर्त्तारं योयंविप्रस्त्वयाततः ॥ शरणंतेप्रपन्नास्मि त्राहिमांत्वांवरानने ॥ म- ॥ ९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याप्रणाममवाभ्यां सत्कृतासिनिशाचरि ॥ अनुवेदयभर्त्तारं भूसुरंशुभरूपिणं ॥ त्वद्वाक्याद्भवतिप्रेरुया सुतामेब्राह्मणस्यहि ॥
सापत्न्यभावंत्यक्त्वात्वं मत्सुतांपरिपालय ॥ ममचैवसुतायाश्च देशस्यस्वजनस्यच ॥ ईश्वरीत्वंमहाभागे कुरुवाक्यंममानघे ॥ त-
ववाक्येस्थिताह्येषा स्थास्यतेतनयामम ॥ एतच्छ्रुत्वातुवचनं काशीशस्यनिशाचरी ॥ अनुजज्ञेतदाविप्रं नृपंसद्भावसंयुतं ॥ य-
स्मात्त्वंप्रणतोराजन् सद्भावेनगतत्रये ॥ तस्मादेषासुताभार्या भवत्वस्यद्विजन्मनः ॥ अहंचभवतापूज्या कृत्वार्चादेवमन्दिरं ॥ स-
र्वेणनगरेणाहं पूजनीयामहीपते ॥ सर्वदेहेनचतथा गवाख्याप्यातथानघ ॥ सप्ताहमुत्सवंकार्यमष्टम्यादौचतुर्दशी ॥ नटनर्त्तक-
संयुक्तो गीतवाद्यसमन्वितः ॥ मैरेयमांससहितो बलिपूजामुपस्करः ॥ एवंप्रकुर्वतस्तुभ्यं सर्वक्षेमंभविष्यति ॥ तथेतिनृपतिःप्रा-
ह सुताहेतोर्वरानने ॥ प्रतिपन्नेतुवचने राक्षसीहृष्टमानसा ॥ तदाहब्राह्मणंप्रेम्णा इमामुद्वाहयप्रभो ॥ राजपुत्रींद्विजश्रेष्ठ गृह्यो-
क्तविधिनाशुभां ॥ त्यक्तेर्ष्याहंद्विजश्रेष्ठ स्वसेयंमेवरानने ॥ राक्षस्यावचनेनासौ तांतदानृपकन्यकां ॥ उद्वाहयामासतदा भर्त्ता
मेसमलंकृतां ॥ गार्ह्येणविधिनासुभ्रु बहुवित्तसमन्वितां ॥ उद्वाहयित्वाकन्यांतु नृपेशतनयातदा ॥ आजगामाथविप्रेन्द्रः स्वपुरं
स्वमहोदरं ॥ वेगेनासाबूह्यमानो राक्षस्यावायुवेगया ॥ सरत्ननिचयोपेतः क्षणेनवरवर्णिनि ॥ गतेपुरंस्वकंविप्रे काशिराजःप्र-
तापवान् ॥ प्रस्थापयामाससुतां परिवारेणसंयुतां ॥ दासीदासैश्चयानैश्च गोमहिष्यादिभिस्तथा ॥ वसनाभूषणैश्चैव समेतांचा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुहासिनीं ॥ तामागतांनिरीक्षैव सुमुदेब्राह्मणर्षभः ॥ रेमेसचतयापत्न्या राजपुत्र्यासुरूपया ॥ राक्षस्यावयसासार्द्धं सुकृतीनं-
दनेयथा ॥ ततोमयाश्रुतादेवि भर्त्तावैभूतिराहृता ॥ धनेशस्याक्षयाद्देवी द्रव्यसंपत्तथैवसा ॥ तमागतमहंश्रुत्वा भार्याद्वयसम-
न्वितं ॥ दुःखेनमहताविष्टा चिन्तयामिसुचेष्टितं ॥ ततोहंबन्धुवर्गेण सखीवर्गेणनिन्दिता ॥ रूक्षैर्वाक्यैःसुबहुशो मर्मच्छेदकरै-
स्तथा ॥ कथंद्रक्षसिभर्त्तारं धनलुब्धेश्रियान्वितं ॥ यत्वयाभर्त्सितःपूर्वंयाचान्वित्तंसुदीनवत ॥ अवज्ञायचयद्दुष्ट परित्यज्यइहा-
गता ॥ चञ्चलानीहवित्तानि पैतृकानीहयोषितां ॥ कांतेनोपार्जितानीह स्थिराण्येवभवंतिहि ॥ कथंयास्यसिदुर्बुद्धे पुनस्तद्भर्तृ
मंदिरं ॥ कथंवदेथाःकठिते वचनात्प्रमदारितं ॥ भविष्यतिकथंकीदृक् तस्यसंभाषणात्तव ॥ अङ्गश्लेषंकथंभीरु करिष्यासिवदस्व-
नः ॥ रुक्षवाक्यकुठारैस्तु घातितस्यमहात्मनः ॥ प्रवेशोहिगृहेतस्य दुष्करंप्रतिभातिनः ॥ नभर्त्रासहसंवास स्तवभीरुकदाचन ॥
भविष्यतिदुराचारे सुखदंचकदाचन ॥ दाक्षिण्याल्लोकवादाच्च यदिहित्वांनयिष्यति ॥ स्नेहेनरहितःकान्तस्तथाप्यसुखसेवते ॥
निस्नेहसंगमोलोके पशुनामिवकिंसुखं ॥ नहीदृशंदुःखतरं यादृशंदूनचित्तयोः ॥ दंपत्याःसंगमंबाले विलम्बकरणंमहत् ॥ एवं
बहुविधावाचः शृण्वतीस्वजनेरिता ॥ अधोमुखीचपूर्णाक्षी पृथिवीमवलोकयन् ॥ चिंतयालंकृतितदा सर्वलोपेननश्यति ॥ नद-
त्तंवलयंत्वेकं येनतुष्टिर्व्रजेत्पतिः ॥ नचापिनूपुरंदत्तं नचापिकटिसूत्रकं ॥ वसुमत्यामयातस्य नदत्तैकावराटिका ॥ धनजीवित ॥ ९२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योऽस्वामी भर्त्तालोकेषुगीयते ॥ अपह्नवंहितत्कृत्वा कामेवस्थाभविष्यति ॥ कथंयास्यामितद्वेश्म किंवदिष्यामितस्यहि ॥ यो-
मयाहिपुरात्यक्तः शिरोभ्रलोष्टकोयथा ॥ एवंहिचिंतयेयावद्धृदयेनवरानने ॥ संवृतावन्धुवर्गेण तावद्दोलासमागता ॥ छादितार-
क्तवस्त्रैश्चाप्युपपन्नासुकोमलैः ॥ पीवरैपुरुषैश्चापि भज्यमानात्वरानने ॥ वेत्रजर्ज्जरहस्तैश्च वृद्धैःपुंभिःसमावृता ॥ छत्रेणशशिवर्णेन
धृयमाणेनभासुरा ॥ अथागत्यमहाभागे भर्त्रामेप्रेषितस्तदा ॥ तसंप्राप्यतदासर्वे पुरुषावाक्यकोविदाः ॥ ऊचुःसंहृष्टमनसो दि-
ष्ट्यादिष्ट्येतिचासकृत् ॥ सवित्तःसकलत्रश्च भर्त्ताप्राप्तस्तवानघे ॥ गिरिपृष्ठालयात्सुभ्रु धनमानीतवान्बहु ॥ प्रविष्टस्वगृहंभद्रे प्रे-
षितावयमत्राहि ॥ त्वामानेतुंवरारोहे संस्थितापितृवेश्मनि ॥ भोजनंत्वमकृत्वावै भर्त्तारंपश्यभाविनि ॥ त्वामेवस्मरतेनित्यं का-
न्तस्तेचारुहासिनि ॥ तेषांतद्वचनंश्रुत्वा भर्तुश्चापिकृतज्ञतां ॥ व्रीडिताहंतदादेवि भर्तुःसंवीक्ष्यचेष्टितं ॥ नोत्तरंदत्तवत्यस्मि किंचि-
न्मौनसमन्विता ॥ ततोहंवन्धुवर्गेण भूयोभूयःप्रबोधिता ॥ आहूतायातुवैभर्त्त्रा स्त्रीनयातित्वरान्विता ॥ साध्वांक्षीजायतेपुत्रि
दशजन्मानिपञ्चच ॥ एवमुक्त्वातुमांसुभ्रु वन्धुवर्गस्त्वरान्वितः ॥ दोलामारोपयमास गम्यतामविलंविताः ॥ ततोहिवन्धुवाक्येन
तांदोलांमन्दगामिनि ॥ आरुह्यगमनंतत्र यत्रातिष्ठतिमेपतिः ॥ अवतीर्यगृहंयावत् प्रविशामिशुचिस्मिते ॥ अपश्यंहिगृहंतस्य
सर्वतःकाञ्चनावृतं ॥ आशनंशयनंभाण्डं यत्किंचिद्वेश्ममध्यतः ॥ तत्सर्वंकाञ्चनीभूतं सूर्यतेजोपमंहितं ॥ ततःसाराक्षसीदेवि सा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चापिनृपनन्दिनी ॥ प्रणम्यमांस्थितादेवि उभेभक्तिसमन्विते ॥ ततस्ताभ्यामहंप्रेम्णा यथाहमभिपूजिता ॥ स्नानासुभक्तमुदि-
ता भर्त्रास्नेहेनवीक्षिता ॥ ततोऽस्तसमयेभर्त्ता समाहूयेदमब्रवीत ॥ गाढमालिंग्यसस्नेहात पर्यंकेसंन्यवेशयत् ॥ प्रवेश्यमांनतोभीरु
भर्त्तामेशुभदर्शनः ॥ विभावरीचर्गप्राहतांचराजेन्द्रनान्दिनीं ॥ पादसंवाहनंत्वस्याःकर्त्तव्यंसर्वदैवहि ॥ मयेष्टेयंसुचार्वंगीज्येष्ठाभार्या
सुशोभना ॥ मुहूर्त्तंवचनात्ताभ्यां गृहीतौचरणौमम ॥ ततःप्रेष्यान्समाहूय भर्त्तामेचारुलोचने ॥ अब्रवीत्सतदाहृष्टः सर्वमानीयतां
धनं ॥ यत्किञ्चितपृथिवीलब्धं मयाप्रासंमहद्धनं ॥ नृपेणापिचयद्दत्तं विवाहेममकिंकराः ॥ आनीयतांचतत्सर्वं शीघ्रमेवमहावलाः ॥
इयंहिस्वामिनीप्राप्ता वित्तस्यममचैवहि ॥ तद्वाक्यात्सत्वरंप्रेष्यैः समानीतंधनंशुभे ॥ तत्सर्वंतेनमेदेवि प्रदत्तंहिसुलोचने ॥ रत्नैर्व-
स्त्रैश्चमांपूज्य शान्तयित्वापुनःपुनः ॥ उभाभ्यांसतदासुभ्रु समक्षंपरिषस्वजे ॥ तदद्भुततमंदृष्ट्वा सन्मानंचारुहासिनि ॥ वस्त्रालं-
कारदानंच व्याकुलाहंतदाभवत् ॥ तेनातिमानेनमम गताःप्राणावरानने ॥ भर्त्राचालिंगिताभद्रे मधुरंजल्पतातदा ॥ उल्लापितो
वहुविधं हृदयेन्यस्यमच्छिरः ॥ मृताहंचपलापांगि यमस्यसदनंगता ॥ ततोऽहंयमनिर्द्दिष्टां प्राप्तानरकयातनां ॥ तामतीत्यसु-
दुःखार्त्ता काष्ठीलात्वंभवाशुभे ॥ यास्याभिपुनरेवाहं तिर्यग्योनिंसहस्रशः ॥ इमाभवस्थामद्यापि ययामेनावमन्यते ॥ नारीयाति ॥ ६३ ॥
महाभागे सत्यमेतत्तवोदितं ॥ याभर्तुर्गोपयेद्वित्तं जीवितंवाशुभानने ॥ एवंज्ञात्वाकथंरक्षेत् धनंजीवितमेवच ॥ नानाप्रकाराभ्नर-

CC-0. In Public Domain. Digitization by eGangotri

कान्सुघोरान् प्रयातिनारीसुभगेसुरूपो ॥ यारक्षतेवित्तमथात्मजीवितं भर्तुर्महापापतरान्नृणांसा ॥ १०७ ॥ इतिश्री लघुनारदीय पुराणे रुक्माङ्गदचरिते काष्ठीलोपाख्याने एकत्रिंशोध्यायः ॥ ३१ ॥ ६ ६ ६ ६ ६ ६ ६ ६

सन्ध्यावल्युवाच ॥ जातोमेविस्मयोत्यर्थं काष्ठीलेवचनात्तव ॥ कथंदृष्टामयाभद्रे यास्यसेकुत्सितांगतिम् ॥ कर्मणाकेनमुक्तिस्ते काष्ठीलेवदमाचिरम् ॥ दयामेवर्ततेत्यर्थं त्वांदृष्ट्वादुःखितामिह ॥ मांसपिण्डोपमामद्य नवनीतनिभांतथा ॥ काष्ठीलोवाच ॥ दानंपृथिव्यायदिमे परिकल्पयसेशुभे ॥ तथापिनहिमेशुद्धिर्विनाविष्णोस्तुवासरात् ॥ संप्राप्तेमाघमासेतु तपस्विजनवल्लभे ॥ यस्मिन्क्रोशन्तिपापानि यावद्गच्छतिभास्करे ॥ पुरातिसर्वपापानि त्रिविधानिनसंशयः ॥ ब्रह्महत्यादिकानस्युर्माघस्नानव्रतादिह ॥ दुर्लभोमाघमासस्तु बहुपुण्यप्रदस्तथा ॥ देवैस्तेजःपरिक्षिप्तं माघमासेजलेसदा ॥ अतःपवित्रंतद्धाग्निश्चशेषाघौघनाशनं ॥ नेदृशी शंकरेमुक्तिर्गतिःप्राप्तासुखावहा ॥ यादृशीमाघमासेच प्राप्यतेनियमस्थितैः ॥ सरिन्निर्झरतोयेषु शस्तंस्नानंसुलोचने ॥ वापीकूप तडागेषु मध्यमंसमुदाहृतं ॥ गृहस्नानंमाघमासे कार्यंश्रेयोर्थिनाशुभे ॥ प्रातस्नानंसुशीतेन शस्तंकल्मषनाशनं ॥ नसौख्याद्भवतेपुण्यं पुण्यंक्लेशात्प्रवर्त्तते ॥ नवह्निसेवयेत्प्रातः श्रेयोर्थीवरवर्णिनि ॥ मोहार्थमेवयेद्वह्निं नसुखार्थंकदाचन ॥ यावत्प्रभावरागेहे तावत्सूर्योदयःस्मृतः ॥ अभ्रेणाच्छादितःसूर्यः कदाचिन्नहिदृश्यते ॥ नभेवन्नोदितोदेवि एवंप्रातर्विधीयते ॥ सक्तितामप्यभावेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवकुंभस्थितंजलं ॥ वायुनाताडितोरात्रौ गङ्गास्नानसमंविदुः ॥ माघस्नानेवरारोहे दुर्गतिर्नैहविद्यते ॥ माघस्नानंवरारोहे शस्तंवै
निम्नगाजलं ॥ वायुनाताडितंरात्रौ यत्नस्नानाद्विशोधयेत् ॥ अग्निप्रवेशादधिकं माघेस्नानंवरानने ॥ स्नातानांक्लेशमात्रंतु मृता-
नामक्षयंसुखं ॥ एतस्मात्कारणात्सुभ्रु माघस्नानंविशिष्यते ॥ अहन्यहनिदातव्यास्तिलाःशर्करयासह ॥ पावकेचैवहोतव्यास्ति-
लाःसर्पिसमन्विताः ॥ माघावसानेसुभगे यत्रसंभोजयेद्द्विजान् ॥ भोजयेच्चपलापांगि व्रतस्यपरिपूर्त्तये ॥ स्वयंमेप्रीयतांदेवो
विष्णुमूर्त्तिर्निरञ्जनः ॥ दंपत्योर्वाससीशुक्के सप्तधान्यमथापिवा ॥ त्रिंशच्चमोदकादेया कृतास्तिलमयाःशुभे ॥ भागमेकंशर्कराया-
स्तिलभागत्रयंतथा ॥ नागरंवेत्रचैलञ्च प्रक्षिपेत्तत्रभाविनि ॥ मरीचिसंमितांकृत्वा ब्राह्मणेभ्यःप्रदापयेत् ॥ अभ्यंगंवर्जयित्वातु
माघंनयतियोनरः ॥ स्नानंकरोतिसुभगे प्रातरेवसमाहितः ॥ तस्यैषाविधिरुद्दिष्टश्चाघ्यःपापभयापहः ॥ ब्राह्मणप्रार्थनेमंत्रद्वयंदे-
विनिगद्यते ॥ सर्वपापप्रशमनं श्रद्दधानस्यभाविनि ॥ सर्वतःप्रसवस्येह परंधामजलेमम ॥ त्वत्तेजसापरिभ्रष्टं पापंयातुसहस्र-
धा ॥ दिवाकरजगन्नाथ प्रभाकरनमोस्तुते ॥ परिपूर्णंकुरुष्वेदं माघस्नानंममाच्युत ॥ एवंस्नात्वानरोयाति भित्वार्विंवंरवेःशुभं ॥
मोक्षमार्गेवरारोहे माघस्नानात्प्रकीर्त्तितः ॥ एवंविधोमाघमासस्तपस्विजनवल्लभः ॥ तस्यपक्षेतुशुक्लेतु भवत्येकादशीयदा ॥
सूर्यर्क्षक्षेणसंयुक्ता महापातकनाशिनी ॥ विनापिऋक्षसंयोगाद्दपोष्याकृष्णतुष्टिदा ॥ भीमोनाममहावीर्यः कौरवाणांयशस्क-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रः ॥ औदरेणाम्भिनाचार्त्त ह्युपवासेद्यथाक्षमः ॥ सचाप्येतांमहापुण्या मुपोष्यतिमहाफलां ॥ ततःप्रभृतिभीमस्य नाम्नाख्याता-
भविष्यति ॥ एषापुण्यामहाभागे प्राणिनांपुण्यबर्द्धिनी ॥ विनिहन्तिमहत्पापं कुनृपोविषयंतथा ॥ कुपुत्रस्तुकुलंयद्वत् कु-
भार्याचपतिंयथा ॥ अधर्मश्चयथाधर्मं कुमंत्रिश्चयथानृपं ॥ कुज्ञानंचयथाज्ञानं शौचंचाशुचितायथा ॥ असद्वादश्चसद्वा-
दं सत्यंचैवानृतंयथा ॥ हिमंयथोष्णसमयेदनर्थश्चार्थसंचयं ॥ यथाप्रकीर्त्तनाद्दानं तपोवैविस्मयाद्यथा ॥ अशिक्षयाय-
थापुत्रो गावोदूरगतोयथा ॥ संहतेनयथाश्राद्धं यथावित्तमबर्द्धनात् ॥ यथासमीहनाज्ञानं फलानांबरवर्णिनि ॥ तथैवपापसं-
घानां प्रोक्तेयंद्वादशीशुभे ॥ ब्रह्महत्यासुरापानं स्तेयंगुर्वङ्गनागमः ॥ युगपत्सुपपन्नाहि हन्यात्तानिचपुष्करं ॥ नचापिनैमिषं-
चैव क्षेत्रंकौरवसंज्ञितं ॥ प्रभाषंनगयादेवि नरेवानसरस्वती ॥ कालिन्दीयमुनाचैव देविकानकथंचन ॥ नचान्यत्तीर्थसंघातो
देवितुल्योहरेर्द्दिनात् ॥ नदानंनजपोहोमो नचान्यत्सुकृतंक्वचित् ॥ नालंशुभेपावनाय मुक्तैकंहरिवासरं ॥ सकृच्चोपोषणेनास्या
नश्यन्तेपापराशयः ॥ एकतःपृथिवीदानमेकतोहरिवासरः ॥ तन्नास्तित्रिषुलोकेषु सुकृतंकिंचनप्रिये ॥ यत्समंद्वादशीपुण्यं पुरा-
णेकविभिःस्मृतं ॥ तस्यांबराहवपुषं कृत्वादेवंतुहाटकं ॥ घटोपरिनवेपात्रे कृत्वावैताम्रभाजने ॥ द्विवीजभृतेदेवि सितवस्त्रावगुण्ठि-
ते ॥ सहिरण्यप्रदीपाद्ये कृतपुष्पवनंसके ॥ बराहायनमःपादौ क्रोडायेतिनमःकटिं ॥ नाभिंगंभीरघोषाय उरःश्रीवत्सधारिणे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाहुसहस्रशिरसे ग्रीवांसर्वेश्वरायच ॥ मुखंसर्वात्मनेपूज्यं ललाटंसुभुवेनमः ॥ केशाःशतमखायेति पूज्यादेवस्यचक्रिणः ॥ वि-
धिनापूजयित्वातु कृत्वाजागरणंतथा ॥ श्रुत्वापुराणंदेवस्य महात्म्यंप्रातिपादकं ॥ प्रातर्विप्रायदत्वातु वैष्णवायकुटुंबिने ॥ तंकुं-
भंकोलसहितं सनैवेद्यपरिच्छदं ॥ पश्चात्तुपारणंकुर्याज्ज्ञातितृप्त्यासुहृद्वृतः ॥ एवंकृतेवरारोहे नभूयस्तेभवोभवेत् ॥ बहुजन्मार्जितं-
पापं ज्ञानाज्ञानसमुद्भवं ॥ हन्तिसर्वमशेषेण तमःसूर्योदयेयथा ॥ एवंविधामयादेवि वर्णिताद्वादशीशुभा ॥ त्वयाचापिकृतापू-
र्वमन्यजन्मनिभाविनि ॥ तस्येयंव्युष्टिरतुला तवदेविमहाफला ॥ त्वयाचापिकृतापूर्वे विजयाःसर्वदाशुभे ॥ तस्यास्तुषोडशंभा-
गंददस्वसुकृतामम ॥ येनश्वतागमिष्यामि तद्धामपरमंहरेः ॥ वित्तापहरजंपापं यद्भर्तुस्तुकृतंमया ॥ तस्यभावेनदेत्वर्थं षोडशांशं
प्रयच्छमे ॥ जीवितेनाथवित्तेन भर्तारंमुञ्चयेततुया ॥ कृमियोनिशतंगत्वा पुष्कलीजायतेततः ॥ शरीरंवाथचित्तंवा यानारीचर-
वर्णिनि ॥ नप्रयच्छतिदुर्मेधा साभवेत्काष्ठकीटका ॥ तत्कर्मणोविशुध्यर्थं देविद्वादशिसंभवं ॥ पुण्यंपुण्यभृतांश्रेष्ठ यद्यस्तिमयि-
तेप्रिया ॥ तस्यास्तद्वचनंश्रुत्वा कृपणायाःपुनःपुनः ॥ कृपामवापसुभगे तामेवाचमिदंतदा ॥ दत्तंमयातेसुकृतं द्वादश्युत्थमनंत-
कं ॥ कोलरूपीहरिर्यत्र पूजितोमेसुपुण्यदः ॥ यच्चयक्रोडकोशंतु कल्पितंसुकृतंमया ॥ तुरीयांशेनपुण्यस्य भवपूताममाद्यवै ॥ पू- ॥ ९९ ॥
र्वजन्मानिरौद्रस्य त्रिवारंवरवर्णिनि ॥ एवमुक्तेतुवचने शतह्रदसमप्रभा ॥ गगनस्थामयादृष्टा गच्छन्तीवैष्णवींपुरीं ॥ पतिर्हि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैवतंलोके स्त्रीणांतुगजगामिनि ॥ देहेनचतथावित्तैर्याइच्छत्युत्तमांगति ॥ सत्यवादिप्रदास्यामि भर्तुरर्थंयथेप्सितं ॥ तवमोहिनि चार्वंगि नमृषाप्रब्रवीम्यहं ॥ कोन्योहिदेवतालोके स्त्रीणांसम्यगभातिन ॥ तस्यार्थेयात्यजेद्वित्तं जीवितंवावरानने ॥ तस्यपुण्यस्यसंख्यानं नास्तिदेविकदाचन ॥ तस्माद्भर्तुःप्रियंकार्यं प्राणैरपिधनैरपि ॥ उद्वाहितंविप्रसुतंसुनिष्ठुरं ग्रस्तंतदातद्वचनैःसुघोरैः ॥ धनार्थिनातेनचयाचितासा लोकार्थिनासागृहमाससाद ॥ हित्वापिदेहंविमलंस्वरूपं यातापिकाष्ठचतथैवकीटा ॥ एतन्मयादृष्टमनंगयष्टे पितुर्गृहेविचरंत्यायथेष्टं ॥ ज्ञात्वेतिहासंसुभगेसुकेशि भार्याचभर्तुःप्रियमेवकर्त्ता ॥ तस्मात्त्वांकामयेसुभ्रु भर्तुरर्थेप्रसीदमे ॥ व्रतभंगंमाकुरुष्व भर्तुर्मेवरवर्णिनि ॥ धर्मज्ञात्वंकुलीनाथ त्वंभीरुशुभदर्शना ॥ अनार्यायाःस्त्रियोलोके भर्तुःसुखकराहिताः ॥ सुवृत्तयाःकुलीनाया वृत्तमेवशुभानने ॥ वरंत्वमन्यंवृणुतेनृपस्य धर्मोपघातायभवेन्नसुभ्रु ॥ एवंकृतेमेवचनंकृतंस्याद्भर्तुस्तथाह्लादकरीभवेतत्तु ॥ इत्थंनिशम्याथवचोवभाषे विमोहिनीक्रोधविरक्तदृष्टिः ॥ सन्ध्यावलींतांसविशुद्धभावां निरीक्ष्यमाणां वचनंसुतस्य ॥ ७५ ॥ इतिश्री नारदीयपुराणे मोहिनीवाक्यनाम द्वात्रिंशोध्यायः ॥ ३२ ॥ समाप्तमिदं काष्ठीलोपाख्यानं ॥

मोहिन्युवाच ॥ यद्येवंत्वंविजानासि धर्माधर्मविचक्षणे ॥ भर्तुरर्थेप्रदेहित्वं धर्मंजीवितमेवच ॥ याचयेयमहंयच्च जीवितादपिदुर्लभं ॥ देहिपुत्रशिरोमह्यं यदिष्टंहृदयाधिकं ॥ यदिभुंक्तेनवैराजा संप्राप्तेहरिवासरे ॥ गृहीत्वासिस्वहस्तेन राजायंरुक्मभूषणः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिरोधर्मांगदस्यैतच्चन्द्राबिंबोपमंशुभं ॥ अजातश्मश्रुकंकान्तं कुण्डलाभ्यांविभूषितं ॥ आच्छिन्नत्प्रहृष्टात्मा मुखाश्रुपरिवार्जितं ॥ परिपक्कफलंयद्वद्रुत्संगेपातयत्विह ॥ मामकेकृपणापांगि तवभर्त्तामहाबलः ॥ एतद्वैकृयतांसर्वं यद्याह्निनह्भिोक्षते ॥ शार्ङ्गिणोहि महाभागे सर्वपापप्रणाशने ॥ तच्छ्रुत्वावचनंतस्या मोहिन्याःकटुकाक्षरं ॥ चकम्पेतत्क्षणाद्देवी प्रवातेकदलीयथा ॥ संध्यावली ततोधैर्यमालम्ब्यवरवर्णिनी ॥ उवाचमोहिनींवाक्यं साश्रुत्वाप्रहसन्निव ॥ श्रूयतेहिपुराणेषु गाथाःशुकसमीरिताः ॥ द्वादशीप्रतिमासेवै स्वर्गमोक्षप्रदाशुभा ॥ त्यजेद्धनंत्यजेद्दारान् जीवितंगृहमेववा ॥ त्यजेद्भूपंत्यजेद्देशं त्यजेन्मित्रंत्यजेद्गुरुं ॥ त्यजेत्तीर्थं त्यजेद्यज्ञं त्यजेद्धर्मक्रियान्वितं ॥ त्यजेत्तपःसुघोरंच त्यजेत्सौख्यंसुविस्तरं ॥ त्यजेद्योगंत्यजेद्दानं त्यजेद्यन्यच्चसुप्रियं ॥ नत्यजेद्द्वाशींपुण्यां पक्षयोरुभयोरपि ॥ पुत्रभ्रातृसुहृद्बन्धु प्रियादारास्तथाधनं ॥ द्वादशीतिपुनर्द्देवि उभयोःसाधनीस्मृता ॥ द्वादश्यास्तु प्रभावेण क्षेमंसर्वंभविष्यति ॥ करोमितवतुष्ट्यर्थं धर्मांगदविनाशनं ॥ विनष्टेतनयेमह्यं सुखिनीभवसुन्दरि ॥ नव्यावृष्यतिसत्याद्धि काञ्चनाद्गदभूषणः ॥ सत्याच्च्युतोमनुष्यस्तु श्वपाकादधिकःस्मृतः ॥ इत्येवमुक्ताकनकावभासा विमोहिनींपङ्कजदेहजातां ॥ संगृह्यभर्तुश्चरणौसुजातौ सन्ध्यावलीचाभिरतावतस्थे ॥ १७ ॥ इतिश्री ल० ना० पु० रु० सन्ध्यावलीवाक्यं त्र्यस्त्रींशोध्यायः ३३

वशिष्ठउवाच ॥ सन्ध्यावलीतथापादौ भर्तुःसंगृह्यभूतले ॥ उवाचवचनंदेवी धर्माङ्गदविनाशनं ॥ अनुशिष्टंबहुविधं मयाभूप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वेयातथा ॥ नान्यद्रोचयतेसुभ्रूमोहिनीमोहसंयुता ॥ भोजनंवाहरिदिने वधंवातनयस्यहि ॥ कुरुष्वराजन्धर्मज्ञ धर्मांगदवि-
नाशनं ॥ यादृशीतुजनन्यावै रुजाभवतिभूपते ॥ पुत्रस्यजननीतीव्रा तादृशीनभवेत्पितुः ॥ गर्भसंधारणेदुःखं भूपस्नेहोऽधिक-
स्तथा ॥ मातुर्भवतिभूपाल नतथाहिभवेत्पितुः ॥ जीवनिर्वापकःप्रोक्तः पिताराजेन्द्रभूतले ॥ जननीधारणेक्षीणा वर्द्धनेपालने
क्षमा ॥ पितुःशतगुणंप्रोक्तं कुर्यात्साहिसदानृप ॥ स्नेहाधिकांहिसंप्रेक्ष्य पुराणेकवयःपुरा ॥ जगुरत्यधिकांलोके जननींजनकात्त-
था ॥ नचतादृक्पितास्नेहं पुत्रंप्रतिकरोतिवा ॥ यादृशंजननीलोके कुरुतेरुक्मभूषण ॥ साहंचाग्रगतस्नेहा परलोकजिगीषया ॥
पुत्रस्यनृपशार्दूल सत्यवाक्यानुपालनात् ॥ व्यापादयस्वतनयं त्यक्त्वास्नेहंसदूरतः ॥ मासत्यलंघनाद्राजन् नात्मानंपातयप्रभो ॥
तन्निकर्षेहृषीकेशो भवतीहफलप्रदः ॥ यस्मिन्नजीर्णेरुजादेहे नान्योपिनृपजायते ॥ नासौधर्मोमलंयद्वद्दङ्गसंस्थंनसोभते ॥
दाराःप्राणास्वपुत्रंवा सर्वस्वंवामहीपते ॥ योहिदद्यादधर्मार्थं सपुमान्हीयतेनच ॥ श्रूयतेचपुराराजन् शिविनासुमहात्मना ॥
स्वशरीरंप्रदत्तंवै धर्मार्थश्येनरूपिणे ॥ पुरन्दरायभद्रार्थं नतुत्यक्तोद्विजन्मना ॥ जीमूतवाहनेनापि गरुडायातिरंहसा ॥ स्वशरी-
रंप्रदत्तंवै रक्षताधर्मसुत्तमं ॥ दधीचिनापिदत्तानि स्वान्यस्थीनिमहात्मना ॥ धर्मार्थंराजशार्दूल देवानांहितमिच्छता ॥ एवंमहा-
त्मभिःपूर्वे धर्मएवस्वपालितः ॥ पालनाच्चैवधर्मस्य सर्वेस्वर्गंपराभवत् ॥ आपदवस्थाहिभूपाल धन्याश्चभुवनत्रये ॥ सत्यसंरक्षणा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थाय संभवंतिनृणांसदा ॥ कीर्त्तिसंरक्षणार्थाय कर्त्तव्यंमनुजैःशुभे ॥ कर्मभूपालशास्त्रोक्तं रागद्वेषविवर्जितं ॥ तदलंपरितापेन
सत्यंपालयभूपते ॥ सत्यस्यपालनाद्राजन् विष्णुदेहगतिस्तव ॥ देवैरुत्पादितानूनं सान्निकार्थायमोहिनी ॥ तवभूपालसापत्न्यं
कृतंतन्नहिबुध्यसे ॥ पुत्रव्यापादनेदेवा भविष्यन्तिपराङ्मुखाः ॥ तेषांदत्वासुतंदेव प्राप्स्यसेवैष्णवंपदं ॥ विष्णोरुद्वहतांभक्तिं दे-
वताःपरिपन्थिनः ॥ भवंत्येवंश्रुतंपूर्वं नचैतत्प्रकटीकृतं ॥ सर्वेतेविबुधाभूप शेखरैःपरिवेष्टिताः ॥ मोक्षमार्गप्रभेत्तारो नव्यवंतिच-
लोकतः ॥ तेत्वंभूपदृढोभूत्वा घातयस्वसुतंप्रियं ॥ धर्मंकुरुष्वभावंत्वं सत्यंमालोपयप्रभो ॥ लुप्तेस्ववाक्येभवितास्वपाकः समंतथा
ब्रह्मवधेनतुल्यं ॥ स्वंसत्यशीलोभविताधरायां यशस्यमेतद्भवितातवेह ॥ २६ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते
सन्ध्यावलीवाक्ये चतुस्त्रिंशोध्यायः ॥ ३४ ॥ ६९ ६९ ६९ ६९ ६९ ६९ ६९ ६९
वशिष्ठउवाच ॥ तत्तस्यावचनंश्रुत्वा राजन्रुक्मांगदस्तदा ॥ सन्ध्यावलीमुवाचेदं मोहिन्याःसन्निधौतदा ॥ पुत्रहत्यात्महत्यावा
ब्रह्महत्यासमास्मृता ॥ घातयित्वासुतंलोके कागतिर्मेभविष्यति ॥ धर्मज्ञंविनयोपेतं प्रजानांरञ्जकंप्रियं ॥ अप्रजंतमहंहत्वा गंता-
वैकांगतिंशुभे ॥ क्वगतोमन्दरंशैलं क्वप्राप्तामोहिनीमया ॥ धर्मांगदविनाशाय पश्यदेवविधेर्बलं ॥ कुपुत्रस्यापिनिधनं देविदुः-
खंभवतिपितुः ॥ किंपुनर्द्धर्मशीलस्य गुरोर्वचनकारिणः ॥ जम्बूद्वीपमिदंभुक्तं मयाहिगजगामिनि ॥ सप्तद्वीपानिभुक्तानि तन- ॥ ८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येनतवाधुना ॥ तुष्टेविष्णोवरारोहे पितुरत्यधिकोभवेत् ॥ अतःकमलपत्राक्षि पुराणेकवयोविदुः ॥ सोऽयमत्यधिकःपुत्रो वृषाङ्गद इतिक्षितौ ॥ प्रथितःसमहावाहुश्चक्रवर्त्तिर्महावलः ॥ ममवंशप्रकाशार्थं किंपुनर्ममानसं ॥ अहोदुःखमनुप्राप्तं पुत्राधिजानितं मया ॥ पुनरेववरारोहे शान्तयिष्यामिमोहिनीं ॥ मधुरैर्वचनैर्देवि दुःखशोकप्रदांमम ॥ एवमुक्तातुनृपतिः प्रियांसन्ध्यावलींत-दा ॥ समीपंचततोगत्वा मोहिनीमिदमब्रवीत् ॥ नभोक्षेवासरेविष्णोर्नहनिष्येतवात्मजं ॥ आत्मानंघातयेयंवा यास्येवाप्याश्र-मान्तरं ॥ अन्यद्वादारुणंकर्म करोमितवशाशनं ॥ आग्रहंकुरुमाभीरु भोजनंचसुतंप्रति ॥ किंफलंभवितादेवि हतेधर्मांगदेतव ॥ भोजयित्वादिनेविष्णोः कोलाभस्तवसुन्दरि ॥ दासोऽस्मितवभृत्योऽस्मि वशगोऽस्मिवरानने ॥ अन्यद्वदस्वसुभगे गतोऽहंश रणंतव ॥ रक्तांगुलितलाभ्यांतु कराभ्यांचारुलोचने ॥ करिष्येन्यत्कर्मशुभ्रु प्रसीदममभाविनि ॥ प्रसादंतवकृत्वातु पुत्रभिक्षांप्र-यच्छमे ॥ दुर्लभोगुणवान्पुत्रो दुर्लभोहरिवासरः ॥ दुर्लभंजाह्नवीतोयं दुर्लभाजननीक्षितौ ॥ दुर्लभंहिकुलेजन्म दुर्लभावंशजाप्रि-या ॥ दुर्लभंकाञ्चनंदानं दुर्लभंहरिपूजनं ॥ दुर्लभावैष्णवीदीक्षा दुर्लभःस्मृतिसंग्रहः ॥ दुर्लभःशोकविरहो दुर्लभंह्यात्मचिन्तनं ॥ दुर्लभोजागरेविष्णोर्दुर्लभागुरुसत्क्रिया ॥ दुर्लभापात्रसंप्राप्तिर्दुर्लभंपौष्करंजलं ॥ दुर्लभःशिष्टसंसर्गो दुर्लभाभक्तिरच्युते ॥ दुर्लभं कपिलादानं दुर्लभंनीलमोक्षणं ॥ मघात्रयोदशिश्राद्धं दुर्लभंवरवर्णिनि ॥ दुर्लभंवसुधाचीर्णे व्रतंपातकनाशनं ॥ धेनुस्तिलम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यीसुभ्रु दुर्लभापापनाशिनी ॥ धात्रीस्नानंवरारोहे दुर्लभाहरिवासरे ॥ दुर्लभंपर्वसंप्राप्ते स्नानंशीतलवारिणा ॥ विशेषान्माघमासे-
तु प्रत्यूषसमयेशुभे ॥ यद्धितंह्यात्मनःकर्म तद्देविभुविदुर्लभं ॥ दुर्लभंस्यादनसनं दुर्लभंचौषधंनृणां ॥ व्याधिर्विघातकरणं शा-
स्त्रोक्तकरणंविना ॥ दुर्लभंशरणंविष्णोर्मरणेवरवर्णिनि ॥ एवंमत्वावरारोहे नचहन्मिसुतंनिजं ॥ आत्मनस्तुशिरश्छित्वा ददामि
तवसुन्दरि ॥ प्रसादंकुरुमेभीरु कृतंसर्वंमयावले ॥ सेवितोविषयाःसम्यक् कृतंराज्यमकण्टकं ॥ मयामूर्ध्निपदंदत्तं रिपुणामब्जलो-
चने ॥ अप्रसूतंसुतंभीरु नाहंहन्मिवरानने ॥ विषयास्वादनेवालं मद्दश्यंशुभदर्शने ॥ स्वहस्तेनैववामोरु किंतुपापतरंपरं ॥ मो-
हिन्युवाच ॥ धर्मांगदोनमेशत्रुर्नाहंहन्मिसुतंतव ॥ आदावेवमयेत्युक्तो भुंक्ष्वत्वंहरिवासरे ॥ वसुधास्वेच्छयाराजन् नप्रसाधीहि
सर्वदा ॥ नाहमेवंब्रवीमित्वां पुत्रव्यापादनंप्रति ॥ भोजनंकुरुराजेन्द्र संप्राप्तेहरिवासरे ॥ ममभूमिपतेकृत्यं नैवपुत्रवधेनते ॥ कु-
र्व्यंतुभोजनेनाद्य एकादश्यांमहावल ॥ यदिपुत्रप्रियोराजन् भुंक्ष्वत्वंहरिवासरे ॥ वहुनाकिंप्रलापेन वाक्यैरद्यनिरर्थकैः ॥ सत्यं
संरक्षयस्वेह कुरुस्ववचनंमम ॥ एवंब्रुवाणांतांदृष्ट्वा मोहिनींतनुमध्यमां ॥ धर्मांगदउवाचेदं खड्गंन्यस्याऽग्रतःपितुः ॥ स्वर्णसरुं
सुधारंच निर्मलाकाशसन्निभं ॥ माविलम्बेनराजेन्द्र पापंमूर्ध्निह्युपेक्षितं ॥ तन्मातुर्वचनंभूप कुरुष्वस्वर्गसाधनं ॥ आत्मारक्षोध-
नेनेह दारैरपिसुतैरपि ॥ आपद्भ्यश्चापिघोराभ्यः श्रेयस्कामेनभूमिप ॥ त्वदर्थेचमृतस्याद्य गतिस्यादक्षयामम ॥ तवापिनिर्मला-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकाः स्ववाक्यपरिपालनात ॥ परित्यजस्वदैन्यत्वं सुतव्यापादनोद्भवं ॥ देहत्यागेममविभो नवःकायोभविष्यति ॥ शचीश-
यननिर्मुक्तो यथानृपशतक्रतोः ॥ पितुरर्थेहितायेच मातुरर्थेमहीपते ॥ गवार्थेब्राह्मणार्थेच प्रमदार्थेतथैवच ॥ भूम्यर्थेविकलार्थेच
देवतार्थेतथैवच ॥ धर्मार्थेदुःखिनश्चार्थे तेशंलोकासनातनाः ॥ तदलंपरितापेन जहिमांत्वंवरासिना ॥ सत्यंपालयराजेन्द्र माभुंक्ष्वह-
रिवासरं ॥ धर्मार्थेतनयंहन्याद्धार्यांवापिमहीपते ॥ श्रूयतेदेववाक्यंतु हन्यात्पुत्रंमखेपिता ॥ सर्वमेधेनृपश्रेष्ठ नदोषोभवितातदा ॥
यद्ब्रूतेत्वांमहीपालजननीमेसुमध्यमा ॥ तत्कार्यमविचारेणधर्मज्ञेयंबहुश्रुता ॥ प्रसीदममराजेन्द्रकुरुवाक्यंममेरितं ॥ मुक्तोभवस्वे-
वमसत्यघोराद्धत्वाहिमांभूमिपतेजनन्यै ॥ महद्यशःप्राप्स्यसिसेत्यवाक्याद्विष्णोःपदंतत्परमंनरेन्द्र ॥ यशःप्रकाशाद्भविताहिकीर्त्ति
स्तवाक्षयातातनशंशयोऽत्र ॥ ४८ ॥ इतिश्री नारदीयपुराणे रुक्माङ्गदचरिते धर्माङ्गदवाक्यं पञ्चत्रिंशत्तमोध्यायः ॥ ३५ ॥
बशिष्ठउवाच ॥ तत्पुत्रवचनंश्रुत्वा भूपरुक्माङ्गदस्तदा ॥ सन्ध्यावलीमुखंवीक्ष्य प्रहृष्टमिवपंकजं ॥ मोहिन्यावचनंक्रूरं श्रुत्वा-
सनृपसत्तमः ॥ चकारपुत्रनाशाय मतिंमतिमतांवरः ॥ पुनःसंमोहिनीवाक्यं शुश्रावनृपसत्तम ॥ भुंक्ष्वभुंक्ष्वमहीपाल रक्षधर्मा-
गदंसुतं ॥ सन्ध्यावल्युवाच ॥ माभुंक्ष्वनृपशार्दूल जहीमंतनयंमम ॥ सन्ध्यावल्याःवचःश्रुत्वा नृपवर्यसभूपतिः ॥ आन्दोलि-
तमनास्तत्र दुःखशोकसमन्वितः ॥ एतस्मिन्नेवकालेतु भगवान्पुरुषोत्तमः ॥ अन्तर्द्धानगतस्तस्थौ व्योम्निस्थैर्यविलोककः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आरुह्यगरुडंदेवो मेघस्यामोनिरञ्जनः ॥ धर्मांगदस्यधीरस्य तथारुक्मांगदस्यच ॥ सन्ध्यावल्याश्चचरितं वीक्षाञ्चक्रेवियत्क्षयः ॥
भुंक्ष्वभुंक्ष्वेतिवचनं मोहिन्याह्युदितेतदा ॥ जग्राहविमलंखड्गं राजारुक्मांगदस्तदा ॥ सुप्रहृष्टेनमनसा प्रणम्यगरुडध्वजं ॥ तं
दृष्ट्वाखड्गहस्तस्तु पितरंधर्मभूषणः ॥ प्रणम्यमातृपितरौ देवंचक्रगदाधरं ॥ नारायणंजगद्योनिं योगाधारंनिरञ्जनं ॥ गृह्यांस-
चात्मनोवीर पितुरग्रेह्यनामयत् ॥ कंवुग्रीवोमहावाहुः सर्वलक्षणसंयुतः ॥ पुनश्चैवमहावाहुर्ग्रीवास्वांशुभलक्षणः ॥ प्रणम्यपादौस-
पितुः खड्गमार्गेप्रदेशयेत ॥ पितुर्भक्त्याप्रहृष्टात्मा जनन्योत्साहितस्तथा ॥ नियोजितेतत्रसुतेनकण्ठे विकाशितेमातृमुखेमहीप ॥
गृहीतखड्गेत्ववनीशनाथे चचालपृथ्वीसनगासवृक्षा ॥ क्षुब्धाःसमुद्राश्चतथामहीपते ववुश्चवाताःप्रवलाःसुघोराः ॥ निपेतुरुल्काः
शतशोधरायां निवातयुक्तानृपतत्रदारुणाः ॥ विवर्णरूपाहिवभूवमोहिनी नदेवकार्यंहिकृतंमयेति ॥ निरर्थकंजन्ममममाधुनाभवत्
कृतंनकार्यंचदिनेशजस्यवै ॥ विमोहनंरूपमिदंविलंवितं नृपेणचानेनसुतंविनिघ्नता ॥ भुंक्तंनवातेनचवासरेहरेरघापहेक्षत्रियपुंग-
वेन ॥ साहंत्वकृत्वादिनकृत्सुतस्य त्रिणैःसमाहंभवितात्रिपिष्टपे ॥ मनोरथोमेवितथंचकृत्वा तस्याधिकोयास्यतिमोक्षमार्गं ॥ स-
त्वाधिकोयास्यतिमोक्षमेष यास्याम्यहंवैनरकंसुघोरं ॥ एवंतदाचिन्तयन्ती मोहिनीनृपनन्दन ॥ ददर्शनृपतिंखड्गमार्जयन्तं ॥ ५९ ॥
पुनःपुनः ॥ समुद्यतेतदाखड्गे नृपेणनृपपुंगव ॥ मोहिनीमोहसंयुक्ता पपातधरणीतले ॥ राजापितेनखड्गेन शिरश्छेतुमियेष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सः ॥ सुतस्यनृपशार्दूल धैर्येणमहतायुतः ॥ सकुण्डलंचारुशशिप्रकाशं भ्राजिष्णुवक्त्रंतनयस्यभूपः ॥ विष्णुरुवाच ॥ उक्तंचदेवेनगदाभृतातदा गुह्यंममाकर्णयभूपवाक्यं ॥ तुष्टोस्मितुष्टोस्मिनशंशयोत्र गच्छस्वलोकंममभूमिनाथ ॥ प्रियान्वितःशुद्धसुतेन पूतः कीर्त्तिंविधायात्रधरापतीश ॥ त्रैलोक्यमापूर्यतथागुणोघैः कृत्वापदंमूर्ध्निंयमस्यचैव ॥ लीनोभवस्वाघममैवदेहे त्वंसर्वथैकादशिपालनेन ॥ सचक्रिणोभूमिपतिःकरेण संस्पृष्टगात्रोष्ठभुजोवभूव ॥ प्रियासमेतस्तनयेनसार्द्धं विमुच्यपापंसफलंसदेहः ॥ देवस्यदिव्यंसनृपोमहात्मा विवेशदेहंगरुडध्वजस्य ॥ विहायलक्ष्मीमवनीप्रभूतां विहायदारांश्चविहायकोषं ॥ विहायनागांश्च विहायभूपान् विहायवंधुंश्चजनांस्तथासौ ॥ जगामदेहंमधुसूदनस्य ततोम्बरात्पुष्पचयंपपात ॥ अनाहतादुंदुभयोविनेदुर्ननर्त्ततत्राप्सरसांव्रजश्च ॥ चक्रुश्चगीतंमधुरंलयान्वितं गन्धर्वमुख्यानृपकर्मतुष्टाः ॥ तदद्भुतंवीक्ष्यरवेस्तनूजो हरेस्तनुंभूमिपतिंप्रविष्टं ॥ सदारपुत्रस्तुलिपिंप्रमार्य उवाचदेवंचतुराननंरुदन् ॥ यमउवाच ॥ नाहंनियोगीभवितातवेश दिशस्वकृत्यंममयत्करोमि ॥ नाहंपुनस्त्वीदृशकार्यकर्त्ता येनेहमेस्यादतिदुःखतापः ॥ ३० ॥ इतिश्री ना० रु० रुक्मांगदसिद्धिर्नाम षट्त्रिंशोध्याय ॥ ३६ ॥ यमउवाच ॥ विबुधेशजगन्नाथ चराचरगुरोप्रभो ॥ मोहिन्याश्चरितंदेव जातंनिष्फलमद्यवै ॥ रुक्मांगदप्रणीतेन मार्गेणकुशकेतन ॥ लोकःप्रयातिसर्वोयं नमांकश्चित्प्रपद्यते ॥ गतेपिनृपशार्दूले देहंदेवस्यचक्रिणः ॥ सर्वथासर्वभूतानां नबुद्धिःपरिवर्त्तते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपोष्यवासरंविष्णोः सदाधर्मार्त्तमानसाः ॥ प्रयान्तिपरमंलोकं लुप्तपापाःपितामह ॥ इयंतुव्रीडितादेवी मोहिनीचित्ररांगना ॥ सा-
यातितवसान्निध्यं नभुंक्तेलोकगर्हिता ॥ निष्प्रपन्नोह्यहंजातः किंकरोमिप्रसाधिमां ॥ प्रेताधिपवचःश्रुत्वा नीरजातासनोब्रवीत् ॥
गच्छामःसहिताःसर्वे मोहिनींप्रतिबोधितुं ॥ मोहिन्याःप्रतिबुद्धायाः करिष्यामोदिवाकरे ॥ तवकार्यंनसन्देहः संभ्रमन्त्यज्यता-
मिदं ॥ ततोदेवगणाःसर्वे संक्रन्दनपुरोगमाः ॥ ब्रह्मणासहिताभूमिं विमानैःसूर्यसन्निभैः ॥ समायातामहीपाल नारींतांप्रतिबो-
धितुं ॥ तेविमानैःसमंतात्तु परिवार्यशुभाननां ॥ तेजोहीनांनिरानन्दां शुष्कतोयांनदीमिव ॥ विनेन्दुनायथारात्रिमृद्धिहीनां-
क्रियांयथा ॥ पराजितंनरंयद्वत प्रम्लानामिवपंकजं ॥ विनिवृत्तमखंदेवं निर्द्रुमंहिवनंयथा ॥ गतशालिककेदारं तरणिंनिष्प्रभंयथा ॥
पन्थानंनवनीतेतु उद्धृतेचावनीपते ॥ असंस्कृतांयथावाणीं मृदितांचचमुंयथा ॥ हतनाथांचयुवतीं धान्यहीनांप्रजांयथा ॥ श्र-
द्धाहीनविधिंयद्वत् धर्मंचदययाविना ॥ राष्ट्रंभूपालहीनेच मंत्रिहीनंचभूमिपं ॥ धनधान्यविहीनंतु गृहंनरवरोत्तम ॥ जलही-
नंयथाकुंभं बद्धसंगंयथागतिं ॥ गृहस्थंभार्ययाहीनं पथिकंसार्थवर्जितं ॥ मार्जनींपांशुरूषितां नरंतीर्थाप्लुतंयथा ॥ वादित्रंशब्दभ-
ग्नंच दिवादुष्टंचनेत्रजं ॥ भग्नक्रियंचभिषजं भग्नशाखंचपादपं ॥ व्यङ्गीचप्रमितंयद्वान्निर्जलंचयथाघनं ॥ सधूममिववह्निंच वि-
रश्मिमिवभास्करं ॥ प्रभ्रष्टामिवमालांतु सर्वसंगंनरंयथा ॥ पयसाचविहीनांगां पतिहीनंगृहंयथा ॥ कविनाचयथाबन्धं भिक्षाही-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नंचभिक्षुकं ॥ तिरस्कृतंयथाकान्तं जाययेवहतप्रभं ॥ वसन्तंस्वसुरावासे हृतंस्वामिवमानसं ॥ भग्नंचित्रंगृहमिव पद्मिनीमुद्धृता-
मिव ॥ निर्दानमिवमातंगं भग्नवेगंहयंयथा ॥ मालामिवशिरोभ्रष्टां समलंतुमणिंयथा ॥ प्रभ्रष्टांवालिपिंयद्वद्विस्वरंचयजुर्यथा ॥
सामेवस्वरहीनंतु मंत्रहीनंयथानरं ॥ मार्गंतृणेनसंछन्नं पद्महीनंयथासरः ॥ ज्ञानंममत्वसहितं प्रकृतिंपुरुषंविना ॥ यानिचित्तवि-
हीनानि धर्म्यंदंभावृतंयथा ॥ मोहिनींतेजसाहीनां तथादृष्ट्वादिवौकसः ॥ ध्यायमानांनिरुत्साहां दूयमानांजनैःप्रभो ॥ आक्रोश
वचनैःक्रूरैः पुत्रहत्यासमन्वितैः ॥ भूसर्तृघातिनींपापां सन्ध्यावल्याश्चदुःखदां ॥ दुःशीलांपतिनात्यक्तां तद्वाक्यपरिमोदितां ॥
स्ववाक्यनिरस्तांचण्डामूचुर्देवाःसमागताः ॥ माशोकंकुरुवामोरु पौरुषंहित्वयाकृतं ॥ नहिसिद्धिंगतंतंच कोपराधस्तवावले॥ प्रा-
णिनःपरिभूयन्ते यमेनबरवर्णिनि ॥ नहिमाधवभक्तानां भवतोमानखण्डनां ॥ शाशितात्वंविशालाक्षि देवकार्यार्थमागता ॥ त-
न्नसिद्धिंबरारोहे प्रयत्नेनतवाधुना ॥ विघ्नविध्वंसिनीपूर्वं कृतारुक्मांगदेनहि ॥ एकादशीमहापुण्या वैशाखेशितपक्षजा ॥ संव-
त्सरंविशालाक्षि कृच्छ्रपादप्रपूरिता ॥ तस्यैषान्युष्टिरतुला यत्सत्याचविभोनहि ॥ निर्विघ्नांचेतिब्रुवते लोकेषुपरिनिष्ठिताः ॥ अने-
नकारणेनेह जितात्वंतेनभाविनि ॥ नकृतंवचनंतुल्यं विष्णुभक्तेनतेनवै ॥ अगणित्वेहनृपतिः संस्पर्शन्तेनसुन्दरि ॥ कर्मणाम-
नसावाचा पुत्रव्यापादनेस्थितः ॥ खड्गमुद्यम्यहस्तेन स्नेहंकृत्वासुदूरतः ॥ तादृशंनिकषंप्रेक्ष्य भगवान्मधुसूदनः ॥ तुष्टोवभूव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवेशो वरदःसजनार्दनः ॥ सान्निध्यंकल्पयामास नृपस्यपुरतोहरिः ॥ योहनिष्यतिवैपुत्रं नभुक्तेहरिवासरे ॥ भूभुजातेनतेनाद्य
प्रीतिंयाताममातुलां ॥ एवंविचिन्त्यदेवेन दर्शितंवपुरात्मनः ॥ नृपेन्द्रस्यप्रियापुत्र सहितस्यवरानने ॥ विष्णुनापरितुष्टेन नीतं-
चत्रितयंशुभे ॥ स्वकंधाममहाभागे अभावर्मिरिवाहितः ॥ प्रारब्धेकर्मणिफलं यदिदेविनसिध्यति ॥ सर्वदोषेणसुभगे दोषःकोत्र
तवाधुना ॥ तस्मात्तेवरदाःप्राप्ता सांप्रतंविबुधाःशुभे ॥ सिध्येकर्मण्यसिद्धेच कर्मदोषोवृथानहि ॥ नदोषोभृत्यवर्गस्य स्वामिना
धर्ममिच्छता ॥ सद्भावादटमानस्य यदिकर्मनसिध्यति ॥ देयंवेतनमात्रंतु नतुतुष्टिफलंभवेत् ॥ योनतस्मैप्रयच्छेत वेतनंजीव-
नायवै ॥ गर्वाबधमवाप्नोति सनरोनात्रशंसयः ॥ तस्माद्देयंवरारोहे तवाभीष्टसुलोचने ॥ सद्भावेनत्वयाकार्यं कृतंसम्यग्दिवौकसां ॥
किन्नकुर्वन्तिविबुधाः त्वयासहवरानने ॥ द्वादश्याःतेजसाभग्नो यामाङ्कुर्विघ्ननाशिनीं ॥ एवमुक्तातुदेवैःसा मोहिनीनृपसत्तम ॥
निन्दिताचतदात्मानं उवाचेदंवचस्तदा ॥ धिग्देवाजीवितंमह्यं ययाकार्यंनसाधितं ॥ नकृतोयमसंवाधं यमकार्योमयासुराः ॥
नचलुप्तंहरिदिनं नभुक्तंतस्यवासरे ॥ भूभुजातेनवीरेण कृतंपुत्रवधेमनः ॥ गतोमूर्ध्निपदंकृत्वा ममरुक्मांगदोहरिं ॥ अप्रमेयगु-
णंविष्णुं निर्मलंनिर्मलाशयं ॥ हंसंशुचिपदंव्योमं प्रणवंबीजमव्ययं ॥ निराकारंनिराभासं निष्प्रपञ्चंनिरञ्जनं ॥ शून्यंविलब्धरू-
पञ्च ध्येयंध्यानाविवर्जितं ॥ अस्तिनास्तीतियंप्राहुर्नदूरेनातिचान्तिके ॥ मनोग्राह्यंपरंधाम पुरुषाख्यंजगन्मयं ॥ हृत्पंकजसमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सीनं तेजोरूपंनिरीन्द्रियं ॥ तस्मिन्नयमनुप्राप्तः किन्तुमेजीवितेफलं ॥ सुसाधितेतुयोविप्र कार्येगृह्णातिवेतनं ॥ आशामनाशां-
कृत्वातु स्वामिनोनरकंव्रजेत् ॥ नसाधयन्तिकार्याणि प्रभूणांयेदिवौकसः ॥ भृत्यावेतनभोक्तारो जायन्तेभूतलेहिसा ॥ कार्यप्र-
साधनापश्चाद्धृतंपुत्रविनाशिनी ॥ ग्रहिष्येहंवरंदेवाः कथंपापाविगर्हिता ॥ देवाऊचुः ॥ ब्रूहिमोहिनिदास्यामो यत्तेमनसिवर्त्तते ॥
नानृणंभवितासुभ्रु येनास्माकंवरानने ॥ फलंहितस्यकस्मात्त्वं नचाप्नुहिकृशोदरि ॥ ५५ ॥ इति ना० मोहिनीसमागमोनाम ३७
वशिष्ठउवाच ॥ एवमुच्चार्यमाणानां विबुधानांमहीपते ॥ आजगामाथनृपतेः पुरोधाःपावकप्रभः ॥ उषित्वाजलमध्येतु प्राणाया-
मरतोमुनिः ॥ वर्षाणांतुशतंसाग्रं ध्यायन्देवंजनार्दनं ॥ व्रतावसानेनृपते जलादवततारह ॥ निर्गतेनश्रुतंतेन मोहिन्याश्चेष्टितं
नृप ॥ सक्रोधोमुनिशार्दूल देववृन्दमथागमत् ॥ उवाचविबुधान्सर्वान् मोहिन्याबरदायिनः ॥ भवतांहिकदेवत्वं धिग्धर्मंवःसुरे-
श्वराः ॥ वरप्रदानंयैरेवं दीयतेहिनिरर्थकं ॥ मोहिन्याःपापयुक्तायाः नयुक्तंभवतामिह ॥ कृत्याहतेयंसुतभर्तृघातिनी विहीनरूपा
सदृशस्वरूपा ॥ तस्याहिशुद्धिर्नहिदृश्यतेवै क्षिप्तेशरीरेपिहिजातवेदसि ॥ विमोहयामासचमोहिनीया रुक्मांगदंधर्मविभूषणंहि ॥
प्रियासमेतंतनयेनयुक्तं ययास्वयंचैवविनाशितंपतिं ॥ कृत्याधरांभूपतिवर्जितंच नष्टस्वधर्मोहरिवासराख्यः ॥ नचैववासोनरकेपि
देवाः कृतेभवेद्वर्षशतेनपुण्ये ॥ लोकापवादेनचकुत्सितायाः स्थानंनवेदास्तिकुतःपरंच ॥ पतिंहत्वासुतंचापि सपत्नींजननीसमां ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हत्वामरांसमस्तांच कांगतिंयास्यतेसुराः ॥ इयंपापसमाचारा तिथिविध्वंसिनीहरेः ॥ मात्सर्यसहितैरुक्तं यैर्हरेर्वासरेसुराः ॥ भु-
 ज्यतामितिदुर्वृत्तैस्तेषामप्यधमागतिः ॥ भुज्यतेवासरेविष्णोर्हन्यतांगौर्द्विजान्विता ॥ अपेयंपीयतामुक्त्वा नवासस्तुत्रिपिष्टपे ॥
 एतदज्ञानिनांप्रोक्तं ज्ञानिनांनतुनिष्कृतिः ॥ अज्ञानाद्व्याहृतेवाक्ये भुज्यतांहरिवासरे ॥ हन्यतांगौर्द्विजोपेता पीयतांमद्यमेव-
वा ॥ विशुद्धिःकविभिःप्रोक्ता प्राणत्यागगतेनहि ॥ अथवाह्युपवासेन ह्येकादश्यांदिवौकसः ॥ तिथ्यन्वितस्यपापस्य ज्येष्ठकुण्ड
प्लुतस्यच ॥ शौकरेस्पर्शनाद्वापि नन्व्यूहार्चनादथ ॥ व्याहृतिःकथिताविप्र सयमस्मिन्सुरोत्तमाः ॥ भोजनेपापनिरता द्विजे-
शस्यदिनशुभे ॥ भर्तृवाक्यमकृत्वातु घातयामासयापतिं ॥ वाग्यतंवाक्यनिरतं तादृशंनरपुंगवं ॥ विष्णुधर्मप्रलोप्त्रीवै बहुमा-
यासमन्विता ॥ नैषास्पृश्याभवेद्देवा कथंदास्यथवैवरं ॥ भवन्तोन्याययुक्तेषु धर्मयुक्तेषुमत्सराः ॥ पालनंपापयुक्तेषु नकुर्वन्तिदि-
वौकसः ॥ धर्माधाराःस्मृतादेवा धर्मोवेदाद्विनिर्गतः ॥ वेदैःशुश्रूषणंभर्तुः स्त्रीणांधर्मःप्रकीर्त्तितः ॥ यद्वदेत्पतिःकिंचित तत्कार्यम-
विशंकया ॥ शुक्लंशुक्लमितिज्ञेयं कृष्णंकृष्णमितिस्त्रिया ॥ यानारीसाहिविज्ञेया यत्राज्ञाक्रियतेसदा ॥ भर्तुर्विबुधशार्दूलाः सत्यमे-
तद्ब्रवीमिवः ॥ भर्तुराज्ञाकृतादेवास्त्वनयापापशीलया ॥ पापाहीसनसन्देहो मोहिनीदुष्टचेतना ॥ सत्यसंपालनार्थाय सपथैर्य-
न्त्रितोविभुः ॥ उपायैर्विविधैःप्रोक्तोनसत्याच्चालितस्तया ॥ तेनमोक्षंगतोराजा पापमस्यांविसृज्यच ॥ सेयंपापशरीराहि हत्याशत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समन्विता ॥ विनाशयामासमम पाद्यंपापसमन्वितं ॥ दातारंसर्वदानानां ब्रह्मण्यंचहरिप्रियं ॥ प्रजानांश्चनेयुक्तं हरिवासरसे-
विनं ॥ निषिद्धपरिहर्त्तारं परदारविवर्जकं ॥ परार्थेत्यक्तकामंच सदामखविधिप्रियं ॥ सदादुष्टप्रशमनं वर्त्तमानंधरातले ॥ व्यस-
नैःसप्तभिर्घोरैरनाक्रान्तंमहीपतिं ॥ तंनिरस्यदुराचारा बरयोग्याकथंभवेत् ॥ योऽस्याःपक्षेप्रवर्त्तेत देवोवादानवोपिवा ॥ तांचापि
भस्मनिचयं करिष्येहंनशंसयः ॥ मोहिन्यारक्षणेयस्तु प्रयत्नंकुरुतेनरः ॥ तस्यतज्जायतेपापं यन्मोहिन्यांव्यवस्थितं ॥ सएवमुक्तो
नृपनाथविप्रः संसृज्यपापंहरिसंप्रगीतं ॥ मुमोचदेहेज्वलनप्रकाशं तदंगनायाःकनकावदाभि ॥ क्षिप्तेतुतोयेसहसामहीप ज्वला-
वलीढासहसावभूव ॥ खंपश्यतांनाकनिवासिनांतथा तृणयथोल्कापतितावभूव ॥ कोपंप्रभोसंहरसंहरेति यावद्गिरःखेमरुतांचरन्ति ॥
तावत्सवह्निर्हरिसंभवोसौ भस्मावशेषांप्रमदांचकार ॥ ३४ ॥ इतिश्री ल० ना० रु० मोहिनीभस्मकरणंनामाष्टत्रिंशोध्यायः ३८
वशिष्ठउवाच ॥ मोहिनीदेहमुत्सृज्य गताविबुधमंदिरं ॥ भर्त्सितादेवदूतेन नास्थितिर्विद्यतेऽत्रते ॥ पापशीलेसुदुर्वृद्धे भर्तृनि-
न्दापरायणे ॥ लुप्तस्तेवासरोविष्णोर्महापापसमन्विते ॥ नारायणस्यभक्तानामिहवासस्त्रिपिष्टपे ॥ पापिनांनरकेवासस्तत्रगच्छ-
स्ववालिशे ॥ एवमुक्तातुदूतेन सक्रूरंवचनंतदा ॥ ताडयित्वातुदण्डेन प्रेषितानरकान्प्रति ॥ ताडिताभर्त्सिताराजन् साप्राप्तान-
रकान्प्रति ॥ प्राक्रोशन्नारकाःसर्वे दृष्ट्वातामागतांतदा ॥ नतेवासोऽत्रपापिष्ठे परिखिद्यास्मदन्तिके ॥ व्रजान्यत्रहिवासाय नव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यंधारणेक्षमाः ॥ यात्वंधर्मांगदंहंसि धर्मज्ञंसत्पथेरतं ॥ गुरुशुश्रूषणेरक्तं मातॄणांसुप्रियंतथा ॥ विशेषराहितंभास्वद्भूतानांचहितेर-
॥ ६३ ॥ तं ॥ प्रजाहितंस्थिरंप्रज्ञं स्त्रीसंगेवाविचक्षणं ॥ सप्तद्वीपप्रभोक्तारं महेन्द्रवरुणोपमं ॥ प्राकृतेनापिपुत्रेण निहतेनमहामते ॥ ब्रह्म-
हत्याशतंप्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः ॥ त्वयासद्धर्मनिरतो श्वयःशुश्रूषणेरतः ॥ हतःपुत्रोमहाबाहुस्तेनतेनास्तिनिष्कृतिः ॥ ग-
च्छान्यत्रश्रुतंपापे विरुद्धंतवदर्शनं ॥ एवंसुबहुशोजल्प्य निंदितानिर्गतातदा ॥ निर्धूतानारकैःसातु प्रविष्टाहिरसातलं ॥ रसा-
तलस्थैर्नृपते निषिद्धासासमंततः ॥ क्रंदितातत्रदुःखार्त्ता प्राप्तापार्श्वंदिवौकसां ॥ निवासिताहंलोकैस्तु ताडितामुद्गरादि-
भिः ॥ भवतामर्थसिद्ध्यर्थं रविपुत्रहितायच ॥ मयाव्यवसितंचैव सर्वलोकविगर्हितं ॥ क्लेशयित्वातुभर्त्तारं पुत्रंहत्वानिराकृ-
ता ॥ सन्ध्यावलींवियोज्याथ पुत्रेणपतिनातथा ॥ नगतिर्विद्यतेदेवा धरायांममसांप्रतं ॥ विशेषाद्विप्रशापेन श्रुतानरक-
वासिनः ॥ विप्रेणापादितानांहि दग्धानांचित्रभानुना ॥ दिवाकीर्त्तिहतानांच दष्टानामहिनातथा ॥ चतुर्गुणम्रितानांच
भक्षितानांचदंष्ट्रिभिः ॥ शतद्रुदाविपन्नानां नशुद्धिःसुविमार्गदा ॥ साहंगङ्गाजलभ्रष्टा भूरिपापसमन्विता ॥ अविन्द-
मानानिलयं विष्णोर्वासरनाशिनी ॥ प्राप्ताहंभवतांदेवाः समीपमिहदुःखिता ॥ नास्तिमेपावनंकिंचिद्भर्तृपुत्रविनाशनात् ॥ ॥ ६३ ॥
विष्णोर्वासरलोप्तृत्वात्सत्यमेतन्मयोदितम् ॥ दुरुक्तंनादिनीचण्डा निंदिताचजगत्त्रये ॥ करोम्यहंकिंत्रिदशा ब्रूतदुःखविना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिनीम् ॥ तांदृष्ट्वावादिनींवीक्ष्य मोहिनींचविमोहिनीं ॥ ऊचुःपरस्परंसर्वे सब्रह्मेन्द्रदिवाकराः ॥ क्षिप्रंपुरोधसंक्रुद्धं शान्त-
यित्वाशनैःशनैः ॥ अस्माभिःप्रेषिताब्रह्मन् शून्यंदृष्ट्वात्रिपिष्टपं ॥ नरकाश्चतथादृष्ट्वा वैकुण्ठंवीक्ष्यपूरितं ॥ रुक्मांगदकृतेमार्गे
गच्छमानोजनस्तदा ॥ एकादश्यांनचास्नाति कश्चिदेवपदाद्विज ॥ तदास्माभिर्बालारियं प्रेषितानृपसन्निधिं ॥ माननार्थेचत-
स्यैव वासरेचक्रपाणिनः ॥ धर्मज्ञस्यसुशीलस्य द्विजरुक्मांगदस्यच ॥ वासुदेवेतिभावेन भक्तिरव्यभिचारिणी ॥ भार्यासंबन्ध-
मुत्सृज्य कूटेनेत्रकृतोमुनिः ॥ लिपिसम्मार्जनात्सर्वैरस्माभिःप्रेतपश्यतु ॥ अपकारायनृपतेः सत्ययुक्तस्यवैद्विजः ॥ सतेनकर्मणा
विप्र प्रियापुत्रसमन्वितः ॥ विष्णोःप्रसादाद्गतवान् पुत्रस्नेहविवर्जितः ॥ पदंदेवस्यसुकृतां चक्रिणोमुक्तिलक्षणं ॥ यस्मान्नाव-
र्ततेजन्तुरानन्दाख्यान्महीपते ॥ तन्नात्रकोपःकर्त्तव्यस्त्वयाद्विजवरोत्तम ॥ त्वंतपस्वीदुराचारः सर्वभूतहितेरतः ॥ नीचैःकृतेय-
न्महत्तांव्यलीकं तच्चैवतेषांनभवेत्सुखाय ॥ नप्राप्यतेसांख्यविदैर्मुनीन्द्रैर्नचापितद्योगयुतैःसमस्तैः ॥ अध्यासितंसत्ययुतैर्नरैर्य
त्तद्धामविष्णोसतदाजगाम ॥ बुद्धिप्रपञ्चात्पतितातुविप्र सद्यःसमूलेतिनशंशयोऽत्र ॥ देवार्थमेपानचबन्धनार्थं रुक्मांगदंदग्ध-
वतीमुनिन्द्र ॥ नचात्मकामेनगताहिबाला यमावसानेनगताहितत्र ॥ दयांकुरुस्वप्रशमंव्रजस्व विनाशितानांनपुनर्वधोऽस्ति ॥
नचापिलोकेनिहतोनिहन्य तेशापदानेननिपातितेयं ॥ कुरुप्रसादंगतिदोभवस्व त्वमद्यविप्रेन्द्रविमोहिताय ॥ अस्मत्कृतेविप्रव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रप्रसीद क्रोधंतुसंहृत्यमहर्षिवर्यं ॥ सएषदृष्टिस्त्रिदशालयैस्तु विमृष्यबुध्याविरराम कोपात् ॥ उवाचमर्त्यान्विबुधाःसमेतान् वेदा-
र्थविद्धर्मपरोमहात्मा ॥ ३८ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते विप्रप्रशादनो नामैकोनचत्वारिंशत्तमोध्यायः ३९
पुरोधाउवाच ॥ बहुपापान्वितादेवा भर्तुर्दुःखप्रदायिनी ॥ नास्थितिर्विद्यतेचास्यास्त्रैलोक्येस्थातुजंगमे ॥ यन्नाक्रान्तांहिभूतोघैरा-
काशपक्षिभिःस्वरैः ॥ जंगमाजंगमैर्भूमिर्व्याप्ताद्वीपसमन्विता ॥ तलानिदैत्यनागाद्यैराकाशंपाक्षिभिःस्वरैः ॥ नाकंप्रक्रांतामिःपु-
ण्यैर्न्नरकंपापकर्मभिः ॥ ऋष्याद्यैसागराव्याप्ता विहंगैश्चमहीरुहाः ॥ यस्मिन्संस्थाप्यतेपापैः संस्पर्शंयास्यतेनच ॥ विचार्यतद्यथा-
स्थानमस्यसौरुख्यप्रदंभवेत् ॥ तच्चिन्त्यतांमहाभागास्तत्संभूयप्रभृष्यतां ॥ ततःसुरवराःसर्वे विप्रवाक्यप्रचोदिताः ॥ ऊचुर्ब्रह्मसु-
तांनास्ति स्थानंतवजगत्रये ॥ ब्रूहिमोहिनिदास्यामि यदाक्रान्तंनकेनचित ॥ नपुरापापभोक्तारो नसुरासुरचापरे ॥ नचाप-
रोधादवले सपापायावरप्रदाः ॥ मोहिन्युवाच ॥ भवतांहिमयाकार्यं कृतंविबुधसत्तमाः ॥ दग्धायाअपिपापेन विनादेहंनचाप-
राः ॥ यथासूर्यात्मजोहर्षं प्रयातिममचेष्टितैः ॥ पूर्यंतेनरकासर्वे जनोघैःपापसंयुतैः ॥ गच्छद्भिःपरलोकेहि यममार्गेनिरंतरं ॥
मानुषैस्त्रिदशश्रेष्ठा चित्रगुप्तोनाविश्रमेत ॥ व्यलीकंतुमकुर्वाणाः सर्वेगमसुसंचयैः ॥ पुरोधसासमेतानामेषवध्वाञ्जलिर्मया ॥ भ-
वतांहितमन्विच्छन् कृतंपापमनन्तकं ॥ पुनरेवचमाबुद्धिर्वर्त्ततेस्वर्गनाशिनी ॥ एकादशीफलंपुण्यं दीयतांविबुधोत्तमाः ॥ व- ॥ ६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सतिःसामेविबुधा भवेदेकादशीयथा ॥ निरालंबाहमधुना स्थितींमेदीयतामिदं ॥ सर्वयज्ञाधिकफला सर्वपापप्रणाशिनी ॥ ए-
कादशीमहाभागा यद्यस्तिमयिपुण्यदा ॥ मोहिनीवचनंश्रुत्वा सर्वैभूमिदिवौकसः ॥ दत्तामंगानिधुन्वाना ऊचुस्तांपरुषाक्षरं ॥
अयाच्यंयाचसेभीरु यन्नप्राप्यंसुरासुरैः ॥ एकादशीफलंपुण्यं कोददातितवाधुना ॥ अन्यत्तुसंप्रयच्छामो दातुंह्येकंनशक्नुमः ॥
एकयाह्यपिवाभीरु एकादश्यासुचिन्तया ॥ हत्यायुतंविनश्येत सर्वयज्ञफलंलभेत् ॥ नास्माकंशक्तिरस्तीह दातुंहरिदिनोद्भवं ॥पु-
ण्यंमोक्षप्रदंभीरु जन्ममृत्युनिकृन्तनं ॥ अमृतेनजगद्धातुः पुराणपुरुषस्यतु ॥ तद्दिनंयाचमानायाः कुलिशंतेपतिष्यति ॥ मो-
हिन्युवाच ॥ यद्येवंविबुधश्रेष्ठा नदास्यथहरेर्दिनं ॥ दशम्याःप्रान्तविद्धाया ततोगच्छन्तमेसुराः ॥ देवाऊचुः ॥ दशम्याःप्रान्तवि-
द्धंहि दत्तंजंभासुरस्यहि ॥ ब्रह्मणापरितुष्टेन धूर्जटेर्वचनेनहि ॥ सचापिवलवाञ्जातस्तेनपुण्येनबृंहितः ॥ मोहिन्युवाच ॥ दशम्याः
प्रान्तमासाद्य यदोदेतिदिवाकरः ॥ तेनस्पृष्टंहरिदिनं तद्दत्तमसुरेयदि ॥ सूर्योदयविहीनंतु दृश्यादृश्यंचराचरं ॥ दशम्यंतंप्रय-
च्छध्वं स्पृष्टंहरिदिनेनहि ॥ अग्नेर्विकारकालेच बद्ध्वाउत्थापनेशुभे ॥ गवांदोहनकालेच पक्षिसंनादनेतथा ॥ विरामेसर्वदेवानां
मार्जनीग्रहणेतथा ॥ द्वारोद्घाटनवेलायां स्नानकालेह्युपस्थिते ॥ व्रतीनांदीक्षितानांच सपादनिनदेतथा ॥ तदाक्रान्तोदशम्यांतु
एकादशिसमन्वितः ॥ प्रदीयतांनिवासार्थं कालेविबुधसत्तमाः ॥ नप्रार्थयेयंह्युदयं नचैवहरिवासरं ॥ वैनतयोदयोमह्यं दीयतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विबुधेश्वराः ॥ दययामुनिनादेवाः क्षीणायाःपापसंचयैः ॥ विश्रामार्थैसुपुष्ट्यर्थं एतत्प्रातःप्रदीयता ॥ स्पृष्टंविष्णुदिनेनेह सर्वपा-
पहरेणहि ॥ यद्येतन्नप्रयच्छध्वं तिथेःप्राभातिकंमम ॥ साहंविष्णुदिनोपेतां भविष्येवैसहस्रधा ॥ निराशाकुलिशेनैव विच्छिन्ना
त्रिदशालयात् ॥ पापादीन्विबुधार्थंहि पापसंजननायच ॥ प्राप्यानुज्ञांहिदेवेन्द्रास्तथान्येभ्योविशाम्यहं ॥ वशिष्ठउवाच ॥ तन्मो-
हिनीवचःश्रुत्वा सुराःसर्वेमहीपते ॥ संमंत्र्यसुचिरंकालं दिगंबरपुरोगमाः ॥ यमसंस्थापनार्थाय वैकुण्ठध्वंसनायच ॥ पाखण्डानां
चवध्यर्थं पापसञ्जननायवै ॥ पुरस्कृत्यतुविप्रेन्द्रं तथान्योभूसुरान्नृप ॥ ऊचुस्तेमोहिनींदेवा लोकसंमोहनायवै ॥ दत्तंमोहिनितेस्था-
नं प्रत्यूषसमयान्वितं ॥ दुष्टंहरिदिनोपेतं दशम्याप्रान्तसंज्ञितं ॥ नैतज्जंमेनदुष्टंवै नैतद्दैत्यैर्नदानवैः ॥ विविधैस्तुकृतंसुभ्रु उपवा-
सव्रतस्त्विदं ॥ अस्मिन्स्थितायांत्वयिमाधवस्य पूजांकरिष्यन्तिचयेमनुष्याः ॥ तेषांहियद्वैसुकृतंसमस्तं त्वंभुंक्ष्वदानवचशंशयोत्र ॥
सूर्योदयविहीनंतु दशम्याःप्रान्तसेवनं ॥ पद्मनाभदिनेसूक्तं नदास्येहंफलंतत्र ॥ प्रतापंसूर्यहीनंतु दशम्याश्चाफलोचने ॥ एका-
दशीविहीनंतु क्षपयिष्यन्तियेनराः ॥ उपवासैर्व्रतैर्दानैस्तथाजागरणैःशुभैः ॥ सर्वमावर्जितंपुण्यं यास्यतेतवमोहिनि ॥ अप्रभा-
तांकिनोह्यन्ता दशम्यांगर्हितंसदा ॥ दृश्यादृश्यामहीपाल युक्ताहरिदिनेनतु ॥ निष्फलंभवतेनृणां सुव्रतस्यार्जनेसदा ॥ देवैः
प्रहृष्टेतुतदामहीप स्थानेश्रुतेमोहिनिमोहयुक्ता ॥ बभूवहृष्टासहसूर्यजेन मेनकृतार्थंशरणंतदातु ॥ संसाधितंकार्यमिदंसुराणां भ- ॥ ६८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इमावशेषेतुकृतेतुदंडे ॥ चैतन्यमात्रेपरमात्मकेस्मिन् संमार्जितोरुक्मकृतस्तुपन्थाः ॥ नीतंमयाचात्मकृतंहिवाक्यमुक्तंमयावाक्य-मिदंकरोमि ॥ एवंविमृष्यबहुधासुमतेमहीप प्रणम्यदेवांस्तुतदाचमोहिनी ॥ प्रातस्थितासूर्यविनाकृतेतु कालेदशम्याजनमोह-नाय ॥ इमानिरूपस्यविनानियुक्ते प्रहृष्टरूपामथकामपूर्णां ॥ प्रातस्थितांतांसविलोक्यमोहिनीं सहृष्टरूपोवचनंजगाद ॥ त्वया प्रतिष्ठाममचारुनेत्रे कृतात्रिलोकेषुचयत्तुसम्यक् ॥ विभेदितोरुक्मविभूषणस्य करीणसंस्थःपटहःसुघोषः ॥ दृष्टेकार्येजनःसर्वे प्र-त्ययःकुरुतेत्विति ॥ सूर्योदयस्पृशीघोषा दशमीगर्हितातदा ॥ सचाभृत्युदयन्नृणां मोहनायभविष्यति ॥ मोहनाद्व्रतनिष्पत्ति र्भविष्यतिचयत्फलं ॥ भविताभवितादेवि तत्रसर्वंनसंशयः ॥ मयाचपापिनांतेषां शासनार्थंपटेक्षरैः ॥ भविष्यतिलिपिंसुभ्रु अलं-घ्यदेवदानवैः ॥ योगोदशम्यारविनाचयुक्तः प्रसिद्धयेतद्भुवनत्रयेस्मिन् ॥ विहायतांमत्पितृयोगयुक्तां पटेस्थितांदश्यतिदश्यसं-ज्ञे ॥ समंहितेनामविशालनेत्रे संमोहिनीत्येवजनोब्रवीति ॥ विमोहयित्वाजननंसमस्तं पटेमदीयेलिखितंकरोषि ॥ दृष्टिस्त्वने-नैवहिकर्मणाते स्थानंस्वकंगच्छसुचारुनेत्रे ॥ इत्येवमुक्त्वातपनस्यपुत्रः प्रशंस्यतांब्रह्मसुतांप्रहृष्टः ॥ जगामदेवैःसहनाकलोकं करे गृहीत्वासतुचित्रयुग्मं ॥ गतेषुदेवेषुविमोहिनीसा विमोहयामासजगत्समस्तं ॥ प्राप्तंसमास्थायदिनेशहीनं प्रध्वंसनंसर्वसुपुण्यग-जन् ॥ इतितेकथितंराजन् पुराणंपापनाशनं ॥ रुक्मांगदस्यचरितं सर्वदुःखक्षयंकरं ॥ श्रोतव्याश्रद्दधानेन परंस्वस्त्ययनंशिवं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणानान्तेनपापानि विलयंयान्तिमानद ॥ सूर्योदयेतमोयद्वद्गुहायामपिसंस्थितं ॥ धन्यंयशस्यमायुष्यं सर्वशत्रुनिवर्हणं ॥
श्रोतव्यंराजपुत्रेण श्रद्दधानेनपार्थिव ॥ जयान्विताविशेषेण शौर्यस्यचविवृद्धये ॥ श्रोतव्यंब्राह्मणैराजन्‌ पुत्रपौत्रशुभावहं ॥ अ-
पुत्रोलभतेपुत्रं धनार्थीधनमुत्तमं ॥ विद्यार्थीलभतेविद्यां शृण्वञ्चरितमादितः ॥ रुक्मांगदस्यभद्रन्ते राजसूयफलप्रदं ॥ कथितं
तेमयाभूप किमन्यच्छ्रोतुमिच्छसि ॥ बशिष्ठवचनंश्रुत्वा मान्धाताराजसत्तमः ॥ पप्रच्छेदंमहाबाहुर्निश्चयार्थंमहायशाः ॥ एका-
दश्यांतदाराजा चक्रवर्त्तिर्महाबलः ॥ मान्धाताउवाच ॥ भगवन्द्वादशीकल्पं यथावद्वक्तुमर्हसि ॥ उपोष्याकाभवेत्पुण्या कामु-
पोष्याथपातकं ॥ बशिष्ठउवाच ॥ दशमीशेषसंयुक्तामुपोष्यैकादशीफलात्‌ ॥ संवत्सरकृताज्जन्तुः सुखाद्धीयेतपार्थिव ॥ दशमी
शेषसंयुक्ता गान्धार्यासमुपोषिता ॥ तस्याःपुत्रशतंनष्टं तस्मात्तांपरिबर्जयेत ॥ दशम्येकादशीयत्र तत्रसंनिहितोनरः ॥ एका-
दशीचपुण्याच तत्रसंनिहितोहरिः ॥ पूर्वविद्धामयायातु पित्रेकर्मणिगण्यते ॥ कलार्द्धेनापिविद्धास्याद्दशम्येकादशीचया ॥
तदाह्येकादशींत्यक्त्वा द्वादशीसमुपोषयेत्‌ ॥ द्वादश्यामुपवासेतु त्रयोदश्यांतुपारणे ॥ एकादशीऋक्षीणांतु द्वादशीचक्रपाणि-
नः ॥ एकादशीयदानस्यादुपोष्याद्वादशीतदा ॥ एकादश्याकलात्वेका द्वादश्यास्तुकलाद्वयं ॥ द्वादशद्वादशीहन्ति त्रयोद-
श्यांतुपारणा ॥ कलाद्वयंत्रयंवापि द्वादशींचह्यतिक्रमात्‌ ॥ एकादशीमुपोषित्वा तत्रधर्मफलंलभेत ॥ एकादशीद्वादशीच ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यन्तेचत्रयोदशी ॥ भूस्पृशासातिथिर्ज्ञेया सर्वपापहराशुभा ॥ उपवासःकृतंतस्यां महापातकनाशनः ॥ एकादशीमुपोष्यैव द्वादशीमथवानृप ॥ त्रिमिश्रामपिकुर्वीत नदशम्यायुताक्वचित ॥ द्वादशीसमुपोष्यैव पक्षयोरुभयोरपि ॥ यथाशुक्लातथाकृष्णा विशेषोनास्तिकश्चन ॥ यथासुपूजितोगौरः कृष्णोवावेदविद्द्विजः ॥ सन्तारयतिदातारं द्वादशीचतथास्मृता ॥ दिनक्षयेतुसंप्राप्ते उपोष्याद्वादशीशुभे ॥ दशमीशेषसंयुक्तां नकुर्वीतकदाचन ॥ तिथिवृद्धौतथाहन्यां संप्राप्तेवादिनत्रयं ॥ संदिग्धेषुचवाक्येषु द्वादशीसमुपोषयेत् ॥ नशङ्खेनपिबेत्तोयं नहन्यात्कूर्मशूकरौ ॥ एकादश्यांनभुञ्जीत पक्षयोरुभयोरपि ॥ एकादशीद्वादशीच एकार्थेकार्यतःपृथक् ॥ नरनारायणौदेवावेकात्मानौयथाद्विधा ॥ सब्रह्महासगोघ्नश्च सुरापोगुरुतल्पगः ॥ एकादश्यांतुयोभुक्ते पक्षयोरुभयोरपि ॥ गृहस्थेनविशेषेण कार्यमेकादशीव्रतं ॥ एकादश्याविनारण्डा यतिश्चसुमहामते ॥ पचन्तीत्यन्धतामिश्रे यावदाहूतसंप्लवं ॥ नगविद्धातुयाषष्ठी शिवविद्धातुपञ्चमी ॥ दशम्यैकादशीविद्धा तत्रनोपवसेन्नरः ॥ सुपोष्याद्वादशीचैषा एकादश्याकलापिवा ॥ दिनक्षयेतुसापुण्या नदशम्याकदाचन ॥ एकादशीद्वादशीच विशेषेणत्रयोदशी ॥ तत्रक्रतुशतंपुण्यं त्रयोदश्यांतुपारणे ॥ द्वादशीद्वादशंहन्ति पूर्वविद्धाउपोषिता ॥ तस्मात्सर्वप्रयत्नेन पूर्वविद्धांविवर्जयेत् ॥ पृथिव्यांवैष्णवान्विप्रान् विष्णुशास्त्रविशारदान् ॥ चीर्णव्रतान्शुचिन्विद्वान् द्वादशींप्रतिबोधयेत् ॥ येपुराणंनजानन्ति समासान्नचलक्षणं ॥ तेषांवाक्यंन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्त्तव्यं गर्हितास्तेस्वकर्मभिः ॥ येषांनकारणंदानं नविप्रानजनार्दनः ॥ मन्वादयश्चस्मृतयस्तेषांवाक्यंपरित्यजेत् ॥ मान्धाता-उवाच ॥ विघ्नविध्वंसिनीनाम वैशाखसितपक्षजा ॥ द्वादशीकेनविधिना कर्त्तव्यावदमेगुरो ॥ किंपुण्या किंफलाब्रह्मन् भवेद्विघ्नप्रभञ्जनी ॥ केमन्त्रापूजनेस्नाने दानेचद्विजसत्तम ॥ एतत्सर्वंसमाचक्ष्व प्रसन्नोयदिमेभवान् ॥ बशिष्ठउवाच ॥ शृणुराजन्नवहितो द्वादश्याःपरमंविधिं ॥ येनविघ्नानिनश्यन्ति जन्मकोटिकृतानिवै ॥ वैशाखसितपक्षस्य संपूर्णाद्वादशीयदा ॥ भवेन्नृपतिशार्दूल बुधवारकरान्विता ॥ तदायत्नेनकर्त्तव्या ब्रतेनृपतिसत्तम ॥ एकभक्तेननक्तेन तथैवायाचितेनच ॥ कर्त्तव्यानरशार्दूल दशम्यादिदिनत्रयं ॥ द्वादश्यामुपवासस्तु गृह्णीयान्नियमंबुधः ॥ निराशनोहंद्वादश्यां संपूज्यगरुडध्वजं ॥ प्रभातेद्विजसंयुक्तं भोक्ष्येहंमधुसूदनं ॥ एवंनियमवान्स्नात्वा मध्याह्नेप्रयतात्मवान् ॥ नद्यांतडागेगर्त्तेवा गृहेवानियतःशुचिः ॥ स्नात्वासंपूजयेद्देवमुपहारबरैर्नरः ॥ ॐकेशवायनमःपादौ विघ्नविध्वंसिनेनरः ॥ नारायणायेतिशिखां माधवायचमाधविं ॥ गोविन्दायललाटंच ऊरुभ्यांविष्णुमर्चयेत् ॥ मधुसूदनायजंघेच पादौचश्रीधरायच ॥ हृषीकेशायेतिमुखं नाभिंपङ्कजनाभये ॥ दामोदरायबाहुभ्यां कृष्णायेतिशिरस्तथा ॥ त्रिभिश्चविधिवत्कृत्वा पुष्पधूपानुलेपनैः ॥ एवंसंपूज्यदेवेशं गन्धपुष्पानुलेपनैः ॥ ततस्तस्याग्रतः कुंभं सिततण्डुलपूरितं ॥ अक्षतंतण्डुलंनूनं सितबस्त्रावगुण्ठितं ॥ स्थापयेत्तत्रदेवेशं सुवर्णघटितंन्यसेत् ॥ पूर्वोक्तेनैवविधिना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूजयेत्परमेश्वरं ॥ पुष्पधूपादिनैवेद्यैर्देशकालोत्तरैःशुभैः ॥ पुष्पाञ्जलिंततोवद्ध्वा प्रार्थयेत्सुसमाहितः ॥ धर्मार्थकाममोक्षाणां वाञ्छायत्कारिताहिवै ॥ विघ्नानितानिनश्यन्तु त्वत्प्रसादाज्जनार्द्दन ॥ एवंप्रसाद्यदेवेशं तंगुरुंपूजयेन्नरः ॥ अलंकारोपहारैश्च दूर्वाश्लक्षणक्षतैस्तथा ॥ संपूज्यविधिवत्पश्चाद्देवेशंप्रतिपादयेत् ॥ उत्पत्तिस्थितिसंहार कर्त्ताभोक्ताजगन्मयः ॥ विघ्नविध्वंसकारीमे प्रीयतांमधुसूदनः ॥ अनेनविधिनादत्वा प्रणम्यचपुनःपुनः ॥ ततोदक्षिणयासार्द्धं गृहान्नीत्वासमर्चयेत् ॥ अनेनविधिनाभूप कुर्याद्विघ्नविनाशिनीं ॥ द्वादशीतस्यनश्यन्ति विघ्नानिनरपुंगव ॥ धर्मेवार्थेचकामेच मोक्षेचान्यतमेतथा ॥ अन्येषुचैवकामेषु स्वर्गभुक्तिप्रदेषुच ॥ नविघ्नोजायतेतस्य नयमेतिपरस्परं ॥ एतत्तेकथितंराजन् विघ्नविध्वंसकारणं ॥ व्रतंव्रतवतांश्रेष्ठमुक्तवीज फलप्रदं ॥ यश्चेदंशृणुयान्नित्यं पठेद्वाभक्तिभावनः ॥ सयातिपरमंस्थानं सर्वविघ्नविवर्जितः ॥ भुक्तभोगानतःप्राप्य मरणंस्मरणंहरेः ॥ ततोयातिपरंस्थानं यस्मान्नावर्त्ततेपुनः ॥ ११९ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते विघ्नविनाशिनीनाम द्वादशी चत्वारिंशोध्यायः समाप्तः ॥ ४० ॥ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५ ५

इदं पुस्तकं नेपालदेशे पं० नरदेव, मोतीकृष्ण शर्मणः आज्ञानुसारेण पं० कपिलदेव शर्मणा श्रीपाशुपत मुद्रणालयेऽङ्कितम् संवत् १९६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूचना ।

यद्यपि भाग्यवद्भोग्यानि वस्तुनि वह्वनि प्रतिजनपदं समुपलभ्यन्ते तथापि निजकुल क्षुण्णएव पन्था ज्यायानिति मन्यमानानां नेपालाभिजन महाशयानां अन्यदेशियानांच एतद्देशीय वस्त्राभरण, भाषापुस्तक, पञ्चाङ्गादीनि भि. पि. व्यवहारेणापि साध्यानि भवन्तु इतिविचार्य वाराणस्यां चौखम्बा सँस्कृत पुस्तकालयाधिपति " हरिदास-गुप्तो " युष्माभिः प्रतिपुरुषी कृतोस्ति इति—

आर्यजनानां शुभाभिलाषि—

पं० नरदेव,मोतिकृष्णशर्म्मण: " पाशुपत यन्त्रालय " नेपाल.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिलघुनारदीयपुराणान्तर्गतं रुक्माङ्गदचरितंसमाप्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नं. ९६८८७

अथलघुनारदीयपुराणान्तर्गत रुक्माङ्गदचरितप्रारम्भः

मू. २८।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विज्ञाप्तिपत्रम् ॥

पुरा महर्षिवेदव्यासेन कलियुगोद्भवाः मनुष्याः विद्यायुर्द्रव्यैश्चानेकोपद्रवैर्यज्ञयागादिकर्मकरणे समर्था न भविष्यन्ति यज्ञादिना विना स्वर्लोकप्राप्तिस्तेषां कथं भविता इति विचार्य दयालुःपरमलोकोपकारिणः महर्षिणा ते मनुष्येभ्यो यज्ञयागादिना भवबन्धनेभ्यो मुक्तोभूत्वोत्तमलोकप्राप्ता भवेयुरित्यभिप्रायेणाष्टादशमहापुराणानि कृतवान् तेषु मध्ये कानिचित् पुराणानि अतीवदुर्लभतरेण मुद्रिता नसन्ति तेषु दुर्लभतरेषुमध्येपि अष्टादशमहापुराणान्तर्गतलघुनारदीयपुराणोयं दर्शनेष्वपि दुर्लभिभूतेनायमन्धकाररूपकलेर्नाशनाय दीपस्वरूपभूतो लघुनारदीयपुराणान्तर्गत रुक्माङ्गदचरितस्य प्रकाशनाय च स्वार्यग्रन्थानां लोपोमाभूदित्यपेक्षया कलौ अपरवेदव्यासस्वरूप परमोपकारि श्रीगुरुपुरोधेति प्रसिद्ध खजाञ्चीत्युपपद श्रीजनकराजशर्मणा द्विजेन्द्रेण सर्वप्रकारेणास्मत् सहायं दत्तवान् आर्यग्रन्थार्यदेशयोरुन्नतसमृद्धौ आर्यग्रन्थस्य स्वदेशादेव प्रकाशने सर्वभावेनास्मत्सहायं ददुः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आर्यग्रन्थानुरागिजनादपि आर्यग्रन्थं स्वभूषणोयं मत्वा आग्रहंचेत कुर्वंतु तदायं नारदीयपुराणस्यान्यखण्डानपि मुद्रयामस्तथाप्राचीन दुर्लभार्यान्य ग्रन्थानपि आर्यजनसहायेन प्रकाशयितुमिच्छामः ॥

आसास्महे यदस्मिन् विचारपूर्वकं संशोधितेऽपि ग्रन्थेऽज्ञानाद्दृष्टिदोषाद्वा स्थितमस्त्यशुद्धादि तत्सारासारविवेकविद्भिर्विद्वद्भिर्दयार्द्रदृष्ट्या संशोधनीयमिति ॥

श्रीराजकीय पाठशालाध्यापक नेपालेत्युपनामक पं० जीवनाथशर्मणा संशोधिता ॥

वहुपरिश्रमेण कृत्वा लब्धत्वात्परिश्रमपूर्वक संशोधनीयकारितत्वाच्च ग्रन्थोयं पाशुपतयन्त्राधीशेन सर्वभावेन स्वायत्तीकृतमस्ति ॥

शुभाभिलाषि

पं० नरदेव, मोतिकृष्ण शर्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नारदीयपुराणान्तर्गत रुक्माङ्गदचरित खण्डस्थ विषयाना सूचिः ॥

अध्याय.		पत्राङ्क.
१	वशिष्ठंप्रति मान्धातृप्रश्न द्वादशीमहात्म्यवर्णनं एकादश्या महत्वकथनं.	१
२	सूतंप्रति शौनकादि प्रश्नस्तिथिविवर्णंचेति.	१
३	सूतंप्रति शौनकादिप्रश्न रुक्मांगदेन पार्थिवेनासमुद्रान्ते समस्तजनैरेकादश्युपवासनीयामिति पटहं अवादयत् सर्वैर्लोकैरेकादशीसेवनानन्तरं सर्वनरकसून्यं अभवत् तद्राष्ट्रेयेकेचित् मरन्ति ते गरुडारूढा विष्णोःपदं प्रयान्ति यमनारदसंवादं रुक्मांगदवर्णनं यमपरितापंचेति.	२
४	नारायणंप्रति यमचित्रगुप्तयोः सविनयं विलापः	५
५	समवर्तेः स्वेनैवात्मश्लाघा कथनं,	६
६	रुक्मांगदंप्रति ब्रह्मवाक्यं.	७
७	मोहिनी सृष्टिर्मोहिनी शिक्षा प्रख्यापनंचेति.	७
८	मोहिनीवरदानंमोहिनीमन्दरागमनंच.	१०
९	धर्मांगदवर्णनं धर्मांगदेराज्यलक्ष्मीस्थापनं रुक्मांगदमन्दरगमनं.	११
१०	मन्दरेवामदेवरुक्मांगदसंवादो नृपः केनकर्मणावासुन्दर्योमांमदनेवप्रति भाति.	१२
११	वामदेवेन रुक्मांगदपूर्ववृत्तान्तकथनं राजामन्दरपर्यटनावसरे मोहिन्यासप्तस्वरविसिष्टगीतश्रवणम् पश्चात् मोहिनिरुक्मांगदसमागमः	१४
१२	मोहिनी रुक्मांगदसंवाद स्ववंशवर्णनं मोहिनीवरदानं.	१६
१३	नगरंप्रति मोहिन्यानयनं.	१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १ ॥

अध्याय.	पत्रांक.
१४ ततो महारण्येगच्छतस्तु कस्मिंश्चित् शुष्कपर्णपूरिगरंध्रेमुशली तिष्ठति दैवयोगेन शैन्धवखुरेण विदलीकृतासाहाहेत्यवदत् तदनंतरं शीतलतोयमानीय तामासिञ्चयत् चेतनाप्राप्तासाह्यात्मवृत्तंन्यवेदयत् नृपेण तस्मै विजयासंभवपुण्यंदत्तवान् तदनंतरं सादिव्यरूपाजातेति	१८
१५ नगरप्रवेशानंतरं पुत्रानुशासनं	२१
१६ पितुरादेशान्मोहिनीसेवनंमोहिन्याअनेकाभरणवस्त्रदानम् संध्यावलिप्रबोधनम् साकलपुराधिवाशि ब्राह्मणगणिकयोर्वृत्तान्तकथनम्	२२
१७ मोहिनीभोजनेच्छया भांडवीक्षणम् षड्रसकरणम्. राजोपार्जितव्यंजनादिनाभोजनं मोहिनिसंध्यावल्योःसंवादे-मोहिनी एवंगुणान्वितस्यास्याहंजुगुप्साकर्तुसमर्थाभवामीवान वेतिचिंता समाकुलाशीघ्रमाहरनृपंतेन रहितामुहूर्तमपि नातिष्ठामीत्यब्रवीत्	२५
१८ नृपस्तदन्तिकंप्राप्य किंकारणेनाहूतासीत्यभाषत तच्छ्रुत्वा निष्प्रयोजनमानीताक्षीरसागरमहूरात्. इत्यादिवाक्यै नृपं समर्थेतनयेपिराज्यभारंवीक्षसे संध्यावलीसमात्रैलोक्येनारीदुर्लभा पतिव्रता मांभस्मकरणेसमर्था वहुनाकिमिहोक्तेनतदनंतरं धर्मांगदेनसर्वामातरःसंबोधनम	२९
१९ रुक्माङ्गदक्रीडावर्णनं धर्माङ्गदप्रतापवर्णनं लोकसुखकथनंच	२९
२० धर्माङ्गदविद्याधरयोर्युद्ध धर्माङ्गदविजयोविद्याधरकन्याहरणंच	३०
२१ धर्मांगदविजयवर्णनं धर्मांगदविवाहकरणं प्रजापालनंच.	३१
२२ रुक्मांगदेन सर्वकर्मक्रियां त्यक्त्वाप्येकादशीसेवनंनत्यक्तवानितिवर्णनं.	३३

॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्याय.	पत्रांक.
कार्तिकमासमाहात्म्यकथनंच.	
२३ चातुर्मास्यव्रतवर्णनम्	३५
२४ रुक्मांगदमोहिन्योः संवादेराजन्यदि मेप्रीतोसि चेद्धरिवासरे नृपव्रतभंगे-मोहिनीउद्योग मोहिनीसंबोधनं भोजनंकुर्वित्यादिकथनं मोहिनी कथयति गुर्विणिगृहस्थक्षीणरोगिशिशुचिरजातराजाभारवहसंग्रामाक्षितिसेविनां-पतिव्रतानांच उपवासोनयुक्त इत्यादिकथनं.	३५
२५ हरिवासरेभोजनं विहाययदन्यद्रोचसे-तत्सर्वं कर्त्तास्मीतिनृपवाक्यानंतरमे-तद्व्यतिरिक्तं किमपिनेच्छामि वेदेष्वपिउक्तमस्तीत्यादि मोहिनीवाक्यं.	३८
२६ यदिपातालाच्छीर्यते पृथ्वीजलधिःशोषमायातिहिमवान् परिवर्तयेत् उष्णत्वं पावकस्त्यजेत् तथापिनाहं हरिवासरसेवनं नत्यजामि इत्युक्तएवंधर्मराज्यो-भवस्त्वकृतकृत्यागमिष्यामीतिब्रुवतिब्रा-ह्मणैःसहजगाम एतस्मिन्नेवकाले धर्मांगदोवराश्वारूढः समाजगामकोलाहलं श्रुतवान् मोहिनीमपृच्छत देविके-नापमानितासि इत्युक्ते पूर्ववृत्तांतंकथयति.	४०
२७ ततो धर्मांगदःपितुःसमिपं गत्वाइदमूचे तात त्वां सानृतीवदति मयिजीवाति कस्मादनृती भविष्यसि दुर्लभतरमापि अस्यैप्रयच्छ नृपःप्राहकीर्तिर्नस्यतु असत्योवाभवाम्यापि हरिवासरे भोजनं नकरिष्यामीत्यादिकथनं.	४३
२८ ततो उभयोःसंविदंज्ञात्वा संध्यावली मुवाच मातरेनां शांत्वय नृपस्य हरिवासरे भोजनायस्थितांश्लक्ष्णयागिरा संध्यावली सद्वीपवनकाननंराज्यं गृहाणेत्यादिवाक्यैर्बोध्यमानापिसानबुबुधे एवंतवममचप्राणहरं तथालोकानांच	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्याय.	पत्रांक.
प्राणहरंवाक्यं तेयशःभर्तुःकीर्तिः पुत्रप्रसंसाममधिग्विवादः	४३
२९ स कीदृशंवाक्यं व्याहर आत्मनोनिधनोवा पुत्रस्यनिधनोवा भर्त्रर्थेकरोमि ममकौमारिभावे मत्पितुः काष्ठपाटक सखीभिःसहिता वनेकाष्ठपाटको यत्रास्ते तत्र मया काष्ठीलाकाष्ठमध्ये दृष्टा नवनीतनिभोदेहोमुखंचाञ्जनसंनिभं साध्वांक्षेण गृहीता सावेपमाना मूर्छनांप्राप्ता मया जलेन संसिक्ता चेतनान्विता मानुषींवाचं व्याहरत् साकळेपुरे कौण्डिन्यइत्येवसर्वकर्मयिद्ब्राह्मण आसीत् तस्य दुहिताहं कुलीनायब्राह्मणाय ददौ मद् भर्ता राजमंदिरं ययौ तत्र वेश्याः नृपगृहं प्रविशत्यस्तेनैकावेश्या समानीता मया तस्याभरणादिकं हारितं सर्वमपि क्षेत्रभांडादिकं विक्रीय नदनदीपतिं नावमारुह्य तरसा लवणोदधिं प्रविष्टोगिरिशृंगमारुरोह तालाधस्तात्ससुष्वाप तत्रागाद्राक्षसोघोरो गर्जमानोयथाघनस्तन्वंगीं काशिपतेःपुत्रींरत्नावलीमंकेनादाय आजगाम तस्य भार्या प्रश्रयोपेता अब्रवीत् पतिकामाहं पृच्छामीत्यनेकवाक्यालापकथनं:	४८
३० राक्षस्या ब्राह्मणविश्रमनं राक्षसवध कथनं काशीमहात्म्यवर्णनंचेति.	४९
३१ काशिपतये राक्षसस्य सर्ववृत्तान्त कथनं ब्राह्मणरत्नावल्योर्विवाहकरणं ब्राह्मणेन स्वज्येष्ठपत्नींमति भारवाहक प्रेषणं सखीभिर्ब्राह्मण्या निन्दावर्णनं ब्राह्मणी स्वगृहगमनंचेति.	५०
३२ संध्यावलीकाष्ठिलोपाख्यानंमाघस्नान माहात्म्यवर्णनं भीमैकादश्युपवाशफल कथनंच.	५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अध्याय.	पत्रांक.
३३ एवंचेत् देहि पुत्राशिरो मह्यं यदिष्टं हृदयाधिकं इतिमोहिन्या बचनानंतरं धनजनादिकं सर्वं त्यजामि किंतु द्वादशीसेवनं न त्यजामीति सन्ध्यावली वाक्य कथनम्.	५६
३४ राजन् धर्मपालय द्वादश्यां माभुङ्क्था पुत्रं व्यापादयेत्यादि कथनं.	५६
३५ मोहिनींप्रति राजवाक्यं राजानंप्रति धर्मांगदवाक्यं च.	५७
३६ पुत्रवचनं श्रुत्वा संध्यावल्या मुखंवीक्ष मोहिन्याः क्रूरं वचनं श्रुत्वा पुत्रनाशाय मतिं चकार शंखचक्रगदापद्महस्तो गरुडारूढो सर्वलक्षणलक्षितो नारायणदेहे सराजारुक्मांगदलीनो बभूवेत्यादि कथनं.	५९
३७ यमनारायणयोः संवाद मोहिनीसमागम वर्णनं च.	६०
३८ मोहिनी भस्मकरण वर्णनं.	६२
३९ मोहिनी भस्मकरणानंतरं विप्रप्रसादन वर्णनंचेति.	६३
४० मोहिन्यास्थाननिर्णयस्तिथिविवरणम् विघ्नविनाशिनीद्वादशी माहात्म्य वर्णनंतस्याःप्रभावकथनं चेति.	६४

इति

श्रीककारादिकालीकासहस्रनाम साङ्गोपाङ्ग

अद्य भवदग्रे हर्षदायकद्रव्यं नीत्वा ह्युपस्थितोस्मि. श्रीगुह्यकाल्या कृपया भवतां पूर्णसहायेन श्रीककारादिकालिकासहस्रनामाख्यपुस्तकं मुद्रितमस्ति सन्तिकाल्या ह्यनेकसहस्रनाम्नो लभ्यन्ते किन्त्वयं ककाराद्यप्रभृति नमुद्रित निम्नलिखितमप्यतिदुर्लभ दैववसाल्लब्धांप्यशुद्धत्वात् पाठकरणेतिकष्टः सदुखदूरीकरणायासीतिवर्षसंमितवृद्धेनापि पाठकरणेसमर्था भवेयुरित्यासयेन मुक्ताफलवन्मनोहर स्थूलाक्षरकीलकैः सुष्टुपत्रेषु ककारादिकालिकासहस्रनामाभिधानं मुद्रितमस्ति तस्मादार्यवरैरास्मिन्ग्रन्थे अवश्य प्रीतिपूर्वकसुदृष्टिंकरिष्यन्ति मूल्यमपि सर्वेषां सुखेच्छया विदेशीयकागजेषु दशाणकाः स्वदेशीयकागज़ेषु द्वादशाणकाः स्थापितमस्ति ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ ॥ पान्तुवो जलदश्यामा शार्ङ्गज्यापातकर्कशाः ॥ त्रैलोक्य मण्डपस्तंभा श्चत्वारोहरिवाहनः ॥ सुरा-
सुरशिरोरत्न निर्घृष्ट मणिरञ्जितम् ॥ हरिपादांबुज द्वंद्वमभीष्टप्रदमस्तुवः ॥ मान्धाताउवाच ॥ पापेंधनस्यघोरस्य शुष्कार्द्रस्य
तुभूरिशः ॥ कोवह्निर्दहनेतेषां तद्भवान्वक्तुमर्हसि ॥ नाज्ञातंत्रिषुलोकेषु चतुर्मुखगृहौजसः ॥ विद्यतेतवविप्रेन्द्र त्रिविधश्चसुनि-
श्चितम् ॥ अज्ञातं पातकंशुष्कं ज्ञातमार्द्रमुदाहृतम् ॥ एष्यवाप्यथवातीतं वर्त्तमानंचतद्भवेत ॥ वह्निनाकेनतद्भस्म भवेदेतद्ब्रवी
हिमे ॥ वशिष्ठउवाच ॥ श्रूयतां नृपशार्दूल वह्निनायेननिर्दहेत ॥ शुष्कार्द्रपातकंघोरं एष्यातीतसमुद्भवम् ॥ संप्राप्य वासरंवि-
ष्णो र्योनरःसंयतेन्द्रियः ॥ उपवासपरोभूत्वा पूजयेन्मधुसूदनं ॥ मान्धातर्दानशीलश्च रात्रौजागरणान्वितः ॥ विशोधयति
पापानि कितवश्चधनंयथा ॥ एकादशीसमुत्थेन वह्निनापातकेंधनम् ॥ भस्मतांयातिराजेन्द्र आजन्ममरणोद्भवम् ॥ नेदृशंपा-
वनंकिञ्चित् नराणामिहविद्यते ॥ यादृशंपद्मनाभस्य दिनंपापप्रणाशनम् ॥ तावत्पापानिदेहेस्मिन् तिष्ठन्तिमनुजाधिप ॥ या-
वन्नोपवसेज्जन्तुः पद्मनाभदिनंशुभम् ॥ अश्वमेधसहस्राणि राजसूयशतानिच ॥ एकादश्युपवासस्य कलांनार्हतिषोडशीं ॥ ए-
कादशेन्द्रियैःपापं यत्कृतंभवतिप्रभो ॥ एकादश्युपवासेन तत्सर्वंविलयंव्रजेत् ॥ एकादशीसमंपुण्यं पापत्राणंनविद्यते ॥ व्या-
जेनापिकृताराजन् नदर्शयतिभास्करी ॥ सर्वसौख्यप्रदाह्येषा सर्वारोग्यप्रदायिनी ॥ सुकलत्रप्रदाह्येषा राजन्पुत्रप्रदायिनी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नगङ्गानगयाभूप नकाशीनचपुष्करम् ॥ नचापिकौरवंक्षेत्रं नरेवानचदेविका ॥ यमुना चन्द्रभागाच पुण्याभूय हरेर्दिनात् ॥
अनायासेनराजेन्द्र प्राप्यतेवैष्णवंपदम् ॥ रात्रौजागरणंकृत्वा समुपोष्यहरेर्दिनम् ॥ दशैवमातृकेपक्षे दशराजेन्द्रपैतृके ॥ प्रि-
यायादशपक्षेषु पुरुषानुद्धरेन्नरः ॥ आत्मनासहराजेन्द्र नयनेवैष्णवंपदम् ॥ सर्वपापविनिर्मुक्तो विष्णुलोकेवसेन्नरः ॥ चिन्ताम-
णिमपिह्येषा अथवापिनिधेःसमा ॥ सकल्पपादपप्रख्या वेदवाक्योपमातथा ॥ द्वादशीतिप्रपन्नाहि नरानरवरोत्तमः ॥ तेद्वंद्वबा-
हवोजाता नागारिकृतकेतना ॥ तद्विद्यापीतवस्त्रीहि प्रयांतिहरिमन्दिरम् ॥ एषप्रभावोहिमया द्वादश्यापरिकीर्तिता ॥ पापेन्ध-
नस्यघोरस्य पावकाख्योमहीयते ॥ हरेर्दिनंसदायोष्यं नरैर्धर्मपरायणैः ॥ यदिच्छेद्विपुलान्कामान् पुत्रपौत्रादिकांस्तथा ॥ हरि-
दिनमुपवासी योनरःसंयतात्मा प्रविशतिनपुनर्वै भूपकोशेजनन्या ॥ बहुवृजिनसमेतः कामभोगाविभूतो व्रजतिपदमचिन्त्यं
लोकवन्द्यस्यविष्णोः ॥ २६ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते द्वादशीमाहात्म्ये प्रथमोध्यायः ॥ १ ॥ ७ ७
बशिष्ठउवाच ॥ इममेवमहाप्रश्नं नैमिषारण्यबाशिनः ॥ पप्रच्छुरमलासूतं व्यासशिष्यंमहामुनिम् ॥ सचस्पृष्टोमहातेजा एकाद-
श्याःसविस्तरम् ॥ माहात्म्यंकथयामास उपवासविधिक्रमात ॥ तद्वाक्यंसूतपुत्रस्य श्रुत्वाद्विजबरोत्तमाः ॥ माहात्म्यंचक्रिणोर्ह-
स्य सर्वपापःप्रशान्तये ॥ पुनःपप्रच्छुरमलाः सूतंपौराणिकंतदा ॥ अष्टादशपुराणानि भवाञ्ज्ञानातिमानद ॥ महाभारतमुक्ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नि सकासात्कालिजस्यतु ॥ तत्रास्तियत्रवेदेषु पुराणेषुस्मृतिष्वपि ॥ चरितेरघुनाथस्य शतकोटिप्रविस्तरे ॥ सोस्माकंसंशयःक-
श्चिद् हृदयेपरिवर्त्तते ॥ तद्भवानचिरेणेह प्रब्रवीतुयथार्थतः ॥ तिथेःप्रान्तमुपोष्यंहि अहोस्मिन्मूलमुच्यताम् ॥ दैवेपित्रेसमाख्या-
हि नावेद्यंविद्यतेतव ॥ सूतउवाच ॥ तिथेःप्रान्तंसुराख्यंहि उपोष्यंकवयोविदुः ॥ पैत्र्यंमूलंतिथेःप्रोक्तं शास्त्रज्ञै धर्मकोविदैः ॥
अतःप्रान्तमुपोष्यंति तीर्थधर्मफलेसवः ॥ मूलंहिपितृतृप्त्यर्थं तिथेःप्रोक्तंमनीषिभिः ॥ पूर्वविद्धाप्रकर्त्तव्या तृतीयाषष्ठिसंयुताः ॥
अष्टम्येकादशीभूता धर्मकामार्थवांछसि ॥ पूर्वविद्धाद्विजश्रेष्ठाः कर्त्तव्यासतमीसदा ॥ दर्शश्चपौर्णमासीच पितुःसांवत्सरंदिनम् ॥
पूर्ववद्धेमकुर्वाणो नरकंप्रतिपद्यते ॥ हानिश्चसन्ततेःप्रोक्ता दौर्भाग्यंसमवाप्नुयात् ॥ एतच्छ्रुतंमयाविप्राः कृष्णद्वैपायनात्पुरा ॥
ऋषीणांधर्मसंवाद स्तिथिसंदेहतेतथा ॥ आदित्योदयवेलायां यास्तोकापितिथिर्भवेत् ॥ पूर्णासात्वनुमन्तव्या प्रभूतानोदयंविना ॥
पारणेमरणेनृणां तिथिस्तात्कालिकीमता ॥ पैत्र्येस्तमपवेलायां स्पृशत्युचैवगम्यते ॥ नतत्रोदयनीग्राह्या दैवेत्युदयिनीतिथिः ॥
षडहंशोषयेत्प्राज्ञ स्तिथिंदैवज्ञचिन्तकान् ॥ तिथेःप्रमाणंविप्रेन्द्राः क्षपाकरदिवाकरौ ॥ पूर्वायासंगदोषेण नोयोष्यास्नानपूजने ॥
वर्जयन्तिनरास्तज्ज्ञायासान्तुचतुरोद्विजाः ॥ तदूर्ध्वंस्नानपूजादि कर्त्तव्यंतदुपोष्यतैः ॥ नदिवाशुद्धिमाप्नोति तदारात्रौविधीयते ॥
दिनकर्मतुशेषंहि कर्त्तव्यंसर्वरीमुखे ॥ विधिरेष समाख्यातो नराणामुपवासिनाम् ॥ अन्यायामपिविप्रेन्द्रा द्वादश्यामरुणोदये ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नानार्चनक्रियाकार्या दानहोमादिसंयुता ॥ त्रयोदश्यांहिशुद्धायां पारणेपृथिवीफलं ॥ शतयज्ञादिकंचापि नरःप्राप्नोत्यसंशयं ॥
एतस्मात्कारणाद्विप्राः प्रत्यूषेस्नानमाचरेत् ॥ पितृतर्पणसंयुक्त मल्पांदृष्ट्वैवद्वादशीं ॥ महाहानिकराह्येषा द्वादशीलंघितानृणां ॥
करोतिधर्माहरणमस्नातेच सरस्वती ॥ क्षयेवाप्यथवावृद्धौ संप्राप्ते हरिवासरे ॥ उपोष्यद्वादशीपुण्या पूर्वविद्धां विवर्जयेत् ॥ ऋ-
षयऊचुः ॥ यदानप्राप्यतेसौते द्वादश्याःपूर्वसंभवा ॥ तदोपवासोहिकथं कर्त्तव्योमानवैर्वद ॥ उपवासदिनंसूत यदाभवतिपूर्वया ॥
द्वितीयेह्नियदानस्यात् स्वल्पाप्येकादशीतिथिः ॥ सन्देहेतत्रसञ्जाते द्वादश्येकादशीभवेत् ॥ तत्रोपवासोविहितः कथंतद्वदसूतज ॥
सूतउवाच ॥ यदानप्राप्यतेविप्रा द्वादश्यांपूर्ववासरः ॥ रविचक्रार्द्धमात्रापि तदोपोष्यं परंदिनम् ॥ बह्वागमविरोधेषु विवदत्सु
द्विजेषुच ॥ उपोष्याद्वादशीपुण्या त्रयोदश्यांतुपारणम् ॥ एकादश्यांतुविद्धायां संप्राप्तेश्रवणेतथा ॥ सोपोष्याद्वादशीपुण्या स-
र्वपापक्षयावहा ॥ एषवोनिर्णयःप्रोक्तो मयाशास्त्रविनिश्चयात् ॥ किमन्यच्छ्रोतुकामाहि तद्भवन्तो बदन्तुमे ॥ ऋषयऊचुः ॥ यु-
गादीनांविधिंसूत वदस्ववदतांबर ॥ रवेःसंक्रमयोगानां नावेद्यंविद्यतेतव ॥ अमावास्याष्टकाकार्या सापिचैकानिरर्थकैः ॥ ए-
वंनसंशयंस्पृष्ठो वक्तुमर्हसिसूतज ॥ सूतउवाच ॥ द्वेशुक्लेद्वेतथाकृष्णे युगाद्ये कवयोविदुः ॥ शुक्लेपूर्वाह्णिकेग्राह्ये कृष्णेग्राह्येपरा-
ह्णिके ॥ अयनंदिनभोगाढ्यं संक्रमःषोडशःकला ॥ पूर्वाक्कदक्षिणेभागे अतीतेचोत्तरायणे ॥ मध्यकालेतुविषुवे उदयाख्यःप्रकी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तितः ॥ ज्ञात्वातिथिंनराःसम्यक् संवत्सरनिवेदिताम् ॥ कर्त्तव्यउपवासस्तु अन्यथा नरकंव्रजत् ॥ पूर्वविद्धांप्रकुर्वाणो नरोधर्मं
निकृन्तनी ॥ सन्ततेस्तुविनाशाय संपदोहरणायच ॥ परवेधोपिविप्रेन्द्रा दशम्येकादशींत्यजेत् ॥ सुरायाविन्दुनास्पृष्टंगंगांभइव
संत्यजेत् ॥ श्वदृष्ट्यापञ्चगव्यंच दशम्यादूषितांत्यजेत ॥ एकादशींद्विजश्रेष्ठाः पक्षयोरुभयोरपि ॥ पूर्वविद्धाःपुरादत्ता तिथयःकु-
शकेतुना ॥ दानवेभ्योद्विजश्रेष्ठाः प्रीणनार्थंमहात्मना ॥ अकालेयद्भवेद्दत्तं अपात्रेचद्विजोत्तमाः ॥ सक्रोधैश्चैवयद्दत्तं तद्दत्तम-
सुरेषुवै ॥ यदुच्छिष्टेनदत्तंवै यद्दत्तंपतितेषुच ॥ स्त्रीजितेषुच यद्दत्तमसूरेषुच यद्भवेत् ॥ यदेकवाससादत्तं यद्दत्तं जलवर्जितम् ॥
पुनःकीर्त्तनसंयुक्तं तद्दत्तमसुरेषुवै ॥ तस्माद्विप्रानविद्धाहि कर्त्तव्यैकादशीक्वचित् ॥ विद्धाहान्तिपुरापूर्वा श्राद्धेचवृषलीपतिः ॥
जसंदत्तंहुतंस्नातं तथापूजाकृतंहरेः ॥ पूर्ववेधेक्षयंयाति तमःसूर्योदयेयथा ॥ जीर्णंपतिंयौवनगर्विता यथा त्यजन्तिनार्यो झष-
केतनार्दिता ॥ तथाहिवेधं विबुधात्यजन्ति तिथेर्द्विजाधर्मं विशुद्धयेसदा ॥ ४८ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गद च-
रिते तिथिविवरणं नाम द्वितीयोध्यायः ॥ २ ॥ छ छ छ छ छ छ छ छ
ऋषयऊचुः ॥ विस्तरेणसमाख्याहि विष्णोराराधनक्रियां ॥ ययासन्तोषमायाति प्रददातीसमीहितम् ॥ पूजितापरयाभक्त्या प-
वित्रैरप्युपक्रमै ॥ लक्ष्मीकान्तोजगन्नाथो निःशेषाघौघनाशनः ॥ सूतउवाच ॥ भक्तिग्राह्योहृषीकेशो नधनैर्धरणीसुराः ॥ भक्त्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संपूजितोविष्णुः प्रददातिसमीहितम् ॥ तस्माद्विप्राःसदाभक्तिः कर्त्तव्याचक्रपाणये ॥ जलेनापिजगन्नाथः पूजितःकेशिहाहरिः ॥
परितोषंव्रजत्याशु तृषार्त्तःसुजलैर्यथा ॥ अत्रापिश्रूयतेविप्राः आख्यानंपापनाशनम् ॥ रुक्माङ्गदस्यसंवादं ऋषिणागौतमेनह ॥
आसीद्रुक्माङ्गदोराजा सार्वभौमश्रियान्वितः ॥ भक्तःश्रीरक्षयेदेव नित्यतृष्णेनिरञ्जने ॥ नान्यंपश्यतिदेवेशात् पद्मनाभान्महीप-
तिः ॥ वारणंपट्टनंयज्ञे ददातिहरिवासरे ॥ अष्टवर्षाधिकोमर्त्य स्त्वशीतिर्नहिपूर्यते ॥ योभुङ्क्तेमामकेराष्ट्रे विष्णोरहनि पापकृत ॥
समेबध्यश्चदण्ड्यश्च निर्वास्येविषयाद्धनम् ॥ पितावायदिवापुत्रो भार्यावाप्यथवासुहृत् ॥ पद्मनाभदिनेभुङ्क्ते निग्राह्योदस्युवद्भ-
वेत् ॥ ददध्वंविप्रमुख्येभ्यो श्नायध्वंजाह्नवीजले ॥ एवंमद्वचनंकुर्वन नाश्नंभुनक्तुमामकं ॥ वासरेवासरेविष्णोः शुक्लपक्षेमहीप-
तिः ॥ अशुक्लेतुविशेषेण पटहंवादयत्यसौ ॥ एवंप्रघुष्टपटहे सार्वभौमेद्विजोत्तमाः ॥ गच्छाद्भिःसंकुलोमार्गः कृतोलोकैर्हरेर्द्विजाः ॥
येकेचिन्निधनंयान्ति भूपालविषयेनराः ॥ प्रमदावाद्विजश्रेष्ठा स्तेयान्तिहरिमन्दिरम् ॥ अवश्यं वैष्णवोलोकः प्राप्यतेवैनरैर्ध्रुवं ॥
व्याजेनापिद्विजाःकृत्वा द्वादशींपापनाशिनीं ॥ सोश्नातिपार्थिवंपापं योश्नातिहरिवासरे ॥ प्राप्नोतिपरमंधर्मं योनाश्नातिहरेर्दि-
ने ॥ ब्राह्मणोनैवहन्तव्यो इत्येषा वैदिकीश्रुतिः ॥ एकादश्यांनभुञ्जीत पक्षयोरुभयोरपि ॥ वैलक्ष्यमगमद्राजा रविसूनुर्द्विजोत्त-
माः ॥ लेख्यकर्मणि विश्रान्त श्चित्रगुप्तोभवत्तदा ॥ मार्जितानिचलेख्यानि पुण्यपापोद्भवानिच ॥ गच्छद्भिर्वैष्णवंलोकं स्वक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्मर्त्यैर्जनैः क्षणात् ॥ शून्यास्तुनरकाःसर्वे पापप्राणि विवर्जिताः ॥ भग्नोयाम्योभवन्मार्गो द्वादशादित्यतापितः ॥ सर्वेपिगरुडारूढा जनायांतिहरेक्षयम् ॥ दिवौकसस्तुयेलोकाः शून्यासर्वेतदाभवत् ॥ त्यक्त्वैवपितृदेवेभ्यो तीर्थदानादि सत्क्रियाः ॥ मुक्तेकांद्वादशींमर्त्या नान्यंजानन्तिचेदृशीं ॥ शून्येत्रिविष्टपे जाते शून्येषुनरकेषुच ॥ नारदोधर्मराजानं गत्वाचेदमभाषत ॥ नाक्रन्दः श्रूयते कस्मान्नराणां नरकेतव ॥ नचापिक्रियते लेख्यं किञ्चिद्दुष्कृतकर्मणाम् ॥ चित्रगुप्तो मुनिरिव स्थितोयं मौनसंयुतः ॥ कारणं ब्रूहि राजेन्द्र नयान्ति तव मन्दिरम् ॥ मानवाः पापकर्माणो कलिमाया समन्विताः ॥ एवमुक्ते तु वचने नारदेन महात्मना ॥ प्राह वैवस्वतो राजा किञ्चित् दैन्य समन्वितः ॥ आर्य नारद भूपालः पृथिव्यां सांप्रतंस्थितः ॥ सद्भिभक्तो हृषीकेशे पुराणे पुरुषोत्तमे ॥ पुरोधयति विप्रेन्द्र सकलं पटहेनहि ॥ नभोक्तव्यं नभोक्तव्यं संप्राप्ते हरिवासरे ॥ यः कश्चिन्मनुजो भुङ्क्ते समेदण्ड्यो भविष्यति ॥ तद्भयाद्द्विजनाःसर्वे द्वादशींसमुपासते ॥ व्याजेनापिद्विजश्रेष्ठ द्वादशीसमुपोषिता ॥ प्रयातिवैष्णवंलोकं दाहप्रलयवर्जितम् ॥ द्वादशीसेवनाल्लोकाः प्रयान्तिहरिमन्दिरम् ॥ तेनराज्ञाद्द्विजश्रेष्ठ सर्गोलुप्तो मयाधुना ॥ कृताहिनरकाःशून्या लोकाश्चत्रिदिवौकसां ॥ विश्रान्तंलेखकंलेख्यं लिखितंमार्जितंजनैः ॥ एकादश्युपवासस्य माहात्म्यंत्वीदृशंमुने ॥ ब्रह्महत्यादिपापानि नभुक्तानिजनैर्द्विज ॥ समुपोष्य दिनंविष्णोः प्रयान्तिपरमांगतिं ॥ सोहंकाष्ठम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योभूत्वा मृगाधिपइवाधुना ॥ निर्विषोनेत्रकर्णौवा सन्ध्याहीनोथवाद्विजः ॥ स्त्रीजितस्तुपुमान्यद्वत् षण्डोवाप्रमदापतिः ॥ त्यक्तुकामस्त्वहंब्रह्मन् लोकपालत्वमीदृशम् ॥ यास्यामि ब्रह्मभवनं धात्रेकथयितुंस्वयं ॥ निर्व्यापारोनियोगीतु नियोगे तिष्ठतेतु यः ॥ स्वामिवित्तंसमश्नातः सयातिनरकंध्रुवम् ॥ सूतउवाच ॥ एवमुक्तायमोविप्रा नारदेनसमन्वितः ॥ ययौविरिंचिभवनं चित्रगुप्तान्वितोविभुः ॥ सददर्शसमासीनं मूर्त्तामूर्तैःसमावृतम् ॥ वेदाश्रयंजगद्बीजं सर्वेषां प्रपितामहं ॥ स्वयंभूताब्जनिलयमोंकाराक्षरमव्ययं ॥ शुचिःशुचिपरंहंसं तुरीयंब्रह्मलाञ्छनं ॥ उपास्यमानंविबुधै र्लोकपालैर्दिगीश्वरैः ॥ इतिहास पुराणैश्च वेदैर्वै विग्रहस्थितैः ॥ मूर्त्तिमद्भिःसमुद्रैश्च नदीभिश्चसरोवरैः ॥ देहवद्भिस्तथावृक्षै रश्वत्थाद्यैरशेषतः ॥ वापीकूपतडागैश्च मूर्तिमद्भिश्च पर्वतैः ॥ अहोरात्रैस्तथापक्षै र्मासैःसंवत्सरैर्विभुः ॥ कलाकाष्ठानिमेषैश्च ऋतुभिश्चायनैर्युगैः ॥ मन्वन्तरैस्तथाकल्पै र्निमेषोन्मेषकैस्तथा ॥ ऋक्षैर्योगैश्चकरणैः पौर्णमास्यान्तमिश्रपैः ॥ सुखैर्दुःखैर्द्विजश्रेष्ठा लाभालाभैर्जयाजयैः ॥ अश्वमेधादिभिर्यज्ञै र्मूर्त्तिमद्भिरुपासितं ॥ सत्यानृताभ्यांपापेन धर्मेणोपास्यतेविभुः ॥ कर्मबद्धैश्चपुरुषै रात्मभूतैरुपास्यते ॥ सत्वेनरजसाचैव तमसाचपितामहं ॥ शान्तमूढातिघोरैश्च विकारैःप्राकृतैर्विभुः ॥ इन्द्रियैर्विषयैश्चैव मूर्त्तिमद्भिरुपास्यते ॥ वायुनादेवदेवेशः श्लेष्मापित्तादिभिस्तथा ॥ आनन्दरूपेणविभुः परमेनसमन्वितः ॥ अनुक्तैरपिभूताद्यैः संवृतोलोककृद्विभुः ॥ देवविप्रैर्मुनिवरै रितिहासैःस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मभिः ॥ दुरुक्तकटुवाक्यैश्च मूर्त्तिमद्भिरुपास्यते ॥ तेषांमध्येविशच्छौरिः सचीदेववधूर्यथा ॥ विलोकयं धरास्पृष्टं नालमुक्तंतु किञ्चन ॥ तंप्रविष्टं यमंदृष्ट्वा सकायस्थंसनारदम् ॥ तेविस्मितामिथश्चोचुः किमयं भास्करिस्त्विह ॥ संप्राप्तो लोककर्त्तारं द्रष्टुंदेवं पितामहं ॥ निर्व्यापारःक्षणमपि योयंनास्तेरवेःसुतः ॥ सोयमद्यागतःकस्मात् कच्चित्क्षेमंदिवौकसां ॥ आश्चर्यातिशयंमन्ये संमार्जितपटस्त्वयं ॥ सलेखकस्तुसंप्राप्तो दैन्येनमहतावृतः ॥ नकेनचित्पटोह्यस्य मार्जितोधर्मभूरिणा ॥ यन्नदृष्टंश्रुतंवापि तदिहैवप्रदृश्यते ॥ एवंकथयतांतेषां भूतानां भूतशासनः ॥ निपपातप्रतोभूमौ ब्राह्मणोरविनन्दनः ॥ मूलंकृतोयमाशाखी त्राहि त्राहि रुदाभिच ॥ पटाभूतास्मि देवेश संमार्जितपटःकृतः ॥ त्वयानाथेनसकलं पश्यामिकमलासन ॥ सूतउवाच ॥ एवंब्रुवन्मुनिश्रेष्ठो वभूवद्विजसत्तमाः ॥ ततोहलहलाशब्दः सभयं समपद्यत ॥ योहिनोदयते सर्वान् लोकांस्थावरजङ्गमान् ॥ सोयं रोदितिदुःखार्त्तः कस्माद्वैवस्वतोयमः ॥ सत्येयंलौकिकीगाथा सर्वथाप्रतिभातिनः ॥ जनसंतापकृत्ताप मचिरेण प्रपद्यते ॥ नहिदुष्कृतकर्त्ताहि नरःप्राप्नोतिशोभनं ॥ ततोनिवारयामास वायुस्तेषां वचस्तदा ॥ लोकानांसमवेत्तानां मतंज्ञात्वाहि वेधसः ॥ निवार्यलोकसंलापं शनैरुत्थापयंहरिः ॥ भुजाभ्यां साधुपीनाभ्यां लोकमूर्तिरुदारधीः ॥ विह्वलं तस्यचायान्तमासने संन्यवेशयत् ॥ सकायस्थमुवाचेदं व्योमव्यापी रवेःसुतं ॥ केनत्वमभिभूतोसि केनस्थानाद्विवासितः ॥ केनापमार्जितोदेव पटोलोक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 पटस्तव ॥ ब्रूहिसर्वमशेषेण कुशकेतोस्त्वमग्रतः ॥ यःप्रभुस्तात सर्वेषां सतेकर्त्तासमुन्नतिं ॥ अपनेष्यति मार्त्तण्डो दुःखन्तिह-
 दिसंस्थितं ॥ सएवमुक्तस्तु समीरणेन दिनेशसूनुस्तमथाबभाषे ॥ विलोक्यवक्त्रं कुशकेतुसूनो सगद्गदं मन्दमुवाचमन्दः ॥
६६ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते यमपरितापो नामः तृतीयोध्यायः ॥ ३ ॥ ७ ७ ७ ७ ७
यमउवाच ॥ शृणुमेवचनं शंभो पितामहपितामह ॥ मरणादधिकंदेव यत्प्रतापस्यखण्डनं ॥ नियोगीनांनियोगंयः करोतिकम-
लासन ॥ प्रभोर्वेत नमश्नाति सभवेत्काष्ठकीटकः ॥ योहिलोभाद्धरेर्वित्तं प्रजाभ्योवामहामते ॥ नियोगीनरकंयाति यावत्क-
ल्पशतत्रयं ॥ निस्पृहोनाचरेद्यस्तु नियोगंपद्मसंभव ॥ कृमिकूपेखलुलुठन् सदासनरकेवसेत ॥ आत्मकार्यपरोयस्तु स्वामिकार्यं
विलुंपति ॥ भवेदश्मनिपापात्मा आखुः कल्पशतत्रयं ॥ नियोगीयस्तुभूत्वावै स्ववेश्मनिचयोजयेत् ॥ भक्त्यावैकर्मकरणे मा-
र्जारो जायतेनरः ॥ सोहंदेवतवादेशात् प्रजाधर्मेणशासयन् ॥ पुण्येनपुण्यकर्त्तारं पापान्यायेनकर्मणा ॥ सम्यग्विचार्यमुनिभि
र्भवाद्भिश्वसदाप्रभो ॥ कल्पादौवर्त्तमानस्ययावदद्यादिनंगतं ॥ सोहंत्वदीयंहिविभो नियोगंनैवसक्नुयां ॥ रुक्माङ्गदेनतेभग्नो नि-
योगोभूभुजाक्षितौ ॥ भयाद्यस्यजगन्नाथ पृथिवी सागरांबरा ॥ नभुङ्क्तेवासरेविष्णोः सर्वपापप्रणाशने ॥ विहायसर्वधर्मास्तु वि-
हायपितृपूजनं ॥ विहायदेवपूजाउ सर्वतीर्थादिसत्क्रियां ॥ योगसांख्यावुभौत्यक्त्वा तथाप्राणनिरोधनं ॥ त्यक्त्वास्वाध्यायहोमौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु कृत्वापापानिभूरिशः ॥ प्रयाति वैष्णवंलोकमुपोष्य हरिवासरे ॥ मनुजाःपितृभिःसार्द्धं तथैवचपितामहैः ॥ तेषामपिहिपितरः पितृणांपितरस्तथा ॥ तथामातामहायान्ति मातुर्येजनकास्तथा ॥ तेषामपिजनेतारो जनितृणांचपूर्वशः ॥ एतद्दुःखं पुनर्देव ममम्स्तकभेदनं ॥ यत्पूर्वेपितरोयान्ति मार्जयित्वा लिपिंमम ॥ पितृणांवीजयोयेस्युः र्द्धात्र्याःकुक्षौ धृताविभो ॥ यदेकेन कृतंकर्म तदेकेनैवभुज्यते ॥ तंनिरस्यकृतंदेव वीजंधान्य समुद्भवं ॥ तारयेत्सउभौपक्षौ ध्वंसितोयस्यविग्रहः ॥ वीजभोक्ताभवेत्सोमो धाताधार्य विसोदरे ॥ एतस्यात्सक्षयुग्मंतु वारयेन्नरपुंगवः ॥ नभार्यायाभवेद्वीजं नभार्याकुक्षिधारणं ॥ कथंतस्याजगन्नाथ पक्षोयातिपरंपदं ॥ यामातुः पुण्यमाहात्म्यं नूनंमेशिरसोव्यथा ॥ नमेप्रयोजनंदेव योगेनशद्दशेनवै ॥ एकादश्युपवासीयः समांत्यक्लाहरिंव्रजेत् ॥ कुलत्रयं समुद्धृत्य स्वात्मनासहपद्मज ॥ त्यक्लातुममार्गंतु प्रयान्ति हरिमन्दिरं ॥ नयज्ञैस्तादृशं देव गतिमाप्नोति मानवः ॥ नतीर्थैर्नापिदानाद्यै र्नव्रतैर्विष्णुवर्जितैः ॥ नजलैः पावकैश्चापि मृतःप्राप्नोतितांगतिं ॥ योगैर्वासं युगैर्वापि भृगोर्वा पतनैस्तथा ॥ यादृशंसमवाप्नोति उपोष्यहरिवासरं ॥ गतिंगतिमतांश्रेष्ठ सत्यमेतदुदीरितं ॥ हरेर्दिनेधातृकलांगलिप्तो विमुच्यवांछारसभोजनोद्भवं ॥ प्रयातिलोकं धरणीधरस्य विभ्रष्टकर्मापिमनुष्यजन्मा ॥ सोहंनिरासस्तु विहीनकर्मा तवागतःपादसरोजयुग्मं ॥ विज्ञप्तमत्रादि यदाप्तकालं कुरुष्वसर्गस्थितिनाशहेतोः ॥ येस्युःसदापापकृतो विहीना यन्मामकैर्भू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तगणैर्मनुष्याः ॥ नियन्त्रिताःशृङ्खलरज्जुबन्धनैः समीपगास्तेवशगाभवेयुः ॥ भग्नस्तुमार्गो रवितापयुक्तः सदुःखदातातितरांज-
नेभ्यः ॥ विमुच्यकुंभी सकलाजनौघाः प्रयान्ति तद्धाम परात्परस्य ॥ २६ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते य-
म विलापोनाम चतुर्थोध्यायः ॥ ४ ॥ ⁂ ⁂ ⁂ ⁂ ⁂ ⁂ ⁂ ⁂ ⁂ ⁂ ⁂
यमउवाच ॥ दृश्यतांसमनुप्राप्तः पन्थादेबस्यचक्रिणः ॥ कुत्सितैर्गच्छमानैस्तु नरैस्त्रिभुवनार्चितैः ॥ अप्रमाणमहंमन्ये लोकंवि-
ष्णोर्जगत्पते ॥ योह्यपुण्यजनौघैस्तु नसंघोयातिखर्वतां ॥ माधवैःसेवनेहंस समस्तेन पितामह ॥ स्वकर्मस्थाजनाः सर्वे शुचयो
व्याप्यवृत्तयः ॥ उपोष्यवासरंविष्णो र्लोकंयान्ति नृपाज्ञया ॥ सोस्माकंचमहाशत्रु र्भवतांचविशेषतः ॥ निग्राह्योयंजगन्नाथ भ-
वेद्दण्ड्योमहीपतिः ॥ तेनवर्षसहस्रेण शासनात्क्षितिमण्डलं ॥ अप्रमेयोजनोनीतो वैकुण्ठंहरिवल्लभं ॥ आरोपयित्वागरुडे कृत्वादे-
हंचतुर्भुजं ॥ पीतवस्त्रपरीधानं स्रग्विणं चारुलोचनं ॥ यदिस्थास्यातिदेवेशे सोद्यत्वांमाधवप्रियः ॥ समस्तमेष्यतेलोकः पार्थि-
वोनात्रसंशयः ॥ एवं दण्डपटोह्येष तवपद्ध्यांनियोजितः ॥ लोकपालत्वमेतत्तु मार्जितंतेनभूभुजा ॥ रुक्माङ्गदेन देवेश ध-
न्यासासधृतोयया ॥ सर्वदुःख विनाशाय मात्राजातोगुणाधिकः ॥ किमपत्येनजातेन मातुःक्लेशकरेणहि ॥ यो नतापयतेशत्रूं
ज्येष्ठमासिविभास्करः ॥ वृथास्त्रीभाववन्ध्यासौ जातावेवकुपूरुषः ॥ प्रोच्यते मातृहासद्भि र्वृथातस्यैवजीवितं ॥ यस्यनस्फुरतेकी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्ति घनस्थेवशतह्रदाः ॥ यःपितुर्नोद्धरेत्पक्षं विद्ययावावलेनवा ॥ मातुर्जठरजोरोगः सप्रसूतोधरातले ॥ धर्मेचार्थेचकामेच प्रती-
तोयोभवेत्सुतः ॥ पापहासस्यते सद्धि मेवदूतागोचरोहिसः ॥ एकैवबीरसूर्लोके विरिंचेनात्रसंशयः ॥ ययारुक्मांगदोजातो म-
ल्लिपेमार्जनायवै ॥ नेदंव्यवसितंदेव केनचित्क्षितिपेनहि ॥ पुराणेपि जगन्नाथ नश्रुतंपटमार्जनं ॥ सोहंनजीवामि जगत्पतेद्य
दृष्ट्वाक्षितीशं हरिततपरंतं ॥ प्रवादयन्तं पटहंसुघोरं प्रलोपयन्तं ममदेशमार्गं ॥ १७ ॥ इतिश्री लघुना० रु० पञ्चमोध्यायः ॥ ५॥
ब्रह्मोवाच ॥ किमाश्चर्य्यंत्वयादृष्टं कथंवाखिद्यतेत्वया ॥ सद्गुणेष्वपियस्तापः सतापोमरणांतिकः॥ यस्योच्चारणमात्रेण प्राप्यतेपर-
मंपदं ॥ तद्रुपोष्यकथंशौरे र्नगच्छंति नरोदिवं ॥ एकोपिकृष्णस्यकृतःप्रणामो दशाश्वमेधावभृथेनतुल्यः ॥ दशाश्वमेधीपुनरेति
जन्म कृष्णप्रणामी नपुनर्भवाय ॥ कुरुक्षेत्रेणकिंतस्य किंकाश्यासेवयाथवा ॥ जिह्वाग्रेवर्त्ततेयस्य हरि रित्यक्षरद्वयं ॥ ब्राह्मणःस्वा
पचींगच्छन्नविशेषेणरजस्वलां॥ अश्नातिसुरयापक्वं मरणेहरिंसुचरन् ॥ प्राणहिंसारतासर्वे मिथ्यावादसमन्विताः ॥ अभक्षाशनसं
जातं विहायाघौघसंचयं ॥ हरेरुच्चारणादेव वैकुण्ठमातियांतिहि ॥ प्रयातिविष्णुसायुज्यं विमुक्तोभवकिल्विषैः ॥ यस्योच्चारेभवे-
न्मोक्षः कथंतस्याउपोषणैः ॥ येनासोगीयतेसोपि विन्दते पुरुषोत्तमं ॥ लीलयाप्राचरेदेवं शृण्वन्वापि जनार्दनं ॥ गंगांभःप्लुत
पुण्यत्वे सनरःसमतांव्रजेत् ॥ अस्माकंतुजगन्नाथो जनितापुरुषोत्तमः ॥ कथंदूषयासिप्राज्ञ तस्यवासरसेविनम् ॥ यस्त्वंनचूर्णि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

के भक्षतेकल्पसंस्थितः ॥ तस्मान्नवीक्षयेन्नारीं वधूंवास्वसुतामपि ॥ साभिलाषेणमनसा पततेनरकेयतः ॥ एवंसंचिन्तयित्वाच सूक्ष्मांदृष्टिंचकारह ॥ यदिदंवर्तुलंवक्रं सोन्नतंदृश्यतेशुभं ॥ अस्थिपञ्जरमेतद्धि चर्म्ममांसावृतंतथा ॥ वसामेदोस्थिनयने सोज्वलेस्त्रिषुसंस्थिते ॥ अत्युच्छ्रितमिदंमांसं यत्स्तनाख्यं व्यवस्थितं ॥ निर्मांसतांदर्शयति त्रिवलिजठराश्रिता ॥ पुनरेवाधिकांक्षिप्तमांसंजघनकर्म्माणि ॥ मूत्रद्वारमिदंगुह्यं यत्रमुग्धंजगत्त्रयं ॥ अपानवायुनाजुष्टं सर्वदैवातिकुत्सितं ॥ षडङ्गञ्चकृतातद्धज्जंघातद्धकृताध्रुवं ॥ गुल्फास्थितलितंमांसैः कथंसुन्दरतांव्रजेत् ॥ मांसमेदोवसासारं किंसारंदेहिनांवद ॥ विष्टामुत्रमयेकोषे कएवंरज्यतेबुधः ॥ एवंविरिंचिर्वहुधा विचार्य्यज्ञानचक्षुषा ॥ कृत्वाधैर्य्यमुवाचेदं तांनारींगजगामिनीं ॥ यथाहिमनसासृष्टा मयात्वंवरवर्णिनी ॥ तथाभूतासिचार्वंगि मनसोन्मादकारिणी ॥ तमुवाचहसन्वाला प्रणम्यचतुराननं ॥ पश्यमूर्च्छांशनं शम्भो जगत् स्थावरजङ्गमम् ॥ मोहितंममरूपेण स्वयोनिजमकल्मषं ॥ सनास्तित्रिषुलोकेषु यःपुमान्ममदर्शनात् ॥ भवन्तमादितः कृत्वा नक्षोभंयातिपद्मज ॥ आत्मस्तुतिर्नकर्त्तव्या केनचिच्छुभमिच्छता ॥ स्तवनान्नरकंयाति सुविद्वानपिमानवः ॥ तथापि स्तवनं ब्रह्मन् कर्त्तव्यंकार्य्यहेतुना ॥ साहंसृष्टात्वयातात कस्यचित्क्षोभनायवै ॥ तदादिशजगन्नाथ क्षोभयिष्येनसंशयः ॥ मांदृष्ट्वाचेतनोदेव भूधरोपिविलीयते ॥ किंपुनश्चेतनोपेतः श्वासोच्छ्वासीनरास्त्विह ॥ तथाचोक्तंपुराणेषु नरोवीक्षणकर्त्तनं ॥ उन्मादका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णंनृणां दुश्चरव्रतनाशनं ॥ सन्मार्गेतावदास्ते प्रभवतिपुरुषस्तावदेवेन्द्रियाणां लज्जांतावाद्विधत्तेविनयमपिसमा लंवतेतावदेव ॥ भ्रूचापाकृष्टमुक्ताःश्रवणपथगतालीनपक्ष्माणएते यावल्लीलावतीनां हृदिनधृतिमुखादृष्टिवालापतन्ति ॥ धिक्कस्यमन्दमनसःकुक- वेःकवित्वं यस्त्रीमुखंचशशिनश्चसमीकरोति ॥ भ्रूक्षेपविस्मितकटाक्षनिरीक्षितानि कोपप्रसादसहितानि कुतस्तुचन्द्रे ॥ पीतंहिम- ग्धंमनुजेनशम्भोः करोतिमोहंत्वविचक्षणस्य ॥ स्मृतावदृष्टायुवतीनरेण विमोहयेद्देवसुराधिकाहि ॥ मोहनार्थंत्वयाकस्य निर्मि- ताप्रपितामह ॥ तदादिशजगन्नाथ त्रैलोक्यंमोहयाम्यहं ॥ ब्रह्मोवाच ॥ सत्यमुक्तंत्वयादेवि नासाध्यंभुवनत्रये ॥ त्वांपुरस्कृत्य सुभगे मत्तमातंगगामिनि ॥ सात्वंदूषयतेचेतो ममापिवरवर्णिनि ॥ तन्मयानिगृहीतन्तु भीरुज्ञानांकुशेनहि ॥ सात्वंकथंतुलो- कानां नचेतांस्यवतिष्ठसि ॥ दृष्ट्वावैतद्विशालाक्षि तवरूपैर्विमोहितं ॥ सममेवजगत्सर्वं निश्चेष्टमिवलक्षते ॥ यन्निमित्तंमयासृ- ष्टा तत्साधयवरानने ॥ वैदेशेनगरेराजा नाम्नारुक्मांगदःक्षितौ ॥ यस्यसंध्यावलीभार्य्या तवरूपोपमाशुभा ॥ यस्यांधर्मांगदो जातःपितुरप्यधिकोगुणैः ॥ दशनागायुतवलः प्रतापेतुरविप्रभः ॥ क्षमयायोधरातुल्यो गांभीर्य्ये सागरोपमः ॥ तेजसावह्निव- द्दीप्तः क्रोधेवैवस्वतोपमः ॥ योगेवैरोचनिर्यस्तु गतौचपवनोयथा ॥ सौम्यत्वेसोमतुल्यस्तु रूपेवैमन्मथोयथा ॥ काव्येषूशनस- स्तुल्यो योगीतेराजनन्दनः ॥ पित्राभुक्तंस्वकमिदं जम्बूद्वीपंवरानने ॥ धर्मांगदेनद्वीपानि सप्तभुक्तानिशोभने ॥ पितुस्तुपी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ङ्यानेन नज्ञातंप्रमदासुखं ॥ स्वयंप्राप्ताःपरित्यक्ता येनभार्य्यास्त्वनेकशः ॥ योनवाक्याद्विचलति सदैवेहपितुःशुभे ॥ यस्यत्रीणिशतानीह मातृणांचारुहासिनि ॥ तथाहिकनकाभासे अविशेषेणपश्यति ॥ तस्यधर्मप्रतापस्य पुत्ररत्नान्वितस्यच ॥ समीपं गच्छचार्वंगि मन्दरे पर्वतोत्तमे ॥ तस्मिन्नेजतिराजासौ तुरगेणोपवाहितः ॥ तवगीतेनचार्वंगि मोहितोमुच्यवाजिनं ॥ आरोहतिगिरेःशृंगं ससंगंयास्यतित्वया ॥ तत्रदेवित्वयावाच्यं मिलित्वाभूभुजासह ॥ भार्य्यातेहं भविष्यामि महाराजनसंशयः ॥ यद्यद्ब्रवीम्यहंनाथ तत्तत्कार्य्यंत्वयाध्रुवं ॥ मोहितस्तवरूपेण तथेतिप्रतिपत्स्यते ॥ ततस्त्वंशपथैर्गृह्यं दक्षिणेनकरेणवै ॥ वाक्यं कतिपयैःसुश्रु दिनैरापततस्त्विति ॥ सुरतेतवचार्वंगि यथामुग्धोहिलक्ष्यते ॥ तदाप्रहस्यराजानं स्मरणीयंपुरावचः ॥ येत्वया शपथाराजन् कृतंमद्वाक्यपालने ॥ तत्पालयमहीपाल सत्योयंशपथस्त्विति ॥ एवमुक्तेत्वयामुग्धे सराजासत्यगौरवः ॥ पालयामिनसन्देहो ब्रूहिकिंतेददाम्यहं ॥ एवमुक्तेतुवचने त्वयावाच्यो वरानने ॥ रुक्माङ्गदोमहीपालो धर्मांगदपिताशुभे ॥ नोपवासस्त्वयाकार्य्यः कथंचिद्धरिवासरे ॥ सुरतश्रमकारामे भवत्वंसमुपोषितः ॥ संमुखींयौवनोपेतां स्वभार्य्यांयोनसेवते ॥ सर्वोपेक्षीदुराचारः सयातिनरकंनरः ॥ त्रिरात्रमुपविद्धाहं त्वयाभूपउपोषणात् ॥ नाहंदिवसमेकन्तु शक्नोमिरहितात्वया ॥ श्राद्धकालेतुसंप्राप्ते उपविष्टेद्विजेकिल ॥ याचन्ती संगमंभार्य्या भोक्तव्यानृपपुंगव ॥ एवंसंबोध्यमानोसौ यदाराजावचस्तव ॥ न-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करिष्यतिचार्वंगि तदावाच्यमिदंवचः ॥ यदिनत्यजसेराजन् उपवासंहरेर्दिने ॥ स्वपुत्रस्य शिरस्छित्वा सहसैव वरासिना ॥ धर्मांगदस्यराजेन्द्र ममोत्संगे क्षिपत्विह ॥ यद्येतद्भाषितंत्वंहि नकरिष्यसिभूपते ॥ धर्मक्षीणोभवान्गन्ता नरकं नात्रसंशयः ॥ श्रुत्वात्वदीयंवचनं वराननेनदास्यते प्राणसमंहिपुत्रं ॥ संगृह्यवाक्यंवसुधामराणां संभोक्षतेमाधववासरेसौ ॥ ततोजनो यास्यतिपूर्वमार्गं यमान्तिकं किंकरपाशबद्धः ॥ लिपिप्रमाणं नरकाधिवासी भविष्यतेसाधुकृतेत्वयाहि ॥ निहन्तितनयंराजा यदिसत्वेनसंयुतः ॥ तदशेषमघंत्यक्त्वा पद्मनाभपदंव्रजेत् ॥ ७७ ॥ इतिश्री लघु ना० पु० रु० मोहिनीशिक्षा प्रख्यापनं नाम ७

बशिष्ठउवाच ॥ साश्रुत्वा ब्रह्मणोवाक्यं नारीकमललोचना ॥ उवाचनाममेदेहि येनगच्छामिमन्दरं ॥ पित्रानामप्रकर्त्तव्यं अपत्यानांजगत्पते ॥ नामपापहरं प्रोक्तं तत्कुरुष्व कुशध्वज ॥ तच्छुत्वाच तदाब्रह्मा पुनरेवाब्रवीदिदं ॥ यस्मादिदं जगत्सर्वं त्वयासुन्दरिमोहितं ॥ मोहिनीत्येव तेनाम स्वगुणाढ्यंभविष्यति ॥ मोहावस्थंजगत्सर्वं दर्शनात्तेभविष्यति ॥ यदिनप्राप्यतेसुभ्रू त्वत्संपर्कसुखावहं ॥ एवमुक्त्वा बरारोहा प्रणम्यकमलासनं ॥ वीक्ष्यमाणामरौघेण प्रतस्थेमन्दराचलं ॥ तृतीयेनमुहूर्त्तेण संप्राप्ता गिरिमस्तकम् ॥ यस्यसंवेष्टनोनागो बासुकिर्नहिपूर्यते ॥ धृतोयोहरिणापूर्वं नधृतोदेवदानवैः ॥ षल्लक्षयोजनोसिन्धो यस्यवैगह्वरोभवत् ॥ कूर्मदेहेन संपृक्तो योनभिन्नोगिरिर्महान् ॥ यततायेनराजेन्द्र सिन्धोर्गुह्यंप्रदार्शितं ॥ गताब्रह्माण्डमार्गेण प-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योधेश्चगिरिर्महान् ॥ कूर्मास्थिघट्टनेयेन पावकोजनितोमहान् ॥ यस्मिन्संवसतेदेवः सहभूतैर्दिगंबरः ॥ नदेवै दानवैर्वापि दृष्टं पृष्टंमहीपतेः ॥ दशवर्ष सहस्राख्ये कालेमहतिवर्त्तता ॥ केयूरघर्षणंयेन कृतंदेवस्यचाक्रिणः ॥ रत्नानांमन्दिरंयश्च बहुधातुसमन्वितः ॥ क्रीडाविहारायादिवौकसांसदा तपस्विनांयत्तपसःप्रवृद्धये ॥ सुरांगनानां रतिबर्द्धनंतदा महौषधीनांप्रभवोनरेन्द्रः ॥ सहस्रमेकं अयुतंचमूले तत्संख्ययावै पृथुतांगतासौ ॥ दैर्घेपि तावन्तिचयोजनानि त्रैलोक्ययष्टीसमुपस्थितासौ ॥ सकाञ्चनै रत्नभृतैस्तुभृंगैः प्रकाशयन्भूमितलंवियच्च ॥ यस्मिन्नभः कश्यपनन्दनाऽसौ इतस्तुतामेतिनिविष्टतेजाः ॥ काञ्चनंगिरिमत्युग्रं संप्राप्ताकाञ्चनप्रभा ॥ सूर्यतेजोपहन्त्रीसा मन्दरं चारुकन्दरं ॥ कुर्वन्ति नृपकामार्थं मुपविष्टाशिलातले ॥ नीलेकान्तेतदादिव्ये सप्रयोजन विस्तृते ॥ तस्यांशिलायांराजेन्द्र लिंगंतिष्ठतिकोटिशः ॥ दशलक्षप्रमाणानि तिष्ठन्तिकोटिकोटिशः ॥ कोटिलिंगेतिविख्यातं प्रासादंप्रसनंपरं ॥ तस्मिन्बाला महीपाल चक्रेगीतंमनोहरं ॥ तंत्रीलयसमायुक्तं नानास्वरकरंपरं ॥ समीपवर्तिनीतस्य भूत्वालिंगस्यभाविनी ॥ मूर्च्छनातालसहितं गान्धार ध्वनिसंयुतं ॥ तस्मिन्प्रवृत्तेराजेन्द्र गीतेमन्मथवर्द्धने ॥ सभूधराणांजाताहि स्पृहातस्यांमहीपते ॥ नैवचेदं मनोहारि गीतंतादृग्वभूवनः ॥ यादृशंमोहिनीगीतं सर्वजन्तुमनोहरं ॥ मृगयूथाधिपाःसर्वे तस्यागीतिलयंगता ॥ श्रुत्वैवगीतंतु दिगंबरस्तु तेनैवरूपेणबरांगनायाः ॥ चचालधैर्यादथभोक्तुकामो विमोहितो देवबराभ्यधा- ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वत ॥ २४ ॥ इतिश्री लघुनारदीय पुराणे रुक्माङ्गदचरिते मोहिनी मन्दरागमनं नामाष्टमोध्यायः ॥ ८ ॥ ७ ७ ७
वशिष्ठउवाच ॥ रुक्माङ्गदोपि राजेन्द्र भुक्त्वाभोगान्हिमानुषान् ॥ संपूज्यवहुशोदेवं पीतांबर धरंहरीं ॥ दत्वामूर्ध्निपदंभूप शत्रू-
णां रणशालिनां ॥ कृत्वाशून्यंयमपथं जित्वात्रैवस्वतंयमं ॥ वैकुण्ठंचपदंभूप कृत्वापूर्णंचमानवैः ॥ आहूयतनयंकान्तं धर्माङ्गद-
मभाषत ॥ एतां बसुमतींपुत्र बसुपूर्णांसमन्ततः ॥ परिपालयबीर्येण स्वधर्मेणकृतश्रमः ॥ पुत्रेसमर्थेयोराजा राज्यंनप्रतिपादये-
त् ॥ तस्यधर्मस्तथाकीर्त्ति र्विनश्यति नसंशयः॥ समर्थेतनयेपुत्र योनयातिपितासुखं॥ पापीयान्सतुविज्ञेयो धर्मांगदजगत्त्रये॥
पितुर्भारक्षमःपुत्रो भारंनोद्वहतेपुनः ॥ मातुर्गोकर्णवज्जातो निर्वीर्यो विषवर्जितः ॥ सपुत्रोयोधिकः पुत्र पितुर्भवतिभूतले ॥ प्र-
काशयति सर्वत्र स्वकरैरविभास्करः ॥ पुत्रदुर्नयजैर्दुःखै र्यस्यजागर्त्तिवैपिता ॥ सपुत्रोनरकंयाति यावदाभूतसंप्लवम् ॥ पितुर्व-
चनमाहृत्य सर्वंयः कुरुतेगृहे ॥ सयातिदेवसायुज्यं स्तूयमानोमहर्षिभिः ॥ सोहंप्रजाकृतैःपुत्र आसक्तः कर्मभिःक्षितौ ॥ नभुक्तं
नैवसुप्तंतु स्वेच्छयापालनेस्थितः ॥ समर्थेत्वयिशत्रुघ्न प्राप्तंसर्वसुखंमया ॥ विष्णुवासरभोक्तृणां निग्रहेसंस्थितस्यमे ॥ केचिद्व्यव-
स्थितामार्गे सौरेकेचिद्व्यवस्थिताः ॥ विरिंचिमार्गगाश्चान्ये पार्वती संमतापरे ॥ सायंप्रातशिनास्त्वन्ये तथाचान्येग्निहोत्रिणः ॥
प्रवासेसंस्थिताश्चान्ये श्राद्धेष्वन्येव्यवस्थिताः ॥ वालोयुवाथ बृद्धोवा गुर्विणीवाकुमारिका ॥ रोगीवाविक्लवोवाथ नशक्नोम्यनु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पोषितुम् ॥ इत्येवंजल्पितंयैस्तु तान्निरस्यसमन्ततः ॥ वचोभिस्तुपुराणोक्तै र्दिवसैर्बहुभिस्त्वहं ॥ संबोधयित्वा बहुशः प्रजावैसुख
हेतवे ॥ निगृह्यतान्हरिदिने निराहारान्करोम्यहं ॥ शास्त्रदृष्ट्यातुविदुषो मूर्खंदण्डेनपुत्रके ॥ अनुशास्यकृताः सर्वे निराहारंहर-
दिने ॥ अतोमे नसुखंकिंचि दवलीढंधरातले ॥ प्रजाःकाश्चिन्नदुःखेन भवित्रीकिलपुत्रके ॥ स्वेनधर्मेणवैपुत्र योरक्षेन्प्रजानृपः॥
तस्यमेह्यक्षयालोकाः पुराणाः कवयोविदुः ॥ सोहंप्रजाकृतेपुत्र संस्थितोनात्मनिक्वचित् ॥ सौख्यमिच्छाम्यहंभोक्तुं मृगयादिस-
मुद्भवं ॥ नपानद्यूतजंपुत्र कामयेहं कदाचन ॥ उभयोर्भ्रस्यतेराजा माभूतेतत्रचास्थितः ॥ त्वत्प्रसादादहंपुत्र मृगव्याजेनप-
र्वतान् ॥ वनानि सरितश्चैव सरांसिविविधानिच ॥ ऋष्याश्रमान्तथाद्रक्ष्ये त्वत्प्रसादान्महीपते ॥ भोक्तुकामःप्रियान्कामान् त्व-
यिभारंनिवेश्यच ॥ एतत्सर्वं मयाप्रोक्तं यत्स्थितंहृदयेमम ॥ अस्मिन्कृतेमहत्कीर्ति रकृतेनरकंव्रजेत ॥ तस्मात्पालयमेसर्वाःप्रजा
धर्मेणपुत्रक ॥ धर्मांगदउवाच ॥ सर्वमेतत्करिष्यामि भुंक्ष्वभोगान्मनोरमान् ॥ गुर्वींराजधुरंतात त्वदीयामुद्वहाम्यहं ॥ नहिमे-
नास्त्यतोधर्म स्त्वद्वाक्यकरणंविना ॥ पितुर्वाक्यमकुर्वाणो नरोधर्मादधोव्रजेत ॥ तस्मात्करिष्येवचनं त्वदीयंप्राञ्जलिः स्थितः ॥
एवमुक्तेतुवचने राजाहृष्टोबभूवह ॥ मृगयां गन्तुकामस्तु लब्ध्वींज्ञात्वात्मनस्तनुं ॥ धर्मांगदोपि हृष्टात्मा प्रजामाहूयचाब्रवीत ॥
पित्रानियुक्तोभवतां पालनाय हितायच॥ पितृकार्यंमहाकार्यं सर्वथाधर्ममिच्छता॥ नान्योधर्मोहिपुत्रस्य पितृकार्यात्परःप्रजाः ॥ ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयिदण्डधरेशास्ता भवतांनयमः क्वचित ॥ एवंज्ञात्वातुयुष्माभि राराध्यागरुडध्वजः ॥ ब्रह्मचर्यापयोगेन यष्टव्यस्तुजनार्दनः ॥ ममत्वंहि परित्यज्य स्वजातिविहितेनच ॥ येनवोह्यक्षयोलोका भवेयुर्नात्रसंशयः ॥ पितृमार्गाधिकोह्येष भवतांब्रह्मसंज्ञितः ॥ ब्रह्मार्पणक्रियायुक्ता भवन्तोज्ञानकोविदाः ॥ नभोक्तव्यं हरिदिने पैत्रोमार्गस्तुशाश्वतः ॥ विशेषेहिमयाजातो भवतांब्रह्मसन्ततिः ॥ प्रयुक्तःस्वात्मविषये पुनरावृत्तिदुर्लभः ॥ यदुपोष्यंहरिदिनं तदवश्यमितिस्थितिः ॥ अनुनीयप्रजाःसर्वाः समाश्वास्यपुनःपुनः ॥ नदिवा नचशर्वर्यां शेतेधर्मांगदःसदा ॥ सर्वत्रहरतेसौर्यात कुर्वन्निष्कण्टकांमहीं ॥ पटहोरटतेत्यर्थं मृगारिरिपुमस्तके ॥ उपोष्य द्वादशींलोका भमत्वेनविवर्जिताः ॥ त्रिविधेषुच कार्येषु देवेशश्चिन्त्यतांहरिः ॥ हव्यकव्यवहेचैव तथात्मानि जनार्दनः ॥ तुरीयेपिहृषीकेशो विशंकंजगतांपतिः ॥ स्वजातिविहितेष्येवं सन्मार्गेचपितामहः ॥ स्मर्त्तव्योपि जनैःसर्वै धर्मकामार्थवाञ्छिभिः॥ सएवभोक्ताभोक्तव्यः सएवपुरुषोत्तमः ॥ विनियोगस्तुतस्यैव सर्वकर्मसुपूज्यते ॥ एवंरटतिराजेन्द्र पटहोघननिस्वनः ॥ परंहर्षमवापोथ पिताधर्मांगदस्यच ॥ ज्ञात्वापुत्रंनयोपेत मात्मतत्वाधिकंनृपः ॥ उवाचभार्यांसंहृष्टः स्थितांलक्ष्मी मिवापरां ॥ धन्यासन्ध्यावलित्वंहि धन्योहंबरवर्णिनि ॥ उभाभ्यांजनितःपुत्रः शशाङ्कधवलःक्षितौ ॥ कर्णाभ्यांश्रूयतेमोक्षो नदृष्टः केनचित्क्वचित्॥ नोस्माभिरधिकोमोक्षः प्राप्तःसत्पुत्रसंभवः ॥ पुत्रे विनयसंपन्ने धृतिसौर्यसमन्विते ॥ प्रतापिनिबरारोहे पितुर्मोक्षोगृहेध्रुवं ॥ आ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्दं ब्रह्मणोरूपं सदानन्दिसुतेनयः ॥ पिताभवतिचार्वंगि सत्कर्मकरणैःशुभैः ॥ नतत्सौख्यंभवेद्देवि लोकेस्थावरजंगमे ॥ स-
त्पुत्रः पितुरादाय भारमुद्वहतेस्वयं ॥ सोहंगमिष्ये करभोरुहृष्टो विहारलीलो मृगहिंसनार्थं ॥ स्वेच्छाचरश्चारु विशालनेत्र वि-
मुक्तपापो जनरक्षणाय ॥ ५२ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते धर्मांगदाय राज्यदानंनाम नवमोध्यायः ॥ ९ ॥
वशिष्ठउवाच ॥ ततः प्राहविशालाक्षी भर्तृवाक्यंनिशम्यसा ॥ सत्यमुक्तंत्वयाराजन् पुत्रसौख्यंनतत्परं ॥ तुल्यंभवतिलोकेस्मिन्
शतपुत्रफलाधिकं ॥ पुत्रेभारस्त्वयान्यस्तः सप्तद्वीपसमुद्भवः ॥ मृगहिंसां परित्यज्य यजयज्ञैर्जनार्दनं ॥ भोगस्पृहां परित्यज्य
सेवस्वसुरनिम्नगां ॥ एवंत्याज्यस्तवविभो न्यायोनमृगनिग्रहः ॥ हृदये नखपङ्क्तिस्तु बृद्धायाभूपतेयथा ॥ तथा विषयसेवाहि
पितृणां पुत्रिणांविदुः ॥ गृहेस्थितोहृषीकेशं पूजयस्वमहीपते ॥ निर्दोषाणांनयुक्तांहि मृगानांभूपमारणं ॥ अहिंसा परमोधर्मः
पुराणेषुप्रकीर्तितः ॥ हिंसायां वर्त्तमानस्य व्ययोधर्मोभवत्यपि ॥ परैरपिहताञ्जन्तून्नोपभुञ्जन्तिमानवाः ॥ षड्विधंनृपतेप्रोक्तं वि-
द्वद्भिर्जीवघातनं ॥ अनुमोदयितापूर्वो द्वितीयोघातकः स्मृतः ॥ विश्वस्ताचतृतीयस्तु चतुर्थोभक्षकःस्मृतः ॥ पञ्चमःपावकःप्रोक्तः
षष्ठोभूपे हविक्रयी ॥ अहिंसासहितोधर्मः सधर्मोनृपतेस्मृतः ॥ हिंसयासहितंधर्मं नधर्मंकवयोविदुः ॥ मापापंकुरुवैभूप पुत्रेभा-
रंनिधायच ॥ धर्मंसमाश्रयसम्यक् सञ्जातःपालतस्तव ॥ परित्यज्यस्वभारंत्वं नृपहिंसासमुद्भवं ॥ मृगशीलाहिराजानो विनष्टाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शतशोनृप ॥ तस्माद् दुष्कृतकर्माणो मन्येहंमृगयातिनः ॥ दोषांकुरामृगाराज्ञां धर्मिणामिहभूपते ॥ निवारितोमयात्वंहि सर्वदाहितकाम्यया ॥ एवंब्रुवाणां तांभार्या नृपोवचनमब्रवीत् ॥ नाहंहिंसेमृगान्देवि मृगव्याजेनकाननं ॥ पर्यटिष्ये धनुः पाणिः कुर्वन्कण्टकशाधनं ॥ वनमध्येसुखंभुज्य मरणेहंबरानने ॥ स्वापदेभ्यश्चदस्युभ्यः प्रजारक्ष्यामहीभृता ॥ आत्मनावाथपुत्रेण गोपनीयाःप्रजायतः ॥ प्रजामरक्षन्नृपतिः सधर्मोपिव्रजत्यधः ॥ सोऽहंरक्षणमुद्दिश्य गमिष्यामिवनंप्रिये ॥ विमुक्तभारोऽहमिति रुरुःश्रृंगोयथाशुभे ॥ एवमामंत्र्यतांभार्या मारुरोह हयोत्तमं ॥ दोषांपातिसमंराज न्निर्दोषक्षितिभूषणं ॥ देववाहमिवाशुभं प्रभञ्जनमिवस्थितं ॥ अग्रेऽमरेभ्योभूपालः करंकृत्वाप्रदक्षिणं ॥ शतकोटिप्रभंभूप कामिनीकुचपालितं ॥ अशोकपल्लवाकारं चक्रांकुशविभूषितं ॥ संप्रतस्थेमहीपाल श्चालमानोमहीतलं ॥ शान्त्वमानोययौवेगात् काननंनिर्जनंस्वयं ॥ वाजिवेगेननिर्धूता वारणाः स्यन्दनाःहयाः ॥ पत्तयश्चनिपेतुस्ते मूर्च्छिताः क्षितिमण्डले ॥ सराजासहसाप्राप्तो मुनीनामाश्रमंप्रति ॥ योजनानांसमुत्तीर्य शतमष्टोत्तरंनृपः ॥ प्रविवेशाश्रमंपुण्यं कदलीखण्डमण्डितं ॥ अशोकवकुलोपेतं पुन्नागसमलंकृतं ॥ मातुलिंगैःकपित्थैश्च खर्जूरपनसादिभिः ॥ नारिकेलैस्तथातालैः केतकैसिन्दुवारकैः ॥ चन्दनैःस्यन्दनैरेलैः प्रियालैर्जंबुकैर्धवैः ॥ कर्मदैर्दाडिमैश्चैव धात्रीवृक्षैःसमन्ततः ॥ निंबवृक्षैश्चबहुश स्तथाधैर्लोध्रपावकैः ॥ हरीतकीविभीताद्यैरन्यैर्बहुभिरावृतं ॥ हृष्टेनवायुनायुक्तं सुगन्धैःपुष्पपा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 दर्पैः ॥ पश्यमानोमुनिंराजा ददर्शहुतभुक्प्रभं ॥ दृष्ट्वा प्रणम्यसहसा अवरुह्यतुरंगमात ॥ वामदेवंमुनिवरं बहुशिष्यसमावृतं ॥
 तेनापिमुनिना राजा अर्घ्याद्यैरभिपूजितः ॥ उपवेश्यासनेकौशे प्रोवाचहृष्टयागिरा ॥ अद्यमेपातकंक्षीणं मद्यपुण्योयमाश्रमः ॥
यत्त्वयाविष्णुभक्तेन दिष्ट्याभूपविलोकितः ॥ कः करोतिनृपस्त्वन्य स्त्वांविना धरणीतले ॥ त्यक्त्वावैवस्वतं मार्गं लोकोनीतोहरेः
क्षयं ॥ उपोषयित्वा नृपते द्वादशींपापनाशनीं ॥ चतुर्भिस्त्वमुपायैस्तु प्रजाः संसाध्यभूतले ॥ स्वकर्मस्थाविकर्मस्था नीताःस-
र्वाभिदः पदं ॥ सोऽस्माकंद्रष्टुकामानां संप्राप्तंदर्शनंनृप ॥ स्वपचोपिमहीपाल विष्णुभक्तोद्विजाधिकः ॥ विष्णुभक्तिविहीनस्तु
द्विजोऽपि स्वपचाधमः ॥ दुर्लभाभूपराजानो विष्णुभक्तामहीतले ॥ नवैष्णवोभवेद्राजा क्षितिलक्ष्मीप्रशाशकः ॥ योराजानहरे-
र्भक्तो भक्तोऽन्येषुसुरेषुहि ॥ सपत्नींयुवतींत्यक्त्वा यथैवान्यासुरज्यते ॥ एवंव्यतिक्रमस्तस्य नृपतेर्भवतिध्रुवं ॥ यस्त्वयान्यायविहितं
कृतंविष्णोः प्रपूजनं ॥ राजोवाच ॥ क्षामयेत्वांद्विजश्रेष्ठ नाहंवन्द्यस्त्वयाविभो ॥ त्वत्पादपांशुनातुल्यो नवाविप्रभवाम्यहं ॥ न-
विप्रेभ्योऽधिकादेवा भवन्तीहकदाचन ॥ परितुष्टैर्द्विजैर्यस्माद्भक्तिर्भवतिमाधवे ॥ द्वेष्योभवतितैरुष्टैः सत्यमेतन्मयेरितं ॥ तमा-
हवामदेवस्तु ब्रूहिकिंतेददाम्यहं ॥ नादेयंविद्यतेराजन् गृहप्राप्तस्यमेधुना ॥ अभीष्टोसिमहीपाल योददासिमहीतले ॥ पटहान्वा-
सरेविष्णोः प्रजाभोजनवारणे ॥ तमाहनृपतिर्विप्रं कृताञ्जलिपुटस्तदा ॥ प्राप्तमेवमयासर्वं त्वदंघ्रियुगदर्शने ॥ एकोमेसंशयोब्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्मन् हृदयेपरिवर्त्तते ॥ कर्मणाकेनमेवश्या भार्यात्रैलोक्यसुन्दरी ॥ याविलोकयतीमांवै मन्यतेमन्मथाधिकं ॥ यत्रयत्रपदंदेवी
ददातिबरवर्णिनी ॥ तत्रतत्रनिधानानि प्रकाशयतिमेदिनी ॥ यस्याःस्पर्शेजराभ्रंशो वलीनांसंक्षयोभवेत् ॥ विनाग्निनाहियो-
ब्रह्मन् सिद्धमेत्यवशत्रुसं ॥ अन्नंददातिचार्वंगी यस्मिन्भुञ्जन्तिकोटयः ॥ नावज्ञाचकृताब्रह्मन् ययावाक्यासुरुष्टया ॥ तथाराजा
तुतनयो ममवाक्यकरःसदा ॥ अहमेवधरापृष्टे पुत्रवान्द्विजसत्तम ॥ एकद्वीपपतिश्चाहं सचसप्तपतिस्त्वभूत ॥ मदर्थेयेनविप्रेन्द्र
समानीतानृपात्मजा ॥ विद्युल्लेखेतिविख्याता युधिजित्वामहीभुजः ॥ अयुतेनाधिकेद्वेतु वीर्यद्रविणशालिनी ॥ षण्मासेनरणे
जित्वा कृत्वासर्वान्निरायुधान् ॥ योगत्वाप्रमदाराज्यं जित्वासर्वास्तथारणे ॥ आजहारशुभास्तासां मध्यादष्टौबरांगनाः ॥ प्रददा
वपिताःसर्वा प्रणम्यचपुनःपुनः ॥ यानिवासांसिदिव्यानि यानिरत्नानिभूतले ॥ तानिमेप्रददौपुत्रो जनन्याश्चहृदन्नतः ॥ ए-
काह्नापृथिवींसर्वा मतीत्यबहुयोजनां ॥ पुनरायातिशर्वर्या मत्पादाभ्यंगकारणात् ॥ निशीथेमर्दयित्वातु द्वारितिष्ठतिदंशितः ॥
प्रबोधयतिप्रैष्यान्स नमत्तोनिशिसंस्थितः ॥ तथायंरोगहीनोमे देहोदेहभृतांवर ॥ अप्रमेयोममसुने विषयाश्चप्रियागृहे ॥ वा-
जिनोवारणाश्चैव धनधान्यमनन्तकं ॥ नृपाःसर्वेममैवाज्ञां पालयन्तिक्षिताविह ॥ केनकर्मविपाकेन ममेदंवशगंमुने ॥ कृताञ्ज-
लिपुटोब्रह्मन् यथावद्वक्तुमर्हसि ॥ देहेनरोगाःप्रवराःस्त्रियश्च गृहेविभूतिश्चहरौचभक्तिः ॥ विद्वत्सुपूजाद्विजदानयुक्ता मनोहर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चैवसुतप्रसूतः ॥ ६२ ॥ इतिश्रीलघुनारदीयपुराणे रुक्माङ्गदचरिते वामदेवसमागमोनाम दशमोध्यायः ॥१०॥ वामदेवउवाच
॥ पुरात्वमवनीपाल शूद्रजातिसमुद्भवः ॥ वहुदोषसमायुक्तो दुष्टयाभार्य्ययातथा ॥ निवसन्दुःखसंयुक्तो वर्षाणिसुवहुन्यथ ॥
कदाचिद्विप्रसहित स्तीर्थयात्रांगतोभवान् ॥ तत्रस्थाणुपतेःश्लक्ष्णं श्रुतंधर्मविचारणं ॥ मन्दरेनृपशार्दूल पुराणोक्तंद्विजेरितं ॥ त-
च्छ्रुतंहित्वयाराजन् सत्यंहिशयनव्रतम् ॥ चतुर्भिःपारणंमासै र्यस्यनिष्पद्यतेविभोः ॥ येनचीर्णेनदेवेशो जीमूताभःप्रसीदति ॥
लक्ष्मीभार्य्योजगन्नाथ स्त्वशेषाघौघनाशनः ॥ तत्कृतंभवताराजन् पुनरत्यतिमन्दरे ॥ अशून्यशयनंपुण्यं गृहऋद्धिकरंपरम् ॥
अकृत्वायस्तुराजेन्द्र व्रतंपातकनाशनं ॥ गार्हस्थ्यमनुतिष्ठेत बन्ध्यावन्निष्फलंभवेत् ॥ श्रावणस्यतुमासस्य द्वितीयायांमहीपते ॥
अपिजात्यानुहीनेन अपिग्राह्यंव्रतंशुभम् ॥ चत्वारोवार्षिकान्मासान् संसुप्तेवैजनार्दनं ॥ व्रतंत्वशून्यशयनं करिष्येहंजगत्पते ॥
एवंनियमकृत्स्नात्वा मध्याह्नेसरिदादिषु ॥ पश्चात्तुपूजयेद्देवं निशिचन्द्रोदयेसति ॥ षोडशांगुलमानंतु स्थंडिलंचतुरस्रकं ॥ कृत्वा
तत्रन्यसेद्देवं लक्ष्मीभर्तारमच्युतं ॥ लक्ष्मींसौम्यमयींकृत्वा सौवर्णपुरुषोत्तमं ॥ स्थाप्यपञ्चामृतरसै र्गन्धचन्दनवारिणा ॥ स्नापयि-
त्वाथविधिना वेदमंत्रपुरःसरं ॥ लक्ष्मीयुक्तोजगन्नाथः पूजनीयोजनार्द्दनः ॥ फलैःपुष्पैस्तथादीपै श्चारुगन्धानुलेपनैः ॥ शय्या
दानैर्वस्तुदानै र्विप्राणांभोजनैस्तथा ॥ नैवेद्यैर्विविधाकारैः फेनिकापूपमोदकैः ॥ मुखवासादितांवूलैः प्रार्थयेद्देवमाशिषः ॥ श्रीव- ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सधारिश्रीकांत श्रीपतेश्रीधराव्यय ॥ त्वंलक्ष्मीसहितोदेव गृहाणार्घ्यंनमोस्तुते ॥ इत्यर्घ्यमंत्र ॥ गार्हस्थान्पापनाशंमे पातु धर्मार्थकामद ॥ अग्रपोमाप्रणश्यंति माप्रणस्यंतुदेवताः ॥ पितरोमाप्रणस्यंतु मानौदंपत्यभेदना ॥ लक्ष्मीवियुज्यतेदेव नकदाचिद्यथाभवेत् ॥ तथाकलत्रसंबन्धो मामेदेववियुज्यतां ॥ लक्ष्म्यानशून्यंवरद यथातेशयनंहरे ॥ शयामयाप्यशून्यातु तथैवमधुसूदन ॥ एवंप्रार्थ्यचदेवेशं प्रणिपत्यपुनःपुनः ॥ नक्तमक्षारलवणमश्नीयात्तदनन्तरं ॥ भोजयेद्द्विजदांपत्यं प्रतिमासंनृपोत्तम ॥ चातुर्मासिकमित्युक्त मशून्यशयनव्रतं ॥ चतुर्भिरेवमासैस्तु व्रतस्यास्यतुपारणं ॥ व्रतांतेशयनंदद्यात्सर्वोपस्कर संयुतं ॥ आसनं पादुकाछत्रं चामरव्यजिनानिच ॥ स्थंडितासर्वसंपूर्णा दर्पणंसप्तधान्यकं ॥ सुखसंजननितूली छादनाचपटीसिता ॥ कुण्डलेद्वे नृपश्रेष्ठ सुकपोलस्थलद्वयोः ॥ दीपिकावरमाल्यानि अञ्जनान्यनुलेपनं ॥ तस्योपरिवितानंतु पञ्चवर्णनरोत्तम ॥ पूर्वंतुचतुरोमासा स्थंडिलस्थंप्रपूजयेत् ॥ व्रतांतेशयनस्थंतु पूजयेत्पुरुषोत्तमं ॥ पुष्पधूपोपहारैश्च दीपमाल्यादिभूषितैः ॥ नैवेद्यैर्विविधाकारै र्लड्डुकापूपफेनिकैः ॥ अशोकवर्तिसोल्लाशैः खण्डकाद्यैरनेकशः ॥ देशकालोद्भवैर्मिष्टैः फलैःसंपूजयेद्धरिं ॥ अलंकृत्य यथाशक्त्या वस्त्रालङ्कारभूषणैः ॥ मिथुनंनृपशार्दूल वरमाल्यानुलेपनैः ॥ प्रणम्यद्विजदांपत्यं तंदेवंप्रतिपादयेत् ॥ साक्षतंसहिरण्यंच वरनेत्र पटावृतं ॥ अर्चितंप्रार्चितंगन्धै र्जातरूपमयंशुभं ॥ कांस्यपात्रेणसहितं मोदकैःपरिपूरितं ॥ दद्यादेवंसमुच्चार्य्य श्रीधरःप्रीयता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 मिति ॥ गावोहिरण्यधान्यानि यद्यदिष्टतमंगृहे ॥ तद्देवंनृपशार्दूल तदेवाक्षयमिच्छता ॥ तत्त्वयासर्वमेतद्धि कृतंराजन्सुविस्तरं ॥
 तस्यैवकर्मणोव्युष्टि रशून्यशयनस्यहि ॥ इयंममाग्रतःप्राप्ति स्तवोक्ताविस्तरान्नृप ॥ तुष्टेविष्णोसंपदोवै भवेयुर्विविधाहिता ॥ पू-
र्वजन्मनिदेवेशो यस्त्वयापूजितोनृप ॥ अस्मिन्जन्मनिराजेन्द्र पुनरर्चयसेहरिं ॥ अवस्यंगंतुकामोसि तस्यसायुज्यतांध्रुवम् ॥
एषभावोमहाराज विख्यातस्तेसुनिर्मलः ॥ प्रभावसंपदेपाते जाताउत्कर्षदायिनी ॥ किमन्यंनेमहीपाल ददामीहकरोमिकिं ॥
त्वंसर्वयोग्योसिनृप भक्तिमांश्चजनार्द्दने ॥ राजोवाच ॥ समुत्सुकोहंविप्रेन्द्र मन्दरंपर्वतंप्रति ॥ तत्राश्चर्याणिसर्वाणि द्रष्टुकाम-
स्तवाज्ञया ॥ लघूंभूत्वागुरुंत्यक्ता पुत्रोपरिद्विजोत्तम ॥ राज्यानुशासनंभारं दुर्वहंतुकभूभुजैः ॥ स्वेच्छाचारस्त्वहंराजा मत्कृत्यंतेन-
योऽकरोत ॥ तच्छ्रुत्वावचनंराज्ञो वामदेवोऽब्रवीदिदं ॥ एतद्धिपरमंकृत्यं पुत्रस्यनृपपुङ्गव ॥ यत्क्लेशात्पितरंपुत्रा विमोचयतिसर्व-
था ॥ पितुर्वचनकारीयो विनयेसंस्थितःसुतः ॥ तस्यभागीरथिस्नान महन्यहनिजायते ॥ निरस्यपितृवाक्यंतु ब्रजेत्स्नातुंत्रिमा-
र्गगां ॥ नशुद्धिरत्रनिर्दिष्टा पुत्रस्यकवयोविदुः ॥ सत्वंगच्छयथाकामं कृतकृत्योमहीपते ॥ हरिप्रसादस्तेजातो वशेयस्यसुतः
स्थितः ॥ एवमुक्तःसमुनिना समारुह्यतुरंगमं ॥ ययौशिघ्रगतिश्रीमान् सदागतिरिवस्वयं ॥ पश्यमानोगिरिंश्रीमान् सरांसि-
सरितस्तथा ॥ मनोरमानिराजेन्द्र वनान्युपवनानिच ॥ सोऽचिरेणैवकालेन संप्राप्तोमन्दराचलं ॥ कामयित्वागिरिंश्रेदं गन्धमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दनमेवच ॥ अतीत्यचमहामेरुं दृष्ट्वाचारूपमाचकुरून् ॥ शतसूर्य्यप्रतीकाशं सर्वत्रकांचनावृतं ॥ हतैर्द्विजैःसमाकीर्णं स्रवन्तं कांचनंरसं ॥ वहुवृक्षसमायुक्तं वहुधातुविभूषितं ॥ वहूनिसरसंयुक्तं वहुकन्दरभूषितं ॥ निम्नगायुतसंकीर्णं धौतंगङ्गाजलैःशुभैः ॥ वितुष्टैर्युवतिवृन्दैः कांचनाब्जोपशोभितैः ॥ प्रस्थितैःफललाभार्थं सद्दशस्थानमोहितैः ॥ घटप्रमाणैर्नृपते पङ्कजैश्वसुगन्धिभिः ॥ क्षात्रैर्युवतिसंभूतैः कुचैरिवविभूषितैः ॥ द्विरेफगणसंयुक्तः कोकिलस्वरनादितः ॥ अनेकसत्वविरुतैः समन्तान्नादितोगिरिः ॥ सपश्यमानोनृपतिर्विवेश महागिरिंरत्नविभूषिताग्रं ॥ आरूढकामस्तुकुतूहलार्थं मन्वेषयन्केनपथाधिरोहे ॥ यावत्समीक्षांकुरुते समंतात् तावत्समस्तद्रुमपक्षिसंघैः ॥ विसर्प्पमानोध्वानिनागृहीतो विमोहिनीवक्रसमुद्भवेन ॥ उपप्लवंतत्तरसामहीप स्तेनैवराजासहसाजगाम ॥ तस्यापिकर्णेध्वनिराविवेश विमोहिनीयःस्वाविमुच्यवाहं ॥ त्रिविक्रमेणैवविलंवितस्तदा गिरिर्महाराजवरेणतेन ॥ क्षणेनराजासहसाददर्श गिरौस्थितांतप्तसुवर्णभासं ॥ कामस्ययष्टीवसुलेखितेयंयमस्यमायैवयशःस्वरूपिणी ॥ शक्रस्य लिङ्गंगगनेप्रसस्तंसंपूजयन्तीतदवस्थितासा ॥ जनोयथाह्लादकरोनृणांप्रियःक्षमेवभूमेर्नृपआननन्द ॥ गिरेःसुतेवामरपूजिताच सिंधोस्तुवेलेवस्वरूपयुक्ता ॥ सत्कर्म्मकर्त्तुंमनसोभिलाषंव्यवस्थितामोहिनीरूपयुक्ता ॥ प्रतप्तचामीकरबद्धिभातिदेवीशरीरंत्वभिमन्दराद्रिं ॥ विकर्षमाणासहसासुनेत्रंलिंगाश्रितालिंगविनोदनार्थं ॥ विमोहितोसौनिपपातराजाविमोहिनीसुन्दरनेत्रपातैः ॥ ज्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेणसंतप्तसमस्तदेहोविसंज्ञतांचैवजगामशीघ्रं ॥ संमूर्छितंभूमिपतिंसुनेत्राविलोकयामासकटाक्षदृष्ट्या ॥ बिमुच्यवीणांविररामगी-
तान्प्राप्तंचकार्य्यंसहसैवमेने ॥ विद्रावयन्तीमृतपक्षिसंघामशोकरक्तांगुलिपल्लवाग्राः ॥ सुवाससागन्धभुजोनिवार्य्यशिलीमुखान्श्चा
ससुगन्धलुब्धान् ॥ जगामदेवीनृपतेःसमीपंमुक्ताहरंपूज्यतमंमहीप ॥ गत्वातुतत्पार्श्वसुमाररूपा विमोहिनीनीरजपत्रलोचना ॥
उवाचवाक्यंमधुरंमनोहरंरुक्माङ्गदंकामसरानुविद्धं ॥ उत्तिष्ठराजेशवशातवाहंकिंमूर्च्छयादेहमिमंक्षिणोषि ॥ यस्त्वंमहाभारमिमं-
महान्तंसमुद्धरेथास्तृणवन्महीप ॥ समामकंरूपमवेक्ष्यराजन् किंरज्यतेदुर्वलगौरिवेह ॥ यद्यास्तिवांच्छातवभूपतीश ममाश्रयावै-
सुरतानुकूला ॥ आदायवैमांरतिधर्मयुक्तां भुक्ष्वस्वदासीमिवदृष्टिवित्तां ॥ ६६ ॥ इतिश्री लघुनारदीयपुराणरुक्माङ्गचरिते मो-
हिनीसमागमो नामैकादशोध्यायः ॥ ११ ॥ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७
वशिष्ठउवाच ॥ व्याहृतेशोभनेवाक्ये मोहिन्यानृपतिस्तथा ॥ उन्मील्यनेत्रेराजेन्द्र पद्मपत्रनिभतदा ॥ सगद्गदस्वूवादेचं मोहि-
नींकान्ताविग्रहां ॥ मयावलाःसुवहुशः पूर्णचन्द्रनिभाननाः ॥ अनुभुक्तास्तथादृष्टा नेदृग्दृष्टंवपुःक्वचित् ॥ यादृशंचपालापांगि
तवसर्वांगसुन्दरि ॥ सोहंऽदर्शनमात्रेण त्वदीयेनवरानने॥ मनोभवशरेणैव पातितःसहसाक्षितौ ॥ अनूक्तवाक्योऽहंदेवि मोहित- ॥ १६ ॥
स्तत्रमायया ॥ कुरुप्रसादंकरभोरुमह्यं दास्यामिसर्व्वंविपुलंचतेत्रसुः ॥ नादेयमत्रत्वयिविद्यतेमे तवानुरागेणनिरुद्धचेतसः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इमांधरांभूधरभूषितांगीं समुद्रवस्त्रांशशिसूर्य्यनेत्रां ॥ घनस्तनींव्योमसुवद्धदेहां सह्यानन्नांसांगनिवासशीर्षां ॥ पातालगुह्यांव-
हुनागपादां सक्षार्णवामद्यतवास्मिदाता ॥ सकोषरत्नांगजवाजिपूर्णां सासमुद्रभक्तांनगरैःसमेतां ॥ आत्मानमपिदास्यामि तव-
चार्व्वंगिसंगमे ॥ किंपुनर्धनमानादि प्रसीदममशोभने ॥ तद्वचोमोहिनीश्रुत्वा भूपस्यमधुरंशुभं ॥ उवाचसंमितंध्यात्वा समु-
त्थाप्यनृपंतथा ॥ नधरांभूधरोपेतां प्रार्थयामिक्षितीश्वरं ॥ यत्प्रार्थयाम्यहंभूप तद्देयमविशंकया ॥ मत्प्रत्ययार्थंभूपाल वदस्वसम-
यंविभो ॥ राजोवाच ॥ येनत्वंतुष्यसेदेवि समयन्तंकरोम्यहं ॥ कृच्छ्रावस्थागतंत्वंमां सञ्जीवयसुलोचने ॥ मोहिन्युवाच ॥ दी-
यतांदक्षिणोहस्तो भूरिद्रविणदायकः ॥ अनेकक्रतुकर्त्ताच बहुपुण्यकरःकरः ॥ येनमेप्रत्ययोराजन् भवतीहतवोपरि ॥ राजन्त्वंध-
र्मशीलश्च धर्मकीर्तिर्जगत्त्रये ॥ नवक्तव्यानृतंकिञ्चित मार्गोवैलौकिकस्त्वयं ॥ एवंब्रुवाणांराजेन्द्रो मोहिनींकृच्छ्रयातुरः ॥ अब्र-
वीन्नृपतिःप्रेम्णा तवेदंभाषितंमया ॥ जन्मप्रभृतिवामोरु स्वैरेष्वपिकदाचन ॥ अथतेऽयाहृतैर्वाक्यैः किमेभिःप्रत्ययात्मकैः ॥ त-
वह्येषमयादत्तः स्वहस्तश्चारुलाञ्छनः ॥ यन्मयासुकृतंकिञ्चित कृतमाजन्मिकंशुभे ॥ तत्सर्वंतववामोरु यदिकुर्यान्नतेवचः ॥ अ-
न्तरेत्वेषहस्तोवै भवभार्येवरानने ॥ तवरूपेणमेक्षोभः सहसाह्यभवच्छुभे ॥ दर्शनेनत्वदीयेन परायन्तांहिमेवपुः ॥ पूर्वंदृष्ट्वापिनम-
या स्पृष्टाधर्मादिरक्षणे ॥ कात्वंकस्यसुताचासि किमर्थमिहचागता ॥ रुक्मांगदोहंनृपतिः ऋतध्वजसुतःशुभे ॥ इक्ष्वाकुवंशजः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीमान् धर्मांगदपितातथा ॥ मृगव्याजेनगहनं प्रविष्टःकाननंत्वहं ॥ ततोहृष्टोवनेदृष्टः कौशेयस्याश्रमोमहान् ॥ मुनिनाजल्पि-
तश्चाथ तेनचाहंविसर्जितः ॥ आरुह्यवाहनवरं मन्दरंद्रष्टुमागतः ॥ भ्रममाणेनचमया कौतूहलपरेणहि ॥ श्रुतंसुन्दरिगीतंतु
तववक्रविनिर्गतं ॥ गीतेनचाहमाकृष्ट स्त्वत्सकाशमिहागतः ॥ चक्षुःपदमनुप्राप्ता ममत्वंचारुलोचने ॥ ततोहंमूर्छितोदेवि विसं-
ज्ञःपतितःक्षितौ ॥ संप्राप्तचेतनायुक्त स्तववाक्यामृतेनहि ॥ पुनर्जातमिवात्मानं मन्येहंचारुलोचने ॥ इत्युत्तरप्रदानेन प्रसादंक-
र्तुमर्हसि ॥ केनचेहेदृशंरूपं त्रैलोक्यक्षोभनंशुभे ॥ कृतंतवसुचार्वंगी तत्सर्वंवक्तुमर्हसि ॥ एवमुक्तानृपेणाथ मोहिनीव्याजहार-
वै ॥ ब्रह्मणोहंसुताराजन् त्वदर्थमिहचागता ॥ श्रुत्वाकीर्तितुतेभूप मन्दरंसमुपागता ॥ परित्यज्यसुरान्सर्वान् दिगंवरपुरोगमा-
न् ॥ समाहितमनाभूप नियतातपसिस्थिता ॥ संपूजयन्तिदेवेशं गीतवाद्येनशंकरं ॥ परितुष्टःपशुपतिः त्रिदिनार्द्धेनभूपते ॥
गीतदानमहंमन्ये सुराणामपिदुर्लभं ॥ सर्वदानाधिकंभूप अक्षय्यगतिदायकं ॥ गीतज्ञायत्रगीतेन प्राप्नोतिपरमंपदं ॥ रुद्रस्या-
नुचरोभूत्वा तेनैवसहमोदते ॥ संतुष्टोयंपशुपतिः सद्यएवममानघ ॥ ईप्सितोयंमयाप्राप्तो भवानवनिपालक ॥ अभिप्रेतोसिमे-
राजन् अभिप्रेताह्यहंतव ॥ सकामायाःसकामेन संगमोगुणवान्भवेत ॥ तमेवमुक्ताद्विजराजवक्रा करंकरेणाथविगृह्यदृष्टा ॥ उ-
त्थापयामासधरातलस्थं रुक्मांगदंसागजगामिनीतदा ॥ ३८ ॥ इतिश्री ल०ना० रुक्माङ्गदसंवादोनाम द्वादशोध्यायः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वशिष्ठउवाच ॥ उत्थापयित्वाराजानं मोहिनीवाक्यमब्रवीत् ॥ माशंकांकुरुराजेन्द्र कुमारीमामकल्मषां ॥ उद्वाहयमहीपाल गृ-
ह्योक्तविधिनाहिमां ॥ अविवाहितांतुकन्यां यदिगच्छन्विभर्त्यपि ॥ प्रसूयतिदिवाकीर्त्तिं सर्ववर्णविगर्हितं ॥ चाण्डालयोनयस्ति-
स्रः पुराणाःकवयोविदुः ॥ कुमारीसंभवस्त्वेकः स्वगोत्रायांद्वितीयकः ॥ ब्राह्मण्यांशूद्रजनकस्तृतीयोनृपपुंगव ॥ एतस्मात्कार-
णाद्राजन् कुमारीमुद्वहेदिति ॥ ततस्तांचञ्चलापांगीं नृपोरुक्मांगदोगिरौ ॥ उद्वाह्यविधिवद्राजा बभाषेप्रहसन्निति ॥ नतथात्रि-
दिवप्राप्तिः प्रीणातिममसानसं ॥ तवप्राप्तिर्यथाह्लादं करोतिममसुन्दरि ॥ मन्येपुरन्दरादेवि आत्मानमधिकंक्षितौ ॥ त्रैलोक्यसु-
न्दरींप्राप्य त्वांभार्याचारुलोचने ॥ तस्माद्वदानुकूलंते किंकरोमिप्रसाधिमां ॥ इहैवरंस्यसेवापि अथवानगरेवद ॥ मलयेमेरुशिखरे
वनेवानन्दनेशुभे ॥ तच्छुत्वामोहिनीवाक्यं मधुरंभूपतेस्तदा ॥ उवाचवाक्यंसुमुखी राजानंहाटकांगदं ॥ सपत्नीनांकटाक्षाणि
क्रूराणिनगरेमम ॥ पतिष्यन्तिमहीपाल कथंगच्छामितेपुरं ॥ नासौसीमन्तिनीकाचित् भवेद्धपक्षिताविह ॥ यस्याःसपत्नीप्रभवं
दुःखमामरणंभवेत् ॥ साहंत्यक्तामहीपाल तवकीर्त्यानुपुण्यया ॥ ज्ञात्वासपत्नीप्रभवं दुःखंभर्त्ताकृतोमया ॥ रंस्यामिपर्वतेश्रेष्ठे बह्वा-
श्चर्यसमन्विते ॥ नरंस्यसेहित्वंराजन् सन्ध्यावल्याविनाक्वचित् ॥ तस्याहिविरहेदुःखी सपुत्रायाभविष्यसि ॥ दुःखेनभवतोराजन्
भूरिदुःखंभवेन्मम ॥ यत्रैवभवतःसौख्यं तत्राहमपिसंस्थिता ॥ यत्रत्वंरंस्यसेराजन् तत्रमेमन्दरोगिरिः ॥ भर्तुःस्थानेसुवस्तव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋद्धिहीनेपिभार्यया ॥ समेरुःकाञ्चनमय स्तंनिवासंप्रचक्ष्यते ॥ मनोरथानांसतरुर्यत्रत्वंरंस्यसेप्रभो ॥ भर्तृस्थानंपरित्यज्य सविन्तवित्तवर्जितं ॥ पितृस्थानंचयानारी अर्थार्थमनुगच्छति ॥ इहापत्नुज्यनरकं पश्चाद्भवतिशूकरी ॥ एवंजानाम्यहंदोषान् कथं-स्थास्यामिमन्दरे ॥ गमिष्यामित्वयासार्द्धमीशस्त्वंसुखदुःखयोः ॥ मोहिन्यास्तद्वचःश्रुत्वा सराजाहृष्टमानसः ॥ परिष्वज्यवरा-रोहामिदंवचनमब्रवीत् ॥ भार्याणांममसर्वासामुपरिष्टाद्भविष्यसि ॥ माशंकांकुरुवामोरु नतेदुःखंभविष्यति ॥ जीवनादधिकंसु-भ्रु भविष्यसिगृहेमम ॥ गच्छावएहितन्वंगि सुखायनगरंप्रति ॥ भुंक्ष्वभोगान्मयासार्द्धं तत्रस्थास्वेच्छयाप्रिये ॥ साचेदमुक्त्वा-शशिकान्तिगौरी रुक्मांगदेनात्मजनाशनाय ॥ संप्रस्थितान्नृपुरनादयुक्ता विकर्षयन्तीगिरिजातसंघान् ॥ २६ ॥ इतिश्री ल-घुनारदीयपुराणे रुक्माङ्गदचरिते मोहिन्यानयनंनाम त्रयोदशोध्यायः ॥ १३ ॥ ७ ७ ७ ७ ७ ७

वशिष्ठउवाच ॥ संप्रस्थितावुभौभूय गिरिप्रस्थाद्धरातलं ॥ पश्यमानोवहून्भावान् गिरिजातान्मनोहरान् ॥ केचिन्नीलोत्पलप्र-ख्याः केचित्काञ्चनसप्रभाः ॥ केचिद्विद्रुमसंकाशाः केचिद्रजतसन्निभाः ॥ केचित्स्फटिकवर्णाभा हरितालनिभास्तथा ॥ अन्या-नाश्लेषतांप्राप्ताः शनकैःशनकैर्द्रुमाः ॥ अवरुह्यतुशैलेन्द्रा त्तावुभौधरणीतलं ॥ संप्राप्यसुमहावीर्य्यं वाजिनंतदपश्यतां ॥ खन्यमा-नंखुरेणोर्वीं कुलिशाग्रेणवेगिना ॥ तस्यदारयतःपृथ्वीं सुतीक्ष्णेनखुरेणहि ॥ गृहगोधाभवेत्तस्मिन् रंध्रेसुखगताकिल ॥ निर्गच्छ- ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानानृपते खुरेणविदलीकृता ॥ विचार्य्यमाणोनृपतिर्दयावान्समपश्यत ॥ अत्यधावतवेगेनहाहतेतिवदन्प्रियां ॥ वृक्षपत्रेततःसो-
थ कोमलेजगतीपतिः ॥ उद्धारयन्हयखुरान् प्राक्षिपज्जलजेक्षणः ॥ ततस्तांमोहिनींप्राह पश्यमूर्च्छांगतामिमां ॥ शीघ्रंचाहरचा-
र्वंगिजलंजलजलोचने ॥ येनेमांमूर्च्छितांसिंचे गृहगोधांविमर्द्दितां ॥ साभर्तुर्वचनाच्छीघ्रमाहरच्छीतलंजलं ॥ तेनाभिषिञ्चन्नृपति
र्गृहगोधांविमर्द्दितां ॥ सावापचेतनांराजन्शीतलेनजलेनच ॥ अभिघातेषुसर्वेषु शस्तंवारिषुसेचनं ॥ क्लिन्नेनचाथवस्त्रेण वन्ध-
नंहितमुच्यते ॥ साप्राप्यचेतनांभूयो गोधावचनमब्रवीत् ॥ निरीक्ष्यनृपशार्दूलं वेदनार्त्ताशनैःशनैः ॥ रुक्माङ्गदमहावाहो निवो-
धममचेष्टितं ॥ साकेरनगरेरम्ये भार्य्याहंद्विजजन्मनः ॥ रूपयौवनसम्पन्ना तस्यचाहंप्रियाविभो ॥ सदाविद्वेषसम्पन्नोमयिनिष्ठुर
जल्पकः ॥ नान्यस्यकस्यचिद्द्वेष्टामांसुमोचद्विजोनृप ॥ ततोहंक्रोधसंयुक्ता वशीकरणलम्पटा ॥ अपृच्छन्प्रमदाराजन् यास्त्य-
क्ताःपतिभिःकिल ॥ ताभिरुक्ताह्यहंभूप वश्योभर्त्ताभविष्यति ॥ अस्माकंप्रत्ययोजातो भर्तृत्यागीवरानना ॥ पूजिताभेषजैर्वश्या
जाताहिपतयोद्दिनः ॥ सात्वंपृच्छवरारोहे दास्यतिभेषजंशुभं ॥ विकल्पंकुरुमाभीरु भवितादासवत्पतिः ॥ ततोहंत्वरितागत्वा
तासांवाक्येनभूपते ॥ प्रसादःकथितस्तस्याः पृच्छंत्याममानवैः ॥ शतस्तंभसमायुक्तः कुट्टिमःसुधयायुतः ॥ उपविष्टांसुतेज-
स्कां अपश्यंव्रतचारिणीं ॥ प्रावृतांदीर्घवस्त्रेण सवितेवविकर्त्तना ॥ दीर्घाभिःसाजटाभिस्तु संवृतादीप्तिसंयुता ॥ परिचारस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संयुक्ता वीर्य्यमानाशनैःशनैः ॥ अक्षसूत्रकरासाच जपन्तीभगमालिनीं ॥ सर्ववश्यकरंमन्त्रं क्षोभकंप्रत्ययात्मकं ॥ ततोहंप्रण-
ताभूत्वा पञ्चांन्यस्तांगुलीयकं ॥ वज्रमाणिक्यखचित मतिरक्तंप्रभान्वितं ॥ ततोहृष्टाभवद्दृष्ट्वा ॥ पादस्थंचांगुलीयकं ॥ अपृ-
च्छयातयाज्ञातं ममभर्तृविमाननं ॥ तथोक्ताहंतयाभूप तापस्याप्रणतौस्थिता ॥ चूर्णोरक्षान्वितोह्येष सर्वभूतवशानुगः ॥ सुभ्रुभ-
र्त्तरिसंयोज्य रक्षांकण्ठेतथाकुरु ॥ काकालयंचसंगृह्य विधिपूर्वमतःपरं ॥ मंत्रवानशुचिर्भूत्वा शवाग्निश्चविनिर्दिशेत् ॥ भविष्य-
तिपतिर्वश्यो नान्यांयास्यतिसुन्दरि ॥ चूर्णंरक्षांगृहीत्वाहं प्राप्ताभर्तृगृहंपुनः ॥ प्रदोषेतपसायुक्तः चूर्णोभर्त्तरियोजितः ॥ ग्रीवा-
यांहिकृतोरक्षा नविचारःकृतोमयाः ॥ यदासपीतचूर्णस्तु भर्तामामनृपोत्तम ॥ तदैवक्षयरोगोभूत् पतिःक्षीणोदिनेदिने ॥ गुह्येषु
कृमयोजाताः क्षतदुष्टव्रणोद्भवाः ॥ राजन्दिनैःकतिपयै दीपद्राविणदर्शनात ॥ हततेजास्तथाभर्त्तामामुवाचाकुलेन्द्रियः ॥ क्रन्द-
मानोदिवारात्रौ दासोस्मितवशोभने ॥ त्राहिमांशरणंप्राप्तं नयास्येन्यांस्त्रियंक्वचित् ॥ तत्तस्यरुदितंश्रुत्वा भीताहमवनीपते ॥
निवेदितंमयातस्यां कथंभर्त्ताभवेत्सुखी ॥ तयामेभेषजंदत्तं द्वितीयंदाहशान्तये ॥ दत्तेचभेषजेतस्मिन् स्वस्थोभून्मेक्षणात्पतिः ॥
पूर्वंचूर्णभवोदाहः शान्तस्तेनौषधेनहि ॥ ततःप्रभृतिभर्त्तामे वश्योभूद्वचनेस्थितः ॥ पञ्चत्वंचगताकाले तथानरकयातनां ॥ ता-
म्रभ्राष्ट्रेचदग्धाहं युगानिदशपञ्चच ॥ सूक्ष्मातिलप्रमाणानि कृत्वाखण्डान्यनेकशः ॥ किंचित्पातकशेषेषु धरायामवतारिता ॥ ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहगोधामयंरूपं कृत्वाभास्करजेनमे ॥ साहमवस्थिताभूप वर्षाणामयुतंसरुक् ॥ यान्यापियुवतीराजन् भर्तुर्वश्यंसमाचरेत ॥ वृथाधर्म्माद्दुराचारा भर्ज्यतेताम्रभ्राष्ट्रके ॥ भर्त्तानाथोगुरुर्भर्त्ता भर्त्तावैदैवतंपरं ॥ तंवश्यंकुरुतेयातु सासुखंकथमाप्नुयात् ॥ तिर्यग्योनिशतंयाति कृमियोनिशतानिच ॥ तस्माद्भूपालकर्त्तव्यंस्त्रीभिर्भर्तृवचस्सदा ॥ साहंयास्येपुनर्योनिंकुत्सितांयातनान्वितां ॥ यदिनोद्धरसेराजन् अद्यमांशरणागतां ॥ सुकृतस्यप्रभावेन निजजन्मानितेनच ॥ यात्वयासंगमेपुण्या कृताश्रवणद्वादशी ॥ शरव्याश्चैवगंगायाः संगमेपापनाशने ॥ प्रेतनिर्य्यातनीपुण्या इप्सितस्यचदायिनी ॥ यस्यांभूपालस्त्वगृहे स्नातोपिमनुजःकिल ॥ सर्वतीर्थफलप्राप्तिं लभतेनात्रसंशयः ॥ दत्तंजप्तंहुतंयच्च कृतंदेवार्चनादियत् ॥ सर्वतदक्षयंज्ञेयं यत्कृतंविजयादिने ॥ एवंविधंफलं तस्या स्तदेवसकलंतव ॥ द्वादश्यामुपवासेन त्रयोदश्यांतुपारणे ॥ दशाब्दफलमाप्नोति नरःसम्यगुपोषणैः ॥ दयांकुरुमहीपाल धर्ममूर्त्तिर्भवान्क्षितौ ॥ वैवस्वतपथध्वंसीपरित्राहिसुदुःखितां ॥ गृहगोधावचःश्रुत्वामोहिनीवाक्यमब्रवीत् ॥ स्वकृतंजन्तवोश्नन्ति सुखदुःखादिकंविभो ॥ तस्मात्किमनयाकार्य्यं पापयाभर्तृक्षुद्रया ॥ ययाभर्त्तावशंनीतोरक्षाचूर्णादिभिर्नृप ॥ साधुभ्योयत्कृतंराजन् यशःस्वर्गकरंभवेत् ॥ शर्करामिश्रितंक्षीरंकाद्रवेयेनिवेदितं ॥ विषबृष्टिकरंदृष्टमेवंदुष्टेनियोजितं ॥ पापामिमांपरित्यज्यगच्छावोनगरायवै ॥ जनव्यापादयुक्तानामात्मसौख्यंविनश्यति ॥ रुक्माङ्गदउवाच ॥ ब्रह्मात्मजेकथंवाक्यमीदृशंव्याहृतंत्वया ॥ नसाधुनाभि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दंबृत्तंभवेच्चारुविहासिनि ॥ आत्मसौख्यकराःपापा भवन्तिपरदारिकाः ॥ पिताजातोत्रशरोहे परोपकरणायते ॥ शशीसूर्य्योथपव-
नोमेदिनीहुतभुग्जलं ॥ चन्दनंपादपाःसन्तःपरोपकरणेस्थिताः ॥ श्रूयतेकिलराजाभूद्धरिश्चन्द्रोवरानने ॥ चाण्डालमन्दिरवासी
भार्य्यातनयविक्रयी ॥ असत्यवचनाद्भीतोदुःखाद्दुःखतरंगतः ॥ तस्यसत्येनसन्तुष्टा देवाब्रह्मपुरोगमाः ॥ वरेणशद्दशीचक्षुर्हरिश्चन्द्रं
महीपतिं ॥ तेनसत्यवताचोक्ता देवाब्रह्मपुरोगमाः ॥ यदितुष्टाहिविबुधा दातुकामोवरंमम ॥ एषाहिनगरीरम्यासद्रूपाससरीसृ-
पाः ॥ आवालबृद्धतरुणा सनारीससुतायदा ॥ प्रयांतुगतपापाहि स्वर्गतींनगरीमम ॥ अयोध्यापातकंगृह्य गन्ताहंनगरंध्रुवं ॥
एकाकीनहिवांच्छन्ति परित्यज्यजनंक्षितौ ॥ स्वर्गगन्तुंहिविबुधाः सत्यमेतन्मयेरितं ॥ तस्यतांधिषणांज्ञात्वा सहतेनैवतांपुरीं ॥
आनयन्त्रिदिवंदेवा ब्रह्मणासहिताःकिल ॥ सोद्यापिवसतेराजा स्वपौरेणसमन्वितः ॥ कामगेनविशालाक्षि पूज्यमानोदिवाल-
यैः॥ अस्थिदानंकृतंदेवी कृपयाहिदधीचिना ॥ देवानामुपकारार्थं ज्ञात्वादैत्यैर्निराकृतान् ॥ कपोतार्थेस्वमांसानि सिविनाभूभु-
जापुरा ॥ प्रदत्तानिवरारोहे श्येनायक्षुधितायवै ॥ जीमूतवाहनोराजा पुरासीत्क्षितिमण्डले ॥ तेनापिजीवितंदत्तं गरुडाय
वरानने ॥ तस्माद्दयालुनादेवि भवितव्यंमहीभुजा ॥ शुचौवर्षतिदेवेशो अमेघेपिसमंशुभे ॥ चाण्डालंपतितंचन्द्रो ह्लादयत्यनि-
जैकरैः ॥ तस्मादहंवरारोहे गृहगोधांसुदुःखितां ॥ उद्धरिष्येनिजैःपुण्यै दौंहित्रैर्नाधुषिर्यथा ॥ विमोहिनींनिराकृत्य गृहगोधासु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाचह ॥ दत्तंमयाकृतंपुण्यं विजयासंभवंतव ॥ गच्छविष्णोःशुभाल्लोकान् निर्धूताखिलकल्मषा ॥ तद्वाक्यंसहसाश्रुत्वा दिव्या-
भरणभूषिता ॥ विमुच्यदेहंतंजीर्णं गृहगोधासमुद्भवं ॥ द्वादशादित्यभाजाता दिव्यरूपामनस्विनी ॥ जगाममंत्र्यतंभूपं द्यो-
तयन्तीदिशोदश ॥ श्रीमन्तमिवकुर्वाणा वैष्णवंपदमुत्तमं ॥ यद्योगिगम्यंहुतभुक्प्रकाशं वरंवरेण्यंपरमस्वरूपं ॥ यस्मादिमेदेव
शशिप्रकाशा जगत्प्रकाशायनृपःप्रसूतः ॥ ७६ ॥ इतिश्रीलघुनारदीयपुराणेरुक्माङ्गदचरिते गृहगोधासंवादोनामचतुर्दशः १४
वशिष्ठउवाच ॥ पातकान्मोचयित्वातां गृहगोधांसपार्थिवः ॥ उवाचमोहिनींवाक्यं शीघ्रमारुह्यतांहयः ॥ योजनायुतशोह्येष क्ष-
णात्कृष्णध्वजोयथा ॥ अद्यपश्यसिपुत्रस्य वक्त्रंपूर्णेन्दुसप्रभं ॥ धार्मिकस्यवरारोहे कृतज्ञस्यमहात्मनः ॥ सुखगामीहयोदेवि वि-
मानप्रतिमःशुभे ॥ तदाकर्ण्यवचोराज्ञो मोहिनीमदलालसा ॥ आरुरोहसमंभर्त्रा तंहयंवातवेगिनम् ॥ उवाचमोहिनीभूयो भ-
र्त्तारंप्रत्ययन्निति ॥ प्रतोदयैनमश्वंत्वं स्वपुरायमहीपते ॥ पुत्रवक्त्रस्पृहाद्रष्टुं लंपटातववर्त्तते ॥ तवाधुनानृपश्रेष्ठ गंतुंचत्वरतेमनः ॥
मोहिन्यावचनंश्रुत्वा प्रतस्थेनगरंप्रति ॥ पश्यमानःसुसंहृष्टः पादपान्पर्वतान्नदी ॥ वनानिसुविचित्राणि मृगान्बहुविधानपि ॥
ग्रामान्घोषान्तथादुर्गान् नगराणिशुभानिच ॥ सरांसिचविचित्राणि महाभागान्मनोहरान् ॥ अचिरेणाश्रमंदृष्ट्वा वामदेवस्यभू-
पतिः ॥ आकाशस्थोमहीपालो नमस्कृत्यत्वरान्वितः ॥ ततोययौमहाराजो वायुवेगेनवाजिना ॥ पश्यमानोबहून्देशान् धनधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यसमन्वितान् ॥ आससादपुरंराजा वैदेशेसुरसन्नवत ।' तमायातंनृपंदृष्ट्वा चारैर्धर्मांगदस्ततः ॥ पितरंधर्मसंयुक्तं भूपालान्बा- अ० १८
ना०पु० क्यमब्रवीत् ॥ एषाप्रकाशमायाति दिग्उदीचीनृपोत्तमाः ॥ मत्पितुर्वाजिनाक्रान्ता तेजसातस्यरञ्जिता ॥ तस्मादृच्छामहेसर्वे सं-
॥ २१ ॥ मुखंनव्रजेत्सुतः ॥ यःसवैनरकंयाति घोरंनास्त्यत्रसंशयः ॥ संमुखंव्रजमानस्य सुतस्यापितरंप्रीति ॥ पदेपदेयज्ञफलं प्राज्ञःपौरा-
णिकाद्विजाः ॥ उत्तिष्ठध्वंप्रयाम्येष भवद्भिःपरिवारितः ॥ अभिवादयितुंप्रेम्णा एषमेदैवतःपरं ॥ तथेत्युक्तस्तुतैःसर्वै र्भूमिपालैर्नृ
पात्मजः ॥ जगामसंमुखंपद्भ्यां क्रोशमात्रंपितुस्तदा ॥ वृतोराजसहस्रेण मूर्त्तिमानिवमन्मथः ॥ सगत्वादूरमध्वानमाससादनृ-
पात्मजः ।। संप्राप्यपितरंस्नेहाज्जगामधरणींतदा ॥ शिरसाराजभिःसार्द्धं प्रणाममकरोत्तदा ॥ तंप्रणामगतंप्रेक्ष्य तनयंभूभुजैस-
ह ॥ अवरुह्यहयाद्राजा समुत्थाप्यसुतंविभो ॥ भुजाभ्यांसाधुवृत्ताभ्यां परिष्वज्यसभूमिपः ॥ मूर्द्ध्निचैनमुपाघ्राय उवाचतनयं-
तदा ॥ कच्चित्पासिप्रजाःसर्वाः कच्चिद्ध्वंसयसेरिपून् ॥ न्यायागतेनवित्तेन कोशंपुत्रविभर्षिवै ॥ कच्चिद्विप्रेधिकावृत्तिरस्तिपुत्र-
त्वयाकृता ॥ कच्चिद्देशान्तशीलत्वं कच्चिद्दुर्गोनानिष्ठुरः ॥ कच्चिद्गावोनदुह्यन्ते पुत्रचाण्डालवेश्मनि ॥ कच्चित्तेविषयेसत्वा विनी-
ताःपितृवत्सलाः ॥ श्वश्रूवाक्येवधूकच्चिद्वर्त्ततेभर्तृतत्परा ॥ कच्चिद्विवादान्विप्रैश्च सहपश्यसिपुत्रक ॥ कच्चिद्गावोनवाध्यन्ते वि- ॥ २१ ॥
षयेतृणवारिष्ठ ॥ तुलामानानिसर्वाणि संपश्यसिदिनत्रये ॥ कुटुंविनःकरैःपुत्र पीडयन्नातिवर्द्धसे ॥ कच्चिन्नद्यूतपानादि वर्त्तसे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बिषयेतव ॥ कश्चिद्भिन्नरसैर्लोका भिन्नधान्यैःपुरेतव ॥ तथाविशीर्णैर्वर्णैश्च बञ्चयन्तिनमानवाः ॥ सुहृद्ध्यापुत्रकच्चिद्दै हस्त्यश्वंपरि-
पश्यसि ॥ कच्चित्तुमातृःसर्वावे नविशेषेणपश्यसि ॥ कच्चिन्नवासरेविष्णोर्नरोभुङ्क्तेपुरेतव ॥ शशिक्षयेतुसंप्राप्ते कच्चिच्छ्राद्धकरोज-
नः ॥ कच्चिच्चापररात्रेषु निद्रांपुत्रविसर्जसे ॥ निद्रामूलमनर्थस्य निद्रापापप्रवर्त्तिनी ॥ निद्रादरिद्रजननी निद्राश्रेयोविनाशिनी ॥
नहिनिद्रान्वितोराजा चिरंभुङ्क्तेवसुन्धरां ॥ पुंश्चलीचयथाभर्त्तुर्लोकद्वयविनाशिनी ॥ एवमुच्चरभाणेतु तनयोवाक्यमब्रवीत ॥ ध-
र्मांगदोमहीपालं प्रणम्यचपुनःपुनः ॥ सर्वमेतत्कृतंतात पुनःकर्त्तास्मितेवचः ॥ पितुर्वचनकर्त्ताच पुत्रोवन्द्योजगत्त्रये ॥ किंत-
स्मात्पातकंतस्य नकुर्याद्यःपितुर्वचः ॥ नतुतीर्थफलंकुर्यात यःकुर्यात्सेवनंपितुः ॥ त्वदधीनंशरीरंमे त्वदधीनंहिजीविनं ॥ त्वदधी-
नोहिमेधर्मस्तथात्वंदैवतंमम ॥ त्रैलोक्यस्यापिदानेन नशुद्धिर्मेऋणात्तव ॥ किंपुनर्देहवृत्ताभ्यां क्लेशदानादिभिर्विभो ॥ एवंब्रु-
वाणंतनयं बहुभूपालसंवृतं ॥ रुक्मांगदःपरिष्वज्य पुनराहसुतंवचः ॥ सत्यमेतत्त्वयापुत्र व्याहृतंवेदसंमितं ॥ पितुरस्त्यधिकंकिं-
चिद्दैवतंनसुतस्यहि ॥ देवाःपराङ्मुखास्तस्य पितरंयोवमन्यते ॥ सोहंमूर्द्धिन्त्वयापुत्र धृतस्तुक्षितिरक्षणात् ॥ जित्वाद्वीपवतींपृथ्वीं
बहुभूपालभूषितां ॥ एतत्सौख्यंपरंलोके स्वर्गस्यैतत्पदंतथा ॥ पितुरस्त्यधिकःपुत्रो यद्भवेत्क्षितिमण्डले ॥ सोहंपुत्रकृतार्थस्तु कृतः
सद्गुणवर्त्तिना ॥ त्वयासाधयतांपुत्र तथाहरिदिनंशुभं ॥ तत्पितुर्वचनंश्रुत्वा पुत्रोधर्मांगदोब्रवीत ॥ कृतस्तुभवात्राजन् निवेद्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयिभूधुरं ॥ कस्मिन्स्थानेत्वियंप्राप्ता सूर्यायुतसमप्रभा ॥ मन्येनिर्वेदमापन्न इर्माकृत्वाप्रजापतिः ॥ नेदृग्रूपामहीपाल नारीत्रै-
लोक्यमध्यतः ॥ मेध्यभूधरजादेवी अथवासागरोद्भवा ॥ मायावामयदैत्यस्य प्रमदारूपधारिणी ॥ अहोधातासुनिपुणो येनेयं-
निर्मितापुरा ॥ कलाग्रशतभागंतु व्यलीकंनैवदृश्यते ॥ इयंहियोग्याकनकाबभासा तथैवधन्याजगतीपतीश ॥ एवंविधामेज-
ननीयथास्यात् कोन्योस्तिमत्तःसुकृतीनरेन्द्रः ॥ ४९ ॥ इतिश्री ल० ना० पु रु० पुत्रानुशासनं नाम पञ्चदशोध्यायः ॥ १५ ॥
वशिष्ठउवाच ॥ धर्म्मांगदवचःश्रुत्वा हृष्टोरुक्मांगदोब्रवीत् ॥ सत्यंतेजननीपुत्र संप्राप्तामन्दरेमया ॥ विधानात्पुत्रवालेयं मदर्थे-
कृतनिश्चया ॥ कुर्वतीदारुणंकिंचि त्तपःपरमदुष्करं ॥ ततःपञ्चदशाहेन हयमारुह्यवेगितः ॥ मन्दरंपर्वतंश्रेष्ठं गतोहंधर्मभूषण ॥
तत्रदृष्टामहाभागा तोषयन्तीदिगंवरं ॥ मयादृष्टासमारुह्य पद्मांश्चीरोदगह्वरं ॥ ततोहंमूर्च्छयायुक्तः पतितोधरणीतले ॥ अनंग
मार्गणैर्विद्धो व्याधविद्धोमृगोयथा ॥ ततोहमनयादेव्या शांत्वितश्चारुनेत्रया ॥ उक्तोहंभवभर्त्तामे किंचित्प्रार्थनयासह ॥ मया
चापिप्रतिज्ञातं सदक्षिणकरान्वितं ॥ सेयंभार्य्याविशालाक्षी स्थितामन्दरमस्तके ॥ ततोवतीर्यभूपृष्ठं समारुह्यतुरंगमं ॥ तृतीयेन
दिनेनाहं संप्राप्तस्तवमन्दिरं ॥ पश्यमानोगिरिन्देशान् सरांसिसरितस्तथा ॥ इयंतेजननीपुत्र ममभार्य्यासुशोभना ॥ अभिवा-
दयचार्वंगी मिमांसन्ध्यावलीमिव ॥ ततपितुर्वचनंश्रुत्वा चाग्रसंस्थामवन्दत ॥ शिरसात्वरनींगत्वा विनयेनमहाशयः ॥ उवाच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोहिनीतत्र प्रहसन्निबभूपते ॥ नमस्करोमित्वामंव सहैभिर्वसुधाधिपैः ॥ प्रसादंकुरुमेदेवि प्रणतस्यकृतांजलेः ॥ तंपुत्रमवनींप्रा-
सं मोहिनीप्रेक्ष्यभूपते ॥ दाक्षिण्येनतुसाभर्त्तु रवतीर्य्यतुरंगमात् ॥ अवगृह्यचवाहुभ्यां उत्थाप्यविनतंतुतं ॥ परित्यक्तस्तथामात्रा
पुनरेवाभ्यवादयत् ॥ ततस्तांसुमनोज्ञैस्तु चारुवस्त्रैःसुभूषणैः ॥ भूषयित्वासमारोप्य पुनरेवहयोत्तमं ॥ सपृष्ठेचरणौकृत्वा तस्या
राजीवलोचनः ॥ तेनैवविधिनाभूप पितरंचाप्यरोपयत् ॥ वृतोभूपालसंघैश्च पद्म्यांधर्म्मांगदोययौ ॥ अश्वस्याग्रेतदात्द्दृष्टो जन-
नींप्रेक्ष्यमोहिनीं ॥ श्रावयन्सुजनंसर्वं मेघगंभीरयागिरा ॥ धन्यःसतनयोलोके मातरोयस्यभूरिशः ॥ सर्वलक्षणसंपूर्णः पितुरिष्टो
महावलः ॥ यस्यैकाजननीलोके पितातस्येहदुःखभाक् ॥ पितुर्दुःखेनपुत्रस्य नचसौख्यंभवेन्महत् ॥ एकस्यावन्दनेमातुः पृथि-
वीफलमश्नुते ॥ मातॄणांवहुलेसत्यं महत्पुण्यंभविष्यति ॥ दिवसेदिवसेपूजां कुर्वतस्त्वक्षयंफलं ॥ एवमुच्चार्य्यमाणोसाववनीप-
तिसंवृतः ॥ प्रविष्टोनगरंरम्यं वैदिशंऋद्धिसंयुतं ॥ हयस्थनैवपित्रावै सपद्म्यामेवभूपते ॥ ततोगृहवरंप्राप्य गृह्यमाणोजनैर्नृपः ॥
अवरुह्यहयात्तस्मात् मोहिनींवाक्यमब्रवीत् ॥ धर्मांगदगृहंगच्छ मत्सुतस्यमनोहरं ॥ एषतेगुरुसुश्रूषां करिष्यतिवरानने ॥ नस-
र्वानैवदासीते सुश्रूषामाचरेत्तथा ॥ साह्येवमुक्तापतिना प्रतस्थेसुतमन्दिरं ॥ धर्मांगदेनसातुष्टा गच्छन्तीमन्दिरायवै ॥ दृष्ट्वास-
चमहाभाग स्तानुवाचमहीभुजः ॥ तिष्ठध्वंपितुरादेशात सुश्रूषेजननीमहं ॥ तानेवमुक्त्वानीत्वाच स्वगृहंगजगामिनीं ॥ आरो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पयामासचतां पर्य्यंकेसुमनोहरे ॥ काञ्चनेपट्टसूत्रेण रचितेकोमलेद्दढे ॥ सुखास्तरणसंयुक्ते मणिविद्रुमभूषिते ॥ रत्नदीपैश्चबहुशो
 भाषितेसूर्य्यसन्निभैः ॥ पादप्रक्षालनंचक्रे ततोवैधर्मभूषणः ॥ सन्ध्यावल्यागुरुत्वेन तामपश्यतसुन्दरीं ॥ नैवतस्याभवद्दृष्टं मो-
॥ २३ ॥ हिनींप्रतिमानसं ॥ सुकुमारीसुतत्वंगी पीनोरुजघनस्थली ॥ मेनेवर्षायुतसमा मात्मानंहित्रिवार्षिकं ॥ प्रक्षाल्यचरणौतस्या रत-
जलंचाप्यवन्दयत ॥ पादोत्थंपरयाभक्त्या कृतकृत्योस्मिभाविनि ॥ ततस्तांस्नापयामास अक्षुब्धेनहचेतसा ॥ स्वयंचवरनारीभिः
श्रमक्लमहरायवै ॥ सर्वभोगैस्तदादेवीं चक्रेधर्मांगदःसुतः ॥ क्षीरोदमथनेजाते मन्दरेचामृतालये ॥ येलब्धदानवान्जित्वा पाता-
लेरत्नसुक्तिके ॥ मोहिन्याःकर्णयोश्चक्रे स्वयमेवनृपांगदः ॥ जांबूनदस्यशुद्धस्य निष्कंकुलिशभूषितं ॥ हारादनंतरंमातुर्ददौभूप
सुतस्तदा ॥ अष्टोत्तरसहस्रेण धात्रीफलनिभैःशुभैः ॥ मौक्तिकैराचितःशुभ्रो हारोदेव्याःक्षिपद्धृदि ॥ निष्कपलशतैर्बद्धः कुलिशा
युतभूषितः ॥ हाराल्लघुतरंचक्रे मातुर्नृपसुतस्तदा ॥ वलयावज्रखचिता द्विरष्टौकरयोर्दधत ॥ एकैकेनिस्ककोटिर्हि कृतामुल्यवि-
दैर्नरैः ॥ केयुरनूपुरंतस्या अनन्तोयंनृपात्मजः ॥ प्रददौपितुरिछायां अनेकाभरणंनृपः ॥ कटिसूत्रंचसर्वाण्या यदासीत्तारकप्र-
भं ॥ तद्भ्रष्टंभयभीतायाः संग्रामेतारकामये ॥ कालनेमिस्थितेराज्ये पतितंमलयाचले ॥ तद्गृहीतंतुदैत्येन शतमायेनमायिना ॥
तंहत्वामलयेदैत्यं दैत्यकोटिशतावृतं ॥ सँवत्सररणेघोरे पितुर्वचनकारणात् ॥ अवापकटिसूत्रंतद्दैत्यराजप्रियास्थितं ॥ तद्ददौपि- ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुराज्ञायाः सानन्दपुलकोनृपः ॥ हिरण्यकशिपोःपूर्वं याभार्य्यालोकसुन्दरी ॥ तस्यासीमन्तकस्यासीच्छतविद्युत्समप्रभः ॥
साप्रविष्टाहिपतिना सहपावकमध्यतः ॥ समुद्रक्षिप्यसीमन्तं दुःखेनमहतान्वितः ॥ सागरस्तत्रसंपूज्य रत्नश्रेष्ठमिदंकिल ॥ ददौ
धर्मांगदेरत्नं समुद्रोवीर्य्यतोषितः ॥ जनन्यैप्रददौसोपि सूर्य्यकोटिसमप्रभं ॥ अग्निशौचेशुभेवस्त्रे सकाञ्चनमनोरमे ॥ सहस्रको-
टितुल्येतु मोहिन्याःसानिवेदयत् ॥ देवमाल्यंसुगन्धाढ्यं तथादेवविलेपनं ॥ लब्धंदेवगुरोःपूर्वं सिद्धहस्तात्सुहृद्यकं ॥ धर्मांगदेन
वीरेण द्वीपानामधिपेनच ॥ तच्चापिप्रददौदेव्या मोहिन्याःकामवर्द्धनं ॥ संपूज्यपरयाभक्त्या पश्चात्षड्रसभोजनं ॥ स्वीकृतंमातृ
हस्तेन भोजयामासभूमिपः ॥ पुरस्तादेवजननीं वाक्यैःसंबोध्यभूरिशः ॥ उवाचमधुरंवाक्यं शिरसोच्यप्रणम्यवै ॥ मयात्वया
चकर्त्तव्यं शङ्कोवाक्यंनसंशयः ॥ यात्विष्टानृपतेर्देवि सास्माकंतुगरीयसी ॥ यात्विष्टाभवतेभर्त्तु स्तस्यांयानिष्ठमाचरेत् ॥ सपत्नी
नरकंयाति यावदिन्द्राश्चतुर्द्दश ॥ सपत्नभावंयाकुर्य्या द्भर्त्तुप्राणप्रियातुया ॥ तस्याःस्नेहवशात्सापि पच्यतेताम्रभ्राष्ट्रके ॥ यथा
सुखेवसेद्भर्त्ता तथाकार्य्यंहिभार्य्यया ॥ अनुकूलंहितंकार्यं भर्त्तुरिष्टाहिसाभवेत् ॥ यथाभर्त्तातथातांहि वश्येतवरवर्णिनि ॥ हीता-
यामपिशुश्रूषां कृत्वायातित्रिविष्टपं ॥ पश्चात्स्थानेभवेत्स्थाहि यस्मिन्नसाह्यभवत्पुरा ॥ ॥सर्वभोगानवाप्नोति भर्त्तुरिष्टाप्रजायते ॥
ईर्ष्यागर्वपरित्यागा त्सर्वेश्वरपदंलभेत् ॥ सपत्नीयासपत्न्याश्च शुश्रूषाकुरुतेसदा ॥ भर्त्तुरिष्टांसमीक्षेत लोकास्तस्याःसदाक्षयाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इष्टापुरान्ब्राह्मणस्य वेश्याभूत्शाकलेपुरे ॥ शूद्राचारप्रदुष्टस्य परित्यक्तक्रियस्यच ॥ तस्यैवतुमहाभागा भार्य्यासाध्वीपतिव्रता ॥
साधुपर्य्यचरत्साधु सवश्यंब्राह्मणाधमं ॥ उभयोश्चालयेत्पादा वुभयोःप्रियकारिणी ॥ उभयोरप्यधःशेते तयोश्चवचनेस्थिता ॥
वेश्ययावार्य्यमाणानि सर्वप्रायछताधिकं ॥ एवंशुश्रूषयंत्याहि भर्त्तारंवेश्ययासह ॥ जगामसुमहान्कालो दुःखितायामहीपते ॥
अपरस्मिन्दिनेभर्त्तामाहिषंमूलमास्थितं ॥ अभक्षयत्तुधर्मेणनिःपावांतिलमिश्रितान्न ॥ तदापथ्यमशित्वाथअवमन्यपतिव्रताम ॥
अभवद्दारुणोरोगः स्त्रीजितस्यभगन्दरः ॥ पीड्यमानस्तुसतदा दिवारात्रौतदातुरः ॥ यावदस्तिगृहेवित्तं तावद्वेश्याहिसर्वशः ॥
गृहीत्वाद्विगुणांवित्तं गतायायान्यमन्दिरं ॥ अन्यस्यचतथासायं गतापार्श्वमनिन्दिते ॥ ततःसदीनवदनो व्रीडयाधोमुखःस्थितः ॥
उवाचसरुदन्भार्य्यां रुजाव्याकुलचेतनः ॥ परिपालयमांदेवि वेश्यासक्तंसुनिष्ठुरं ॥ नमयोपकृतंकिंचि त्तवसुन्दरिपापिना ॥
योभार्य्यांप्रणतांपापो नानुमन्येतगर्वितः ॥ सषंढोभवतेभद्रे जन्मानिदशपञ्चच ॥ दिवाकीर्त्तिगृहंप्राप्य गर्भितंसाधुभिर्जनैः ॥
पापांयोनिमवाप्स्यामि देवित्वामवमन्यहि ॥ तत्रक्रोधेनदग्धोस्मि त्राहिमांपापिनंशुभे ॥ त्राणंमेकुरुभर्त्तारमब्रवीत्सापतिव्रता ॥
नदैन्यंभवताकार्य्यं नव्रीडाकार्यमांप्रति ॥ नचापित्वयिमेक्रोधो येनदग्धानिवक्ष्यसि ॥ पुराकृतानिपापानि दुःखानिप्रभवन्तिहि ॥ ॥ २४ ॥
तानियःक्षमतेविद्वान् सज्ञेयःपुरुषोत्तमः ॥ यन्मयापापयापापं कृतंत्वैपूर्वजन्मनि ॥ तद्भुंजत्यानमेदुःखं नविसादश्चकश्चन ॥ इ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्येवमुक्त्वाभर्त्तारं सासुभ्रूःसमयालयत् ॥ आनीयजनकाद्वित्तं वन्धुभ्योवरवर्णिनी ॥ क्षीरोदनिलयावासं भर्त्तारंसानुमन्यते ॥
मोचयंतिदिवारात्रौ पुरीषंमुत्रएवच ॥ रजन्यांचैववृक्षोत्थं गृह्यनिर्जासजंजलं ॥ नखेनपातयामास कृमिन्कृष्णान्शनैःशनैः ॥
नसास्वपितिवैरात्रौ नदिवावरवर्णिनी ॥ भर्तुर्दुःखेनसातप्ता पश्यन्तीज्वलितंजगत ॥ भोदेवास्त्रायतांसर्वे पितरोयेचाविश्रुताः ॥
कुर्वंतुरोगहीनंमे भर्त्तारंगतकल्मषं ॥ चण्डिकायैप्रदास्यामि रक्तमाम्ससमुद्भवं ॥ अजाविमाहिषोपेतं भर्तुरिष्टाहिमेभवेत् ॥ साद-
रात्कारयिष्यामि उपवासंतथादश ॥ जननीस्थापयिष्यामि शून्यकण्टकसंस्तरे ॥ नोपभोक्ष्यामिमधुरं नोपभोक्ष्यामिवैघृतं ॥ अ
भ्यङ्गरहितावस्थां रम्येहंनात्रसंशयः ॥ जीवतांरोगहीनस्तु भर्त्तामेशरदांशतं ॥ एवंसाव्याहरद्देवि वासरेवासरेतदा ॥ ततःकाले-
नचान्येन सन्निपातोभवत्पतेः ॥ तस्यापिकटुकंप्रादा दास्येनिःक्षिप्यदेशिनी ॥ तद्दीयमानेकटुके अंगुलींतामखण्डयत् ॥ वेश्यां
दृष्ट्वातदाभीत स्तद्गतेनांतरात्मना ॥ उभयोर्दन्तयोश्लेषः सहसासमपद्यत ॥ तांखण्डमंगुलींवक्त्रे स्थितांभर्तुःस्वकोमलां ॥ खण्ड-
यित्वांगुलींभर्त्ता पञ्चत्वमगमत्तदा ॥ शय्यायांलीनमुक्तायां स्मरन्तांपुंश्चलींतदा ॥ मृतंविज्ञायभर्त्तारं साभार्य्याभर्तृतत्परा ॥ वि-
क्रियांगतमेवन्तं गृहीत्वाचैवसातदा ॥ सर्पिर्युतांचितांचक्रे मध्येकृत्वापतिंतदा ॥ अनुगृह्यपदाभ्यांसा पश्चांदत्वातुपावकं ॥ सु-
खेमुखंसमाधाय हृदयेहृदयंतथा ॥ जघनेजघनंदेवी भर्तुःसासंनिवेश्यह ॥ दाहयामासकल्याणी भर्तुर्देहंरुजान्वितं ॥ आत्मना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहचार्वंगी ज्वलितेजातवेदसि ॥ विमुच्यदेहंसहसाजगाम पतिंसमादायसुराधिलोकं ॥ विशोषयित्वावहुपापसंघान् स्वकर्मणा
तेनचहुःकरेण ॥ ६४ ॥ इतिश्रीलघुनारदीयपुराणे सन्ध्यावलीप्रबोधन्नाम षोडशोध्यायः ॥ १६ ॥ ७ ७ ७ ७ ७
पुत्रउवाच ॥ तस्मादीर्ष्यांपरित्यज्य मोहिनीमन्नभोजय ॥ नमातरीदृशंपुण्यं त्रैलोक्येप्राप्यतेक्वचित् ॥ गृहस्थेनप्रियांभार्यां भ-
र्तुर्याहिविभोजयेत् ॥ सपत्न्योहिसपत्न्यैतु यद्भक्तंप्रददातिवै ॥ तेनानेनभवेद्देवि प्रीतःकमलजःशुभे ॥ पितुर्मनोरमेतत्वं प्रसीद-
स्वममानघे ॥ तस्यास्तुसौख्यंकर्त्तव्यमावाभ्यांबरवर्णिनी ॥ भवेत्पापक्षयश्चैव स्वर्गप्राप्तिस्तुवाक्षया ॥ श्रुत्वातद्वचनंसातु देवीस-
न्ध्यावलीतथा ॥ अभिनन्द्यपरिष्वज्य तनयंगजगामिनी ॥ मूर्ध्निचैवमुपाघ्राय वचनंचेदमब्रवीत् ॥ करिष्येवचनंपुत्र धर्म्यंहि-
तवमानद ॥ ईर्ष्यामानंपरित्यज्य भोजयिष्यामिमोहिनीं ॥ सदपत्यात्वहंपुत्र त्वयैकेनमहामते ॥ नियमैर्बहुभिर्जातस्तथैवबहुभि-
र्व्रतैः ॥ व्रतराजेनचीर्णेन जातस्त्वमसिपुत्रक ॥ नहीदृशंव्रतबरं पुत्रलोकेषुविद्यते ॥ सद्यप्रत्ययकृद्वत्स महापातकनाशनं ॥ किं-
कार्यंबहुभिःपुत्रैः शोकसन्तापकारकैः ॥ बरमेकःकुलालंवी यत्रविश्रमतेकुलं ॥ त्रैलोक्यादुपरिष्ठाच्च स्थिताहंतवसद्गुणैः ॥ जनयि-
त्वातुत्वांपुत्र धर्मचारिन्व्यभूषण ॥ नकिंचित्कामयेवत्स तृप्तातवगुणत्रयैः ॥ धन्यानितानिपुण्यानि यैर्जातस्त्वांममानघ ॥ सप्त
द्वीपपतिःप्राज्ञः पितुराज्ञाकरस्तथा ॥ नाह्लादयातियस्तातं जननीम्वाथपुत्रक ॥ तंपुत्रंकवयःप्राहुर्महापातकसूचकम् ॥ एवमुक्त्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुतनयं देवीसन्ध्यावलीतदा ॥ दीक्षांचक्रेचभाण्डानां षड्रसस्यकृतेततः ॥ तस्यावीक्षितमात्रेण परिपूर्णानिभूपते ॥ षड्रसस्यतथो-
श्नस्य मोहिनीभोजनेच्छया ॥ जलस्यामृतकल्पस्य शीतलस्यमहीपते ॥ घटापूर्णास्तथाचक्रे राज्ञांसन्ध्यावलीनृप ॥ ततःसार्चि-
षमादाय काञ्चनंरत्नसंभवं ॥ तांपर्यवेक्ष्यदव्यग्रे मोहिनींप्राहसत्ततः ॥ काञ्चनेभाजनेश्लक्ष्णे सुस्वादान्नशनने ॥ शनैःशनैश्चभु-
ञ्जाना राजीवदललोचना ॥ उपविश्याशनेरम्ये शातकुंभमयेशुभे ॥ वीज्यमानावरारोहा व्यजनेननराधिप ॥ धर्मांगदगृहीतेन
शिखिपिच्छकृतेनच ॥ साभुक्त्वान्नह्लतनया तदन्नममृतोपमं ॥ चतुर्गुणंसुशीतेन कृत्वाशौचंजलेनतु ॥ जगृहेपुत्रदत्तंसा तांबूलं
सुरसुन्दरी ॥ वरचन्दनदिग्धेन हस्तेनपरयामुदा ॥ ततःप्रहस्यशनकैः प्राहसन्ध्यावलींनृप ॥ जननीकिंतुदेवित्वं वृषांगदनृप-
स्यतु ॥ नमयाद्दिपरिज्ञातं श्रमखेदतयाशुभे ॥ तामेवंवादिनींदृष्ट्वा तदासन्ध्यावलींप्रति ॥ धर्मांगदोथनृपतिरिदंवचनमब्रवीत्॥
उदरेत्वनयादेव्या धृतःसंवत्सरत्रयं ॥ तवभर्तुःप्रसादेन वृद्धिंप्राप्तोहमस्यतु ॥ सन्त्यनेकानिमातॄणां वर्गाणिममसुन्दरि ॥ अस्याः
पीतंपयोदेवि मयासुकृतिनाशुभे ॥ अनयासारुषातीव्रा संप्राप्ताप्रसवात्मिका ॥ जनयित्वातुमांदेवी जातापूर्णमनोरमा ॥ त-
न्नास्तित्रिषुलोकेषु येनानृण्यमवाप्नुयात् ॥ मातुस्त्वहंसुचार्वंगि सत्यमेतन्मयोदितं ॥ सोहंधन्यतरोलोके नास्तिमत्तोधिकःपु-
मान् ॥ योहमुत्सङ्गमारूढो मातॄणांयस्यनित्यशः ॥ नोत्सङ्गंयोहिमातॄणां विशतेसाविहकश्चित् ॥ मातृसौख्यंनजानाति कुमारी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भर्तृकंयथा ॥ नसोस्तिभूतलेदेवि पितृमातृवहिःकृतः ॥ मातुरुत्संगमारूढः पुत्रोधर्मान्वितोभवेत् ॥ हरोत्तमागंहृतंतु कराभ्याम-
 भिवाञ्छति ॥ पाल्यमानोजनन्याहि पित्राहीनोपिगर्वितः ॥ समीहतेजगद्धर्तुं सवीर्यंमातृजंपयः ॥ अनयाजठरेनोढो भवतीनां
 सुतस्त्वहं ॥ अम्बाचभवतीनाम्वा विशेषानास्तिमेशुभे ॥ सत्येनानेनमेताता जीवतांशरदांशतं ॥ एवंब्रुवतिराजेन्द्रे मोहिनीवि-
स्मयंगता ॥ कथंविरुद्धमेतस्य मयाकार्यंसुपापया ॥ धर्मज्ञस्यविनीतस्य मातृभक्तस्यसैवहि ॥ पितृभक्तिपरस्यास्य नचास्यस-
दृशःक्षितौ ॥ एवंगुणान्वितस्योहं कथंकुर्याज्जुगुप्सितं ॥ पुत्रस्यधर्मशीलस्य भूत्वातुजननीत्वहं ॥ एवंविमृष्यबहुधा मोहिनीलो-
कसुन्दरी ॥ उवाचवचनंवाला शीघ्रमानयमेपतिं ॥ नशक्नोमिविनातेन मूहूर्त्तमपिजीवितं ॥ ततःसत्वरितोगत्वा प्रणम्यपितरं
नृपः ॥ उवाचपितरंधीमान् सतदानतकंधरः ॥ कनिष्ठाजननीतात शीघ्रमाह्वयतेशुभा ॥ त्वंमहाराजतस्यास्तु समीपंगंतुमर्हसि ॥
तत्पुत्रवाक्यान्नृपतिस्तत्क्षणाद्गन्तुमुद्यतः ॥ प्रहृष्टतनयोराजा तयाजुष्टंगृहंविशेत् ॥ सप्रविश्यमहाराजा ददर्शशयनस्थितां ॥ मो-
हिनींमोहसंयुक्तां तप्तकाञ्चनसन्निभां ॥ उपास्यमानांप्रियया सन्ध्यावल्याशनैःशनैः ॥ पुत्रवाक्यात्परित्यज्य द्वेषंसापत्नजंतदा ॥
दृष्ट्वारुक्माङ्गदंप्राप्तमुत्थितामोहिनीद्रुतं ॥ उत्थायचाब्रवीद्दृष्ट्वा राजानंभूरिदाक्षिणं ॥ इहोपविश्यतांकान्त पर्यङ्केमृदुकाञ्चने ॥ क-
स्मान्निरीक्षतेराजन्न राज्यंतत्रतवाधुना ॥ ज्ञातंमयातवाद्यापि राज्येच्छाननिवर्त्तते ॥ मन्येदुष्कृतिनंभूप त्वामहंधरणीतले ॥ यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समर्थसुतंप्राप्य मातृभृत्यसुहृत्सुच ॥ दक्षेष्वन्येषुधीरेषु स्वयमीक्षेद्यशःश्रियं ॥ तस्माद्दुःखाधिकंनास्ति पापमेवपदेपदे ॥ समर्थेयःसुतेभारं नादत्तेभूपमन्दभाक् ॥ सुखिनाराात्रयोयान्ति पुत्रार्पितकुटुंविने ॥ केवलंफलभोक्तृणां विषयासक्तचेतसां ॥ पुत्रानुजात्पितृभ्रातृ मातृभृत्यमहत्सुच ॥ दक्षेष्वन्येषुवीरेषु बलवत्सुस्थितेषुच ॥ धर्मादिपालनेभूप कथंवीक्षयसेश्रियम् ॥ परित्यज्य प्रियासौख्यं कालाशइवदुर्वलः ॥ यदिपालयसेराज्यं किंमयातेप्रयोजनं ॥ अप्रयोजनमानीता क्षीरगह्वरमस्तकात् ॥ त्रिटभोज्याभविष्यामि आभिषंत्विवपक्षिभिः ॥ योभार्यांयौवनोपेतां नसेवयतिदुर्मतिः ॥ कृत्यासक्तस्तुदुर्मेधाः कुतस्तस्यभवेत्प्रिया ॥ असेविताव्रजेद्भार्या तथादत्तंधनंव्रजेत् ॥ अरक्षितंव्रजेद्द्रष्टुमनभ्यस्तंश्रुतंव्रजेत् ॥ नालसैःप्राप्यतेविद्या नभार्यासंस्थितव्रतैः ॥ अनुष्ठानादिनालक्ष्मीर्नाभक्तैःप्राप्यतेनृप ॥ नाज्ञानैःप्राप्यतेमोक्षो नात्यागैःप्राप्यतेयशः॥ नादमीसुखमाप्नोति नाभार्यःसन्ततिंक्वचित॥ नालक्ष्मीःपालयेत्पृथ्वीं नागजीसंगरंव्रजेत ॥ नचागौर्मिष्टमश्नाति नाविद्योभाषतेप्रियं ॥ अपृष्ठोनैवजानाति अगण्छन्नव्रजेत्क्वचित् ॥ अकुर्वन्नप्रियम्वेत्ति ननिद्रामेतिजागरी ॥ तस्माद्भूपालमांत्यक्त्वा धर्मांगदगृहंशुभे ॥ वीक्ष्यसेराज्यपदवीं समर्थेतनयेविभो ॥ एवंब्रुवाणांविवुधेशपुत्री मतिप्रियांचारुविशालनेत्रा ॥ व्रीडान्वितःपुत्रसमीपवर्ती उवाचहृद्यंनृपतिःप्रियान्ताम् ॥ ६२ ॥

इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते मोहिनीवाक्यन्नाम सप्तदशोध्यायः ॥ १७ ॥ ७ ७ ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ना०पु० राजोवाच ॥ नाधिकारोमयाभीरु कृतोनृपपरिग्रहे ॥ श्रमातुरस्यमेनिद्रा प्रवृत्तासुखदायिनी ॥ धर्गोर्गदामयात्सक्तो मोहिनींन- अ० १८
यमंदिरं ॥ पूजयस्वयथान्यायमेषापत्नीप्रियामम ॥ निजंकमलपत्राक्ष सर्वरत्नसमन्वितं ॥ वातायनैश्चसंयुक्तं मनोहारिसुखप्रदं ॥
॥ २७ ॥ एवंब्रुवन्कृतोदेवि निद्रयाशुभलोचने ॥ अवाप्यशयनंश्लक्ष्णं मंदभाग्योदिनंयथा ॥ विबुद्धमात्रःसहसा त्वांप्राप्तःपद्मलोचने ॥
यद्ब्रवीषिवचोदेवि तत्करोमिनसंशयः ॥ ॥ मोहिन्युवाच ॥ प्रसांतयस्वगजेन्द्र इमेदाराःसुदुःखिताः ॥ ममोद्वाहेननिर्विण्णा
निराशाःकामभोगयोः ॥ ज्येष्ठानांरूपयुक्तानां कलत्राणांहिभूपते ॥ मूर्ध्निकीलंप्रियाख्यांहि यद्राजंतान्निपातयेत् ॥ स्वर्गतिर्नभ-
वेत्तस्य नचान्याविद्यतेगतिः ॥ पतिव्रतासुरुष्टासु कामेशान्तिर्भविष्यति ॥ जनितारंहिपुत्रेमे भस्माकुर्युःपतिव्रताः ॥ किंपुनःप्रा-
कृतामांहि तववाक्यानुरोधिनीं ॥ संध्यावलिसमानारी त्रैलोक्येनास्तिभूमिप ॥ तवस्नेहेनसामांतु भुंजापयातिषड्रसैः ॥ प्रिया-
णिचात्रवाक्यानि वदतेतवगौरवात् ॥ एवंविधाहिशतशो नार्य्यःसंतिगृहेतव ॥ यासान्नपादरजसस्तुल्याहंभूपतेकिंचित् ॥ मो-
हिन्यावचनंश्रुत्वा व्रीडितोह्यभवन्नृपः ॥ सपुत्रायाःसमीपेतु सन्ध्यावल्यानृपोत्तमः ॥ इङ्गितज्ञस्तुतनयो ज्ञात्वावस्थांमनोभवां ॥
पितरंकामसंतप्तं मोहिन्यायोविमोहितः ॥ आहूयमातृस्ताःसर्वाः सन्ध्यावलिपुरोगमाः ॥ कृतांजलिपुटोभूत्वा मातृणांसन्निधौत-
दा ॥ उवाचवाक्यंमतिमान् पितुरर्थेचमातरः ॥ विमोहिनीयाजननी व्यूढापित्राशुभानना ॥ साचप्रार्थयतेदेवी राजानंरहसि- ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितं ॥ क्रीडार्थमात्मनःसुभ्रू स्तामनुज्ञातुमर्हथ ॥ मातरऊचुः ॥ मामैवंव्याहरारिघ्न नैतत्कर्तुंहिशक्नुमः ॥ कोनुमोदयतेपुत्र स-
र्वभक्षणमात्मनः ॥ कोहिदीपयतेवह्निं स्वदेहेवेदिनांवर ॥ कोभक्षयेद्विषंघोरं कश्छिद्यादात्मनःशिरः ॥ कस्तरेत्सागरंवध्वा ग्री-
वायांदारुणांशिळां ॥ कोगच्छेत्सर्पभवनं कःकेशाश्चहरेल्लुनेत् ॥ कोनिषीदातिधारायां खड्गस्यनिशितस्यच ॥ गंतुंमोदयतेकान्तम-
न्यानारीयदिध्रुवं ॥ सर्वस्वंशक्यतेदातुं नतच्छक्यंकथंचन ॥ वरंहिशिरसश्छेद स्तत्क्षणाच्चवराशिना ॥ नेदृशंदयितंकान्तं निरी-
क्षेदन्ययावृतं ॥ नासौसीमंतिनीकाचित मन्यतेतातकुत्रचित् ॥ यातुप्राणसमंकान्त मन्यस्त्रीकुचमर्दिनं ॥ विन्दतेतत्त्वराबाधा ।किं-
पुनर्वास्वचक्षुषा ॥ सर्वेषामेवदुःखानां दुःखमेतदनन्तकं ॥ भर्त्तायदन्ययायुक्तो दृश्यतेस्वेनचक्षुषा ॥ मरणंत्वभिनन्दन्ति युगपन्मा-
तरस्तव ॥ नतुमोहिनिसंयुक्तां द्रष्टुंशक्योहिभूपतिं ॥ धर्मांगदउवाच ॥ यदिमेनापितुःसौख्यं कुरुध्वंसर्वमातरः ॥ विषमालोड्यपा-
स्यामि सौख्यंवोस्तुमृतेमयि ॥ कर्मणामनसावाचा यःपितुर्दुःखमाचरेत् ॥ समेशत्रुःस्वयंवध्यो ह्यवध्योसिवरासिना ॥ सर्वासाम-
धिकादेवी मोहिनीमेपितुःप्रिया ॥ क्रीडार्थमाहृतापित्रा मन्दराच्चारुकन्दरात् ॥ तत्पुत्रवचनंश्रुत्वा वेपमानाहिमातरः ॥ ऊचुर्द्ध-
र्मांगदंवाक्यं हितार्थंतनयस्यहि ॥ अवश्यंतववाक्यंहि कर्त्तव्यंन्यायसंयुतं ॥ किंचिद्दत्वाततःस्वस्थो मोहिनींयातुतेपिता ॥ भा-
र्यामुद्वाहयेद्भर्त्ता द्वितीयांयदिपुत्रक ॥ विवाहवित्ताद्विगुणं देयंतस्यभवेद्ध्रुवं ॥ अन्यथाऋणवान्भर्त्ता ज्येष्ठायाभवतेनघ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्रेच्छयाचयोभर्त्ता अन्यामुद्वाहयेत्प्रियां ॥ ज्येष्ठायांहिमतंदेयमेषधर्मविनिश्चयः ॥ इष्टापूर्त्तैर्वृथातस्य नज्येष्ठांयोहितोषयेत् ॥
धर्मधर्मभृतांश्रेष्ठ नतेमानयतेपिता ॥ तच्छ्रुत्वामातृवचनं प्रहृष्टेनांतरात्मना ॥ एकैकस्यांददौसाग्रं कोटिमष्टादशस्यतु ॥ पृथक्पृ-
थक्चग्रामाणां संघंसंप्रददौतदा ॥ युक्तानश्वतरीभिस्तु चतुर्भिस्तुनृपात्मजः ॥ एकैकस्यांददौचाष्टौ रथान्काञ्चनमालिनः ॥ वा-
ससामयुतंप्रादान्महामुल्यंसधार्मिकः ॥ जांवूनदस्यशुद्धस्य मातृणांप्रददौतदा ॥ लक्षमेकैकशोराजन् पितृभक्त्यामहामतिः ॥ दा-
सानांचेटिकानांच सहस्राणिशतानिच ॥ कुम्भायुतंसर्पिषस्तु तैलस्यचतदेवहि ॥ अजाविकमसंख्यातमेकैकस्यांन्यवेदयेत ॥ स-
हस्रणेसुवर्णस्य कृत्वाविभूषणंमहत् ॥ आखण्डलस्यशस्त्रेण भूषितंमणिभिस्तदा ॥ माणिक्यादिमहाराज प्रददौचपृथक्पृथक् ॥ धा-
त्रीफलनिभान्हारान् मातृणामातृवत्सलः ॥ ददावेकैकशस्तासां तुष्टार्थमनुजर्षभ ॥ वलयानिमहार्हाणि भूषणानितथैवच ॥ कटि-
सूत्राणिशुभ्राणि प्रददौमातृवत्सलः ॥ चन्दनंभूरिकर्पूरं प्रददौप्रस्थसंख्यया ॥ मातृणामविशेषेण पितुःप्रियहितेरतः ॥ भोजनानि
विचित्राणि जलपात्राण्यनेकशः ॥ घृतक्षीरस्यपात्राणि पेयस्यविविधस्यच ॥ प्रददौसमहाभागो ह्येकैकस्याःसभूपतिः ॥ स्था-
लीनांकांचनीनांच कुंभानांसनृपात्मजः ॥ एकैकस्यददौराजन् शतानित्रीणिपंचच ॥ करेणूनांप्रवेगानां सुरूपाणांतथैवच ॥ विं-
शतिंविंशतिंप्रादादुष्ट्राणांचशतंशतं ॥ शिविकांचतथाप्रादात्तदाधर्मविभूषणः ॥ मातृणांतुचतुष्टयर्थं सुखार्थमरिकर्षणः ॥ एवंद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वाबहुविधं धनंताभ्यःसुभ्रूरिशः ॥ बभूवानन्दवान्राजा कृत्वातासांप्रदक्षिणं ॥ कृत्वाभिलषितंतासां कृताञ्जलिपुटोब्रवीत् ॥ ममापरोधाक्रियतांतथैवं सर्वास्तुसंभूयत्वदर्थकंहि ॥ ब्रुवन्तुसत्यंपितरंनरेन्द्रं भुंक्ष्वत्वमेतांनृपमोहिनीमिति ॥ ममोपराधाद्भवतीयुवत्यः पतिंतमुद्दिश्ययथैकपश्या ॥ एवंतुसर्वाःपितरंममाघस्तेनेहतांभुङ्क्ष्वनृपेशमोहिनीम् ॥ तवास्मदीयाभवताहिलज्जा स्वल्पापिकार्यामनसानरेन्द्र ॥ विमोहिनींब्रह्मसुतांसुशीलां गत्वारमत्वंशरदःशतानि ॥ तत्पुत्रवाक्यंहिनिशम्यसर्वा हृष्टास्तदातंनृपराजपत्न्यः ॥ रमस्वराजेन्द्रविमोहिनीमिमां विदेहपुत्र्यासयथाहरिश्च ॥ तच्छालपभूताकुशकेतुपुत्री स्वसेयमस्माकमिहास्तुराजन् ॥ पुत्रेणचानेनविमुक्तशोकाः कृतास्तुवाक्यैःप्रतिबोधिताःस्मः ॥ ५५ ॥ इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते मातृसंबोधनंनामाष्टादशोध्यायः ॥ १८ ॥ ⁂ ⁂ ⁂ ⁂ ⁂ ⁂ ⁂ ⁂ ⁂ ⁂ ⁂ ⁂

वशिष्ठउवाच ॥ सोनुज्ञातोमहीपालः प्रियाभिःप्रियकामुकः ॥ प्रहर्षमतुलंलेभे धर्मांगदमुवाचह ॥ एतांद्वीपवतींपृथ्वीं परिपालयपुत्रक ॥ दुष्टानांनिग्रहंकृत्वा अप्रमत्तंसदास्थितः ॥ विष्णुवासरभक्तश्च स्वर्गद्वारावलोककः ॥ धर्मवेतनमादाता सदेन्द्रानुजवल्लभाः ॥ सदाभ्रमणशीलश्च सदादानमतिर्भव ॥ भवान्कौटिल्यहीनेन सदाचारवतातथा ॥ तथापरंशृणुष्वाथ यत्कर्त्तव्यंत्वयाधुना ॥ अधिष्ठानञ्चसर्वत्र भूमिपानांप्रसस्यते ॥ कोषस्यचपरिज्ञानं जनानांजनवत्सल ॥ रसवद्द्रव्यमाकृष्यात् पुष्पेभ्यइव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षट्पदाः ॥ त्वयापुत्रेणमेप्राप्तं पुनरेवेहयौवनं ॥ इमामपूर्वांयुवतींविमोहिनीमासाद्यभार्यांद्विजराजवक्राम् ॥ सुखेनरम्येत्वमिमां-
महींतु वोढासिभारंपरिपालयाश्रयम् ॥ क्रीडाकरंतातमनुष्यलोके बृद्धस्यजन्तोःसुरताभिलाषः ॥ भवेज्जनानामतिहास्यकारी
जीर्णत्वचःश्वेतशिरोरुहस्य ॥ जीर्णोप्यजीर्णस्तवसौख्ययुक्तो वाञ्छामिचैनामुपभोक्तुमंगनां ॥ संत्यज्यदेवानियमागतास्तु अनं-
गवाणानिहितासुतन्वी ॥ सम्यग्चरिष्याम्यहमेतयाविभो ह्येकान्तशीलःपरिपूर्णदेहः ॥ तदद्रिपुष्पोवननिर्ज्झरौघे रम्येषुदिव्यौघन-
दीतटेषु ॥ इथंपुरंध्रीममजीविताधिका सुखेनभार्यात्रिदिवैकचारिणी ॥ अस्यास्तिहेतोर्विबुधाविमूढा यथार्द्धिहेतोर्हिनिधानसं-
घाः ॥ तद्वाक्यमाकर्ण्यपितुःसुबुद्धिः प्रणम्यभक्त्याजननीसमेतां ॥ नृपोत्तमंतंनृपसत्तमोसौ दिदेशभोगार्थमनेकवित्तं ॥ आ-
ज्ञाविधेयान्सहिसंनियोज्य दासाश्चदासीचहिरण्यकण्ठीः ॥ कृत्वाविधेयान्स्वपितुस्तदर्थे ततोमहींरक्षणमाचचार ॥ नृपोत्तमोधर्म-
विभूषणोसौ शशासतीद्वीपवतींसमग्रां ॥ रक्षांतुतस्याचरितःपृथिव्यां नपापबुद्धिर्भविताजनोहि ॥ नचाफलःपुष्पविनाकृतोन-
गो नचापिक्षेत्रंयवशालिहीनं ॥ कुंभप्रमाणंसुमुचुश्चगावो कृताधिकंशर्करवत्प्रमिष्टं ॥ क्षीरंस्वपेयंसकलार्त्तिनाशं पापापहंपुष्टिवि-
वर्द्धनञ्च ॥ जनोनचासीद्विभवप्रगोप्तो नचापिभार्याविभवप्रभाषिणी ॥ पुत्रोविनीतोदुहितानगेहे वधूःस्थिताहस्तपुटेनसुप्ता ॥ ॥ २९ ॥
निजोपदेशेहिजनोव्यवस्थितस्त्वन्योपदेष्टुर्हिशिरोनिकृत्यते ॥ नभुञ्जतेमाधववासरेजना नशोषमायांतितथैवनिम्नगाः ॥ संश्रु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्यमानानहियान्तिसंपदः प्रदानयुक्तैरपिमानवैःसदा ॥ विबृद्धिमायान्तियथानरेन्द्र वर्षासुदूर्वाबहुविस्तरान्विताः ॥ सुरक्षितस्ते-
ननरेन्द्रसूनुना धर्मांगदेनातुलविक्रमेण ॥ सौख्यानिभुक्त्वानृपयान्तिमानवाः पदंहरेर्द्वादशिसेवनेन ॥ नदस्युभूतामनुजागृहे-
षु स्वपन्तिहृष्टामुदिताःसदानघ ॥ गावस्तुगोपैर्हिविनागृहार्थं स्वेच्छाचरागन्दिरमाव्रजन्ति ॥ क्षीरंक्षरन्त्योघृतवत्सुभूरि वत्स-
प्रियाश्चैववतुताःसुशीलाः ॥ अकृष्टपच्याधरणीसमस्ता धर्मांगदेशासतिभूमिपाले ॥ मातुःपयोभिःशिशवःसुपुष्टा भोगैश्चभर्तुःप्रम-
दाश्चपुष्टाः ॥ सुराष्ट्रगुप्ताश्चनृपाःसुपुष्टाः सत्येनयुक्तःसबृषःसुपुष्टः ॥ एवंजनेकर्मणिसंप्रवृत्ते धर्मांगदेनाथसुरःप्रमाणः ॥ रुक्मांग-
दोतीवविमोहितोसौ विमोहिनीचेष्टितसौख्ययुक्तः ॥ दिनंनजानातिनचापिरात्रिं मासंनपक्षंनचवत्सरंगतं ॥ अतीवसौख्यंतुर-
तेनतेन विरिञ्चिपुत्र्याःप्रवभूवतस्य ॥ विमोहिनीसंगमनेनृपस्य वभूवशक्तिःप्रचुराहिकामे ॥ यथायथासेवतितांसुरूपां तथातथा-
बर्द्धतिवीर्यमस्य ॥ चन्द्रोयथाशुक्लपक्षेतुबृद्धिं गच्छेदेवंकामयातश्चकामः ॥ वृन्दारकाप्रीतिहितान्वितस्तु संस्पृश्यमानस्तुपुनर्न-
रेसौ ॥ पिवन्तिपानंसुमनोहरंतदा शृण्वन्हिगीतंहृदयंगमंतदा ॥ पश्यन्हिनृत्यंसुनितंविनीनां समास्पृसन्मोहिनिवक्रचन्द्रम् ॥
विमर्दमानोह्युरसाचतन्व्याः स्तनौसुपीनौसुनिमग्नचूचुकौ ॥ घनौतथाकाञ्चनकुंभतुल्यौ निरंतरौहारविभूषणेन ॥ वलित्रयंनाभियु-
तंसुशोभनंमनोहरंरोमसुराजिचित्रितं ॥ संस्तंभितायावलिराजिरूपयातयातुदेव्यानृपकान्तयातदा ॥ नद्दीदृशंचारुतरंशरीरं नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंविनीनांमनसोभिरामं ॥ याद्दग्विधात्राचतदाविनिर्ममे राज्ञश्चसामोहविबर्द्धनाय ॥ मृगेन्द्रशत्रोःकरसंनिकाशे ऊरूतदाकाञ्चन
संनिभेसमे ॥ जंघेउभेचैवसुरूपयुक्ते निगूढगुल्फेजनमोहनार्थं ॥ नचापिदेहेनृपतिर्विरूपतां संपश्यतेचारुविशालनेत्र्याः ॥ मे-
नेसुराणामधिकञ्चराजा कृतार्थमात्मानमतीवहर्षात् ॥ इयंसुरूपांसुरसुन्दरींशुभां दास्याम्यहंभूरिधनंनचाल्पं ॥ त्रैलोक्यदानंतृ-
णवन्मनोमे ददामिकिंयाचतिमेदुराङ्गीं ॥ एषापदायाचतिजीवितंमे शुभानवद्यानवहेमवर्णा ॥ दास्यामिचैनंनविचारयामि पुत्रं-
विनासर्वमहंचदास्यं ॥ एवंराजाचिंतयित्वामहात्मा पुत्र्याःसर्वंचेतसापद्मजस्य ॥ ३५ ॥ इतिश्री ना० रुक्मांगदक्रीडनंनाम १९
वशिष्ठउवाच ॥ एवंस्मरविमूढस्य राज्ञोरुक्मांगदस्यच ॥ त्रीणिवर्षाणिपञ्चैव व्यतीतानिसुखेनवै ॥ संप्राप्तेनवमेवर्षे पुत्रोधर्मा-
गदोवली ॥ जित्वाविद्याधरात्पञ्च सर्वकामप्रदान्शुभान् ॥ आजहारमणिन्पञ्च सर्वकामप्रदान्शुभान् ॥ कांचनस्यप्रतप्तस्य एवं
कोटिप्रदंशुभं ॥ वस्त्रप्रदंद्वितीयंच सहस्रशतसंख्यया ॥ तृतीयममृतस्राविं पुनर्यौवनदायकं ॥ गृहप्रसादजननं चतुर्थंचान्नसा-
धनं ॥ पंचमंव्योमगादितं त्रैलोक्यपरिमर्षणं ॥ तान्मणीन्गृह्यतरसा विद्याधरसमन्वितः ॥ स्त्रीभिर्विद्याधराणांच साश्रुभिस्ता-
भिरावृतः ॥ ववन्देचरणौमातु स्तथारुक्मांगदस्यच ॥ आगत्यमलयाच्छूर स्तान्मणीन्प्रददौतदा ॥ इमेंजितामयातात पञ्चवि-
द्याधरारणे ॥ मलयेभूधरेश्रेष्ठे वैष्णवास्त्रेणभूपते ॥ तइमेप्रेक्षतान्तात प्राप्तास्तवमहामते ॥ एषांदाराःसमेताये विधेयास्तवभूपते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ तथेमेप्रणयाद्देवीं भूषयंतुतवप्रियां ॥ सर्वकामप्रदास्तात मणयोयौवनःप्रदा ॥ जीर्णादंताःपुनर्वाला भवंतिमणिधारणात् ॥
श्वेताश्चकृष्णतांयान्ति केशानास्त्यत्रसंशयः ॥ वस्त्रहर्म्यसुवर्णानां धनानांचिन्तितस्यच ॥ दातारःसुप्रभाःशुद्धा श्चिन्तामणयइ-
त्युत ॥ त्रिंशद्दिनमभूद्युद्धं गन्धर्वाणांमयासह ॥ तवैवतेजसापञ्च जितास्तातमयारणे ॥ कृत्स्नानितानीहमया राज्ञायानिवला-
निच ॥ वरदानिसमस्तानि कृतानितवतेजसा ॥ समुद्रंचप्रविष्टस्य गतःसंवत्सरोमम ॥ जिताभोगवतीनाम मयानागशतावृ-
ता ॥ आहूयतानागकन्या मयातत्रसुविस्तराः ॥ ताभिश्चराजन्रत्नानि सुवहून्याहृतानिमे ॥ गतोहंपुनरेवाथ तदादानवमन्दिरं
॥ तत्रदानवकन्यानां सुरूपाणांसुवर्च्चसां ॥ आहूतानिसहस्राणि मयात्रीणिचपञ्चच ॥ दशकोट्यस्तुरत्नानि सुवहून्याहृतानिमे
॥ सस्तुदीपामहीपाल रत्नानांतवमन्दिरे ॥ ततोहंवारुणंलोकं रसातलतलस्थितं ॥ गतोवीर्यवलोपेतं रत्नानामालयंशुभं ॥ तत्रा-
पिवरुणोदेवः स्थीयतांशासनेपितुः ॥ रुक्मांगदस्यनृपतेर्यदिजीवितुमिच्छसि ॥ कुपितोममवाक्येन वरुणायुयुधेमया ॥ सहते
नचमेयुद्धमभूत्तातरसातले ॥ जितोनारायणास्त्रेण मयासम्वत्सरात्प्रभो ॥ नहतःप्रमदावाक्यैः परिरक्षणतत्परैः ॥ निर्जितेना-
युतंदत्तं वाजीनांवातरंहसां ॥ एकतःश्यामकर्णानां शुद्धानांचन्द्रवर्च्चसां ॥ तृणतोयविहीनाये जीवंतिवहुलाःसमाः ॥ एका-
कन्यासुरूपाया पुष्कराभाननाशुभाः ॥ भार्यार्थेवरुणःप्रादान्नवोढासाशुभामया ॥ कुमारीतुसमानीता वहुवित्तसमन्विता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंनास्तित्रिषुलोकेषु स्थानंनृपतिसत्तम ॥ यन्मयानिर्जितंतात तेजसापालितेनते ॥ तदुत्तिष्ठनिरीक्षस्व मयाचोपार्जितंश्रियं ॥
प्रयच्छस्वयथान्यायं एषांवांछसिभूपते ॥ पादांकांकुरुराजेन्द्र यत्तुतावर्जिताप्रिया: ॥ अहंतुसंपदःसर्वा स्त्वदधीनानसंशयः ॥ यः
॥ ३१ ॥ पुत्रःपितुरग्रेतु वहुलक्ष्मीमुपार्जितां ॥ नदद्याद्धर्मदेवेभ्यः सयातिनरकंध्रुवं ॥ स्वीकारस्तुचकर्त्तव्यः पित्रासहसुतेनहि ॥ कुठार
दातृवज्ज्ञेयः पुत्रस्यनिधिसंचये ॥ पितुःशौर्येणपुत्रस्तु सर्वमर्जयतेधनं ॥ गृहीतस्तेजसादात्रं छुनातिपितृसंचयात् ॥ वायुना
प्रेरिताभस्त्रा तारयेत्पुरुषंतले ॥ यदादारुमयीयोषित् सूत्रयोताविचेष्टयं ॥ एवंहिपितृवर्येण पुत्रास्तेजोवलान्विताः ॥ तस्मा-
दिमांमाधवदेववल्लभां विलोकयस्वाद्यमयाभिजाता ॥ आत्मेच्छयायच्छविमोहनाया इयंहिमेमातृसमूहचर्या ॥ ३६ ॥ इतिश्री
लघुनारदीयपुराणे रुक्माङ्गदचरिते धर्माङ्गद विजयोनामविंशतितमोध्यायः ॥ २० ॥ ७ ७ ७ ७ ७
मान्धातोवाच ॥ पुत्रस्यवचनंश्रुत्वा किंचकारमहीपतिः ॥ साचापिमोहिनीब्राह्मी किंचक्रेतेनपूजिता ॥ विचित्रेयंकथाब्रह्मन् प्र-
भावोहिमनोहरः ॥ तत्रवक्तेरितापुण्या धर्मसंशयछेदिनी ॥ वसिष्ठउवाच ॥ तस्यतद्वचनंश्रुत्वा प्रहृष्टोनृपपुंगवः ॥ उदतिष्ठत्प्रिया-
युक्तस्तांश्रियंचावलोकयत् ॥ अवलोक्यहरेरिष्टामप्रमेयांहरिप्रभां ॥ नागकन्याहिताःसर्वा वारुणीसहिताःप्रभो ॥ प्रददौतनयस्यैव- ॥ ३१ ॥
भार्यार्थंशुभलोचनाः ॥ शेषंदानवनारीभि र्वित्तरत्नसमन्वितं ॥ मोहिन्यैप्रददौराजा सोनंगशरमोहितः ॥ संविभज्यनृपोवित्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मांगदसमाहूतं ॥ पुरोहितमुवाचेदं कालेनाहूयभूपतिः ॥ सर्वासांतनयोगेहि पाणिंगृह्णातुमन्त्रतः ॥ कुमारीणांकुमारोयं मद्वा- क्येचस्थितोहियः ॥ सुतिथौसुमुहूर्त्तेच नक्षत्रेसर्वकामदे ॥ वाचयित्वाद्विजवरान् मंगलानिसहस्रशः ॥ विवाहंकुरुपुत्राय एतत्कृ- त्योत्तमंमम ॥ यःपुत्रंयौवनोपेतं नविवाहयतेसुधीः ॥ समज्जनरकेघोरे यस्मान्नावर्त्ततेपुनः ॥ तस्मादुद्वाहयेत्पुत्रं वलादपिप्रयत्न- तः ॥ आत्मासंस्थापितस्तेन येनसंस्थापितःसुतः ॥ कृतोद्वाहेसुतेब्रह्मन् पितुश्चकृतकृत्यता ॥ पुत्रस्यगुणयुक्तस्य निर्गुणस्यापि- मानद ॥ अरूढतनयोयस्य युवासन्तिष्ठतेगृहे ॥ नपुमान्सतुविज्ञेयः परलोकजुगुप्सितः ॥ तस्मात्पित्रासदाकार्याः पुत्रादारसम- न्विताः ॥ रमन्तेचयथासौख्यं सन्तुष्टासुप्रियासुच ॥ एतच्छ्रुत्वातुवचनं पुरोधाहर्षसंयुतः ॥ धर्मांगदविवाहार्थं मतिंचक्रेद्विजर्षभः ॥ अनिच्छमानोपितदा स्त्रीशंकेतंनृपात्मजः ॥ नृपवाक्याच्चकाराथ दारसंग्रहणंतदा ॥ वरुणात्मजयासार्द्धं नागकन्यामनोहराः ॥ उ- पयेमेमहाबाहुःकृतहोमःपुरोधसा ॥ उद्वाहयित्वासर्वास्ता युगपद्योषितांवराः ॥ ववन्देपितरंपश्चात् मोहिनींमातरन्तथा ॥ ततःस- न्ध्यावलींदेवीमभिवन्देहसन्निव ॥ पितुर्वाक्येनमेदेवी सञ्जातोदारसंग्रहः ॥ नैतन्मेमनसोजातो पित्रानुरोधितोह्यहं ॥ अव्यग्रः पितरंदेवि सुश्रूसेहंनसंशयः ॥ दारैर्भोगैर्नमेकिंचित् स्वर्गेणापिप्रयोजनं ॥ कार्यामेपितृसुश्रूषा तवदेविदिवानिशं ॥ सन्ध्याव- ल्युवाच ॥ चिरंजीवस्त्वमेवत्स भुंक्ष्वभोगान्मनोगतान् ॥ पितुःप्रसादाद्दीर्घायुर्भवपुत्रसदानघ ॥ सत्पुत्रेणत्वयापुत्र जाताहंपुत्रि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णीक्षितौ ॥ नपत्नीनांहिसर्वासां हृदयेसंस्थितस्तथा ॥ एवमुक्कापरिष्वज्य मूर्द्धिचाघ्रायचासकृत ॥ विसर्ज्यचततःपुत्रं राज्यतंत्रे
॥ १२ ॥ त्वरान्विता ॥ विसर्जितस्तथामात्रा प्रणम्यान्यास्तुमातरः ॥ चक्रेराज्यंमहाराजः पित्रोश्चहितकाम्यया ॥ दुष्टनिग्रहणंचक्रे शिष्टा-
नांपरिपालनं ॥ अटनंसर्वदेशेषु वीक्षणंसर्वकर्मणां ॥ तथैवसर्वकार्याणामासमाप्तिनिवर्त्तनं ॥ हस्त्यश्वपोषणंचक्रे वारंचक्रेपरेणवै ॥
वाजिनांवीक्षणंचक्रे तुलामानानुवेदनं ॥ गृहेनवैधराप्राप्ते चक्रेसंवीक्षणंनृपः ॥ कश्चिद्बालस्तुनपायी स्तनहीनोनरोदिति ॥ कश्चि-
द्ध्वाचश्वश्रूच रुदतानावमानिता ॥ कश्चित्समर्थस्तनयः पितरंनहियाचते ॥ नधर्मशङ्करोराज्ये कश्चिन्ममभवेत्पुनः ॥ वभूववि-
भवोलोके शासनात्तस्यभूपतेः ॥ नकंचुकेनरहिता गच्छेन्नारीसभर्तृका ॥ गृहान्निःक्रमणंस्त्रीणांनाभूद्राष्ट्रेतदात्मके ॥ नसकेशाहि
विधवा स्वकेशानहिभर्तृकाः ॥ साव्रतीस्यात्महाकेशीमारण्यानगराश्रयाः ॥ अप्रदाताधनीमाभूद्राष्ट्रेमानिर्घृणोजनः ॥ गो-
पालोनगराकांक्षी गुरुर्यस्तुनदेशकः ॥ शास्तिशास्त्रंविनाऋत्विक् सुरान्तोषयतेनरः ॥ योहिविक्रयतेनीलं नीलरक्तंनिषेवते ॥ नि-
र्वास्यौतानुभौपापै यस्तुमद्यंपिवेत्सदा ॥ वृथामांसंतुयोश्नाति पृष्ठमांसप्रियोहिसः ॥ तस्यवासोनविषये सुकलत्रंत्यजेत्तुयः ॥ वि-
ष्णुंविहायप्रवरंसुराणां संपूजयेदन्यतमंहिदेवं ॥ निन्देतयोदेववरंमुरारिं दण्ड्यश्चवध्यश्चवहिर्विधास्याः ॥ ३९ ॥ इतिश्री लघुना- ॥ ३२ ॥
रदीयपुराणे रुक्मांगदचरिते धर्मांगदविवाहः प्रजापालनमेकाविंशोध्यायः ॥ २१ ॥ ७ ७ ७ ७ ७ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वसिष्ठउवाच ॥ एवंधर्माङ्गदोराजा चकारवसुधातले ॥ पितुर्नियोगाद्राजेन्द्र पालयन्हरिवासरे ॥ नवभूवजनःकश्चिद्योन्यधर्मेव्य-
वस्थितः ॥ नासुखीनाप्रजाकाचित करपीडितमानसा ॥ हृष्टपुष्टजनेतस्मिन् क्षमावतिसुधार्मिके ॥ घटोध्नीनृपतेतस्मिन् द्रुतव-
त्सासुधेनुषु ॥ पुटकेपुटकेक्षौद्रे द्रोणमात्रेद्रुमेद्रुमे ॥ फलानिसन्तिमेदिन्यां सर्वधान्यसमुद्भवः ॥ कृतेयुगेचत्रेतान्ते युगेचद्वापरा-
गमे ॥ व्यतीतजलदेव्योम्नि विराजेशशिमण्डले ॥ सुगन्धौशालिकेदारे कुंभोद्भवविलोकने ॥ मध्यप्रवाहसंयुक्ताः सरितश्चसमं-
ततः ॥ तीरोत्थैःकाशकुसुमैः शुक्लकेशाइवाङ्गनाः ॥ चन्द्रांशुधवलेलोके नातितीव्रेदिवाकरे ॥ पद्मिनीपत्रसवलैर्जलस्यान्तेविराजि-
ते ॥ रात्र्युत्सुक्यात्प्रयातैस्तु भूमिपालैःसमंततः ॥ प्रबोधसमयेविष्णोराश्विनान्तेजगद्गुरोः ॥ मोहिनीरमयामास संयुक्ताहृदया-
न्वितं ॥ राजानंविविधैःसौख्यैःसर्वभावेनसुन्दरी ॥ वनेषुगिरिशृंगेषु नदीनांसंगमेषुच ॥ पद्मिनींकुसुमाढ्यासु शरत्सुविविधेषुच ॥
मलयेमन्दरेविन्ध्ये महेन्द्रेविवुधालये ॥ सह्येप्रालयसंज्ञेच दिगंबरगिरौशुभे ॥ अन्येष्वपितुराजानं मनोज्ञेषुशुभेषुच ॥ रमयामा-
सराजेन्द्र दिव्यरूपादिनेदिने ॥ राजापिमोहिनींप्राप्य कृत्यंसर्वमथात्यजत् ॥ मुक्त्वैकंवासरंविष्णोर्जन्ममृत्युनिकृन्तनं ॥ नतलो-
पयेतनित्यमतिमुग्धोपिपार्थिवः ॥ दशम्यादिमहीपाल त्रिदिनंपरिवर्जयेत् ॥ गन्धतांवूलपुष्पाणि स्त्रीभोगञ्चमहामतिः ॥ एवं-
संक्रीडतस्तस्य बहुसंवत्सरेगते ॥ कालेकालवतांश्रेष्ठः संप्राप्तःकार्त्तिकःशुभः ॥ निद्राच्छेदकरोविष्णोर्मासःपुण्यप्रदायकः ॥ य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मिन्कृतंहिसुकृतंविष्णवर्थेमानवैर्नृप: ॥ अक्षयंभवतेसर्वविष्णुलोकप्रदायकं ॥ नकार्त्तिकसमोमासोनकृतेनसमंयुगं ॥ नवेदेनसमं
शास्त्रंनतीर्थंगंगयासमं ॥ नजलेनसमंदानंनसुखंभार्ययासमं ॥ नकृषणेनसमंवित्तंनलाभःसुरभीसमः ॥ तपोदानसमायुक्तंनधर्मा-
त्परमंसुखं ॥ नधर्मोऽस्तिदयातुल्यो नज्योतिश्चक्षुषःसमं ॥ नतृप्तिरशनादन्यानवाणिज्यंकृषेःसमं ॥ नधर्मेणसमंमित्रनसत्येनसमंय-
शः ॥ सर्वसौख्यंसमुत्थानंनमित्रंभार्ययासमं ॥ नक्षेत्रंकाशिकातुल्यंनपुत्रेणसमःसुहृत ॥ नकार्तिकसमंलोकेपवित्रंकवयोविदुः ॥
कार्त्तिकःप्रवरोमासोविष्णुवादिषुवैसदा ॥ अव्रतेनक्षिपेद्यस्तुमासंदामोदरप्रियं ॥ तिर्यग्योनिमवाप्नोतिधर्माधर्मवहिःकृतः ॥ मा-
न्धातोवाच ॥ संप्राप्यकार्त्तिकंमासं राजारुक्मांगदोमुने ॥ मोहिनीमोहसंयुक्तः कथंतुवुभुजेवद ॥ विष्णुभक्तःशुचिपरः प्रवरःसम-
हीभृतां ॥ तस्मिन्पुण्यतमेमासितस्मिन्किमकरोन्नृप ॥ वसिष्ठउवाच ॥ संप्राप्तंकार्त्तिकंदृष्ट्वाप्रबोधकरणंहरेः ॥ अतिमुग्धोप्यसौ-
राजा मोहिनींवाक्यमब्रवीत् ॥ नीतंदेवित्वयासार्द्धंबहुसंवत्सरंमया ॥ तवापमानस्यभयात् नैवमुक्तामयाक्वचित् ॥ सांप्रतंवक्तु-
कामोहंतंनिवोधवरानने ॥ शय्याशक्तस्यमेदेविवहवःकार्त्तिकागताः ॥ नव्रतीकार्त्तिकेजाते सुक्तैकंहरिवासरं ॥ सोहंकार्त्तिकमि-
च्छामि व्रतेनपरिसर्पितुं ॥ अव्रतेनगतोह्येषां कार्त्तिकोमर्त्यधर्मिणां ॥ इष्टपूर्त्तंवृथातेषां धर्माधर्मभृतांवरे ॥ मांसाशिनोहिभूपाला
अत्यन्तमृगयारताः ॥ तेमासंकार्त्तिकंत्यक्ता गतोविष्णवालयंशुभे ॥ प्रवृत्तानांहिभक्ष्याणां कार्त्तिकेनियमेकृते ॥ अवश्यंविष्णु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सायुज्यं प्राप्नुवन्तिमुमुक्षवः ॥ तिष्ठन्तिबहुवित्तानि कृत्यानिवरवर्णिनि ॥ हृदयेविहितंलोके दीपदानंदिवंनयेत् ॥ तस्याप्यलाभेशुभगे परदीपप्रतोदनं ॥ कर्त्तव्यंभूतिकामेन सर्वदानाधिकंव्रतत ॥ एकतःसर्वदानानि दीपदानानिचैकतः ॥ कार्त्तिकेनसमंप्रोक्तं दीपदस्त्वधिकःस्मृतः ॥ कार्त्तिकेकार्त्तिकीभूत्वा विष्णोर्नाभिसरोरुहे ॥ आजन्मविकृतात्पापात मुच्यतेनात्रसंशयः ॥ व्रतोपवासनियमैः कार्त्तिकोयस्यगच्छति ।' देवोवैमानिकोभूत्वा सयातिपरमंपदं ।। तस्मान्मोहिनिमोहंतु परित्यज्यममोपरि ॥ तवभूधरपूजायां निरतोनीरजेक्षणे ॥ अहंव्रतपरश्चैव भविष्येहरिपूजकः ॥ मोहिन्युवाच ॥ विस्तरेणमयाख्याहि माहात्म्यंकार्त्तिकस्यहि ॥ सर्वपुण्याधिकःप्रोक्तो मासोयंनृपसत्तम ॥ विशेषतःपुष्करेतु द्वारवत्याश्चशौकले ॥ श्रुत्वाकार्त्तिकमाहात्म्यं करिष्येहंयथेप्सितं ॥ रुक्मांगदउवाच ॥ माहात्म्यमभिधास्यामि मासस्यास्यवरानने ॥ येनतेभवतेकीर्त्तिर्भक्तियुक्तार्चनेहरेः ॥ कार्त्तिकेकृच्छ्रसेवीयः प्राजापत्यचरोथवा ॥ एकान्तरोपवासीच त्रिरात्रोपोषितोथवा ॥ षट्वाद्वादशरात्रंवा मासंवावरवर्णिनि ॥ क्षपयित्वानरोयाति तद्विष्णोःपरमंपदं ॥ एकभक्तेतथानक्ते तथासुभ्रुअयाचिते ॥ अकृतेवैवराप्राप्तिर्भवतेनात्रसंशयः ॥ तस्मिन्हरिदिनेपुण्ये क्रियतेभीष्मपञ्चकम् ॥ सर्वपापप्रशमनं हरेरिष्टंमहाव्रतं ॥ तत्कृत्वामनुजादेवि नभूयस्तनयोभवेत ॥ प्रबोधनंनरःकृत्वा जागरेणशुभानने ॥ श्रवणेनपुराणानां भक्त्यादेवस्यचक्रिणः ॥ पूजयासुभगेरात्रियैषांयातिवरानने ॥ नमातृज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ठरेयान्ति तेपिपारन्वितानराः ॥ तस्मिन्दिनेबरारोहे मण्डलंयस्तुपश्यति ॥ विनासाख्येनयोगेन सयातिपरमंपदं ॥ कार्त्तिके-
मण्डलंदृष्ट्वा शौकरेश्शूकरंतथा ॥ दृष्ट्वाकोकाबराहञ्च नभूयस्तनयोभवेत् ॥ त्रिविधस्यापिपापस्य दृष्ट्वामुक्तिर्भवेन्नृणां ॥ तथाकु-
ब्जाम्रकेदेवि दृष्ट्वादेवंजनार्दनं ॥ कार्त्तिकेबर्जयेत्तैलं कार्त्तिकेवर्जयेन्मधु ॥ कार्त्तिकेबर्जयेत्कांस्य कार्त्तिकेशुक्लशिंविकम् ॥ नि-
ष्पावान्कार्त्तिकेदेवि योभक्षयतिपापकृत् ॥ सम्वत्सरकृतात्पुण्यात् तत्क्षणादेवमुच्यते ॥ प्राप्नोतिराजकिंयोनिं सकृदेवतुभक्षणा-
त् ॥ अतश्चकार्त्तिकेमासि निष्पावान्वर्जयेद्बुधः ॥ कार्त्तिकेशौकरंमांसं यस्तुखादतिदुर्मतिः ॥ षष्ठिवर्षसहस्राणि रौरवेपरिपच्य-
ते ॥ तन्मुक्तोभवतेपापो विष्ठाशीग्रामशूकरः ॥ नमत्स्यंभक्षयेन्मांसं नकौर्मंनान्यदेवहि ॥ चाण्डालोभविताराजन् कार्त्तिकेमां-
सभक्षणात् ॥ कार्त्तिकःसर्बपापघ्नः किंचिद्व्रतपरस्यहि ॥ कार्त्तिकेतुकृतादीक्षा नृणांजन्मनिकृन्तति ॥ तस्मात्सर्वप्रयत्नेन दी-
क्षाकुर्वीतकार्त्तिके ॥ अदीक्षितस्यवामोरु कृतंसर्वंनिरर्थकं ॥ पशुयोनिमवाप्नोति दीक्षयाचमहाकुले ॥ जन्मप्राप्नोतिसुभगे पञ्च-
रात्रेविदोनरः ॥ नगृहेकार्त्तिकंकुर्याद्विशेषेनतुकार्त्तिकी ॥ तीर्थेषुकार्त्तिकींकुर्यात् सर्वयत्नेनभाविनि ॥ कार्त्तिकेशुक्लपक्षस्य कृ-
त्वाचैकादशींनरः ॥ प्रातर्दत्वाशुभान्कुंभान् प्रयातिहरिमन्दिरं ॥ संवत्सरव्रतानाञ्च समाप्तिर्विधिसंस्मृता ॥ चातुर्मास्यव्रता-
नाञ्च समाप्तिस्तत्रचेष्यते॥ विवाहश्चैवदृश्यन्ते विष्णोर्नाभिसरोजजे ॥ दिनानित्रीणिचत्वारि तथैकंबरवार्णिनि ॥ उत्तरायणदी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपि शुद्धिर्लभ्यंविनाशुभे ॥ दृश्यन्तेयत्रसंपन्ना पुत्रपौत्रविवर्द्धनाः ॥ तस्मान्मोहिनिकर्त्तास्मि कार्त्तिकेव्रतमुत्तमं ॥ अशेषपा-
पनाशाय धनप्रीतिविवर्द्धनं ॥ भुक्तिमुक्तिप्रदातारं धर्मस्यपरमंपदं ॥ वैकुण्ठदायिकंमासं कार्त्तिकञ्चवरानने ॥ ६८ ॥ इतिश्री
लघुनारदीयपुराणे रुक्मांगदचरिते कार्त्तिकमाहात्म्यं द्वाविंशोध्यायः ॥ २२ ॥ ७ ७ ७ ७ ७ ७
मोहिन्युवाच ॥ अहोमहात्म्यमतुलं कार्तिकस्यत्वयोदितं ॥ चातुर्म्मास्यव्रतानाञ्च तद्योगकरणम्वद ॥ पूर्णताचभवेद्येन व्रता-
नामवनीपते ॥ अवैकल्पंभवेद्येन व्रतपूर्णफलस्यच ॥ कानिदानानिदीयंते कृत्वातान्यवनीपते ॥ राजोवाच ॥ षड्रसंभोजनंदद्या
न्नक्तभोजीतुसुन्दरि ॥ अयाचितेप्यनड्वाहं दद्याच्चसहिरण्यकं ॥ एकभक्तंतथाकुर्य्याद् ब्राह्मणानाञ्चभोजनं ॥ अमांसाशीभवेद्य-
स्तु मांसंदद्यात्सदक्षिणं ॥ जलत्यागेमणिंकुंभान् दद्याद्वैअन्नपात्रकं ॥ सहिरण्यंतिलैर्युक्तं वस्त्रयुग्मसमन्वितं ॥ धात्रीस्नानोदकं-
दद्या द्दधिमाक्षिकमेवच ॥ फलानांनियमेसुभ्रु फलदानंसमाचरेत् ॥ तैलत्यागेघृतंदेयं घृतत्यागेपयःस्मृतं ॥ दधित्यागेसुवर्णञ्च
पयसोरूप्यमेवच ॥ धान्यानांनियमेधान्यमथवाशालयःस्मृताः ॥ दद्याद्भूमिशयीशय्यां सहर्शाकिन्दुकान्वितां ॥ पत्रभोजीनरो-
दद्याद्भाजनंघृतसंयुतं ॥ मौनीघंटांस्तिलांश्चापि सहिरण्यान्प्रदापयेत् ॥ दंपत्योर्भोजनंकार्यमुभयोःशयनान्वितं ॥ सभागंदक्षि-
णोपेतं व्रतस्यपरिपूरये ॥ नित्यस्नानेहयंदद्या न्निस्नेहेघृतमेवच ॥ केशस्यरक्षणाद्देवि आदर्शंचविकल्प्यच ॥ उपानहौप्रदद्याच्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपानत्परिवर्जनात् ॥ लवणस्यतुसंत्यागे दद्याच्चलवणंवहु ॥ आमिषस्यपरित्यागे दातव्याकपिलाशुभा ॥ नित्यदीपप्रदोयस्तु
भवेद्दैविबुधालये ॥ दीपंतुसघृतंदद्या त्काञ्चनंवाससायुतं ॥प्रदेयंविष्णुभक्ताय व्रतानांपरिपूर्णये ॥ एकान्तरोपवासिच सीरोन-
ष्टांप्रदापयेत् ॥ शिलापात्रेतुयोभुक्ते शैर्य्यपात्रंप्रदापयत ॥ ताम्रेभुक्तेततोदद्यात्ताम्रंमधुसमन्वितं ॥ गुडत्यागेगुडंदद्या न्मधुत्या-
गेमधुस्मृतं ॥ तांवुलंवर्जयेद्यस्तु मौक्तिकानिप्रदापयेत् ॥ सवस्त्रांकञ्चनोपेतां सुशय्याञ्चकृतांशुभे ॥ त्रिरात्रमालकंदद्या च्छत्रो-
पानत्सुसंयुतं ॥ अनड्वाहंतथापीनं सीरस्याकर्षणक्षमं ॥ एकान्तरेत्वजादेया फलाहारेतुशालयः ॥ शाकाहारेघृतंदद्यात् पात्रं-
राजतमेवच ॥ सर्व्वेषामप्यलाभेतु यथोक्तकरणंविना ॥ विप्रवाक्यंस्मृतंसुभ्रू व्रतस्यपरिपूर्णये ॥ तथाविभवहीनस्तु व्रतंकुर्यात्स-
दक्षिणं ॥ विप्रवाक्यम्बृथायस्तु गृह्णातिमनुजःशुभे ॥ अदत्वादक्षिणांचापि सयातिनरकंध्रुवं ॥ व्रतवैकल्पमासाद्य कुष्टीचान्धप्र-
जायते ॥ धरामराणांवचनेव्यवास्थिता दिवौकसस्तीर्थफलैःसमेताः ॥ कोलंघयेत्सुभ्रुवचोहितेषां श्रेयोभिकामीमनुजःसुविद्वान् ॥
इदंमयाधर्मरहस्यमुक्तं वेदाश्रितंपापविमोक्षणार्थं ॥ फलप्रदंमाधवतुष्टिहेतो र्विकल्पेहतोर्मनसोभिरामं ॥ २५ ॥ इतिश्री लघु-
नारदीयपुराणे रुक्माङ्गदचरिते चातुर्मास्यव्रतवर्णनो नामत्रयोविंशोऽध्यायः ॥ २३ छ छ छ छ छ छ छ
मोहिन्युवाच ॥ वाक्यमुक्तंत्वयासाधु कार्तिकंप्रतिमानद ॥ व्रतादिकरणंराज्ञां नेष्टंकिंचिन्महीपते ॥ मुक्तैकंरक्षणंलोके परलो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कजयैषिणा ॥ दानंपानंचयुद्धंच त्रितयंभूभुजाःस्मृतं ॥ नव्रतंहित्वयाकार्य्यं यदिमामिच्छसिप्रियं ॥ मुहूर्त्तमपिराजेन्द्र नशक्नोमित्वयाविना ॥ स्थातुंकमलपत्राक्ष किंपुनर्मासंसंख्यया ॥ यत्रोपवासकरणं मन्यसेत्वंमहीपते ॥ तत्रैवभोजनंदेयं द्विजातीनांमहात्मनां ॥ अथवाज्येष्ठपत्नीया साकरोतुव्रतक्रियां ॥ एवमुक्तेतुवचने मोहिन्यारुक्मभूषणः ॥ आजुहावप्रियांभार्य्यां नाम्नासन्ध्यावलींशुभां ॥ आहूतातत्क्षणात्प्राप्ता राजानंभूरिदक्षिणं ॥ आशीनंशयनेदिव्ये मोहिन्यावाहुसंवृतं ॥ शुभंस्पृष्टंकुचाग्रेण पूर्णकुंभनिभेनवै ॥ वामेनवामनेत्रायाः सकामायामहीपते ॥ कृताञ्जलिपुटोभूत्वा भक्त्योन्नमितकन्धरा ॥ सन्ध्यावल्याहनृपतिं किमाहूताकरोम्यहं ॥ तववाक्येस्थिताभूप सपत्नीदुःखवर्जिता ॥ यथायथाहिरमसे मोहिन्यानृपसत्तम ॥ तथातथाममप्रीतिर्वर्द्धतेनात्रसंशयः ॥ भर्तुःसौख्येनयानारी सौख्ययुक्तानजायते ॥ साधुनीभवितावराजन् त्रीणिजन्मानिपञ्चच ॥ आदेशंदेहिराजेन्द्र मात्रीडांकुरुशाधिमां ॥ राजोवाच ॥ जानामितवशीलंवै कुलंजानामिभाविनि ॥ तववाक्येनहिचिरं मोहिनीरमता मया ॥ रममाणस्यसुचिरं वहवःकार्तिकागताः ॥ प्रियासौख्येनमुग्धस्य नगतोहरिवासरः ॥ सोहंतृप्तिमनुप्राप्तः सौख्यंक्ष्वद्धःपुनःपुनः ॥ एवंचवर्त्तमानेन कामांधेनमयाशुभे ॥ ज्ञातोयंकार्तिकोमासः सर्वपापक्षयंकरः ॥ कर्तुकामोव्रतंदेवि कार्तिकाख्यंसुखप्रदं ॥ अनयावारितोदेवि मोहिन्यामोहयुक्तया ॥ अस्यानविप्रियंकार्य्यं सर्वथावरवर्णिनि ॥ मामकंव्रतमाधत्स्व कृच्छ्राख्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णतुष्टिदं ॥ सात्वेवमुक्तानृपहेमवर्णा भर्तातदापीनपयोधराशुभा ॥ उवाचवाक्यंद्विजराजवक्त्रा व्रतंकरिष्येतवधर्महेतोः ॥ कृतेनयेनाद्यभवेद्यशस्ते कीर्तिश्चसौख्यंतवभूमिनाथ ॥ करोमिसर्वंतवदेवनाथ विशाम्यहंवैज्वलनंत्वदर्थं ॥ नकार्य्यमास्तेममभूमिनाथ वाक्येनतेहन्मिसुतंगुणज्ञं ॥ किंत्वेवमेतद्व्रतमेवराजन् करोमितेधर्म्ममनुत्तमंहि ॥ इत्येवमुक्त्वारविपुत्रशत्रुं प्रणम्यसातत्र विशालनेत्रा ॥ व्रतंचकाराथतदाहिदेवी चाशेषपापौघविनाशनाय ॥ व्रतंतुदत्तेवरकृच्छ्रसंज्ञेप्रियाकृतेहर्षमवापराजा ॥ उवाचवाक्यंकुशकेतुपुत्रीं कृतंवचःसुभ्रुमयात्वदीयं ॥ रमस्वकांतंमयिहर्षयुक्ते संपूर्णकामाकरभोरुहृष्टा ॥ विमुक्तकार्यस्तवसुभ्रुहेतोर्नान्यास्तिनारीममसौख्यहेतुः ॥ साचैवमुक्तापतिनासुरूपा प्रहर्षमभ्येत्यउवाचवाक्यं ॥ ज्ञात्वाभवंतंबहुवीर्य्ययुक्तं त्रिपिष्टपान्नाथसमागताहं ॥ त्यक्त्वामरान्दैत्यवरांस्तुसर्वान् गन्धर्वनागोरगरक्षसांश्च ॥ तार्क्षांस्तथान्यांस्तुविहायभूपान् स्नेहात्तदाचात्रसमागताहं ॥ एतत्कामफलंलोके यद्वयोरेकचित्तता ॥ अन्यचित्तेकृतेकामः कुतोभूयस्तुसंगमः ॥ सफलाहितनुर्मेद्य सफलंरूपमेवहि ॥ त्वयाकामयताकांत दुर्लभंनजगत्त्रये ॥ प्रोन्नताभ्यांकुचाभ्यांहि कामिनोहृदयंदृढं ॥ संस्पृष्टेनहिशीर्येत मन्येवज्रतमोदृढं ॥ तदेवमसृतंलोके यत्पुरंध्रीवरासवं ॥ कुचाभ्यांत्दृदिलग्नाभ्यां मुग्धेनपरिणीयते ॥ एवमुक्तापरिष्वज्य राजानंरहसिस्थितं ॥ रमयामासतन्वंगी मुहूर्जनाविधानतः ॥ तस्यैवंक्रीडमानस्य मोहिन्यासहपार्थिव ॥ रुक्माङ्गदस्यश्रोत्राभ्यां पटहध्वनिरागतः ॥ मत्तेभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुंभसंस्थस्तु धर्माङ्गदसुतेजितः ॥ प्रातर्हरिदिनंलोका तिष्ठध्वंचैकचेतताः ॥ अक्षारलवणाःसर्वे हविष्यान्नानिषेविनः ॥ अवनीत-
ल्पशयनाः प्रियासंगविवर्जिताः ॥ स्मरतोदेवदेवेशं पुराणंपुरुषोत्तमं ॥ सकृद्भोजनसंयुक्ता ह्युपवासाभविष्यथ ॥ तेकृतश्राद्ध-
निचयाः कृतपिण्डोदकक्रियाः ॥ गयाश्राद्धंकृतंतैर्यैर्हरेर्दिनमुपोषितं ॥ एषांवैकार्त्तिकीशुक्ला हरेर्निद्राव्यपोहनी ॥ भवत्येका
दशीप्रातर्माकुर्युर्युगभोजनं ॥ ब्रह्महत्यादिपापानि कामचारकृतानिच ॥ तानियास्यन्तितानिलये उपोषोगांप्रबोधिनीं ॥ प्रबो-
धयतिधर्मस्तु पापंभस्मीकरोतिच ॥ हरेःप्रबोधमाधत्ते तेनैषाहिप्रबोधिनी ॥ सकृच्चोपोषयत्वेमां निद्राछेदकरींहरेः ॥ स्तनयोन
भवेन्मर्त्यो नयोनौविवसेदिति ॥ कुरुध्वंचक्रिणःपूजमात्मवित्तेनमानवाः ॥ वस्त्राभरणधूपैश्च वरचन्दनकुंकुमैः ॥ सकृद्यपुष्पजा-
तीभि र्यदीच्छथहरेःपदं ॥ योनकुर्याद्वचोस्माकं धर्मंविष्णुगतिप्रदं ॥ समेवध्यश्चदंड्यश्च निर्वास्योविषयाद्धनं ॥ एवंविधवाद्य
माने पटहेमेघनिस्वने ॥ मुमोचहस्तात्तांबूलं कर्पूरंश्चनृपोत्तमः ॥ मोहिन्याःकुचयोर्लग्नमाकृष्यहृदयंतुवै ॥ उदातिष्ठन्महीपालः
शय्याच्चहाटकाङ्गदः ॥ मोहिनींप्राहकामार्ता सान्त्वयन्सुक्ष्मयागिरा ॥ देविप्रातर्हरिदिनं भविष्यत्यघनाशनं ॥ संयतोहंगमि-
ष्यामि क्षमांकुरुवरानने ॥ तवाज्ञयानैवकृतं व्रतंकार्त्तिकसंभवं ॥ इयमेकादशीकार्या प्रबोधकरणीमया ॥ अशेषंसर्वपापस्य छे-
दिनीगतिदायिनी ॥ प्रभाणामपिलोकानां महोत्सवकरीशुभा ॥ तस्माद्धविष्यंभोज्यंहि नियतोगजगामिनि ॥ मयासहविशा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लाक्षि त्वंचापितनुमध्यमे ॥ आराधयहृषीकेशमुपवासपरायणा ॥ येनयास्यसिनिर्वाणं दाहप्रलयवर्जितं ॥ मोहिन्युवाच ॥
साधूक्तंहित्वयाराजन् पूजनंचक्रपाणिनः ॥ जन्मभृत्युजराच्छेद कारकंनात्रसंशयः ॥ वक्ष्येकिंचिदहंभूप तच्छृणुष्वसमाहितः ॥
याप्रतिज्ञाकृतापूर्वं त्वयामन्दरमस्तके ॥ वरप्रदानसहिता भवताहाटकांगद ॥ तस्यास्तुसमयःप्राप्तो दीयतांममानद ॥ जन्म
प्रभृतियत्पुण्यमश्वमेधशतार्जितं ॥ क्षयंयास्यतियत्सर्वं नतेकर्त्ताभवेद्वचः ॥ रुक्माङ्गदउवाच ॥ ब्रूहिचार्वंगिकर्त्तास्मि यत्तेमन-
सिवर्तते ॥ नादेयंविद्यतेकिंचिदपिजीवितमात्मनः ॥ किंपुनर्ग्रामवित्तादि धराराज्यंचभाविनि ॥ मोहिन्युवाच ॥ कान्तप्रभो-
महाराज जीवितेशरतिप्रिय ॥ नोपोष्यावासरेविष्णो र्भोग्यराजन्ह्यहंप्रिया ॥ नचतेनविनाराजन् मुहूर्तमपिकामये ॥ नाद्यापि
ममतृप्तिभिस्तवसंयोगजाविभो ॥ एषएववरोदेव योमयाप्रार्थितःपुरा ॥ नचेद्दास्यसिराजेन्द्र भविष्यस्यनृतीविभो ॥ यास्यसेन-
रकंघोरं यावदिन्द्राश्चतुर्दश ॥ राजोवाच ॥ मैवंवदस्वकल्याणि नैतत्त्वय्युपपद्यते ॥ ब्रह्मणस्तुनपापात्वं धर्मविघ्नकरोषिकिं ॥ स्मृ-
तिप्राप्तेनाहिमया नभुक्तंहरिवासरे ॥ सोहमद्यकथंदेवि संजातपलितःशुभे ॥ मर्त्यस्ययौवनेतीते क्षीणेन्द्रियरणस्यहि ॥ स्वच्छुन्नी
सेवनंयुक्तमथवाहरिवासरं ॥ कृतंयन्नमयावाल्ये यौवनेनकृतंचयत् ॥ तदहंक्षीणवीर्यस्तु कथंकुर्यांजुगुप्सितं ॥ प्रसीदचपलापांगि
प्रसीदवरवर्णिनि ॥ माकुरुव्रतभंगंमे दाताहंराज्यसंपदं ॥ अथवानेच्छसेयच्च करोम्यन्यत्सुलोचने ॥ आरोप्यशिविकायांवा त्वा- ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महंगजगामिनि ॥ कलत्रैर्घेणनेष्यामि विमानश्रतिमांहितां ॥ यत्रकामयसेसुभ्रु त्वद्धिश्चतदहंव्रजे ॥ अथवानेच्छसेतच्च मोहमा-
नंमयाकृतं ॥ कृत्वास्वर्णमयौस्तंभौ वक्षाविद्रुमभूषितौ ॥ मुक्ताफलमयीन्दोलां करिष्येहंतवप्रियं ॥ धात्रीफलप्रमाणानां शतल-
क्ष्यादिसंख्यया ॥ तत्रत्वांदोलयिष्यामि वह्नून्माशानहर्निशं ॥ व्रतभङ्गंवरारोह माकुरुष्वशुभव्रते ॥ भोक्तुस्वमांसहिवरं श्वमांसं
हिवरानने ॥ तनयस्यनतैर्भुक्तं नाभुक्तंहरिवासरे ॥ त्रैलोक्यहननेपापं मैथुनेशशिनःक्षये ॥ नृणांव्यवस्थितंदेवि भूतानांक्रूरक-
र्माणि ॥ भोजनंवासरेविष्णो नैतेषष्ठ्यांव्यवस्थिता ॥ लवणेतुतृतीयायामष्टम्यांपिशितेशुभे ॥ अक्षेषुपूर्णमास्यांतु सुरायांरविसं-
क्रमे ॥ गोप्रचारप्रलोपेच कूटसाक्ष्यःप्रदायके ॥ भूमेरंगुलिहारेच मिथ्याविक्रयवादके ॥ निःक्षेपस्यापहारेच कुमारीविघ्नकारके ॥
विल्वस्तमालकेचैव मृतवत्साप्रदोविधिः ॥ दास्यामीतिद्विजंश्राव्य नददातिहियोनरः ॥ ग्रामंक्षत्रंगृहंवापि दीयमानस्यदुर्मतेः ॥
निर्णयेसमनुप्राप्ते वदतोह्यनृताक्षरं ॥ मानकूटस्तुलाकूटः कन्यानृतगवानृते ॥ संस्थितंकनकाभासे कथंभोज्यंहरेर्दिने ॥ मोहि-
न्युवाच ॥ एकभक्तेननक्तेन तथैवायाचितेनच ॥ उपवासेनदानेन द्वादशींनहिलंघयेत ॥ गुर्विणीनांगृहस्थानां क्षीणानांरोगि-
णांतथा ॥ शिशूनांचिरजातानां नयुक्तंसमुपोषणं ॥ राज्ञांभारवहीनांच संग्रामाक्षितिसेवितां ॥ पतिव्रतानांराजेन्द्र नयुक्तंसमु-
पोषणं ॥ एतन्मेगौतमःप्राह स्थितायामन्दराचले ॥ नव्रतेनदिनंविष्णोर्न्नेयंमनुजदुर्लभं ॥ तेगृस्थाद्विजाज्ञेया येषामग्नेःपरिग्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ६ः ॥ राजानन्तेतुविज्ञेया येप्रजापालनेस्थिताः ॥ गुर्विण्योज्येष्टमासस्थाः शिशवोज्येष्टवत्सराः ॥ अतिलंघननिक्षीणा यन्नभा-
 गोघनाश्रये ॥ त्रिविधेनप्रकारेण भर्तुर्याभिहितेरताः ॥ पतिव्रतास्तुविज्ञेया नज्ञेयायोनिरक्षणात ॥ किमन्यैर्बहुभिर्भूप वाक्या-
लापैःकृतैर्मया ॥ भोजनेतुकृतेप्रीति रेकादश्यांत्वयानृप ॥ नप्रीतिर्यादिमेछित्वा शिरस्त्वंहिप्रयच्छसि ॥ तृणतुल्यानहंमन्ये त्रि-
लोकान्मनुजाधिप ॥ यत्प्रदास्यसितुष्ट्यर्थं ममराजीवलोचन ॥ स्वयंकृत्वाप्रतिज्ञात्वं सदाक्षिणकरान्वितां ॥ नाद्यपच्छसिराजेन्द्र
नाहंसंसर्पयामिते ॥ वर्णानामाश्रमाणांच सत्यंराजन्द्रपूज्यते ॥ विशेषाभूमिपालानां त्वद्विधानांमहीपते ॥ सत्येनतपतेसूर्यः
शशीसत्येनरोचते ॥ सत्येस्थितिक्षितिर्भूप सत्यंधारयतेजगत ॥ सत्येनवहतेवायुः सत्येनज्वलतेशिखी ॥ सत्याधारमिदंसर्वं जग-
त्स्थावरजङ्गमं ॥ नसत्याच्चलतेसिन्धुर्नविन्ध्योवर्द्धतेविभो ॥ नगर्भंयुवतीधत्ते वेलातीतंकदाचन ॥ ऋतवःसंस्थितासत्ये फल-
पुष्पार्थदर्शिनः ॥ द्रव्यादिसकलंवस्तु सत्याधारंमहीपते ॥ अश्वमेधसहस्रंच सत्यंचतुलयाधृतं ॥ अश्वमेधसहस्राद्धि सत्यमेवाति-
रिच्यते ॥ सत्याद्धिमुक्तोनृपतेमनुष्यः सुरापतुल्योभवतीतिसत्यं ॥ व्रतेनशुद्धिर्यदिवाह्युपैति सत्याच्च्युतोनैतिकृतेनतेन ॥ ६५ ॥
इतिश्रीलघुनारदीयपुराणे रुक्माङ्गदचरिते मोहिनीसम्वादो नामचतुर्विंशोध्यायः ॥ २४ ॥ ७ ७ ७ ७ ७
रुक्मांगदउवाच ॥ यत्त्वयाऽव्याहृतंवाक्यं ममेदंगोतमेरितं ॥ मन्दरेपर्वतेश्रेष्ठे हरिवासरभोजनं ॥ अजानतापुराणार्थं व्याहृतञ्च-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजन्मना ॥ क्षुद्रशास्त्रानुसारेण लोलुपेनवरानने ॥ पुराणेनिर्णयोह्येष विद्वद्भिःसमुपाहृतः ॥ नशङ्खेनपिवेत्तोयं नहन्यात्कूर्मशू-
करौ ॥ एकादश्यांनभुञ्जीत पक्षयोरुभयोरपि ॥ अगम्यागमनेदेवि तथाऽभक्ष्यान्नभक्षणे ॥ अकार्यकरणेजन्तोर्गोसहस्रवधःकृतः ॥
तत्कथंज्ञायमानोहं भोक्ष्यामिहरिवासरे ॥ अभक्षःसर्वथाप्रोक्तः किंपुनस्त्वन्नसंस्क्रियां ॥ अनुकल्पोनृणांप्रोक्तः क्षीणानांवरवर्णि-
नि ॥ मूलंफलंपयस्तोयमुपभोग्यंभवेच्छुभे ॥ नत्वेवंभोजनेकैश्चिदेकादश्यांप्रकीर्त्तितं ॥ ज्वरिणांलंघनंशस्तं पापिनांसमुपोषणं ॥
मनःप्रकोपसुभगे संप्राप्तेहरिवासरे ॥ ज्वरमध्येकृतंपथ्यं निधनायविधीयते ॥ वैष्णवेतुदिनेभुक्ते नरकायप्रकल्पते ॥ माग्रहंकुरुवा-
मोरु व्रतभंगोभवेन्मम ॥ यद्यद्वरोचतेतुभ्यं तत्तत्कर्त्तास्मिसुन्दरि ॥ मोहिन्युवाच ॥ नचान्यद्रोचतेराजन् विनावैभोजनक्रियां ॥
जीवितस्यापिदानेन नमेकिञ्चित्प्रयोजनं ॥ माचरेर्भूपदुष्टोयं नमेकिञ्चित्प्रयोजनं ॥ अभिमन्तोनविद्वांसो नमन्येसमुपोषणं ॥
वेदवाक्यंकथंकर्म भवान्वैकर्तुमर्हसि ॥ वसिष्ठउवाच ॥ तामाहनृपतिःक्रुद्धो वेदोयम्बहुधास्थितः ॥ यज्ञकर्मक्रियावेदः पुराणेषुप्र-
तिष्ठितः ॥ पुराणपुरुषाज्जातं यथेदंजगदद्भुतं ॥ यथाहिवाग्मयंज्ञानं पुराणेभ्योनसंशयः ॥ वेदार्थादधिकंमन्ये पुराणार्थवरानने ॥
वेदाःप्रतिष्ठिताःदेवि पुराणेनात्रसंशयः ॥ बिभेत्यल्पश्रुताद्वेदो मामयंघातयिष्यति ॥ इतिहासपुराणैस्तु तदृष्टंस्मृतिभिःशुभे ॥
उभाभ्यांयमदृष्टंहि तत्पुराणेषुगीयते ॥ नवेदेग्रहसंचारो लग्नशुद्धिर्नभाविनि ॥ तिथिवृद्धिःक्षयोवापि याज्यायाज्यौनदृश्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रायश्चित्त्यंनहत्यायामातुरस्यौषधींप्रिये ॥ नचापिपापशुद्धिस्स्यादात्मनोवापरस्यवा ॥ यदंगैर्दीयतेसुभ्रु तथोपांगैश्चगीयते ॥ पु-
राणैःस्मृतिभिर्यस्तु वेदोयंपरिपठ्यते ॥ वदन्तीहपुरणानि भूयोभूयोबरानने ॥ नभोक्तव्यंनभोक्तव्यं संप्राप्तेहरिवासरे ॥ पुराण-
मन्यथाकृत्वा तिर्यग्योनिमवाप्यते ॥ प्रशान्तोपिस्वदान्तोपि नगतिंप्राप्नुयात्क्वचित् ॥ पितरंकोनवन्देत मातरंकोनपूजयेत् ॥
कोनगच्छेत्सरिच्छ्रेष्ठां कोभुंक्तेहरिवासरे ॥ कोहिदूषयतेवेदं ब्राह्मणान्कोजिघांसति ॥ परदारांहिकोगच्छेत्कोभुंक्तेहरिवासरे ॥ न-
हीदृशंपापतरंजगत्त्रये विमूढजन्तोर्हरिभिर्दिनेशुभे ॥ करोतिदेहस्यविबृद्धहेतोर्भुजिक्रियामेषनरःसदैव ॥ मोहिन्युवाच ॥ पू-
र्णिकेशीघ्रमाहूय ब्राह्मणान्वेदपारगान् ॥ तेषांवाक्येनपूतोयं करोत्वन्नभुजिक्रियाम् ॥ सातद्वाक्यात्त्वरन्तीच ब्राह्मणान्वेदपार-
गान् ॥ आहूयचानयामास यत्रतिष्ठतिमोहिनी ॥ तानागतान्ततोदृष्ट्वा वेदवेदाङ्गपारगान् ॥ मोहिनीपतिनासार्द्धं ववन्देभू-
मिदेवतान् ॥ उपविष्टास्तुतेसर्वे शातकुंभमयेष्वपि ॥ आसनेषुमहीपाल ज्वलनार्कसमप्रभाः ॥ तेषांमध्येवयोबृद्धो गौतमोवा-
क्यमब्रवीत् ॥ किंनिमित्तंवयंदेवि समाहूतावदस्वनः ॥ सर्वसंशयछेत्तारः प्राप्तास्मोमत्तगामिनि ॥ मोहिन्युवाच ॥ छान्दसस्तु-
जनोह्येष अर्थवाक्यहतोयथा ॥ सोयंवदतिमोहान्धो नाहंभोक्ष्येहरेर्दिने ॥ अन्नाधारमिदंसर्वं जगत्स्थावरजंगमं ॥ मृताह्यप्यन्न-
दानेन प्रीयन्तेपितरोदिवि ॥ कर्कन्धुमात्रंविप्रेन्द्राः पुरोडाशंहिदेवताः ॥ कामयन्तेद्विजश्रेष्ठा अत्रैचैवाप्तुतोपमं ॥ पिपीलिकापि- ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षुधिता सुखेनादायतण्डुलान् ॥ चिरंनयतिदुःखेन चान्नंकस्यनहीयाति ॥ सोयंविद्विषयत्यत्र संप्राप्तेहरिवासरे ॥ नितंधर्मंपरित्यज्य यतिधर्मेऽव्यवस्थितः ॥ विधवार्चायतीनांहि युक्तव्रतनिषेवणे ॥ अव्रताविधवायातु मुनयश्चाव्रतस्तथा ॥ अन्धेतमशिमज्जंते यावादिन्द्राश्चतुर्दश ॥ उपवासादिकरणं भूभुजान्नोदितःक्वचित् ॥ मुक्त्वैकंपालनंराज्ञां चतुर्वर्गप्रसाधनं ॥ नारीणाभर्तृशुश्रूषा पुत्राणांपितृसेवनं ॥ शूद्राणांद्विजशुश्रूषा लोकरक्षामहीभृतां ॥ स्वकंकर्मपरित्यज्य यदन्यत्कुरुतेक्वचित् ॥ अज्ञानाद्वाप्रमादाद्वा पतितःसनसंशयः ॥ सोयमद्यमहीपालो जातिधर्मासमीहते ॥ अव्यापाराहियुवती अमनस्वीसुतस्तथा ॥ एकान्तशीलोनृपतिर्भृत्यःकर्मविवर्जितः ॥ सर्वेतेनरकंयान्ति अप्रतिष्ठंद्विजोत्तमाः ॥ अयंहिनियमोपेतो हरिपूजनतत्परः ॥ आक्रन्देवर्त्तमानेवै कथमेषोभिधास्यति ॥ व्युत्पाद्यहरिपूजान्तु ब्रह्महत्याम्व्यपोहति ॥ क्षीणदेहोरिपून्नेष कथंसंयमयिष्यति ॥ अन्नतोभवतिप्राणः प्राणाद्देहविचेष्टितं ॥ चेष्टायांरिपुनाशस्तु ततोन्नंपरिभूयते ॥ एवंज्ञात्वामयाराजा बोध्यमानोनवुध्यते ॥ निजधर्मंपरित्यज्य जातिधर्मेऽव्यवस्थितः ॥ विधवानांव्रतीनांहि युक्तंव्रतनिषेवनं ॥ अव्रताविधवायातु मुनिश्चैवस्तुचाव्रतः ॥ अन्धेतमसिमज्जन्ते यावदिन्द्राश्चतुर्दश ॥ एतदेवनृपेन्यायं यत्प्रजारक्षणंपरं ॥ नव्रतंकिञ्चिदेवेह पुत्रस्त्रीषुनृपेषुवा ॥ किंदेवकार्येणनराधिपस्य रक्षामकृत्वाविषयस्थितानां ॥ तद्देवकार्यंसचयज्ञहोमो यदश्रुपातानयनंहिराष्ट्रे ॥ ५० ॥ इतिश्री ना० पु० मोहिनीवाक्यंनाम ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वशिष्ठउवाच ॥ तद्वाक्यंब्राह्मणाःश्रुत्वा मोहिन्याःसमुपाहृतं ॥ तथ्यमित्येवमुक्त्वातं राजानंवाक्यमब्रवीत् ॥ ब्राह्मणाऊचुः ॥ यः
पुरानृपतेपुण्यः कृतोर्थंसमयःकिल ॥ एकादश्यांनभोक्तव्यं पक्षयोरुभयोरपि ॥ नकृतःशास्त्रदृष्ट्याहि स्वबुध्यावैत्वयाकृतः ॥ सा-
र्व्रीनांप्राशनंप्रोक्तमुभयोःसन्ध्ययोःकिल ॥ मोहादुत्सृष्टभोक्तारस्त्रयोवर्णाःप्रकीर्त्तिताः ॥ विशेषाद्भूमिपालानां कथंयुक्तउपोषणं ॥
सर्वत्रोद्यतशस्त्राणां दुष्टसंयमिनांप्रभो ॥ शास्त्रतोशास्त्रतोवापि यःकृतःसमयस्त्वया ॥ परिपूर्णाभवत्वेष वाक्येनाद्यद्विजन्मना ॥
व्रतभंगोनतेस्तीह भुंक्ष्वविप्रानुशासनात ॥ परितापोनकर्त्तव्यो विप्रवाक्यंमहत्तरं ॥ योन्यथामन्यतेतेषां वाक्यंनृपतिपुंगव ॥ स-
यातिरासभियोनिं जन्मानिदशपञ्चच ॥ तच्छ्रुत्वावचनंरौद्रं राजाकोपसमान्वितः ॥ उवाचस्फुरमाणौस्तान् विप्रांश्वश्लक्ष्णयागिरा ॥
सर्वेषामेवभूतानां भवन्तोमार्गदर्शिनः ॥ विमार्गस्थाभवन्तोहि कथंवदथमूर्खतां ॥ यतीनांविधवानाञ्च उपवासउदाहृतः ॥ मि-
थ्यैतत्सर्वदाचैव उपोष्योहरिवासरः ॥ यद्भवद्भिरिदंवाक्यं प्रोक्तंराज्ञामुपोषणे ॥ तन्नास्तिसर्वभूतैस्तु कार्यमेवमुपोषणं ॥ पुराणे-
श्रूयतेचेयं गाथेयंपापकृन्तनी ॥ नशङ्खनपिवेत्तोयं नहन्यात्कूर्मशूकरौ ॥ एकादश्यांनभोक्तव्यं पक्षयोरुभयोरपि ॥ सुरापानंन-
कर्त्तव्यं नहन्तव्योद्विजस्तथा ॥ नाक्षैक्रीडेदधर्मंवै नभुञ्जीतहरेर्दिने ॥ अभक्षभक्षणंचैव वर्णाश्रमविवर्जितं ॥ परदाराभिगमनं य-
तेश्चैतद्विगर्हितं ॥ अथवासर्ववर्णानां किंवामन्यथभूसुराः ॥ योषित्प्रसंगसदृशं संप्राप्तेशशिनःक्षेय ॥ भोजनंवासरेविष्णोः सद्भि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विप्राविगर्हितं ॥ कृत्वातुकार्यंजीवेत अप्रमत्तःशरच्छतं ॥ कोहिवैवेष्टमानस्य योभुक्तेहरिवासरे ॥ चतुष्पदेभ्योमनुजैर्नान्नंदत्तंहरे-
र्दिने ॥ उपवासस्थितैर्विप्रा विष्णुधर्मपरायणैः ॥ सोहंकथंकरिष्यामि यस्कृतंनकदाचन ॥ नवोबचःकरिष्यामि नमयाहिनिमं-
त्रिताः ॥ नन्वहंक्षीणदेहस्तु नचरक्षाविवर्जितः ॥ धर्मभूषणसंज्ञेतु रक्षपालेधरातले ॥ प्रशाशतिसुरश्रेष्ठः कोविपक्षोभवेन्मम ॥ ए-
वंज्ञात्वाद्विजश्रेष्ठा नवाच्यंकिंचिदेवहि ॥ अनिच्छमानेयेदद्युः प्रायश्चित्तंद्विजातयः ॥ तेषामेवाहितत्पापं स्मृतिर्वैकल्पिसंभवं ॥
देवोवादानवोवापि यक्षोगन्धर्वराक्षसा ॥ वृद्धोवाब्राह्मणोवापि पितास्माकमथापिवा ॥ हरिर्वापितरौवापि मोहिनीजनकोपिवा ॥
दिनकृच्छीतकर्त्तावा तुष्यतिनृपतोयदि ॥ नभुंक्तेभूसुराराजन् नाम्नारुक्मांगदस्तुयः ॥ पातालाच्छीर्यतेपृथ्वी हिमवान्परिवर्त्तये-
त् ॥ जलधिःशोषमायाति उष्णत्वंपावकस्त्यजेत् ॥ नाहंत्यजेयंदिप्रेन्द्रा एकादश्यानिषेवनं ॥ प्रसिद्धरेखाभुवनत्रयेपि रारध्यतेमे-
पटहेतिमात्रं ॥ ग्रामेथवर्गेविषयेपुरेवा विश्वुष्पतेरुक्मविभूषणस्य ॥ दण्ड्यश्चबध्यश्चसपत्नभूतो नचापिवासोविषयेष्ठतस्य ॥ हरे-
र्दिनेसर्वमखप्रधाने पापापहेधर्मविवर्द्धनश्च ॥ मोक्षप्रदेजन्मनिकृन्तनाख्ये श्रेयोनिधौसर्वजनप्ररूढेः ॥ एवंविधःसंयमसंयुतोहं य-
द्यस्मिकर्त्तावृजिनंहिविप्राः ॥ अमेध्यलिप्तःपटहोभवेन्मे संछादितोनीलपटेनवाससा ॥ उत्पाद्यकीर्त्तिस्वयमेवजन्तोर्निकृन्ततेका-
मभयाद्वयोनरः ॥ सयातियोर्निकृमिकीटजुष्टां विष्ठामयेपञ्चयुगानिसप्त ॥ वृथाशिश्नुनामपिवैजनित्री भाविष्यतेपुत्रवरोनिराशा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैवस्वतेहर्षमुपागतेहि सलेखकेभूतपटेप्रपन्ने ॥ किंतेजनातेनपुरात्मनाहि ददातिहर्षंरिपुसुन्दरीणां ॥ कुकर्मणापापमतिंकरोति
कृतन्नधात्रेपुनरेवयोत्र ॥ शास्त्रंनशास्त्रंनचतत्पुराणं नचापिसन्तःस्मृतयोनचैव ॥ वेदाद्यवेदाश्चभवन्तिविप्रा भुञ्जीक्रियांयःकुरुते-
त्रवासरे ॥ श्राद्धेपितेनापिनतृप्तिरस्ति यद्भुह्यतेवैपितृशेषमन्नं ॥ प्राप्तेह्निनूनंमधुसूदनस्य पित्र्यंहिकर्मेष्टतमंनभाति ॥ वशिष्ठउ-
वाच ॥ श्रुत्वैतद्वचनंभूप मोहिनीप्रज्वलत्यथ ॥ क्रोधसंरक्तनयना भर्त्तारंपर्यभाषत ॥ नकरोषिवचोमह्यं धर्मराज्योभविष्यति ॥
धर्मराजस्तुपुरुषः पांशुनासमतांव्रजेत् ॥ पांशुनापूर्यतेगर्त्तः सगर्त्तोहिनजायते ॥ कृतकृत्यागमिष्यामि प्राप्तोधर्मस्त्वदुद्भवः ॥
नोपधानंकरिष्यामि सुबाहुंचतवाधुना ॥ धिक्त्वांनदक्षिणकरं स्ववाक्यपरिलंघनं ॥ म्लेच्छोसिनचराजात्वं म्लेच्छेप्येतन्नविद्यते ॥
सत्याच्चलितमद्यत्वां परित्यज्यस्वपापिनं ॥ एवमुक्त्वावरारोहा उदतिष्ठत्त्वरान्विता ॥ सतीवेशंपरित्यज्य सर्वालंकारभूषिता ॥ प्र-
स्थितासातदातन्वी भूसुरैःसहभूमिप ॥ वदन्तीपरुषंवाक्यं पार्थिवंप्रतिभाविनी ॥ वरंह्यमेध्यसंस्पर्शो नास्यसंगोनृपस्यहि ॥ च-
रंनीलांबरस्पर्शो नास्यधर्मच्युतस्यहि ॥ वरंह्युदक्याशंस्पर्शो नास्यसत्यच्युतस्यहि ॥ एवंविमोहिनीरुष्टा प्रलपन्तीतदाभृशं ॥ गौ-
तमाद्यैःपरिवृता निर्जगामगृहाद्बहिः ॥ निर्गच्छन्तीसुसंक्रुद्धा साक्रोशन्तीतदानृपं ॥ अविश्वासकलामूर्वीं प्राप्तोधर्मविभूषणः ॥
संमुखोहिजनन्यास्तु वराश्वोपरिसुस्थितः ॥ कर्णाभ्यांतस्यशब्दोसौ विश्रान्तपितृवत्सलः ॥ मोहिनीवक्त्रसंभूतो विप्रवाक्योपबृं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हितः ॥ सश्रुत्वाताद्दशंवाक्यं जनन्याधर्मभूषणः ॥ अवरुह्यहयात्क्षिप्रं ववन्देमोहिनींतदा ॥ ब्राह्मणानांचसर्वेषां प्रणाममकरोत्तदा ॥ अनुमन्यचतान्सर्वान् मोहिनींवाक्यमब्रवीत ॥ केनापमानितादेवि कस्मात्वंगर्हसेनृपं ॥ धरासुरैःसमेतात्वं ब्रूहिकिंक्रवाणिते ॥ धर्मांगदवचःश्रुत्वा मोहिनीवाक्यमब्रवीत् ॥ अनृतोयंतवपिता करोयेनवृथाकृतः ॥ यःकृतंसुकृतंभीरु रुक्मांशोकाकृतिःशुभः ॥ ध्वजांकितोबरश्रीमान् दक्षिणःकनकांगदः ॥ रुक्मांगदेनपित्राते नाहंवस्तुंसमुत्सहे ॥ धर्मांगदउवाच ॥ यद्ब्रवीषि वचोदेवि तत्कर्त्ताहंनसंशयः ॥ माकोपंकुरुदेवित्वं निवर्त्तस्वपितुःप्रिये ॥ मोहिन्युवाच ॥ अनेनसमयेनाहं पित्रोढातेमहामते ॥ मन्दरेपर्वतेश्रेष्ठे सन्निधौधूर्जटेस्तदा ॥ समयात्प्रच्युतस्त्वद्य पितातेराजनन्दन ॥ नप्रयच्छतिमेदेयं तस्यैवचविवृद्धये ॥ नयाचेकानिचिद्वस्तु हस्त्यश्वंरत्नवाससी ॥ येनतस्यभवेद्धानिस्तन्नयाचेनृपात्मज ॥ येनासौप्रीणयेद्देवं स्वकीयंवेदिनाम्वर ॥ तन्मयाप्रार्थतेपुत्र समोहान्नप्रयच्छति ॥ उपकारायतस्यैव देहंसंप्रीणनायवै ॥ याचितोब्राह्मणैःसार्द्धं मयानृपतिपुंगव ॥ स्थितोसावनृतेघोरे सुरापानंसमेत्यवै ॥ सत्यच्युतंनिष्ठुरवाक्यभाषिणं विमुक्तधर्मंनृपतस्करंच ॥ परित्यजेयंजनकंतवाधुना नसंगतिर्मेभविताहितेन ॥ तच्छ्रुत्वामोहिनीवाक्यं तदाधर्मांगदोब्रवीत ॥ मयिजीवतितातोमे नभवेदनृतःक्कचित ॥ निवर्त्तस्वधरातुल्ये करिष्येहंतवेप्सितं ॥ तत्रात्मनानृतन्देवि पूर्वमुक्तंकदाचन ॥ सकथंतादृशोजातो भविष्यतिनृपोत्तमः ॥ यस्यसत्येनलोकाहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितावसुमतीतथा ॥ वैवस्वतगृहंयेन शुन्यंसर्वारिणाकृतं ॥ यस्यविस्फुरतेकीर्त्तिः सर्वद्वीपेषुधर्मिणः ॥ सकथंजायतेराजा त्व- सत्यवचनान्वितः ॥ कनुश्रुतंत्वयादेवि श्रुतंभूमिपतीरितं ॥ येनत्वंभाषसेभीरु निन्दसेपितरंमम ॥ कृत्वाममोपरिदयां निवर्त्तस्व वरानने ॥ एतद्धर्मांगदवचः श्रुत्वादेवीविमोहिनी ॥ निवर्त्ततमहीपालः पुत्रस्कन्धावलंबिनी ॥ यत्ररुक्मांगदःशेते मृतकल्पो- रविप्रभः ॥ तस्मिन्निवेशयामास शयनेकाञ्चनान्विते ॥ दीपरत्नैःसुखचिते मणिवैडूर्यभूषिते ॥ आखण्डलस्यशस्त्रेण कृतपादेसु- कोमले ॥ विस्तरायामसंपन्ने सुरम्येसुमनोहरे ॥ उवाचप्रणतोभूत्वा पितरंश्लक्ष्णयागिरा ॥ तातैषाजननीमह्यं तांवदत्यनृतीत्वि- ति ॥ मयिजीवतिकस्मात्वं भविष्यस्यनृतीपितः ॥ सकोषरत्नविषये गोगजाश्वसमाकुले ॥ राज्येप्रशास्यमानेतु सप्तोदधिविभूषि- ते ॥ देहित्वंसकलंह्यस्या यत्त्वयासमुदीरितं ॥ मयिचापधरेतात व्यलीकंकःकरिष्यति ॥ देहिशक्रपदंदेव्या जितंचैवपुरन्दरं ॥ नचेतुष्यतिकल्याणी तेनशक्रपदेनहि ॥ वित्तेशंवारुणंवापि याम्यंवापृथिवीपते ॥ आग्नेयंनैरृतंवापि वायव्यंवाशिवस्यच ॥ वि- रिंचिदुर्लभंवापि योगिगम्यंनिरञ्जनं ॥ जित्वापदंप्रदास्यामि उपास्याराध्यपङ्कजं ॥ समीहतेयजननी ममाद्यधरणीतले ॥ त्रि- पिष्टपेवाथपरेपदेवा दास्यामिजित्वादनुजेशमर्त्यान् ॥ भृत्योस्मिदासोस्मिनराधिपेन्द्र मातुस्तथाचाहमदीनकीर्तिः ॥ यद्दुष्करं- भूमिपदेत्रिलोके तच्चापिदास्यामितवप्रभावात् ॥ तंचापिराजेन्द्रददस्वदेव्या यज्जीवितंवाञ्छतितद्ददस्व ॥ भवस्वनान्योनृपना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थलोके माकीर्त्तिजंपापमिदंवदस्व ॥ प्रकाशयित्वास्वगुणैर्जनौघं करैरिवात्मप्रभवैःखखोल्कः ॥ कीर्त्तिःप्रसंगेतवभूमिपाल प्रजा-
बधोयंनहिसंशयोत्र ॥ उत्पादयित्वाविमलामनन्तां कीर्तिंप्रभोस्वर्गगणानुसारिणीं ॥ नयुक्तमेतत्तवभूमिपाल वाक्यंमृषाकर्तुमि-
हेन्द्रकल्प ॥ ८० ॥ इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते धर्माङ्गदवचः षड्विंशतितमोध्यायः ॥ २६ ॥ छ छ छ
राजोवाच ॥ कीर्त्तिन्नश्यतुमेपुत्र असत्योवाभवाम्यहं ॥ गंतावानरकंघोरं नभोक्ष्येहरिवासरे ॥ वदत्येषासुद्धर्मेधा भूयोभूयःसुवा-
लिशा ॥ समयेकामयेपुत्र वदस्वान्यत्कथंचन ॥ भुक्त्वैकंभोजनंविष्णोर्वासरेपापनाशने ॥ यद्यहंकुत्सितंयोनिं व्रजेयंकृमिसंयु-
तां ॥ कार्यंतथापिनैवाहं भोजनंहरिवासरे ॥ एषाचैवगुरुर्भूत्वा लोकानांशिक्षयान्विता ॥ सुमतिर्भारतिर्यासीत्साकथंचित्तथाभ
वेत ॥ अभक्षभक्षणंकृत्वा ह्यगम्यगमनंतथा ॥ पीत्वापेयन्तुयज्जीवेत् किंतेनवदपुत्रक ॥ कृत्वापांशुसमःपुत्र त्यक्तोहमनयाक्षि-
तौ ॥ धिक्कृतोहिजनैःसर्वैः नभोक्षेहरिवासरे ॥ प्रयातुविलयंदेवी मोहिनीब्रह्मणोन्तिकं ॥ वियोगेचपलापत्न्यां वरंमृत्युर्नभोज-
नं ॥ कथंहर्षमहंकर्त्ता मार्तण्डतनयस्यहि ॥ निरुद्धोयस्यवैमार्गो हरिवासरसेवनात ॥ याश्चशून्याःकृतास्तात मयानरकपङ्क्तयः
॥ परिपूर्णाभविष्यन्ति जनस्ताबृजिनेकृते ॥ यास्मसीमन्तिनीकाचित् कुक्षौसंधारयेत्सुतं ॥ यःशत्रून्संमुखात्कुर्यान्मित्रद्वेषंक-
रोतिकिं ॥ सोहंदेवमनुष्याणां कृत्वामूर्ध्निपदंनृप ॥ आपूर्यवैष्णवंलोकं जनोघैःसमुपोषितैः ॥ कथमन्यंचरेद्धर्मं भार्याहेतोःस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामुकः ॥ नान्यमिच्छातिदुर्मेधा धरंशक्रनिसूदनं ॥ भोजनंवासरेविष्णोरेतदेवह्रियाचते ॥ तंनदास्यामिमोहिन्या याचितोपि-
सुरासुरैः ॥ पिबेविषंविशेवह्निं निपतेपर्वताग्रतः ॥ खड्गेनवाशिरश्छिन्द्यां नभोक्षेहरिवासरे ॥ रुक्मांगदेतिमेनाम प्रसिद्धंभुवन-
त्रये ॥ एकादश्युपवासेन मयाचोपार्जितंयशः ॥ सकथंभोजनंकृत्वा सर्वसंमार्ज्जयेह्यहं ॥ यदिव्रजतिदलतिविलयति तिर्यक्सं-
चरतिखण्डशोयाति ॥ विरमतितदपिनचेता मामकमिहमोहिनिहेतोः ॥ परित्यजामेवनिजंहिजीवितं राज्येनकिंमेस्वजनैःसुते-
न ॥ नत्वेवकर्त्तामधुसूदनस्य दिनेसुपुण्येऽन्ननिषेवनंहि ॥ १८ ॥ इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते सप्तविंशोध्यायः
वशिष्ठउवाच ॥ ततःपितुर्वचनंश्रुत्वा तदाधर्मविभूषणः ॥ आनयामासजननीं तदासंध्यावलिंशुभां ॥ सूर्यायुतशतप्रख्यां तेज-
सासंहतस्तनीं ॥ सययौमन्दिरंदेव्याः पितुर्दुःखेनदुःखितः ॥ चालमानाधरांसर्वां पदविन्यासविक्रमैः ॥ पुत्रस्यवचनात्प्राप्ता त-
त्क्षणात्सानृपान्तिकं ॥ धर्मांगदउवाच ॥ श्रुतंतेमोहिनीवाक्यं पितृबाक्यंतथैवच ॥ उभयोःसंविदंज्ञात्वा मनुःशांत्वयमोहिनीं ॥
भोजनायस्थितामेनां नृपस्यहरिवासरे ॥ यथानच्यवतेसत्याद्यथाभुंक्तेनमेपिता ॥ तथाविधीयतामद्य कुशलंस्याद्यथोभयोः ॥
तत्पुत्रवचनंश्रुत्वा देवीसन्ध्यावलीनृप ॥ उवाचश्लक्षणयावाचा प्राहब्रह्मसुतांतथा ॥ माग्रहंकुरुमाभीरु नृपतेर्द्धर्मनाशने ॥ ना-
स्वादयतिपानान्नं संप्राप्तेहरिवासरे ॥ अनुवर्त्तयराजानं गुरुरेषसनातनः ॥ नभार्याबचनेभर्तुर्नारीभवतिभाविनि ॥ तस्यालोकाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभाःप्रोक्ता सावित्र्यास्तुयथामलाः ॥ यद्यनेनपुरादेवि तवदत्तकरोगिरौ ॥ कामार्त्तेनविमूढेन नचतद्दैविचिन्तयेत् ॥ यद्देयंत-
द्ददात्वेष अदेयंप्रार्थयस्वमा ॥ विपत्तिरपिचश्लाघ्या सन्मार्गेसंस्थितस्यहि ॥ नभुक्तंयेनशुभगे शैशवेपिहरेर्दिने ॥ सोयंशिशु-
त्वाभावेच कथंभोक्षतिसांप्रतं ॥ कामंवरयभद्रेन्यं निवृत्तोभवभोजने ॥ यदिमांमन्यसेदेवि धर्मांगदविमोहिनीं ॥ राज्यंवाजीवि-
तंवास्य वरंयाचयभाविनि ॥ राज्यंगृहाणवामोरु सद्वीपवनकाननं ॥ अथवातेशुभेभद्रे वदान्यत्करवाणिते ॥ ज्येष्ठाहंवाकनि-
ष्ठायाः करिष्येपादधावनं ॥ भर्तुरर्थेविशालाक्षि प्रसीदतनुमध्यमे ॥ वाचाशपथकोशैस्तु संनिबध्याथतंह्रिया ॥ अकार्यंकारये-
त्पत्यौ सानारीवाग्गुरीभवेत् ॥ प्रत्युतानरकान्घोरान् पञ्चजन्मानिसप्तच ॥ ज्ञात्वाहमेवंसुभगे विक्रियांपापसंभवां ॥ निवारयाम्य-
कार्यत्वात् सखीभावेनसुन्दरि ॥ विपक्षस्यापिसद्बुद्धिर्दातव्याधर्मबुद्धिना ॥ किंपुनःसख्ययायुक्तास्तवपद्मशुभानने ॥ सन्ध्या-
वल्यावचःश्रुत्वा मोहिनींमोहसंयुता ॥ उवाचकनकाभासा भर्तुर्ज्येष्ठांप्रियान्तदा ॥ माननीयासिमेसुभ्रु करोमिवचनन्तव ॥ द्व-
न्द्ववृत्तिर्विवादस्तु गीयतेनारदादिभिः ॥ यदेतन्नाचरेद्राजा भोजनंकृष्णवासरे ॥ क्रियतामपरन्देवि मरणादधिकंतव ॥ ममापि
दुःखैर्दह्येत नतवैववदामिते ॥ कस्येष्टमात्महननं कस्येष्टंविषभक्षणं ॥ पतनंगिरिशृंगाद्वा सर्प्पैःक्रीडाथवाशुभे ॥ व्याघ्रसिंहाभि-
गमनं समुद्रतरणंतथा ॥ द्विरुक्तोनृपवाक्यंवा परदारगमस्तथा ॥ अपथ्यभक्षणंलोके तथैवाभक्षभक्षणं ॥ मृगयापानमक्षैर्वा क्री-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डनंसाहसैस्तथा ॥ छेदनंतृणकाष्ठानां लोकानांखण्डनंतथा ॥ हननंसूक्ष्मजीवानां जलपावकक्रीडनं ॥ निष्ठादेशवरारोहे नरःस-
र्वंकरोतिहि ॥ साहंपापादुराचारा वक्तुकामासुनिर्घृणा ॥ यादृशेनहिभावेन योनौरेतःसमुत्सृजेत् ॥ तादृशेनहिभावेन अपत्यं
जायतेकिल ॥ भ्रंशनार्थमहंराज्ञो देविरुक्मांगदस्यहि ॥ जाताजलजजातेन स्त्रीरूपावरवर्णिनी ॥ दुष्टभावासमुत्पन्ना दुःखार्थं
तनयस्यते ॥ नलभ्रंनग्रहादेवि नाहोवापुण्यदर्शिनी ॥ तत्कालभावनातग्राह्या तद्भावाज्जायतेसुतः ॥ तेनभावेनयुक्तेन दाक्षिण्य
रहितस्यच ॥ नस्नेहोनचव्रीडावै नधर्मोदेविविद्यते ॥ युक्तायुक्तंमन्यमानः स्वभावमनुवर्त्तते ॥ वक्ष्येवचःप्राणहरन्तवाधुना भर्तु-
श्चलोकस्यचदारुणंच ॥ धर्मापहंघोरतरंममैव कर्तुंनशक्यंमनसेवभीरु ॥ करोषिवाक्यंयदिमामकंत्वं भवेत्सुकीर्तिर्महतीसुलोके ॥
भर्तुर्यशःस्यात्त्रिदिवेगतिस्तु पुत्रप्रसंसाममधिग्विवाद ॥ ३५ ॥ इतिश्री ल० ना० पु०रु०मोहिनीवाक्ये अष्टाविंशोध्यायः २८
वशिष्ठउवाच ॥ मोहिन्यावचनंश्रुत्वा देवीसन्ध्यावलीतदा ॥ धैर्यमालंब्यतांतन्वी ब्रूहिब्रूहीत्यभाषत ॥ कीदृशंतद्वचोदेवि येन-
दुःखंभवेन्मम ॥ भर्तुर्मेसत्यकरणे नमेदुःखंव्यथाक्वचित ॥ आत्मनोनिधनोवापि पुत्रस्यनिधनोपिवा ॥ भर्तुर्वाक्यपरायामे रा-
ज्यनाशेनचव्यथा ॥ यस्याःकृतेभवेद्भर्ता दुःखप्रहतचेतनः ॥ नार्याःसुन्दरिपापायास्तस्याःप्रोक्ताशुभागतिः ॥ मज्जतेनरकेघोरे
रूपाख्येजन्मसप्ततिः ॥ विमुखींयोनिमासाद्य तिष्ठतेवत्सरत्रयं ॥ भर्तुरर्थेहियावित्तं विद्यमानंनयच्छति ॥ जीवितंवावरारोहे सा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्ठायांभवेत्कृमिः ॥ कृमियोनिविमुक्तास्तु काष्ठीलाभवतेशुभे ॥ ममकौमारिभावेतु मत्पितुःकाष्ठपाटकः ॥ अग्निःप्रज्वलनार्थाय जातुकाष्ठांन्यपातयत ॥ सखीभिःसहितातत्र रममाणाशुभानने ॥ गतोहंतत्रयत्रास्ते सवनीकाष्ठपाटकः ॥ काष्ठंपाटयतस्तस्य पार्श्वेतुस्थितवत्यहं ॥ तत्रतुसामयादृष्टा काष्ठीलाकाष्ठमध्यतः ॥ नवनीतनिभंदेहं मुखञ्चाञ्जनसंनिभं ॥ कनिष्ठिकांगुलीतुल्या स्थौल्यांमांसत्वचान्विता ॥ तांदृष्ट्वापतितांहन्तुं वेगादूर्ध्वाक्षःसमागतः ॥ यावद्गृह्णातिवक्रेण काष्ठीलांक्षुधितःशुभे ॥ तावन्निवारितोध्वांक्षो मयालोष्टेणतत्क्षणात् ॥ साचतेनपरित्यक्ता वायसेनवरानने ॥ वक्रप्राप्तापिभीतेन वायसेनपलायता ॥ ततःसावेपमानाच चंचुस्पर्शसुदुःखिता ॥ मयाजलेनसंसिक्ता तत्क्षणाच्चेतनान्विता ॥ ततःसावेपमानाच मेवचोवरवर्णिनि ॥ उवाचमांवरारोहे व्यक्तंमधुरयागिरा ॥ काष्ठिलोवाच ॥ सन्ध्यावलियथापूर्वमहमासीन्निशामय ॥ आसीत्कौण्डिल्यइत्येवं ब्राह्मणःसर्वकर्मवित ॥ तस्याहंदुहिताभीरु सुप्रियाचारुलोचने ॥ न्यवसंकान्यकुब्जेतु सर्वैःकामैःप्रपूजिता ॥ जनन्यावन्धुवर्गस्य पितुरिष्टतमाभवत् ॥ ततोहंविप्रपुत्राय प्रदत्तालंकृतातदा ॥ कुलीनायसुरूपाय स्त्रीसंगरहितायच ॥ श्वशुरेणचमेदत्तं मणिमुक्ताफलंबहु ॥ अयुतञ्चसुवर्णञ्च पाणिसंग्रहणेतदा ॥ पितृश्वशुरवित्ताभ्यां परिपूर्णाभवंस्त्वहं ॥ गोमहिष्यादिसंयुक्ता धनरत्नसमन्विता ॥ इष्टादत्तात्वहन्देवि सुशीलस्यजनस्यच ॥ कालेनपञ्चतांप्राप्तः श्वशुरोवेदतत्त्ववित ॥ तंमृतंतुपतिर्दृष्ट्वा श्वश्रूसामेपतिव्रता ॥ विवेशाग्नौतदादीप्ते भर्त्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहशुभव्रता ॥ भर्तामेसजलंदत्वा पित्रोःश्राद्धमथाकरोत् ॥ गतेमासद्वयेदेवि भर्तामेराजमन्दिरं ॥ थयौनिमित्तेकस्मिंश्चित् पि-
॥ ४५ ॥ तृहीनोनिराश्रयः ॥ तत्रवेश्याःसुवर्णाढ्या यौवनिन्यःशुभानना ॥ प्रविशन्त्योनृपगृहं दृष्टस्तेनद्विजन्मना ॥ तासांमध्येसुरू-
पैका सुन्दरीसुस्तनीशुभा ॥ आनीतास्वगृहेतेन रत्यर्थमसितेक्षणा ॥ तयासदैवबुभुजे विषयान्विषयप्रियः ॥ तेनैवकर्मणासार्द्धं
वित्तंनीतंक्षयंशुभं ॥ वर्षत्रयेगतेवित्तं हारितञ्चदुरोदरे ॥ ततोमांप्रार्थयामास देहिमेभूषणंस्वकं ॥ दुरोदरेमयावित्तं हारितंचारुहा-
सिनि ॥ तन्मयातस्यवित्तंन दत्तंस्वस्वामिनेतदा ॥ सर्ववस्तुमयादाय यातांहंपितृमन्दिरं ॥ ततोभर्तागृहंकुड्यं सप्तकक्षकमद्भुतं ॥
विक्रीयतच्चवेश्याया दत्तंकिंचिद्दुरोदरे ॥ क्षेत्रंधान्यादिसहितं सभाण्डंसपरिच्छदं ॥ स्वल्पमूल्येनदत्त्वातु गतोनदनदीपतिं ॥ आ-
रुह्यनावंतरसा प्रविष्टोलवणोदधिं ॥ सगतोदूरमध्वानं पश्यमानोऽद्भुतानिच ॥ समुद्रजातानिशुभे जीवचेष्टानितानिच ॥ प्रभञ्ज-
नवशात्तौतु तन्मार्गेणगताभृशं ॥ सदासप्तशतानीह योजनानांगताहिसा ॥ तत्राम्येपञ्चतांयाताः क्षुत्पिपासार्दितानराः ॥ वि-
मुच्यवित्तंभाण्डानि निषादैःसहभाविनि ॥ तत्रैकोदैवयोगान्मे नमृतोहिपतिःशुभे ॥ वायुनानीयमानोसौ प्राक्कर्मवशगेनहि ॥
आससादचलंदेवि बहुशृंगविभूषितं ॥ बहुनिस्सरणोपेतं बहुधातुविभूषितं ॥ बहुवृक्षसमाकीर्णं बहुपुष्पफलान्वितं ॥ उल्लिखन्तं
हिशिखरैर्मध्यमंयद्धरेःपदं ॥ तंदृष्ट्वापर्वतंदिव्यं त्यक्त्वानावंसमेपतिः ॥ आरुरोहगिरिंश्रेष्ठं क्षुधार्तःशुभलोचने ॥ विश्रम्यचमुहूर्त्तंतु ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षुधापरिगतस्तदा ॥ उदतिष्ठतभक्षार्थं भूधरंतंव्यलोकयत् ॥ तत्राऽपश्यत्समृद्धीकां सपंकागोस्तनीमिव ॥ श्रवमाणारसंदिव्यं जरारोगविनाशनं ॥ अभक्षयत्तदाद्राक्षां षड्विंशद्दिनसंख्यया ॥ सोपीतशीतलंतोयं सुरसंनिर्मलंशुचि ॥ तत्पीत्वानिपुनच्छायां सोपश्यच्छाखिनांपरं ॥ शालंनीलघनप्रख्यं पञ्चाशत्पुरुषोच्छ्रयं ॥ तस्याधस्तात्सुसुष्वाप उत्तरीयंप्रसार्यहि ॥ मेदिन्यांहेगगर्भाभो निद्राघूर्णितलोचनः ॥ तावत्सुप्तःसुखेनासौ यावत्सूर्यास्तमोगतः ॥ सूर्यास्तमनसंप्राप्ते उन्मीलतिनिशामुखे ॥ तत्रागाद्राक्षसोघोरो गर्जमानोघनोयथा ॥ अंकेनादायतन्वंगीं सीतामिवदशाननः ॥ सुप्तांकाशीपतेःपुत्रीं नाम्नारत्नावलीशुभा ॥ शुभंगेविपरीतन्तु शयनेवैशिरःकृतं ॥ पतिकामकुमारीसा नाविन्दत्सदृशंपतिं ॥ सर्वयोषिद्वरावाला रुदतीनिद्रयाहृता ॥ तस्याःकृतेतदादेवी चिन्ताकृष्टाह्यहर्निशं ॥ दीपच्छायासमाश्रित्य शयनात्सातदाकिल ॥ अटमानेनपापेन दृष्टासारक्षसाशुभा ॥ बज्रवैडूर्यखचिते धारयन्तीचकंकणे ॥ उभाभ्यांदशरत्नानि निष्केथदशसप्तच ॥ सीमन्तेसप्तरत्नानि केयूरेष्टौचसप्तच ॥ एवंरत्नान्वितांबालां शतह्रदसमप्रभां ॥ जहारराजभवनात तांतदाचारुहासिनीं ॥ वायुमार्गसमाश्रित्य क्षणात्प्राप्तःस्वमालयं ॥ तत्पर्वतेशयानस्तु पर्तिमेशालमाश्रितः ॥ तत्रतस्यगुहारम्या सर्वैस्वर्यसमन्विता ॥ पश्यमानःपतिंरक्षः प्रविवेशगुहांशुभां ॥ अनेकैर्गयविन्यासैः संयुक्तांचित्रमन्दिरं ॥ बहुद्रव्यसमोपेतं सज्जनासनसंभृतं ॥ भोजनपानपात्रैस्तु भक्ष्यभोज्यैरनेकधा ॥ चित्रितंबहुरत्नैश्च बहुवृक्षस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्वितं ॥ तस्यमध्येनदीपुण्या पद्मोत्पलविभूषिता ॥ हंसकारण्डवाकीर्णा चक्रवाकोपशोभिता ॥ वनानिचसुरम्याणि तत्रवैरा-
क्षसीशुभे ॥ आसीनातस्यदुष्टस्य भार्यापरमसंपदा ॥ एवंमनोरमांतान्तु समासाद्यसराक्षसः ॥ सप्रविश्यमुमोचाथ शय्यायांवरलो-
चना ॥ रुदतीभयसंयुक्ता पीनश्रोणिपयोधरा ॥ सातुतद्रुदितंश्रुत्वा आजगामत्वरान्विता ॥ तांदृष्ट्वाहेमगर्भाभां सुरूपांगजगा-
मिनीं ॥ पप्रच्छसाहिभर्तारं किमर्थमिहमाहृता ॥ जीवत्यांमयिदुष्प्राज्ञ प्रियमन्यांसमीहसे ॥ नहिभार्यातवेदानीं सपत्नींमत्वया-
कृता ॥ एवंब्रुवाणांतांसुभ्रू तदाकोपसमन्वितां ॥ उवाचराक्षसस्तत्र तांप्रियांचारुलोचने ॥ भक्षार्थमाहृतेयन्ते प्रसादंकुरुमेशुभे ॥
मयापिदेवैरुद्दिष्टो भक्ष्योद्वारिस्थितोद्विजः ॥ सालवृक्षसमाश्रित्य पश्यत्वमसितेक्षणे ॥ तमानयस्त्वयंगत्वा येनाहंभक्षयेशुभे ॥ रा-
क्षसस्यवचःश्रुत्वा साकुमारीतदाब्रवीत् ॥ मिथ्याराक्षसिभर्तांते वाक्यमीरितवानिदं ॥ गृहात्पितुःसमानीता भार्यार्थेपतिनातव ॥
जरयात्वांपातिज्ञात्वा विरूपामक्षमांरतेः ॥ विक्रम्यरुदतीरात्रौ स्त्वर्थमहमाहृता ॥ तस्याःतद्वचनंश्रुत्वा राक्षसीक्रोधसंयुता ॥ हृ-
दयेनावधार्यार्थं तस्यारूपंविलोक्यच ॥ चिन्तयामासतन्वंगी राक्षसीसासुदुःखिता ॥ अवश्यंमूर्ध्निमेकीलं विधास्यतिहिराक्षसः ॥
एवंगतोमयातस्य कर्तव्यंवैरयातनं ॥ मास्मसीमन्तिनीकाचित् भवेद्भुवनत्रये ॥ याहिसापत्नकीलेन ताड्यमानेषुजीवति ॥
सर्वेषामेवदुःखानामेतद्दुःखमहत्तरं ॥ समतानद्धिभार्यस्य कदाचिदिहवर्त्तते ॥ तस्येष्टासुखिनीज्ञेया अनिष्टापरिभूयते ॥ एवंसा- ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहुशश्चिन्त्य भर्तारंवाक्यमब्रवीत् ॥ भक्षार्थंचेदिहानीता मगकान्ततत्रयाधुना ॥ आनयिष्याम्यहंविप्रं हत्वाब्राह्मणमागतं ॥ शालवृक्षेशयानंतु प्रयाणन्तुसुलक्षणं ॥ रूपंमनोहरंकृत्वा तदाषोडशवार्षिकं ॥ अब्रवीत्तत्प्रहृष्टासा वाक्यंरक्षःसुलोचना ॥ ततःसराक्षसःप्राह गच्छगच्छेतिभाविनि ॥ शृंकणीस्फुरितात्यर्थं तस्यभक्षणकाम्यया ॥ सानिर्गत्यगुहायांस्तु अपश्यद्द्विजसत्तमं ॥ भर्तारंमेवरारोहा स्त्रपतिंकर्तुमागता ॥ तांदृष्ट्वाराक्षसींदेवी भर्तामेभवदाकुलः ॥ अब्रवीत्प्रश्रयोपेता भर्तारंतत्रसंस्थितं ॥ राक्षस्युवाच ॥ कस्माद्देशात्समायातः किमर्थमिहतिष्ठसि ॥ पृच्छामित्वांमकामाहं राक्षसीकृच्छयातुरा ॥ निराकृतासुभर्त्राहं त्वांपतिंकर्तुमागता ॥ तच्छुत्वावचनन्देवि भर्तामेभयसंयुतः ॥ रक्षोमानुषसंयोगः कथंराक्षसिसंभवेत् ॥ मानुषाहिस्मृताभक्षा राक्षसानांनसंशयः ॥ सापतिंमेपुनःप्राह संमितंमधुराक्षरं ॥ असंभाव्यमपीहात्र संभवेद्द्विजसत्तम ॥ पुराणेश्रूयतेह्येतत् भविष्येभारतेप्रभो ॥ हिडिंबाराक्षसीभार्या भवित्रीखलुमारुतेः ॥ तस्याश्चापिमहावीर्यो भविष्यतिघटोत्कचः ॥ अवध्यःसर्वशत्रूणां शक्त्यामृत्युमवाप्स्यति ॥ याचेयंतिष्ठतेशक्तिर्वासवीशालसंस्थिता ॥ पुरन्दरात्समानीता मद्भर्त्रादस्युकर्मणा ॥ शक्रेगतेमर्त्यलोकं वैरोचनजिघांसया ॥ सेयमकमहत्त्वातु नगच्छन्तिपुरन्दरं ॥ यस्येयंक्षिप्यतेशक्तिः सोमरोपिविनश्यति ॥ सोयमारुह्यशालाग्रं शक्तिमादायपाणिना ॥ तवदास्यामिभद्रंते भर्तुर्निधनकांक्षया ॥ यदित्वमनयाशक्त्या नहन्तासिनिशाचरं ॥ तदात्वांसतुदुर्मेधा भक्षयिष्यत्यसंशयं ॥ त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वशत्रुरयंक्षुद्रो हनिष्यतिनसंशयः ॥ सपत्नीसमयेनापि कृत्वाबुर्बुद्धिनातदा ॥ ममाद्यदुःखंसुमहत् कृतंतेनदुरात्मना ॥ व्यापा-
॥ ४७ ॥ दितःपुनःसंगमावयोर्हिभविष्यति ॥ यद्यन्यथावदेयंचेत् त्वामहंद्विजसत्तम ॥ जन्मार्जितस्यपुण्यस्य नश्यत्विचभाविनी ॥ या-
गतिर्ब्रह्महत्यायां प्राप्यतेकुत्सितानरैः ॥ गच्छेयंतामहंब्रह्मन् यद्येतदनृतंवदे ॥ मद्यपानेद्विजयत्पापं ब्राह्मणस्यदुरात्मनः ॥ विहितो-
वेदशास्त्रज्ञे तत्पापमहमाप्नुयां ॥ पुराणेयानिपुण्यानि प्रोक्तानिमुनिपुंगवैः ॥ अन्यथामन्यतेयेन तत्पापंममनिश्चितं ॥ गुरुदा-
रप्रसक्तस्य जंतोःपापंयदुच्यते ॥ तेनपापेनलिप्येयं यद्यहंदुष्टमाचरेत् ॥ वंधुन्यासापहरणे मेदिनीहरणेतथा ॥ आत्मनोहत्यया-
याहि विहितामुनिभिर्विभो ॥ गच्छेयंतांगतिंविप्र यद्येतदनृतंवदे ॥ पञ्चम्यांगोचरवरे यत्पापंविहितंस्त्रियां ॥ तरुच्छेदेनवम्यांतु
पर्वणिस्त्रीसमागमे ॥ तेनपापेनालिप्येयं यद्येतदनृतंवदे ॥ यदुच्छिष्टेघृतंदद्यादंगुल्याकर्षयोर्द्विजान् ॥ पुण्येह्निमैथुनंकर्त्ता तत्पा-
पंभवितामम ॥ चरंतीविश्ववायातु द्विकालंभोजनंविभो ॥ पात्रेकांस्यस्यसंज्ञेतु सतांबूलसतल्पगं ॥ वैश्वदेवमकुर्वाणो गृहस्थो-
भोजनंचरेत् ॥ निर्वायभिक्षांभिक्षुभ्यो ह्यसत्तर्प्यपितृनपि ॥ तेनपापेनालिप्येयं यद्येतदनृतंवदे ॥ तैलेनसंक्रमेस्नाति तीर्थंगोभि-
र्व्रजेत्तुयः ॥ पावकेप्युदमानेषु समुद्धृत्यमृदंनरः ॥ करोत्याप्लवनंयस्तु योन्यथावचनंवदेत् ॥ कुशकाशेशिकाभिस्तु क्रियतेचत्र-
चंविना ॥ दंतकाष्ठंकरोत्येवं तस्ययद्विहितंत्वघं ॥ तस्याहंभागिनीब्रह्मन् यदिमिथ्यावदामिते ॥ संन्यस्यगांनिजगृहे अदत्वातु- ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णवारिच ॥ तस्यपर्यद्धिहितंपापं तन्मह्यंभवताध्रुवं ॥ देवार्चामासुरेकाष्ठे उपवेशंकरोतियः ॥ श्राद्धंवाद्विजशार्दूल तत्पापंभविता-
मम ॥ गोहीनांमाहिषींयस्तु गृहेधारयतेद्विजः ॥ तस्यपापेनलिप्येयं यद्येतदनृतंवदे ॥ छिन्नासंवीतवस्त्रेण देवार्चांचकरोतियः ॥
यंवृतोधौतदग्धेन पावकेनविशेषतः ॥ तेनपापेनलिप्येयं यद्येतदनृतंवदे ॥ स्वपचारामजातैस्तु कुसुमैरर्चयेत्सुरान् ॥ तेनपापेन
लिप्येयं यद्येतदनृतंवदे ॥ बध्वविलोकनेपापं परदारविलोकने ॥ सस्पृहंपरदाराणां यत्पापमवलोकने ॥ तेनपापेनलिप्येयं यद्ये-
तदनृतंवदे ॥ सत्कथायांप्रवृत्तायां विघ्नमाचरतांनृणां॥ तत्पापंतुभवेत्सद्यो यदेतदनृतंवदे ॥ विधवाकंचुकोपेता बध्वटीकंचुकंवि-
ना ॥ उभयोःपातकंयच्च तन्मह्यंभविताध्रुवं ॥ हीनयालिंगवेषेण अलिंगीब्राह्मणस्तथा ॥ उभयोपातकंमह्यं यद्येतदनृतंवदे ॥
कूटसाक्षिषुयत्पापं यत्पापंहयविक्रये ॥ स्वजनिर्विक्रयेचैव तत्पापंभवितामम ॥ एवमादीनिपापानि अनुक्तान्यपियानिच ॥ तै-
स्तैःपापैरहंलिप्ये यद्येतदनृतंवदे ॥ एवंसंबोधितंदेवि भर्त्तामेपापयातथा ॥ तथेतिनिश्चयंचक्रे भावितार्थेनमोहितः ॥ निर्द्रव्यो
व्यसनेचैव भर्तामेचारुहासिनि ॥ मद्वाक्यकलुषीचैव राक्षसींवाक्यमब्रवीत् ॥ शीघ्रमानयतांशक्तिं करोमिवचनंतव ॥ दातव्यं
मेत्वयासर्वं राक्षसापसदेहते ॥ द्रव्याशयाप्रविष्टोस्मि सागरंतिमिसंकुलं ॥ सैवमुक्तातदाभर्त्ता तथेत्युक्तावरानने ॥ तत्क्षणाद्राक्ष-
सीगृह्य शक्तिंवृक्षाग्रसंस्थितं ॥ ददौसागृह्यविप्राय विमुंचतिमहार्चिषं ॥ एतस्मिन्नंतरेरक्षस्तदाकामेनमोहितः ॥ भोक्तुकामःकु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मारींतां सामितावाक्यमब्रवीत् ॥ कुमारीसेवनेरक्षो महत्पापंविधीयते ॥ छलेनाहंहृतासुप्ता त्वया हंपितृमन्दिरात् ॥ नदोषोभवतो
ह्यस्ति ममभाग्यमिहेदृशं ॥ गुहामध्यगतीरक्षः कोमेत्राताभवेदिह ॥ पूर्वंदत्तोभवेद्भर्ता पूर्वंदत्ताप्रियाभवेत् ॥ पूर्वंदत्ताभवेद्दिव्या-
द्विजस्थानंक्रियागृहं ॥ शय्यायाश्चतथादानं वृथाभवतिनिर्ऋतः ॥ प्रतिकूलेविधौपुंसामाहवैनारदोमुनिः ॥ विधिनानीमयानस्तु
जनःसर्वत्रगच्छति ॥ वृथाचेष्टाहिरक्षेन्द्र बन्ध्यायामैथुनंयथा ॥ अवश्यंभविताभर्त्ता त्वमेवरजनीचर ॥ विधानविहितेमार्गे किं-
करिष्यंतिपण्डिताः ॥ तस्माद्दानपवित्रात्वं शालवृक्षाश्रितास्त्विह ॥ अयमग्निर्ज्वलन्नेतद्धर्मान्विप्रंसमानय ॥ दिनादर्भैर्विनातो-
यैर्विनावैपावकेनच ॥ ब्राह्मणस्यतुवाक्येन विवाहसफलोभवेत् ॥ नहतोयदिविप्रासौ भार्य्यायातवराक्षस ॥ निर्वृत्तेहोमकरणे तं
रक्षययथासुखं ॥ एवमुक्तेतुवचने निर्ज्जगामसराक्षसः ॥ सत्वरोत्हृदयाविष्टो निर्ज्जगामगुहामुखात् ॥ चिन्तयामाससतदा नहि
सत्यद्यमेप्रिया ॥ तंब्राह्मणंमहाभागं ततोमेवांछितंभवेत् ॥ एवंविलोक्यसहसा निर्ययौसमहाबलः ॥ तस्यनिर्गच्छतोदेवि स्वकं
जातंक्षतंकिल ॥ सव्यंचप्रास्फुरंनेत्रं स्ववर्णस्खलितंतदा ॥ अनादृत्यतुतंसर्वं निर्ज्जगामत्वरान्वितः ॥ शालवृक्षसमीपस्थामपस्य-
न्तनुमध्यमां ॥ बिभ्रतींमानुषंरूपं तांभार्य्यांसुमनोहरां ॥ घटयन्तींचसामर्थ्यं भर्तृभार्य्यानुगंतथा ॥ परित्यजेयंतंपापं राक्षसंक्रूरका-
रिणं ॥ मानुषीप्रमदाशक्तं मच्छरीगविदूषकं ॥ तच्छ्रुत्वादारुणंवाक्यं भार्य्ययासमुदाहृतं ॥ कोपामर्षविवृत्ताक्षस्तामधावतराक्षसः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसार्यवक्रंसमुदीर्यबाहुं हन्तुंतथातांसुमहाबलोसौ ॥ समभ्यधावत्पवनोयथैव समुच्चरद्वाक्यमनर्थयुक्तं ॥ १४० ॥ इतिश्री लघु-
नारदीय पुराणे रुक्मांगदचरिते काष्ठीलोपाख्यानमेकोनत्रिंशोध्यायः ॥ २९ ॥ ७ ७ ७ ७ ७ ७
काष्ठीलोवाच ॥ राक्षसंधावमानन्तु कालान्तकयमोपमं ॥ राक्षसीप्राहभर्तारं साश्रुधाभयकंपिता ॥ क्षिपस्वह्यनलप्रख्यां शक्ति-
वासववल्लभां ॥ येनायंपञ्चतांयाति दिगंवररिपुःप्रिय ॥ तस्यावाक्यात्पतिर्मह्यं पौरुषेस्वेऽव्यवस्थितः ॥ विमोचविपुलांशक्तिं रक्षो-
वक्षःस्थलंप्रति ॥ ज्वलन्तीज्वलनप्रख्या द्योतयन्तींदिशोदश ॥ शक्त्यानिहत्यभर्तारं द्विजहस्तप्रमुक्तया ॥ कृतकृत्यमिवात्मानं
मेनेसारजनीचरी ॥ अथोवाचद्विजवरं भर्तारंहृष्टयागिरा ॥ एहिकान्तगृहांरम्यां प्रविशस्वयदृच्छया ॥ भुंक्ष्वभोगान्मयासार्द्धं
येदेवायेचमानुषाः ॥ तथेतिकुर्वन्पुरुषः प्राहहृष्टवपुस्तदा ॥ गृहीत्वासाकरेकान्तं प्रविष्टाथगुहांशुभां ॥ अनवेक्षैवतद्भस्म भर्तृ-
देहसमुद्भवं ॥ कुचाभ्यांसापतिंदेवि सोन्नताभ्यामपीडयत् ॥ दर्शयामासतांतन्वीं कुमारींशयनेस्थितां ॥ इमांपश्याशितापांगीं
विंवोष्ठींकाञ्चनप्रभां ॥ विवाहार्थंसमानीतां वाराणस्याःद्विजोत्तम ॥ यस्याःसीमांनलंघंति सर्वपापान्यदोषतः ॥ दूषरंयत्परंबा-
हुः पुण्यपापक्षयंकरं ॥ यद्गृहंत्रिपुरारेस्तु पञ्चगव्यूतिसंख्यया ॥ शिवस्यविष्णोर्धातुश्च भास्करस्यतथैवच ॥ तस्मिन्मृताःपुन-
र्मातुर्जठरंनव्रजन्तिवै ॥ अप्रकाशंचमुनयो हर्म्यमार्गंहरस्ययत ॥ अक्षीणकर्मबन्धास्तु यस्यांसिध्यन्तिमानवाः ॥ तत्रस्थेयंवरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोहा सुभगाचारुहासिनी ॥ कामिनीरक्षसातेन इहानीताद्विजोत्तम ॥ एनांत्वमद्यस्वगृहं पित्र्यंनयसुलोचन ॥ इमानितवरत्ना-
नि शयनान्यासनानिच ॥ तथाचाहंतवाधीना कुरुनाथयदिच्छसि ॥ त्वदर्थंराक्षसोघोरो मयाब्रह्मन्निसूदितः ॥ कुमारिकाकृते-
भर्त्ता योमयाब्राह्मणर्षभ ॥ समयानिहतोविप्र दृष्ट्वारूपंतवोत्तमं ॥ तस्मान्ममोपरिविभो कुरुविश्वासमात्मना ॥ भजत्वंमांविशाला-
क्ष भक्षादीनांनसंशयः ॥ श्रुत्वैतद्वचनंभीरु भर्त्तामेचारुलोचने ॥ राक्षस्याःसान्त्वसंयुक्तं कुमारीसन्निधौतदा ॥ उवाचराक्षसींत-
त्र साशंकंसतदावचः ॥ नीतिशास्त्रेषुसुभगे अविश्वासास्तुयोषितः ॥ स्वकंत्वयापतिंहिंसि साकथंमांनहिंससि ॥ मत्तोरूपाधि-
कंदृष्ट्वा मांचाप्येवंनिपातयेत ॥ सोहंसर्वान्महाभीरु विश्वस्तस्तेनसंशयः ॥ यदिष्टंतवसुश्रोणि तंकुरुष्वममाद्यवै ॥ अथवाश्वःप-
रश्वोवा भक्षयस्वनिसाचरि ॥ तवाधीनोस्मिसुभगे कुरुयत्तवरोचते ॥ एतदेवमयाकार्यं न्यायंचोपकृतेत्वया ॥ आत्मानंसर्वथा-
देयं नान्यथाहिकृतंभवेत ॥ मदर्थेनिहतोभर्त्ता त्वयानिःशंकयायतः ॥ ततोहंनान्तरंदद्मि तवभीरुशुभानने ॥ राक्षस्युवाच ॥ वि-
श्वस्तहननेब्रह्मन् ब्रह्महत्यागतिर्भवेत ॥ यद्यप्येवंराक्षसींमां क्रूरांपतिविघातिनीं ॥ मन्यसेनहितत्कर्म विश्वस्तंकाचघातयेत ॥ द-
ग्धाहंपतिनाविप्र इमामाहरतापुरा ॥ भार्यार्थंपापिनाब्रह्मन् तेनव्यापादितामया ॥ विश्वस्तोसियतस्त्वंहि ममसर्वेणचेतसा ॥ ॥ ४९ ॥
ततस्त्वंगोपयिष्येहं सर्वभावेनकामुक ॥ एषतेसमयःसत्यं पञ्चभूतोपसाक्षिकः ॥ हृत्पद्मपुरुषस्येह सन्निधौव्याहृतंमया ॥ नकुरु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्वद्विजश्रेष्ठ अन्यदासविदंकचित् ॥ स्थैर्यकार्यंहिमद्वाक्ये सर्वकृत्येषुमानद ॥ तच्छ्रुत्वावचनंदेवी राक्षसीपरिभाषितं ॥ प्रति-
वाक्येवचःसर्वं यदुक्तंहितयातदा ॥ ततःसाराक्षसीसर्वं संहृत्यचगुहाधनं ॥ करेणुरूपिणीभूत्वा पृष्ठेकृत्वापतिंमम ॥ तयासहवि-
शालाक्ष्या याहृताशिवमन्दिरात् ॥ काशीशतनयालोके प्रख्यातारत्नग्रन्थिका ॥ सुखयानाहियाभूत्वा उवाहपतिमंजसा ॥ तृती-
येनमुहुर्त्तेन संप्राप्ताशंकरालयं ॥ उवाचतांपुरींप्राप्य भर्त्तारमसितेक्षणा ॥ इयंपापमतांकान्त कुठारीसंप्रकीर्त्तिता ॥ तथेयंभव-
गेहस्य चित्रभानुःप्रकीर्तितः ॥ साभूमिःकाञ्चनस्यैषा कान्तप्राप्तदुर्गोदरं ॥ कर्मबीजोषराज्येषा सर्वेषांसुखदायिनी ॥ आद्यंहिवै-
ष्णवंस्थनं पुराणेपरिपठ्यते ॥ नावैष्णवेभवेन्मुक्तिः सर्वेणाध्युषितेपिच ॥ हत्याविमुक्तोदेवेशो यदासीत्त्रिपुरान्तकः ॥ क्षत्रप्रवि-
ष्टमात्रोपि वैष्णवेपापनाशने ॥ तदाहरेणदेवेशः प्रार्थितोदैत्यसूदनः ॥ सीमायांतिष्ठतोदेव वहिर्हत्यास्थितामम ॥ वस्तुमि-
च्छाम्यहंक्षेत्रे तवचक्रगदाधर ॥ सत्वयामेजगन्नाथ देहिक्षेत्रेसदैवमे ॥ ममनिर्गमनेहत्या पुनरेवप्रवर्त्तते ॥ त्वत्क्षेत्रपावितोह्यद्य
पूजांयास्येजगत्त्रये ॥ तथेतिप्रददौदेवः क्षीरसागरजाप्रियः ॥ ततःप्रभृतिविप्रेन्द्र क्षेत्रंशैवन्निगद्यते ॥ आद्यंहिकेशवक्षेत्रं पुराण-
कवयोविदुः ॥ तत्रधर्मादयोदेवाः पश्यन्तेतांविहायसा ॥ सूर्यायुतसमप्रख्यां दिगंबरनिषेवितां ॥ विघ्नानिशूलिनाकान्त हृता-
न्यन्यानिषेवने ॥ यैर्विघ्नैरावृतामर्त्या यान्तिवैमन्दिरंस्वकं ॥ बहुपुण्यभृतःसन्ति वसन्त्यस्यांद्विजोत्तम ॥ तत्राशितैर्नरैःकान्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्थितिःकार्यापुरोत्तमे ॥ नात्रस्नानंप्रशंसन्ति नमौनंनसुरार्चनं ॥ नापिमानंद्विजश्रेष्ठ प्राणत्यागमृतेविभो ॥ मृत्युंप्राप्यतुकाश्यांवै
कृतकृत्योभवेन्नरः ॥ अविधेयेतुमनसि उपायोकोषमुक्तये ॥ सेयंपुरीमयाप्राप्ता वहुप्राकारतोरणा ॥ भोगिनामपिमोक्षाय किंपुन-
र्व्रतचारिणां ॥ सेयंपुरीपापहरा नाम्नावाराणसीविभो ॥ रत्नावल्याःपिताविप्र काशिराजःप्रतापवान् ॥ अधिपोत्रमहाबाहुर्धर्मज्ञः
प्रियदर्शनः ॥ समर्पयेमांत्वंवालां काशीशस्यमहात्मनः ॥ विपोथिताहियापूर्वं तेनदुष्टेनरक्षशा ॥ आत्मनःसुरतार्थाय कुमारीनि-
द्रयाहृता ॥ एषप्रभावोभिहितः शिवक्षेत्रस्यसत्तम ॥ नवधूतीहकर्माणि योवसेदत्रमानवः ॥ शुभाशुभप्रभूतानि ज्ञानतोज्ञानतो
पिवा ॥ एषापुरीकर्मविनाशनाय कृष्णेनसर्वेणविनिर्मिताभूत् ॥ यस्यांमृतावन्धुवहिःकृतावा नतेपुनर्यान्तिभवंसपापा ॥ ५७ ॥
इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते काष्ठीलोपाख्याने काशीमाहात्म्यंनाम त्रिंशोध्यायः ॥ ३० ॥ छ छ छ
काष्ठीलोवाच ॥ भर्त्तामेतद्वचःश्रूत्वा राक्षस्याधर्मसंहितं ॥ अवतीर्यतयासार्द्धं रत्नावल्याशुभानने ॥ अवतीर्णेचमेकान्ते वभूव
प्रमदावधूः ॥ क्षपाचरीसुरूपातु पीनोन्नतपयोधरा ॥ साकुमारीपुनर्दृष्ट्वा स्वपितुस्तत्पुरंशुभं ॥ वभूवानन्दितातत्र रात्रौप्राप्ताशु-
भान्विता ॥ अथाजग्मूनिशीथेतु रक्षपालामहावलाः ॥ प्रस्खलंतोथधावंतो वन्धतश्चतथापरे ॥ कोलाहलंप्रकुर्वंतो भर्त्तारंप्रतिमे
नघे ॥ तांदृष्ट्वासहसाप्राप्ता कुमारीसाशुभानना ॥ काशिराजस्यदुहिता संप्राप्तामत्तगामिनि ॥ रात्रीचरानुवाचेदं अहंनृपसुते-

CC-0. In Public Domain. Digitization by eGangotri

तिच ॥ निचयैस्तंवृतंशूरैर्दृष्ट्वासुमुख्यमुवाचसा ॥ ब्रूहितंसत्वरंगत्वा पितरंमेजनाधिपं ॥ रत्नावलीतवसुता याहृतांतत्पुरात्पुरा ॥ रक्षसादुष्टभावेन संप्राप्तासाद्विजान्नृप ॥ अदूषिताजीवमाना समाश्वासिहिमाशुच ॥ संमुखंयाहितस्यास्त्वं मानसंवर्द्धनंकुरु ॥ ब्राह्मणस्यमहाभाग अर्घपात्रपुरस्कृतः ॥ देवानतकृतौमूर्द्ध्नि चरणौशत्रुभिर्नृप ॥ नावलीद्वंहविर्ध्वांक्षे शाशनेनगतास्रजः ॥ स्वाभिन्निपीतंनृपतेः पञ्चगव्यंतवेप्सितं ॥ अविप्लुतांहिसंप्राप्ता गंगांभइवानिर्मलां ॥ तवप्रसादाद्राजेन्द्र जनन्याःशुद्धिकारिणी ॥ तत्क्षणात्सवचःश्रूत्वा रक्षपालस्त्वरान्वितः ॥ सुबाहुरितिविख्यातः प्रविवेशनृपक्षयं ॥ सर्वतःश्रावयामास बाक्यंवाक्यविशारदः ॥ तदद्भुततमंश्रूत्वा निशापालस्यभाषितं ॥ सामात्यसकलत्रश्च सपुरोधाययोनृपः ॥ सतुगत्वापुरद्वारं गंगातीरेव्यवस्थितां ॥ अपश्यत्सद्दुहितरं द्विजवर्यसमीपतः ॥ सहजेनैववेषेण भूषितांभूषणप्रियां ॥ अम्लानकुसुमितान्देवीं तप्तकाञ्चनसुप्रभां ॥ रोरूयमानापितरं साचैवपरिषस्वजे ॥ चिरंरुदित्वापितरं ववन्देचरणौपितुः ॥ शिरसाचारुसर्वांगी द्विरेफसदृशेनहि ॥ कामायुधनिगूढेन मृदुनाकनकप्रभे ॥ सानमस्कृत्यपितरं इदंवचनमब्रवीत् ॥ सुप्ताहंमन्दिरेतात सखीभिःपरिवारिता ॥ कृत्वाप्रान्तेशिरस्तात अधौतचरणातथा ॥ गच्छवंतीनृपंयोगं निजार्थेरक्षसाहृता ॥ नीताश्वमालम्बंतेन स्वक्षमाधरमध्यगं ॥ मामुद्वहतुमिच्छावै चक्रेहृदयपीडितः ॥ नहिमांप्राप्तवान्राजन्शूद्रावेदश्रुतीमिव ॥ तस्याभार्यात्वियंसुश्रूर्यातिष्ठतितवाग्रतः ॥ बिभ्रुतीमानुषंरूपं राक्षसीरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षसाप्रिया ॥ अनयाबुद्धियोगेन घातितोसौमहाबलः ॥ शक्त्याकुलिशहस्तस्य रौद्रयानृपपुंगव ॥ तत्रैवब्राह्मणःपूर्वं समायातो भवन्किल ॥ शालवृक्षसमाश्रित्य स्वपन्तस्थौमहामतिः ॥ इयंचनिकृतातेन दुष्टभावेनरक्षसा ॥ सापत्न्यकौतुनिर्विण्णा प्रेषिता- तेनचांतिकं ॥ ब्राह्मणानयनेभूप ततोपश्यतवैद्विजं ॥ रूपयौवनसंपन्नमभवद्धृक्षयान्विता ॥ पतिमेनंद्विजंकृत्वा स्वपतिंचनि- हत्यवै ॥ भूत्वाकरेणूराजेन्द्र कृत्वामांपृष्ठतःशुभा ॥ सरत्नासद्विजाप्राप्ता तवभूपालवैपुरीं ॥ अनयारक्षितातस्माद्राक्षस्याराक्षसा- धमात् ॥ ताभिमांपूजयस्वेह सत्कारेणमहीपते ॥ ब्राह्मणंचमहाभागं सत्कुरुस्वममाज्ञया ॥ अस्यामतेनमान्देहि विप्रायास्मैम- हामते ॥ एषमेसम्मतोभर्त्ता भविष्यतिनसंशयः ॥ तथाचश्रूयतेलोके पुराणेसुमहामते ॥ नान्यस्यविहितंरूप नान्योभोक्तुमि- हार्हसि ॥ यद्यस्यविहितंलोके तस्यचोपनयेत्सदा ॥ साभिलापेतनाचित्तमेतंप्रतिजनाधिप ॥ धर्मतस्तुपतिर्ग्राह्यो भवेद्वैराजस- त्तम ॥ नान्यंकरोमिभर्त्तारं शास्त्रागमनिदर्शनात् ॥ इमांप्रसादयित्वात्वां खद्योलकक्षयकारिणीं ॥ देहिमांनृपतिश्रेष्ठ ब्राह्मणायम- हात्मने ॥ सुरूपोयंगुणाढ्यायमुत्पन्नश्चमहाकुले ॥ तस्माद्विशंकांकुरुमां राजेन्द्रसुमहामते ॥ तद्वाक्यंनृपतिःश्रुत्वा दुहितुर्द्धर्मवि- त्तदा ॥ राक्षसीपूजयामास अक्षयावनतस्तदा ॥ एषासुतामेसुभगा त्वामेवशरणंगता ॥ यदर्थेनिहतःशत्रु स्त्वयापूर्वतरःकिल ॥ कामबाणार्त्तयाभीरु कृतमेतद्विगर्हितम् ॥ सेयमिच्छतिभर्त्तारं योयंविप्रस्त्वयाततः ॥ शरणंतेप्रपन्नास्मि त्राहिमांत्वांवरानने ॥ म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याप्रणाममावाभ्यां सत्कृतासिनिशाचरि ॥ अनुवेदयभर्त्तारं भूसुरंशुभरूपिणं ॥ त्वद्वाक्याद्भवतिप्रेख्या सुतामेब्राह्मणस्यहि ॥
सापत्न्यभावंत्यक्त्वात्वं मत्सुतांपरिपालय ॥ ममचैवसुतायाश्च देशस्यस्वजनस्यच ॥ ईश्वरीत्वंमहाभागे कुरुवाक्यंममानघे ॥ त-
ववाक्येस्थिताह्येषा स्थास्यतेतनयामम ॥ एतच्छ्रुत्वातुवचनं काशीशस्यनिशाचरी ॥ अनुजज्ञेतदाविप्रं नृपंसद्भावसंयुतं ॥ य-
स्मात्वंप्रणतोराजन् सद्भावेनगतत्रये ॥ तस्मादेषासुताभार्या भवत्वस्यद्विजन्मनः ॥ अहंचभवतापूज्या कृत्वार्चांदेवमन्दिरं ॥ स-
र्वेणनगरेणाहं पूजनीयामहीपते ॥ सर्वदेहेनचतथा गवास्नाप्यातथानघ ॥ सप्ताहमुत्सवंकार्यमष्टम्यादींचतुर्दशीं ॥ नटनर्त्तक-
संयुक्तो गीतवाद्यसमन्वितः ॥ मैरेयमांससहितो वलिपूजासुपस्करः ॥ एवंप्रकुर्वतस्तुभ्यं सर्वक्षेमंभविष्यति ॥ तथेतिनृपतिःप्रा-
ह सुताहेतोर्वरानने ॥ प्रतिपन्नेतुवचने राक्षसीहृष्टमानसा ॥ तदाहब्राह्मणंप्रेम्णा इमामुद्वाहयप्रभो ॥ राजपुत्रींद्विजश्रेष्ठ गृह्योक्तविधिनाशुभां ॥ त्यक्तेर्ष्याहंद्विजश्रेष्ठ स्वसेयंमेवरानने ॥ राक्षस्यावचनेनासौ तांतदानृपकन्यकां ॥ उद्वाहयामासतदा भर्त्रा
मेसमलंकृतां ॥ गार्ह्येणविधिनासुभ्रु वहुवित्तसमन्वितां ॥ उद्वाहयित्वाकन्यांतु नृपेशतनयातदा ॥ आजगामाथविप्रेन्द्रः स्वपुरं
स्वमहोदरं ॥ वेगेनासावूह्यमानो राक्षस्यावायुवेगया ॥ सरत्ननिचयोपेतः क्षणेनवरवर्णिनि ॥ गतेपुरंस्वकंविप्रे काशिराजःप्र-
तापवान् ॥ प्रस्थापयामाससुतां परिवारेणसंयुतां ॥ दासीदासैश्चयानैश्च गोमहिष्यादिभिस्तथा ॥ वसनाभूषणैश्चैव समेतांचा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुहासिनीं ॥ तामागतांनिरीक्षैव सुमुदेब्राह्मणर्षभः ॥ रेमेसचतयापत्न्या राजपुत्र्यासुरूपया ॥ राक्षस्यावयसासार्द्धं सुकृतीनं-
दनेयथा ॥ ततोमयाश्रुतादेवि भर्त्तावैश्रुतिराहृता ॥ धनेशस्याक्षयाद्देवी द्रव्यसंपत्तथैवसा ॥ तमागतमहंश्रुत्वा भार्याद्वयसम-
न्वितं ॥ दुःखेनमहताविष्टा चिन्तयामिसुचेष्टितं ॥ ततोहंबन्धुवर्गेण सखीवर्गेणनिन्दिता ॥ रूक्ष्यैर्वाक्यैःसुबहुशो मर्मच्छेदकरै-
स्तथा ॥ कथंद्रक्षसिभर्त्तारं धनलुब्धेश्रियान्वितं ॥ यत्वयाभर्त्सितःपूर्वंयाचान्वित्तंसुदीनवत ॥ अवज्ञायचयद्दुष्टे परित्यज्यइहा-
गता ॥ चञ्चलानीहवित्तानि पैतृकानीहयोषितां ॥ कांतेनोपार्जितानीह स्थिराण्येवभवंतिहि ॥ कथंयास्यसिदुर्बुद्धे पुनस्तद्भर्तृ
मंदिरं ॥ कथंवदेथाःकठिते वचनात्प्रमदारितं ॥ भविष्यतिकथंकीदृक् तस्यसंभाषणात्तव ॥ अङ्गश्लेषंकथंभीरु करिष्यासिवदस्व-
नः ॥ रुक्षवाक्यकुठारैस्तु घातितस्यमहात्मनः ॥ प्रवेशोहिगृहेतस्य दुष्करंप्रतिभातिनः ॥ नभर्त्रासहसंवास स्तवभीरुकदाचन ॥
भविष्यतिदुराचारे सुखदंचकदाचन ॥ दाक्षिण्याल्लोकवादाच्च यदिहित्वांनयिष्यति ॥ स्नेहेनरहितःकान्तस्तथाप्यसुखसेवते ॥
निस्नेहसंगमोलोके पशुनामिवकिंसुखं ॥ नहीदृशंदुःखतरं यादृशंदूनचित्तयोः ॥ दंपत्याःसंगमंबाले विलम्बकरणंमहत् ॥ एवं
बहुविधावाचः शृण्वतीस्वजनेरिता ॥ अधोमुखीचपूर्णाक्षी पृथिवीमवलोकयन् ॥ चिंतयालंकृतितदा सर्वलोपेननश्यति ॥ नद-
त्तंवलयंत्वेकं येनतुष्टिर्व्रजेत्पतिः ॥ नचापिनूपुरंदत्तं नचापिकटिसूत्रकं ॥ वसुमत्यामयातस्य नदत्तैकावराटिका ॥ धनजीवित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योःस्वामी भर्त्तालोकेषुगीयते ॥ अपह्नवंहितत्कृत्वा कामेवस्थाभविष्यति ॥ कथंयास्यामितद्वेश्म किंवदिष्यामितस्यहि ॥ यो-
मयाहिपुरात्यक्तः शिरोभ्रलोष्टकोयथा ॥ एवंहिचिंतयेयावद्धृदयेनवरानने ॥ संवृतावन्धुवर्गेण तावद्दोलासमागता ॥ छादितार-
क्तवस्त्रैश्चह्युपपन्नासुकोमलैः ॥ पीवरैपुरुषैश्चापि भज्यमानावरानने ॥ वेत्रजर्ज्जरहस्तैश्च बृद्धैःपुंभिःसमावृता ॥ छत्रेणशशिवर्णेन
धृयमाणेनभासुरा ॥ अथागत्यमहाभागे भर्त्रामेप्रेषितस्तदा ॥ तसंप्राप्यतदासर्वे पुरुषावाक्यकोविदाः ॥ ऊचुःसंहृष्टमनसो दि-
ष्ट्यादिष्ट्येतिचासकृत् ॥ सवित्तःसकलत्रश्च भर्त्ताप्राप्तस्तवानघे ॥ गिरिपृष्ठालयात्सुभ्रु धनमानीतवान्बहु ॥ प्रविष्टस्वगृहंभद्रे प्रे-
षितावयमत्राहि ॥ त्वामानेतुंवरारोहे संस्थितापितृवेश्मनि ॥ भोजनंत्वमकृत्वावै भर्त्तारंपश्यभाविनि ॥ त्वामेवस्मरतेनित्यं का-
न्तस्तेचारुहासिनि ॥ तेषांतद्वचनंश्रुत्वा भर्तुश्चापिकृतज्ञतां ॥ व्रीडिताहंतदादेवि भर्तुःसंवीक्ष्यचेष्टितं ॥ नोत्तरंदत्तवत्यस्मि किंचि-
न्मौनसमन्विता ॥ ततोहंवन्धुवर्गेण भूयोभूयःप्रबोधिता ॥ आहूतायातुवैभर्त्रा स्त्रीनयातित्वरान्विता ॥ साध्वांक्षीजायतेपुत्रि
दशजन्मानिपञ्चच ॥ एवमुक्तातुमांसुभ्रु वन्धुवर्गस्त्वरान्वितः ॥ दोलामारोपयमास गम्यतामविलंविताः ॥ ततोहिवन्धुवाक्येन
तांदोलांमन्दगामिनि ॥ आरुह्यगमनंतत्र यत्रातिष्ठतिमेपतिः ॥ अवतीर्यगृहंयावत् प्रविशामिशुचिस्मिते ॥ अपश्यंहिगृहंतस्य
सर्वतःकाञ्चनावृतं ॥ आशनंशयनंभाण्डं यत्किंचिद्वेश्ममध्यतः ॥ तत्सर्वंकाञ्चनीभूतं सूर्यतेजोपबृंहितं ॥ ततःसाराक्षसीदेवि सा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चापिनृपनन्दिनी ॥ प्रणम्यमांस्थितादेवि उभेभक्तिसमन्विते ॥ ततस्ताभ्यामहंप्रेम्णा यथाहमभिपूजिता ॥ स्नानासुभक्तमुदिता भर्त्रास्नेहेनवीक्षिता ॥ ततोऽस्तसमयेभर्त्ता समाहूयेदमब्रवीत ॥ गाढमालिंग्यसस्नेहात पर्यंकेसंन्यवेशयत् ॥ प्रवेश्यमांनतोभीरु भर्त्तामेशुभदर्शनः ॥ विभावरीचर्गंप्राहतांचराजेन्द्रनन्दिनीं ॥ पादसंवाहनंत्वस्याःकर्त्तव्यंसर्वदैवहि ॥ मयेष्टेयंसुचार्वंगीज्येष्ठाभार्या सुशोभना ॥ मुहूर्त्तवचनात्ताभ्यां गृहीतौचरणौमम ॥ ततःप्रेष्यान्समाहूय भर्त्तामेचारुलोचने ॥ अब्रवीत्सतदाहृष्टः सर्वमानीयतां धनं ॥ यत्किञ्चितपृथिवीलब्धं मयाप्राप्तंमहद्धनं ॥ नृपेणापिचयद्दत्तं विवाहेममकिंकराः ॥ आनीयतांचतत्सर्वं शीघ्रमेवमहावलाः ॥ इयंहिस्वामिनीप्राप्ता वित्तस्यममचैवहि ॥ तद्वाक्यात्सत्वरंप्रेष्यैः समानीतंधनंशुभे ॥ तत्सर्वंतेनमेदेवि प्रदत्तंहिसुलोचने ॥ रत्नैर्वस्त्रैश्चमांपूज्य शान्तयित्वापुनःपुनः ॥ उभाभ्यांसतदासुभ्रु समक्षंपरिषस्वजे ॥ तदद्भुततमंदृष्ट्वा सन्मानंचारुहासिनि ॥ वस्त्रालंकारदानंच व्याकुलाहंतदाभवत् ॥ तेनातिमानेनमम गताःप्राणावरानने ॥ भर्त्राचालिंगिताभद्रे मधुरंजल्पतातदा ॥ उल्लापितो वहुविधं हृदयेन्यस्यमच्छिरः ॥ मृताहंचपलापांगि यमस्यसदनंगता ॥ ततोऽहंयमनिर्दिष्टां प्राप्तानरकयातनां ॥ तामतीत्यसुदुःखार्त्ता काष्ठीलात्वंभवाशुभे ॥ यास्याभिपुनरेवाहं तिर्यग्योनिंसहस्रशः ॥ इमामवस्थामद्यापि ययामेनावमन्यते ॥ नारीयाति महाभागे सत्यमेतत्तवोदितं ॥ याभर्तुर्गोपयेद्वित्तं जीवितंवाशुभानने ॥ एवंज्ञात्वाकथंरक्षेत् धनंजीवितमवच ॥ नानाप्रकारगम्भर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कान्सुघोरान् प्रयातिनारीसुभगेसुरूपो ॥ यारक्षतेवित्तमथात्मजीवितं भर्तुर्महापापतरान्नृणांसा ॥ १०७ ॥ इतिश्री लघुनारदीय पुराणे रुक्माङ्गदचरिते काष्ठीलोपाख्याने एकत्रिंशोऽध्यायः ॥ ३१ ॥ ७ ७ ७ ७ ७ ७ ७ ७

सन्ध्यावल्युवाच ॥ जातोमेविस्मयोत्यर्थं काष्ठीलेवचनात्तव ॥ कथंदृष्टामयाभद्रे यास्यसेकुत्सितांगतिम् ॥ कर्मणाकेनमुक्तिस्ते काष्ठीलेवदमाचिरम् ॥ दयामेवर्ततेत्यर्थं त्वांदृष्ट्वादुःखितामिह ॥ मांसपिण्डोपमामद्य नवनीतनिभांतथा ॥ काष्ठीलोवाच ॥ दानंपृथिव्यायदिमे परिकल्पयसेशुभे ॥ तथापिनहिमेशुद्धिर्विनाविष्णोस्तुवासरात् ॥ संप्राप्तेमाघमासेतु तपस्विजनवल्लभे ॥ यस्मिन्क्रोशन्तिपापानि यावद्गच्छतिभास्करे ॥ पुरातिसर्वपापानि त्रिविधानिनसंशयः ॥ ब्रह्महत्यादिकानस्युर्माघस्नानव्रतादिह ॥ दुर्लभोमाघमासस्तु बहुपुण्यप्रदस्तथा ॥ देवैस्तेजःपरिक्षिप्तं माघमासेजलेसदा ॥ अतःपवित्रंतद्वारिह्यशेषाघौघनाशनं ॥ नेदृशी शंकरेमुक्तिर्गतिःप्राप्तासुखावहा ॥ यादृशीमाघमासेच प्राप्यतेनियमस्थितैः ॥ सरिन्निर्झरतोयेषु शस्तंस्नानंसुलोचने ॥ वापीकूप तडागेषु मध्यमंसमुदाहृतं ॥ गृहस्नानंमाघमासे कार्यंश्रेयोर्थिनाशुभे ॥ प्रातस्नानंसुशीतेन शस्तंकल्मषनाशनं ॥ नसौख्याद्भवतेपुण्यं पुण्यंक्लेशात्प्रवर्त्तते ॥ नवह्निसेवयेत्प्रातः श्रेयोर्थीवरवर्णिनि ॥ मोहार्थंमेवयेद्वह्निं नसुखार्थंकदाचन ॥ यावत्प्रभावरारोहे तावत्सूर्योदयःस्मृतः ॥ अभ्रेणाच्छादितःसूर्यः कदाचिन्नहिदृश्यते ॥ नभवेन्नोदितोदेवि एवंप्रातर्विधीयते ॥ सक्तितामप्यभावेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवकुंभस्थितंजलं ॥ वायुनाताडितोरात्रौ गङ्गास्नानसमंविदुः ॥ माघस्नानेवरारोहे दुर्गतिर्नैहविद्यते ॥ माघस्नानंवरारोहे शस्तंवै
निम्नगाजलं ॥ वायुनाताडितंरात्रौ यत्नस्नानाद्विशोधयेत ॥ अग्निप्रवेशादधिकं माघेस्नानंवरानने ॥ स्नातानांक्लेशमात्रंतु मृता-
नामक्षयंसुखं ॥ एतस्मात्कारणात्सुभ्रु माघस्नानंविशिष्यते ॥ अह्न्यहनिदातव्यास्तिलाःशर्करयामह ॥ पावकेचैवहोतव्यास्ति-
लाःसर्पिसमन्विताः ॥ माघावसानेसुभगे यत्रसंभोजयेद्द्विजान् ॥ भोजयेच्चपलापांगि व्रतस्यपरिपूर्त्तये ॥ स्वयंमेप्रीयतांदेवो
विष्णुमूर्त्तिर्निरञ्जनः ॥ दंपत्योर्वाससीशुक्ले सप्तधान्यमथापिवा ॥ त्रिंशच्चमोदकादेया कृतास्तिलमयाःशुभे ॥ भागमेकंशर्करायाः-
स्तिलभागत्रयंतथा ॥ नागरंवेत्रचैलञ्च प्रक्षिपेत्तत्रभाविनि ॥ मरीचिसंमितांकृत्वा ब्राह्मणेभ्यःप्रदापयेत् ॥ अभ्यंगंवर्जयित्वातु
माघंनयतियोनरः ॥ स्नानंकरोतिसुभगे प्रातरेवसमाहितः ॥ तस्यैषाविधिरुद्दिष्टश्चार्घ्यःपापभयापहः ॥ ब्राह्मणप्रार्थनेमंत्रद्वयंदे-
विनिगद्यते ॥ सर्वपापप्रशमनं श्रद्दधानस्यभाविनि ॥ सर्वतःप्रसवस्येह परंधामजलेमम ॥ त्वत्तेजसापरिभ्रष्टं पापंयातुसहस्र-
धा ॥ दिवाकरजगन्नाथ प्रभाकरनमोस्तुते ॥ परिपूर्णंकुरुष्वेदं माघस्नानंममाच्युत ॥ एवंस्नात्वानरोयाति भित्त्वाबिंबंरवेःशुभं ॥
मोक्षमार्गेवरारोहे माघस्नानात्प्रकीर्त्तितः ॥ एवंविधोमाघमासस्तपस्विजनवल्लभः ॥ तस्यपक्षेतुशुक्लेतु भवत्येकादशीयदा ॥
सूर्यर्क्षेक्षणसंयुक्ता महापातकनाशिनी ॥ विनापिऋक्षसंयोगादुपोष्याकृष्णतुष्टिदा ॥ भीमोनाममहावीर्यः कौरवाणांयशस्क-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रः ॥ औदरेणाग्निनाचार्त्त ह्युपवासेह्यथाक्षमः ॥ सचाप्येतांमहापुण्या मुपोष्यतिमहाफलां ॥ ततःप्रभृतिभीमस्य नाम्नाख्याता-
भविष्यति ॥ एषापुण्यामहाभागे प्राणिनांपुण्यवर्द्धिनी ॥ विनिहन्तिमहत्पापं कुनृपोविषयंतथा ॥ कुपुत्रस्तुकुलंयद्वत् कु-
भार्याचपतिंयथा ॥ अधर्मश्चयथाधर्मं कुमंत्रिश्चयथानृपं ॥ कुज्ञानंचयथाज्ञानं शौचंचाशुचितायथा ॥ असद्वादश्चसद्वा-
दं सत्यंचैवानृतंयथा ॥ हिमंयथोष्णसमयेदनर्थश्चार्थसंचयं ॥ यथाप्रकीर्त्तनाद्दानं तपोवैविस्मयाद्यथा ॥ अशिक्षयाय-
थापुत्रो गावोदूरगतोयथा ॥ संहतेनयथाश्राद्धं यथावित्तमबर्द्धनात् ॥ यथासमीहनाज्ज्ञानं फलानांबरवर्णिनि ॥ तथैवपापसं-
घानां प्रोक्तेयंद्वादशीशुभे ॥ ब्रह्महत्यासुरापानं स्तेयंगुर्वङ्गनागमः ॥ युगपत्तुपपन्नाहि हन्यात्तानिचपुष्करं ॥ नचापिनैमिषं-
चैव क्षेत्रंकौरवसंज्ञितं ॥ प्रभाषंनगयादेवि नरेवानसरस्वती ॥ कालिन्दीयमुनाचैव देविकानकथंचन ॥ नचान्यत्तीर्थसंघातो
देवितुल्योहरेर्दिनात् ॥ नदानंनजपोहोमो नचान्यत्सुकृतंक्वचित् ॥ नालंशुभेपावनाय मुक्त्वैकंहरिवासरं ॥ सकृच्चोपोषणेनास्या
नश्यन्तेपापराशयः ॥ एकतःपृथिवीदानमेकतोहरिवासरः ॥ तन्नास्तित्रिषुलोकेषु सुकृतंकिंचनप्रिये ॥ यत्समंद्वादशीपुण्यं पुरा-
णकविभिःस्मृतं ॥ तस्यांबराहवपुषं कृत्वादेवंतुहाटकं ॥ घटोपरिनवेपात्रे कृत्वावैताम्रभाजने ॥ दृढवीजश्छतेदेवि सितवस्त्रावगुण्ठि-
ते ॥ सहिरण्यप्रदीपाद्ये कृतपुष्पवतंसके ॥ बराहायनमःपादौ क्रोडायेतिनमःकटिं ॥ नाभिंगंभीरघोषाय उरःश्रीवत्सधारिणे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाहुसहस्रशिरसे ग्रीवांसर्वेश्वरायच ॥ मुखंसर्वात्मनेपूज्यं ललाटंसुभ्रुवेनमः ॥ केशाःशतमखायेति पूज्यादेवस्यचक्रिणः ॥ विधिनापूजयित्वातु कृत्वाजागरणंतथा ॥ श्रुत्वापुराणंदेवस्य महात्म्यंप्रतिपादकं ॥ प्रातर्विप्रायदत्वातु वैष्णवायकुटुंबिने ॥ तंकुंभंकोलसहितं सनैवेद्यपरिच्छदं ॥ पश्चात्तुपारणंकुर्याज्ज्ञातितृप्त्यासुहृद्वृतः ॥ एवंकृतेवरारोहे नभूयस्तेभवोभवेत् ॥ बहुजन्मार्जितंपापं ज्ञानाज्ञानसमुद्भवं ॥ हन्तिसर्वमशेषेण तमःसूर्योदयेयथा ॥ एवंविधामयादेवि वर्णिताद्वादशीशुभा ॥ त्वयाचापिकृतापूर्वमन्यजन्मनिभाविनि ॥ तस्येयंव्युष्टिरतुला तवदेविमहाफला ॥ त्वयाचापिकृतापूर्वे विजयाःसर्वदाशुभे ॥ तस्यास्तुषोडशंभागंददस्वसुकृतामम ॥ येनश्वतागमिष्यामि तद्धामपरमंहरेः ॥ वित्तापहरजंपापं यद्भर्तुस्तुकृतंमया ॥ तस्यभावेनहेत्वर्थं षोडशांशं प्रयच्छमे ॥ जीवितेनाथवित्तेन भर्तारंमुञ्चयेतुया ॥ कृमियोनिशतंगत्वा पुष्कलीजायतेततः ॥ शरीरंवाथचित्तंवा यानारीवरवर्णिनि ॥ नप्रयच्छतिदुर्मेधा साभवेत्काष्ठकीटका ॥ तत्कर्मणोविशुध्यर्थं देविद्वादशिसंभवं ॥ पुण्यंपुण्यभृतांश्रेष्ठे यद्यस्तिमयितेप्रिया ॥ तस्यास्तद्वचनंश्रुत्वा कृपणायाःपुनःपुनः ॥ कृपामवापसुभगे तामेवाचमिदंतदा ॥ दत्तंमयातेसुकृतं द्वादश्युत्थमनंतकं ॥ कोलरूपीहरिर्यत्र पूजितोमेसुपुण्यदः ॥ यच्चयक्रोडकोशंतु कल्पितंसुकृतंमया ॥ तुरीयांशेनपुण्यस्य भवपूताममाद्यवै ॥ पूर्वजन्मानिरौद्रस्य त्रिवारंवरवर्णिनि ॥ एवमुक्तेतुवचने शतह्रदसमप्रभा ॥ गगनस्थामयादृष्टा गच्छन्तींवैष्णवींपुरीं ॥ पतिर्हि-

॥ ८८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैवतंलोके स्त्रीणांतुगजगामिनि ॥ देहेनचतथावित्तैर्यांइच्छत्युत्तमांगति ॥ सत्यवादिप्रदास्यामि भर्तुरर्थंयथेप्सितं ॥ तवमोहिनि
चार्वंगि नमृषाप्रब्रवीम्यहं ॥ कोन्योहिदेवतालोके स्त्रीणांसम्यगभातिन ॥ तस्यार्थैयात्यजेद्वित्तं जीवितंवावरानने ॥ तस्यपु-
ण्यस्यसंख्यानं नास्तिदेविकदाचन ॥ तस्माद्भर्तुःप्रियंकार्यं प्राणैरपिधनैरपि ॥ उद्धाहितंविप्रसुतंसुनिष्ठुरं ग्रस्तंतदातद्वचनैःसु-
घोरैः ॥ धनार्थिनातेनचयाचितासा लोकार्थिनासागृहमाससाद ॥ हित्वापिदेहंविमलंस्वरूपं यातापिकाष्ठचतथैवकीटा ॥ एत-
न्मयादृष्टमनंगयष्टे पितुर्गृहेविचरंत्यायथेष्टं ॥ ज्ञात्वेतिहासंसुभगेसुकेशि भार्याचभर्तुःप्रियमेवकर्त्ता ॥ तस्मात्त्वांकामयेसुभ्रु भर्तुर-
र्थेप्रसीदमे ॥ व्रतभंगंमाकुरुष्व भर्तुर्मेवरवर्णिनि ॥ धर्मज्ञात्वंकुलीनाथ त्वंभीरुशुभदर्शना ॥ अनार्यायाःस्त्रियोलोके भर्तुःसुखक-
राहिताः ॥ सुवृत्तयाःकुलीनाया वृत्तमेवशुभानने ॥ वरंत्वमन्यंवृणुतेनृपस्य धर्मोपघातायभवेन्नसुभ्रु ॥ एवंकृतेमेवचनंकृतंस्या-
द्भर्तुस्तथाह्लादकरीभवेतत्तु ॥ इत्थंनिशम्याथवचोवभाषे विमोहिनीक्रोधविरक्तदृष्टिः ॥ सन्ध्यावलींतांसविशुद्धभावां निरीक्ष्यमाणां
वचनंसुतस्य ॥ ७५ ॥ इतिश्री नारदीयपुराणे मोहिनीवाक्यनाम द्वात्रिंशोध्यायः ॥ ३२ ॥ समाप्तमिदं काष्ठीलोपाख्यानं ॥
मोहिन्युवाच ॥ यद्येवंत्वंविजानासि धर्माधर्मविचक्षणे ॥ भर्तुरर्थेप्रदेहित्वं धर्मंजीवितमेवच ॥ याचयेयमहंयच्च जीवितादपिदुर्ल-
भं ॥ देहिपुत्रशिरोमह्यं यदिष्टंहृदयाधिकं ॥ यदिशुकेनवैराजा संप्राप्तेहरिवासरे ॥ गृहीत्वासिस्वहस्तेन राजायंरुक्मभूषणः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिरोधर्मांगदस्यैतच्चन्द्रबिंबोपमंशुभं ॥ अजातश्मश्रुकंकान्तं कुण्डलाभ्यांविभूषितं ॥ आच्छिन्नत्त्प्रहृष्टात्मा मुखाश्रुपरिवर्जितं ॥ परिपक्कफलंयद्वद्वृन्तसंगेपातयत्विह ॥ मामकेकृपणापांगि तवभर्त्तामहाबलः ॥ एतद्वैकुयतांसर्वं यद्याह्विनहिमोक्षते ॥ शार्ङ्गिणोहि महाभागे सर्वपापप्रणाशने ॥ तच्छ्रुत्वावचनंतस्या मोहिन्याःकटुकाक्षरं ॥ चकम्पेतत्क्षणाद्देवी प्रवातेकदलीयथा ॥ संध्यावली ततोधैर्यमालम्ब्यवरवर्णिनी ॥ उवाचमोहिनींवाक्यं साश्रुत्वाप्रहसन्निव ॥ श्रूयतेहिपुराणेषु गाथाःशुकसमीरिताः ॥ द्वादशीप्रतिमासेत्रैं स्वर्गमोक्षप्रदाशुभा ॥ त्यजेद्धनंत्यजेद्दारान् जीवितंगृहमेववा ॥ त्यजेद्रूपंत्यजेद्देशं त्यजेन्मित्रंत्यजेद्गुरुं ॥ त्यजेत्तीर्थं त्यजेद्यज्ञं त्यजेद्धर्मक्रियान्वितं ॥ त्यजेत्तपःसुघोरंच त्यजेत्सौख्यंसुविस्तरं ॥ त्यजेद्योगंत्यजेद्दानं त्यजेद्यन्यच्चसुप्रियं ॥ नत्यजेद्द्वादशींपुण्यां पक्षयोरुभयोरपि ॥ पुत्रभ्रातृसुहृद्बन्धु प्रियादारास्तथाधनं ॥ द्वादशीतिपुनर्देवि उभयोःसाधनीस्मृता ॥ द्वादश्यास्तु प्रभावेण क्षेमंसर्वंभविष्यति ॥ करोमितवतुष्ट्यर्थं धर्मांगदविनाशनं ॥ विनष्टेतनयेमह्यं सुखिनीभवसुन्दरि ॥ नव्याबृष्यातिसत्याद्धि काञ्चनाद्गदभूषणः ॥ सत्याच्च्युतोमनुष्यस्तु श्वपाकादधिकःस्मृतः ॥ इत्येवमुक्ताकनकावभासा विमोहिनींपद्मजदेहजातां ॥ संगृह्यभर्तुश्चरणौसुजातौ सन्ध्यावलीचाभिरतावतस्थे ॥ १७ ॥ इतिश्री ल० ना० पु० रु० सन्ध्यावलीवाक्यं त्रयस्त्रिंशोध्यायः ३३

वशिष्ठउवाच ॥ सन्ध्यावलीतथापादौ भर्तुःसंगृह्यभूतले ॥ उवाचवचनंदेवी धर्माङ्गदविनाशनं ॥ अनुशिष्टंबहुविधं मयाभूप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्वेयातथा ॥ नान्यद्रोचयतेसुभ्रुमोहिनीमोहसंयुता ॥ भोजनंवाहरिदिने वधंवातनयस्यहि ॥ कुरुष्वराजन्धर्मज्ञ धर्मांगदवि-
नाशनं ॥ यादृशीतुजनन्यावै रुजाभवतिभूपते ॥ पुत्रस्यजननीतीव्रा तादृशीनभवेत्पितुः ॥ गर्भसंधारणेदुःखं भूपस्नेहोऽधिक-
स्तथा ॥ मातुर्भवतिभूपाल नतथाहिभवेत्पितुः ॥ जीवनिर्वापकःप्रोक्तः पिताराजेन्द्रभूतले ॥ जननीधारणेक्षीणा वर्द्धनेपालने
क्षमा ॥ पितुःशतगुणंप्रोक्तं कुर्यात्साहिसदानृप ॥ स्नेहाधिकांहिसंप्रेक्ष पुराणेकवयःपुरा ॥ जगुरत्यधिकांलोके जननींजनकात्त-
था ॥ नचतादृक्पितास्नेहं पुत्रंप्रतिकरोतिवा ॥ यादृशंजननीलोके कुरुतेरुक्मभूषण ॥ साहंचाद्यगतस्नेहा परलोकजिगीषया ॥
पुत्रस्यनृपशार्दूल सत्यवाक्यानुपालनात् ॥ व्यापादयस्वतनयं त्यक्त्वास्नेहंसदूरतः ॥ मासत्यलंघनाद्राजन् नात्मानंपातयप्रभो ॥
तन्निकर्षेहृषीकेशो भवतीहफलप्रदः ॥ यस्मिन्जीर्णेरुजादेहे नान्योपिनृपजायते ॥ नासौधर्मोमलंघ्यद्दङ्गसंस्थंनसोभते ॥
दाराःप्राणास्वपुत्रंवा सर्वस्वंवामहीपते ॥ योहिदद्यादधर्मार्थं सपुमान्हीयतेनच ॥ श्रूयतेचपुराराजन् शिबिनासुमहात्मना ॥
स्वशरीरंप्रदत्तंवै धर्मार्थश्येनरूपिणे ॥ पुरन्दरायभद्रार्थं नतुत्यक्तोद्विजन्मना ॥ जीमूतवाहनेनापि गरुडायातिरंहसा ॥ स्वशरी-
रंप्रदत्तंवै रक्षताधर्ममुत्तमं ॥ दधीचिनापिदत्तानि स्वान्यस्थीनिमहात्मना ॥ धर्मार्थराजशार्दूल देवानांहितमिच्छता ॥ एवंमहा-
त्मभिःपूर्वं धर्मएवस्वपालितः ॥ पालनाच्चैवधर्मस्य सर्वेस्वर्गपराभवत् ॥ आपवस्थाहिभूपाल धन्याश्चभुवनत्रये ॥ सत्यसंरक्षणा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थाय संभवंतिनृणांसदा ॥ कीर्त्तिसंरक्षणार्थाय कर्त्तव्यंमनुजैःशुभे ॥ कर्मभूपालशास्त्रोक्तं रागद्वेषविवर्जितं ॥ तदलंपरितापेन सत्यंपालयभूपते ॥ सत्यस्यपालनाद्राजन् विष्णुदेहगतिस्तव ॥ देवैरुत्पादितानूनं सानिकार्थायमोहिनी ॥ तवभूपालसापत्न्यं कृतंतन्नहिबुध्यसे ॥ पुत्रव्यापादनेदेवा भविष्यन्तिपराङ्मुखाः ॥ तेषांदत्वासुतंदेव प्राप्यसेवैष्णवंपदं ॥ विष्णोरुद्वहतांभक्तिं देवताःपरिपन्थिनः ॥ भवंत्येवंश्रुतंपूर्वं नचैतत्प्रकटीकृतं ॥ सर्वेतेविबुधाभूप शेखरैःपरिवेष्टिताः ॥ मोक्षमार्गप्रभेत्तारो नव्यवंतिचलोकतः ॥ तत्वंभूपदृढोभूत्वा घातयस्वसुतंप्रियं ॥ धर्मंकुरुष्वभावत्वं सत्यमालोपयप्रभो ॥ लुप्तेस्ववाक्येभविताश्वपाकः समंतथा ब्रह्मवधेनतुल्यं ॥ स्वंसत्यशीलोभविताधरायां यशस्यमेतद्भवितातवेह ॥ २६ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते सन्ध्यावलीवाक्ये चतुस्त्रिंशोध्यायः ॥ ३४ ॥ ७ ७ ७ ७ ७ ७ ७ ७

वशिष्ठउवाच ॥ तत्तस्यावचनंश्रुत्वा राजन्रुक्मांगदस्तदा ॥ सन्ध्यावलीमुवाचेदं मोहिन्याःसन्निधौतदा ॥ पुत्रहत्यामहत्यावा ब्रह्महत्यासमास्मृता ॥ घातयित्वासुतंलोके कागतिर्मेभविष्यति ॥ धर्मज्ञंविनयोपेतं प्रजानांरञ्जकंप्रियं ॥ अप्रजंतमहंहत्वा गंतावैकांगतिंशुभे ॥ क्वगतोमन्दरंशैलं क्वप्राप्तामोहिनीमया ॥ धर्मांगदविनाशाय पश्यदेवविधेर्बलं ॥ कुपुत्रस्यापिनिधनं देविदुःखंभवेत्पितुः ॥ किंपुनर्द्धर्मशीलस्य गुरोर्वचनकारिणः ॥ जम्बूद्वीपमिदंभुक्तं मयाहिगजगामिनि ॥ सप्तद्वीपानिभुक्तानि तन- ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येनतवाधुना ॥ तुष्टेविष्णोवरारोहे पितुरत्याधिकोभवेत् ॥ अतःकमलपत्राक्षि पुराणेकवयोविदुः ॥ सोऽयमत्याधिकःपुत्रो वृषाङ्गद इतिक्षितौ ॥ प्रथितःसमहाबाहुश्चक्रवर्त्तिर्महाबलः ॥ ममवंशप्रकाशार्थं किंपुनर्ममानसं ॥ अहोदुःखमनुप्राप्तं पुत्राविजानितं मया ॥ पुनरेववरारोहे शान्तयिष्यामिमोहिनीं ॥ मधुरैर्वचनैर्देवि दुःखशोकप्रदांमम ॥ एवमुक्त्वातुनृपतिः प्रियांसन्ध्यावलींत-दा ॥ समीपंचततोगत्वा मोहिनीमिदमब्रवीत् ॥ नमोक्षेवासरेविष्णोर्नहानिष्येतवात्मजं ॥ आत्मानंघातयेयंवा यास्येवाप्याश्र-मान्तरं ॥ अन्यद्वादारुणंकर्म करोमितवशाशनं ॥ आग्रहंकुरुमाभीरु भोजनंचसुतंप्रति ॥ किंफलंभवितादेवि हतेधर्मांगदेतव ॥ भोजयित्वादिनेविष्णोः कोलाभस्तवसुन्दरि ॥ दासोऽस्मितवभृत्योऽस्मि वशगोऽस्मिवरानने ॥ अन्यद्ददस्वसुभगे गतोऽहंश रणंतव ॥ रक्तांगुलितलाभ्यांतु कराभ्यांचारुलोचने ॥ करिष्येन्यत्कर्मशुभ्रु प्रसीदममभाविनि ॥ प्रसादंतवकृत्वातु पुत्रभिक्षांप्र-यच्छमे ॥ दुर्लभोगुणवान्पुत्रो दुर्लभोहरिवासरः ॥ दुर्लभंजाह्नवीतोयं दुर्लभाजननीक्षितौ ॥ दुर्लभंहिकुलेजन्म दुर्लभावंशजाप्रि-या ॥ दुर्लभंकाञ्चनंदानं दुर्लभंहरिपूजनं ॥ दुर्लभावैष्णवीदीक्षा दुर्लभःस्मृतिसंग्रहः ॥ दुर्लभःशोकविरहो दुर्लभंह्यात्मचिन्तनं ॥ दुर्लभोजागरोविष्णोर्दुर्लभागुरुसत्क्रिया ॥ दुर्लभापात्रसंप्राप्तिर्दुर्लभंपौष्करंजलं ॥ दुर्लभःशिष्टसंसर्गो दुर्लभाभक्तिरच्युते ॥ दुर्लभं कपिलादानं दुर्लभंनीलमोक्षणं ॥ मघात्रयोदशिश्राद्धं दुर्लभंवरवर्णिनि ॥ दुर्लभंवसुधाचीर्णे व्रतंपातकनाशनं ॥ धेनुस्तिलम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यीसुश्रु दुर्लभापापनाशिनी ॥ धात्रीस्नानंवरारोहे दुर्लभाहरिवासरे ॥ दुर्लभंपर्वसंप्राप्ते स्नानंशीतलवारिणा ॥ विशेषान्माघमासे-
तु प्रत्यूषसमयेशुभे ॥ यद्धितंह्यात्मनःकर्म तद्देविशुविदुर्लभं ॥ दुर्लभंस्यादनसनं दुर्लभंचौषधंनृणां ॥ व्याधिर्विघातकरणे शा-
स्त्रोक्तकरणंविना ॥ दुर्लभंशरणंविष्णोर्मरणेवरवर्णिनि ॥ एवंमत्वावरारोहे नचहन्मिसुतंनिजं ॥ आत्मनस्तुशिरश्छित्वा ददामि
तवसुन्दरि ॥ प्रसादंकुरुमेभीरु कृतंसर्वंमयावले ॥ सेवितोविषयाःसम्यक् कृतंराज्यमकण्टकं ॥ मयामूर्द्ध्निपदंदत्तं रिपुणामब्जलो-
चने ॥ अप्रसूतंसुतंभीरु नाहंहन्मिवरानने ॥ विषयास्वादनेवालं मद्वश्यंशुभदर्शने ॥ स्वहस्तेनैववामोरु किंतुपापतरंपरं ॥ मो-
हिन्युवाच ॥ धर्मांगदोनमेशत्रुर्नाहंहन्मिसुतंतव ॥ आदावेवमयेत्युक्तो भुंक्ष्वत्वंहरिवासरे ॥ वसुधास्वेच्छयाराजन् नप्रसाधीहि
सर्वदा ॥ नाहमेवंब्रवीमित्वां पुत्रव्यापादनंप्रति ॥ भोजनंकुरुराजेन्द्र संप्राप्तेहरिवासरे ॥ ममभूमिपतेकृत्यं नैवपुत्रवधेनते ॥ कृ-
त्यंतुभोजनेनाद्य एकादश्यांमहावल ॥ यदिपुत्रप्रियोराजन् भुंक्ष्वत्वंहरिवासरे ॥ वहुनाकिंप्रलापेन वाक्यैरद्यनिरर्थकैः ॥ सत्यं
संरक्षयस्वेह कुरुस्ववचनंमम ॥ एवंब्रुवाणांतांदृष्ट्वा मोहिनींतनुमध्यमां ॥ धर्मांगदउवाचेदं खड्गंन्यस्याऽग्रतःपितुः ॥ स्वर्णसरुं
सुधारंच निर्मलाकाशसन्निभं ॥ मात्रिलम्बेनराजेन्द्र पापंमूर्द्ध्निह्युपेक्षितं ॥ तन्मातुर्वचनंभूप कुरुष्वस्वर्गसाधनं ॥ आत्मारक्षोध-
नेनेह दारैरपिसुतैरपि ॥ आपद्भ्यश्चापिघोराभ्यः श्रेयस्कामेनभूमिप ॥ त्वदर्थेचमृतस्याद्य गतिस्यादक्षयामम ॥ तवापिनिर्मला-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकाः स्ववाक्यपरिपालनात ॥ परित्यजस्वदैन्यत्वं सुतव्यापादनोद्भवं ॥ देहत्यागेममविभो नवःकायोभविष्यति ॥ शचीश-
यननिर्मुक्तो यथानृपशतक्रतोः ॥ पितुरर्थेहितायेच मातुरर्थेमहीपते ॥ गवार्थेब्राह्मणार्थेच प्रमदार्थेतथैवच ॥ भूम्यर्थेविकलार्थेच
देवतार्थेतथैवच ॥ धर्मार्थेदुःखिनश्चार्थे तेयांलोकासनातनाः ॥ तदलंपरितापेन जहिमांत्वंवरासिना ॥ सत्यंपालयराजेन्द्र माभुंक्ष्वह-
रिवासरे ॥ धर्मार्थेतनयंहन्याद्भार्यावापिमहीपते ॥ श्रूयतेदेववाक्यंतु हन्यात्पुत्रंमखेपिता ॥ सर्वमेधेनृपश्रेष्ठ नदोषोभवितातदा ॥
यद्ब्रूतेत्वांमहीपालजननीमेसुमध्यमा ॥ तत्कार्यमविचारेणधर्मज्ञयंवद्दुश्रुता ॥ प्रसीदममराजेन्द्रकुरुवाक्यंमयेरितं ॥ मुक्तोभवस्वे-
वमसत्यघोराद्धत्वाहिमांभूमिपतेजनन्यै ॥ महद्यशःप्राप्स्यसिसत्यवाक्याद्विष्णोःपदंतत्परमंनरेन्द्र ॥ यशःप्रकाशाद्भविताहिकीर्त्ति
स्तवाक्षयातातनशंशयोऽत्र ॥ ४८ ॥ इतिश्री नारदीयपुराणे रुक्माङ्गदचरिते धर्माङ्गदवाक्यं पञ्चत्रिंशत्तमोध्यायः ॥ ३५ ॥
वशिष्ठउवाच ॥ तत्पुत्रवचनंश्रुत्वा भूपरुक्माङ्गदस्तदा ॥ सन्ध्यावलीमुखंवीक्ष्य प्रहृष्टमिवपंकजं ॥ मोहिन्यावचनंक्रूरं श्रुत्वा-
सनृपसत्तमः ॥ चकारपुत्रनाशाय मतिंमतिमतांबरः ॥ पुनःसंमोहिनीवाक्यं शुश्रावनृपसत्तम ॥ भुंक्ष्वभुंक्ष्वमहीपाल रक्षधर्मा-
गदंसुतं ॥ सन्ध्यावल्युवाच ॥ माभुंक्ष्वनृपशार्दूल जहीमंतनयंमम ॥ सन्ध्यावल्याःवचःश्रुत्वा नृपवर्यसभूपतिः ॥ आन्दोलि-
तमनास्तत्र दुःखशोकसमन्वितः ॥ एतस्मिन्नेवकालेतु भगवान्पुरुषोत्तमः ॥ अन्तर्द्धानगतस्तस्थौ व्योम्निस्थैर्यविलोककः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आरुह्यगरुडंदेवो मेघश्यामोनिरञ्जनः ॥ धर्मांगदस्यधीरस्य तथारुक्मांगदस्यच ॥ सन्ध्यावल्याश्चचरितं वीक्षाञ्चक्रेवियत्क्षयः ॥
भुंक्ष्वभुंक्ष्वेतिवचनं मोहिन्याह्युदितेतदा ॥ जग्राहविमलंखड्गं राजारुक्मांगदस्तदा ॥ सुप्रहृष्टेनमनसा प्रणम्यगरुडध्वजं ॥ तं
दृष्ट्वाखड्गहस्तस्तु पितरंधर्मभूषणः ॥ प्रणम्यमातृपितरौ देवंचक्रगदाधरं ॥ नारायणंजगद्योनिं योगाधारंनिरञ्जनं ॥ गृवांस-
चात्मनोवीर पितुरग्रेह्यनामयत् ॥ कंबुग्रीवोमहाबाहुः सर्वलक्षणसंयुतः ॥ पुनश्चैवमहाबाहुर्ग्रीवास्वांशुभलक्षणः ॥ प्रणम्यपादौस-
पितुः खड्गमार्गेप्रदेशयेत ॥ पितुर्भक्त्याप्रहृष्टात्मा जनन्योत्साहितस्तथा ॥ नियोजितेतत्रसुतेनकण्ठे विकाशितेमातृसुखेमहीप ॥
गृहीतखड्गेत्ववनीशनाथे चचालपृथ्वीसनगासवृक्षा ॥ क्षुब्धाःसमुद्राश्चतथामहीपते ववुश्चवाताःप्रबलाःसुघोराः ॥ निपेतुरुल्काः
शतशोधरायां निवातयुक्तानृपतत्रदारुणाः ॥ विवर्णरूपाहिवभूवमोहिनी नदेवकार्यंहिकृतंमयेति ॥ निरर्थकंजन्ममभाधुनाभवत
कृतंनकार्यंचदिनेशजस्यवै ॥ विमोहनंरूपमिदंविलंवितं नृपेणचानेनसुतंविनिघ्नता ॥ भुंक्तंनवातेनचवासरेहरेरघापहेक्षत्रियपुंग-
वेन ॥ साहंत्वकृत्वादिनकृत्सुतस्य त्रिणैःसमाहंभवितात्रिपिष्टपे ॥ मनोरथोमेवितथंचकृत्वा तस्याधिकोयास्यतिमोक्षमार्गं ॥ स-
त्वाधिकोयास्यतिमोक्षमेष यास्याम्यहंवैनरकंसुघोरं ॥ एवंतदाचिन्तयन्ती मोहिनीनृपनन्दन ॥ ददर्शनृपतिंखड्गमार्जयन्तं
पुनःपुनः ॥ समुद्यतेतदाखड्गे नृपेणनृपपुंगव ॥ मोहिनीमोहसंयुक्ता पपातधरणीतले ॥ राजापितेनखड्गेन शिरश्छेत्तुमियेष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सः ॥ सुतस्यनृपशार्दूल धैर्येणमहतायुतः ॥ सकुण्डलंचारुशशिप्रकाशं भ्राजिष्णुअङ्कंतनयस्यभूपः ॥ विष्णुरुवाच ॥ उक्तंचदेवे-
नगदाभृतातदा गुह्यंममाकर्णयभूपवाक्यं ॥ तुष्टोस्मितुष्टोस्मिनशंशयोत्र गच्छस्वलोकंममभूमिनाथ ॥ प्रियान्वितःशुद्धसुतेन
पूतः कीर्त्तिंविधायात्रधरापतीश ॥ त्रैलोक्यमापूर्यतथागुणौघैः कृत्वापदंमूर्द्ध्रियमस्यचैव ॥ लीनोभवस्वाघममैवदेहे त्वंसर्वथैका-
दशिपालनेन ॥ सचक्रिणोभूमिपतिःकरेण संस्पृष्टगात्रोष्टभुजोवभूव ॥ प्रियासमेतस्तनयेनसार्द्धं विमुच्यपापंसफलंसदेहः ॥
देवस्यदिव्यंसनृपोमहात्मा विवेशदेहंगरुडध्वजस्य ॥ विहायलक्ष्मीमवनीप्रभूतां विहायदारांश्चविहायकोषं ॥ विहायनागांश्च
विहायभूपान् विहायवंधुंश्चजनांस्तथासौ ॥ जगामदेहंमधुसूदनस्य ततोम्बरात्पुष्पचयंपपात ॥ अनाहताढुंढुभयोविनेदुर्ननर्त्तत-
त्राप्सरसांव्रजश्च ॥ चक्रुश्चगीतंमधुरंलयान्वितं गन्धर्वमुख्यानृपकर्मतुष्टाः ॥ तदद्भुतंविक्ष्यरवेस्तनूजो हरेस्तनुंभूमिपतिंप्रविष्टं ॥
सदारपुत्रस्तुलिपिंप्रमार्य उवाचदेवंचतुराननंरुदन् ॥ यमउवाच ॥ नाहंनियोगीभवितातवेश दिशस्वकृत्यंममयत्करोमि ॥ ना-
हंपुनस्त्वीदृशकार्यकर्त्ता येनेहमेस्यादतिदुःखतापः ॥ ३० ॥ इतिश्री ना० रु० रुक्मांगदसिद्धिर्नाम षट्त्रिंशोध्याय ॥ ३६ ॥
यमउवाच ॥ विबुधेशजगन्नाथ चराचरगुरोप्रभो ॥ मोहिन्याश्रयितंदेव जातंनिष्फलमद्यवै ॥ रुक्मांगदप्रणीतेन मार्गेणकुशके-
तन ॥ लोकःप्रयातिसर्वोयं नमांकश्चित्प्रपद्यते ॥ गतेपिनृपशार्दूले देहंदेवस्यचक्रिणः ॥ सर्वथासर्वभूतानां नबुद्धिःपरिवर्त्तते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपोष्यवासरंविष्णोः सदाधर्मार्त्तमानसाः ॥ प्रयान्तिपरमंलोकं लुप्तपापाःपितामह ॥ इयंतुव्रीडितादेवी मोहिनिचिवरांगना ॥ सा-
यातितवसान्निध्यं नभुंक्तेलोकगर्हिता ॥ निष्प्रपन्नोह्यहंजातः किंकरोमिप्रसाधिमां ॥ प्रेताधिपवचःश्रुत्वा नीरजातासनोब्रवीत् ॥
गच्छामःसहिताःसर्वे मोहिनींप्रतिबोधितुं ॥ मोहिन्याःप्रतिबुद्धायाः करिष्यामोदिवाकरे ॥ तवकार्यंनसन्देहः संभ्रमन्त्यज्यता-
मिदं ॥ ततोदेवगणाःसर्वे संक्रन्दनपुरोगमाः ॥ ब्रह्मणासहिताभूमिं विमानैःसूर्यसन्निभैः ॥ समायातामहीपाल नारींतांप्रतिबो-
धितुं ॥ तेविमानैःसमंतात्तु परिवार्यशुभाननां ॥ तेजोहीनांनिरानन्दां शुष्कतोयांनदीमिव ॥ विनेन्दुनायथारात्रिंमृद्धिहीनां-
क्रियांयथा ॥ पराजितंनरंयद्वत् प्रम्लानामिवपंकजं ॥ विनिवृत्तमखंदेवं निर्द्रुमंहिवनंयथा ॥ गतशालिककेदारं तरणिंनिष्प्रभंयथा ॥
पन्थानंनवनीतेतु उद्धृतेचावनीपते ॥ असंस्कृतांयथावाणीं मृदितांचचमुंयथा ॥ हतनाथांचयुवतीं धान्यहीनांप्रजांयथा ॥ श्र-
द्धाहीनंविधिंयद्वत् धर्मंचदययाविना ॥ राष्ट्रंभूपालहीनेच मंत्रिहीनंचभूमिपं ॥ धनधान्यविहीनंतु गृहंनरवरोत्तम ॥ जलही-
नंयथाकुंभं बद्धसंगंयथागतिं । गृहस्थंभार्ययाहीनं पथिकंसार्थवर्जितं ॥ मार्जनींपांशुरूषितां नरंतीर्थाप्लुतंयथा ॥ वादित्रंशब्दभ-
ग्नंच दिवादुष्टंचनेत्रजं ॥ भग्नक्रियंचभिषजं भग्नशाखंचपादपं ॥ व्यङ्गींचप्रमितंयद्वान्निर्जलंचयथाघनं ॥ सधूममिववह्निंच वि-
रश्मिमिवभास्करं ॥ प्रभ्रष्टामिवमालांतु सर्वसंगंनरंयथा ॥ पयसाचविहीनांगां पतिहीनंगृहंयथा ॥ कविनाचयथाबन्धं भिक्षाही- ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नंचभिक्षुकं ॥ तिरस्कृतंयथाकान्तं जाययेवहतप्रभं ॥ वसन्तंस्वसुरावासे हृतस्वमिवमानसं ॥ भग्नचित्रंगृहमिव पद्मिनीमुद्धृता-मिव ॥ निर्दानामिवमातंगं भग्नवेगंहयंयथा ॥ मालामिवशिरोभ्रष्टां समलंतुमणियथा ॥ प्रभ्रष्टांवालिपिंयद्वद्विस्वरंचयजुर्यथा ॥ सामेवस्वरहीनंतु मंत्रहीनंयथानरं ॥ मार्गंतृणेनसंछन्नं पद्महीनंयथासरः ॥ ज्ञानंममत्वसहितं प्रकृतिंपुरुषंविना ॥ यानिचित्तवि-हीनानि धर्म्मदंभावृतंयथा ॥ मोहिर्नीतेजसाहीनां तथाद्दष्ट्वादिवौकसः ॥ ध्यायमानांनिरुत्साहां दूयमानांजनैःप्रभो ॥ आक्रोश वचनैःक्रूरैः पुत्रहत्यासमन्वितैः ॥ भ्रूभर्तृघातिनींपापां सन्ध्यावल्याश्चदुःखदां ॥ दुःशीलांपतिनात्यक्तां तद्वाक्यपरिमोदितां ॥ स्ववाक्यनिरतांचण्डामूचुर्देवाःसमागताः ॥ माशोकंकुरुवामोरु पौरुषंहित्वयाकृतं ॥ नहिसिद्धिंगतंतंच कोपराधस्तवाबले ॥ प्रा-णिनःपरिभूयन्ते यमेनबरवर्णिनि ॥ नहिमाधवभक्तानां भवतोमानखण्डनां ॥ शाशितात्वंविशालाक्षि देवकार्यार्थमागता ॥ त-न्नसिद्धिवरारोहे प्रयत्नेनतवाधुना ॥ विघ्नविध्वंसिनीपूर्वं कृतारुक्मांगदेनहि ॥ एकादशीमहापुण्या वैशाखेशितपक्षजा ॥ संव-त्सरंविशालाक्षि कृच्छ्रपादप्रपूरिता ॥ तस्यैषाऽभ्युष्टिरतुला यत्सत्यान्नविभोनहि ॥ निर्विघ्नांचेतिब्रुवते लोकेषुपरिनिष्ठिताः ॥ अने-नकारणेनेह जितात्वंतेनभाविनि ॥ नकृतंवचनंतुल्यं विष्णुभक्तेनतेनवै ॥ अगणित्वेहनृपतिः संस्पर्शन्तेनसुन्दरि ॥ कर्मणाम-नसावाचा पुत्रव्यापादनेस्थितः ॥ खड्गमुद्यम्यहस्तेन स्वेहंकृत्वासुदूरतः ॥ तादृशंनिकषंप्रेक्ष्य भगवान्मधुसूदनः ॥ तुष्टोवभूव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवेशो वरदःसजनार्दनः ॥ सान्निध्यंकल्पयामास नृपस्यपुरतोहरिः ॥ योहनिष्यतिवैपुत्रं नभुक्तेहरिवासरे ॥ भूभुजातेनतेनाद्य
प्रीतिंयातामभातुलां ॥ एवंविचिन्त्यदेवेन दर्शितंवपुरात्मनः ॥ नृपेन्द्रस्यप्रियापुत्र सहितस्यवरानने ॥ विष्णुनापरितुष्टेन नीतं-
चत्रितयंशुभे ॥ स्वकंधाममहाभागे अभावभिरिवाहितः ॥ प्रारब्धेकर्मणिफलं यदिदेविनसिध्यति ॥ सर्वदोषेणसुभगे दोषःकोत्र
तवाधुना ॥ तस्मात्तेवरदाःप्राप्ता सांप्रतंविबुधाःशुभे ॥ सिध्येकर्मण्यसिद्धेच कर्मदोषोवृथानहि ॥ नदोषोभृत्यवर्गस्य स्वामिना
धर्ममिच्छता ॥ सद्भावादटमानस्य यदिकर्मनसिध्यति ॥ देयंवेतनमात्रंतु नतुतुष्टिफलंभवेत् ॥ योनतस्मैप्रयच्छेत वेतनंजीव-
नायवै ॥ गवांबधमवाप्नोति सनरोनात्रशंसयः ॥ तस्माद्देयंवरारोहे तवाभीष्टसुलोचने ॥ सद्भावेनत्वयाकार्यं कृतंसम्यग्दिवौकसां ॥
किन्नकुर्वन्तिविबुधाः त्वयासहवरानने ॥ द्वादश्याःतेजसाभग्नो यामाहुर्विघ्ननाशिनीं ॥ एवमुक्तातुदेवैःसा मोहिनीनृपसत्तम ॥
निन्दिताचतदात्मानं उवाचेदंवचस्तदा ॥ धिग्देवाजीवितंमह्यं ययाकार्यंनसाधितं ॥ नकृतोयमसंवाधं यमकार्योमयासुराः ॥
नचलुप्तंहरिदिनं नभुक्तंतस्यवासरे ॥ भूभुजातेनवीरेण कृतंपुत्रवधेमनः ॥ गतामूर्ध्निपदंकृत्वा ममरुक्मांगदोहरिं ॥ अप्रमेयगु-
णंविष्णुं निर्मलंनिर्मलाशयं ॥ हंसंशुचिपदंव्योमं प्रणवंवीजमव्ययं ॥ निराकारंनिराभासं निष्प्रपञ्चंनिरञ्जनं ॥ शून्यंविलब्धरू-
पञ्च ध्येयंध्यानाविवर्जितं ॥ अस्तिनास्तीतियंप्राहुर्नदूरेनातिचान्तिके ॥ मनोग्राह्यंपरंधाम पुरुषाख्यंजगन्मयं ॥ हृत्पंकजसमा- ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सीनं तेजोरूपंनिरीन्द्रियं ॥ तस्मिन्नयमनुप्राप्तः किन्तुमेजीवितेफलं ॥ सुसाधितेतुयोविप्र कार्येगृह्णातिवेतनं ॥ आशामनाशां-
कृत्वातु स्वामिनोनरकंव्रजेत् ॥ नसाधयन्तिकार्याणि प्रभूणांयेदिवौकसाः ॥ भृत्यावेतनभोक्तारो जायन्तेभुतलेहिसा ॥ कार्यप्र-
साधनापश्चाद्धर्तृपुत्रविनाशिनी ॥ ग्रहिष्येहंवरंदेवाः कथंपापाविगर्हिता ॥ देवाऊचुः ॥ ब्रूहिमोहिनिदास्यामो यत्तेमनसिवर्त्तते ॥
नानृणंभवितासुभ्रु येनास्माकंवरानने ॥ फलंहितस्यकस्मात्त्वं नचाप्नुहिकृशोदरि ॥ ५५ ॥ इति ना० मोहिनीसमागमोनाम ३७
वशिष्ठउवाच ॥ एवमुच्चार्यमाणानां विबुधानांमहीपते ॥ आजगामाथनृपतेः पुरोधाःपावकप्रभः ॥ उषित्वाजलमध्येतु प्राणाया-
मरतोमुनिः ॥ वर्षाणांतुशतंसाग्रं ध्यायन्देवंजनार्दनं ॥ व्रतावसानेनृपते जलादवततारह ॥ निर्गतेनश्रुतंतेन मोहिन्याश्चेष्टितं
नृप ॥ सक्रोधोमुनिशार्दूल देववृन्दमथागमत् ॥ उवाचविबुधान्सर्वान् मोहिन्यावरदायिनः ॥ भवतांहिकदेवत्वं धिग्धर्मंवःसुरे-
श्वराः ॥ वरप्रदानंयैरेवं दीयतेहिनिरर्थकं ॥ मोहिन्याःपापयुक्तायाः नयुक्तंभवतामिह ॥ कृत्याहतेयंसुतभर्तृघातिनी विहीनरूपा
सदृशस्वरूपा ॥ तस्याहिशुद्धिर्नहिदृश्यतेवै क्षिप्तेशरीरेपिहिजातवेदसि ॥ विमोहयामासचमोहिनीया रुक्मांगदंधर्मविभूषणंहि ॥
प्रियासमेतंतनयेनयुक्तं ययास्वयंचैवविनाशितंपतिं ॥ कृत्वाधरांभूपतिवर्जितंच नष्टस्वधर्मोहरिवासराख्यः ॥ नचैववासोनरकेपि
देवाः कृतेभवेद्धर्षशतेनपुण्ये ॥ लोकापवादेनचकुत्सितायाः स्थानंनवेदास्तिकुतःपरंच ॥ पतिंहत्वासुतंचापि सपत्नींजननींसगां ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हत्वामरांसमस्तांच कांगतिंयास्यतेसुराः ॥ इयंपापसमाचारा तिथिविध्वंसिनीहरेः ॥ मात्सर्येसहितैरुक्तं येर्हरेर्वासरेसुराः ॥ भु-
ज्यतामितिदुर्वृत्तेस्तेषामप्यधमागतिः ॥ भुज्यतेवासरेविष्णोर्हन्यतांगौर्द्विजान्विता ॥ अपेयंपीयतामुक्त्वा नवासस्तुत्रिपिष्टपे ॥
एतदज्ञानिनांप्रोक्तं ज्ञानिनांनतुनिष्कृतिः ॥ अज्ञानाद्व्याहृतेवाक्ये भुज्यतांहरिवासरे ॥ हन्यतांगौर्द्विजोपेता पीयतांमद्यमेव-
वा ॥ विशुद्धिःकविभिःप्रोक्ता प्राणत्यागगतेनहि ॥ अथवाह्युपवासेन ह्येकादश्यांदिवौकसः ॥ तिथ्यन्वितस्यपापस्य ज्येष्ठकुण्ड
प्लुतस्यच ॥ शौकरेस्पर्शनाद्वापि ननव्यूहार्चनादथ ॥ व्याहृतिःकथिताविप्र स्वयमस्मिन्सुरोत्तमाः ॥ भोजनेपापनिरता द्विजे-
शस्यदिनेशुभे ॥ भर्तृवाक्यमकृत्वातु घातयामासयापतिं ॥ वाग्यतंवाक्यनिरतं तादृशंनरपुंगवं ॥ विष्णुधर्मप्रलोप्त्रीवै बहुमा-
यासमन्विता ॥ नैषास्पृश्याभवेद्देवा कथंदास्यथवैवरं ॥ भवन्तोन्याययुक्तेषु धर्मयुक्तेषुमत्सराः ॥ पालनंपापयुक्तेषु नकुर्वन्तिदि-
वौकसः ॥ धर्माधाराःस्मृतादेवा धर्मोवेदाद्विनिर्गतः ॥ वेदैःशुश्रूषणंभर्तुः स्त्रीणांधर्मःप्रकीर्त्तितः ॥ यद्वदेत्पतिःकिंचित तत्कार्यम-
विशंकया ॥ शुक्लंशुक्लमितिज्ञेयं कृष्णंकृष्णमितिस्त्रिया ॥ यानारीसाहिविज्ञेया यत्राज्ञाक्रियतेसदा ॥ भर्तुर्विबुधशार्दूलाः सत्यमे-
तद्ब्रवीमिवः ॥ भर्तुराज्ञाकृतादेवास्त्वनयापापशीलया ॥ पापाहांसनसन्देहो मोहिनीदुष्टचेतना ॥ सत्यसंचालनार्थाय सपथैर्य-
न्त्रितोविभुः ॥ उपायैर्विविधैःप्रोक्तोनसत्याच्चालितस्तया ॥ तेनमोक्षंगतोराजा पापमस्यांविसृज्यच ॥ सेयंपापशरीराहि हत्याश्रत ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समान्विता ॥ विनाशयामासमम पाद्यंपापसमान्वितं ॥ दातारंसर्वदानानां ब्रह्मण्यंचहरिप्रियं ॥ प्रजानांरञ्जनेयुक्तं हरिवासरसे-
विनं ॥ निषिद्धपरिहर्त्तारं परदारविवर्जकं ॥ परार्थेत्यक्तकामंच सदामखविधिप्रियं ॥ सदादुष्टप्रशमनं वर्त्तमानंधरातले ॥ व्यस-
नैःसप्तभिर्घोरैरनाक्रान्तंमहीपतिं ॥ तंनिरस्यदुराचारा वरयोग्याकथंभवेत् ॥ योऽस्याःपक्षेप्रवर्त्तेत देवोवादानवोपिवा ॥ तांचापि
भस्मनिचयं करिष्येहंनसंशयः ॥ मोहिन्यारक्षणेयस्तु प्रयत्नंकुरुतेनरः ॥ तस्यतज्जायतेपापं यन्मोहिन्याव्यवस्थितं ॥ सएवमुक्तो
नृपनाथविप्रः संसृज्यपापंहरिसंप्रगीतं ॥ मुमोचदेहेज्वलनप्रकाशं तदंगनायाःकनकावदाभि ॥ क्षिप्तेतुतोयेसहसामहीप ज्वला-
वलीढासहसाबभूव ॥ खंपश्यतांनाकनिवासिनांतथा तृणेयथोल्कापतिताबभूव ॥ कोपंप्रभोसंहरसंहरेति यावद्गिरःखेमरुतांचरन्ति ॥
तावत्सवह्निर्हरिसंभवोसौ भस्मावशेषांप्रमदांचकार ॥ ३४ ॥ इतिश्री ल० ना० रु० मोहिनीभस्मकरणंनामाष्टत्रिंशोध्यायः ३८
वशिष्ठउवाच ॥ मोहिनीदेहमुत्सृज्य गताविबुधमंदिरं ॥ भर्त्सितादेवदूतेन नास्थितिर्विद्यतेऽत्रते ॥ पापशीलेसुदुर्बुद्धे भर्तृनि-
न्दापरायणे ॥ लुप्तस्तेवासरोविष्णोर्महापापसमन्विते ॥ नारायणस्यभक्तानामिहवासस्त्रिपिष्टपे ॥ पापिनांनरकेवासस्तत्रगच्छ-
स्ववालिशे ॥ एवमुक्तातुदूतेन सक्रूरंवचनंतदा ॥ ताडयित्वातुदण्डेन प्रेषितानरकान्प्रति ॥ ताडिताभर्त्सिताराजन् साप्राप्तान-
रकान्प्रति ॥ प्राक्रोशन्नारकाःसर्वे दृष्ट्वातामागतांतदा ॥ नतेवासोऽत्रपापिष्टे परिखिद्यास्मदन्तिके ॥ व्रजान्यत्रहिवासाय नव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यंधारणेक्षमाः ॥ यात्वंधर्मांगदंहंसि धर्मज्ञंसत्पथेरतं ॥ गुरुशुश्रूषणेरक्तं मातृणांसुप्रियंतथा ॥ विशेषरहितंभास्वद्भूतानांचहितेरतं ॥ प्रजाहितंस्थिरंप्रज्ञं स्त्रीसंगेवाविचक्षणं ॥ सप्तद्वीपप्रभोक्तारं महेन्द्रवरुणोपमं ॥ प्राकृतेनापिपुत्रेण निहतेनमहामते ॥ ब्रह्महत्याशतंप्रोक्तं ऋषिभिस्तत्वदर्शिभिः ॥ त्वयासद्धर्मनिरतो श्वयःशुश्रूषणेरतः ॥ हतःपुत्रोमहाबाहुस्तेनतेनास्तिनिष्कृतिः ॥ गच्छान्यत्रद्रुतंपापे विरुद्धंतवदर्शनं ॥ एवंसुबहुशोजल्प्य निंदितानिर्गतातदा ॥ निर्धूतानारकैःसातु प्रविष्टाहिरसातलं ॥ रसातलस्थैर्नृपते निषिद्धासासमंततः ॥ क्रंदितातत्रदुःखार्त्ता प्राप्तापार्श्वंदिवौकसां ॥ निवासिताहंलोकैस्तु ताडितासुद्गरादिभिः ॥ भवतामर्थसिद्ध्यर्थं रविपुत्रहितायच ॥ मयाव्यवसितंचैव सर्वलोकविगर्हितं ॥ क्लेशयित्वातुभर्त्तारं पुत्रंहत्वानिराकृता ॥ सन्ध्यावलींवियोज्याथ पुत्रेणपतिनातथा ॥ नगतिर्विद्यतेदेवा धरायांममसांप्रतं ॥ विशेषाद्द्विप्रशापेन धृतानरकवासिनः ॥ विप्रेणापादितानांहि दग्धानांचित्रभानुना ॥ दिवाकीर्त्तिहतानांच दष्टानामहिनातथा ॥ चतुर्गुणम्रितानांच भक्षितानांचदंष्ट्रिभिः ॥ शतह्रदाविपन्नानां नशुद्धिःसुविमार्गदा ॥ साहंगङ्गाजलभ्रष्टा भूरिपापसमन्विता ॥ अविन्दमानानिलयं विष्णोर्वासरनाशिनी ॥ प्राप्ताहंभवतांदेवाः समीपमिहदुःखिता ॥ नास्तिमेपावनंकिंचिद्भर्तृपुत्रविनाशनात् ॥ ॥ ६३ ॥
विष्णोर्वासरलोप्तृत्वात्सत्यमेतन्मयोदितम् ॥ दुरुक्तंनादिनीचण्डा निंदिताचजगत्त्रये ॥ करोम्यहंकिंत्रिदशा ब्रूतदुःखविना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिनीम् ॥ तांदृष्ट्वावादिनींवीक्ष्य मोहिनींचविमोहिनीं ॥ ऊचुःपरस्परंसर्वे सब्रह्मेन्द्रदिवाकराः ॥ क्षिप्रंपुरोधसंक्रुद्धं शान्त-
यित्वाशनैःशनैः ॥ अस्माभिःप्रेषिताब्रह्मन् शून्यंदृष्ट्वात्रिपिष्टपं ॥ नरकांश्चतथादृष्ट्वा वैकुण्ठंवीक्ष्यपूरितं ॥ रुक्मांगदकृतेमार्गे
गच्छमानोजनस्तदा ॥ एकादश्यांनचास्नाति कश्चिदेवपदाद्द्विज ॥ तदास्माभिर्बालारियं प्रेषितानृपसन्निधिं ॥ माननार्थेचत-
स्यैव वासरेचक्रपाणिनः ॥ धर्मज्ञस्यसुशीलस्य द्विजरुक्मांगदस्यच ॥ वासुदेवेतिभावेन भक्तिरव्यभिचारिणी ॥ भार्यासंबन्ध-
मुत्सृज्य कूटनेत्रकृतोमुनिः ॥ लिपिसम्मार्जनात्सर्वैरस्माभिःप्रेतपश्यतु ॥ अपकारायनृपतेः सत्ययुक्तस्यवैद्विजः ॥ सतेनकर्मणा
विप्र प्रियापुत्रसमन्वितः ॥ विष्णोःप्रसादाद्गतवान् पुत्रस्नेहविवर्जितः ॥ पदंदेवस्यसुकृतां चक्रिणोमुक्तिलक्षणं ॥ यस्मान्नाव-
र्त्ततेजन्तुरानन्दाख्यान्महीपते ॥ तन्नात्रकोपःकर्त्तव्यस्त्वयाद्विजवरोत्तम ॥ त्वंतपस्वीदुराचारः सर्वभूतहितेरतः ॥ नीचैःकृतेय-
न्महतांव्यलीकं तच्चैवतेषांनभवेत्सुखाय ॥ नप्राप्यतेसाख्यविदैर्मुनीन्द्रैर्नचापितद्योगयुतैःसमस्तैः ॥ अध्यासितंसत्ययुतैर्नरेर्यं
त्तद्धामविष्णोसतदाजगाम ॥ बुद्धिप्रपञ्चात्पतितातुविप्र सद्यःसमूलेतिनशंशयोऽत्र ॥ देवार्थमेषानचबन्धनार्थं रुक्मांगदंदृग्ध-
वतीमुनिन्द्र ॥ नचात्मकामेनगताहिबाला यमावसानेनगताहितत्र ॥ दयांकुरुस्वप्रशमंव्रजस्व विनाशितानांनपुनर्वधोऽस्ति ॥
नचापिलोकेनिहतोनिहन्य तेशापदानेननिपातितेयं ॥ कुरुप्रसादंगतिदोभवस्व त्वमद्यविप्रेन्द्रविमोहिताय ॥ अस्मत्कृतेविप्रव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रप्रसीद क्रोधंतुसंहृत्यमहर्षिवर्य ॥ सएषदृष्टिस्त्रिदशालयैस्तु विमृष्यबुध्याविरराममकोपात् ॥ उवाचसर्वान्विबुधाःसमेतान् वेदा-
र्थविद्धर्मपरोमहात्मा ॥ ३८ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते विप्रप्रशादनो नामैकोनचत्वारिंशत्तमोध्यायः ३९
पुरोधाउवाच ॥ वहुपापान्वितादेवा भर्तुर्दुःखप्रदायिनी ॥ नास्थितिर्विद्यतेचास्यास्त्रैलोक्येस्थातुजंगमे ॥ यन्नाक्रान्तंहिभूतोघैरा-
काशंपक्षिभिःस्वरैः ॥ जंगमाजंगमैर्भूमिर्व्याप्ताद्वीपसमन्विता ॥ तलानिदैत्यनागाद्यैराकाशंपाक्षिभिःस्वैरैः ॥ नाकंप्रकृतिभिःपु-
ण्यैर्न्नरकंपापकर्मभिः ॥ ऋष्याद्यैसागराव्याप्ता विहंगैश्वमहीरुहाः ॥ यस्मिन्संस्थाप्यतेपापैः संस्पर्शंयास्यतेनच ॥ विचार्यतद्यथा-
स्थानमस्यसौख्यप्रदंभवेत् ॥ तच्चिन्त्यतांमहाभागास्तत्संभूयप्रमृष्यतां ॥ ततःसुरवराःसर्वे विप्रवाक्यप्रचोदिताः ॥ ऊचुर्ब्रह्मसु-
तांनास्ति स्थानंतवजगत्त्रये ॥ ब्रूहिमोहिनिदास्यामि यदाक्रान्तंनकेनचित ॥ नपुरापापभोक्तारो नसुरासुरचापरे ॥ नचाप-
रोधादवले सपापायावरप्रदाः ॥ मोहिन्युवाच ॥ भवतांहिमयाकार्यं कृतंविबुधसत्तमाः ॥ दग्धायाअपिपापेन विनादेहेनचाप-
राः ॥ यथासूर्यात्मजोहर्षं प्रयातिममचेष्टितैः ॥ पूर्यंतेनरकासर्वे जनौघैःपापसंयुतैः ॥ गच्छाद्भिःपरलोकेहि यममार्गेनिरंतरं ॥
मानुषैस्त्रिदशश्रेष्ठा चित्रगुप्तोनाविश्रमेत् ॥ व्यलीकंतुप्रकुर्वाणाः सर्वेममसुसंचयैः ॥ पुरोधसासमेतानामेषवध्वाञ्जलिर्मया ॥ भ-
वतांहितमन्विच्छन् कृतंपापमनन्तकं ॥ पुनरेवचसाबुद्धिर्वर्त्ततेस्वर्गनाशिनी ॥ एकादशीफलंपुण्यं दीयतांविबुधोत्तमाः ॥ व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सतिःसामेविबुधा भवेदेकादशीयथा ॥ निरालंबाहमधुना स्थितींमेदीयतामिदं ॥ सर्वयज्ञाधिकफला सर्वपापप्रणाशिनी ॥ एकादशीमहाभागा यद्यस्तिमयिपुण्यदा ॥ मोहिनीवचनंश्रुत्वा सर्वेभूमिदिवौकसः ॥ दत्तामंगानिधुन्वाना ऊचुस्तांपरुषाक्षरं ॥ अयाच्यंयाचसेभीरु यन्नप्राप्यंसुरासुरैः ॥ एकादशीफलंपुण्यं कोददातितवाधुना ॥ अन्यत्तुसंप्रयच्छामो दातुंह्येकंनशक्नुमः ॥ एकयाह्यपिवाभोरु एकादश्यासुचिन्तया ॥ हत्यायुतंविनश्येत सर्वयज्ञफलंलभेत् ॥ नास्माकंशक्तिरस्तीह दातुंहरिदिनोद्भवं ॥ पुण्यंमोक्षप्रदंभीरु जन्ममृत्युनिकृन्तनं ॥ अमृतेनजगद्धातुः पुराणपुरुषस्यतु ॥ तद्दिनंयाचमानायाः कुलिशंतेपतिष्यति ॥ मोहिन्युवाच ॥ यद्येवंविबुधश्रेष्ठा नदास्यथहरेर्दिनं ॥ दशम्याःप्रान्तविद्धाया ततोगच्छन्तमेसुराः ॥ देवाऊचुः ॥ दशम्याःप्रान्तविद्धंहि दत्तंजंभासुरस्यहि ॥ ब्रह्मणापरितुष्टेन धूर्जटेर्वचनेनहि ॥ सचापिवलवाञ्जातस्तेनपुण्येनबृंहितः ॥ मोहिन्युवाच ॥ दशम्याः प्रान्तमासाद्य यदोदेतिदिवाकरः ॥ तेनस्पृष्टंहरिदिनं तद्दत्तमसुरेयदि ॥ सूर्योदयविहीनंतु दृश्यादृश्यंचराचरं ॥ दशम्यंतंप्रयच्छध्वं स्पृष्टंहरिदिनेनहि ॥ अग्नेर्विकारकालेच बद्ध्वाउत्थापनेशुभे ॥ गवांदोहनकालेच पक्षिसंनादनेतथा ॥ विरामेसर्वदेवानां मार्जनीग्रहणेतथा ॥ द्वारोद्घाटनवेलायां स्नानकालेह्युपस्थिते ॥ व्रतीनांदीक्षितानांच सपादनिनदेतथा ॥ तदाक्रान्तोदशम्यांतु एकादशिसमन्वितः ॥ प्रदीयतांनिवासार्थं कालेविबुधसत्तमाः ॥ नप्रार्थयेयंह्युदयं नचैवहरिवासरं ॥ वैनतेयोदयामह्यं दीयतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 विबुधध्वंशः ॥ दययास्मुनिनादेवाः क्षीणायाःपापसंचयैः ॥ विश्रामार्थेसुपुण्यर्थं एतत्प्रातःप्रदीयता ॥ स्पृष्टंविष्णुदिनेनेह सर्वपा-
 पहरेणहि ॥ यद्येतन्नप्रयच्छध्वं तिथेःप्राभातिर्कमम ॥ साहंविष्णुदिनोपेतां भविष्यवैसहस्रधा ॥ निराशाकुलिशेनैव विच्छिन्ना
त्रिदशालयात् ॥ पापादीन्विबुधार्थंहि पापसंजननायच ॥ प्राप्यानुज्ञांहिदेवेन्द्रास्तथान्येभ्योविशाम्यहं ॥ वशिष्ठउवाच ॥ तन्मो-
हिनीवचःश्रुत्वा सुराःसर्वेमहीपते ॥ संमंत्र्यसुचिरंकालं दिगंबरपुरोगमाः ॥ यमसंस्थापनार्थाय वैकुण्ठध्वंसनायच ॥ पाखण्डानां
चवध्यर्थं पापसञ्जननायवै ॥ पुरस्कृत्यतुविप्रेन्द्रं तथान्योभूसुरानृप ॥ ऊचुस्तेमोहिनींदेवा लोकसंमोहनायवै ॥ दत्तंमोहिनितेस्था-
नं प्रत्यूषसमयान्वितं ॥ दुष्टंहरिदिनोपेतं दशम्याप्रान्तसंज्ञितं ॥ नैतज्जंमेनदुष्टंवै नैतद्दैत्यैर्नदानवैः ॥ विविधैस्तुकृतंसुभ्रु उपवा-
सव्रतास्त्विदं ॥ अस्मिन्स्थितायांत्वयिमाधवस्य पूजांकरिष्यन्तिचयेमनुष्याः ॥ तेषांहियद्वैसुकृतंसमस्तं त्वंभुंक्ष्वदेविनचशंशयोत्र ॥
सूर्योदयविहीनंतु दशम्याःप्रान्तसेवनं ॥ पद्मनाभदिनेसूक्तं नदास्येहंफलंतव ॥ प्रतापंसूर्यहीनंतु दशम्याश्चारुलोचने ॥ एका-
दशीविहीनंतु क्षपयिष्यन्तियेनराः ॥ उपवासैर्व्रतैर्दानैस्तथाजागरणैःशुभैः ॥ सर्वमावर्जितंपुण्यं यास्यतेतवमोहिनि ॥ अप्रभा-
तांकितोह्यन्ता दशम्यांगर्हितंसदा ॥ दृश्यादृश्योमहीपाल युक्तोहरिदिनेनतु ॥ निष्फलंभवतेनृणां सुव्रतस्यार्जनेसदा ॥ देवैः
प्रहृष्टैस्तुतदामहीप स्थानेश्रुतेमोहिनिमोहयुक्ता ॥ बभूवहृष्टासहसूर्यजेन मेनेकृतार्थंशरणंतदातु ॥ संसाधितंकार्यमिदंसुराणां भ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्मावशेषेतुकृतेतुदेहे ॥ चैतन्यमात्रेपरमात्मकेस्मिन् संमार्जितोरुक्मकृतस्तुपन्थाः ॥ नीतंमयाचात्मकृतंहिवाक्यमुक्तंमयावाक्यमिदंकरोमि ॥ एवंविमृष्यबहुधासुमतेमहीप प्रणम्यदेवांस्तुतदाचमोहिनी ॥ प्रातस्थितासूर्यविनाकृतेतु कालेदशम्याजनमोहनाय ॥ इमानिरूपस्यविनानियुक्ते प्रहृष्टरूपामथकामपूर्णा ॥ प्रातस्थितांतांसविलोक्यमोहिनीं सहृष्टरूपोवचनंजगाद ॥ त्वया प्रतिष्ठाममचारुनेत्रे कृतात्रिलोकेषुचयत्तुसम्यक् ॥ विभेदितोरुक्मविभूषणस्य करीणसंस्थःपटहःसुघोषः ॥ हृष्टेकार्येजनःसर्वे प्रत्ययःकुरुतेत्विति ॥ सूर्योदयस्पृशीघोषा दशमीगर्हितातदा ॥ सचाभूत्युदयन्नृणां मोहनायभविष्यति ॥ मोहनाद्व्रतनिष्पत्तिर्भविष्यतिचयत्फलं ॥ भविताभवितादेवि तवसर्वंनसंशयः ॥ मयाचपापिनांतेषां शासनार्थंपटेक्षरैः ॥ भविष्यतिलिपिंसुभ्रु अलंघ्यदेवदानवैः ॥ योगोदशम्यारविनाचयुक्तः प्रसिद्धयेतद्भुवनत्रयेस्मिन् ॥ विहायतांमत्पितृयोगयुक्तां पटेस्थितांदृश्यतिदृश्यसंज्ञे ॥ समंहितेनामविशालनेत्र संमोहिनीत्येवजनोब्रवीति ॥ विमोहयित्वाजननंसमस्तं पटेमदीयेलिखितंकरोषि ॥ दृष्टिस्त्वनेनैवहिकर्मणाते स्थानंस्वकंगच्छसुचारुनेत्रे ॥ इत्येवमुक्तातपनस्यपुत्रः प्रशंस्यतांब्रह्मसुतांप्रहृष्टः ॥ जगामदेवैःसहनाकलोकं करे गृहीत्वासतुचित्रयुक्तं ॥ गतेषुदेवेषुविमोहिनीसा विमोहयामासजगत्समस्तं ॥ प्राप्तंसमास्थायदिनेशहीनं प्रध्वंसनंसर्वसुपुण्यराजन् ॥ इतितेकथितंराजन् पुराणंपापनाशनं ॥ रुक्मांगदस्यचरितं सर्वदुःखक्षयंकरं ॥ श्रोतव्याश्रद्दधानेन परंस्वस्त्ययनंशिवं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणानान्तेनपापानि विलयंयान्तिमानद ॥ सूर्योदयेतमोयद्वद्गुहायामपिसंस्थितं ॥ धन्यंयशस्यमायुष्यं सर्वशत्रुनिवर्हणं ॥
॥ ६६ ॥ श्रोतव्यंराजपुत्रेण श्रद्दधानेनपार्थिव ॥ जयान्विताविशेषेण शौर्यस्यचविवृद्धये ॥ श्रोतव्यंब्राह्मणैराजन् पुत्रपौत्रशुभावहं ॥ अ-
पुत्रोलभतेपुत्रं धनार्थीधनमुत्तमं ॥ विद्यार्थीलभतेविद्यां शृण्वंश्चरितमादितः ॥ रुक्मांगदस्यभद्रन्ते राजसूयफलप्रदं ॥ कथितं
तेमयाभूप किमन्यच्छ्रोतुमिच्छसि ॥ बशिष्ठवचनंश्रुत्वा मान्धाताराजसत्तमः ॥ पप्रच्छेदंमहाबाहुर्निश्चयार्थंमहायशाः ॥ एका-
दश्यांतदाराजा चक्रवर्त्तिर्महाबलः ॥ मान्धाताउवाच ॥ भगवन्द्वादशीकल्पं यथावद्वक्तुमर्हसि ॥ उपोष्याकाभवेत्पुण्या कामु-
पोष्याथपातकं ॥ बशिष्ठउवाच ॥ दशमीशेषसंयुक्तामुपोष्यैकादशींफलात् ॥ संवत्सरकृताज्जन्तुः सुखाद्धीयेतपार्थिव ॥ दशमी
शेषसंयुक्ता गान्धार्यासमुपोषिता ॥ तस्याःपुत्रशतंनष्टं तस्मात्तांपरिबर्जयेत ॥ दशम्येकादशीयत्र तत्रसंनिहितोनरः ॥ एका-
दशीचपुण्याच तत्रसंनिहितोहरिः ॥ पूर्वविद्धामयायातु पित्रेकर्मणिगण्यते ॥ कलार्द्धेनापिविद्धास्याद्दशम्येकादशीचया ॥
तदाह्येकादशींत्यक्त्वा द्वादशीसमुपोषयेत ॥ द्वादश्यामुपवासेतु त्रयोदश्यांतुपारणे ॥ एकादशीरूपिणीतु द्वादशीचक्रपाणि-
नः ॥ एकादशीयदानस्यादुपोष्याद्वादशीतदा ॥ एकादश्याकलात्वेका द्वादश्यास्तुकलाद्वयं ॥ द्वादशद्वादशीहन्ति त्रयोद-
श्यांतुपारणा ॥ कलाद्वयंत्रयंवापि द्वादशींचह्यतिक्रमात् ॥ एकादशीमुपोषित्वा तत्रधर्मफलंलभेत ॥ एकादशीद्वादशीच ति- ॥ ६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यन्तेचत्रयोदशी ॥ भूस्पृशासातिथिर्ज्ञेया सर्वपापहराशुभा ॥ उपवासःकृतंतस्यां महापातकनाशनः ॥ एकादशीमुपोष्यैव द्वा-
दशीमथवानृप ॥ त्रिमिश्रामपिकुर्वीत नदशम्यायुताक्वचित ॥ द्वादशीसमुपोष्यैव पक्षयोरुभयोरपि ॥ यथाशुक्लातथाकृष्णा
विशेषोनास्तिकश्चन ॥ यथासुपूजितोगौरः कृष्णोवावेदविद्द्विजः ॥ सन्तारयतिदातारं द्वादशीचतथास्मृता ॥ दिनक्षयेतुसंप्रा-
प्ते उपोष्याद्द्वादशीशुभे ॥ दशमीशेषसंयुक्तां नकुर्वीतकदाचन ॥ तिथिवृद्धौतथाहन्यां संप्राप्तेवादिनत्रयं ॥ संदिग्धेषुचवाक्येषु
द्वादशीसमुपोषयेत् ॥ नशङ्खेनपिबेत्तोयं नहन्यात्कूर्मशूकरौ ॥ एकादश्यांनभुञ्जीत पक्षयोरुभयोरपि ॥ एकादशीद्वादशीच
एकार्थेकार्यतःपृथक् ॥ नरनारायणौदेवावेकात्मानौयथाद्विधा ॥ सब्रह्महासगोघ्नश्च सुरापोगुरुतल्पगः ॥ एकादश्यांतुयोभुक्ते प-
क्षयोरुभयोरपि ॥ गृहस्थैनविशेषेण कार्यमेकादशीव्रतं ॥ एकदश्याविनारण्डा यतिश्चसुमहामते ॥ पचन्तीत्यन्धतामिश्रे याव-
दाहूतसंप्लवं ॥ नगाविद्धातुयाषष्ठी शिवविद्धातुपञ्चमी ॥ दशम्येकादशीविद्धा तत्रनोपवसेन्नरः ॥ सुपोष्याद्वादशीचैषा एका-
दश्याकलापिवा ॥ दिनक्षयेतुसापुण्या नदशम्याकदाचन ॥ एकादशीद्वादशीच विशेषेणत्रयोदशी ॥ तत्रक्रतुशतंपुण्यं त्रयो-
दश्यांतुपारणे ॥ द्वादशीद्वादशंहन्ति पूर्वविद्धाउपोषिता ॥ तस्मात्सर्वप्रयत्नेन पूर्वविद्धांविवर्जयेत् ॥ पृथिव्यांवैष्णवान्विप्रान् वि-
ष्णुशास्त्रविशारदान् ॥ चीर्णव्रतान्शुचीन्विद्वान् द्वादशींप्रतिबोधयेत् ॥ येपुराणंनजानन्ति समासान्नचलक्षणं ॥ तेषांवाक्यंन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्त्तव्यं गर्हितास्तेस्वकर्मभिः ॥ येषांनकारणंदानं नविप्रानजनार्दनः ॥ मन्वादयश्चस्मृतयस्तेषांवाक्यंपरित्यजेत् ॥ मान्धाता-
उवाच ॥ विघ्नविध्वंसिनीनाम वैशाखसितपक्षजा ॥ द्वादशीकेनविधिना कर्त्तव्यावदमेगुरो ॥ किंपुण्या किंफलाब्रह्मन् भवेद्विघ्नप्र
भञ्जनी ॥ केमन्त्राःपूजनेस्थाने दानेचद्विजसत्तम ॥ एतत्सर्वंसमाचक्ष्व प्रसन्नोयदिमेभवान् ॥ वशिष्ठउवाच ॥ शृणुराजन्नवहि-
तो द्वादश्याःपरमंविधिं ॥ येनविघ्नानिनश्यन्ति जन्मकोटिकृतानिवै ॥ वैशाखसितपक्षस्य संपूर्णाद्वादशीयदा ॥ भवन्नृपतिशा-
र्दूल वुधवारकरान्विता ॥ तदायत्नेनकर्त्तव्या व्रतेनृपतिसत्तम ॥ एकभक्तेननक्तेन तथैवायाचितेनच ॥ कर्त्तव्यानरशार्दूल द-
शम्यादिदिनत्रयं ॥ द्वादश्यामुपवासस्तु गृह्णीयान्नियमंबुधः ॥ निराशनोहंद्वादश्यां संपूज्यगरुडध्वजं ॥ प्रभातेद्विजसंयुक्तं
भोक्ष्येहंमधुसूदनं ॥ एवंनियमवान्स्नात्वा मध्याह्नप्रयतात्मवान् ॥ नद्यांतडागेगर्त्तेवा गृहेवानियतःशुचिः ॥ स्नात्वासंपूजयेद्देव-
मुपहारवरैर्नरः ॥ ॐकेशवायनमःपादौ विघ्नविध्वंसिनेनरः ॥ नारायणायेतिशिखां माधवायचमाधवि ॥ गोविन्दायललाटेच
ऊरुभ्यांविष्णुमर्चयेत् ॥ मधुसूदनायजंघेच पादौचश्रीधरायच ॥ हृषीकेशायेतिमुखं नाभिंपङ्कजनाभये ॥ दामोदरायवाहु-
भ्यां कृष्णायेतिशिरस्तथा ॥ त्रिभिश्चविधिवत्कृत्वा पुष्पधूपानुलेपनैः ॥ एवंसंपूज्यदेवेशं गन्धपुष्पानुलेपनैः ॥ ततस्तस्याग्रतः
कुंभं सिततण्डुलपूरितं ॥ अक्षतंतण्डुलंन्नूनं सितवस्त्रावगुण्ठितं ॥ स्थापयेत्तत्रदेवेशं सुवर्णघटितंन्यसेत् ॥ पूर्वोक्तेनैवविधिना ॥ ६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूजयेत्परमेश्वरं ॥ पुष्पधूपादिनैवेद्यैर्देशकालोत्तरैःशुभैः ॥ पुष्पाञ्जलिंततोवद्ध्वा प्रार्थयेत्सुसमाहितः ॥ धर्मार्थकाममोक्षाणां वाच्यायत्कारिताहिवै ॥ विघ्नानितानिनश्यन्तु त्वत्प्रसादाज्जनार्द्दन ॥ एवंप्रसाद्यदेवेशं तंगुरुंपूजयेन्नरः ॥ अलंकारोपहारैश्च दूर्वाश्लक्ष्णक्षतैस्तथा ॥ संपूज्यविधिवत्पश्चाद्देवेशंप्रतिपादयेत् ॥ उत्पत्तिस्थितिसंहार कर्त्ताभोक्ताजगन्मयः ॥ विघ्नविध्वंसकारीमे प्रीयतांमधुसूदनः ॥ अनेनविधिनादत्वा प्रणम्यचपुनःपुनः ॥ ततोदक्षिणयासार्द्धं गृहान्नीत्वासमर्चयेत् ॥ अनेनविधिनाभूप कुर्याद्विघ्नविनाशिनीं ॥ द्वादशीतस्यनश्यन्ति विघ्नानिनरपुंगव ॥ धर्मेवार्थेचकामेच मोक्षेचान्यतमेतथा ॥ अन्येषुचैवकामेषु स्वर्गभुक्तिप्रदेषुच ॥ नविघ्नोजायतेतस्य नयमेतिपरस्परं ॥ एतत्तेकथितंराजन् विघ्नविध्वंसकारणं ॥ व्रतंव्रतवतांश्रेष्ठमुक्तवीज फलप्रदं ॥ यश्चेदंशृणुयान्नित्यं पठेद्वाभक्तिभावनः ॥ सयातिपरमंस्थानं सर्वविघ्नविवर्जितः ॥ भुक्तभोगानतःप्राप्य मरणंस्मरणंहरेः ॥ ततोयातिपरंस्थानं यस्मान्नावर्त्ततेपुनः ॥ ११९ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते विघ्नविनाशिनीनाम द्वादशी चत्वारिंशोध्यायः समाप्तः ॥ ४० ॥ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀ ❀

इदं पुस्तकं नेपालदेशे पं० नरदेव, मोतीकृष्ण शर्मणः आज्ञानुसारेण पं० कपिलदेव शर्मणा श्रीपाशुपत मुद्रणालयेङ्कितम् संवत् १९६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूचना ।

यद्यपि भाग्यवद्भोग्यानि वस्तूनि वहूनि प्रतिजनपदं समुपलभ्यन्ते तथापि निजकुल क्षुण्णएव पन्था ज्यायानिति मन्यमानानां नेपालाभिजन महाशयानां अन्यदेशियानांच एतद्देशीय वस्त्राभरण, भाषापुस्तक, पञ्चाङ्गादीनि भि. पि. व्यवहारेणापि साध्यानि भवन्तु इतिविचार्य वाराणस्यां चौखम्बा सँस्कृत पुस्तकालयाधिपति " हरिदास-गुप्तो " युष्माभिः प्रतिपुरुषी कृतोस्ति इति—

आर्यजनानां शुभाभिलाषि—

पं० नरदेव,मोतिकृष्णशर्म्मणः " पाशुपत यन्त्रालय " नेपाल.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिलघुनारदीयपुराणान्तर्गतं रुक्माङ्गदचरितंसमाप्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नं. १६८८८

अथलघुनारदीयपुराणान्तर्गत रुक्माङ्गदचरितप्रारम्भः

मू. २२।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विज्ञप्तिपत्रम् ॥

पुरा महर्षिवेदव्यासेन कलियुगोद्भवाः मनुष्याः विद्यायुर्द्रव्यैश्चानेकोपद्रवैर्यज्ञयागादिकर्मकरणे समर्था न भविष्यन्ति यज्ञादिना विना स्वर्लोकप्राप्तिस्तेषां कथं भविता इति विचार्य दयालुःपरमलोकोपकारिणः महर्षिणा ते मनुष्येभ्यो यज्ञयागादिना भवबन्धनेभ्यो मुक्तोभूत्वोत्तमलोकप्राप्ता भवेयुरित्यभिप्रायेणाष्टादशमहापुराणानि कृतवान् तेषु मध्ये कानिचित् पुराणानि अतीवदुर्लभतरेण मुद्रिता नसन्ति तेषु दुर्लभतरेषुमध्येपि अष्टादशमहापुराणान्तर्गतलघुनारदीयपुराणोयं दर्शनेष्वपि दुर्लभिभूतेनायमन्धकाररूपकलेर्नाशनाय दीपस्वरूपभूतो लघुनारदीयपुराणान्तर्गत रुक्माङ्गदचरितस्य प्रकाशनाय च स्वार्यग्रन्थानां लोपोमाभूदित्यपेक्षया कलौ अपरवेदव्यासस्वरूप परमोपकारि श्रीगुरुपुरोधेति प्रसिद्ध खजाञ्चीत्युपपद श्रीजनकराजशर्मणा द्विजेन्द्रेण सर्वप्रकारेणास्मत् सहायं दत्तवान् आर्यग्रन्थार्यदेशयोरुन्नतसमृद्धौ आर्यग्रन्थस्य स्वदेशादेव प्रकाशने सर्वभावेनास्मत्सहायं ददुः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आर्यग्रन्थानुरागिजनादपि आर्यग्रन्थं स्वभूषणोयं मत्वा आग्रहंचेत् कुर्वंतु तदायं नारदीयपुराणस्यान्यखण्डानपि मुद्रयामस्तथाप्राचीन दुर्लभार्यान्य ग्रन्थानपि आर्यजनसहायेन प्रकाशयितुमिच्छामः ॥

आसास्महे यदस्मिन् विचारपूर्वकं संशोधितेऽपि ग्रन्थेऽज्ञानाद्दृष्टिदोषाद्वा स्थितमस्त्यशुद्धादि तत्सारासारविवेकविद्भिर्विद्वद्भिर्दयार्द्रदृष्ट्या संशोधनीयमिति ॥

श्रीराजकीय पाठशालाध्यापक नेपालेत्युपनामक पं० जीवनाथशर्मणा संशोधिता ॥

वहुपरिश्रमेण कृत्वा लब्धत्वात्परिश्रमपूर्वक संशोधनीयकारितत्वाच्च ग्रन्थोयं पाशुपतयन्त्राधीशेन सर्वभावेन स्वायत्तीकृतमस्ति ॥

शुभाभिलाषि

पं० नरदेव, मोतिकृष्ण शर्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नारदीयपुराणान्तर्गत रुक्माङ्गदचरित खण्डस्थ बिषयाना सूचिः ॥

अध्याय.		पत्राङ्क.
१	वशिष्ठंप्रति मान्धातृप्रश्न द्वादशीमहात्म्यवर्णनं एकादश्या महत्वकथनं.	१
२	सूतंप्रति शौनकादि प्रश्नस्तिथिविवर्णंचेति.	१
३	सूतंप्रति शौनकादिप्रश्न रुक्मांगदेन पार्थिवेनासमुद्रान्ते समस्तजनैरेकादश्युपवासनीयामिति पटहं अवादयत् सर्वैर्लोकैरेकादशीसेवनानन्तरं सर्वनरकशून्यं अभवत् तद्राष्ट्रेयेकेचिद मरन्ति ते गरुडारूढा विष्णोःपदं प्रयान्ति यमनारदसंवाद रुक्मांगदवर्णनं यमपारितापंचेति.	२
४	नारायणंप्रति यमचित्रगुप्तयोः सविनयं विलापः	५
५	समवर्तेः स्वेनैवात्मश्लाघा कथनं.	६
६	रुक्मांगदंप्रति ब्रह्मवाक्यं.	७
७	मोहिनी सृष्टिर्मोहिनी शिक्षा प्रस्थापनंचेति.	७
८	मोहिनीबरदानंमोहिनीमन्दरागमनंच.	१०
९	धर्मांगदवर्णनं धर्मांगदेराज्यलक्ष्मीस्थापनं रुक्मांगदमन्दरगमनं.	११
१०	मन्दरेवामदेबरुक्मांगदसंवादो नृपः केनकर्मणावासुन्दर्यौमांमदनेवप्रतिभाति.	१२
११	वामदेवेन रुक्मांगदपूर्ववृत्तान्तकथनं राजामन्दरपर्यटनावसरे मोहिन्या सप्तस्वरविसिष्टगीतश्रवणम् पश्चात् मोहिनिरुक्मांगदसमागमः	१४
१२	मोहिनी रुक्मांगदसंवाद स्ववंशवर्णनं मोहिनीवरदानं.	१६
१३	नगरंप्रति मोहिन्यानयनं.	१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्याय.	पत्रांक.
१४ ततो महारण्येगच्छतस्तु कस्मिंश्चित् सुष्कपर्णपूरितगरंध्रेमुशली तिष्ठति दैवयोगेन शैन्धवखुरेण विदलीकृतासाहाहतेत्यवदत् तदनंतरं शीतलतोयमानीय तामसिञ्चयत् चेतनाप्राप्तासाह्यात्मवृत्तंन्यवेदयत् नृपेण तस्मै विजयासंभवपुण्यंदत्तवान् तदनंतरं सादिव्यरूपाजातेति	१८
१५ नगरप्रवेशानंतरं पुत्रानुशासनं	२१
१६ पितुरादेशान्मोहिनीसेवनंमोहिन्याअनेकाभरणवस्त्रदानम् संध्यावलिप्रबोधनम् साकलपुराधिवासि ब्राह्मणगणिकयोर्वृत्तान्तकथनम्	२२
१७ मोहिनीभोजनेच्छया भांडवीक्षणम् पड्रसकरणम्. राजोपचितव्यंजनान्नादिनाभोजनं मोहिनिसंध्यावल्योःसंवादेमोहिनी एवंगुणान्वितस्यास्याहंजुगुप्साकर्तुसमर्थाभवामीवान वेतिचिंता समाकुलाशीघ्रमाहरनृपंतेन रहितामुहूर्तमपि नातिष्ठामीत्यब्रवीत्	२५
१८ नृपस्तदन्तिकंप्राप्य किंकारणेनाहूतासीत्यभाषत तच्छ्रुत्वा निष्प्रयोजनमानीताक्षीरसागरमहूरात्: इत्यादिवाक्यैर्नृपं समर्थैतनयेपिराज्यभारंवीक्षसे संध्यावलीसमात्रैलोक्येनारीदुर्लभा पतिव्रता मांभस्मकरणेसमर्था बहुनाकिमिहोक्तेनतदनंतरं धर्मांगदेनसवामातरःसंबोधनम	२७
१९ रुक्माङ्गदक्रीडावर्णनं धर्माङ्गदप्रतापवर्णनं लोकसुखकथनंच	२९
२० धर्माङ्गदविद्याधरयोर्युद्ध धर्माङ्गदविजयोविद्याधरकन्याहरणंच	३०
२१ धर्मांगदविजयवर्णनं धर्मांगदविवाहकरणं प्रजापालनंच.	३१
२२ रुक्मांगदेन सर्वकर्मक्रियां त्यक्त्वाप्येकादशीसेवनंनत्यक्तवानितिवर्णनं.	३३

।। १ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्याय.	पत्रांक.
कार्तिकमासमाहात्म्यकथनंच.	
२३ चातुर्मास्यव्रतवर्णनम्	३९
२४ रुक्मांगदमोहिन्योः संवादेराजनूयदि- मेमीतोसि चेद्धरिवासरे नृपव्रतभंगे- मोहिनीउद्योग मोहिनीसंबोधनं भो- जनंकुर्वित्यादिकथनं मोहिनी कथ याति गुर्विणिगृहस्थक्षीणरोगिशिशुचि- रजातराजाभारवहसंग्रामाक्षितिसेविनां- पतिव्रतानांच उपवासोनयुक्त इत्या- दिकथनं.	३९
२५ हरिवासरेभोजनं विहाययदन्यद्रोचसे- तत्सर्वं कर्त्तास्मीतिनृपवाक्यानंतरमे- तद्व्यतिरिक्तं किमपिनेच्छामि वेदेष्व- पिउक्तमस्तीत्यादि मोहिनीवाक्यं.	३८
२६ यदिपातालाच्छीर्यते पृथ्वीजलधिःशो षमायातिहिमवान् परिवर्तयेत् उष्णत्वं पावकस्त्यजेत् तथापिनाहं हरिवासर सेन्नं नत्यजामि इत्युक्तएवंधर्मराज्यो- भवस्त्वकृतकृत्यागमिष्यामीतिब्रुवतिब्रा- ह्मणैःसहजगाम एतस्मिन्नेवकाले धर्मा- गदोवराश्वारूढः समाजगामकोलाहलं श्रुतवान् मोहिनीमपृच्छत देविके- नापमानितासि इत्युक्ते पूर्ववृत्तांतंक- थयति.	४०
२७ ततो धर्मांगदःपितुःसमिपं गत्वाइदमू- चे तात त्वां सानृतीवदन्ति मयिजीवति कस्मादनृती भविष्यसि दुर्लभतरमपि अस्यैप्रयच्छ नृपःप्राहकीर्तिर्नस्यतु अ- सत्योवाभवाम्यपि हरिवासरे भोज- नं नकरिष्यामीत्यादिकथनं.	४३
२८ ततो उभयोःसंविदंज्ञात्वा संध्यावली मुवाच मातरेनां शांतवय नृपस्य हरि- वासरे भोजनायस्थितांश्लक्ष्णयागिरा संध्यावली सद्वीपवनकाननंराज्यं गृहा- णेत्यादिवाक्यैर्बोध्यमानापिसानबुबुधे एवंतवममचप्राणहरं तथालोकानांच	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्याय.	पत्रांक.
प्राणहरंवाक्यं तग्यशःभर्तुःकीर्तिः पुत्रप्रसंसाममधिग्विवादः	४३
२९ स कीदृशंवाक्यं ब्याहर आत्मनोनिधनोवा पुत्रस्यनिधनोवा भर्त्रर्थेकरोमि ममकौमारिभावे मत्पितुः काष्ठपाटकसखीभिःसहिता वनेकाष्ठपाटको यत्रास्ते तत्र मया काष्ठीलाकाष्ठमध्ये दृष्टा नवनीतनिभोदेहोमुखंचाञ्जनसंनिभं साध्वांक्षेण गृहीता सावेपमाना मूर्छनांप्राप्ता मया जलेन संसिक्ता चेतनान्विता मानुषींवाचं ब्याहरत् साकळेपुरे कौण्डिन्यइत्येवसर्वकर्मयिद्ब्राह्मण आसीत् तस्य दुहिताहं कुलीनायब्राह्मणाय ददौ मद् भर्ता राजमंदिरं ययौ तत्र वेश्याः नृपगृहं प्रविशत्यस्तेनैका वेश्या समानीता मया तस्याभरणादिकं हारितं सर्वमपि क्षेत्रभांडादिकं विक्रीय नदनदीपतिं नावमारुह्य तरसा लवणोदधिं प्रविष्टोगिरिश्रृंगमारुरोह तालाधस्तात्ससुष्वाप तत्रागाद्राक्षसोघोरो गर्जमानेयथाघनस्तन्वंगीं काशिपतेःपुत्रींरत्नावलीमंकेनादाय आजगाम तस्य भार्या प्रश्रयोपेता अब्रवीत् पतिकामाहं पृच्छामीत्यनेकवाक्यालापकथनं.	४४
३० राक्षस्या ब्राह्मणविश्वमनं राक्षसवध कथनं काशीमहात्म्यवर्णनंचेति.	४९
३१ काशिपतये राक्षसस्य सर्ववृत्तान्त कथनं ब्राह्मणरत्नावल्योर्विवाहकरणं ब्राह्मणेन स्वज्येष्ठपत्नींप्रति भारवाहक प्रेषणं सखीभिर्ब्राह्मण्या निन्दावर्णनं ब्राह्मणी स्वगृहगमनंचेति.	५०
३२ संध्यावलीकाष्ठिलोपाख्यानंमाघस्नान माहात्म्यवर्णनं भीमैकादश्युपवाशफल कथनंच.	५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्याय.	पत्रांक.
३३ एवंचेत् देहि पुत्राशिरो मह्यं यादिष्टं हृदयाधिकं इतिमोहिन्या वचनानंतरं धनजनादिकं सर्वं त्यजामि किंतु द्वादशींसेवनं न त्यजामीति सन्ध्यावली वाक्य कथनम्.	५६
३४ राजन् धर्मपालय द्वादश्यां माभुङ्क्ष्था पुत्र व्यापादयेत्यादि कथनं.	५६
३५ मोहिनींप्रति राजवाक्यं राजानंप्रति धर्मांगदवाक्यं च.	५७
३६ पुत्रवचनं श्रुत्वा संध्यावल्या मुखंवीक्ष मोहिन्याः क्रूरं वचनं श्रुत्वा पुत्रनाशाय मतिं चकार शंखचक्रगदापद्महस्तो गरुडारूढो सर्वलक्षणलक्षितो नारायणदेहे सराजारुक्मांगदलीनो बभूवेत्यादि कथनं.	५९
३७ यमनारायणयोः संवाद मोहिनीसमागम वर्णनं च.	६०
३८ मोहिनीं भस्मकरणं वर्णनं.	६२
३९ मोहिनी भस्मकरणानंतरं विप्रप्रसादनं वर्णनंचेति.	६३
४० मोहिन्यास्थानंनिर्णयास्तिथिविवरणम् विघ्नविनाशिनीद्वादशी माहात्म्य वर्णनंतस्याःप्रभावकथनं चेति.	६४

इति

श्रीककारादिकालीकासहस्रनाम साङ्गोपाङ्ग

अद्य भवदग्रे हर्षदायकद्रव्यं नीत्वा ह्युपस्थितोस्मि. श्रीगुह्यकाल्या कृपया भवतां पूर्णसहायेन श्रीककारादिकालिकासहस्रनामाख्यपुस्तकं मुद्रितमस्ति सान्तिकाल्या ह्यनेकसहस्रनाम्नो लभ्यन्ते किन्त्वयं ककाराद्यप्रभृति नमुद्रित निम्नलिखितमप्यतिदुर्लभ दैववसाल्लब्धाप्यशुद्धत्वात् पाठकरणेतिकष्टः सदुखदूरीकरणायासीतिवर्षसंमितवृद्धेनापि पाठकरणेसमर्था भवेयुरित्यासयेन मुक्ताफलवन्मनोहर स्थूलाक्षरकीलकैः सुष्टुपत्रेषु ककारादिकालिकासहस्रनामाभिधानं मुद्रितमस्ति तस्मादार्यवरैरस्मिन्ग्रन्थे अवश्य प्रीतिपूर्वकसुदृष्टिकरिष्यन्ति मूल्यमपि सर्वेषां सुखेच्छया विदेशीयकागजेषु दशाणकाः स्वदेशीयकागजेषु द्वादशाणकाः स्थापितमस्ति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ ॥ पान्तुवो जलदश्यामा शार्ङ्गज्यापातकर्कशाः ॥ त्रैलोक्य मण्डपस्तंभा श्चत्वारोहरिवाहनः ॥ सुरासुरशिरोरत्न निर्घृष्ट मणिरञ्जितम् ॥ हरिपादांबुज द्वंद्वमभीष्टप्रदमस्तुवः ॥ मान्धाताउवाच ॥ पापेंधनस्यघोरस्य शुष्कार्द्रस्य तुम्भूरिशः ॥ कोवह्निर्दहनेतेषां तद्भवान्बक्तुमर्हसि ॥ नाज्ञातंत्रिषुलोकेषु चतुर्मुखगृहौजसः ॥ विद्यतेतवविप्रेन्द्र त्रिविधश्चसुनिश्चितम् ॥ अज्ञातं पातकंशुष्कं ज्ञातमार्द्रमुदाहृतम् ॥ एष्यवाप्यथवातीतं बर्त्तमानंचतद्भवेत ॥ बह्निनाकेनतद्भस्म भवेदेतद्भ्रवीहिमे ॥ बशिष्ठउवाच ॥ श्रूयतां नृपशार्दूल बह्निनायेननिर्दहेत ॥ शुष्कार्द्रपातकंघोरं एष्यातीतसमुद्भवम् ॥ संप्राप्य बासरंविष्णो र्योनरःसंयतेन्द्रियः ॥ उपवासपरोभूत्वा पूजयेन्मधुसूदनं ॥ मान्धातर्दानशीलश्च रात्रौजागरणान्वितः ॥ विशोधयति पापानि कितवश्चधनंयथा ॥ एकादशीसमुत्थेन बह्निनापातकेंधनम् ॥ भस्मतांयातिराजेन्द्र आजन्ममरणोद्भवम् ॥ नेदृशंपावनंकिञ्चित् नराणामिहविद्यते ॥ यादृशंपद्मनाभस्य दिनंपापप्रणाशनम् ॥ तावत्पापानिदेहेस्मिन् तिष्ठन्तिमनुजाधिप ॥ यावन्नोपवसेज्जन्तुः पद्मनाभदिनंशुभम् ॥ अश्वमेधसहस्राणि राजसूयशतानिच ॥ एकादश्युपवासस्य कलांनार्हतिषोडशीं ॥ एकादशेन्द्रियैःपापं यत्कृतंभवतिप्रभो ॥ एकादश्युपवासेन तत्सर्वंविलयंब्रजेत् ॥ एकादशीसमंपुण्यं पापत्राणंनविद्यते ॥ व्याजेनापिकृताराजन् नदर्शयतिभास्करी ॥ सर्वसौख्यप्रदाह्येषा सर्वारोग्यप्रदायिनी ॥ सुकलत्रप्रदाह्येषा राजन्पुत्रप्रदायिनी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नगङ्गानगयाभूप नकाशीनचपुष्करम् ॥ नचापिकौरवंक्षेत्रं नरेवानचदेविका ॥ यमुना चन्द्रभागाच पुण्याभूय हरेर्दिनात् ॥ अनायासेनराजेन्द्र प्राप्यतेवैष्णवंपदम् ॥ रात्रौजागरणंकृत्वा समुपोष्यहरेर्दिनम् ॥ दशैवमातृकेपक्षे दशराजेन्द्रपैतृके ॥ प्रियायादशपक्षेषु पुरुषानुद्धरेन्नरः ॥ आत्मनासहराजेन्द्र नयनेवैष्णवंपदम् ॥ सर्वपापविनिर्मुक्तो विष्णुलोकेवसेन्नरः ॥ चिन्तामणिमपिह्येषा अथवापिनिधिःसमा ॥ सकलपपादपप्रख्या वेदवाक्योपमातथा ॥ द्वादशीतिप्रपन्नाहि नरानरवरोत्तमः ॥ तेद्वंद्ववाहवोजाता नागारिकृतकेतना ॥ तद्विद्यापीतवस्त्राहि प्रयांतिहरिमन्दिरम् ॥ एषप्रभावोहिमया द्वादश्यापरिकीर्तिता ॥ पापेन्धनस्यघोरस्य पावकाख्योमहीयते ॥ हरेर्दिनंसदायोष्यं नरैर्धर्मपरायणैः ॥ यदिच्छेद्विपुलान्कामान् पुत्रपौत्रादिकांस्तथा ॥ हरिदिनमुपवासी योनरःसंयतात्मा प्रविशतिनपुनर्वै भूपकोशेजनन्या ॥ बहुवृजिनसमेतः कामभोगाविभूतो व्रजतिपदमचिन्त्यं लोकवन्द्यस्यविष्णोः ॥ २६ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते द्वादशीमाहात्म्ये प्रथमोध्यायः ॥ १ ॥ छ छ

वशिष्ठउवाच ॥ इममेवमहाप्रश्नं नैमिषारण्यवाशिनः ॥ पप्रच्छुरमलासूतं व्यासशिष्यंमहामुनिम् ॥ सचस्पृष्टोमहातेजा एकादश्याःसविस्तरम् ॥ माहात्म्यंकथयामास उपवासविधिक्रमात ॥ तद्वाक्यंसूतपुत्रस्य श्रुत्वाद्विजवरोत्तमाः ॥ माहात्म्यंचक्रिणोर्हस्य सर्वपापःप्रशान्तये ॥ पुनःपप्रच्छुरमलाः सूतंपौराणिकंतदा ॥ अष्टादशपुराणानि भवाञ्ज्ञानातिमानद ॥ महाभारतमुक्ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नि सकासात्कालिजस्यतु ॥ तत्रास्तियत्रवेदेषु पुराणेषुस्मृतिष्वपि ॥ चरितेरघुनाथस्य शतकोटिप्रविस्तरे ॥ सोस्माकंसंशयःक-
श्चिद् हृदयेपरिवर्त्तते ॥ तद्भवानचिरेणेह प्रब्रवीतुयथार्थतः ॥ तिथेःप्रान्तमुपोष्यंहि अहोस्मिन्मूलमुच्यताम् ॥ दैवेपित्रेसमाख्या-
हि नावेद्यंविद्यतेतव ॥ सूतउवाच ॥ तिथेःप्रान्तंसुराख्यंहि उपोष्यंकवयोविदुः ॥ पैत्र्यंमूलंतिथेःप्रोक्तं शास्त्रज्ञै धर्मकोविदैः ॥
अतःप्रान्तमुपोष्यंति तीर्थधर्मफलेसवः ॥ मूलंहिपितृतृप्त्यर्थं तिथेःप्रोक्तंमनीषिभिः ॥ पूर्वविद्धाप्रकर्त्तव्या तृतीयाषष्ठिसंयुताः ॥
अष्टम्येकादशीभूता धर्मकामार्थवांछसि ॥ पूर्वविद्धाद्विजश्रेष्ठाः कर्त्तव्यासततंसदा ॥ दर्शश्चपौर्णमासीच पितुःसांवत्सरंदिनम् ॥
पूर्ववद्धेमकुर्वाणो नरकंप्रतिपद्यते ॥ हानिश्चसन्ततेःप्रोक्ता दौर्भाग्यंसमवाप्नुयात् ॥ एतच्छ्रुतंमयाविप्राः कृष्णद्वैपायनात्पुरा ॥
ऋषीणांधर्मसंवाद स्तिथिसंदेहतेतथा ॥ आदित्योदयवेलायां यास्तोकापितिथिर्भवेत् ॥ पूर्णासात्वनुमन्तव्या प्रभूतानोदयंविना ॥
पारणेमरणेनृणां तिथिस्तात्कालिकीमता ॥ पैत्र्येस्तमपवेलायां स्पृशत्युच्चैवगम्यते ॥ नतत्रोदयनीग्राह्या दैवेत्युदयिनीतिथिः ॥
षडहंशोधयेत्प्राज्ञ स्तिथिंदैवज्ञचिन्तकान् ॥ तिथेःप्रमाणंविप्रेन्द्राः क्षपाकरदिवाकरौ ॥ पूर्वायासंगदोषेण नोयोष्यास्नानपूजने ॥
वर्जयन्तिनरास्तज्ज्ञायासान्तुचतुरोद्विजाः ॥ तदूर्ध्वंस्नानपूजादि कर्त्तव्यंतदुपोष्यतेः ॥ नदिवाशुद्धिमाप्नोति तदारात्रौविधीयते ॥
दिनकर्मतुशेषंहि कर्त्तव्यंसर्वरीमुखे ॥ विधिरेष समाख्यातो नराणामुपवासिनाम् ॥ अन्यायामपिविप्रेन्द्रा द्वादश्यामरुणोदये ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नानार्चनक्रियाकार्या दानहोमादिसंयुता ॥ त्रयोदश्यांहिशुद्धायां पारणेपृथिवीफलं ॥ शतयज्ञादिकंचापि नरःप्राप्नोत्यसंशयं ॥
एतस्मात्कारणाद्विप्राः प्रत्यूषेस्नानमाचरेत् ॥ पितृतर्पणसंयुक्त मल्पांदृष्ट्वैवद्वादशीं ॥ महाहानिकराह्येषा द्वादशीलंघितानृणां ॥
करोतिधर्माहरणमस्नातेच सरस्वती ॥ क्षयेवाप्यथवावृद्धौ संप्राप्ते हरिवासरे ॥ उपोष्यद्वादशीपुण्या पूर्वविद्धां विवर्जयेत् ॥ ऋ-
षयऊचुः ॥ यदानप्राप्यतेसौते द्वादश्याःपूर्वसंभवा ॥ तदोपवासोहिकथं कर्त्तव्योमानवैर्वद ॥ उपवासदिनंसूत यदाभवतिपूर्वया ॥
द्वितीयेह्नियदानस्यात् स्वल्पाप्येकादशीतिथिः ॥ सन्देहेतत्रसञ्जाते द्वादश्येकादशीभवेत् ॥ तत्रोपवासोविहितः कथंतद्वदसूतज ॥
सूतउवाच ॥ यदानप्राप्यतेविप्रा द्वादश्यांपूर्ववासरः ॥ रविचक्रार्द्धमात्रापि तदोपोष्यं परंदिनम् ॥ बह्वागमविरोधेषु विवदत्सु
द्विजेषुच ॥ उपोष्याद्वादशीपुण्या त्रयोदश्यांतुपारणम् ॥ एकादश्यांतुविद्धायां संप्राप्तेश्रवणेतथा ॥ सोपोष्याद्वादशीपुण्या स-
र्वपापक्षयावहा ॥ एषवोनिर्णयःप्रोक्तो मयाशास्त्रविनिश्चयात् ॥ किमन्यच्छ्रोतुकामाहि तद्भवन्तो वदन्तुमे ॥ ऋषयऊचुः ॥ यु-
गादीनांविधिंसूत वदस्ववदतांवर ॥ रवेःसंक्रमयोगानां नावेद्यंविद्यतेतव ॥ अमावास्याष्टकाकार्या सापिचैकानिरर्थकैः ॥ ए-
वंनसंशयंस्पृष्ठो वक्तुमर्हसिसूतज ॥ सूतउवाच ॥ द्वेशुक्लेद्वेतथाकृष्णे युगाद्ये कवयोविदुः ॥ शुक्लेपूर्वाह्निकेग्राह्ये कृष्णेग्राह्येपरा-
ह्णिके ॥ अयनंदिनभोगाढ्यं संक्रमःषोडशःकला ॥ पूर्वाङ्कदक्षिणेभागे अतीतेचोत्तरायणे ॥ मध्यकालेतुविषुवे उदयास्त्य:प्रकी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्त्तितः ॥ ज्ञात्वातिथिंनराःसम्यक् संवत्सरनिवेदिताम् ॥ कर्त्तव्यउपवासस्तु अन्यथा नरकंव्रजेत् ॥ पूर्वविद्धांप्रकुर्वाणो नरोधर्म निकृन्तनी ॥ सन्ततेस्तुविनाशाय संपदोहरणायच ॥ परवेधोपिविप्रेन्द्रा दशम्येकादशींत्यजेत् ॥ सुरायाविन्दुनास्पृष्टंगंगांभइव संत्यजेत् ॥ श्वदृष्ट्यापञ्चगव्यंच दशम्यादूषितांत्यजेत ॥ एकादशीद्विजश्रेष्ठाःपक्षयोरुभयोरपि ॥ पूर्वविद्धाःपुरादत्ता तिथयःकुशकेतुना ॥ दानवेभ्योद्विजश्रेष्ठाः प्रीणनार्थमहात्मना ॥ अकालेयद्भवेद्दत्तं अपात्रेचद्विजोत्तमाः ॥ सक्रोधैश्चैवयद्दत्तं तद्दत्तमसुरेष्वै ॥ यदुच्छिष्टेनदत्तंवै यद्दत्तंपतितेषुच ॥ स्त्रीजितेषूच यद्दत्तमसूरेषुच यद्भवेत् ॥ यदेकवाससादत्तं यद्दत्तं जलवर्जितम् ॥ पुनःकीर्त्तनसंयुक्तं तद्दत्तमसुरेष्ववै ॥ तस्माद्विप्रानविद्धाहि कर्त्तव्यैकादशीक्वचित् ॥ विद्धाहन्तिपुरापूर्वा श्राद्धेचवृषलीपतिः ॥ जप्तंदत्तंहुतंस्नातं तथापूजाकृतंहरेः ॥ पूर्ववेधक्षयंयाति तमःसूर्योदयेयथा ॥ जीर्णंपतिंयौवनगर्विता यथा त्यजन्तिनार्यो झषकेतनार्दिता ॥ तथाहिवेधं विबुधात्यजन्ति तिथेर्द्विजाधर्म विशुद्धयेसदा ॥ ४८ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गद चरिते तिथिविवरणं नाम द्वितीयोध्यायः ॥ २ ॥ छ छ छ छ छ छ छ छ

ऋषयऊचुः ॥ विस्तरेणसमाख्याहि विष्णोराराधनक्रियां ॥ ययासन्तोषमायाति प्रददातीसमीहितम् ॥ पूजितापरयाभक्त्या पवित्रैरप्युपक्रमै ॥ लक्ष्मीकान्तोजगन्नाथो निःशेषाघौघनाशनः ॥ सूतउवाच ॥ भक्तिग्राह्योहृषीकेशो नधनैर्धरणीसुराः ॥ भक्त्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संपूजितोविष्णुः प्रददातिसमीहितम् ॥ तस्माद्विप्राःसदाभक्तिः कर्त्तव्याचक्रपाणये ॥ जलेनापिजगन्नाथः पूजितःकेशिहाहरिः ॥
परितोषंव्रजत्याशु तृषार्त्तःसुजलैर्यथा ॥ अत्रापिश्रूयतेविप्राः आख्यानंपापनाशनम् ॥ रुक्माङ्गदस्यसंवादं ऋषिणागौतमेनह ॥
आसीद्रुक्माङ्गदोराजा सार्वभौमश्रियान्वितः ॥ भक्तःश्रीरक्षयेदेव नित्यतृप्तेनिरञ्जने ॥ नान्यंपश्यतिदेवेशात् पद्मनाभान्महीप-
तिः ॥ वारणंपट्टनंयज्ञे ददातिहरिवासरे ॥ अष्टवर्षाधिकोमर्त्यं स्त्वशीतिर्नहिपूर्यते ॥ योभुङ्क्तेमामकेराष्ट्रे विष्णोरहनि पापकृत ॥
समेबध्यश्चदण्ड्यश्च निर्वास्येविषयाद्वनम् ॥ पितावायदिवापुत्रो भार्यावाप्यथवासुहृत् ॥ पद्मनाभदिनेभुङ्क्ते निग्राह्योदस्युवद्भ-
वेत् ॥ दद्ध्वंविप्रमुख्येभ्यो श्नायध्वंजाह्नवीजले ॥ एवंमद्वचनंकुर्वन् नान्नंभुनक्तुमामकं ॥ वासरेवासरेविष्णोः शुक्लपक्षेमहीप-
तिः ॥ अशुक्लेतुविशेषेण पटहंवादयत्यसौ ॥ एवंप्रघुष्टपटहे सार्वभौमेद्विजोत्तमाः ॥ गच्छाद्भिःसंकुलोमार्गः कृतोलोकैर्हरेर्द्विजाः ॥
येकेचिन्निधनंयान्ति भूपालविषयेनराः ॥ प्रमदावाद्विजश्रेष्ठा स्तेयान्तिहरिमन्दिरम् ॥ अवश्यंवैष्णवोलोकः प्राप्यतेवैनरैर्ध्रुवं ॥
व्याजेनापिद्विजाःकृत्वा द्वादशींपापनाशिनीं ॥ सोश्नातिपार्थिवंपापं योश्नातिहरिवासरे ॥ प्राप्नोतिपरमंधर्मं योनाश्नातिहरेर्दि-
ने ॥ ब्राह्मणोनैवहन्तव्यो इत्येषा वैदिकीश्रुतिः ॥ एकादश्यांनभुञ्जीत पक्षयोरुभयोरपि ॥ वैलक्ष्यमगमद्राजा रविसूनुर्द्विजोत्त- ॥ ३ ॥
माः ॥ लेख्यकर्मणि विश्रान्त श्चित्रगुप्तोभवत्तदा ॥ मार्जितानिचलेख्यानि पुण्यपापोद्भवानिच ॥ गच्छद्भिर्वैष्णवंलोकं स्वक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्मस्थैर्जनैः क्षणात् ॥ शून्यास्तुनरकाःसर्वे पापप्राणि विवर्जिताः ॥ भग्नोयाम्योभवन्मार्गो द्वादशादित्यतापितः ॥ सर्वेपिगरु-डारूढा जनायांतिहरेक्षयम् ॥ दिवौकसस्तुयेलोकाः शून्यासर्वेतदाभवत् ॥ त्यक्त्वैवपितृदेवेभ्यो तीर्थदानादि सत्क्रियाः ॥ मुक्तै-कांद्वादशींमर्त्या नान्यंजानन्तिचेदृशीं ॥ शून्येत्रिविष्टपे जाते शून्येषुनरकेषुच ॥ नारदोधर्मराजानं गत्वाचेदमभाषत ॥ ना-क्रन्दः श्रूयते कस्मान्नराणां नरकेतव ॥ नचापिक्रियते लेख्यं किञ्चिद्दुष्कृतकर्मणाम् ॥ चित्रगुप्तो मुनिरिव स्थितोयं मौनसंयु-तः ॥ कारणं ब्रूहि राजेन्द्र नयान्ति तव मन्दिरम् ॥ मानवाः पापकर्माणो कलिमाया समन्विताः ॥ एवमुक्ते तु वचने नारदेन महात्मना ॥ प्राह वैवस्वतो राजा किञ्चित् दैन्य समन्वितः ॥ आर्य नारद भूपालः पृथिव्यां सांप्रतंस्थितः ॥ सद्भिभक्तो हृषीकेशे पुराणे पुरुषोत्तमे ॥ पुरोधयति विप्रेन्द्र सकलं पटहेनहि ॥ नभोक्तव्यं नभोक्तव्यं संप्राप्ते हरिवासरे ॥ यः कश्चिन्मनुजो भुङ्क्ते समेदण्ड्यो भविष्यति ॥ तद्भयाद्विजनाःसर्वे द्वादशींसमुपासते ॥ व्याजेनापिद्विजश्रेष्ठ द्वादशीसमुपो-षिता ॥ प्रयातिवैष्णवंलोकं दाहप्रलयवर्जितम् ॥ द्वादशीसेवनाल्लोकाः प्रयान्तिहरिमन्दिरम् ॥ तेनराज्ञाद्विजश्रेष्ठ सर्गोल्लुप्तो मयाधुना ॥ कृताहिनरकाःशून्या लोकाश्चत्रिदिवौकसां ॥ विश्रान्तंलेखकंलेख्यं लिखितंमार्जितंजनैः ॥ एकादश्युपवासस्य माहात्म्यंत्वीदृशंमुने ॥ ब्रह्महत्यादिपापानि नभुक्तानिजनैर्द्विज ॥ समुपोष्य दिनंविष्णोः प्रयान्तिपरमांगतिं ॥ सोहंकाष्ठम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योभूत्वा मृगाधिपइवाधुना ॥ निर्विषोनेत्रकर्णौवा सन्ध्याहीनोथवाद्विजः ॥ स्त्रीजितस्तुपुमान्यद्वत् षण्डोवाप्रमदापतिः ॥ त्य-
क्तुकामस्त्वहंब्रह्मन् लोकपालत्वमीदृशम् ॥ यास्यामि ब्रह्मभवनं धात्रेकथयितुंस्वयं ॥ निर्व्यापारोनियोगीतु नियोगे तिष्ठतेतु
यः ॥ स्वामिवित्तंसमश्नातः सयातिनरकंध्रुवम् ॥ सूतउवाच ॥ एवमुक्त्वायमोविप्रा नारदेनसमन्वितः ॥ ययौविरिंचिभवनं चि-
त्रगुप्तान्वितोविभुः ॥ सदर्दशसमासीनं मूर्त्तामूर्तैःसमावृतम् ॥ वेदाश्रयंजगद्बीजं सर्वेषां प्रपितामहं ॥ स्वयंभूताञ्जनिलयमों-
काराक्षरमव्ययं ॥ शुचिःशुचिपरंहंसं तुरीयंब्रह्मलाञ्छनं ॥ उपास्यमानंविबुधै र्लोकपालैर्दिगीश्वरैः ॥ इतिहास पुराणैश्च वेदैर्वै
विग्रहस्थितैः ॥ मूर्त्तिमद्भिःसमुद्रैश्च नदीभिश्चसरोवरैः ॥ देहवद्भिस्तथावृक्षै रश्वत्थाद्यैरशेषतः ॥ वापीकूपतडागैश्च मूर्तिमद्भिश्च
पर्वतैः ॥ अहोरात्रैस्तथापक्षै र्मासैःसंवत्सरैर्विभुः ॥ कलाकाष्ठानिमेषैश्च ऋतुभिश्चायनैर्युगैः ॥ मन्वन्तरैस्तथाकल्पै र्निमेषोन्मेष-
कैस्तथा ॥ ऋक्षैर्योगैश्चकरणैः पौर्णमास्यान्तमिक्षपैः ॥ सुखैर्दुःखैर्द्विजश्रेष्ठा लाभालाभैर्जयाजयैः ॥ अश्वमेधादिभिर्यज्ञै र्मूर्त्तिम-
द्भिरुपासितं ॥ सत्यानृताभ्यांपापेन धर्मेणोपास्यतेविभुः ॥ कर्मबद्धैश्चपुरुषै रात्मभूतैरुपास्यते ॥ सत्वेनरजसाचैव तमसाचपि-
तामहं ॥ शान्तमूढातिघोरैश्च विकारैःप्राकृतैर्बिभुः ॥ इन्द्रियैर्विषयैश्चैव मूर्त्तिमद्भिरुपास्यते ॥ वायुनादेवदेवेशः श्लेष्मपित्तादि-
भिस्तथा ॥ आनन्दरूपेणविभुः परमेनसमन्वितः ॥ अनुक्तैरपिभूताद्यैः संवृतालोककृद्विभुः ॥ देवर्विप्रैर्मुनिवरै रितिहासैः स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मभिः ॥ दुरुक्तकटुवाक्यैश्च मूर्त्तिमद्भिरुपास्यते ॥ तेषांमध्येविशच्छौरिः सचीदेववधूर्यथा ॥ विलोकयं धशस्पृष्टं नालमुक्तंतु किञ्चन ॥ तंप्रविष्टं यमंदृष्ट्वा सकायस्थंसनारदम् ॥ तेविस्मितामिथश्चोचुः किमयं भास्करिरित्विह ॥ संप्राप्तो लोककर्त्तारं द्रष्टुंदेवं पितामहं ॥ निर्व्यापारःक्षणमपि योयंनास्तेरवेःसुतः ॥ सोयमद्यागतःकस्मात् कच्चित्क्षेमंदिवौकसां ॥ आश्चर्यातिशयंमन्ये सं-मार्जितपटस्त्वयं ॥ सलेखकस्तुसंप्राप्तो दैन्येनमहताावृतः ॥ नकेनाचित्पटोह्यस्य मार्जितोधर्मभूरिणा ॥ यन्नदृष्टंश्रुतंवापि तदि-हैवप्रदृश्यते ॥ एवंकथयतांतेषां भूतानां भूतशासनः ॥ निपपातप्रतोभूमौ ब्राह्मणोरविनन्दनः ॥ भूलंकृतोयमाशाखी त्राहि त्राहि रुदाभिच ॥ पटाभूतास्मि देवेश संमार्जितपटःकृतः ॥ त्वयानाथेनसकलं पश्यामिकमलासन ॥ सूतउवाच ॥ एवंब्रुव-न्मुनिश्रेष्ठो वभूवद्विजसत्तमाः ॥ ततोहलहलाशब्दः सभयं समपद्यत ॥ योहिनोदयते सर्वान् लोकांस्थावरजङ्गमान् ॥ सोयं रोदितिदुःखार्त्तः कस्माद्वैवस्वतोयमः ॥ सत्येयंलौकिकीगाथा सर्वथाप्रतिभातिनः ॥ जनसंतापकृत्ताप मचिरेण प्रपद्यते ॥ न-हिदुष्कृतकर्त्ताहि नरःप्राप्नोतिशोभनं ॥ ततोनिवारयामास वाह्यस्तेषां वचस्तदा ॥ लोकानांसमवेत्तानां मतंज्ञात्वाहि वेधसः ॥ निवार्यलोकसंलापं शनैरुत्थापयंहरिः ॥ भुजाभ्यां साधुपीनाभ्यां लोकमूर्तिरुदारधीः ॥ विह्वलं तस्यचायान्तमासने संन्यवेश-यत ॥ सकायस्थमुवाचेदं व्योमव्यापी रवेःसुतं ॥ केनत्वमभिभूतोसि केनस्थानाद्विवासितः ॥ केनापमार्जितोदेव पटोलोक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ना०पु० पटस्तव ॥ ब्रूहिसर्वमशेषेण कुशकेतोस्त्वमग्रतः ॥ यःप्रभुस्तात सर्वेषां सतेकर्त्तासमुन्नतिं ॥ अपनेष्यति मार्त्तण्डो दुःखन्तेह- अ० ४
॥ ८ ॥ दिसंस्थितं ॥ सएवमुक्तस्तु समीरणेन दिनेशसूनुस्तमथाबभाषे ॥ विलोक्यवक्त्रं कुशकेतुसूनो सगद्गदं मन्दमुवाचमन्दः ॥
६६ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते यमपरितापो नामः तृतीयोऽध्यायः ॥ ३ ॥ ७ ७ ७ ७ ७
यमउवाच ॥ शृणुमेवचनं शंभो पितामहपितामह ॥ मरणादधिकंदेव यत्प्रतापस्यखण्डनं ॥ नियोगीनांनियोगंयः करोतिकम-
लासन ॥ प्रभोर्वेत नमश्नाति सभवेत्काष्ठकीटकः ॥ योहिलोभाद्धरेर्वित्तं प्रजाभ्योवामहामते ॥ नियोगीनरकंयाति यावत्क-
ल्पशतत्रयं ॥ निस्पृहोनाचरेद्यस्तु नियोगंपद्मसंभव ॥ कृमिकूपेखलुलुठन् सदासनरकेवसेत् ॥ आत्मकार्यपरोयस्तु स्वामिकार्यं
विलुंपति ॥ भवेदश्मनिपापात्मा आखुः कल्पशतत्रयं ॥ नियोगीयस्तुभूत्वावै स्ववेश्मनिचयोजयेत् ॥ भक्त्यावैकर्मकरणे मा-
र्जारो जायतेनरः ॥ सोहंदेवतवादेशात् प्रजाधर्मेणशासयन् ॥ पुण्येनपुण्यकर्त्तारं पापान्यायेनकर्मणा ॥ सम्यग्विचार्यमुनिभि
र्भवद्भिश्चसदाप्रभो ॥ कल्पादौवर्त्तमानस्ययावदद्यदिनंगतं॥ सोहंत्वदीयंहिविभो नियोगंनैवसक्नुयां ॥ रुक्माङ्गदेनतेभग्नो नि-
योगोभूभुजाक्षितौ ॥ भयाद्यस्यजगन्नाथ पृथिवी सागरांबरा ॥ नभुङ्क्तेवासरेविष्णोः सर्वपापप्रणाशने ॥ विहायसर्वधर्मांस्तु वि-
हायपितृपूजनं ॥ विहायदेवपूजातु सर्वतीर्थादिसत्क्रियां ॥ योगसांख्यावुभौत्यक्त्वा तथाप्राणनिरोधनं ॥ त्यक्त्वास्वाध्यायहोमौ ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु कृत्वापापानिभूरिशः ॥ प्रयाति वैष्णवंलोकमुपोष्य हरिवासरे ॥ मनुजाःपितृभिःसार्द्धं तथैवचपितामहैः ॥ तेषामपीहपित-
रः पितृणांपितरस्तथा ॥ तथामातामहायान्ति मातुर्येजनकास्तथा ॥ तेषामपिजनेतारो जनितृणांचपूर्वशः ॥ एतद्दुःखं पुन-
र्देव ममस्तकभेदनं ॥ यत्पूर्वैपितरोयान्ति मार्जयित्वा लिपिंमम ॥ पितृणांवीजयोयेस्युर्द्धात्र्याःकुक्षौ धृताविभो ॥ यदेकेन
कृतंकर्म तदेकेनैवभुज्यते ॥ तंनिरस्यकृतंदेव वीजंधान्य समुद्भवं ॥ तारयेत्सउभौपक्षौ ध्वंसितोयस्यविग्रहः ॥ वीजभोक्ताभवे-
त्सोमो धाताधार्यं विसोदरे ॥ एतस्यात्सक्षयुग्मंतु वारयेन्नरपुंगवः ॥ नभार्यायाभवेद्बीजं नभार्याकुक्षिधारणं ॥ कथंतस्याजग-
न्नाथ पक्षोयातिपरंपदं ॥ यामातुः पुण्यमाहात्म्यं नूनंमेशिरसोऽव्यथा ॥ नमेप्रयोजनंदेव योगेनशद्दशेनवै ॥ एकादश्युपवासी-
यः समांत्यक्ताहरिंव्रजेत् ॥ कुलत्रयं समुद्धृत्य स्वात्मनासहपङ्कज ॥ त्यक्तातुममार्गंतु प्रयान्ति हरिमन्दिरं ॥ नयज्ञैस्तादृशं
देव गतिमाप्नोति मानवः ॥ नतीर्थैर्नापिदानाद्यै र्नव्रतैर्विष्णुवर्जितैः ॥ नजलैः पावकैश्चापि मृतःप्राप्नोतितांगतिं ॥ योगैर्वासं
युगैर्वापि भृगोर्वा पतनैस्तथा ॥ यादृशंसमवाप्नोति उपोष्यहरिवासरं ॥ गतिंगतिमतांश्रेष्ठ सत्यमेतदुदीरितं ॥ हरेर्दिनेधातृफ-
लांगलिप्तो विमुच्यवांछारसभोजनोद्भवं ॥ प्रयातिलोकं धरणीधरस्य विभ्रष्टकर्मापिमनुष्यजन्मा ॥ सोहंनिरासस्तु विहीनकर्मा
तवागतःपादसरोजयुग्मं ॥ विज्ञप्तमत्रादि यदाप्तकालं कुरुष्वसर्गस्थितिनाशहेतोः ॥ येस्युःसदापापकृतो विहीना यन्मागकैर्भू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तगणैर्मनुष्याः ॥ नियन्त्रिताःशृङ्खलरज्जुबन्धनैः समीपगास्तेवशगाभवेयुः ॥ भग्नस्तुमार्गो रवितापयुक्तः सदुःखदातातितरांज-
नेभ्यः ॥ विमुच्यकुंभी सकलाजनोघाः प्रयान्ति तद्धाम परात्परस्य ॥ २६ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते य-
॥ ६ ॥ म विलापोनाम चतुर्थोध्यायः ॥ ४ ॥ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७
यमउवाच ॥ दृश्यतांसमनुप्राप्तः पन्थादेवस्यचक्रिणः ॥ कुत्सितैर्गच्छमानैस्तु नरैस्त्रिभुवनार्चितैः ॥ अप्रमाणमहंमन्ये लोकंवि-
ष्णोर्जगत्पते ॥ योह्यपुण्यजनौघैस्तु नसंघोयातिखर्वतां ॥ माधवैःसेवनेहंस समस्तेन पितामह ॥ स्वकर्मस्थाजनाः सर्वे शुचयो
व्याप्यवृत्तयः ॥ उपोष्यवासरंविष्णो र्लोकंयान्ति नृपाज्ञया ॥ सोस्माकंचमहाशत्रु र्भवतांचविशेषतः ॥ निग्राह्योयंजगन्नाथ भ-
वेद्दण्ड्योमहीपतिः ॥ तेनवर्षसहस्रेण शासनात्क्षितिमण्डलं ॥ अप्रमेयोजनोनीतो वैकुण्ठंहरिवल्लभं ॥ आरोपयित्वागरुडे कृत्वादे-
हंचतुर्भुजं ॥ पीतवस्त्रपरीधानं स्रग्विणं चारुलोचनं ॥ यदिस्थास्यतिदेवेशे सोद्यत्वांमाधवप्रियः ॥ समस्तमेष्यतेलोकः पार्थि-
वोनात्रसंशयः ॥ एवं दण्डपटोह्येष तवपद्मांनियोजितः ॥ लोकपालत्वमेतत्तु मार्जितंतेनभूभुजा ॥ रुक्माङ्गदेन देवेश ध-
न्यासासधृतोयया ॥ सर्वदुःख विनाशाय मात्राजातोगुणाधिकः ॥ किमपत्येनजातेन मातुःक्लेशकरेणहि ॥ यो नतापयतेशत्रुं
ज्येष्ठमासिविभास्करः ॥ वृथास्त्रीभाववन्ध्यासौ जातावेवक्तृपुरुषः ॥ प्रोच्यते मातृहासद्भि र्वृथातस्यैवजीवितं ॥ यस्यनस्फुरतेकी- ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्ति र्घनस्थेवशतह्रदाः ॥ यःपितुर्नोद्धरेत्पक्षं विद्ययावावलेनवा ॥ मातुर्जठरजोरोगः सप्रसूतोधरातले ॥ धर्मेचार्थेचकामेच प्रती-
तोयोभवेत्सुतः ॥ पापह्रासस्यते सद्भि र्मद्दूतागोचरोहिसः ॥ एकैत्रवीरस्सूलोंके विरिंचेनात्रसंशयः ॥ ययारुक्मांगदोजातो म-
ल्लिपेमर्जिनायवै ॥ नेदंव्यवसितंदेव केनचित्क्षितिपेनहि ॥ पुराणेपि जगन्नाथ नश्रुतंपटमार्जनं ॥ सोहंनजीवामि जगत्पतेद्य
दृष्टाक्षितीशं हरितत्परंतं ॥ प्रवादयन्तं पटहंसुघोरं प्रलोपयन्तं ममदेशमार्गं ॥ १७ ॥ इतिश्री लघुना० रु० पञ्चमोध्यायः ॥ ५ ॥
ब्रह्मोवाच ॥ किमाश्चर्य्यंत्वयादृष्टं कथंवाखिद्यतेत्वया ॥ सद्गुणेष्वपियस्तापः सतापोमरणांतिकः ॥ यस्योच्चारणमात्रेण प्राप्यतेपर-
मंपदं ॥ तद्रुपोष्यकथंशौरे नगच्छति नरोदिवं ॥ एकोपिकृष्णस्यकृतःप्रणामो दशाश्वमेधावभृथनतुल्यः ॥ दशाश्वमेधीपुनरेति
जन्म कृष्णप्रणामी नपुनर्भवाय ॥ कुरुक्षेत्रेणकिंतस्य किंकाश्यासेवयाथवा ॥ जिह्वाग्रेवर्त्ततेयस्य हरिरित्यक्षरद्वयं ॥ ब्राह्मणःस्वा
पचींगच्छन्विशेषेणरजस्वलां ॥ अश्नातिसुरयापक्वं मरणेहरिमुच्चरन् ॥ प्राणहिंसारतासर्वे मिथ्यावादसमन्विताः ॥ अभक्षाशनसं
जातं विहायाघौघसंचयं ॥ हरेरुच्चारणादेव वैकुण्ठप्रातियांतिहि ॥ प्रयातिविष्णुसायुज्यं विमुक्तोभवकिल्विषैः ॥ यस्योच्चारेभवे-
न्मोक्षः कथंतस्याउपोषणैः ॥ येनासौगीयतेसोपि विन्दते पुरुषोत्तमं ॥ लीलयाप्राचरेदेवं शृण्वन्वापि जनार्द्दनं ॥ गंगांभःप्लुत
पुण्यत्वे सनरःसमतांव्रजेत् ॥ अस्माकंतुजगन्नाथो जनितापुरुषोत्तमः ॥ कथंदूषयासिप्राज्ञ तस्यवासरसेविनम् ॥ यस्त्वंनचूर्णि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंस्तैस्तु यस्त्वंवद्धोनतैर्द्दढं ॥ तदस्माकंकृतंमान मेतत्त्वंनविबुध्यसे ॥ योनियोगंनिजानाति नृपभक्तान्क्षिताविह ॥ सुहृत्स्वजन
संयुक्तः सतैर्निग्राह्यतेपुनः ॥ राजाज्ञानंनियंतव्या सापराधानियोगिना ॥ स्वामीप्रसादाच्छुद्धास्ते नियच्छेयुर्नियोगिनं ॥ त-
थाहिपापकर्त्तारः प्रणतायेजनार्द्दने ॥ कथंसंपादितातेषां भवान्स्याज्ञानु नन्दन ॥ शैवोभास्करभक्तोवा मद्भक्तोवा दिवाकरे ॥
करोतितवसाहाय्यं हरिभक्तो नभास्करे ॥ सर्वेषामेवदेवाना मादिष्ठामधुसूदनः ॥ मधुसूदनभक्तानां निग्रहोनोपपद्यते ॥ व्या-
जेनापिकृतायैस्तु द्वादशीपक्षयोर्द्वयोः ॥ अपमानेकृतेतैस्तु नतवाहंसहायवान् ॥ कृतेतुमार्गे तवसूर्य्यसूनो भवेदनीतिर्ममहर्ष
हन्त्री ॥ विपर्य्ययोब्रह्मसदानपुण्ये कृतेविमर्द्दे सहविष्णुभक्तेः ॥ १८ ॥ इतिश्रीलघुनारदीय पु० रु० चरितेब्रह्मवाक्यं नाम ६
सूतउवाच ॥ स्वयंभुवोवचश्श्रुत्वा नारदोत्थाप्रपीडितं ॥ नद्युक्तदेवदेवेश धर्मराजोमतिप्रभो ॥ वाक्यंत्वेतादृशंवक्तुं नियोगेतव
संस्थितं ॥ सधर्मस्थापनेयुक्तं पापानांनिग्रहेरतं ॥ यमउवाच ॥ प्राप्तंतातमयासर्वं तदंघ्रिनमिताविह ॥ नाहंयास्येपुनःकर्तुं नि-
योगंतवपद्मज ॥ प्रशासतिमहीपाले ह्याटकांगदसंज्ञके ॥ तमेकंदैवतंश्रेष्ठं संप्राप्ते हरिवासरे ॥ यदिचालयसेधैर्य्यां त्ततोहंतवकिं-
करः ॥ समेशत्रुर्महाशंभो तेनलुप्तःसदामम ॥ तमेकंभोजयत्वंहि कार्ष्णेहनि महीपतिं ॥ कृतकृत्योभविष्यामि गयापिण्डकृतो
यथा ॥ अद्यप्रभृतिदेवेश यैर्नरैःसंस्मृतोहरिः ॥ उपोषितस्ततोवापि ननियस्या पितामहं ॥ हरिरितिसकृदुच्च रन्तिदस्युच्छलव- ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शतोपिहियेजनाःकदाचित् ॥ जननिजठरमध्ये मुक्तमार्गा ममनालिपिंप्रविशन्तितेहिमर्त्या ॥ इत्युदीरितमाकर्ण्य देवर्षिर्नारद- स्तथा ॥ प्रेरयामासदेवेश संसारार्थयमस्यहि ॥ वशिष्ठउवाच ॥ नारदस्यचवाक्येन यमसंमाननायच ॥ चिंतयामास देवेशो विरिंचिःकुशलाञ्छनः ॥ चिन्तयित्वाक्षणंदेवः सर्वभूतैस्तुदूषितः ॥ भूतसंत्रासनंरूपं जगृहेसतदाविभुः ॥ तस्मिन्नुत्पादयामा- स प्रमदां लोकमोहिनीं ॥ सर्वयोषिद्वरादेवी मनसानिर्मिताविभोः ॥ सावभूवाग्रतस्तस्य सर्वालङ्कारभूषिता ॥ दृष्ट्वापितामह- स्तांतु रूपद्रविणसंयुता ॥ माचेतःपश्यतांह्येषा मामकं काममोहितं ॥ प्रत्यवायभयाद्ब्रह्मा चक्षुषीसंनिमीलयेत् ॥ नसरागेणम- नसा नसरागेणचक्षुषा ॥ चिन्तयेद्वा निरीक्षेद्वा जननींवाथवासुतां ॥ वधूश्चभ्रातृदारांवा गुरुभार्य्यांनृपप्रियां ॥ सयाति नरकं घोरंस्वसारं चिन्तयेच्चयः ॥ दृष्ट्वापिप्रमदांह्येता यःक्षोभंव्रजतेनरः ॥ तस्यजन्मकृतंपुण्यं बृथाभवतिनान्यथा ॥ प्रसङ्गेदशसाहस्रं पुण्यमायाति संक्षयम् ॥ पुण्यस्यसंक्षयात्पापः पाषाणाखुर्भवेद्ध्रुवं ॥ तस्मान्नचिन्तयेत्प्राज्ञो नैवरागेणवीक्षयत् ॥ जनन्यामपिपा- दौतुनदद्याद्वादशाब्दिकः ॥ सुतस्त्वभ्यंगकरणे किंपुनर्यौवनेस्थितः ॥ षष्ठ्यतीनांसुतोभ्यंगे नियुंजीतविचक्षणः ॥ वृद्धोवापियु- वावापि वध्वापादौ नदापयेत् ॥ उभयोःपतनंप्रोक्तं रौरवेंगारसंचये ॥ यावद्धूदर्शयेद्ध्यंगं विवृतंश्वसुरस्यहि ॥ पाणिपादस्मृतेग- जन् कृमिभिर्भक्षतेचसा ॥ वधूहस्तेनयःपापः पादशौचंकरोतिच ॥ स्नानंवाप्यथवाभ्यंगं विवृतंश्वसुरस्यहि ॥ सूचीमुखैःकृष्णर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कै भंक्षतेकल्पसंस्थितः ॥ तस्मान्नवीक्षयेन्नारीं वधूंवास्वसुतामपि ॥ साभिलाषेणमनसा पततेनरकेयतः ॥ एवंसंचिन्तयित्वाच
सूक्ष्मांदृष्टिंचकारह ॥ यदिदंवर्तुलंवक्रं सोन्नतंदृश्यतेशुभं ॥ अस्थिपञ्जरमेतद्धि चर्म्ममांसावृतंतथा ॥ वसामेदोस्थिनयने सोज्व-
लेस्त्रिशुसंस्थिते ॥ अत्युच्छ्रितामिदंमांसं यत्स्तनाख्यं व्यवस्थितं ॥ निर्मांसतांदर्शयति त्रिवलिजठराश्रिता ॥ पुनरेवाधिकांक्षि-
क्षमांसंजघनकर्म्माणि ॥ मूत्रद्वारमिदंगुह्यं यत्रमुग्धंजगत्त्रयं ॥ अपानवायुनाजुष्टं सर्वदैवातिकुत्सितं ॥ षडङ्गञ्चकृतातद्वज्जंघातद्व-
त्कृताध्रुवं ॥ गुल्फास्थितालितंमांसैः कथंसुन्दरतांव्रजेत् ॥ मांसमेदोवसासारं किंसारंदेहिनांवद ॥ विष्टामुत्रमयेकोषे कएवंरज्य-
तेबुधः ॥ एवंविरिंचिर्वहुधा विचार्य्यज्ञानचक्षुषा ॥ कृत्वाधैर्य्यमुवाचेदं तांनारींगजगामिनीं ॥ यथाहिमनसासृष्टा मयात्वंवर-
वर्णिनी ॥ तथाभूतासिचार्वंगि मनसोन्मादकारिणी ॥ तमुवाचहसन्वाला प्रणम्यचतुराननं ॥ पश्यमूर्च्छांशनं शम्भो जगत्
स्थावरजङ्गमम् ॥ मोहितंममरूपेण स्वयोनिजमकल्मषं ॥ सनास्तित्रिषुलोकेषु यःपुमान्ममदर्शनात् ॥ भवन्तमादितः कृत्वा
नक्षोभंयातिपद्मज ॥ आत्मस्तुतिर्नकर्त्तव्या केनचिच्छुभमिच्छता ॥ स्तवनान्नरकंयाति सुविद्वानपिमानवः ॥ तथापि स्तवनं
ब्रह्मन् कर्त्तव्यंकार्य्यहेतुना ॥ साहंसृष्टात्वयातात कस्यचित्क्षोभनायवै ॥ तदादिशजगन्नाथ क्षोभयिष्येनसंशयः ॥ मांदृष्ट्वाचे-
तनोदेव भूधरोपिविलीयते ॥ किंपुनश्चेतनोपेतः श्वासोच्छ्वासीनरस्त्विह ॥ तथाचोक्तंपुराणेषु नरोवीक्षणकर्त्तनं ॥ उन्मादका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णंनृणां दुश्चरव्रतनाशनं ॥ सन्मार्गेतावदास्ते प्रभवतिपुरुषस्तावदेवेन्द्रियाणां लज्जांतावाद्विधत्तेविनयमपिसमा लंवतेतावदेव ॥ भ्रूचापाकृष्टमुक्ताःश्रवणपथगतालीनपक्ष्माणएते यावल्लीलावतीनां हृदिनधृतिमुषाद्दृष्टिवालापतन्ति ॥ धिक्तस्यमन्दमनसःकुक-वेःकवित्वं यस्त्रीमुखंचशशिनश्चसमीकरोति ॥ भ्रूक्षेपविस्मितकटाक्षनिरीक्षितानि कोपप्रसादसहितानि कुतस्तुचन्द्रे ॥ पीतंहिम-द्यंमनुजेनशम्भोः करोतिमोहंत्वविचक्षणस्य ॥ स्मृतावदृष्टायुवतीनरेण विमोहयेद्देवसुराधिकाहि ॥ मोहनार्थंत्वयाकस्य निर्मि-ताप्रपितामह ॥ तदादिशजगन्नाथ त्रैलोक्यंमोहयाम्यहं ॥ ब्रह्मोवाच ॥ सत्यमुक्तंत्वयादेवि नासाध्यंभुवनत्रये ॥ त्वांपुरस्कृत्य सुभगे मत्तमातंगगामिनि ॥ सात्वंदूषयतेचेतो ममापिवरवर्णिनि ॥ तन्मयानिगृहीतन्तु भीरुज्ञानांकुशेनहि ॥ सात्वंकथंतुलो-कानां नचेतांस्यवतिष्ठसि ॥ दृष्ट्वावैतद्विशालाक्षि तवरूपैर्विमोहितं ॥ सममेवजगत्सर्वं निश्चेष्टमिवलक्षते ॥ यन्निमित्तंमयासृ-ष्टा तत्साधयवरानने ॥ वैदेशेनगरेराजा नाम्नारुक्मांगदःक्षितौ ॥ यस्यसंध्यावलीभार्या तवरूपोपमाशुभा ॥ यस्यांधर्मांगदो जातःपितुरप्यधिकोगुणैः ॥ दशनागायुतवलः प्रतापेतुरविप्रभः ॥ क्षमयायोधरातुल्यो गांभीर्य्ये सागरोपमः ॥ तेजसावह्निव-द्दीप्तः क्रोधेवैवस्वतोपमः ॥ योगेवैशेचनिर्यस्तु गतौचपवनोयथा ॥ सौम्यत्वेसोमतुल्यस्तु रूपेवैमन्मथोयथा ॥ काव्येषूशनस-स्तुल्यो योगीतेराजनन्दनः ॥ पित्राभुक्तंस्वकमिदं जम्बूद्वीपंवरानने ॥ धर्मांगदेनद्वीपानि सप्तभुक्तानिशोभने ॥ पितुस्तुपी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

डयानेन नज्ञातंप्रमदासुखं ॥ स्वयंप्राप्ताःपरित्यक्ता येनभार्य्यास्त्वनेकशः ॥ योनवाक्याद्विचलति सदैवेहपितुःशुभे ॥ यस्यत्री-
णिशतानीह मातॄणांचारुहासिनि ॥ तथाहिकनकाभासे अविशेषेणपश्यति ॥ तस्यधर्मप्रतापस्य पुत्ररत्नान्वितस्यच ॥ समीपं
गच्छचार्वंगि मन्दरे पर्वतोत्तमे ॥ तस्मिन्नेजतिराजासौ तुरगेणोपवाहितः ॥ तवगीतेनचार्वंगि मोहितोमुच्यवाजिनं ॥ आरो-
हंतिगिरेःश्रृंगं ससंगंयास्यतित्वया ॥ तत्रदेवित्वयावाच्यं मिलित्वाभूभुजासह ॥ भार्य्यातेहं भविष्यामि महाराजनसंशयः ॥
यद्यद्ब्रवीम्यहंनाथ तत्तत्कार्य्यंत्वयाध्रुवं ॥ मोहितस्तवरूपेण तथेतिप्रतिपत्स्यते ॥ ततस्त्वंशपथैर्गृह्य दक्षिणेनकरेणवै ॥ वाक्यं
कतिपयैःसुभ्रु दिनैरापततास्त्विति ॥ सुरतेतवचार्वंगि यथामुग्धोहिलक्ष्यते ॥ तदाप्रहस्यराजानं स्मरणीयंपुरावचः ॥ यत्वया
शपथाराजन् कृतंमद्वाक्यपालने ॥ तत्पालयमहीपाल सत्योयंशपथस्त्विति ॥ एवमुक्तेत्वयामुग्धे सराजासत्यगौरवः ॥ पाल-
यामिनसन्देहो ब्रूहिकिंतेददाम्यहं ॥ एवमुक्तेतुवचने त्वयावाच्यो वरानने ॥ रुक्माङ्गदोमहीपालो धर्मांगदपिताशुभे ॥ नो-
पवासस्त्वयाकार्य्यः कथंचिद्धरिवासरे ॥ सुरतश्रमकारामे भवत्वंसमुपोषितः ॥ संमुखींयौवनोपेतां स्वभार्य्यांयोनसेवते ॥ सर्वो-
पेक्षीदुराचारः सयातिनरकंनरः ॥ त्रिरात्रमुपविद्धाहं त्वयाभूपउपोषणात् ॥ नाहंदिवसमेकन्तु शक्नोमिरहितात्वया ॥ श्राद्ध-
कालेतुसंप्राप्ते उपविष्टेद्विजेकिल ॥ याचन्ती संगमंभार्य्या भोक्तव्यानृपपुंगव ॥ एवंसंबोध्यमानोसौ यदाराजावचस्तव ॥ न-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करिष्यतिचार्वंगि तदावाच्यमिदंवचः ॥ यदिनत्यजसेराजन् उपवासंहरेर्दिने ॥ स्वपुत्रस्य शिरस्छित्वा सहसैव वरासिना ॥
धर्मांगदस्यराजेन्द्र ममोत्संगे क्षिपत्विह ॥ यद्येतद्भाषितंत्वंहि नकरिष्यसिभूपते ॥ धर्मक्षीणोभवान्गन्ता नरकं नात्रसंशयः ॥
श्रुत्वात्वदीयंवचनं वराननेनदास्यते प्राणसमंहिपुत्रं ॥ संगृह्यवाक्यंवसुधामराणां संभोक्षतेमाधववासरेसौ ॥ ततोजनो यास्य
तिपूर्वमार्गं यमान्तिकं किंकरपाशवद्धः ॥ लिपिप्रमाणं नरकाधिवासी भविष्यतेसाधुकृतेत्वयाहि ॥ निहन्तितनयंराजा यदि
सत्वेनसंयुतः ॥ तदशेषमघंत्यक्त्वा पद्मनाभपदंव्रजेत् ॥ ७७ ॥ इतिश्री लघु ना० पु० रु० मोहिनीशिक्षा प्रख्यापनं नाम ७
वशिष्ठउवाच ॥ साश्रुत्वा ब्रह्मणोवाक्यं नारीकमललोचना ॥ उवाचनाममेदेहि येनगच्छामिमन्दरं ॥ पित्रानामप्रकर्त्तव्यं अ-
पत्यानांजगत्पते ॥ नामपापहरं प्रोक्तं तत्कुरुष्व कुशध्वज ॥ तच्छ्रुत्वाच तदाब्रह्मा पुनरेवाब्रवीदिदं ॥ यस्मादिदं जगत्सर्वं
त्वयासुन्दरिमोहितं ॥ मोहिनीत्येव तेनाम स्वगुणाढ्यंभविष्यति ॥ मोहावस्थंजगत्सर्वं दर्शनात्तेभविष्यति ॥ यदिनप्राप्यतेसु-
भ्रू त्वत्संपर्कसुखावहं ॥ एवमुक्ता वरारोहा प्रणम्यकमलासनं ॥ वीक्ष्यमाणामरौघेण प्रतस्थेमन्दराचलं ॥ तृतीयेनमुहूर्त्तेण सं-
प्राप्ता गिरिमस्तकम् ॥ यस्यसंवेष्टनोनागो वासुकिर्नहिपूर्यते ॥ धृतोयोहरिणापूर्वं नधृतोदेवदानवैः ॥ षलक्षयोजनोसिन्धो य-
स्यवेगह्वरोभवेत् ॥ कूर्मदेहेन संपृक्तो योनभिन्नोगिरिर्महान् ॥ यततायेनराजेन्द्र सिन्धोर्गुह्यंप्रदर्शितं ॥ गताब्रह्माण्डमार्गेण प-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योधेश्चगिरिर्महान् ॥ कूर्मास्थिघट्टनेयेन पावकोजनितोमहान् ॥ यस्मिन्संवसतेदेवः सहभूतैर्दिगंबरः ॥ नदेवै र्दानवैर्वापि दृष्टं पृष्टंमहीपतेः ॥ दशबर्षं सहस्राख्ये कालेमहतिवर्त्तता ॥ केयूरघर्षणंयेन कृतंदेवस्यचाक्रिणः ॥ रत्नानांमन्दिरंयश्च बहुधातुसमन्वितः ॥ क्रीडाविहारायादिवौकसांसदा तपस्विनांयत्तपसःप्रबृद्धये ॥ सुरांगनानां रतिबर्द्धनंतदा महौषधीनांप्रभवोनरेन्द्रः ॥ सहस्रमेकं अयुतंचमूले तत्संख्ययावै पृथुतांगतासौ ॥ दैर्घेपि तावन्तिचयोजनानि त्रैलोक्ययष्टीसमुपस्थितासौ ॥ सकाञ्चनै रत्नभृतैस्तुशृंगैः प्रकाशयन्भूमितलंवियच्च ॥ यस्मिन्नभः कश्यपनन्दनाऽसौ इतस्तुतामेतिनिविष्टतेजाः ॥ काञ्चनंगिरिमत्युग्रं संप्राप्ताकाञ्चनप्रभा ॥ सूर्यतेजोपहन्त्रीसा मन्दरं चारुकन्दरं ॥ कुर्वन्ति नृपकामार्थं सुपविष्टाशिलातले ॥ नीलेकान्तेतदादिव्ये सप्रयोजन विस्तृते ॥ तस्यांशिलायांराजेन्द्र लिंगंतिष्ठतिकोटिशः ॥ दशलक्षप्रमाणानि तिष्ठन्तिकोटिकोटिशः ॥ कोटिलिंगेतिविख्यातं प्रासादंप्रसनंपरं ॥ तस्मिन्बाला महीपाल चक्रेगीतंमनोहरं ॥ तंत्रीलयसमायुक्तं नानास्वरकरंपरं ॥ समीपबर्तिनीतस्य भूत्वालिंगस्यभाविनी ॥ मूर्च्छनातालसहितं गान्धार ध्वनिसंयुतं ॥ तस्मिन्प्रवृत्तेराजेन्द्र गीतेमन्मथबर्द्धने ॥ सभूधराणांजाताहि स्पृहातस्यांमहीपते ॥ नैवचेदं मनोहारि गीतंतादृग्वभूवनः ॥ यादृशंमोहिनीगीतं सर्वजन्तुमनोहरं ॥ मृगयूथाधिपाःसर्वे तस्यागीतेलयंगता ॥ श्रुत्वैवगीतंतु दिगंबरस्तु तेनैवरूपेणबरांगनायाः ॥ चचालधैर्यादथभोक्तुकामो विमोहितो देवबरोऽभ्यधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वत ॥ २४ ॥ इतिश्री लघुनारदीय पुराणे रुक्माङ्गदचरिते मोहिनी मन्दरागमनं नामाष्टमोध्यायः ॥ ८ ॥ ७ ७ ७
वशिष्ठउवाच ॥ रुक्माङ्गदोपि राजेन्द्र भुक्त्वाभोगान्हिमानुषान् ॥ संपूज्यवहुशोदेवं पीतांबर धरंहरीं ॥ दत्वामूर्ध्निपदंभूप शत्रूणां रणशालिनां ॥ कृत्वाशून्यंयमपथं जित्वावैवस्वतंयमं ॥ वैकुण्ठंचपदंभूप कृत्वापूर्णंचमानवैः ॥ आहूयतनयंकान्तं धर्माङ्गदमभाषत ॥ एतां बसुमतींपुत्र बसुपूर्णांसमन्ततः ॥ परिपालयवीर्येण स्वधर्मेणकृतश्रमः ॥ पुत्रेसमर्थेयोराजा राज्यंनप्रतिपादयेत् ॥ तस्यधर्मस्तथाकीर्त्ति र्विनश्यति नसंशयः ॥ समर्थेतनयेपुत्र योनयातिपितासुखं ॥ पापीयान्सतुविज्ञेयो धर्मांगदजगत्त्रये ॥ पितुर्भारक्षमःपुत्रो भारंनोद्वहतेपुनः ॥ मातुर्गोकर्णवज्जातो निर्वीर्यो विषवर्जितः ॥ सपुत्रोयोधिकः पुत्र पितुर्भवतिभूतले ॥ प्रकाशयति सर्वत्र स्वकरैरविभास्करः ॥ पुत्रदुर्नयजैर्दुःखै र्यस्यजागर्त्तिवैपिता ॥ सपुत्रोनरकंयाति यावदाभूतसंप्लवम् ॥ पितुर्वचनमाहृत्य सर्वंयः कुरुतेगृहे ॥ सयातिदेवसायुज्यं स्तूयमानोमहर्षिभिः ॥ सोहंप्रजाकृतैःपुत्र आसक्तः कर्मभिःक्षितौ ॥ नभुक्तं नैवसुप्तंतु स्वेच्छयापालनेस्थितः ॥ समर्थेत्वयिशत्रुघ्न प्राप्तंसर्वसुखंमया ॥ विष्णुवासरभोक्तॄणां निग्रहेसंस्थितस्यमे ॥ केचिद्व्यवस्थितामार्गे सौरेकेचिद्व्यवस्थिताः ॥ विरिंचिमार्गगाश्चान्ये पार्वती संमतापरे ॥ सायंप्रातशिनास्त्वन्ये तथाचान्येग्निहोत्रिणः ॥ प्रवासेसंस्थिताश्चान्ये श्राद्धेष्वन्येऽव्यवस्थिताः ॥ वालोयुवाथ वृद्धोवा गुर्विणीवाकुमारिका ॥ रोगीवाविकलोवाथ नशक्नोम्यनु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पोषितुम् ॥ इत्येवंजल्पितंयैस्तु तान्निरस्यसमन्ततः ॥ वचोभिस्तुपुराणोक्तै र्दिवसैर्बहुभिस्त्वहं ॥ संबोधयित्वा बहुशः प्रजावैसुख
हेतवे ॥ निगृह्यतान्हरिदिने निराहारान्करोम्यहं ॥ शास्त्रदृष्ट्यातुविदुषो मूर्खंदण्डेनपुत्रके ॥ अनुशास्यकृताः सर्वे निराहारंहरे-
॥ ११ ॥ र्दिने ॥ अतोमे नसुखंकिंचि दवलीढंधरातले ॥ प्रजाःकाश्चिन्नदुःखेन भवित्रीकिलपुत्रके ॥ स्वेनधर्मेणवैपुत्र योरक्षेतप्रजानृपः ॥
तस्यमेह्यक्षयालोकाः पुराणाः कवयोविदुः ॥ सोहंप्रजाकृतेपुत्र संस्थितोनात्मनिक्वचित् ॥ सौख्यमिच्छाम्यहंभोक्तुं मृगयादिस-
मुद्भवं ॥ नपानद्यूतजंपुत्र कामयेहं कदाचन ॥ उभयोर्भ्रंस्यतेराजा माभूतेतत्रचास्थितः ॥ त्वत्प्रसादादहंपुत्र मृगव्याजेनप-
र्वतान् ॥ वनानि सरितश्चैव सरांसिविविधानिच ॥ ऋष्याश्रमान्तथाद्रक्ष्ये त्वत्प्रसादान्महीपते ॥ भोक्तुकामःप्रियान्कामान् त्व-
यिभारंनिवेश्यच ॥ एतत्सर्वं मयाप्रोक्तं यत्स्थितंहृदयेमम ॥ अस्मिन्कृतेमहत्कीर्तिं रकृतेनरकंव्रजेत् ॥ तस्मात्पालयमेसर्वाः प्रजा
धर्मेणपुत्रक ॥ धर्मांगदउवाच ॥ सर्वमेतत्करिष्यामि भुंक्ष्वभोगान्मनोरमान् ॥ गुर्वींराजधुरंतात त्वदीयामुद्वहाम्यहं ॥ नहिमे-
नास्त्यतोधर्म स्त्वद्वाक्यकरणंविना ॥ पितुर्वाक्यमकुर्वाणो नरोधर्माद्धोव्रजेत् ॥ तस्मात्करिष्येवचनं त्वदीयंप्राञ्जलिः स्थितः ॥
एवमुक्तेतुवचने राजाहृष्टोबभूवह ॥ मृगयां गन्तुकामस्तु लब्ध्वांज्ञात्वात्मनस्तनुं ॥ धर्मांगदोपि हृष्टात्मा प्रजामाहूयचाब्रवीत् ॥
पित्रानियुक्तोभवतां पालनाय हितायच॥ पितृकार्यंमहाकार्यं सर्वथाधर्ममिच्छता॥ नान्योधर्मोहिपुत्रस्य पितृकार्यात्परःप्रजाः ॥ ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयिदण्डधरेशास्ता भवतांनयमः क्वचित् ॥ एवंज्ञात्वातुयुष्माभि राराध्यागरुडध्वजः ॥ ब्रह्मचर्यापयोगेन यष्टव्यस्तुजनार्दनः ॥
ममत्वंहि परित्यज्य स्वजातिविहितेनच ॥ येनवोह्यक्षयोलोका भवेयुर्नात्रसंशयः ॥ पितृमार्गाधिकोह्येष भवतांब्रह्मसंज्ञितः ॥
ब्रह्मार्पणक्रियायुक्ता भवन्तोज्ञानकोविदाः ॥ नभोक्तव्यं हरिदिने पैत्रोमार्गस्तुशाश्वतः ॥ विशेषेहिमयाजातो भवतांब्रह्मसन्ततिः ॥
प्रयुक्तःस्वात्मविषये पुनरावृत्तिदुर्लभः ॥ यद्वुपोष्यंहरिदिनं तदवश्यमितिस्थितिः ॥ अनुनीयप्रजाःसर्वाः समाश्वास्यपुनःपुनः ॥
नदिवा नचशर्वर्यां शेतेधर्मांगदःसदा ॥ सर्वत्रहरतेसौर्यात् कुर्वन्निष्कण्टकांमहीं ॥ पटहोरटतेत्यर्थं मृगारिरिपुमस्तके ॥ उपोष्य
द्वादशींलोका ममत्वेनविबर्जिताः ॥ त्रिविधेषुच कार्येषु देवेशश्चिन्त्यतांहरिः ॥ हव्यकव्यवहेचैव तथात्मनि जनार्दनः ॥ तुरी-
येपिहृषीकेशो विशंकंजगतांपतिः ॥ स्वजातिविहितेप्ष्येवं सन्मार्गेचपितामहः ॥ स्मर्त्तव्योपि जनैःसर्वै र्धर्मकामार्थवाञ्छिभिः ॥
सएवभोक्ताभोक्तव्यः सएवपुरुषोत्तमः ॥ विनियोगस्तुतस्यैव सर्वकर्मसुपूज्यते ॥ एवंरटतिराजेन्द्र पटहोघननिस्वनः ॥ परंहर्षम-
वापोथ पिताधर्मांगदस्यच ॥ ज्ञात्वापुत्रंनयोपेत मात्मतत्वाधिकंनृपः ॥ उवाचभार्यांसंहृष्टः स्थितांलक्ष्मी मिवापरां ॥ धन्यास-
न्ध्यावलित्वंहि धन्योहंबरवर्णिनि ॥ उभाभ्यांजनितःपुत्रः शशाङ्कधवलःक्षितौ ॥ कर्णाभ्यांश्रूयतेमोक्षो नदृष्टः केनचित्क्वचित् ॥
नोस्माभिरधिकोमोक्षः प्राप्तःसत्पुत्रसंभवः ॥ पुत्रे विनयसंपन्ने धृतिसौर्यसमन्विते ॥ प्रतापिनिवरारोहे पितुर्मोक्षोगृहेध्रुवं ॥ आ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्दं ब्रह्मणोरूपं सदानन्दिसुतेनयः ॥ पिताभवतिचार्वंगि सत्कर्मकरणैःशुभैः ॥ नतत्सौख्यंभवेद्देवि लोकेस्थावरजंगमे ॥ स-
त्पुत्रःपितुरादाय भारमुद्धहतेस्वयं ॥ सोहंगमिष्ये करभोरुहृष्टो विहारलीलो मृगहिंसनार्थं ॥ स्वेच्छाचरश्चारु विशालनेत्रे वि-
मुक्तपापो जनरक्षणाय ॥ ५२ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते धर्मांगदाय राज्यदानंनाम नवमोध्यायः ॥ ९ ॥
बशिष्ठउवाच ॥ ततः प्राहविशालाक्षी भर्तृवाक्यंनिशम्यसा ॥ सत्यमुक्तंत्वयाराजन् पुत्रसौख्यंनतत्परं ॥ तुल्यंभवतिलोकेस्मिन्
शतपुत्रफलाधिकं ॥ पुत्रेभारस्त्वयान्यस्तः सप्तद्वीपसमुद्भवः ॥ मृगहिंसां परित्यज्य यजयज्ञैर्जनार्दनं ॥ भोगस्पृहां परित्यज्य
सेवस्वसुरनिम्नगां ॥ एवंत्याज्यस्तवविभो न्यायोनमृगनिग्रहः ॥ हृदये नखपङ्क्तिस्तु बृद्धायाभूपतेयथा ॥ तथा विषयसेवाहि
पितॄणां पुत्रिणांविदुः ॥ गृहेस्थितोहृषीकेशं पूजयस्वमहीपते ॥ निर्दोषाणांनयुक्तांहि मृगानांभूपमारणं ॥ अहिंसा परमोधर्मः
पुराणेषुप्रकीर्तितः ॥ हिंसायां वर्त्तमानस्य व्ययोधर्मोभवत्यपि ॥ परैरपिहताञ्जन्तून्नोपभुञ्जन्तिमानवाः ॥ षड्विधंनृपतेप्रोक्तं वि-
द्वद्भिर्जीवघातनं ॥ अनुमोदयितापूर्वो द्वितीयोघातकः स्मृतः ॥ विश्वस्ताचतृतीयस्तु चतुर्थोभक्षकःस्मृतः ॥ पञ्चमःपावकःप्रोक्तः
षष्ठोभूपे हविक्रयी ॥ अहिंसासहितोधर्मः सधर्मोनृपतेस्मृतः ॥ हिंसयासहितंधर्मं नधर्मंकवयोविदुः ॥ मापापंकुरुवैभूप पुत्रेभा- ॥ १२ ॥
रंनिधायच ॥ धर्मसमाश्रयसम्यक् सञ्जातःपलितस्तव ॥ परित्यज्यस्वभारंत्वं नृपहिंसासमुद्भवं ॥ मृगशीलाहिराजानो विनष्टाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शतशोनृप ॥ तस्माद् दुष्कृतकर्माणो मन्येहंमृगयातिनः ॥ दोषांकुरामृगाराज्ञां धर्मिणामिहभूपते ॥ निवारितोमयात्वंहि सर्व-
दाहितकाम्यया ॥ एवंब्रुवाणां तांभार्यां नृपोवचनमब्रवीत् ॥ नाहंहिंसेमृगान्देवि मृगव्याजेनकाननं ॥ पर्यटिष्ये धनुः पाणिः
कुर्वन्कण्टकशोधनं ॥ वनमध्येसुखंभुज्य मरणेहंवरानने ॥ स्वापदेभ्यश्चदस्युभ्यः प्रजारक्ष्यामहीभृता ॥ आत्मनावाथपुत्रेण गो-
पनीयाःप्रजायतः ॥ प्रजामरक्षन्नृपतिः सधर्मोपिव्रजत्यधः ॥ सोऽहंरक्षणमुद्दिश्य गमिष्यामिवनंप्रिये ॥ विमुक्तभारोऽहमिति रु-
रुःशृंगोयथाशुभे ॥ एवमामंत्र्यतांभार्यां मारुरोह हयोत्तमं ॥ दोषांपातिसमंराज न्निर्दोषक्षितिभूषणं ॥ देववाहमिवाशुभं प्रभञ्जन
मिवस्थितं ॥ अग्रेऽमरेभ्योभूपालः करंकृत्वाप्रदक्षिणं ॥ शतकोटिप्रभंभूप कामिनीकुचपालितं ॥ अशोकपल्लवाकारं चक्रांकुशवि-
भूषितं ॥ संप्रतस्थेमहीपाल श्चालमानोमहीतलं ॥ शान्त्वमानोययौवेगात् काननंनिर्जनंस्वयं ॥ वाजिवेगेननिर्धूता वारणाः
स्यन्दनाःहयाः ॥ पत्तयश्चनिपेतुस्ते मूर्च्छिताः क्षितिमण्डले ॥ सराजासहसाप्राप्तो मुनीनामाश्रमंप्रति ॥ योजनानांसमुत्तीर्य
शतमष्टोत्तरंनृपः ॥ प्रविवेशाश्रमंपुण्यं कदलीखण्डमण्डितं ॥ अशोकवकुलोपेतं पुन्नागसमलंकृतं ॥ मातुलिंगैःकपित्थैश्च खर्जूरप-
नसादिभिः ॥ नारिकेलैस्तथातालैः केतकैसिन्दुवारकैः ॥ चन्दनैःस्यन्दनैरेलैः प्रियालैर्जंबुकैर्धवैः ॥ कर्मदैर्दाडिमैश्चैव धात्रीवृ-
क्षैःसमन्ततः ॥ निंबवृक्षैश्चबहुश स्तथाधैर्लोध्रपावकैः ॥ हरीतकीविभीताद्यैरन्यैर्बहुभिरावृतं ॥ हृष्टेनवायुनायुक्तं सुगन्धैःपुष्पपा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दर्पैः ॥ पश्यमानोमुनिंराजा ददर्शहुतभुक्प्रभं ॥ दृष्ट्वा प्रणम्यसहसा अवरुह्यतुरंगमात् ॥ वामदेवंमुनिवरं बहुशिष्यसमावृतं ॥
तेनापिमुनिना राजा अर्घ्याद्यैरभिपूजितः ॥ उपवेश्यासनेकौशे प्रोवाचहृष्टयागिरा ॥ अद्यमेपातकंक्षीण मद्यपुण्योयमाश्रमः ॥
यत्त्वयाविष्णुभक्तेन दिष्ट्याभूपविलोकितः ॥ कः करोतिनृपस्त्वन्य स्त्वांविना धरणीतले ॥ त्यक्त्वावैवस्वतं मार्गं लोकोनीतोहरेः
क्षयं ॥ उपोषयित्वा नृपते द्वादशींपापनाशनीं ॥ चतुर्भिस्त्वमुपायैस्तु प्रजाः संसाध्यभूतले ॥ स्वकर्मस्थाविकर्मस्था नीताःस-
र्वाभिदः पदं ॥ सोऽस्माकंद्रष्टुकामानां संप्राप्तंदर्शनंनृप ॥ स्वपचोपिमहीपाल विष्णुभक्तोद्विजाधिकः ॥ विष्णुभक्तिविहीनस्तु
द्विजोऽपि स्वपचाधमः ॥ दुर्लभाभूपराजानो विष्णुभक्तामहीतले ॥ नवैष्णवोभवेद्राजा क्षितिलक्ष्मीप्रशाशकः ॥ योराजानहरे-
र्भक्तो भक्तोऽन्येषुसुरेषुहि ॥ सपत्नींयुवतींत्यक्त्वा यथैवान्यासुरज्यते ॥ एवंव्यतिक्रमस्तस्य नृपतेर्भवतिध्रुवं ॥ यस्त्वयान्यायविहितं
कृतंविष्णोः प्रपूजनं ॥ राजोवाच ॥ क्षामयेत्वांद्विजश्रेष्ठ नाहंवन्द्यस्त्वयाविभो ॥ त्वत्पादपांशुनातुल्यो नवाविप्रभवाम्यहं ॥ न-
विप्रेभ्योऽधिकादेवा भवन्तीहकदाचन ॥ परितुष्टैर्द्विजैर्यस्माद्भक्तिर्भवतिमाधवे ॥ द्वेष्योभवतितैरुष्टैः सत्यमेतन्मयेरितं ॥ तमा-
हवामदेवस्तु ब्रूहिकिंतेददाम्यहं ॥ नादेयंविद्यतेराजन् गृहप्राप्तस्यमेधुना ॥ अभीष्टोसिमहीपाल योददासिमहीतले ॥ पटहान्वा-
सरेविष्णोः प्रजाभोजनवारणे ॥ तमाहनृपतिर्विप्रं कृताञ्जलिपुटस्तदा ॥ प्राप्तमेवमयासर्वं त्वदंघ्रियुगदर्शने ॥ एकोमेसंशयोत्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्मन् हृदयेपरिवर्त्तते ॥ कर्मणाकेनमेवश्या भार्यात्रैलोक्यसुन्दरी ॥ याविलोकयतीमांवै मन्यतेमन्मथाधिकं ॥ यत्रयत्रपदंदेवी ददातिवरवर्णिनी ॥ तत्रतत्रनिधानानि प्रकाशयतिमेदिनी ॥ यस्याःस्पर्शेजराभ्रंशो वलीनांसंक्षयोभवेत् ॥ विनाग्निनाहियो- ब्रह्मन् सिद्धमेत्यवशत्रुसं ॥ अन्नंददातिचार्वंगी यस्मिन्भुञ्जन्तिकोटयः ॥ नावज्ञाचकृताब्रह्मन् यथावाक्यासुदृष्टया ॥ तथाराजा तुतनयो ममवाक्यकरःसदा ॥ अहमेवधरापृष्ठे पुत्रवान्द्विजसत्तम ॥ एकद्वीपपतिश्चाहं सचसप्तपतिस्त्वभूत ॥ मदर्थेयेनविप्रेन्द्र समानीतानृपात्मजा ॥ विद्युल्लेखेतिविख्याता युधिजित्वामहीभुजः ॥ अयुतेनाधिकेद्वेतु वीर्यद्रविणशालिनी ॥ षण्मासेनरणे जित्वा कृत्वासर्वान्निरायुधान् ॥ योगत्वाप्रमदाराज्यं जित्वासर्वास्तथारणे ॥ आजहारशुभास्तासां मध्यादष्टौवरांगनाः ॥ प्रददा वपिताःसर्वा प्रणम्यचपुनःपुनः ॥ यानिवासांसिदिव्यानि यानिरत्नानिभूतले ॥ तानिमेप्रददौपुत्रो जनन्याश्चदृढव्रतः ॥ ए- काह्नापृथिवींसर्वा मतीत्यबहुयोजनां ॥ पुनरायातिशर्वर्यां मत्पादाभ्यंगकारणात् ॥ निशीथेमर्दयित्वातु द्वारितिष्ठतिदंशितः ॥ प्रबोधयतिप्रैष्यान्स नमत्तोनिशिसंस्थितः ॥ तथायंरोगहीनोमे देहोदेहभृतांवर ॥ अप्रमेयोममुने विषयाश्चप्रियागृहे ॥ वा- जिनोवारणाश्चैव धनधान्यमनन्तकं ॥ नृपाःसर्वेममैवाज्ञां पालयन्तिक्षिताविह ॥ केनकर्मविपाकेन ममेदंवशगंमुने ॥ कृताञ्ज- लिपुटोब्रह्मन् यथावद्वक्तुमर्हसि ॥ देहेनरोगाःप्रवराःस्त्रियश्च गृहेविभूतिश्चहरौचभक्तिः ॥ विद्वत्सुपूजाद्विजदानयुक्ता मनोहर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रेवसुतप्रसूतः ॥ ६२ ॥ इतिश्रीलघुनारदीयपुराणे रुक्माङ्गदचरिते वामदेवसमागमोनाम दशमोध्यायः ॥१०॥ वामदेवउवाच
॥ पुरात्वमवनीपाल शूद्रजातिसमुद्भवः ॥ वहुदोषसमायुक्तो दुष्टयाभार्य्ययातथा ॥ निवसन्दुःखसंयुक्तो वर्षाणिसुवहून्यथ ॥
कदाचिद्विप्रसहित स्तीर्थयात्रांगतोभवान् ॥ तत्रस्थाणुपतेःश्लक्ष्णं श्रुतंधर्मविचारणं ॥ मन्दरेनृपशार्दूल पुराणोक्तंद्विजेरितं ॥ त-
च्छ्रुतंहित्वयाराजन् सत्यंहिशयनव्रतम् ॥ चतुर्भिःपारणंमासै र्यस्यनिष्पद्यतेविभोः ॥ येनचीर्णेनदेवेशो जीमूताभःप्रसीदति ॥
लक्ष्मीभार्य्योजगन्नाथ स्त्वशेषाघौघनाशनः ॥ तत्कृतंभवताराजन् पुनरत्यतिमन्दरे ॥ अशून्यशयनंपुण्यं गृहऋद्धिकरंपरम् ॥
अकृत्वायस्तुराजेन्द्र व्रतंपातकनाशनं ॥ गार्हस्थ्यमनुतिष्ठेत बन्ध्यावन्निष्फलंभवेत् ॥ श्रावणस्यतुमासस्य द्वितीयायांमहीपते ॥
अपिजात्यानुहीनेन अपिग्राह्यंव्रतंशुभम् ॥ चत्वारोवार्षिकान्मासान् मंसुत्येवैजनार्दनं ॥ व्रतंत्वशून्यशयनं करिष्येहंजगत्पते ॥
एवंनियमकृत्स्नात्वा मध्याह्नेसरिदादिषु ॥ पश्चात्तुपूजयेद्देवं निशिचन्द्रोदयेसति ॥ षोडशांगुलमानंतु स्थंडिलंचतुरस्रकं ॥ कृत्वा
तत्रन्यसेद्देवं लक्ष्मीभर्तारमच्युतं ॥ लक्ष्मीरौप्यमयींकृत्वा सौवर्णपुरुषोत्तमं ॥ स्थाप्यपञ्चामृतरसै र्गन्धचन्दनवारिणां ॥ स्नापयि-
त्वाथविधिना वेदमंत्रपुरःसरं ॥ लक्ष्मीयुक्तोजगन्नाथः पूजनीयोजनार्दनः ॥ फलैःपुष्पैस्तथादीपै श्चारुगन्धानुलेपनैः ॥ शय्या
दानैर्वस्तुदानै र्विप्राणांभोजनैस्तथा ॥ नैवेद्यैर्विविधाकारैः फेनिकापूपमोदकैः ॥ मुखवासादितांबूलैः प्रार्थयेद्देवमाशिषः ॥ श्रीव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सधारिश्रीकांत श्रीपतेश्रीधराव्यय ॥ त्वंलक्ष्मीसहितोदेव गृहाणार्घ्यंनमोस्तुते ॥ इत्यर्घ्यमंत्र ॥ गार्हस्थान्पापनाशंमे पातु धर्मार्थकामद ॥ अग्रपोमाप्रणश्यंति माप्रणस्यंतुदेवताः ॥ पितरोमाप्रणस्यंतु मानोदंपत्यभेदना ॥ लक्ष्मीवियुज्यतेदेव नक्कदाचिद्यथाभवेत् ॥ तथाकलत्रसंबन्धो मामेदेववियुज्यतां ॥ लक्ष्म्यानशून्यंवरद यथातेशयनंहरे ॥ शयामयाप्यशून्यातु तथैवमधुसूदन ॥ एवंप्रार्थ्यचदेवेशं प्रणिपत्यपुनःपुनः ॥ नक्तमक्षारलवणमश्नीयात्तदनन्तरं ॥ भोजयेद्द्विजदांपत्यं प्रतिमासंनृपोत्तम ॥ चातुर्मासिकमित्युक्त मशून्यशयनव्रतं ॥ चतुर्भिरेवमासैस्तु व्रतस्यास्यतुपारणं ॥ व्रतांतेशयनंदद्यात्सर्वोपस्कर संयुतं ॥ आसनं पादुकाछत्रं चामरव्यजिनानिच ॥ स्थंडितासर्वसंपूर्णा दर्पणंसप्तधान्यकं ॥ सुखसंजननितूली छादनाचपटीसिता ॥ कुण्डलेद्वेनृपश्रेष्ठ सुकपोलस्थलद्वयोः ॥ दीपिकावरमाल्यानि अञ्जनान्यनुलेपनं ॥ तस्योपरिवितानंतु पञ्चवर्णंनरोत्तम ॥ पूर्वंतुचतुरोमासा स्थंडिलस्थंप्रपूजयेत् ॥ व्रतांतेशयनस्थंतु पूजयेत्पुरुषोत्तमं ॥ पुष्पधूपोपहारैश्च दीपमाल्यादिभूषितैः ॥ नैवेद्यैर्विविधाकारै र्लड्डुकापूपफेनिकैः ॥ अशोकवर्तिसोल्लाशैः खण्डकाद्यैरनेकशः ॥ देशकालोद्भवैर्मिष्टैः फलैःसंपूजयेद्धरिं ॥ अलंकृत्ययथाशक्त्या वस्त्रालङ्कारभूषणैः ॥ मिथुनंनृपशार्दूल वरमाल्यानुलेपनैः ॥ प्रणम्यद्विजदांपत्यं तदेवंप्रतिपादयेत् ॥ साक्षतंसहिरण्यंच वरनेत्रपटावृतं ॥ अर्चितंप्रार्चितंगन्धै र्जातरूपमयंशुभं ॥ कांस्यपात्रेणसहितं मोदकैःपरिपूरितं ॥ दद्यादेवंसमुच्चार्य्य श्रीधरःप्रीयता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 मिति ॥ गावोहिरण्यधान्यानि यद्यदिष्टतमंगृहे ॥ तद्देवंनृपशार्दूल तदेवाक्षयमिच्छता ॥ तत्त्वयासर्वमेतद्धि कृतंराजन्सुविस्तरं ॥
 तस्यैवकर्मणोव्युष्टि रशून्यशयनस्यहि ॥ इयंममाग्रतःप्राप्ति स्तवोक्ताविस्तरान्नृप ॥ तुष्टेविष्णोसंपदोवै भवेयुर्विविधाहिता ॥ पू-
र्वजन्मनिदेवेशो यस्त्वयापूजितोनृप ॥ अस्मिन्जन्मनिराजेन्द्र पुनरर्चयसेहरिं ॥ अवस्यंगंतुकामोसि तस्यसायुज्यतांध्रुवम् ॥
एषभावोमहाराज विख्यातस्तेसुनिर्मलः ॥ प्रभावसंपदेषाते जाताउत्कर्षदायिनी ॥ किमन्यंनेमहीपाल ददामीहकरोमिकिं ॥
त्वंसर्वयोग्योसिनृप भक्तिमांश्चजनार्दने ॥ राजोवाच ॥ समुत्सुकोहंविप्रेन्द्र मन्दरंपर्वतंप्रति ॥ तत्राश्चर्याणिसर्वाणि द्रष्टुकाम-
स्तवाज्ञया ॥ लघूंभूत्वागुरुंत्यक्त्वा पुत्रोपरिद्विजोत्तम ॥ राज्यानुशासनंभारं दुर्वहंतुकभूभुजैः ॥ स्वेच्छाचारस्त्वहंराजा मत्कृत्यंतेन-
योऽकरोत ॥ तच्छ्रुत्वावचनंराज्ञो वामदेवोऽब्रवीदिदं ॥ एतद्धिपरमंकृत्यं पुत्रस्यनृपपुङ्गव ॥ यत्क्लेशात्पितरंपुत्रा विमोचयतिसर्व-
था ॥ पितुर्वचनकारीयो विनयेसंस्थितःसुतः ॥ तस्यभागीरथिस्नान महन्यहनिजायते ॥ निरस्यपितृवाक्यंतु व्रजेत्स्नातुंत्रिमा-
र्गगां ॥ नशुद्धिरत्रनिर्दिष्टा पुत्रस्यकवयोविदुः ॥ सत्वंगच्छयथाकामं कृतकृत्योमहीपते ॥ हरिप्रसादस्तेजातो वशेयस्यसुतः
स्थितः ॥ एवमुक्तःसमुनिना समारुह्यतुरंगमं ॥ ययौशिघ्रगतिश्रीमान् सदागतिरिवस्वयं ॥ पश्यमानोगिरिंश्रीमान् सरांसि-
सरितस्तथा ॥ मनोरमानिराजेन्द्र वनान्युपवनानिच ॥ सोऽचिरेणैवकालेन संप्राप्तोमन्दराचलं ॥ कामयित्वागिरिंश्रेदं गन्धमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दनमेवच ॥ अतीत्यचमहामेरुं दृष्ट्वाचारूपमारुकुरून् ॥ शतसूर्य्यप्रतीकाशं सर्वत्रकांचनावृतं ॥ हतैर्द्विजैःसमाकीर्णं स्रवन्तं
कांचनंरसं ॥ वहुवृक्षसमायुक्तं वहुधातुविभूषितं ॥ वह्वानिसरसंयुक्तं वहुकन्दरभूषितं ॥ निम्नगायुतसंकीर्णं धौतंगङ्गाजलैःशुभैः ॥
वितुष्टैर्युवतिवृन्दैः कांचनाब्जोपशोभितैः ॥ प्रस्थितैःफललाभार्थं सदृशस्नानमोहितैः ॥ घटप्रमाणैर्नृपते पङ्कजैश्चसुगन्धिभिः ॥
क्षात्रैर्युवतिसंभूतैः कुचैरिवविभूषितैः ॥ द्विरेफगणसंयुक्तः कोकिलस्वरनादितः ॥ अनेकसत्वविरुतैः समन्तान्नादितोगिरिः ॥
सपश्यमानोनृपतिर्विवेश महागिरिंरत्नविभूषिताग्रं ॥ आरूढकामस्तुकुतूहलार्थं मन्वेषयन्केनपथाधिरोहे ॥ यावत्समीक्षांकुरुते
समंतात् तावत्समस्तद्रुमपक्षिसंघैः ॥ विसर्प्पमानोध्वानिनागृहीतो विमोहिनीवक्रसमुद्भवेन ॥ उपप्लवंतत्तरसामहीप स्तेनैवरा-
जासहसाजगाम ॥ तस्यापिकर्णेध्वनिराविवेश विमोहिनीयःस्वाविमुच्यवाहं ॥ त्रिविक्रमेणैवविलंवितस्तदा गिरिर्महाराजवरे-
णतेन ॥ क्षणेनराजासहसाददर्श गिरौस्थितांतप्तसुवर्णभासं ॥ कामस्ययष्टीवसुलेखितेयंयमस्यमायैवयशःस्वरूपिणी ॥ शक्रस्य
लिङ्गगगनेप्रसस्तंसंपूजयन्तीतदवस्थितासा ॥ जनोयथाह्लादकरोनृणांप्रियःक्षमेवभूमेर्नृपआननन्द ॥ गिरेःसुतेवामरपूजिताच
सिंधोस्तुवेलेवस्वरूपयुक्ता ॥ सत्कर्म्मकर्त्तुमनसोभिलाषंव्यवस्थितामोहिनीरूपयुक्ता ॥ प्रतप्तचामीकरबद्धिभातिदेवीशरीरंत्वभि-
मन्दराद्रिं ॥ विकर्षमाणासहसासुनेत्रंलिंगाश्रितालिंगविनोदनार्थं ॥ विमोहितोसौनिपपातराजाविमोहिनीसुन्दरनेत्रपातैः ॥ ज्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेणसंतप्तसमस्तदेहोविसंज्ञतांचैवजगामशीघ्रं ॥ संमूर्छितंभूमिपतिंसुनेत्राविलोकयामासकटाक्षदृष्ट्या ॥ विमुच्यवीणांविररामगी-
तान्प्राप्तंचकार्य्यंसहसैवमेने ॥ विद्रावयन्तीमृतपक्षिसंघामशोकरक्तांगुलिपल्लवाग्राः ॥ सुवाससागन्धभुजोनिवार्य्यशिलीमुखान्श्वा
ससुगन्धलुब्धान् ॥ जगामदेवीनृपतेःसमीपंमुक्ताहरंपूज्यतमंमहीप ॥ गत्वातुतत्पार्श्वसुमाररूपा विमोहिनीनीरजपत्रलोचना ॥
उवाचवाक्यंमधुरंमनोहरंरुक्माङ्गदंकामसरानुविद्धं ॥ उत्तिष्ठराजेशवशातवाहंकिंमूर्च्छयादेहमिमंक्षिणोषि ॥ यस्त्वंमहाभारमिमं-
महान्तंसमुद्धरेथास्तृणवन्महीप ॥ समामकंरूपमवेक्ष्यराजन् किंरज्यतेदुर्वलगौरिवेह ॥ यद्यस्तिवांच्छातवभूपतीश ममाश्रयावै-
सुरतानुकूला ॥ आदायवैमांरतिधर्मयुक्तां भुक्ष्वस्वदासीमिवदृष्टिवित्तां ॥ ६६ ॥ इतिश्री लघुनारदीयपुराणरुक्माङ्गचरिते मो-
हिनीसमागमो नामैकादशोध्यायः ॥ ११ ॥ ๛ ๛ ๛ ๛ ๛ ๛ ๛ ๛ ๛ ๛ ๛
वशिष्ठउवाच ॥ व्याहृतेशोभनेवाक्ये मोहिन्यानृपतिस्तथा ॥ उन्मील्यनेत्रेराजेन्द्र पद्मपत्रनिभतदा ॥ सगद्गदमुवादेचं मोहि-
नींकान्ताविग्रहां ॥ मयावलाःसुवहुशः पूर्णचन्द्रनिभाननाः ॥ अनुभुक्तास्तथादृष्टा नेदृग्दृष्टंवपुःक्वचित् ॥ यादृशंचपालापांगि
तवसर्वांगसुन्दरि ॥ सोहंऽदर्शनमात्रेण त्वदीयेनवरानने॥ मनोभवशरेणैव पातितःसहसाक्षितौ ॥ अनूक्तवाक्योऽहंदेवि मोहित-
स्तवमायया ॥ कुरुप्रसादंकरभोरुमह्यं दास्यामिसर्व्वंविपुलंचतेवसुः ॥ नादेयमत्रत्वयिविद्यतेमे तवानुरागेणनिरुद्धचेतसः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इमांधरांभूधरभूषितांगीं समुद्रवस्त्रांशशिसूर्य्यनेत्रां ॥ घनस्तनींब्योमसुवद्धदेहां सह्याननांसांगनिवासशीर्षां ॥ पातालगुह्यांव-
हुनागपादां सप्तार्णवामद्यतवास्मिदाता ॥ सकोषरत्नांगजवाजिपूर्णां सामुद्रभक्तांनगरैःसमेतां ॥ आत्मानमपिदास्यामि तव-
चार्व्वंगिसंगमे ॥ किंपुनर्धनमानादि प्रसीदममशोभने ॥ तद्वचोमोहिनीश्रुत्वा भूपस्यमधुरंशुभं ॥ उवाचसंमितंध्यात्वा समु-
त्थाप्यनृपंतथा ॥ नधरांभूधरोपेतां प्रार्थयामिक्षितीश्वर ॥ यत्प्रार्थयाम्यहंभूप तद्देयमविशंकया ॥ मत्प्रत्ययार्थंभूपाल वदस्वसम-
यंविभो ॥ राजोवाच ॥ येनत्वंतुष्यसेदेवि समयन्तंकरोम्यहं ॥ कृच्छ्रावस्थागतंत्वंमां सञ्जीवयसुलोचने ॥ मोहिन्युवाच ॥ दी-
यतांदक्षिणोहस्तो भूरिद्रविणदायकः ॥ अनेकक्रतुकर्त्ताच बहुपुण्यकरःकरः ॥ येनमेप्रत्ययोराजन् भवतीहतवोपरि ॥ राजन्त्वंध-
र्मशीलश्च धर्मकीर्तिर्जगत्त्रये ॥ नवक्तव्यानृतंकिञ्चित मार्गोवैलौकिकस्त्वयं ॥ एवंब्रुवाणांराजेन्द्रो मोहिनींकृच्छ्रयातुरः ॥ अब्र-
वीन्नृपतिःप्रेम्णा तवेदंभाषितंमया ॥ जन्मप्रभृतिवामोरु स्वैरेष्वपिकदाचन ॥ अथतेव्याहृतैर्वाक्यैः किमेभिःप्रत्ययात्मकैः ॥ त-
वद्येषमयादत्तः स्वहस्तश्चारुलाञ्छनः ॥ यन्मयासुकृतंकिञ्चित कृतमाजन्मिकंशुभे ॥ तत्सर्वंतववामोरु यदिकुर्यान्नतेवचः ॥ अ-
न्तरेत्वेषहस्तोवै भवभार्येंबरानने ॥ तवरूपेणमेक्षोभः सहसाह्यभवच्छुभे ॥ दर्शनेनत्वदीयेन परायन्तंहिमेवपुः ॥ पूर्वंदृष्टापिनम-
या स्पृष्टाधर्मादिरक्षणे ॥ कात्वंकस्यसुताचासि किमर्थमिहचागता ॥ रुक्मांगदोहंनृपतिः ऋतध्वजसुतःशुभे ॥ इक्ष्वाकुबंशजः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीमान् धर्मांगदपितातथा ॥ मृगव्याजेनगहनं प्रविष्टःकाननंत्वहं ॥ ततोहृष्टोवनेदृष्टः कौशेयस्याश्रमोमहान् ॥ मुनिनाजल्पि-
तश्चाथ तेनचाहंविसर्जितः ॥ आरुह्यवाहनवरं मन्दरंद्रष्टुमागतः ॥ भ्रममाणेनचमया कौतूहलपरेणहि ॥ श्रुतंसुन्दरिगीतंतु
तववक्त्रविनिर्गतं ॥ गीतेनचाहमाकृष्ट स्त्वत्सकाशमिहागतः ॥ चक्षुःपदमनुप्राप्ता ममत्वंचारुलोचने ॥ ततोहंमूर्छितोदेवि विसं-
ज्ञःपतितःक्षितौ ॥ संप्राप्तचेतनायुक्त स्तववाक्यामृतेनहि ॥ पुनर्जातमिवात्मानं मन्येहंचारुलोचने ॥ इत्युत्तरप्रदानेन प्रसादंक-
र्तुमर्हसि ॥ केनचेहेदृशंरूपं त्रैलोक्यक्षोभनंशुभे ॥ कृतंतवसुचार्वंगी तत्सर्वंवक्तुमर्हसि ॥ एवमुक्तानृपेणाथ मोहिनीव्याजहार-
वै ॥ ब्रह्मणोहंसुताराजन् त्वदर्थमिहचागता ॥ श्रुत्वाकीर्तिंतुतेभूप मन्दरंसमुपागता ॥ परित्यज्यसुरान्सर्वान् दिगंवरपुरोगमा-
न् ॥ समाहितमनाभूप नियतातपसिस्थिता ॥ संपूजयन्तिदेवेशं गीतवाद्येनशंकरं ॥ परितुष्टःपशुपतिः त्रिदिनार्द्धेनभूपते ॥
गीतदानमहंमन्ये सुराणामपिदुर्लभं ॥ सर्वदानाधिकंभूप अक्षयगतिदायकं ॥ गीतज्ञायत्रगीतेन प्राप्नोतिपरमंपदं ॥ रुद्रस्या-
नुचरोभूत्वा तेनैवसहमोदते ॥ संतुष्टोयंपशुपतिः सद्यएवममानघ ॥ ईप्सितोयंमयाप्राप्तो भवानवनिपालक ॥ अभिप्रेतोसिमे-
राजन् अभिप्रेताह्यहंतव ॥ सकामायाःसकामेन संगमोगुणवान्भवेत ॥ तमेवमुक्त्वाद्विजराजवक्त्रा करंकरेणाथविगृह्यदक्षा ॥ उ-
त्थापयामासधरातलस्थं रुक्मांगदंसागजगामिनीतदा ॥ ३८ ॥ इतिश्री ल०ना० रुक्माङ्गदसंवादोनाम द्वादशोध्यायः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वशिष्ठउवाच ॥ उत्थापयित्वाराजानं मोहिनीवाक्यमब्रवीत् ॥ माशंकांकुरुराजेन्द्र कुमारींसामकल्मषां ॥ उद्वाहयमहीपाल गृ-
ह्योक्तविधिनाहिमां ॥ अविवाहितांतुकन्यां यदिगच्छन्विभर्त्यपि ॥ प्रसूयतिदिवाकीर्त्तिं सर्वत्रवर्णविगर्हितं ॥ चाण्डालयोनयस्ति-
स्रः पुराणाःकवयोविदुः ॥ कुमारीसंभवस्त्वेकः स्वगोत्रायांद्वितीयकः ॥ ब्राह्मण्यांशूद्रजनकस्तृतीयोनृपपुंगव ॥ एतस्मात्कार-
णाद्राजन् कुमारीमुद्वहेदिति ॥ ततस्तांचञ्चलापांगीं नृपोरुक्मांगदोगिरौ ॥ उद्वाह्यविधिवद्राजा बभाषेप्रहसन्निति ॥ नतथात्रि-
दिवप्राप्तिः प्रीणातिममामानसं ॥ तवप्राप्तिर्यथाह्लादं करोतिममसुन्दरि ॥ मन्येपुरन्दरादेवि आत्मानमधिकंक्षितौ ॥ त्रैलोक्यसु-
न्दरींप्राप्य त्वांभार्यांचारुलोचने ॥ तस्माद्वदानुकूलंते किंकरोमिप्रसाधिमां ॥ इहैवरंस्यसेवापि अथवानगरेवद ॥ मलयेमेरुशिखरे
वनेवानन्दनेशुभे ॥ तच्छ्रुत्वामोहिनीवाक्यं मधुरंभूपतेस्तदा ॥ उवाचवाक्यंसुमुखी राजानंहाटकांगदं ॥ सपत्नीनांकटाक्षाणि
क्रूराणिनगरेमम ॥ पतिष्यन्तिमहीपाल कथंगच्छामितेपुरं ॥ नासौसीमन्तिनीकाचित् भवेद्भूपक्षिताविह ॥ यस्याःसपत्नीप्रभवं
दुःखमामरणंभवेत ॥ साहंत्यक्तामहीपाल तवकीर्त्यानुपुण्यया ॥ ज्ञात्वासपत्नीप्रभवं दुःखंभर्त्ताकृतोमया ॥ रंस्यामिपर्वतेश्रेष्ठे बह्वा-
श्चर्यसमन्विते ॥ नरंस्यसेहित्वंराजन सन्ध्यावल्याविनाक्वचित् ॥ तस्याहिविरहेदुःखी सपुत्रायाभविष्यसि ॥ दुःखेनभवतोराजन
भूरिदुःखंभवेन्मम ॥ यत्रैवभवतःसौख्यं तत्राहमपिसंस्थिता ॥ यत्रत्वंरंस्यसेराजन् तत्रमेमन्दरोगिरिः ॥ भर्तुःस्थानेसुवस्तव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋद्धिहीनेपिभार्यया ॥ समेरुःकाञ्चनमय स्तंनिवासंप्रचक्ष्यते ॥ मनोरथानांसतरुर्यत्रत्वंरंस्यसेप्रभो ॥ भर्तृस्थानंपरित्यज्य सवि-
त्तंवित्तवर्जितं ॥ पितृस्थानंचयानारी अर्थार्थमनुगच्छति ॥ इहापनुज्यनरकं पश्चाद्भवतिशूकरी ॥ एवंजानाम्यहंदोषान् कथं-
स्थास्यामिमन्दरे ॥ गमिष्यामित्वयासार्द्धमीशस्त्वंसुखदुःखयोः ॥ मोहिन्यास्तद्वचःश्रुत्वा सराजाहृष्टमानसः ॥ परिष्वज्यबरा-
रोहामिदंवचनमब्रवीत् ॥ भार्याणांममसर्वासामुपरिष्टाद्भविष्यासि ॥ माशंकांकुरुवामोरु नतेदुःखंभविष्यति ॥ जीवनादधिकंसु-
भ्रु भविष्यसिगृहेमम ॥ गच्छावएहितन्वांगि सुखायनगरंप्रति ॥ भुंक्ष्वभोगान्मयासार्द्धं तत्रस्थास्वेच्छयाप्रिये ॥ साचेदमुक्ता-
शशिकान्तिगौरी रुक्मांगदेनात्मजनाशनाय ॥ संप्रस्थितान्नूपुरनादयुक्ता विकर्षयन्तीगिरिजातसंघान् ॥ २६ ॥ इतिश्री ल-
घुनारदीयपुराणे रुक्माङ्गदचरिते मोहिन्यानयनंनाम त्रयोदशोध्यायः ॥ १३ ॥ ७ ७ ७ ७ ७ ७
बशिष्ठउवाच ॥ संप्रस्थितावुभौभूय गिरिप्रस्थाद्धरातलं ॥ पश्यमानोवहून्भावान् गिरिजातान्मनोहरान् ॥ केचिन्नीलोत्पलप्र-
ख्याः केचित्काञ्चनसप्रभाः ॥ केचिद्विद्रुमसंकाशाः केचिद्रजतसन्निभाः ॥ केचित्स्फटिकवर्णाभा हरितालनिभास्तथा ॥ अन्या-
नाश्लेषतांप्राप्ताः शनकैःशनकैर्द्रुमाः ॥ अवरुह्यतुशैलेन्द्रा त्तावुभौधरणीतलं ॥ संप्राप्यसुमहावीर्य्यं वाजिनंतदपश्यतां ॥ खन्यमा-
नंखुरेणोर्वीं कुलिशाग्रेणवेगिना ॥ तस्यदारयतःपृथ्वीं सुतीक्ष्णेनखुरेणहि ॥ गृहगोधाभवेत्तास्मिन् रंध्रेसुखगताकिल ॥ निर्गच्छ- ॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानानृपते खुरेणविदलीकृता ॥ विचार्य्यमाणोनृपतिर्दयावान्समपश्यत ॥ अत्यधावतवेगेनहाहतेतिवदन्प्रियां ॥ वृक्षपत्रेततःसो-
थ कोमलेजगतीपतिः ॥ उद्धारयन्हयखुरान् प्राक्षिपज्जलजेक्षणः ॥ ततस्तांमोहिनींप्राह पश्यमूर्च्छांगतामिमां ॥ शीघ्रंचाहरचा-
वंगिजलंजलजलोचने ॥ येनेमांमूर्च्छितांसिंचे गृहगोधांविमर्द्दितां ॥ साभर्तुर्वचनाच्छीघ्रमाहरच्छीतलंजलं ॥ तेनाभिषिञ्चन्नृपति
र्गृहगोधांविमर्द्दितां ॥ सावापचेतनांराजन् शीतलेनजलेनच ॥ अभिघातेषुसर्वेषु शस्तंवारिषुसेचनं ॥ क्लिन्नेनचाथवस्त्रेण वन्ध-
नंहितमुच्यते ॥ साप्राप्यचेतनांभूयो गोधावचनमब्रवीत् ॥ निरीक्ष्यनृपशार्दूलं वेदनार्त्ताशनैःशनैः ॥ रुक्माङ्गदमहावाहो निवो-
धममचेष्टितं ॥ साकेरेनगरेरम्ये भार्य्याहंद्विजजन्मनः ॥ रूपयौवनसम्पन्ना तस्यचाहंप्रियाविभो ॥ सदाविद्वेषसम्पन्नोमयिनिष्ठुर
जल्पकः ॥ नान्यस्यकस्यचिद्द्वेष्टामांसुमोचद्विजोनृप ॥ ततोहंक्रोधसंयुक्ता वशीकरणलम्पटा ॥ अपृच्छन्प्रमदाराजन् यास्त्य-
क्ताःपतिभिःकिल ॥ ताभिरुक्ताह्यहंभूप वश्योभर्त्ताभविष्यति ॥ अस्माकंप्रत्ययोजातो भर्तृत्यागीवरानना ॥ पूजिताभेषजैर्वश्या
जाताहिपतयोहिनः ॥ सात्वंपृच्छवरारोहे दाश्यतिभेषजंशुभं ॥ विकल्पंकुरुमाभीरु भवितादासवत्पतिः ॥ ततोहंत्वरितागत्वा
तासांवाक्येनभूपते ॥ प्रसादःकथितस्तस्याः पृच्छंत्याममममानवैः ॥ शतस्तंभसमायुक्तः कुट्टिमःसुधयायुतः ॥ उपविष्टांसुतेज-
स्कां अपश्यंव्रतचारिणीं ॥ प्रावृतांदीर्घवस्त्रेण सवितैवविकर्त्तना ॥ दीर्घाभिःसाजटाभिस्तु संवृतादीप्तिसंयुता ॥ परिचारस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 संयुक्ता वीर्य्यमानाशनैःशनैः ॥ अक्षसूत्रकरासाच जपन्तीभगमालिनीं ॥ सर्ववश्यकरंमन्त्रं क्षोभकंप्रत्ययात्मकं ॥ ततोहंप्रण-
॥ १९ ॥ ताभूत्वा पद्मांन्यस्तांगुलीयकं ॥ वज्रमाणिक्यखचित मतिरक्तंप्रभान्वितं ॥ ततोहृष्टाभवद्दृष्ट्वा पादस्थंचांगुलीयकं ॥ अपृ-
ष्ट्यातयाज्ञातं ममभर्तृविमाननं ॥ तथोक्ताहंतयाभूप तापस्याप्रणतोस्थिता ॥ चूर्णोरक्षान्वितोह्येष सर्वभूतवशानुगः ॥ सुश्रुभ-
र्त्तरिसंयोज्य रक्षांकण्ठेतथाकुरु ॥ काकालयंचसंगृह्य विधिपूर्वमतःपरं ॥ मंत्रवानशुचिर्भूत्वा शवाग्निश्चविनिर्दिशेत् ॥ भविष्य-
तिपतिर्वश्यो नान्यांयास्यतिसुन्दरि ॥ चूर्णंरक्षांगृहीत्वाहं प्राप्ताभर्तृगृहंपुनः ॥ प्रदोषेतपसायुक्तः चूर्णोभर्त्तरियोजितः ॥ ग्रीवा-
यांहिकृतोरक्षा नविचारःकृतोमया ॥ यदासपीतचूर्णस्तु भर्तामममनृपोत्तम ॥ तदैवक्षयरोगोभूत् पतिःक्षीणोदिनेदिने ॥ गुह्येषु
कृमयोजाताः क्षतदुष्टव्रणोद्भवाः ॥ राजन्दिनैःकतिपयै दीप्तद्राविणदर्शनात् ॥ हततेजास्तथाभर्त्तामामुवाचाकुलेन्द्रियः ॥ क्रन्द-
मानोदिवारात्रौ दासोस्मितवशोभने ॥ त्राहिमांशरणंप्राप्तं नयास्येन्यांस्त्रियंक्वचित् ॥ तत्तस्यरुदितंश्रुत्वा भीताहमवनीपते ॥
निवेदितंमयातस्यां कथंभर्त्ताभवेत्सुखी ॥ तयामेभेषजंदत्तं द्वितीयंदाहशान्तये ॥ दत्तेचभेषजेतस्मिन् स्वस्थोभून्मेक्षणात्पतिः ॥
पूर्वचूर्णभवोदाहः शान्तस्तेनौषधेनहि ॥ ततःप्रभृतिभर्त्तामे वश्योभूद्वचनेस्थितः ॥ पञ्चत्वंचगताकाले तथानरकयातनां ॥ ता-
म्रभ्राष्ट्रेचदग्धाहं युगानिदशपञ्चच ॥ सूक्ष्मातिलप्रमाणानि कृत्वाखण्डान्यनेकशः ॥ किंचित्पातकशेषेषु धरायामवतारिता ॥ ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहगोधामयंरूपं कृत्वाभास्करजेनमे ॥ साहमवस्थिताभूप वर्षाणामयुतंसरुक् ॥ यान्यापियुवतीराजन् भर्तुर्वश्यंसमाचरेत ॥ वृथाधर्म्माद्दुराचारा भर्ज्यतेताम्रभ्राष्ट्रके ॥ भर्त्तानाथोगुरुर्भर्त्ता भर्त्तावैदैवतंपरं ॥ तंवश्यंकुरुतेयातु सासुखंकथमाप्नुयात् ॥ तिर्यग्योनिशतंयाति कृमियोनिशतानिच ॥ तस्माद्भूपालकर्त्तव्यंस्त्रीभिर्भर्तृवचस्सदा ॥ साहंयास्येपुनर्योनिंकुत्सितांयातनान्वितां ॥ यदिनोद्धरसेराजन् अद्यमांशरणागतां ॥ सुकृतस्यप्रभावेन निजजन्मार्नितेनच ॥ यात्वयासंगमेपुण्या कृताश्रवणद्वादशी ॥ शरय्वाश्चैवगंगायाः संगमेपापनाशने ॥ प्रेतनिर्य्यातनीपुण्या ह्यीप्सितस्यचदायिनी ॥ यस्यांभूपालस्त्वगृहे स्नातोपिमनुजःकिल ॥ सर्वतीर्थफलप्राप्तिं लभतेनात्रसंशयः ॥ दत्तंजप्तंहुतंयच्च कृतंदेवार्चनादियत् ॥ सर्वंतदक्षयंज्ञेयं यत्कृतंविजयादिने ॥ एवंविधंफलं तस्या स्तदेवसकलंतव ॥ द्वादश्यामुपवासेन त्रयोदश्यांतुपारणे ॥ दशाब्दफलमाप्नोति नरःसम्यगुपोषणैः ॥ दयांकुरुमहीपाल धर्ममूर्त्तिर्भवान्क्षितौ ॥ वैवस्वतपथध्वंसीपरित्राहिसुदुःखितां ॥ गृहगोधावचःश्रुत्वामोहिनीवाक्यमब्रवीत् ॥ स्वकृतंजन्तवोश्नन्ति सुखदुःखादिकंविभो ॥ तस्मात्किमनयाकार्य्यं पापयाभर्तृक्षुद्रया ॥ ययाभर्त्तावशंनीतोरक्षाचूर्णादिभिर्नृप ॥ साधुभ्योयत्कृतंराजन् यशःस्वर्गकरंभवेत् ॥ शर्करामिश्रितंक्षीरंकाद्रवेयेनिवेदितं ॥ विषवृष्टिकरंदृष्टमेवंदुष्टेनियोजितं ॥ पापामिमांपरित्यज्यगच्छावोनगरायवै ॥ जनव्यापादयुक्तानामात्मसौख्यंविनश्यति ॥ रुक्माङ्गदउवाच ॥ ब्रह्मात्मजेकथंवाक्यमीदृशंव्याहृतंत्वया ॥ नसाधुनामि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दंवृत्तंभवेच्चारुविहासिनि ॥ आत्मसौख्यकराःपापा भवन्तिपरदारिकाः ॥ पिताजातोवरारोहे परोपकरणायते ॥ शशीसूर्य्योथपव-
नोमेदिनीहुतभुग्जलं ॥ चन्दनंपादपाःसन्तःपरोपकरणेस्थिताः ॥ श्रूयतेकिलराजाभूद्धरिश्चन्द्रोवरानने ॥ चाण्डालमन्दिरवासी
भार्य्यातनयविक्रयी ॥ असत्यवचनाद्भीतोदुःखाद्दुःखतरंगतः ॥ तस्यसत्येनसन्तुष्टा देवाब्रह्मपुरोगमाः ॥ वरेणशट्टशीचक्षुर्हरिश्चन्द्रं
महीपतिं ॥ तेनसत्यवताचोक्ता देवाब्रह्मपुरोगमाः ॥ यदितुष्टाहिविबुधा दातुकामोवरंमम ॥ एषाहिनगरीरम्यासद्रूपाससरीसृ-
पाः ॥ आवालवृद्धतरुणा सनारीससुतायदा ॥ मयांनुगतपापाहि स्वर्गतींनगरीःमम ॥ अयोध्यापातकंगृह्य गन्ताहंनगरंध्रुवं ॥
एकाकीनहिवांच्छन्ति परित्यज्यजनांक्षितौ ॥ स्वर्गंगन्तुंहिविबुधाः सत्यमेतन्मयेरितं ॥ तस्यतांधिषणांज्ञात्वा सहतेनैवतांपुरीं ॥
आनयन्त्रिदिवंदेवा ब्रह्मणासहिताःकिल ॥ सोद्यापिवसतेराजा स्वपौरेणसमन्वितः ॥ कामगेनविशालाक्षि पूज्यमानोदिवाल-
यैः ॥ अस्थिदानंकृतंदेवी कृपयाहिदधीचिना ॥ देवानामुपकारार्थं ज्ञात्वादैत्यैर्निराकृतान् ॥ कपोतार्थेस्वमांसानि सिविनाभूभु-
जापुरा ॥ प्रदत्तानिवरारोहे श्येनायक्षुधितायवै ॥ जीमूतवाहनोराजा पुरासीत्क्षितिमण्डले ॥ तेनापिजीवितंदत्तं गरुडाय
वरानने ॥ तस्मादयालुनादेवि भवितव्यंमहीभुजा ॥ शुचौवर्षातिदेवेशो अमेघेपिसमंशुभे ॥ चाण्डालंपतितंचन्द्रो ह्लादयत्त्वनि-
जैकरैः ॥ तस्मादहंवरारोहे गृहगोधांसुदुःखितां ॥ उद्धारिष्येनिजैःपुण्यै दौहित्रैर्नाद्युषिर्यथा ॥ विमोहिनींनिराकृत्य गृहगोधामु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाचह ॥ दत्तंमयाकृतंपुण्यं विजयासंभवंतव ॥ गच्छविष्णोःशुभाल्लोकान् निर्धूताखिलकल्मषा ॥ तद्वाक्यंसहसाश्रुत्वा दिव्याभरणभूषिता ॥ विमुच्यदेहंतंजीर्णं गृहगोधासमुद्भवं ॥ द्वादशादित्यभाजाता दिव्यरूपामनस्विनी ॥ जगाममंत्र्यतंभूपं द्योतयन्तीदिशोदश ॥ श्रीमन्तमिवक्कर्वाणा वैष्णवंपदमुत्तमं ॥ यद्योगिगम्यंहुतभुक्प्रकाशं वरंवरेण्यंपरमस्वरूपं ॥ यस्मादिमेदेव शशिप्रकाशा जगत्प्रकाशायनृपःप्रसूतः ॥ ७६ ॥ इतिश्रीलघुनारदीयपुराणेरुक्माङ्गदचरिते गृहगोधासंवादोनामचतुर्दशः १४

वशिष्ठउवाच ॥ पातकान्मोचयित्वातां गृहगोधांसपार्थिवः ॥ उवाचमोहिनींवाक्यं शीघ्रमारुह्यतांहयः ॥ योजनायुतशोह्येष क्षणात्कृष्णध्वजोयथा ॥ अद्यपश्यासिपुत्रस्य वक्रंपूर्णेन्दुसप्रभं ॥ धार्मिकस्यवरारोहे कृतज्ञस्यमहात्मनः ॥ सुखगामीहयोदेवि विमानप्रतिमःशुभे ॥ तदाकर्ण्यवचोराज्ञो मोहिनीमदलालसा ॥ आरुरोहसमंभर्त्रा तंहयंवातवेगिनम् ॥ उवाचमोहिनीभूयो भर्त्तारंप्रस्मयन्निति ॥ प्रतोदयेनमश्वंत्वं स्वपुरायमहीपते ॥ पुत्रवक्रंस्पृहाद्रष्टुं लंपटातववर्त्तते ॥ तवाधुनानृपश्रेष्ठ गंतुंचत्वरतेमनः ॥ मोहिन्यावचनंश्रुत्वा प्रतस्थेनगरंप्रति ॥ पश्यमानःसुसंहृष्टः पादपान्पर्वतान्नदी ॥ वनानिसुविचित्राणि मृगान्बहुविधानपि ॥ ग्रामान्घोषान्तथादुर्गान् नगराणिशुभानिच ॥ सरांसिचविचित्राणि महाभागान्मनोहरान् ॥ अचिरेणाश्रमंदृष्ट्वा वामदेवस्यभूपतिः ॥ आकाशस्थोमहीपालो नमस्कृत्यत्वरान्वितः ॥ ततोययौमहाराजो वायुवेगेनवाजिना ॥ पश्यमानोबहून्देशान् धनधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यसमन्वितान् ॥ आससादपुरंराजा वैदेशेसुरसद्मवत ।' तमाग्रातंनृपंदृष्ट्वा चारैर्धर्मांगदस्ततः ॥ पितरंधर्मसंयुक्तं भूपालान्वा-
ना०पु० क्यमब्रवीत् ॥ एषाप्रकाशमायाति दिशुदीचीनृपोत्तमाः ॥ मत्पितुर्वाजिनाक्रान्ता तेजसातस्यरञ्जिता ॥ तस्माद्गच्छामहेसर्वे सं- अ० १८
॥ २१ ॥ मुखंनव्रजेत्सुतः ॥ यःसवैनरकंयाति घोरंनास्त्यत्रसंशयः ॥ संमुखंव्रजमानस्य सुतस्यपितरंप्रति ॥ पदेपदेयज्ञफलं प्राज्ञःपौरा-
णिकाद्विजाः ॥ उत्तिष्ठध्वंप्रयाम्येष भवद्भिःपरिवारितः ॥ अभिवादयितुंप्रेम्णा एषमेदैवतःपरं ॥ तथेत्युक्तस्तुतैःसर्वै र्भूमिपालैर्नृ-
पात्मजः ॥ जगामसंमुखंपद्भ्यां क्रोशमात्रंपितुस्तदा ॥ वृतोराजसहस्रेण मूर्त्तिमानिवमन्मथः ॥ सगत्वादूरमध्वानमाससादनृ-
पात्मजः ॥ संप्राप्यपितरंस्नेहाज्जगामधरणींतदा ॥ शिरसाराजभिःसार्द्धं प्रणाममकरोत्तदा ॥ तंप्रणामगतंप्रेक्ष्य तनयंभूभुजेस-
ह ॥ अवरुह्यहयाद्राजा समुत्थाप्यसुतंविभो ॥ भुजाभ्यांसाधुवृत्ताभ्यां परिष्वज्यसभूमिपः ॥ मूर्द्ध्निचैनमुपाघ्राय उवाचतनयं-
तदा ॥ कच्चित्पासिप्रजाःसर्वाः कच्चिद्ध्वंसयसेरिपून् ॥ न्यायागतेनवित्तेन कोशंपुत्रविभर्षिवै ॥ कच्चिद्विप्रेधिकावृत्तिरस्तिपुत्र-
त्वयाकृता ॥ कच्चिद्देशान्तशीलत्वं कच्चिद्दुर्गोनानिष्ठुरः ॥ कच्चिद्गावोनदुह्यन्ते पुत्रचाण्डालवेश्मनि ॥ कच्चित्तेविषयेसत्वा विनी-
ताःपितृवत्सलाः ॥ श्वश्रूवाक्येवधूःकच्चिद्वर्त्ततेभर्तृतत्परा ॥ कच्चिद्विवादान्विप्रैश्च सहपश्यसिपुत्रक ॥ कच्चिद्गावोनवाध्यन्ते वि-
षयेतृणवारिषु ॥ तुलामानानिसर्वाणि संपश्यसिदिनत्रये ॥ कुटुंबिनःकरैःपुत्र पीडयन्नातिवर्द्धसे ॥ कच्चिन्नद्यूतपानादि वर्त्तसे ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयेतव ॥ कश्चिद्भिन्नरसैर्लोका भिन्नधान्यैःपुरेतव ॥ तथाविशीर्णैर्वर्णैश्च वञ्चयन्तिनमानवाः ॥ सुदृष्ट्यापुत्रकच्चिद्वै हस्त्यश्वंपरिपश्यसि ॥ कच्चित्तुमातृःसर्वावै नविशेषेणपश्यसि ॥ कच्चिन्नवासरेविष्णोर्नरोभुङ्क्तेपुरेतव ॥ शशिक्षयेतुसंप्राप्ते कच्चिच्छ्राद्धकरोजनः ॥ कच्चिच्चापररात्रेषु निद्रांपुत्रविसर्जसे ॥ निद्रामूलमनर्थस्य निद्रापापप्रवर्त्तिनी ॥ निद्रादरिद्रजननी निद्राश्रेयोविनाशिनी॥ नहिनिद्रान्वितोराजा चिरंभुङ्क्तेवसुन्धरां ॥ पुंश्चलीचयथाभर्त्तुर्लोकद्वयविनाशिनी ॥ एवमुच्चरमाणेतु तनयोवाक्यमब्रवीत ॥ धर्मांगदोमहीपालं प्रणम्यचपुनःपुनः ॥ सर्वमेतत्कृतंतात पुनःकर्त्तास्मितेवचः ॥ पितुर्वचनकर्त्ताच पुत्रोवन्द्योजगत्त्रये ॥ किंतस्मात्पातकंतस्य नकुर्याद्यःपितुर्वचः ॥ नतुतीर्थफलंकुर्यात यःकुर्यात्सेवनंपितुः ॥ त्वदधीनंशरीरंमे त्वदधीनंहिजीवितं ॥ त्वदधीनोहिमेधर्मस्तथात्वंदैवतंमम ॥ त्रैलोक्यस्यापिदानेन नशुद्धिर्मेऋणात्तव ॥ किंपुनर्देहवृत्ताभ्यां क्लेशदानादिभिर्विभो ॥ एवंब्रुवाणंतनयं बहुभूपालसंवृतं ॥ रुक्मांगदःपरिष्वज्य पुनराहसुतंवचः ॥ सत्यमेतत्त्वयापुत्र व्याहृतंवेदसंमितं ॥ पितुरत्यधिकांकिंचिद्दैवतंनसुतस्यहि ॥ देवाःपराङ्मुखास्तस्य पितरंयोवमन्यते ॥ सोहंमूर्ध्नित्वयापुत्र धृतस्तुक्षितिरक्षणात् ॥ जित्वाद्वीपवतींपृथ्वीं बहुभूपालभूषितां ॥ एतत्सौख्यंपरंलोके स्वर्गस्यैतत्पदंतथा ॥ पितुरत्यधिकःपुत्रो यद्भवेत्क्षितिमण्डले ॥ सोहंपुत्रकृतार्थस्तु कृतःसद्गुणवर्त्तिना ॥ त्वयासाधयतांपुत्र तथाहरिदिनंशुभं ॥ ततपितुर्वचनंश्रुत्वा पुत्रोधर्मांगदोब्रवीत ॥ कृतस्तुभवात्राजन् निवेद्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयिभूधुरं ॥ कस्मिन्स्थानेत्वियंप्राप्ता सूर्यायुतसमप्रभा ॥ मन्येनिर्वेदमापन्न इमांकृत्वाप्रजापतिः ॥ नेदृग्रूपामहीपाल नारीत्रै-
लोक्यमध्यतः ॥ मेध्यभूधरजादेवी अथवासागरोद्भवा ॥ मायावामयदैत्यस्य प्रमदारूपधारिणी ॥ अहोधातासुनिपुणो येनेयं-
निर्मितापुरा ॥ कलाग्रशतभागंतु व्यलीकंनैवदृश्यते ॥ इयंहियोग्याकनकाबभासा तथैवधन्याजगतीपतीश ॥ एवंविधामेज-
ननीयथास्यात् कोन्योस्तिमत्तःसुकृतीनरेन्द्रः ॥ ४९ ॥ इतिश्री ल० ना० पु रु० पुत्रानुशासनं नाम पञ्चदशोध्यायः ॥ १५ ॥
वशिष्ठउवाच ॥ धर्म्मांगदवचःश्रुत्वा दृष्टोरुक्मांगदोब्रवीत् ॥ सत्यंतेजननीपुत्र संप्राप्तामन्दरेमया ॥ विधानात्पुत्रवालेयं मदर्थे-
कृतनिश्चया ॥ कुर्वतीदारुणांकिंचि त्तपःपरमदुष्करं ॥ ततःपञ्चदशाहेन हयमारुह्यवेगितः ॥ मन्दरंपर्वतंश्रेष्ठं गतोहंधर्मभूषण ॥
तस्यमूर्ध्निमहाभागा तोषयन्तीदिगंवरं ॥ मयादृष्टासमारुह्य पञ्चांश्चीरोदगह्वरं ॥ ततोहंमूर्च्छयायुक्तः पतितोधरणीतले ॥ अनंग
मार्गणैर्विद्धो व्याधविद्धोमृगोयथा ॥ ततोहमनयादेव्या शांत्वितश्चारुनेत्रया ॥ उक्तोहंभवभर्त्तामे किंचित्प्रार्थनयासह ॥ मया
चापिप्रतिज्ञातं सदक्षिणकरान्वितं ॥ सेयंभार्य्याविशालाक्षी स्थितामन्दरमस्तके ॥ ततोवतीर्यभूपृष्ठं समारुह्यतुरंगमं ॥ तृतीयेन
दिनेनाहं संप्राप्तस्तवमन्दिरं ॥ पश्यमानोगिरिन्देशान् सरांसिसरितस्तथा ॥ इयंतेजननीपुत्र ममभार्य्यासुशोभना ॥ अभिवा-
दयचार्वंगी मिमांसन्ध्यावलीमिव ॥ तत्पितुर्वचनंश्रुत्वा चाग्रसंस्थामवन्दत ॥ शिरसात्ववनींगत्वा विनयेनमहाशयः ॥ उवाच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोहिनीतत्र प्रहसन्निबभूपते ॥ नमस्करोमित्वामंब सहैभिर्वसुधाधिपैः ॥ प्रसादंकुरुमेदेवि प्रणतस्यकृतांजलेः ॥ तंपुत्रमवनींप्रा-
प्तं मोहिनींप्रेक्ष्यभूपते ॥ दाक्षिण्येनतुसाभर्त्तु रवतीर्य्यतुरंगमात् ॥ अवगृह्यचवाहुभ्यां उत्थाप्यविनतंतुतं ॥ परित्यक्तस्तथामात्रा
पुनरेवाभ्यवादयत् ॥ ततस्तांसुमनोज्ञैस्तु चारुवस्त्रैःसुभूषणैः ॥ भूषयित्वासमारोप्य पुनरेवहयोत्तमं ॥ सपृष्ठेचरणौकृत्वा तस्या
राजीवलोचनः ॥ तेनैवविधिनाभूप पितरंचाप्यरोपयत् ॥ वृतोभूपालसंघैश्च पद्भ्यांधर्म्मांगदोययौ ॥ अश्वस्याग्रेतदातद्दृष्टो जन-
नींप्रेक्ष्यमोहिनीं ॥ श्रावयन्सुजनंसर्वं मेघगंभीरयागिरा ॥ धन्यःसतनयोलोके मातरोयस्यभूरिशः ॥ सर्वलक्षणसंपूर्णः पितुरिष्टो
महावलः ॥ यस्यैकाजननीलोके पितातस्येहदुःखभाक् ॥ पितुर्दुःखेनपुत्रस्य नचसौख्यंभवेन्महत् ॥ एकस्यावन्दनेमातुः पृथि-
वीफलमश्नुते ॥ मातृणांवहुलेसत्यं महत्पुण्यंभविष्यति ॥ दिवसेदिवसेपूजां कुर्वतस्त्वक्षयंफलं ॥ एवमुच्चार्य्यमाणोसाववनीप-
तिसंवृतः ॥ प्रविष्टोनगरंरम्यं वैदिशंऋद्धिसंयुतं ॥ हयस्थेनैवपित्रावै सपद्भ्यामेवभूपते ॥ ततोगृहवरंप्राप्य गृह्यमाणोजनैर्नृपः ॥
अवरुह्यहयात्तस्मात् मोहिनींवाक्यमब्रवीत् ॥ धर्मांगदगृहंगच्छ मत्सुतस्यमनोहरं ॥ एषतेगुरुसुश्रूषां करिष्यतिवरानने ॥ नस-
खीनैवदासीति सुश्रूषामाचरेत्तथा ॥ साह्येवमुक्तापतिना प्रतस्थेसुतमन्दिरं ॥ धर्मांगदेनसातुष्टा गच्छन्तीमन्दिरायवै ॥ दृष्ट्वास-
चमहाभाग स्तानुवाचमहीभुजः ॥ तिष्ठध्वंपितुरादेशात सुश्रूषेजननीमहं ॥ तानेवमुक्त्वानीत्वाच स्वगृहंगजगामिनीं ॥ आरो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पयामासचतां पर्य्यंकेसुमनोहरे ॥ काञ्चनेपट्टसूत्रेण रचितेकोमलेदृढे ॥ सुखास्तरणसंयुक्ते मणिविद्रुमभूषिते ॥ रत्नदीपैश्चबहुशो
 भाषितेसूर्य्यसन्निभैः ॥ पादप्रक्षालनंचक्रे ततोवैधर्मभूषणः ॥ सन्ध्यावल्यागुरुत्वेन तामपश्यतसुन्दरीं ॥ नैवतस्याभवद्दृष्टं मो-
॥ २३ ॥ हिनींप्रतिमानसं ॥ सुकुमारीसुतत्वंगी पीनोरुजघनस्थली ॥ मेनेवर्षायुतसमा मात्मानंहित्रिवार्षिकं ॥ प्रक्षाल्यचरणौतस्या स्त-
ज्जलंचाप्यवन्दयत ॥ पादोत्थंपरयाभक्त्या कृतकृत्योस्मिभाविनि ॥ ततस्तांस्नापयामास अक्षब्धेनेहचेतसा ॥ स्वयंचवरनारीभिः
श्रमक्लमहरायवै ॥ सर्वभोगैस्तदादेवीं चक्रेधर्मांगदःसुतः ॥ क्षीरोदमथनेजाते मन्दरेचामृतालये ॥ येलब्धदानवान्जित्वा पाता-
लेरक्तमृत्तिके ॥ मोहिन्याःकर्णयोश्चक्रे स्वयमेववृषांगदः ॥ जांबूनदस्यशुद्धस्य निष्कंकुलिशभूषितं ॥ हारादनंतरंमातुर्ददौभूप
सुतस्तदा ॥ अष्टोत्तरसहस्रेण धात्रीफलनिभैःशुभैः ॥ मौक्तिकैराचितःशुभ्रो हारोदेव्याःक्षिपद्धृदि ॥ निष्कपलशतैर्बद्धः कुलिशा
युतभूषितः ॥ हाराल्लघुतरंचक्रे मातुर्नृपसुतस्तदा ॥ वलयावज्रखचिता द्विरष्टौकरयोर्दधत ॥ एकैकेनिस्ककोटिर्हि कृतामुल्यवि-
देर्नरैः ॥ केयुरनूपुरंतस्या अनन्तोयंनृपात्मजः ॥ प्रददौपितुरिष्ठायां अनेकाभरणंनृपः ॥ कटिसूत्रंचसर्वाण्या यदासीत्तारकप्र-
भं ॥ तद्भ्रष्टंभयभीतायाः संग्रामेतारकामये ॥ कालनेमिस्थितेराज्ये पतितंमलयाचले ॥ तद्गृहीतंतुदैत्येन शतमायेनमायिना ॥
तंहत्वामलयेदैत्यं दैत्यकोटिशतावृतं ॥ संवत्सररणेघोरे पितुर्वचनकारणात् ॥ अवापकटिसूत्रंतद्दैत्यराजप्रियास्थितं ॥ तद्ददौपि- ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुराज्ञायाः सानन्दपुलकोनृपः ॥ हिरण्यकशिपोःपूर्वं याभार्य्यालोकसुन्दरी ॥ तस्यासीमन्तकस्यासीच्छतविद्युत्समप्रभः ॥ साप्रविष्टाहिपतिना सहपावकमध्यतः ॥ समुद्रक्षिप्यसीमन्तं दुःखेनमहतान्वितः ॥ सागरस्तत्रसंपूज्य रत्नश्रेष्ठमिदंकिल ॥ ददौ धर्मांगदेरत्नं समुद्रोवीर्य्यतोषितः ॥ जनन्यैप्रददौसोपि सूर्य्यकोटिसमप्रभं ॥ अग्निशौचेशुभेवस्त्रे सकाञ्चनमनोरमे ॥ सहस्रकोटितुल्येतु मोहिन्याःसानिवेदयत् ॥ देवमाल्यंसुगन्धाद्यं तथादेवविलेपनं ॥ लब्धंदेवगुरोःपूर्वं सिद्धहस्तात्सुहृद्यकं ॥ धर्मांगदेन वीरेण द्वीपानामाधिपेनच ॥ तच्चापिप्रददौदेव्या मोहिन्याःकामवर्द्धनं ॥ संपूज्यपरयाभक्त्या पश्चातषड्रसभोजनं ॥ स्वीकृतंमातृहस्तेन भोजयामासभूमिपः ॥ पुरस्तादेवजननीं वाक्यैःसंबोध्यभूरिशः ॥ उवाचमधुरंवाक्यं शिरसोच्यप्रणम्यवै ॥ मयात्वयाचकर्त्तव्यं राज्ञोवाक्यंनसंशयः ॥ यात्विष्टानृपतेर्देवि सास्माकंतुगरीयसी ॥ यात्विष्टाभवतेभर्त्तु स्तस्यांयानिष्ठमाचरेत् ॥ सपत्नी नरकंयाति यावदिन्द्राश्चतुर्द्दश ॥ सपत्नभावंयाकुर्य्या द्भर्तुप्राणप्रियातुया ॥ तस्याःस्नेहवशात्सापि पच्यतेताम्रभ्राष्ट्रके ॥ यथा सुखेवसेद्भर्त्ता तथाकार्य्यंहिभार्य्यया ॥ अनुकूलंहितंकार्यं भर्त्तुरिष्टाहिसाभवेत् ॥ यथाभर्त्तातथातांहि वश्येतवरवर्णिनि ॥ हीतायामपिशुश्रूषां कृत्वायातित्रिविष्टपं ॥ पश्चात्स्थानेभवेत्स्याहि यस्मिन्नसाह्यभवत्पुरा ॥ ॥सर्वभोगानवाप्नोति भर्त्तुरिष्टाप्रजायते ॥ ईर्ष्यागर्वपरित्यागा त्सर्वेश्वरपदंलभेत् ॥ सपत्नीयासपत्न्याश्च शुश्रूषाकुरुतेसदा ॥ भर्त्तुरिष्टांसमीक्षेत लोकास्तस्याःसदाक्षयाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इष्टापुरान्ब्राह्मणस्य वेश्याभूत्शाकलेपुरे ॥ शूद्राचारप्रदुष्टस्य परित्यक्तक्रियस्यच ॥ तस्यैवतुमहाभागा भार्य्यासाध्वीपतिव्रता ॥
साधुपर्य्यचरत्साधु सवश्यंब्राह्मणाधमं ॥ उभयोश्चालयेत्पादा वुभयोःप्रियकारिणी ॥ उभयोरप्यधःशेते तयोश्चवचनेस्थिता ॥
वेश्ययावार्य्यमाणानि सर्वप्रायछताधिकं ॥ एवंशुश्रूषयंत्याहि भर्त्तारंवेश्ययासह ॥ जगामसुमहान्कालो दुःखितायामहीपते ॥
अपरस्मिन्दिनेभर्त्तामाहिषंमूलमास्थितं ॥ अभक्षयत्सुधर्मेणानिःपावांतिलमिश्रितान् ॥ तदापथ्यमाशित्वाथअवमन्यपतिव्रताम् ॥
अभवद्दारुणोरोगः स्त्रीजितस्यभगन्दरः ॥ पीड्यमानस्तुसतदा दिवारात्रौतदातुरः ॥ यावदस्तिगृहेवित्तं तावद्वेश्याहिसर्वशः ॥
गृहीत्वाद्विगुणंवित्तं गतायायान्यमन्दिरं ॥ अन्यस्यचतथासायं गतापार्श्वमनिन्दिते ॥ ततःसदीनवदनो व्रीडयाधोमुखास्थितः ॥
उवाचसरुदन्भार्य्यां रुजाव्याकुलचेतनः ॥ परिपालयमांदेवि वेश्यासक्तंसुनिष्ठुरं ॥ नमयोपकृतंकिञ्चि त्तवसुन्दरिपापिना ॥
योभार्य्यांप्रणतांपापो नानुमन्येतगर्वितः ॥ सषंढोभवतेभद्रे जन्मानिदशपञ्चच ॥ दिवाकीर्त्तिंगृहंप्राप्य गर्भितंसाधुभिर्जनैः ॥
पापांयोनिमवाप्स्यामि देवित्वामवमन्यहि ॥ तवक्रोधेनदग्धोस्मि त्राहिमांपापिनंशुभे ॥ त्राणंमेकुरुभर्त्तारमब्रवीत्सापतिव्रता ॥
नदैन्यंभवताकार्य्यं नव्रीडाकार्यमांप्रति ॥ नचापित्वयिमेक्रोधो येनदग्धानिवक्ष्यसि ॥ पुराकृतानिपापानि दुःखानिप्रभवन्तिहि ॥ ॥ २४ ॥
तानियःक्षमतेविद्वान् सज्ञेयःपुरुषोत्तमः ॥ यन्मयापापयापापं कृतंवैपूर्वजन्मनि ॥ तद्भुंजत्यानमेदुःखं नविसादश्चकश्चन ॥ इ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्येवमुक्काभर्त्तारं सासुभ्रूःसमयालयत् ॥ आनीयजनकाद्वित्तं बन्धुभ्योवरवर्णिनी ॥ क्षीरोदनिलयात्रासं भर्त्तारंसानुगन्यते ॥
मोचयतिदिवारात्रौ पुरीषंमुत्रएवच ॥ रजन्यांचैववृक्षोत्थं गृह्यनिर्जासजंजलं ॥ नखेनपातयामास कृमिन्कृष्णान्शनैःशनैः ॥
नसास्वपितिवैरात्रौ नदिवावरवर्णिनी ॥ भर्त्तुर्दुःखेनसातप्ता पश्यन्तीज्वलितंजगत् ॥ भोदेवास्त्रायतांसर्वे पितरोयेचाविश्रुताः ॥
कुर्वंतुरोगहीनंमे भर्त्तारंगतकल्मषं ॥ चण्डिकायैप्रदास्यामि रक्तमाम्ससमुद्भवं ॥ अजाविमाहिषोपेतं भर्तुरिष्टाहिमेभवेत् ॥ साद-
रात्कारयिष्यामि उपवासंतथादश ॥ जननीस्थापयिष्यामि शून्यकण्टकसंस्तरे ॥ नोपभोक्ष्यामिमधुरं नोपभोक्ष्यामिवैघृतं ॥ अ
भ्यङ्गरहितावस्थां रम्येहंनात्रसंशयः ॥ जीवतांरोगहीनस्तु भर्त्तामेशरदांशतं ॥ एवंसाव्याहरद्देवि वासरेवासरेतदा ॥ ततःकाले-
नचान्येन सन्निपातोभवत्पतेः ॥ तस्यापिकटुकंप्रादा दास्येनिःक्षिप्यदेशिनी ॥ तद्दीयमानेकटुके अंगुलींतामखण्डयत् ॥ वेश्यां
दृष्ट्वातदाभीत स्तद्गतेनांतरात्मना ॥ उभयोर्द्दन्तयोश्लेषः सहसासमपद्यत ॥ तांखण्डमंगुलींवक्के स्थितांभर्तुःस्वकोमलां ॥ खण्ड-
यित्वांगुलींभर्त्ता पञ्चत्वमगमत्तदा ॥ शय्यायांलीनमुक्तायां स्मरन्तांपुंश्चलींतदा ॥ मृतंविज्ञायभर्त्तारं साभार्य्याभर्तृतत्परा ॥ वि-
क्रियांगतमेवन्तं गृहीत्वाचैवसातदा ॥ सर्पिर्युतांचितांचक्रे मध्येकृत्वापतिंतदा ॥ अनुगृह्यपदाभ्यांसा पश्चांदत्वाथुपावकं ॥ मु-
खेमुखंसमाधाय हृदयेहृदयंतथा ॥ जघनेजघनंदेवी भर्तुःसासंनिवेश्यह ॥ दाहयामासकल्याणी भर्तुर्देहंरुजान्वितं ॥ आत्मना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहचार्वंगी ज्वलितेजातवेदसि ॥ विमुच्यदेहंसहसाजगाम पतिंसमादायसुराधिलोकं ॥ विशोषयित्वावहुपापसंघान् स्वकर्मणा
तेनचदुःकरेण ॥ ६४ ॥ इतिश्रीलघुनारदीयपुराणे सन्ध्यावलीप्रवोधन्नाम षोडशोध्यायः ॥ १६ ॥ ७ ७ ७ ७ ७
॥ २५ ॥ पुत्रउवाच ॥ तस्मादीर्ष्यांपरित्यज्य मोहिनीमन्नभोजय ॥ नमातरीदृशंपुण्यं त्रैलोक्येप्राप्यतेक्वचित् ॥ गृहस्थेनप्रियांभार्यां भ-
र्तुर्याहिविभोजयेत् ॥ सपत्न्योहिसपत्न्यैतु यद्धक्तंप्रददातिवै ॥ तेनानेनभवेद्देवि प्रीतःकमलजःशुभे ॥ पितुर्मनोरमेतत्वं प्रसीद-
स्वममानघे ॥ तस्यास्तुसौख्यंकर्त्तव्यमावाभ्यांवरवर्णिनी ॥ भवेत्पापक्षयश्चैव स्वर्गप्राप्तिस्तुवाक्षया ॥ श्रुत्वातद्वचनंसातु देवीस-
न्ध्यावलीतथा ॥ अभिनन्द्यपरिष्वज्य तनयंगजगामिनी ॥ मूर्ध्निचैवमुपाघ्राय वचनंचेदमब्रवीत् ॥ करिष्येववचनंपुत्र धर्म्यंहि-
तवमानद ॥ ईर्ष्यामानंपरित्यज्य भोजयिष्यामिमोहिनीं ॥ सदपत्यात्वहंपुत्र त्वयैकेनमहामते ॥ नियमैर्बहुभिर्जातस्तथैवबहुभि-
र्व्रतैः ॥ व्रतराजेनचीर्णेन जातस्त्वमसिपुत्रक ॥ नहीदृशंव्रतवरं पुत्रलोकेषुविद्यते ॥ सद्यप्रत्ययकृद्वत्स महापातकनाशनं ॥ किं-
कार्यंबहुभिःपुत्रैः शोकसन्तापकारकैः ॥ वरमेकःकुलालंवी यत्रविश्रमतेकुलं ॥ त्रैलोक्यादुपरिष्ठाच्च स्थिताहंतवसद्गुणैः ॥ जनयि-
त्वातुत्वांपुत्र धर्मचारिन्त्यभूषण ॥ नकिंचित्कामयेवत्स तृप्तातवगुणत्रयैः ॥ धन्यानितानिपुण्यानि यैर्जातस्त्वांममानघ ॥ सप्त ॥ २५ ॥
द्वीपपतिःप्राज्ञः पितुराज्ञाकरस्तथा ॥ नाह्लादयतियस्तातं जननीम्वाथपुत्रक ॥ तंपुत्रंकवयःप्राहुर्महापातकसूचकम् ॥ एवमुक्ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुतनयं देवीसन्ध्यावलीतदा ॥ दीक्षांचक्रेचभाण्डानां षड्रसस्यकृतेततः ॥ तस्यावीक्षितमात्रेण परिपूर्णानिभूपते ॥ षड्रसस्यतथो-
श्रस्य मोहिनीभोजनेच्छया ॥ जलस्यामृतकल्पस्य शीतलस्यमहीपते ॥ घटापूर्णास्तथाचक्रे राज्ञांसन्ध्यावलीनृप ॥ ततःसार्चि-
षमादाय काञ्चनंरत्नसंभवं ॥ तांपर्यन्वेक्ष्यदव्यग्रे मोहिनींप्राहसत्ततः ॥ काञ्चनेभाजनेश्लक्ष्णे सुस्वादान्नंत्वशनने ॥ शनैःशनैश्चभु-
ञ्जाना राजीवदललोचना ॥ उपविश्याशनेरम्ये शातकुंभमयेशुभे ॥ वीज्यमानावरारोहा व्यजनेननराधिप ॥ धर्मांगदगृहीतेन
शिखिपिच्छकृतेनच ॥ साभुक्त्वाब्रह्मतनया तदन्नममृतोपमं ॥ चतुर्गुणंसुशीतेन कृत्वाशौचंजलेनतु ॥ जगृहेपुत्रदत्तंसा तांबूलं
सुरसुन्दरी ॥ वरचन्दनदिग्धेन हस्तेनपरयामुदा ॥ ततःप्रहस्यशनकैः प्राहसन्ध्यावलींनृप ॥ जननीकिंतुदेवित्वं नृपांगदनृप-
स्यतु ॥ नमयाहिपरिज्ञातं श्रमखेदतयाशुभे ॥ तामेवंवादिनींदृष्ट्वा तदासन्ध्यावलींप्रति ॥ धर्मांगदोथनृपतिरिदंवचनमब्रवीत् ॥
उदरेत्वनयादेव्या धृतःसंवत्सरत्रयं ॥ तवभर्तुःप्रसादेन वृद्धिंप्राप्तोहमस्यतु ॥ सन्त्यनेकानिमातॄणां वर्गाणिममसुन्दरि ॥ अस्याः
पीतंपयोदेवि मयासुकृतिनाशुभे ॥ अनयासारुषातीव्रा संप्राप्ताप्रसवात्मिका ॥ जनयित्वातुमांदेवी जातापूर्णमनोरमा ॥ त-
न्नास्तित्रिषुलोकेषु येनानृण्यमवाप्नुयात् ॥ मातुस्त्वहंसुचार्वंगि सत्यमेतन्मयोदितं ॥ सोहंधन्यतरोलोके नास्तिमत्तोधिकःपु-
मान् ॥ योहमुत्सङ्गमारूढो मातॄणांयस्यनित्यशः ॥ नोत्सङ्गंयोहिमातॄणां विशतेसाविहकाचित् ॥ मातृसौख्यंनजानाति कुमारी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भर्तृकंयथा ॥ नसोस्तिभूतलेदेवि पितृमातृबहिःकृतः ॥ मातुरुत्संगमारूढः पुत्रोधर्मान्वितोभवेत् ॥ हरोत्तमागंहंतुंतु कराभ्याम-
मा०पु० भिवाञ्छति ॥ पाल्यमानोजनन्याहि पित्राहीनोपिगर्वितः ॥ समीहतेजगद्धर्तुं सवीर्यंमातृजंपयः ॥ अनयाजठरेनोढो भवतीनां अ० १७
॥ २६ ॥ सुतस्त्वहं ॥ अम्बाचभवतीनाम्वा विशेषानास्तिमेशुभे ॥ सत्येनानेनमेताती जीवतांशरदांशतं ॥ एवंब्रुवतिराजेन्द्रे मोहिनीवि-
स्मयंगता ॥ कथंविरुद्धमेतस्य मयाकार्यंसुपापया ॥ धर्मज्ञस्यविनीतस्य मातृभक्तस्यचैवहि ॥ पितृभक्तिपरस्यास्य नचास्यस-
दृशःक्षितौ ॥ एवंगुणान्वितस्योहं कथंकुर्यांजुगुप्सितं ॥ पुत्रस्यधर्मशीलस्य भूत्वातुजननीत्वहं ॥ एवंविमृष्यबहुधा मोहिनीलो-
कसुन्दरी ॥ उवाचवचनंबाला शीघ्रमानयमेपतिं ॥ नशक्नोमिविनातेन मुहूर्त्तमपिजीवितं ॥ ततःसत्वरितोगत्वा प्रणम्यपितरं
नृपः ॥ उवाचपितरंधीमान् सतदानतकंधरः ॥ कनिष्ठाजननीतात शीघ्रमाह्वयतेशुभा ॥ त्वंमहाराजतस्यास्तु समीपंगंतुमर्हसि ॥
तत्पुत्रवाक्यान्नृपतिस्तत्क्षणाद्गन्तुमुद्यतः ॥ प्रहृष्टतनयोराजा तयाजुष्टंगृहंविशेत् ॥ सप्रविश्यमहाराजा ददर्शशयनस्थितां ॥ मो-
हिनींमोहसंयुक्तां तप्तकाञ्चनसन्निभां ॥ उपास्यमानांप्रियया सन्ध्यावल्याशनैःशनैः ॥ पुत्रवाक्यात्परित्यज्य द्वेषंसापत्नजंतदा ॥
दृष्ट्वारुक्माङ्गदंप्राप्तमुत्थितामोहिनीद्रुतं ॥ उत्थायचाब्रवीद्दृष्ट्वा राजानंभूरिदाक्षिणं ॥ इहोपविश्यतांकान्त पर्यङ्केमृदुकाञ्चने ॥ क-
स्मान्निरीक्षतेराजन् राज्यंतत्रतवाधुना ॥ ज्ञातंमयातवाद्यापि राज्येच्छाननिवर्त्तते ॥ मन्येदुष्कृतिनंभूप त्वामहंधरणीतले ॥ यः ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समर्थंसुतंप्राप्य मातृभृत्यसुहृत्सुच ॥ दक्षेष्वन्येषुधीरेषु स्वयमीक्षेद्यशःश्रियं ॥ तस्माद्दुःखाधिकंनास्ति पापमेवपदेपदे ॥ समर्थेयःसुतेभारं नादत्तेभूपमन्दभाक् ॥ सुखिनाराजयोयान्ति पुत्रार्पितकुटुंबिने ॥ केवलंफलभोक्तॄणां विषयासक्तचेतसां ॥ पुत्रानुजपितृभ्रातृ मातृभृत्यमहत्सुच ॥ दक्षेष्वन्येषुवीरेषु बलवत्सुस्थितेषुच ॥ धर्मादिपालनेभूप कथंवीक्षयसेश्रियम् ॥ परित्यज्य प्रियासौख्यं कालाशइवदुर्बलः ॥ यदिपालयसेराज्यं किंमयातेप्रयोजनं ॥ अप्रयोजनमानीता क्षीरगह्वरमस्तकात् ॥ स्थिटभोज्याभविष्यामि आभिषंत्विवपक्षिभिः ॥ योभार्यांयौवनोपेतां नसेवयतिदुर्मतिः ॥ कृत्यासक्तस्तुदुर्मेधाः कुतस्तस्यभवेत्प्रिया ॥ असेविताव्रजेद्भार्या तथादत्तंधनंव्रजेत् ॥ अरक्षितंव्रजेद्द्रष्टुमनभ्यस्तंश्रुतंव्रजेत् ॥ नालसैःप्राप्यतेविद्या नभार्यासंस्थितव्रतैः ॥ अनुष्ठानादिनालक्ष्मीर्नामक्तैःप्राप्यतेनृप ॥ नाज्ञानैःप्राप्यतेमोक्षो नात्यागैःप्राप्यतेयशः ॥ नादमीसुखमाप्नोति नाभार्यःसन्ततिंक्वचित ॥ नालक्ष्मीःपालयेत्पृथ्वीं नागजीसंगरंव्रजेत ॥ नचागोर्मिष्टमश्नाति नाविद्योभाषतेप्रियं ॥ अपृष्ठोनैवजानाति अगण्छन्नव्रजेत्क्वचित् ॥ अकुर्वन्नप्रियम्प्रेति ननिद्रामेतिजागरी ॥ तस्माद्भूपालमांत्यक्त्वा धर्मांगदगृहंशुभे ॥ वीक्ष्यसेराज्यपदवीं समर्थेतनयेविभो ॥ एवंब्रुवाणांविबुधेशपुत्री मतिप्रियांचारुविशालनेत्रां ॥ व्रीडान्वितःपुत्रसमीपवर्ती उवाचह्रद्यंनृपतिःप्रियान्ताम् ॥ ६२ ॥

इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते मोहिनीवाक्यन्नाम सप्तदशोध्यायः ॥ १७ ॥ ६ ६ ६ ६ ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 राजोवाच ॥ नाधिकारोमयाभीरु कृतोनृपपरिग्रहे ॥ श्रमातुरस्यमेनिद्रा प्रवृत्तासुखदायिनी ॥ धर्मांगदोमयात्यक्तो मोहिनींन-
 यमंदिरं ॥ पूजयस्वयथान्यायमेषापत्नीप्रियामम ॥ निजंकमलपत्राक्ष सर्वरत्नसमन्वितं ॥ वातायनैश्चसंयुक्तं मनोहारिसुखप्रदं ॥
एवंब्रुवन्कृतोदेवि निद्रयाशुभलोचने ॥ अवाप्यशयनंश्लक्ष्णं मंदभाग्योदिनंयथा ॥ विबुद्धमात्रःसहसा त्वांप्राप्तःपद्मलोचने ॥
यद्ब्रवीषिवचोदेवि तत्करोमिनसंशयः ॥ ॥ मोहिन्युवाच ॥ प्रसांतयस्वगजेन्द्र इमेदाराःसुदुःखिताः ॥ ममोद्वाहेनानिर्विण्णा
निराशाःकामभोगयोः ॥ ज्येष्ठानांरूपयुक्तानां कलत्राणांहिभूपते ॥ मूर्ध्निकीलंप्रियाख्यांहि यद्राजंतान्निपातयेत् ॥ स्वर्गतिर्नभ-
वेत्तस्य नचान्याविद्यतेगतिः ॥ पतिव्रतासुरुष्टासु कामेशान्तिर्भविष्यति ॥ जनितारंहिपुत्रेमे भस्माकुर्युःपतिव्रताः ॥ किंपुनःप्रा-
कृतामांहि तववाक्यानुरोधिनीं ॥ संध्यावलिसमानारी त्रैलोक्येनास्तिभूमिप ॥ तवस्नेहेनसामांतु भुंजापयातिषड्रसैः ॥ प्रिया-
णिचात्रवाक्यानि वदतेतवगौरवात् ॥ एवंविधाहिशतशो नार्य्यःसंतिगृहेतव ॥ यासान्नपादरजसस्तुल्याहंभूपतेक्वचित् ॥ मो-
हिन्यावचनंश्रुत्वा ब्रीडितोह्यभवन्नृपः ॥ सपुत्रायाःसमीपेतु सन्ध्यावल्यानृपोत्तमः ॥ इङ्गितज्ञस्तुतनयो ज्ञात्वावस्थांमनोभवां ॥
पितरंकामसंतप्तं मोहिन्यायोविमोहितः ॥ आहूयमातृस्ताःसर्वाः सन्ध्यावलिपुरोगमाः ॥ कृतांजलिपुटोभूत्वा मातृणांसन्निधौत-
दा ॥ उवाचवाक्यंमतिमान् पितुरर्थेचमातरः ॥ विमोहिनीयाजननी व्यूढापित्राशुभानना ॥ साचप्रार्थयतेदेवी राजानंरहसि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितं ॥ क्रीडार्थमात्मनःसुभ्रू स्तामनुज्ञातुमर्हथ ॥ मातरऊचुः ॥ मामैवंव्याहरारिघ्न नैतत्कर्तुंहिशक्नुमः ॥ कोनुमोदयतेपुत्र स-र्वभक्षणमात्मनः ॥ कोहिदीपयतेवह्निं स्वदेहेवेदिनांवर ॥ कोभक्षयेद्विषंघोरं कश्छिद्यादात्मनःशिरः ॥ कस्तरेत्सागरंवध्वा ग्री-वायांदारुणांशिळां ॥ कोगच्छेत्सर्पभवनं कःकेशाश्चहरेल्लुनेत् ॥ कोनिषीदतिधारायां खड्गस्यनिशितस्यच ॥ गंतुंमोदयतेकान्तम-न्यानारीयदिध्रुवं ॥ सर्वस्वंशक्यतेदातुं नतच्छक्यंकथंचन ॥ वरंहिशिरसश्छेद स्तत्क्षणाच्चवराशिना ॥ नेदृशंदयितंकान्तं निरी-क्षेदन्ययावृतं ॥ नासौसीमंतिनीकाचित मन्यतेतातकुत्रचित् ॥ यातुप्राणसमंकान्त मन्यस्त्रीकुचमर्दिनं ॥ विन्दतेतत्त्वराबाधा किं-पुनर्वास्वचक्षुषा ॥ सर्वेषामेवदुःखानां दुःखमेतदनन्तकं ॥ भर्त्तायदन्ययागुप्तो दृश्यतेस्वेनचक्षुषा ॥ मरणंत्वभिनन्दन्ति युगपन्मा-तरस्तव ॥ नतुमोहिनिसंयुक्तां द्रष्टुंशक्योहिभूपतिं ॥ धर्मांगदउवाच ॥ यदिमेनपितुःसौख्यं कुरुध्वंसर्वमातरः ॥ विषमालोड्यपा-स्यामि सौख्यंवोस्तुमृतेमयि ॥ कर्मणामनसावाचा यःपितुर्दुःखमाचरेत् ॥ समेशत्रुःस्वयंवध्यो ह्यवध्योसिवरासिना ॥ सर्वासाम-धिकादेवी मोहिनीमेपितुःप्रिया ॥ क्रीडार्थमाहृतापित्रा मन्दराच्चारुकन्दरात् ॥ तत्पुत्रवचनंश्रुत्वा वेपमानाहिमातरः ॥ ऊचुर्द्ध-र्मांगदंवाक्यं हितार्थंतनयस्यहि ॥ अवश्यंतववाक्यंहि कर्त्तव्यंन्यायसंयुतं ॥ किंचिद्दत्वाततःस्वस्थो मोहिनींयातुतेपिता ॥ भा-र्यामुद्वाहयेद्भर्त्ता द्वितीयांयदिपुत्रक ॥ विवाहवित्ताद्द्विगुणं देयंतस्यभवेद्ध्रुवं ॥ अन्यथाऋणवान्भर्त्ता ज्येष्ठायाभवतेनघ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्रेच्छयाचयोभर्त्ता अन्यामुद्वाहयेत्प्रियां ॥ ज्येष्ठायांहिमतंदेयमेषधर्मविनिश्चयः ॥ इष्टापूर्त्येवृथातस्य नज्येष्ठांयोहितोषयेत् ॥
धर्मंधर्मभृतांश्रेष्ठ नतेमानयतेपिता ॥ तच्छ्रुत्वामातृवचनं प्रहृष्टेनांतरात्मना ॥ एकैकस्यांददौसाग्रं कोटिमष्टादशस्यतु ॥ पृथक्पृ-
थक्चग्रामाणां संघंसंप्रददौतदा ॥ युक्तानस्वतरीभिस्तु चतुर्भिस्तुनृपात्मजः ॥ एकैकस्यांददौचाष्टौ रथान्काञ्चनमालिनः ॥ वा-
ससामयुतंप्रादान्महामुल्यंसधार्मिकः ॥ जांबूनदस्यशुद्धस्य मातृणांप्रददौतदा ॥ लक्षमेकैकशोराजन् पितृभक्त्यामहामतिः ॥ दा-
सानांचेटिकानांच सहस्राणिशतानिच ॥ कुम्भायुतंसर्पिषस्तु तैलस्यचतदेवहि ॥ अजाविकमसंख्यातमेकैकस्यांन्यवेदयेत ॥ स-
हस्रणेसुवर्णस्य कृत्वावैभूषणंमहत ॥ आखण्डलस्यशङ्खेण भूषितंमणिभिस्तदा ॥ माणिक्यादिमहाराज प्रददौचपृथक्पृथक् ॥ धा-
त्रीफलनिभान्हारान् मातृणामातृवत्सलः ॥ ददावेकैकशस्तासां तुष्ट्यर्थंमनुजर्षभ ॥ वलयानिमहार्हाणि भूषणानितथैवच ॥ कटि-
सूत्राणिशुभ्राणि प्रददौमातृवत्सलः ॥ चन्दनंभूरिकर्पूरं प्रददौप्रस्थसंख्यया ॥ मातृणामविशेषेण पितुःप्रियहितेरतः ॥ भोजनानि
विचित्राणि जलपात्राण्यनेकशः ॥ घृतक्षीरस्यपात्राणि पेयस्यविविधस्यच ॥ प्रददौसमहाभागो ह्येकैकस्याःसभूपतिः ॥ स्था-
लीनांकांचनीनांच कुंभानांसनृपात्मजः ॥ एकैकस्यददौगजन् शतानित्रीणिपंचच ॥ करेणूनांप्रवेगानां सुरूपाणांतथैवच ॥ विं-
शतिर्विंशतिंप्रादादुष्ट्राणांचशतंशतं ॥ शिविकांचतथाप्रादात्तदाधर्मविभूषणः ॥ मातृणांतुचतुष्टयार्थं सुखार्थमरिकर्षणः ॥ एवंद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वावहुविधं धनंताभ्यःसुभूरिशः ।। वभूवानन्दवान्राजा कृत्वातासांप्रदक्षिणं ।। कृत्वाभिलषितंतासां कृताञ्जलिपुटोब्रवीत् ।। म-
मापरोधाक्रियतांतथैवं सर्वास्तुसंभूयत्वदर्थकंहि ।। ब्रुवन्तुसत्यंपितरंनरेन्द्रं भुंक्ष्वत्वमेतांनृपमोहिनीमिति ।। ममोपराधाद्भवतीयु-
वत्यः पतिंतमुद्दिश्ययथैकपश्या ।। एवंतुसर्वांपितरंममाघस्तेनेहतांभुङ्क्ष्वनृपेशमोहिनीम् ।। तवास्मदीयाभवताहिलज्जा स्वल्पा-
पिकार्यामनसानरेन्द्र ।। विमोहिनींब्रह्मसुतांसुशीलां गत्वारमत्वंशरदःशतानि ।। तत्पुत्रवाक्यंहिनिशम्यसर्वा हृष्टास्तदातंनृपरा-
जपत्न्यः ।। रमस्वराजेन्द्रविमोहिनीमिमां विदेहपुत्र्यासयथाहरिश्च ।। तच्छ्रत्वप्रभृताकुशकेतुपुत्री स्वसेयमस्माकमिहास्तुराज-
न् ।। पुत्रेणचानेनविमुक्तशोकाः कृतास्तुवाक्यैःप्रतिबोधिताःस्मः ।। ५५ ।। इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते मातृ-
संबोधनंनामाष्टादशोध्यायः ।। १८ ।। ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७
बशिष्ठउवाच ।। सोनुज्ञातोमहीपालः प्रियाभिःप्रियकामुकः ।। प्रहर्षमतुलंलेभे धर्मांगदमुवाचह ।। एतांद्वीपवतींपृथ्वीं परिपाल-
यपुत्रक ।। दुष्टानांनिग्रहंकृत्वा अप्रमत्तंसदास्थितः ।। विष्णुवासरभक्तश्च स्वर्गद्वारावलोककः ।। धर्मवेतनमादाता सदेन्द्रानुज-
वल्लभाः ।। सदाभ्रमणशीलश्च सदादानमतिर्भव ।। भवान्कौटिल्यहीनेन सदाचारवतातथा ।। तथापरंशृणुष्वाथ यत्कर्त्तव्यंत्व-
याधुना ।। अधिष्ठानञ्चसर्वत्र भूमिपानांप्रसस्यते ।। कोषस्यचपरिज्ञानं जनानांजनवत्सल ।। रसवद्द्रव्यमाकृष्यात् पुष्पेभ्यइव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गा० पु० षट्पदाः ॥ त्वयापुत्रेणमेप्राप्तं पुनरेवेहयौवनं ॥ इमामपूर्वांयुवतींविभोहिनीमासाद्यभार्यांद्विजराजवक्राम् ॥ सुखेनरम्येत्वमिमां- अ० १९
॥ २९ ॥ महींतु वोढासिभारंपरिपालयाश्रयम् ॥ क्रीडाकरंतातमनुष्यलोके वृद्धस्यजन्तोःसुरताभिलाषः ॥ भवेज्जनानामतिहास्यकारी
जीर्णत्वचःश्वेतशिरोरुहस्य ॥ जीर्णोप्यजीर्णस्तवसौख्ययुक्तो वाञ्छामिचैनामुपभोक्तुमंगनां ॥ संत्यज्यदेवानियमागतास्तु अनं-
गवाणानिहितासुतन्वी ॥ सम्यक्चरिष्याम्यहमेतयाविभो ह्येकान्तशीलःपरिपूर्णदेहः ॥ तदद्रिपुष्पोवननिर्झरौघे रम्येषुदिव्योघन-
दीतटेषु ॥ इयंपुरंध्रीममजीविताधिका सुखेनभार्यात्रिदिवैकचारिणी ॥ अस्यास्तिहेतोर्विबुधाविमूढा यथार्द्धिहेतोर्हिनिधानसं-
घाः ॥ तद्वाक्यमाकर्ण्यपितुःसुबुद्धिः प्रणम्यभक्त्याजननीसमेतां ॥ नृपोत्तमंतंनृपसत्तमोसौ दिदेशभोगार्थमनेकवित्तं ॥ आ-
ज्ञाविधेयान्सहिर्संनियोज्य दासांश्चदासीचहिरण्यकण्ठीः ॥ कृत्वाविधेयान्स्वपितुस्तदर्थे ततोमहींरक्षणमाचचार ॥ नृपोत्तमोधर्म-
विभूषणोसौ शशासतीद्वीपवतींसमग्रां ॥ रक्षांतुतस्याचरितःपृथिव्यां नपापबुद्धिर्भविताजनोहि ॥ नचाफलःपुष्पविनाकृतोन-
गो नचापिक्षेत्रंयवशालिहीनं ॥ कुंभप्रमाणंमुमुचुश्चगावो कृताधिकंशर्करवत्प्रमिष्टं ॥ क्षीरंस्वपेयंसकलार्त्तिनाशं पापापहंपुष्टिवि-
वर्द्धनञ्च ॥ जनोनचासीद्धिभवप्रगोप्तो नचापिभार्याविभवप्रभाषिणी ॥ पुत्रेविनीतेदुहितानगेहे वधूःस्थिताहस्तपुटेनसुप्ता ॥
निजोपदेशेहिजनोव्यवस्थितस्त्वन्योपदेष्टुर्हिशिरोनिकृत्यते ॥ नभुञ्जतेमाधववासरेजना नशोषमायांतितथैवनिम्नगाः ॥ संश्रु- ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्यमानानहियान्तिसंपदः प्रदानयुक्तैरपिमानवैःसदा ॥ विवृद्धिमायान्तियथानरेन्द्र वर्षासुदुर्वाबहुविस्तरान्विताः ॥ सुरक्षितस्ते-
ननरेन्द्रसूनुना धर्मांगदेनातुलविक्रमेण ॥ सौख्यानिभुक्त्वानृपयान्तिमानवाः पदंहरेर्द्धादशिसेवनेन ॥ नदस्युभूतामनुजागृहे-
षु स्वपत्तिहृष्टामुदिताःसदानघ ॥ गावस्तुगोपैर्हिविनासुहार्यां स्वेच्छाचरागान्दरमाव्रजन्ति ॥ क्षीरंक्षरन्त्योघृतवत्सुभूरि वत्स-
प्रियाश्चैवतुताःसुशीलाः ॥ अकृष्टपच्याधरणीसमस्ता धर्मांगदेशासतिभूमिपाले ॥ मातुःपयोभिःशिशवःसुपुष्टा भोगैश्चभर्तुःप्रम-
दाश्चपुष्टाः ॥ सुराष्ट्रगुप्ताश्चनृपाःसुपुष्टाः सत्येनयुक्तःसवृषःसुपुष्टः ॥ एवंजनेकर्मणिसंप्रवृत्ते धर्मांगदेनाथसुरःप्रमाणः ॥ रुक्मांग-
दोतीवविमोहितोसौ विमोहिनीचेष्टितसौख्ययुक्तः ॥ दिनंनजानातिनचापिरात्रिं मासंनपक्षंनचवत्सरंगतं ॥ अतीवसौख्यंतुर-
तेनतेन विरिञ्चिपुत्र्याःप्रवभूवतस्य ॥ विमोहिनीसंगमनेनृपस्य वभूवशक्तिःप्रचुराहिकामे ॥ यथायथासेवतितांसुरूपां तथातथा-
वर्द्धतिवीर्यमस्य ॥ चन्द्रोयथाशुक्लपक्षेतुवृद्धिं गच्छेदेवंकामयातश्चकामः ॥ वृन्दारकाप्रीतिहितान्वितस्तु संस्पृश्यमानस्तुपुनर्न-
रोसौ ॥ पिवन्तिपानंसुमनोहरंतदा शृण्वन्हिगीतंहृदयंगमंतदा ॥ पश्यन्हिनृत्यंसुनितंविनीनां समास्पृसन्मोहिनिचक्रचन्द्रम् ॥
विमर्दमानोह्युरसाचतन्व्याः स्तनौसुपीनौसुनिमग्नचूचुकौ ॥ घनौतथाकाञ्चनकुंभतुल्यौ निरंतरौहारविभूषणेन ॥ वलित्रयंनाभियु-
तंसुशोभनंमनोहरंरोमसुराजिचित्रितं ॥ संस्तंभितायावलिराजिरूपयातयातुदेव्यानृपकान्तयातदा ॥ नहीदृशंचारुतरंशरीरं नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंविनीनांमनसोभिरामं ॥ यादृग्विधात्राचतदाविनिर्ममे राज्ञश्चसामोहविबर्द्धनाय ॥ मृगेन्द्रशत्रोःकरसंनिकाशे ऊरूतदाकाञ्चन अ० २०
ना०पु० संनिभेसमे ॥ जंघेउभेचैवसुरूपयुक्ते निगूढगुल्फेजनमोहनार्थं ॥ नचापिदेहेनृपतिर्विरूपतां संपश्यतेचारुविशालनेत्र्याः ॥ मे-
॥ ३० ॥ नेसुराणामधिकञ्चराजा कृतार्थमात्मानमतीवहर्षात् ॥ इयंसुरूपांसुरसुन्दरींशुभां दास्याम्यहंभूरिधनेनचाल्पं ॥ त्रैलोक्यदानंतृ-
णवन्मनोमे ददामिकिंयाचतिमेदुराङ्गी ॥ एषापदायाचतिजीवितंमे शुभानवद्यानवहेमवर्णा ॥ दास्यामिचैनंनविचारयामि पुत्रं-
विनासर्वमहंचदास्ये ॥ एवंराजाचिंतयित्वामहात्मा पुत्र्याःसर्वंचेतसापद्मजस्य ॥ ३५ ॥ इतिश्री ना० रुक्मांगदक्रीडनंनाम १९
वशिष्ठउवाच ॥ एवंस्मरविमूढस्य राज्ञोरुक्मांगदस्यच ॥ त्रीणिवर्षाणिपञ्चैव व्यतीतानिसुखेनवै ॥ संप्राप्तेनवमेवर्षे पुत्रोधर्मां-
गदोबली ॥ जित्वाविद्याधरात्पञ्च सर्वकामप्रदान्शुभान् ॥ आजहारमणीन्पञ्च सर्वकामप्रदान्शुभान् ॥ कांचनस्यप्रतप्तस्य एवं
कोटिप्रदंशुभं ॥ वस्त्रप्रदंद्वितीयंच सहस्रशतसंख्यया ॥ तृतीयममृतस्रावि पुनर्यौवनदायकं ॥ गृहप्रसादजननं चतुर्थंचान्नसा-
धनं ॥ पंचमंव्योमगदितं त्रैलोक्यपरिमर्षणं ॥ तान्मणीन्गृह्यतरसा विद्याधरसमन्वितः ॥ स्त्रीभिर्विद्याधराणांच साश्रुभिस्ता-
भिरावृतः ॥ ववन्देचरणौमातु स्तथारुक्मांगदस्यच ॥ आगत्यमलयाच्छूर स्तान्मणीन्प्रददौतदा ॥ इमेजितामयातात पञ्चवि-
द्याधरारणे ॥ मलयेभूधरेश्रेष्ठे वैष्णवास्त्रेणभूपते ॥ तइमेप्रेक्षतान्तात प्राप्तास्तवमहामते ॥ एषांदाराःसमेताये विधेयास्तवभूपते ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ तथेमेप्रणयाद्देवीं भूषयंतुतवप्रियां ॥ सर्वकामप्रदास्तात मणयोयौवनःप्रदा ॥ जीर्णादंताःपुनर्वाला भवंतिमणिधारणात् ॥ श्वेताश्चकृष्णतांयान्ति केशानास्त्यत्रसंशयः ॥ चस्त्रहर्म्यसुवर्णानां धनानांचिन्तितस्यच ॥ दातारःसुप्रभाःशुद्धा श्चिन्तामणयइ-त्युत ॥ त्रिंशद्दिनमभूद्युद्धं गन्धर्वाणांमयासह ॥ तवैवतेजसापञ्च जितास्तातमयारणे ॥ कृत्स्नानितानीहमया राज्ञायानिवला-निच ॥ वरदानिसमस्तानि कृतानितवतेजसा ॥ समुद्रंचप्रविष्टस्य गतःसंवत्सरोमम ॥ जिताभोगवतीनाम मयानागशतावृ-ता ॥ आहूयतानागकन्या मयातत्रसुविस्तराः ॥ ताभिश्चराजरत्नानि सुवहून्याहृतानिमे ॥ गतोहंपुनरेवाथ तदादानवमन्दिरं ॥ तत्रदानवकन्यानां सुरूपाणांसुवर्चसां ॥ आहृतानिसहस्राणि मयात्रीणिचपञ्चच ॥ दशकोव्यस्तुरत्नानि सुवहून्याहृतानिमे ॥ सस्तुदीपामहीपाल रत्नानांतवमन्दिरे ॥ ततोहंवारुणंलोकं रसातलतलस्थितं ॥ गतोवीर्यवलोपेतं रत्नानामालयंशुभं ॥ तवा-पिवरुणोदेवः स्थीयतांशासनेपितुः ॥ रुक्मांगदस्यनृपतेर्यदिजीवितुमिच्छसि ॥ कुपितोममवाक्येन वरुणोयुयुधेमया ॥ सहते नचमेयुद्धमभूत्तातरसातले ॥ जितोनारायणास्त्रेण मयासम्वत्सरात्प्रभो ॥ नहतःप्रमदावाक्यैः परिरक्षणतत्परैः ॥ निर्जितेना-युतंदत्तं वाजीनांवातरंहसां ॥ एकतःश्यामकर्णानां शुद्धानांचन्द्रवर्चसां ॥ तृणतोयविहीनाये जीवंतिवहुलाःसमाः ॥ एका-कन्यासुरूपाया पुष्कराभाननाशुभाः ॥ भार्यार्थेवरुणःप्रादान्नवोढासाशुभामया ॥ कुमारीतुसमानीता वहुवित्तसमन्विता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 तंनास्तित्रिषुलोकेषु स्थानंनृपतिसत्तम ॥ यन्मयानिर्जितंतात तेजसापगलितेनते ॥ तद्दुत्तिष्ठनिरीक्षस्व मयाचोपार्जितांश्रियं ॥
प्रयच्छस्वयथान्यायं एषांवांछसिभूपते ॥ पादांकांक्षुरुराजेन्द्र यत्तुतावर्जिताप्रिया: ॥ अहंतुसंपद:सर्वा स्त्वदधीनानसंशय: ॥ य:
॥ ३१ ॥ पुत्र:पितुरग्रेतु वहुलक्ष्मीमुपार्जितां ॥ नदद्याद्ब्रमिदेवेभ्य: सयातिनरकंध्रुवं ॥ स्वीकारस्तुचकर्त्तव्य: पित्रासहसुतेनहि ॥ कुठार
दातृवज्ज्ञेय: पुत्रस्यानिधिसंचये ॥ पितु:शौर्येणपुत्रस्तु सर्वमर्जयतेधनं ॥ गृहीतस्तेजसादात्रं लुनातिपितृसंचयात् ॥ वायुना
पूरिताभस्त्रा तारयेन्पुरुषंतले ॥ यदादारुमयीयोषित् सूत्रयोताविचष्टये ॥ एवंहिपितृवर्येण पुत्रास्तेजोवलान्विता: ॥ तस्मा-
दिमांमाधवदेववल्लभां विलोकयस्वाद्यमयाभिजाता ॥ आत्मेच्छयायच्छविमोहनाया इयंहिमेमातृसमूहचर्या ॥ ३६ ॥ इतिश्री
लघुनारदीयपुराणे रुक्माङ्गदचरिते धर्माङ्गद विजयोनामविंशातितमोध्याय: ॥ २० ॥ छ छ छ छ छ
मान्धातोवाच ॥ पुत्रस्यवचनंश्रुत्वा किंचकारमहीपति: ॥ साचापिमोहिनीब्राह्मी किंचक्रेतेनपूजिता ॥ विचित्रेयंकथाब्रह्मन् प्र-
भावोहिमनोहर: ॥ तत्रवक्रेरितापुण्या धर्मसंशयछेदिनी ॥ वसिष्ठउवाच ॥ तस्यतद्वचनश्रुत्वा प्रहृष्टोनृपपुंगव: ॥ उदतिष्ठन्प्रिया-
युक्तस्तांश्रियंचावलोकयत् ॥ अवलोक्यहेररिष्ठामप्रमेयांहरिप्रभां ॥ नागकन्याहिता:सर्वा वारुणीसहिता:प्रभो ॥ प्रददौतनयस्यैव-
भार्यार्थंशुभलोचना: ॥ शेषंदानवनारीभि र्वित्तरत्नसमन्वितं ॥ मोहिन्यैप्रददौराजा सोनंगशरमोहित: ॥ संविभज्यनृपोवित्तं ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मांगदसमाहृतं ॥ पुरोहितमुवाचेदं कालेनाहूयभूपतिः ॥ सर्वासांतनयोमेहि पाणिंगृह्णातुमन्त्रतः ॥ कुमारीणांकुमारोयं मद्वा-क्येचस्थितोहियः ॥ सुतिथौसुमुहूर्त्तेच नक्षत्रेसर्वकामदे ॥ वाचयित्वाद्विजवरान् मंगलानिसहस्रशः ॥ विवाहंकुरुपुत्राय एतत्कृ-त्योत्तमंमम ॥ यःपुत्रंयौवनोपेतं नविवाहयतेसुधीः ॥ समज्जेनरकेघोरे यस्मान्नावर्त्ततेपुनः ॥ तस्मादुद्वाहयेत्पुत्रं वलादपिप्रयत्न-तः ॥ आत्मासंस्थापितस्तेन येनसंस्थापितःसुतः ॥ कृतोद्वाहेसुतेब्रह्मन् पितुश्चकृतकृत्यता ॥ पुत्रस्यगुणयुक्तस्य निर्गुणस्यापि-मानद ॥ अरूढतनयोयस्य युवासन्तिष्ठतेगृहे ॥ नपुमान्सतुविज्ञेयः परलोकजुगुप्सितः ॥ तस्मात्पित्रासदाकार्याः पुत्रादारसम-न्विताः ॥ रमन्तेचयथासौख्यं सन्तुष्टासुप्रियासुच ॥ एतच्छ्रुत्वातुवचनं पुरोधाहर्षसंयुतः ॥ धर्मांगदविवाहार्थं मतिंचक्रेद्विजर्षभः ॥ अनिच्छमानोपितदा स्त्रीशंकेतंनृपात्मजः ॥ नृपवाक्याच्चकाराथ दारसंग्रणंतदा ॥ वरुणात्मजयासार्द्धं नागकन्यामनोहराः ॥ उ-पयेमेमहाबाहुःकृतहोमःपुरोधसा ॥ उद्वाहयित्वासर्वास्ता युगपद्योषितांबराः ॥ ववन्देपितरंपश्चात् मोहिनींमातरन्तथा ॥ ततःस-न्ध्यावलींदेवीमभिवन्देहसन्निव ॥ पितुर्वाक्येनमेदेवी सञ्जातोदारसंग्रहः ॥ नैतन्मेमनसोजातो पित्रानुरोधितोह्यहं ॥ अव्यग्रः पितरंदेवि सुश्रूसेहंनसंशयः ॥ दारैर्भोगैर्नमेकिंचित् स्वर्गेणापिप्रयोजनं ॥ कार्यामेपितृसुश्रूषा तवदेविदिवानिशं ॥ सन्ध्याव-ल्युवाच ॥ चिरंजीवस्त्वमेवत्स भुंक्ष्वभोगान्मनोगतान् ॥ पितुःप्रसादाद्दीर्घायुर्भवपुत्रसदानघ ॥ सत्पुत्रेणत्वयापुत्र जाताहंपुत्रि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णीक्षितौ ॥ नपत्नीनांहिसर्वासां हृदयेसंस्थितस्तथा ॥ एवमुक्त्वापरिष्वज्य मूर्ध्निचाघ्रायचासकृत ॥ विसृज्यचततःपुत्रं राज्यतंत्रे
त्वरान्विता ॥ विसर्जितस्तथामात्रा प्रणम्यान्यास्तुमातरः ॥ चक्रेराज्यंमहाराजः पित्रोश्चहितकाम्यया ॥ दुष्टनिग्रहणंचक्रे शिष्टा-
नांपरिपालनं ॥ अटनंसर्वदेशेषु वीक्षणंसर्वकर्मणां ॥ तथैवसर्वकार्याणामासमाप्तेनिवर्त्तनं ॥ हस्त्यश्वपोषणंचक्रे वारंचक्रेपरेणवै ॥
वाजिनांवीक्षणंचक्रे तुलामानानुवेदनं ॥ गृहेनवैधराप्राप्ते चक्रेसंवीक्षणंनृपः ॥ कच्चिद्बालस्तुनपायी स्तनहीनोनरोदिति ॥ कच्चि-
द्वध्वाचस्वश्रूश्च रुदतानावमानिता ॥ कच्चित्समर्थस्तनयः पितरंनहियाचते ॥ नधर्मशङ्करोराज्ये कच्चिन्ममभवेत्पुनः ॥ वभूववि-
भवोलोके शासनात्तस्यभूपतेः ॥ नकंचुकेनरहिता गच्छेन्नारीसभर्तृका ॥ गृहानिःक्रमणंस्त्रीणांनाभूद्राष्ट्रेतदात्मके ॥ नसकेशाहि
विधवा स्त्वकेशानहिभर्तृकाः ॥ साव्रतीस्यात्महाकेशीमारण्यान्नगराश्रयाः ॥ अप्रदाताधनीमाभूद्राष्ट्रेमानिर्घृणोजनः ॥ गो-
पालोनगराकांक्षी गुरुर्यस्तुनदेशकः ॥ शास्तिशास्त्रंविनाऋत्विक् सुरान्तोषयतेनरः ॥ योहिविक्रयतेनीलं नीलरक्तनिषेवते ॥ नि-
र्वास्यौतावुभौपापै र्यस्तुमद्यंपिवेत्सदा ॥ वृथामांसंतुयोश्नाति पृष्टमांसप्रियोहिसः ॥ तस्यवासोनविषये सुकलत्रंत्यजेत्तुयः ॥ वि-
ष्णुंविहायप्रवरंसुराणां संपूजयेदन्यतमंहिदेवं ॥ निन्देतयोदेववरंमुरारिं दण्ड्यश्चबध्यश्चवहिर्विधास्याः ॥ ३९ ॥ इतिश्री लघुना-
रदीयपुराणे रुक्मांगदचरिते धर्मांगदविवाहः प्रजापालनमेकाविंशोध्यायः ॥ २१ ॥ छ छ छ छ छ छ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वसिष्ठउवाच ॥ एवंधर्माङ्गदोराजा चकारवसुधातले ॥ पितुर्नियोगाद्राजेन्द्र पालयन्हरिवासरे ॥ नवभूवजनःकश्चिद्योन्धधर्मेऽव्य-
वस्थितः ॥ नासुखीनाप्रजाकाचित् करपीडितमानसा ॥ हृष्टपुष्टजनेतस्मिन् क्षमावतिसुधार्मिके ॥ घटोघ्नीनृपतेतस्मिन् द्दस्रव-
त्सासुधेनुषु ॥ पुटकेपुटकेक्षौद्रे द्रोणमात्रेद्रुमेद्रुमे ॥ फलानिसन्तिमेदिन्यां सर्वधान्यसमुद्भवः ॥ कृतेयुगेचत्रेतान्ते युगेचद्वापरा-
गमे ॥ व्यतीतजलदेव्योम्नि विराजेशशिमण्डले ॥ सुगन्धौशालिकेदारे कुंभोद्भवविलोकने ॥ मध्यप्रवाहसंयुक्ताः सरितश्चसमं-
ततः ॥ तीरोत्थैःकाशकुसुमैः शुक्लकेशोइवाङ्गनाः ॥ चन्द्रांशुधवलेलोके नातितीव्रेदिवाकरे ॥ पद्मिनीपत्रसवलैर्जलस्यान्तेविराजि-
ते ॥ रात्र्युत्सुक्यात्प्रयातैस्तु भूमिपालैःसमंततः ॥ प्रबोधसमयेविष्णोराश्विनान्तेजगद्गुरोः ॥ मोहिनीरमयामास संयुक्ताहृदया-
न्वितं ॥ राजानंविविधैःसौख्यैःसर्वभावेनसुन्दरी ॥ वनेषुगिरिशृंगेषु नदीनांसंगमेषुच ॥ पद्मिनीकुसुमाढ्यासु शरत्सुविविधेषुच ॥
मलयेमन्दरेविन्ध्ये महेन्द्रेविबुधालये ॥ सह्येप्रालयसंज्ञेच दिगंबरगिरौशुभे ॥ अन्येष्वपितुराजानं मनोज्ञेषुशुभेषुच ॥ रमयामा-
सराजेन्द्र दिव्यरूपादिनेदिने ॥ राजापिमोहिनींप्राप्य कृत्यंसर्वमथात्यजत् ॥ मुक्त्वैकंवासरंविष्णोर्जन्ममृत्युनिकृन्तनं ॥ नतल्लो-
पयतेनित्यमतिमुग्धोपिपार्थिवः ॥ दशम्यादिमहीपाल त्रिदिनंपरिवर्जयेत् ॥ गन्धतांबूलपुष्पाणि स्त्रीभोगञ्चमहामतिः ॥ एवं-
संक्रीडतस्तस्य बहुसंवत्सरेगते ॥ कालेकालवतांश्रेष्ठः संप्राप्तःकार्त्तिकःशुभः ॥ निद्राच्छेदकरोविष्णोर्मासःपुण्यप्रदायकः ॥ य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मिन्कृतंहिसुकृतंविष्णवेर्थमानवैर्नृपः ॥ अक्षयंभवतेसर्वंविष्णुलोकप्रदायकं ॥ नकार्त्तिकसमोमासोनकृतेनसमंयुगं ॥ नवेदेनसमं
शास्त्रंनतीर्थंगंगयासमं ॥ नजलेनसमंदानंनसुखंभार्यया समं ॥ नकृषणेनसमंवित्तंनलाभःसुरभीसमः ॥ तपोदानसमायुक्तंनधर्मा-
त्परमंसुखं ॥ नधर्मोस्तिदयातुल्यो नज्योतिश्चक्षुषःसमं ॥ नतृप्तिरशनादन्यानवाणिज्यंकृषेःसमं ॥ नधर्मेणसमंमित्रनसत्येनसमंय-
शः ॥ सर्वसौख्यंसमुत्थानंनमित्रभार्ययासमं ॥ नक्षेत्रंकाशिकातुल्यंनपुत्रेणसमःसुहृत ॥ नकार्तिकसमंलोकेपवित्रंकवयोविदुः ॥
कार्त्तिकःप्रवरोमासोविष्णुवादिषुवैसदा ॥ अव्रतेनाक्षिपेद्यस्तुमासंदामोदरप्रियं ॥ तिर्यग्योनिमवाप्नोतिधर्माधर्मवहिःकृतः ॥ मा-
न्धातोवाच ॥ संप्राप्यकार्त्तिकंमासं राजारुक्मांगदोमुने ॥ मोहिनीमोहसंयुक्तः कथंतुवुभुजेवद ॥ विष्णुभक्तःशुचिपरः प्रवरःसम-
हीभृतां ॥ तस्मिन्पुण्यतमेमासितस्मिन्किमकरोन्नृप ॥ वसिष्ठउवाच ॥ संप्राप्तंकार्त्तिकंदृष्ट्वाप्रबोधकरणंहरेः ॥ अतिमुग्धोप्यसौ-
राजा मोहिनींवाक्यमब्रवीत ॥ नीतंदेवित्वयासार्द्धंबहुसंवत्सरंमया ॥ तवापमानस्यभयात् नैवमुक्तामयाकिंचित् ॥ सांप्रतंवक्तु-
कामोहंतंनिवोधवरानने ॥ शय्याशक्तस्यमेदेविवहवःकार्त्तिकागताः ॥ नव्रतीकार्त्तिकेजाते सुक्तैकंहरिवासरं ॥ सोहंकार्त्तिकमि-
च्छामि व्रतेनपरिसर्पितुं ॥ अव्रतेनगतोह्येषां कार्त्तिकोमर्त्यधर्मिणां ॥ इष्टपूर्वंवृथातेषां धर्माधर्मभृतांवरे ॥ मांसाशिनोहिभूपाला ॥ ३३ ॥
अत्यन्तमृगयारताः ॥ तेमासंकार्त्तिकंत्यक्त्वा गतोविष्णवालयंशुभे ॥ प्रवृत्ताणांहिभक्ष्याणां कार्त्तिकेनियमेकृते ॥ अवश्यंविष्णु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सायुज्यं प्राप्नुवन्तिमुमुक्षवः ॥ तिष्ठन्तिबहुवित्तानि कृत्यानिवरवर्णिनि ॥ हृदयेविहितंलोके दीपदानंदिवंनयेत् ॥ तस्याप्य-
लाभेशुभगे परदीपप्रतोदनं ॥ कर्त्तव्यंभूतिकामेन सर्वदानाधिकंचतत् ॥ एकतःसर्वदानानि दीपदानानिचैकतः ॥ कार्त्तिके-
नसमंप्रोक्तं दीपदस्त्वधिकःस्मृतः ॥ कार्त्तिकेकार्त्तिकीभूत्वा विष्णोर्नाभिसरोरुहे ॥ आजन्मविकृतात्पापात् मुच्यतेनात्रसंश-
यः ॥ व्रतोपवासनियमैः कार्त्तिकोयस्यगच्छति ॥ देवोवैमानिकोभूत्वा सयातिपरमंपदं ॥ तस्मान्मोहिनिमोहंतु परित्यज्यम-
मोपरि ॥ तवभूधरपूजायां निरतोनीरजेक्षणे ॥ अहंव्रतपरश्चैव भविष्येहरिपूजकः ॥ मोहिन्युवाच ॥ विस्तरेणमयाख्याहि मा-
हात्म्यंकार्त्तिकस्यहि ॥ सर्वपुण्याधिकःप्रोक्तो मासोयंनृपसत्तम ॥ विशेषतःपुष्करेतु द्वारवत्याञ्चशौकले ॥ श्रुत्वाकार्त्तिकमाहा-
त्म्यं करिष्येहंयथेप्सितं ॥ रुक्मांगदउवाच ॥ माहात्म्यमभिधास्यामि मासस्यास्यवरानने ॥ येनतेभवतेकीर्त्तिर्भक्तियुक्तार्चने-
हरेः ॥ कार्त्तिकेकृच्छ्रसेवीयः प्राजापत्यचरोथवा ॥ एकान्तरोपवासीच त्रिरात्रोपोषितोथवा ॥ षड्वाद्वादशरात्रंवा मासंवावरव-
र्णिनि ॥ क्षपयित्वानरोयाति तद्विष्णोःपरमंपदं ॥ एकभक्तेतथानक्ते तथासुभ्रुअयाचिते ॥ अकृतेवैधराप्राप्तिर्भवतेनात्रसंशयः ॥
तस्मिन्हरिदिनेपुण्ये क्रियतेभीष्मपञ्चकम् ॥ सर्वपापप्रशमनं हरेरिष्टंमहाव्रतं ॥ तत्कृत्वामनुजादेवि नभूयस्तनयोभवेत् ॥ प्रबो-
धनंनरःकृत्वा जागरेणशुभानने ॥ श्रवणेनपुराणानां भक्त्यादेवस्यचक्रिणः ॥ पूजयासुभगेरात्रिर्यैषांयातिवरानने ॥ नमातृज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ठेरयान्ति तेपिपारन्वितानराः ॥ तस्मिन्दिनेवरारोहे मण्डलंयस्तुपश्यति ॥ विनासांख्येनयोगेन सयातिपरमंपदं ॥ कार्त्तिके-
मण्डलंदृष्ट्वा शौकरेशूकरंतथा ॥ दृष्ट्वाकोकावराहञ्च नभूयस्तनयोभवेत् ॥ त्रिविधस्यापिपापस्य दृष्ट्वामुक्तिर्भवेन्नृणां ॥ तथाकु-
ब्जाम्रकेदेवि दृष्ट्वादेवंजनार्दनं ॥ कार्त्तिकेवर्जयेत्तैलं कार्त्तिकेवर्जयेन्मधु ॥ कार्त्तिकेवर्जयेत्कांस्य कार्त्तिकेशुक्लशिंविकम् ॥ नि-
ष्पावान्कार्त्तिकेदेवि योभक्षयतिपापकृत् ॥ सम्वत्सरकृतात्पुण्यात् तत्क्षणादेवमुच्यते ॥ प्राप्नोतिराजर्कियोनिं सकृदेवतुभक्षणा-
त ॥ अतश्चकार्त्तिकेमासि निष्पावान्वर्जयेद्बुधः ॥ कार्त्तिकेशौकरंमांसं यस्तुखादतिदुर्मतिः ॥ षष्ठिवर्षसहस्राणि रौरवेपरिपच्य-
ते ॥ तन्मुक्तोभवतेपापो विष्टाशीग्रामशूकरः ॥ नमत्स्यंभक्षयेन्मांसं नकौर्मनान्यदेवहि ॥ चाण्डालोभविताराजन् कार्त्तिकेमां-
सभक्षणात् ॥ कार्त्तिकःसर्वपापघ्नः किंचिद्व्रतपरस्यहि ॥ कार्त्तिकेतुकृतादीक्षा नृणांजन्मनिकृन्तति ॥ तस्मात्सर्वप्रयत्नेन दी-
क्षाकुर्वीतकार्त्तिके ॥ अदीक्षितस्यवामोरु कृतंसर्वंनिरर्थकं ॥ पशुयोनिमवाप्नोति दीक्षयाचमहाकुले ॥ जन्मप्राप्नोतिसुभगे पञ्च-
रात्रविदोनरः ॥ नगृहेकार्त्तिकंकुर्याद्विशेषेनतुकार्त्तिकी ॥ तीर्थेषुकार्त्तिकींकुर्यात् सर्वयत्नेनभाविनि ॥ कार्त्तिकेशुक्लपक्षस्य कृ-
त्वाचैकादशींनरः ॥ प्रातर्दत्वाशुभान्कुंभान् प्रयातिहरिमन्दिरं ॥ संवत्सरव्रतानाञ्च समाप्तिर्विधिसंस्मृता ॥ चातुर्मास्यव्रता-
नाञ्च समाप्तिस्तत्रचेष्यते॥ विवाहश्चैवदृश्यन्ते विष्णोर्नाभिसरोजजे ॥ दिनानित्रीणिचत्वारि तथैकंवरवर्णिनि ॥ उत्तरायणही-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपि शुद्धिर्लभ्यंविनाशुभे ॥ दृश्यन्तेयत्रसंपन्ना पुत्रपौत्रविवर्द्धनाः ॥ तस्मान्मोहिनिकर्त्तास्मि कार्त्तिकेव्रतमुत्तमं ॥ अशेषपा-
पनाशाय धनप्रीतिविवर्द्धनं ॥ भुक्तिमुक्तिप्रदातारं धर्मस्यपरमंपदं ॥ वैकुण्ठदायिकंमासं कार्त्तिकञ्चवरानने ॥ ६८ ॥ इतिश्री
लघुनारदीयपुराणे रुक्मांगदचरिते कार्त्तिकमाहात्म्यं द्वाविंशोध्यायः ॥ २२ ॥ ७ ७ ७ ७ ७ ७
मोहिन्युवाच ॥ अहोमहात्म्यमतुलं कार्तिकस्यत्वयोदितं ॥ चातुर्मास्यव्रतानाञ्च तद्योगकरणम्वद ॥ पूर्णताचभवेद्येन व्रता-
नामवनीपते ॥ अवैकल्पंभवेद्येन व्रतेपूर्णफलस्यच ॥ कानिदानानिदीयंते कृत्वातान्यवनीपते ॥ राजोवाच ॥ षड्रसंभाजनंदद्या
न्नक्तभोजीतुसुन्दरि ॥ अयाचितेप्यनड्वाहं दद्याच्चसहिरण्यकं ॥ एकभक्तंतथाकुर्य्याद् ब्राह्मणानाञ्चभोजनं ॥ अमांसाशीभवेद्य-
स्तु मांसंदद्यात्सदक्षिणं ॥ जलत्यागेमणिकुंभान् दद्याद्वैअन्नपात्रकं ॥ सहिरण्यंतिलैर्युक्तं वस्त्रयुग्मसमान्वितं ॥ धात्रीस्नानोदकं-
दद्या द्दधिमाक्षिकमेवच ॥ फलानांनियमेसुभ्रु फलदानंसमाचरेत् ॥ तैलत्यागेघृतंदेयं घृतत्यागेपयःस्मृतं ॥ दधित्यागेसुवर्णञ्च
पयसोरूप्यमेवच ॥ धान्यानांनियमेधान्यमथवाशालयःस्मृताः ॥ दद्याद्भूमिशयःशय्यां सदृशीकन्दुकान्वितां ॥ पत्रभोजीनरो-
दद्याद्भाजनंघृतसंयुतं ॥ मौनीघंटांस्तिलांश्चापि सहिरण्यान्प्रदापयेत् ॥ दंपत्योर्भोजनंकार्यमुभयोःशयनान्वितं ॥ सभागंदक्षि-
णोपेतं व्रतस्यपरिपूरये ॥ नित्यस्नानेहयंदद्या न्निक्षेद्घृतमेवच ॥ केशस्यरक्षणाद्देवि आदर्शंचविकल्प्यत्र ॥ उपानहौप्रदद्याच्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपानत्परिवर्जनात् ॥ लवणस्यतुसंत्यागे दद्याच्चलवणंवह्नु ॥ आमिषस्यपरित्यागे दातव्याकपिलाशुभा ॥ नित्यदीपप्रदोयस्तु
भवेद्दैविबुधालये ॥ दीपंतुसघृतंदद्या त्काञ्चनंवाससायुतं ॥प्रदेयंविष्णुभक्ताय व्रतानांपरिपूर्णये ॥ एकान्तरोपवासिच्च सीरोन-
ष्टांप्रदापयेत् ॥ शिलापात्रेतुयोभुक्ते शैर्य्यपात्रंप्रदापयत ॥ ताम्रेभुक्तेततोदद्यात्ताम्रंमधुसमन्वितं ॥ गुडत्यागेगुडंदद्या न्मधुत्या-
गेमधुस्मृतं ॥ तांबुलंवर्जयेद्यस्तु मौक्तिकानिप्रदापयेत् ॥ सवस्त्रांकञ्चनोपेतां सुशय्याञ्चकृतांशुभे ॥ त्रिरात्रमालकंदद्या च्छत्रो-
पानत्सुसंयुतं ॥ अनड्वाहंतथापीनं सीरस्याकर्षणक्षमं ॥ एकान्तरेत्वजादेया फलाहारेतुशालयः ॥ शाकाहारेघृतंदद्यात् पात्रं-
राजतमेवच ॥ सर्व्वेषामप्यलाभेतु यथोक्तकरणंविना ॥ विप्रवाक्यंस्मृतंसुभ्रू व्रतस्यपरिपूर्णये ॥ तथाविभवहीनस्तु व्रतंकुर्यात्स-
दक्षिणं ॥ विप्रवाक्यम्भृथायस्तु गृह्णातिमनुजःशुभे ॥ अदत्वादक्षिणांचापि सयातिनरकंध्रुवं ॥ व्रतवैकल्पमासाद्य कुष्टीचान्धप्र-
जायते ॥ धरामराणांवचनेऽव्यवास्थिता दिवौकसस्तीर्थफलैःसमेताः ॥ कोलंघयेत्सुभ्रुवचोहितेषां श्रेयोभिकामीमनुजःसुविद्वान् ॥
इदंमयाधर्मरहस्यमुक्तं वेदाश्रितंपापविमोक्षणार्थं ॥ फलप्रदंमाधवतुष्टिहेतो र्विकल्पेहतोर्मनसोभिरामं ॥ २५ ॥ इतिश्री लघु-
नारदीयपुराणे रुक्माङ्गदचरिते चातुर्मास्यव्रतवर्णनो नामत्रयोविंशोऽध्यायः ॥ २३ छ छ छ छ छ छ छ
मोहिन्युवाच ॥ वाक्यमुक्तंत्वयासाधु कार्तिकंप्रतिमानद ॥ व्रतादिकरणंराज्ञां नेष्टंकिंचिन्महीपते ॥ मुक्त्कैकंरक्षणंलोके परलो- ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कजयैषिणा ॥ दानंपानंचयुद्धंच त्रितयंभूभुजाःस्मृतं ॥ नव्रतंहित्वयाकार्य्यं यदिमामिच्छसिप्रियं ॥ मुहूर्त्तमपिराजेन्द्र नशक्नोमित्वयाविना ॥ स्थातुंकमलपत्राक्ष किंपुनर्मासंसंख्यया ॥ यत्रोपवासकरणं मन्यसेत्वंमहीपते ॥ तत्रैवभोजनंदेयं द्विजातीनांमहात्मनां ॥ अथवाज्येष्ठपत्नीया साकरोतुव्रतक्रियां ॥ एवमुक्तेतुवचने मोहिन्यारुक्मभूषणः ॥ आजुहावप्रियांभार्य्यां नाम्नासन्ध्यावलींशुभां ॥ आहूतातत्क्षणात्प्राप्ता राजानंभूरिदक्षिणं ॥ आशीनंशयनेदिव्ये मोहिन्यावाहुसंवृतं ॥ शुभंस्पृष्टंकुचाग्रेण पूर्णकुंभनिभेनवै ॥ वामेनवामनेत्रायाः सकामायामहीपते ॥ कृताञ्जलिपुटोभूत्वा भक्त्योन्नमितकन्धरा ॥ सन्ध्यावल्याह नृपतिं किमाहूताकरोम्यहं ॥ तववाक्येस्थिताभूप सपत्नीदुःखवर्जिता ॥ यथायथाहिरमसे मोहिन्यानृपसत्तम ॥ तथातथामम प्रीतिर्वर्द्धतेनात्रसंशयः ॥ भर्तुःसौख्येनयानारी सौख्ययुक्तानजायते ॥ साशुनीभविताराजन् त्रीणिजन्मानिपञ्चच ॥ आदेशं देहिराजेन्द्र मात्रीडांकुरुशाधिमां ॥ राजोवाच ॥ जानामितवशीलंवै कुलंजानामिभाविनि ॥ तववाक्येनहिचिरं मोहिनीरमता मया ॥ रममाणस्यसुचिरं वहवःकार्तिकागताः ॥ प्रियासौख्येनमुग्धस्य नगतोहरिवासरः ॥ सोहंतृप्तिमनुप्राप्तः सौख्यऋद्धःपुनःपुनः ॥ एवंचवर्त्तमानेन कामांधेनमयाशुभे ॥ ज्ञातोयंकार्तिकोमासः सर्वपापक्षयंकरः ॥ कर्तुकामोव्रतंदेवि कार्तिकाख्यंसुखःप्रदं ॥ अनयावारितोदेवि मोहिन्यामोहयुक्तया ॥ अस्यानविप्रियंकार्य्यं सर्वथावरवर्णिनि ॥ मामकंव्रतमाधत्स्व कृच्छ्राख्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णतुष्टिदं ॥ सात्वेवमुक्तानृपहेमवर्णा भर्तातदापीनपयोधराशुभा ॥ उवाचवाक्यंद्विजराजवक्त्रा व्रतंकरिष्येतवधर्महेतोः ॥
॥ ३५ ॥ कृतेनयेनाद्यभवेद्यशस्ते कीर्तिश्चसौख्यंतवभूमिनाथ ॥ करोमिसर्वंतवदेवनाथ विशाम्यहंवैज्वलनंत्वदर्थं ॥ नकार्य्यमास्तेममभू-
मिनाथ वाक्येनतेहन्मिसुतंगुणज्ञं ॥ किंत्वेवमेतद्व्रतमेवराजन् करोमितेधर्म्ममनुत्तमंहि ॥ इत्येवमुक्त्वारविपुत्रशत्रुं प्रणम्यसातत्र
विशालनेत्रा ॥ व्रतंचकाराथतदाहिदेवी चाशेषपापौघविनाशनाय ॥ व्रतेतुदत्तेवरकृच्छ्रसंज्ञेप्रियाकृतेहर्षमवापराजा ॥ उवाचवा-
क्यंकुशकेतुपुत्रीं कृतंवचःसुभ्रुमयात्वदीयं ॥ रमस्वकांतंमयिहर्षयुक्ते संपूर्णकामाकरभोरुहृष्टा ॥ विमुक्तकार्यस्तवसुभ्रुहेतोर्नान्या-
स्तिनारीममसौख्यहेतुः ॥ साचैवमुक्तापतिनासुरूपा प्रहर्षमभ्येत्यउवाचवाक्यं ॥ ज्ञात्वाभवंतंबहुवीर्य्ययुक्तं त्रिपिष्टपान्नाथसमा
गताहं ॥ त्यक्त्वामरान्दैत्यवरांस्तुसर्वान् गन्धर्वनागोरगरक्षसांश्च ॥ तार्क्ष्यांस्तथान्यांस्तुविहायभूपान् स्नेहात्तदाचात्रसमागताहं
॥ एतत्कामफलंलोके यद्वयोरेकचित्तता ॥ अन्यचित्तेकृतेकामः कुतोभूयस्तुसंगमः ॥ सफलाहितनुर्मेद्य सफलंरूपमेवहि ॥ त्व-
याकामयताकांत दुर्लभंनजगत्त्रये ॥ प्रोन्नताभ्यांकुचाभ्यांहि कामिनोहृदयंदृढं ॥ संस्पृष्टेनहिशीर्येत मन्येवज्रतमोदृढं ॥ तदेव
मसृतंलोके यत्पुरंध्रीवरासवं ॥ कुचाभ्यांत्द्दादिलग्नाभ्यां मुग्धेनपरिणीयते ॥ एवमुक्त्वापरिष्वज्य राजानंरहसिस्थितं ॥ रमयामा- ॥ ३६ ॥
सतन्वंगी मुहूर्जनाविधानतः ॥ तस्यैवंक्रीडमानस्य मोहिन्यासहपार्थिव ॥ रुक्माङ्गदस्यश्रोत्राभ्यां पटहध्वनिरागतः ॥ मत्तेभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुंभसंस्थस्तु धर्माङ्गदसुतेजितः ॥ प्रातर्हरिदिनंलोका तिष्ठध्वंचैकचेतताः ॥ अक्षारलवणाःसर्वे हविष्यान्ननिषेविनः ॥ अवनीतल्पशयनाः प्रियासंगविवर्जिताः ॥ स्मरतोदेवदेवेशं पुराणंपुरुषोत्तमं ॥ सकृद्भोजनसंयुक्ता ह्युपवासाभविष्यथ ॥ तेकृतश्राद्धनिचयाः कृतपिण्डोदकक्रियाः ॥ गयाश्राद्धंकृतंतैर्यैर्हरेर्दिनमुपोषितं ॥ एषांवैकार्त्तिकीशुक्ला हरेर्निद्राव्यपोहनी ॥ भवत्येकादशीप्रातर्माकुर्युर्युगभोजनं ॥ ब्रह्महत्यादिपापानि कामचारकृतानिच ॥ तानियास्यन्तिनिलयं उपोषांगांप्रबोधिनीं ॥ प्रबोधयतिधर्मस्तु पापंभस्मीकरोतिच ॥ हरेःप्रबोधमाधत्ते तेनैषाहिप्रबोधिनी ॥ सकृच्चोपोषयत्येमां निद्रोद्देदकरींहरेः ॥ स्तनयोनभवेन्मर्त्यो नयोनौविवसेदिति ॥ कुरुध्वंचक्रिणःपूजमात्मवित्तेनमानवाः ॥ वस्त्राभरणधूपैश्च वरचन्दनकुंकुमैः ॥ सकृद्यपुष्पजातीभि र्यदीच्छथहरेःपदं ॥ योनकुर्याद्वचोस्माकं धर्मंविष्णुगतिप्रदं ॥ समेवध्यश्चदंड्यश्च निर्वास्योविषयाद्धनं ॥ एवंविधेवाद्यमाने पटहेमेघनिस्वने ॥ मुमोचहस्तात्तांबूलं कर्पूरंश्चनृपोत्तमः ॥ मोहिन्याःकुचयोर्लग्नमाकृष्यहृदयंतुवै ॥ उदतिष्ठन्महीपालः शय्याच्चहाटकाङ्गदः ॥ मोहिनींप्राहकामार्तां सान्त्वयन्सुक्ष्मयागिरा ॥ देविप्रातर्हरिदिनं भविष्यत्यघनाशनं ॥ संयतोहंगमिष्यामि क्षमांकुरुवरानने ॥ तवाज्ञयानैवकृतं व्रतंकार्त्तिकसंभवं ॥ इयमेकादशीकार्या प्रबोधकरणीमया ॥ अशेषसर्वपापस्य छेदिनीगतिदायिनी ॥ त्रयाणामपिलोकानां महोत्सवकरीशुभा ॥ तस्माद्धविष्यंभोज्यंहि नियतोगजगामिनि ॥ मयासहत्रिशा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ना०पु० लाक्षि त्वंचापितनुमध्यमे ॥ आराधयहृषीकेशमुपवासपरायणा ॥ येनयास्यसिनिर्वाणं दाहप्रलयवर्जितं ॥ मोहिन्युवाच ॥ अ० २८
॥ ३७ ॥ साधूक्तंहित्वयाराजन् पूजनंचक्रपाणिनः ॥ जन्ममृत्युजराच्छेद कारकंनात्रसंशयः ॥ वक्ष्येकिंचिदहंभूप तच्छृणुष्वसमाहितः ॥
याप्रतिज्ञाकृतापूर्वं त्वयामन्दरमस्तके ॥ वरप्रदानसहिता भवताहाटकांगद ॥ तस्यास्तुसमयःप्राप्तो दीयतांममानद ॥ जन्म
प्रभृतियत्पुज्यमश्वमेधशतार्जितं ॥ क्षयंयास्यतियत्सर्वं नतेकर्त्ताभवेद्वचः ॥ रुक्माङ्गदउवाच ॥ ब्रूहिचार्वंगिकर्त्तास्मि यत्तेमन-
सिवर्तते ॥ नादेयंविद्यतेकिंचिदपिजीवितमात्मनः ॥ किंपुनर्ग्रामवित्तादि धराराज्यंचभाविनि ॥ मोहिन्युवाच ॥ कान्तप्रभो-
महाराज जीवितेशरतिप्रिय ॥ नोपोष्यावासरेविष्णो र्भोग्यराजन्ह्यहंप्रिया ॥ नचतेनाविनाराजन् मुहूर्तमपिकामये ॥ नाद्यापि
ममतृप्तिभिस्तवसंयोगजाविभो ॥ एषएववरोदेव योमयाप्रार्थितःपुरा ॥ नचेद्दास्यसिराजेन्द्र भविष्यस्यनृतीविभो ॥ यास्यसेन-
रकंघोरं यावदिन्द्राश्चतुर्दश ॥ राजोवाच ॥ मैवंवदस्वकल्याणि नैतत्त्वय्युपपद्यते ॥ ब्रह्मणस्तुनपापात्वं धर्मविघ्नकरोषिकिं ॥ स्मृ-
तिप्राप्तेनहिमया नभुक्तंहरिवासरे ॥ सोहमद्यकथंदेवि संजातपलितःशुभे ॥ मर्त्यस्ययौवनेतीते क्षीणेन्द्रियरणस्यहि ॥ स्वच्छुंनी
सेवनंयुक्तमथवाहरिवासरं ॥ कृतंयन्नमयाबाल्ये यौवनेनकृतंचयत् ॥ तदहंक्षीणवीर्यस्तु कथंकुर्यांजुगुप्सितं ॥ प्रसीदचपलापांगि
प्रसीदवरवर्णिनि ॥ माकुरुव्रतभंगंमे दाताहंराज्यसंपदं ॥ अथवान्येच्छसेयच्च करोम्यन्यत्सुलोचने ॥ आरोप्यशिविकायांवा त्वा- ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महंगजगामिनि ॥ कलत्रौघेणनेष्यामि विमानप्रतिमांहितां ॥ यत्रकामयसेसुभ्रु त्वाद्भिश्चतदहंव्रजे ॥ अथवानेच्छसेतस्य मोहमा-
नंमयाकृतं ॥ कृत्वास्वर्णमयौस्तंभौ वक्षाविद्रुमभूषितौ ॥ मुक्ताफलमयीन्दोलां करिष्येहंतवप्रियं ॥ धात्रीफलप्रमाणानां शतल-
क्ष्यादिसंख्यया ॥ तत्रत्वांदोलयिष्यामि वह्न्माशानहर्निशं ॥ व्रतभङ्गंवरारोह माकुरुष्वशुभव्रते ॥ भोक्तुस्वमांसहिवरं श्वमांसं
हिवरानने ॥ तनयस्यनतैर्भुक्तं नाभुक्तंहरिवासरे ॥ त्रैलोक्यहननेपापं मैथुनेशशिनःक्षये ॥ नृणांव्यवस्थितंदेवि भूतानांक्रूरक-
र्माणि ॥ भोजनंवासरेविष्णो नैतेषष्ठ्यांव्यवस्थिता ॥ लवणेतुतृतीयायामष्टम्यांपिशितेशुभे ॥ अक्षेषुपूर्णमास्यांतु सुरायांरविसं-
क्रमे ॥ गोप्रचारप्रलोपेच कूटसाक्ष्यःप्रदायके ॥ भूमेरंगुलिहारेच मिथ्याविक्रयवादके ॥ निःक्षेपस्यापहारेच कुमारीविघ्नकारके ॥
विल्वस्तमालकेचैव मृतवत्साप्रदोविधिः ॥ दास्यामीतिद्विजंश्राव्य नददातिहियोनरः ॥ ग्रामंक्षेत्रंगृहंवापि दीयमानस्यदुर्मतेः ॥
निर्णयेसमनुप्राप्ते वदतोह्यनृताक्षरं ॥ मानकूटस्तुलाकूटः कन्यानृतगवानृते ॥ संस्थितंकनकाभासे कथंभोज्यंहरेर्दिने ॥ मोहि-
न्युवाच ॥ एकभक्तेननक्तेन तथैवायाचितेनच ॥ उपवासेनदानेन द्वादशींनहिलंघयेत ॥ गुर्विणीनांगृहस्थानां क्षीणानांरोगि-
णांतथा ॥ शिशूनांचिरजातानां नयुक्तंसमुपोषणं ॥ राज्ञांभारवहीनांच संग्रामाक्षितिसेवितां ॥ पतिव्रतानांराजेन्द्र नयुक्तंसमु-
पोषणं ॥ एतन्मेगौतमःप्राह स्थितायामन्दराचले ॥ नव्रतेनदिनंविष्णोर्ज्ञेयंमनुजदुर्लभं ॥ तेगृस्थाद्विजाज्ञेया येषामग्नेःपरिग्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हः ॥ राजानन्तेतुविज्ञेया येप्रजापालनेस्थिताः ॥ गुर्विण्योज्येष्टमासस्थाः शिशवोज्येष्टवत्सराः ॥ अतिलंघननिक्षीणा यज्ञभा-
गोघनाश्रये ॥ त्रिविधनप्रकारेण भर्तुर्याभिहितेरताः ॥ पतिव्रतास्तुविज्ञेया नज्ञेयायोनिरक्षणात् ॥ किमन्यैर्वहुभिर्भूप वाक्या-
लापैःकृतैर्मया ॥ भोजनेतुकृतेप्रीति रेकादश्यांत्वयानृप ॥ नप्रीतिर्यदिमेछित्वा शिरस्त्वंहिप्रयच्छसि ॥ तृणतुल्यानहंमन्ये त्रि-
लोकान्मनुजाधिप ॥ यत्प्रदास्यसितुष्ट्यर्थं ममराजीवलोचन ॥ स्वयंकृत्वाप्रतिज्ञात्वं सदाक्षिणकरान्वितां ॥ नाद्ययच्छसिराजेन्द्र
नाहंसंसर्पयामिते ॥ वर्णानामाश्रमाणांच सत्यंराजेन्द्रपूज्यते ॥ विशेषाभूमिपालानां त्वाद्विधानांमहीपते ॥ सत्येनतपतेसूर्यः
शशीसत्येनरोचते ॥ सत्येस्थितिक्षितिर्भूप सत्यंधारयतेजगत् ॥ सत्येनवहतेवायुः सत्येनज्वलतेशिखी ॥ सत्याधारमिदंसर्वं जग-
त्स्थावरजङ्गमं ॥ नसत्याच्चलतेसिन्धुर्नविन्ध्योवर्द्धतेविभो ॥ नगर्भंयुवतीधत्ते वेलातीतंकदाचन ॥ ऋतवःसंस्थितासत्ये फल-
पुष्पार्थदर्शिनः ॥ द्रव्यादिसकलंवस्तु सत्याधारंमहीपते ॥ अश्वमेधसहस्रंच सत्यंचतुलयाधृतं ॥ अश्वमेधसहस्राद्धि सत्यमेवाति-
रिच्यते ॥ सत्याद्धिमुक्तोनृपतेमनुष्यः सुरापतुल्योभवतीतिसत्यं ॥ व्रतेनशुद्धिर्यदिवाह्युपैति सत्याच्च्युतोनैतिकृतेनतेन ॥ ६५ ॥
इतिश्रीलघुनारदीयपुराणे रुक्माङ्गदचरिते मोहिनीसम्वादो नामचतुर्विंशोध्यायः ॥ २४ ॥ ७ ७ ७ ७ ७
रुक्मांगदउवाच ॥ यत्त्वयाव्याहृतंवाक्यं ममेदंगौतमेरितं ॥ मन्दरेपर्वतेश्रेष्ठे हरिवासरभोजनं ॥ अजानतापुराणार्थं व्याहृतञ्च-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजन्मना ॥ क्षुद्रशास्त्रानुसारेण लोलुपेनवरानने ॥ पुराणेनिर्णयोह्येष विद्वद्भिःसमुपाहृतः ॥ नशङ्खेनपिबेत्तोयं नहन्यात्कूर्मशू-
करौ ॥ एकादश्यांनभुञ्जीत पक्षयोरुभयोरपि ॥ अगम्यागमनेदेवि तथाऽभक्ष्यान्नभक्षणे ॥ अकार्यकरणेजन्तोर्गोसहस्रवधःकृतः ॥
तत्कथंज्ञायमानोहं भोक्ष्यामिहरिवासरे ॥ अभक्षःसर्वथाप्रोक्तः किंपुनस्त्वन्नसंरिक्रयां ॥ अनुकल्पोनृणांप्रोक्तः क्षीणानांवरवर्णि-
नि ॥ मूलंफलंपयस्तोयमुपभोग्यंभवच्छुभे ॥ नत्वेवंभोजनेकैश्चिदेकादश्यांप्रकीर्त्तितं ॥ ज्वरीणांलंघनंशस्तं पापीनांसमुपोषणं ॥
मनःप्रकोपसुभगे संप्राप्तेहरिवासरे ॥ ज्वरमध्येकृतंपथ्यं निधनायविधीयते ॥ वैष्णवेतुदिनेभुक्ते नरकायप्रकल्पते ॥ माग्रहंकुरुवा-
मोरु व्रतभंगोभवेन्मम ॥ यद्यद्वरोचतेतुभ्यं तत्तत्कर्त्तास्मिसुन्दरि ॥ मोहिन्युवाच ॥ नचान्यद्रोचतेराजन् विनावैभोजनक्रियां ॥
जीवितस्यापिदानेन नमेकिञ्चित्प्रयोजनं ॥ माचेर्भूपदृष्टोयं नमेकिञ्चित्प्रयोजनं ॥ अभिमन्तोनविद्वांसो नमन्येसमुपोषणं ॥
वेदवाक्यंकथंकर्म भवान्वैकर्तुमर्हसि ॥ वसिष्ठउवाच ॥ तामाहनृपतिःक्रुद्धो वेदोयम्बहुधास्थितः ॥ यज्ञकर्मक्रियावेदः पुराणेषुप्र-
तिष्ठितः ॥ पुराणपुरुषाज्जातं यथेदंजगदद्भुतं ॥ यथाहिवाग्मयंज्ञानं पुराणेभ्योनसंशयः ॥ वेदार्थादधिकंमन्ये पुराणार्थंवरानने ॥
वेदाःप्रतिष्ठिताःदेवि पुराणेनात्रसंशयः ॥ बिभेत्यल्पश्रुताद्वेदो मामयंघातयिष्यति ॥ इतिहासपुराणैस्तु तद्दृष्टंस्मृतिभिःशुभे ॥
उभाभ्यांयमदृष्टंहि तत्पुराणेषुगीयते ॥ नवेदेग्रहसंचारो लग्नशुद्धिर्नभाविनि ॥ तिथिवृद्धिःक्षयोवापि याज्यायाज्यौनदृश्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रायश्चित्तंनहत्यायामातुरस्यौषधींप्रिये ॥ नचापिपापशुद्धिस्यादात्मानोवापरस्यवा ॥ यदंगैर्दीयतेसुभ्रु तथोपांगैश्चगीयते ॥ पु-
राणैःस्मृतिभिर्यस्तु वेदोयंपरिपठ्यते ॥ वदन्तीहपुरणानि भूयोभूयोबरानने ॥ नभोक्तव्यंनभोक्तव्यं संप्राप्तेहरिवासरे ॥ पुराण-
मन्यथाकृत्वा तिर्यग्योनिमवाप्यते ॥ प्रशान्तोपिस्वदान्तोपि नगतिंप्राप्नुयात्क्वचित् ॥ पितरंकोनवन्देत मातरंकोनपूजयेत् ॥
कोनगच्छेत्सरिच्छ्रेष्ठां कोभुंक्तेहरिवासरे ॥ कोहिदूषयतेवेदं ब्राह्मणान्कोजिघांसति ॥ परदारांहिकोगच्छेत्कोभुंक्तेहरिवासरे ॥ न-
हीदृशंपापतरंजगत्त्रये विमूढजन्तोर्हरिभिर्दिनेशुभे ॥ करोतिदेहस्यविवृद्धहेतोर्भुजिक्रियामेषनरःसदैव ॥ मोहिन्युवाच ॥ पू-
र्णिकेशीघ्रमाहूय ब्राह्मणान्वेदपारगान् ॥ तेषांवाक्येनपूतोयं करोत्वन्नभुजिक्रियाम् ॥ सातद्वाक्यात्त्वरन्तीच ब्राह्मणान्वेदपार-
गान् ॥ आहूयचानयामास यत्रतिष्ठतिमोहिनी ॥ तानागतान्ततोदृष्ट्वा वेदवेदाङ्गपारगान् ॥ मोहिनीपतिनासार्द्धं ववन्देभू-
मिदेवतान् ॥ उपविष्टास्तुतेसर्वे शातकुंभमयेष्वपि ॥ आसनेषुमहीपाल ज्वलनार्कसमप्रभाः ॥ तेषांमध्येवयोवृद्धो गौतमोवा-
क्यमब्रवीत् ॥ किंनिमित्तंवयंदेवि समाहूतावदस्वनः ॥ सर्वसंशयछेत्तारः प्राप्तास्मोमत्तगामिनि ॥ मोहिन्युवाच ॥ छान्दसस्तु-
जनोह्येष अर्थवाक्यहतोयथा ॥ सोयंवदतिमोहान्धो नाहंभोक्ष्येहरेर्दिने ॥ अन्नाधारमिदंसर्वं जगत्स्थावरजंगमं ॥ मृताह्यप्यन्न-
दानेन प्रीयन्तेपितरोदिवि ॥ कर्कन्धुमात्रंविप्रेन्द्राः पुरोडाशंहिदेवताः ॥ कामयन्तेद्विजश्रेष्ठा अत्रैवचैवामृतोपमं ॥ पिपीलिकापि- ॥ ३९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षुधिता सुखेनादायतण्डुलान् ॥ चिरंनयतिदुःखेन चान्नंकस्यनहीयति ॥ सोयंविद्धिषयत्यत्र संप्राप्तेहरिवासरे ॥ नितंधर्मंपरित्य-
ज्य यतिधर्मेव्यवस्थितः ॥ विधवार्चायतीनांहि युक्तव्रतनिषेवणे ॥ अव्रताविधवायातु मुनयश्चाव्रतस्तथा ॥ अन्धेतमसिम-
ज्जंते यावादिन्द्राश्चतुर्दश ॥ उपवासादिकरणं भूभुजान्नोदितःक्वचित् ॥ मुक्त्वैकंपालनंराज्ञां चतुर्वर्गप्रसाधनं ॥ नारीणाभर्तृशु-
श्रूषा पुत्राणांपितृसेवनं ॥ शूद्राणांद्विजशुश्रूषा लोकरक्षामहीभृतां ॥ स्वकंकर्मपरित्यज्य यदन्यत्कुरुतेक्वचित् ॥ अज्ञानाद्वाप्र-
मादाद्वा पतितःसनसंशयः ॥ सोयमद्यमहीपालो जातिधर्मासमीहते ॥ अव्यापाराहियुवती अमनस्वीसुतस्तथा ॥ एकान्तशी-
लोनृपतिर्भृत्यःकर्मविवर्जितः ॥ सर्वेतेनरकंयान्ति अप्रतिष्ठंद्विजोत्तमाः ॥ अयंहिनियमोपेतो हरिपूजनतत्परः ॥ आक्रन्देवर्त्तमा-
नेवै कथमेषोभिधास्यति ॥ व्युत्पाद्यहरिपूजान्तु ब्रह्महत्याम्व्यपोहति ॥ क्षीणदेहोरिपूनेष कथंसंयमयिष्यति ॥ अन्नतोभवतिप्रा-
णः प्राणाद्देहविचेष्टितं ॥ चेष्टायांरिपुनाशस्तु ततोन्नंपरिभूयते ॥ एवंज्ञात्वामयाराजा बोध्यमानोनबुध्यते ॥ निजधर्मपरित्यज्य
जातिधर्मेव्यवस्थितः ॥ विधवानांव्रतीनांहि युक्तंव्रतनिषेवनं ॥ अव्रताविधवायातु मुनिश्चैवस्तुचाव्रतः ॥ अन्धेतमसिमज्जन्ते या-
वदिन्द्राश्चतुर्दश ॥ एतदेवनृपेन्यायं यत्प्रजारक्षणंपरं ॥ नव्रतंकिञ्चिदेवेह पुत्रस्त्रीषुनृपेषुवा ॥ किंदेवकार्येणनराधिपस्य रक्षामकृ-
त्वाविषयस्थितानां ॥ तद्देवकार्यंसचयज्ञहोमो यदश्रुपातानयनंहिराष्ट्रे ॥ ५० ॥ इतिश्री ना० पु० मोहिनीवाक्यंनाम ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बशिष्ठउवाच ॥ तद्वाक्यंब्राह्मणाःश्रुत्वा मोहिन्याःसमुपाहृतं ॥ तथ्यमित्येवमुक्तातं राजानंवाक्यमब्रवीत् ॥ ब्राह्मणाऊचुः ॥ यः
पुरानृपतेपुण्यः कृतोयंसमयःकिल ॥ एकादश्यांनभोक्तव्यं पक्षयोरुभयोरपि ॥ नकृतःशास्त्रदृष्ट्याहि स्वबुध्यावैत्वयाकृतः ॥ सा-
ग्नीनांप्राशनंप्रोक्तमुभयोःसन्ध्ययोःकिल ॥ मोहादुत्सृष्टभोक्तारस्त्रयोवर्णाःप्रकीर्त्तिताः ॥ विशेषाद्भूमिपालानां कथंयुक्तउपोषणं ॥
सर्वत्रोद्यतशस्त्राणां दुष्टसंयमिनांप्रभो ॥ शास्त्रतोशास्त्रतोवापि यःकृतःसमयस्त्वया ॥ परिपूर्णोभवत्वेष वाक्येनाद्यद्विजन्मना ॥
व्रतभंगोनतेस्तीह भुंक्ष्वविप्रानुशासनात् ॥ परितापोनकर्त्तव्यो विप्रवाक्यंमहत्तरं ॥ योन्यथामन्यतेतेषां वाक्यंनृपतिपुंगव ॥ स-
यातिरासभियोनिं जन्मानिदशपञ्चच ॥ तच्छुत्वावचनंरौद्रं राजाकोपसमान्वितः ॥ उवाचस्फुरमाणौस्तान् विप्रांश्चश्लक्ष्णयागिरा ॥
सर्वेषामेवभूतानां भवन्तोमार्गदर्शिनः ॥ विमार्गस्थाभवन्तोहि कथंवदथमूर्खतां ॥ यतीनांविधवानाञ्च उपवासउदाहृतः ॥ मि-
थ्यैतत्सर्वदाचैव उपोष्योहरिवासरः ॥ यद्भवद्भिरिदंवाक्यं प्रोक्तंराज्ञासुपोषणे ॥ तन्नास्तिसर्वभूतैस्तु कार्यमेवसुपोषणं ॥ पुराणे-
श्रूयतेचेयं गाथेयंपापकृन्तनी ॥ नशङ्खनपिबेत्तोयं नहन्यात्कूर्मशूकरौ ॥ एकादश्यांनभोक्तव्यं पक्षयोरुभयोरपि ॥ सुरापानंन-
कर्त्तव्यं नहन्तव्योद्विजस्तथा ॥ नाक्षैक्रीडेदधर्मंवै नभुञ्जीतहरेर्दिने ॥ अभक्ष्यभक्षणंचैव वर्णाश्रमविवर्जितं ॥ परदाराभिगमनं य-
तेश्चैतद्विगर्हितं ॥ अथवासर्ववर्णानां किंवामन्यथभूसुराः ॥ योषित्प्रसंगसदृशं संप्राप्तेशशिनःक्षये ॥ भोजनंवासरेविष्णोः सद्भि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विंप्राविगर्हितं ॥ कृत्वातुकार्यंजीवेत अप्रमत्तःशरच्छतं ॥ कोहिवैवेष्टमानस्य योभुक्तेहरिवासरे ॥ चतुष्पदेभ्योमनुजैर्न्नांन्नंदत्तंहरे-
र्दिने ॥ उपवासस्थितैर्विप्रा विष्णुधर्मपरायणैः ॥ सोहंकथंकरिष्यामि यत्कृतंनकदाचन ॥ नवोबचःकरिष्यामि नमयाहिनिमं-
त्रिताः ॥ नन्वहंक्षीणदेहस्तु नचरक्षाविबर्जितः ॥ धर्मभूषणसंज्ञेतु रक्षपालेधरातले ॥ प्रशाशतिसुरश्रेष्ठः कोविपक्षोभवेन्मम ॥ ए-
वंज्ञात्वाद्विजश्रेष्ठा नवाच्यंकिंचिदेवहि ॥ अनिच्छमानेयेदद्युः प्रायश्चित्तंद्विजातयः ॥ तेषामेवहितत्पापं स्मृतिर्वैकलिपसंभवं ॥
देवोवादानवोवापि यक्षोगन्धर्वराक्षसा ॥ वृद्धोवाब्राह्मणोवापि पितास्माकमथापिवा ॥ हरिर्वापितरौवापि मोहिनीजनकोपिवा ॥
दिनकृच्छीतकर्त्तावा तुष्यतिनृपतोयदि ॥ नभुंक्तेभूसुराराजन् नाम्नारुक्मांगदस्तुयः ॥ पातालाच्छीर्यतेपृथ्वी हिमवान्परिवर्त्तये-
त् ॥ जलधिःशोषमायाति उष्णत्वंपावकस्त्यजेत् ॥ नाहंत्यजेयंविप्रेन्द्रा एकादश्यानिषेवनं ॥ प्रसिद्धरेखाभुवनत्रयेपि रारध्यतेमे-
पटहेतिमात्रं ॥ ग्रामेथवर्गेविषयेपुरेवा विष्णुष्पतेरुक्मविभूषणस्य ॥ दण्ड्यश्चबध्यश्चसपन्नभूतो नचापिवासोविषयेष्ठतस्य ॥ हरे-
र्दिनेसर्वमखप्रधाने पापापहेधर्मविबर्द्धनश्च ॥ मोक्षप्रदेजन्मनिकृन्तनाख्ये श्रेयोनिधौसर्वजनप्ररूढैः ॥ एवंविधःसंयमसंयुतोहं य-
द्यास्मिकर्त्तावृजिनंहिविप्राः ॥ अमेध्यलिप्तःपटहोभवेन्मे संछादितोनीलपटेनवाससा ॥ उत्पाद्यकीर्त्तिंस्त्वयमेवजन्तोर्निकृन्ततेका-
मभयाच्चयोनरः ॥ सयातियोर्निंकृमिकीटजुष्टां विष्ठामयेपञ्चयुगानिसप्त ॥ वृथाशिशूनामपिवैजनित्री भविष्यतेपुत्रबरोनिराशा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वैवस्वतेहर्षमुपागतेहि सलेखकेभूतपटेप्रपन्ने ॥ किंतेजनातेनपुरात्मनाहि ददातिहर्षंरिपुसुन्दरीणां ॥ कुकर्मणापापमतिंकरोति
 कृतन्नधात्रेपुनरेवयोत्र ॥ शास्त्रंनशास्त्रंनचतत्पुराणं नचापिसन्तःस्मृतयोनचैव ॥ वेदाह्यवेदाश्चभवन्तिविप्रा शुद्धींक्रियांयःकुरुते-
त्रवासरे ॥ श्राद्धेपितेनापिनतृप्तिरस्ति यद्भुज्यतेवैपितृशेषमन्नं ॥ प्राप्तेह्निनूनंमधुसूदनस्य पित्र्यंहिकर्मेष्टतमंनभाति ॥ वशिष्ठउ-
वाच ॥ श्रुत्वैतद्वचनंभूप मोहिनीप्रज्वलत्यथ ॥ क्रोधसंरक्तनयना भर्त्तारंपर्यभाषत ॥ नकरोषिवचोमह्यं धर्मराज्योभविष्यति॥
धर्मराजस्तुपुरुषः पांशुनासमतांव्रजेत् ॥ पांशुनापूर्यतेगर्त्तः सगर्त्तोंहिनजायते ॥ कृतकृत्यागमिष्यामि प्राप्तोधर्मस्त्वदुद्भवः ॥
नोपधानंकरिष्यामि सुबाहुंचतवाधुना ॥ धिक्त्वांचदक्षिणकरं स्ववाक्यपरिलंघनं ॥ म्लेच्छोसिनचराजात्वं म्लेच्छेष्येतन्नविद्यते॥
सत्याच्चलितमद्यत्वां परित्यज्यस्वपापिनं ॥ एवमुक्त्वावरारोहा उदतिष्ठत्त्वरान्विता ॥ सतीवेशंपरित्यज्य सर्वालंकारभूषिता ॥ प्र-
स्थितासातदातन्वी भूसुरैःसहभूमिप ॥ वदन्तीपरुषंवाक्यं पार्थिवंप्रतिभाविनी ॥ वरंह्यमेध्यसंस्पर्शो नास्यसंगोनृपस्यहि ॥ व-
रंनीलांबरस्पर्शो नास्यधर्मच्युतस्यहि॥ वरंह्युदक्याशंस्पर्शो नास्यसत्यच्युतस्यहि॥ एवंविमोहिनीरुष्टा प्रलपन्तीतदाभृशं ॥ गौ-
तमाद्यैःपरिवृता निर्जगामगृहाद्वहिः ॥ निर्गच्छन्तींसुसंक्रुद्धां साक्रोशन्तीतदानृपं ॥ अटित्वासकलामूर्वीं प्राप्तोधर्मविभूषणः ॥
संमुखोहिजनन्यास्तु वराश्वोपरिसुस्थितः ॥ कर्णाभ्यांतस्यशब्दोसौ विश्रान्तपितृवत्सलः ॥ मोहिनीवक्त्रसंभूतो विप्रवाक्योपबृं-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हितः ॥ सश्रुत्वाताहृशंवाक्यं जनन्याधर्मभूषणः ॥ अवरुह्यहयात्क्षिप्रं ववन्देमोहिनींतदा ॥ ब्राह्मणानांचसर्वेषां प्रणाममकरोत्तदा ॥ अनुमन्यचतान्सर्वान् मोहिनींवाक्यमब्रवीत् ॥ केनापमानितादेवि कस्मात्वंगर्हसेनृपं ॥ धरासुरैःसमेतात्वं ब्रूहिकिंकरवाणिते ॥ धर्मांगदवचःश्रुत्वा मोहिनीवाक्यमब्रवीत् ॥ अनृतोयंतवपिता करोयेनवृथाकृतः ॥ यःकृतंसुकृतंभीरु रक्ताशोकाकृतिःशुभः ॥ ध्वजांकितोबरश्रीमान् दक्षिणःकनकांगदः ॥ रुक्मांगदेनपित्राते नाहंवस्तुंसमुत्सहे ॥ धर्मांगदउवाच ॥ यद्ब्रवीषिवचोदेवि तत्कर्त्ताहंनसंशयः ॥ माकोपंकुरुदेवित्वं निवर्त्तस्वपितुःप्रिये ॥ मोहिन्युवाच ॥ अनेनसमयेनाहं पित्रोदातेमहामते ॥ मन्दरेपर्वतेश्रेष्ठे सन्निधौधूर्जटेस्तदा ॥ समयात्प्रच्युतस्त्वद्य पितातेराजनन्दन ॥ नप्रयच्छतिमेदेयं तस्यैवचविवृद्धये ॥ नयाचेकानिचिद्वस्तु हस्त्यश्वंरत्नवाससी ॥ येनतस्यभवेद्धानिस्तन्नयाचेनृपात्मज ॥ येनासौप्रीणयेद्देवं स्वकीयंवेदिनाम्वर ॥ तन्मश्वाप्रार्थतेपुत्र समोहान्नप्रयच्छति ॥ उपकारायतस्यैव देहंसंप्रीणनायवै ॥ याचितोब्राह्मणैःसार्द्धं मयानृपतिपुंगव ॥ स्थितोसावनृतेघोरे सुरापानंसमेत्यवै ॥ सत्यच्युतंनिष्ठुरवाक्यभाषिणं विमुक्तधर्मंनृपतस्करंच ॥ परित्यजेयंजनकंतवाधुना नसंगतिर्मेभविताहितेन ॥ तच्छ्रुत्वामोहिनीवाक्यं तदाधर्मांगदोब्रवीत् ॥ मयिजीवतितातोमे नभवेदनृतःक्वचित् ॥ निवर्त्तस्वधरातुल्ये करिष्येहंतवेप्सितं ॥ तत्रात्मनानृतन्देवि पूर्वमुक्तंकदाचन ॥ सकथंताहृशोजातो भविष्यतिनृपोत्तमः ॥ यस्यसत्येनलोकाहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितावसुमतीतथा ॥ वैवस्वतगृहंयेन शुन्यंसर्वारिणाकृतं ॥ यस्यविस्फुरतेकीर्त्तिः सर्वद्वीपेषुधर्मिणः ॥ सकथंजायतेराजा त्व-
सत्यवचनान्वितः ॥ क्वनुश्रुतंत्वयादेवि श्रुतंभूमिपतीरितं ॥ येनत्वंभाषसेभीरु निन्दसेपितरंमम ॥ कृत्वाममोपरिदयां निवर्त्तस्व
बरानने ॥ एतद्रुक्मांगदवचः श्रुत्वादेवीविमोहिनी ॥ निवर्त्ततमहीपालः पुत्रस्कन्धावलंबिनी ॥ यत्ररुक्मांगदःशेते मृतकल्पो-
रविप्रभः ॥ तस्मिन्निवेशयामास शयनेकाञ्चनान्विते ॥ दीपरत्नैःसुखचिते मणिवैडूर्यभूषिते ॥ आखण्डलस्यशस्त्रेण कृतपादेसु-
कोमले ॥ विस्तरायामसंपन्ने सुरम्येसुमनोहरे ॥ उवाचप्रणतोभूत्वा पितरंश्लक्ष्णयागिरा ॥ तातैषाजननीमह्यं तांवदत्यनृतीत्वि-
ति ॥ मयिजीवतिकस्मात्वं भविष्यस्यनृतीपितः ॥ सकोषरत्नविषये गोगजाश्वसमाकुले ॥ राज्येप्रशास्यमानेतु सप्तोदधिविभूषि-
ते ॥ देहित्वंसकलंह्यस्या यत्त्वयासमुदीरितं ॥ मयिचापधरेतात व्यलीकंकःकरिष्यति ॥ देहिशक्रपदंदेव्या जितंचैवपुरन्दरं ॥
नचेतुष्यतिकल्याणी तेनशक्रपदेनहि ॥ वित्तेशंवारुणंवापि याम्यंवापृथिवीपते ॥ आग्नेयंनैरृतंवापि वायव्यंवाशिवस्यच ॥ वि-
रिंचिदुर्लभंवापि योगिगम्यंनिरञ्जनं ॥ जित्वापदंप्रदास्यामि उपास्याराध्यपद्मजं ॥ समीहतेयजननी गमाद्यधरणीतले ॥ त्रि-
पिष्टपेवाथपरेपदेवा दास्यामिजित्वादनुजेशमर्त्यान् ॥ भृत्योस्मिदासोस्मिनराधिपेन्द्र माब्रुस्तथाचाहमदीनकीर्तिः ॥ यद्दुष्करं-
भूमिपदेत्रिलोके तच्चापिदास्यामितवप्रभावात् ॥ तंचापिराजेन्द्रददस्वदेव्या यज्जीवितंवाञ्छतितद्ददस्व ॥ भवस्वनान्योनृपना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थलोके माकीर्त्तिजंपापमिदंवदस्व ॥ प्रकाशयित्वास्वगुणैर्जनौघं करैरिवात्मप्रभवैःखखोल्कः ॥ कीर्त्तिःप्रसंगेतवभूमिपाल प्रजा-
बधोयंनहिसंशयोत्र ॥ उत्पादयित्वाविमलामनन्तां कीर्तिंप्रभोस्वर्गगणानुसारिणीं ॥ नयुक्तमेतत्तवभूमिपाल वाक्यंमृषाकर्तुमि-
हेन्द्रकल्प ॥ ८० ॥ इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते धर्माङ्गदवचः षड्विंशतितमोध्यायः ॥ २६ ॥ ७ ७ ७
राजोवाच ॥ कीर्त्तिर्नश्यतुमेपुत्र असत्योवाभवाम्यहं ॥ गंतावानरकंघोरं नभोक्ष्येहरिवासरे ॥ वदत्येषासुदुर्मेधा भूयोभूयःसुवा-
लिशा ॥ समर्थ्येकामयेपुत्र वदस्वान्यत्कथंचन ॥ मुक्त्वैकंभोजनंविष्णोर्वासरेपापनाशने ॥ यद्यहंकुत्सितंयोनिं व्रजेयंकृमिसंयु-
तां ॥ कार्यंतथापिनैवाहं भोजनंहरिवासरे ॥ एषाचैवगुरुर्भूत्वा लोकानांशिक्षयान्विता ॥ सुमतिर्भारतिर्यासीत्साकथंचित्तथाभ
वेत ॥ अभक्षभक्षणंकृत्वा ह्यगम्यगमनंतथा ॥ पीत्वापेयन्तुयज्जीवेत् किंतेनवदपुत्रक ॥ कृत्वापांशुसमःपुत्र त्यक्तोहमनयाक्षि-
तौ ॥ धिक्कृतोद्विजनैःसर्वैः नभोक्षेहरिवासरे ॥ प्रयातुविलयंदेवी मोहिनीब्रह्मणोन्तिकं ॥ वियोगेचपलापद्भ्यां वरंमृत्युर्नभोज-
नं ॥ कथंहर्षमहंकर्त्ता मार्तण्डतनयस्यहि ॥ निरुद्धोयस्यवैमार्गो हरिवासरसेवनात ॥ याश्चशून्याःकृतास्तात मयानरकपङ्क्तयः
॥ परिपूर्णाभविष्यन्ति जनस्ताबृजिनेकृते ॥ यास्मसीमन्तिनीकाचित् कुक्षौसंधारयेत्सुतं ॥ यःशत्रून्संमुखात्कुर्यान्मित्रद्वेषंक-
रोतिकिं ॥ सोहंदेवमनुष्याणां कृत्वामूर्ध्निपदंनृप ॥ आपूर्यवैष्णवंलोकं जनोघैःसमुपोषितैः ॥ कथमन्यंचरेद्धर्मं भार्याहेतोःस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामुकः ॥ नान्यमिच्छातिद्रुमेधा धरंशक्रनिसूदनं ॥ भोजनंवासरेविष्णोरेतदेवहियाचते ॥ तंनदास्यामिमोहिन्या याचितोपि-
सुरासुरैः ॥ पिवेविषंविशेवह्निं निपतेपर्वताग्रतः ॥ खड्गेनवाशिरश्छिन्द्यां नभोक्षेहरिवासरे ॥ रुक्मांगदेतिमेनाम प्रसिद्धंभुवन-
त्रये ॥ एकादश्युपवासेन मयाचोपार्जितंयशः ॥ सकथंभोजनंकृत्वा सर्वसंमार्ज्जयेह्यहं ॥ यदिव्रजतिदलातिविलयति तिर्यक्सं-
चरतिखण्डशोयाति ॥ विरमतितदपिनचेता मामकमिहमोहिनिहेतोः ॥ परित्यजामेवनिजंहिजीवितं राज्येनकिंमेस्वजनैःसुते-
न ॥ नत्वेवकर्त्तामधुसूदनस्य दिनेसुपुण्येऽन्ननिषेवनंहि ॥ १८ ॥ इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते सप्तविंशोध्यायः
वशिष्ठउवाच ॥ ततपितुर्वचनंश्रुत्वा तदाधर्मविभूषणः ॥ आनयामासजननीं तदासंध्यावलिंशुभां ॥ सूर्यायुतशतप्रख्यां तेज-
सासंहतस्तनीं ॥ सययौमन्दिरंदेव्याः पितुर्दुःखेनदुःखितः ॥ चालमानाधरांसर्वां पदविन्यासविक्रमैः ॥ पुत्रस्यवचनात्प्राप्ता त-
त्क्षणात्सानृपान्तिकं ॥धर्मांगदउवाच ॥ श्रुतंतेमोहिनीवाक्यं पितृवाक्यंतथैवच ॥ उभयोःसंविदंज्ञात्वा मनुःशांत्वयमोहिनीं ॥
भोजनायस्थितामेनां नृपस्यहरिवासरे ॥ यथानच्यवतेसत्याद्यथाभुंक्तेनमेपिता ॥ तथाविधीयतामद्य कुशलंस्याद्यथोभयोः ॥
ततपुत्रवचनंश्रुत्वा देवीसन्ध्यावलीनृप ॥ उवाचश्लक्ष्णयावाचा प्राहब्रह्मसुतांतथा ॥ माग्रहंकुरुमाभीरु नृपतेर्द्धर्मनाशने ॥ ना-
स्वादयतिपानान्नं संप्राप्तेहरिवासरे ॥ अनुवर्त्तयराजानं गुरुरेषसनातनः ॥ नभार्यावचनेभर्तुर्नारीभवतिभाविनि ॥ तस्यालोकाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभाःप्रोक्ता सावित्र्यास्तुयथामलाः ॥ यद्यनेनपुरादेवि तवदत्तकरोगिरौ ॥ कामार्त्तेनविमूढेन नचतद्देविचिन्तयेत् ॥ यद्देयंत-
द्ददात्वेष अदेयंप्रार्थयस्वमा ॥ विपत्तिरपिचश्लाघ्या सन्मार्गेसंस्थितस्यहि ॥ नभुक्तंयेनशुभगे शैशवेपिहरेर्दिने ॥ सोयंशिशु-
त्वाभावेच कथंभोक्षतिसांप्रतं ॥ कामंवरयभद्रेन्यं निवृत्तोभवभोजने ॥ यदिमांमन्यसेदेवि धर्मांगदविमोहिनीं ॥ राज्यंवाजीवि-
तंवास्य वरंयाचयभाविनि ॥ राज्यंगृहाणवामोरु सद्वीपवनकाननं ॥ अथवातेशुभेभद्रे वदान्यत्करवाणिते ॥ ज्येष्ठाहंवाकनि-
ष्ठायाः करिष्येपादधावनं ॥ भर्तुरर्थेविशालाक्षि प्रसीदतनुमध्यमे ॥ वाचाशपथकोशैस्तु संनिबध्याथतंहिया ॥ अकार्यंकारये-
त्पत्यौ सानारीवाग्गुरीभवेत् ॥ प्रत्युतानरकान्घोरान् पञ्चजन्मानिसप्तच ॥ ज्ञात्वाहमेवंसुभगे विक्रियांपापसंभवां ॥ निवारयाम्य-
कार्यत्वात् सखीभावेनसुन्दरि ॥ विपक्षस्यापिसद्बुद्धिर्दातव्याधर्मबुद्धिना ॥ किंपुनःसख्ययायुक्तास्तवपद्मशुभानने ॥ सन्ध्या-
वल्यावचःश्रुत्वा मोहिनीमोहसंयुता ॥ उवाचकनकाभासा भर्तुर्ज्येष्ठांप्रियान्तदा ॥ माननीयासिमेसुभ्रु करोमिवचनन्तव ॥ द्व-
न्द्ववृत्तिर्विवादस्तु गीयतेनारदादिभिः ॥ यदेतन्नाचरेद्राजा भोजनंकृष्णवासरे ॥ क्रियतामपरन्देवि मरणादधिकंतव ॥ ममापि
दुःखैर्दह्येत नतवैववदामिते ॥ कस्येष्टमात्महननं कस्येष्टंविषभक्षणं ॥ पतनंगिरिशृंगाद्वा सर्प्पैःक्रीडाथवाशुभे ॥ व्याघ्रसिंहाभि-
गमनं समुद्रतरणंतथा ॥ द्विरुक्तोनृपवाक्यंवा परदारगमस्तथा ॥ अपथ्यभक्षणंलोके तथैवाभक्षभक्षणं ॥ मृगयापानमक्षैर्वा क्री-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डनंसाहसैस्तथा ॥ छेदनंतृणकाष्ठानां लोकानांखण्डनंतथा ॥ हननंसूक्ष्मजीवानां जलपावकक्रीडनं ॥ निष्ठादेशवरारोहे नरःस-
र्वंकरोतिहि ॥ साहंपापादुराचारा वक्तुकामासुनिर्घृणा ॥ यादृशेनहिभावेन योनौरेतःसमुत्सृजेत् ॥ तादृशेनहिभावेन अपत्यं
जायतेकिल ॥ भ्रंशनार्थमहंराज्ञो देविरुक्मांगदस्यहि ॥ जाताजलजजातेन स्त्रीरूपावरवर्णिनी ॥ दुष्टभावासमुत्पन्ना दुःखार्थं
तनयस्यते ॥ नलमंनग्रहादेवि नाहोवापुण्यदर्शिनी ॥ तत्कालभावनातग्राह्या तद्भावाज्जायतेसुतः ॥ तेनभावेनयुक्तेन दाक्षिण्य
रहितस्यच ॥ नस्नेहोनचव्रीडावै नधर्मादेविविद्यते ॥ युक्तायुक्तंमन्यमानः स्वभावमनुवर्त्तते ॥ वक्ष्येवचःप्राणहरन्तवाधुना भर्तु-
श्चलोकस्यचदारुणंच ॥ धर्मापहंघोरतरंममैव कर्तुंनशक्यंमनसैवभीरु ॥ करोषिवाक्यंयदिमामकंत्वं भवेत्सुकीर्तिर्महतीसुलोके ॥
भर्तुर्यशःस्यात्त्रिदिवेगतिस्तु पुत्रप्रसंसाममाधिग्विवाद ॥ ३५ ॥ इतिश्री ळ० ना० पु०रु०मोहिनीवाक्ये अष्टाविंशोध्यायः २८
वशिष्ठउवाच ॥ मोहिन्यावचनंश्रुत्वा देवीसन्ध्यावलीतदा ॥ धैर्यमालंब्यतांतन्वी ब्रूहिब्रूहीत्यभाषत ॥ कीदृशंतद्वचोदेवि येन-
दुःखंभवेन्मम ॥ भर्तुर्मेसत्यकरणे नमेदुःखंव्यथाक्कचित ॥ आत्मनोनिधनोवापि पुत्रस्यनिधनोपिवा ॥ भर्तुर्वाक्यपरायामे रा-
ज्यनाशेनचव्यथा ॥ यस्याःकृतेभवद्भर्ता दुःखग्रहतचेतनः ॥ नार्याःसुन्दरिपापायास्तस्याःप्रोक्ताशुभागतिः ॥ मज्जतेनरकेघोरे
पूपाख्येजन्मसप्ततिः ॥ विमुखींयोनिमासाद्य तिष्ठतेवत्सरत्रयं ॥ भर्तुरर्थेह्रियावित्तं विद्यमानंनयच्छति ॥ जीवितंवावरारोहे सा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्ठायांभवेत्कृमिः ॥ कृमियोनिविमुक्तास्तु काष्ठीलाभवतेशुभे ॥ ममकौमारिभावेतु मत्पितुःकाष्ठपाटकः ॥ अग्निःप्रज्वलनार्थाय जातुकाष्ठंन्यपातयत ॥ सखीभिःसहितातत्र रममाणाशुभानने ॥ गतोहंतत्रयत्रास्ते सवनीकाष्ठपाटकः ॥ काष्ठंपाटयतस्तस्य पार्श्वेतुस्थितवत्यहं ॥ तत्रतुसामयादृष्टा काष्ठीलाकाष्ठमध्यतः ॥ नवनीतनिभंदेहं मुखञ्चाञ्जनसंनिभं ॥ कनिष्ठिकांगुलीतुल्या स्थौल्यांमांसत्वचान्विता ॥ तांदृष्ट्वापतितांहन्तुं वेगाद्ध्वांक्षःसमागतः ॥ यावद्गृह्णातिवक्रेण काष्ठीलांक्षुधितःशुभे ॥ तावन्निवारितोध्वांक्षो मयालोष्टेणतत्क्षणात् ॥ साचतेनपरित्यक्ता वायसेनवरानने ॥ वक्रप्राप्तापिभीतेन वायसेनपलायता ॥ ततःसावेपमानाच चंचुस्पर्शसुदुःखिता ॥ मयाजलेनसंसिक्ता तत्क्षणाच्चेतनान्विता ॥ ततःसावेपमानाच मेवचोवरवर्णिनि ॥ उवाचमांवरारोहे व्यक्तंमधुरयागिरा ॥ काष्ठिलोवाच ॥ सन्ध्यावलियथापूर्वमहमासीन्निशामय ॥ आसीत्कौण्डिल्यइत्येवं ब्राह्मणःसर्वकर्मवित ॥ तस्याहंदुहिताभीरु सुप्रियाचारुलोचने ॥ न्यवसंकान्यकुब्जेतु सर्वैःकामैःप्रपूजिता ॥ जनन्यावन्धुवर्गस्य पितुरिष्टतमाभवत् ॥ ततोहंविप्रपुत्राय प्रदत्तालंकृतातदा ॥ कुलीनायसुरूपाय स्त्रीसंगरहितायच ॥ श्वशुरेणचमेदत्तं मणिमुक्ताफलंबहु ॥ अयुतञ्चसुवर्णञ्च पाणिसंग्रहणेतदा ॥ पितृश्वशुरवित्ताभ्यां परिपूर्णाभवंस्त्वहं ॥ गोमहिष्यादिसंयुक्ता धनरत्नसमन्विता ॥ इष्टादत्तात्वहन्देवि सुशीलस्यजनस्यच ॥ कालेनपञ्चतांप्राप्तः श्वशुरोवेदतत्त्ववित ॥ तंमृतंतुपतिंदृष्ट्वा श्वश्रूसामेपतिव्रता ॥ विवेशाग्नौतदादीप्ते भर्त्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहशुभव्रता ॥ भर्तामेसजलंदत्वा पित्रोःश्राद्धमथाकरोत् ॥ गतेमासद्वयेदेवि भर्तामेराजमन्दिरं ॥ ययौनिमित्तेकस्मिंश्चित् पि-
॥ ४५ ॥ तृहीनोनिराश्रयः ॥ तत्रवेश्याःसुवर्णाढ्या यौवनिन्यःशुभानना ॥ प्रविशन्त्योनृपगृहं दृष्टस्तेनद्विजन्मना ॥ तासांमध्येसुरू-
पैका सुन्दरीसुस्तनीशुभा ॥ आनीतास्वगृहेतेन रत्यर्थमसितेक्षणा ॥ तयासदैवबुभुजे विषयान्विषयप्रियः ॥ तेनैवकर्मणासार्द्धं
वित्तंनीतंक्षयंशुभे ॥ वर्षत्रयेगतेवित्तं हारितश्चदुरोदरे ॥ ततोमांप्रार्थयामास देहिमेभूषणंस्वकं ॥ दुरोदरेमयावित्तं हारितंचारुहा-
सिनि ॥ तन्मयातस्यवित्तंन दत्तंस्वस्वामिनेतदा ॥ सर्ववस्तुमयादाय याताहंपितृमन्दिरं ॥ ततोभर्तागृहंकुड्यं सप्तकक्षकमद्भुतं ॥
विक्रीयतच्चवेश्याया दत्तंकिंचिद्दुरोदरे ॥ क्षेत्रंधान्यादिसहितं सभाण्डंसपरिच्छदं ॥ स्वल्पमूल्येनदत्तातु गतोनदनदीपतिं ॥ आ-
रुह्यनावंतरसा प्रविष्टोलवणोदधिं ॥ सगतोदूरमध्वानं पश्यमानोद्भुतानिच ॥ समुद्रजातानिशुभे जीवचेष्टानितानिच ॥ प्रभञ्ज-
नवशात्तौतु तन्मार्गेणगताभृशं ॥ तदासप्तशतानीह योजनानांगताहिसा ॥ तत्राम्येपञ्चतांयाताः क्षुत्पिपाशार्दितानराः॥ वि-
मुच्यवित्तंभाण्डानि निषादैःसहभाविनि ॥ तत्रैकोदैवयोगान्मे नमृतोहिपतिःशुभे ॥ वायुनानीयमानोसौ प्राक्कर्मवशगेनहि ॥
आससादचलंदेवि बहुशृंगविभूषितं ॥ बहुनिस्सरणोपेतं बहुधातुविभूषितं ॥ बहुवृक्षसमाकीर्णं बहुपुष्पफलान्वितं ॥ उल्लिखन्तं ॥ ४९ ॥
हिशिखरैर्मध्यमंयद्धरेःपदं ॥ तंदृष्ट्वापर्वतंदिव्यं त्यक्त्वानावंसमेपतिः ॥ आरुरोहगिरिंश्रेष्ठं क्षुधार्तःशुभलोचने ॥ विश्रम्यचमुहूर्त्तंतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षुधापरिगतस्तदा ॥ उदतिष्ठतभक्षार्थं भूधरंतंव्यलोकयत् ॥ तत्रापश्यत्समृद्धीकां सपंकागौस्तनीमिव ॥ श्रवमाणारसंदिव्यं ज-
रारोगविनाशनं ॥ अभक्षयत्तदाद्राक्षां षड्विंशद्दिनसंख्यया ॥ सोपीतशीतलंतोयं सुरसंनिर्मलंशुचि ॥ तत्पीत्वानिपुनच्छायां
सोपश्यच्छाखिनांपरं ॥ शालंनीलघनप्रख्यं पञ्चाशत्पुरुषोच्छ्रयं ॥ तस्याधस्तात्ससुष्वाप उत्तरीयंप्रसार्यहि ॥ मेदिन्यांहेगगर्भोगो
निद्राघूर्णितलोचनः ॥ तावत्सुप्तःसुखेनासौ यावत्सूर्यास्तमोगतः ॥ सूर्यास्तमनसंप्राप्ते उन्मीलतिनिशामुखे ॥ तत्रागाद्राक्षसो-
घोरो गर्जमानोघनोयथा ॥ अंकेनादायतन्वंगीं सीतामिवदशाननः ॥ सुप्तांकाशीपतेःपुत्रीं नाम्नारत्नावलींशुभा ॥ शुभगंविप-
रीतन्तु शयनेवैशिरःकृतं ॥ पतिकामकुमारीसा नाविन्दत्सदृशंपतिं ॥ सर्वयोषिद्वरावाला रुदतीनिद्रयाहृता ॥ तस्याःकृतेतदा-
देवी चिन्ताकृष्टाह्यहर्निशं ॥ दीपच्छायांसमाश्रित्य शयनात्सातदाकिल ॥ अटमानेनपापेन दृष्टासारक्षसाशुभा ॥ वज्रवैडूर्यख-
चिते धारयन्तीचकंकणे ॥ उभाभ्यांदशरत्नानि निष्केथद्दशसप्तच ॥ सीमन्तेसप्तरत्नानि केयूरेष्टौचसप्तच ॥ एवंरत्नान्वितांवालां
शतह्रदसमप्रभां ॥ जहारराजभवनात तांतदाचारुहासिनीं ॥ वायुमार्गसमाश्रित्य क्षणात्प्राप्तःस्वमालयं ॥ तत्पर्वतेशयानस्तु प-
तिर्मेशालमाश्रितः ॥ तत्रतस्यगुहारम्या सर्वैस्वर्यसमन्विता ॥ पश्यमानःपतिंरक्षः प्रविवेशगुहांशुभां ॥ अनेकैर्मयविन्यासैः सं-
युक्तांचित्रमन्दिरं ॥ बहुद्रव्यसमोपेतं सज्जनासनसंभृतं ॥ भोजनपानपात्रैस्तु भक्ष्यभोज्यैरनेकधा ॥ चित्रितंबहुरत्नैश्च बहुवृक्षस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्वितं ॥ तस्यमध्येनदीपुण्या पद्मोत्पलविभूषिता ॥ हंसकारण्डवाकीर्णा चक्रवाकोपशोभिता ॥ वनानिचसुरम्याणि तत्रवैरा-
क्षसीशुभे ॥ आसीनातस्यदुष्टस्य भार्यापरमसंपदा ॥ एवंमनोरमांतान्तु समासाद्यसराक्षसः ॥ सप्रविश्यमुमोचाथ शय्यायांवरलो-
चना ॥ रुदतीभयसंयुक्ता पीनश्रोणिपयोधरा ॥ सातुतद्रुदितंश्रुत्वा आजगामत्वरान्विता ॥ तांदृष्ट्वाहेमगर्भाभां सुरूपांगजगा-
मिनीं ॥ पप्रच्छसाहिभर्तारं किमर्थमिहमाहृता ॥ जीवन्त्यांमयिदुष्प्राज्ञ प्रियमन्यांसमीहसे ॥ नहिभार्यातवेदानीं सपत्नीमित्वया-
कृता ॥ एवंब्रुवाणांतांसुभ्रू तदाकोपसमन्वितां ॥ उवाचराक्षसस्तत्र तांप्रियांचारुलोचने ॥ भक्षार्थमाहृतेयन्ते प्रसादंकुरुमेशुभे ॥
मयापिदैवैरुद्दिष्टो भक्ष्योद्वारिस्थितोद्विजः ॥ सालवृक्षसमाश्रित्य पश्यत्वमशितेक्षणे ॥ तमानयस्त्वयंगत्वा येनाहंभक्षयेशुभे ॥ रा-
क्षसस्यवचःश्रुत्वा साकुमारीतदाब्रवीत् ॥ मिथ्याराक्षसिभर्तांते वाक्यमीरितवानिदं ॥ गृहात्पितुःसमानीता भार्यार्थेपतिनातव ॥
जरयात्वांपातिर्ज्ञात्वा विरूपामक्षमांरतेः ॥ विक्रम्यरुदतीरात्रौ रत्यर्थमहमाहृता ॥ तस्याःतद्वचनंश्रुत्वा राक्षसीक्रोधसंयुता ॥ हृ-
दयेनावधार्यार्थं तस्यारूपंविलोक्यच ॥ चिन्तयामासतन्वंगी राक्षसीसासुदुःखिता ॥ अवश्यंमूर्ध्निमेकीलं विधास्यतिहिराक्षसः ॥
एवंगतोमयातस्य कर्तव्यंवैरयातनं ॥ भास्मसीमन्तिनीकाचित् भवेद्धिभुवनत्रये ॥ याहिसापत्नकीलेन ताड्यमानेषुजीवति ॥
सर्वेषामेवदुःखानामेतद्दुःखमहत्तरं ॥ समतानद्धिभार्यस्य कदाचिदिहवर्त्तते ॥ तस्येष्टासुखिनीज्ञेया अनिष्टापरिभूयते ॥ एवंस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहुशश्चिन्त्य भर्तारंवाक्यमब्रवीत् ॥ भक्षार्थंचेदिहानीता ममकान्तत्वयाधुना ॥ आनयिष्याम्यहंविप्रं हत्वाब्राह्मणमागतं ॥ शा-
लवृक्षेशयानंतु प्रयाणन्तुसुलक्षणं ॥ रूपंमनोहरंकृत्वा तदाषोडशवार्षिकं ॥ अब्रवीत्तत्प्रहृष्टासा वाक्यंरक्षःसुलोचना ॥ ततःसरा-
क्षसःप्राह गच्छगच्छेतिभाविनि ॥ शृक्कणीस्फुरितात्यर्थं तस्यभक्षणकाम्यया ॥ सानिर्गत्यगुहायास्तु अपश्यद्द्विजसत्तमं ॥ भर्ता-
रंमेवरारोहा स्वपतिंकर्तुमागता ॥ तांदृष्ट्वाराक्षसींदेवी भर्तामेभवदाकुलः ॥ अब्रवीत्प्रश्रयोपेता भर्तारंतत्रसंस्थितं ॥ राक्षस्युवाच ॥
कस्माद्देशात्समायातः किमर्थमिहतिष्ठसि ॥ पृच्छामित्वांसकामाहं राक्षसीकृच्छ्यातुरा ॥ निराकृतासुभर्त्राहं त्वांपतिंकर्तुमागता ॥
तच्छ्रुत्वावचनन्देवि भर्तामेभयसंयुतः ॥ रक्षोमानुषसंयोगः कथंराक्षसिसंभवेत् ॥ मानुषाहिस्मृताभक्षा राक्षसानांनसंशयः ॥ सा-
पतिंमेपुनःप्राह संमितंमधुराक्षरं ॥ असंभाव्यमपीहात्र संभवेद्द्विजसत्तम ॥ पुराणेश्रूयतेह्येतत् भविष्येभारतेप्रभो ॥ हिडिंबारा-
क्षसीभार्या भवित्रीखलुमारुतेः ॥ तस्यांश्चापिमहावीर्यो भविष्यतिघटोत्कचः ॥ अबध्यःसर्वशत्रूणां शक्त्यामृत्युमवाप्स्यति ॥ या-
चेयंतिष्ठतेशक्तिर्वासवीशालसंस्थिता ॥ पुरन्दरात्समानीता मद्भर्तादस्युकर्मणा ॥ शक्रेगतेमर्त्यलोकं वैरोचनजिघांसया ॥ से-
यमेकमहत्वातु नगच्छन्तिपुरन्दरं ॥ यस्येयंक्षिप्यतेशक्तिः सोमरोपिविनश्यति ॥ सोयमारुह्यशालाग्रं शक्तिमादायपाणिना ॥
तवदास्यामिमद्रंते भर्तुर्निधनकांक्षया ॥ यदित्वमनयाशक्त्या नहन्तासिनिशाचरं ॥ तदात्वांसतुदुर्मेधा भक्षयिष्यत्यसंशयं ॥ त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वशत्रुरयंक्षुद्रो हनिष्यतिनसंशयः ॥ सपत्नीसमयेनापि कृत्वादुर्बुद्धिनातदा ॥ ममाद्यदुःखंसुमहत् कृतंतेनदुरात्मना ॥ व्यापा-
॥ ४७ ॥ दितःपुनःसंगमावयोर्हिभविष्यति ॥ यद्यन्यथावदेयंचेत् त्वामहंद्विजसत्तम ॥ जन्मार्जितस्यपुण्यस्य नभवामिचभाविनी ॥ या-
गतिर्ब्रह्महत्यायां प्राप्यतेकुत्सितानरैः ॥ गच्छेयंतामहंब्रह्मन् यद्येतदनृतंवदे ॥ मद्यपानेछियत्पापं ब्राह्मणस्यदुरात्मनः ॥ विहितो-
वेदशास्त्रज्ञै तत्पापमहमाप्नुयां ॥ पुराणेयानिपुण्यानि प्रोक्तानिमुनिपुंगवैः ॥ अन्यथाऽन्यतेयेन तत्पापंममनिश्चितं ॥ गुरुदा-
रप्रसक्तस्य जंतोःपापंयदुच्यते ॥ तेनपापेनलिप्येयं यद्यहंदुष्टमाचरेत् ॥ वंधुन्यासापहरणे मेदिनीहरणेतथा ॥ आत्मनोहत्यया-
याहि विहितामुनिभिर्विभो ॥ गच्छेयंतांगतिंविप्र यद्येतदनृतंवदे ॥ पञ्चम्यांगोचरवरे यत्पापंविहितंस्त्रियां ॥ तरुच्छेदेनवम्यांतु
पर्वाणिस्त्रीसमागमे ॥ तेनपापेनलिप्येयं यद्येतदनृतंवदे ॥ यदुच्छिष्टेघृतंदद्यादंगुल्याकर्षयोर्द्विजान् ॥ पुण्येह्निमैथुनंकर्त्ता तत्पा-
पंभवितामम ॥ चरंतीविधवायातु द्विकालंभोजनंविभो ॥ पात्रेकांस्यस्यसंज्ञेतु सतांबूलसतल्पगं ॥ वैश्वदेवमकुर्वाणो गृहस्थो-
भोजनंचरेत् ॥ निर्वाययभिक्षांभिक्षुभ्यो ह्यसत्तर्प्यपितॄनपि ॥ तेनपापेनालिप्येयं यद्येतदनृतंवदे ॥ तैलेनसंक्रमेस्नाति तीर्थंगोभि-
र्व्रजेत्तुयः ॥ पावकेप्युदमानेषु समुद्धृत्यमृदंनरः ॥ करोत्याप्लवनंयस्तु योन्यथावचनंवदेत् ॥ कुशकाशेशिकाभिस्तु क्रियतेचत्व-
चंविना ॥ दंतकाष्ठंकरोत्येवं तस्ययद्विहितंत्वघं ॥ तस्याहंभागिनीब्रह्मन् यदिमिथ्यावदामिते ॥ संन्यस्यगांनिजगृहे अदत्वानु- ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णवारिच ॥ तस्यपद्धिहितंपापं तन्मह्यंभवताध्रुवं ॥ देवार्चामासुरेकाष्ठे उपवेशंकेरातियः ॥ श्राद्धंवाद्विजशार्दूल तत्पापंभविता-
मम ॥ गोहीनांमाहिषींयस्तु गृहेधारयतेद्विजः ॥ तस्यपापेनलिप्येयं यद्येतदनृतंवदे ॥ छिन्नासंवीतवस्त्रेण देवार्च्चाचकरोतियः ॥
यंवृतोधौतदग्धेन पावकेनविशेषतः ॥ तेनपापेनलिप्येयं यद्येतदनृतंवदे ॥ स्वपचारामजातैस्तु कुसुमैरर्च्चयेत्सुरान् ॥ तेनपापेन
लिप्येयं यद्येतदनृतंवदे ॥ बधूविलोकनेपापं परदारविलोकने ॥ सस्पृहंपरदाराणां यत्पापमवलोकने ॥ तनपापेनलिप्येयं यद्ये-
तदनृतंवदे ॥ सत्कथायांप्रवृत्तायां विघ्नमाचरतांनृणां॥ तत्पापंतुभवेत्सद्यो यदेतदनृतंवदे ॥ विधवाकंचुकोपेता बधूटीकंचुकंवि-
ना ॥ उभयोःपातकंयच्च तन्मह्यंभविताध्रुवं ॥ हीनयालिंगवेषेण अलिंगीब्राह्मणस्तथा ॥ उभयोपातकंमह्यं यद्येतदनृतंवदे ॥
कूटसाक्षिषुयत्पापं यत्पापंहयविक्रये ॥ स्वजनैर्विक्रयेचैव तत्पापंभवितामम ॥ एवमादीनिपापानि अनुक्तान्यपियानिच ॥ तै-
स्तैःपापैरहंलिप्ये यद्येतदनृतंवदे ॥ एवंसंवोधितंदेवि भर्त्तामेपापयातया ॥ तथेतिनिश्चयंचक्रे भावितार्थेनमोहितः ॥ निर्द्रव्यो
ऽप्यसनेचैव भर्तामेचारुहासिनि ॥ मद्वाक्यकलुषीचैव राक्षसींवाक्यमब्रवीत् ॥ शीघ्रमानयतांशक्तिं करोमिवचनन्तव ॥ दातव्यं
मत्त्येयासर्वं राक्षसापसदेहते ॥ द्रव्याशयाप्रविष्टोस्मि सागरंतिमिसंकुलं ॥ सैवमुक्तातदाभर्त्ता तथेत्युक्तावरानने ॥ तत्क्षणाद्राक्ष-
सीगृह्य शक्तिंवृक्षाग्रसंस्थितं ॥ ददौसागृह्यविप्राय विमुंचतिमहार्च्चिषं ॥ एतस्मिन्नंतरेरक्षस्तदाकामेनमोहितः ॥ भोक्तुकामःकु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मारींता सामितावाक्यमब्रवीत् ॥ कुमारीसेवनेरक्षो महत्पापंविधीयते ॥ छलेनाहंहृतासुप्ता त्वयाहंपितृमन्दिरात् ॥ नदोषोभवतो
ह्यस्ति ममभाग्यामिहेदृशं ॥ गुहामध्यगतीरक्षः कोमेत्राताभवेदिह ॥ पूर्वदत्तोभवेद्भर्ता पूर्वदत्ताप्रियाभवेत ॥ पूर्वदत्ताभवेद्विद्या-
द्विजस्थानंकृयागृहं ॥ शय्यायाश्चतथादानं वृथाभवतिनिर्ऋतः ॥ प्रतिकूलेविधौपुंसामाहवैनारदोमुनिः ॥ विधिनानीयमानस्तु
जनःसर्वत्रगच्छति ॥ वृथाचेष्टाहिरक्षेन्द्र बन्ध्यायामैथुनंयथा ॥ अवश्यंभविताभर्त्ता त्वमेवरजनीचर ॥ विधानविहितेमार्गे किं-
करिष्यंतिपण्डिताः ॥ तस्माद्दानपवित्रात्वं शालबृक्षाश्रितास्त्विह ॥ अयमग्निर्ज्वलन्नेतद्दर्भान्विप्रंसमानय ॥ दिनादर्भैर्विनातो-
यैर्विनावैपावकेनच ॥ ब्राह्मणस्यतुवाक्येन विवाहसफलोभवेत् ॥ नहतोयदिविप्रासौ भार्यायातवराक्षस ॥ निर्बृत्तेहोमकरणे तं
रक्षययथासुखं ॥ एवमुक्तेतुवचने निर्ज्जगामसराक्षसः ॥ सत्वरोत्हृदयाविष्टो निर्ज्जगामगुहामुखात् ॥ चिन्तयामाससतदा नहि
सत्यद्यमेप्रिया ॥ तंब्राह्मणंमहाभागं ततोमेवांछितंभवेत ॥ एवंविलोक्यसहसा निर्ययौसमहाबलः ॥ तस्यनिर्गच्छतोदेवि स्वकं
जातंक्षतंकिल ॥ सव्यंचप्रास्फुरंनेत्रं स्ववर्णस्खलितंतदा ॥ अनाहृत्यतुतंसर्वं निर्ज्जगामत्वरान्वितः ॥ शालबृक्षसमीपस्थामपस्य-
न्तनुमध्यमां ॥ विभ्रतींमानुषंरूपं तांभार्यासुमनोहरां ॥ घटयन्तीचसामर्थ्यं भर्तृभार्यानुगंतथा ॥ परित्यजेयंतंपापं राक्षसंक्रूरका-
रिणं ॥ मानुषीप्रमदाशक्तं मच्छरीगविदूषकं ॥ तच्छ्रुत्वादारुणंवाक्यं भार्ययासमुदाहृतं ॥ कोपामर्षविवृत्ताक्षस्तामधावतराक्षसः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसार्यवक्रंसमुदीर्यबाहुं हन्तुंतथातांसुमहाबलोसौ ॥ समभ्यधावत्पवनोयथैव समुच्चरद्वाक्यमनर्थयुक्तं ॥ १४० ॥ इतिश्री लघुनारदीय पुराणे रुक्मांगदचरिते काष्ठीलोपाख्यानमेकोनत्रिंशोऽध्यायः ॥ २६ ॥ छ छ छ छ छ छ

काष्ठीलोवाच ॥ राक्षसंधावमानन्तु कालान्तकयमोपमं ॥ राक्षसीप्राहभर्तारं साक्षुधाभयकंपिता ॥ क्षिपस्वह्यनलप्रख्यां शक्तिं वासववल्लभां ॥ येनायंपञ्चतांयाति दिग्अंबररिपुःप्रिय ॥ तस्यावाक्यात्पतिर्मह्यं पौरुषेस्त्रेऽव्यवस्थितः ॥ विमोचविपुलांशक्तिं रक्षोवक्षःस्थलंप्रति ॥ ज्वलन्तीज्वलनप्रख्या द्योतयन्तींदिशोदश ॥ शक्त्यानिहत्यभर्तारं द्विजहस्तप्रमुक्तया ॥ कृतकृत्यमिवात्मानं मेनेसारजनीचरी ॥ अथोवाचद्विजवरं भर्तारंहृष्टयागिरा ॥ एहिकान्तगुहांरम्यां प्रविशस्त्वयदृच्छया ॥ भुंक्ष्वभोगान्मयासार्द्धं येदेवायेचमानुषाः ॥ तथेतिकुर्वन्पुरुषः प्राहहृष्टवपुस्तदा ॥ गृहीत्वासाकरेकान्तं प्रविष्टाथगुहांशुभां ॥ अनवेक्षैवतद्भस्म भर्तृदेहसमुद्भवं ॥ कुचाभ्यांसापतिंदेवि सोन्नताभ्यामपीडयत् ॥ दर्शयामासतांतन्वी कुमारींशयनेस्थितां ॥ इमांपश्याशितापांगीं विंबोष्ठींकाञ्चनप्रभां ॥ विवाहार्थंसमानीतां वाराणस्याःद्विजोत्तम ॥ यस्याःसीमांनलंघंति सर्वपापान्यदोषतः ॥ दूषरंयत्परंबाहुः पुण्यपापक्षयंकरं ॥ यद्गृहंत्रिपुरारेस्तु पञ्चगव्यूतिसंख्यया ॥ शिवस्यविष्णोर्धातुश्च भास्करस्यतथैवच ॥ तस्मिन्मृताःपुनर्मातुर्जठरंनव्रजन्तिवै ॥ अप्रकाशंचमुनयो हर्म्यमार्गहरस्ययत ॥ अक्षीणकर्मवन्धास्तु यस्यांसिध्यन्तिमानवाः ॥ तत्रस्थेयंवरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोहा सुभगाचारुहासिनी ॥ कामिनीरक्षसातेन इहानीताद्विजोत्तम ॥ एनांत्वमद्यस्वगृहं पित्र्यंनयसुलोचन ॥ इमानितवरत्ना-
नि शयनान्यासनानिच ॥ तथाचाहंतवाधीना कुरुनाथयदिच्छसि ॥ त्वदर्थेराक्षसोघोरो मयात्रब्रह्मन्निसूदितः ॥ कुमारिकाकृते-
भर्त्ता योमयात्राह्मणर्षभ ॥ समयानिहतोविप्र दृष्ट्वारूपंतवोत्तमं ॥ तस्मान्ममोपरिविभो कुरुविश्वासमात्मना ॥ भजत्वंमांविशाला-
क्ष भक्षादीनांनसंशयः ॥ श्रुत्वैतद्वचनंभीरु भर्त्तामेचारुलोचने ॥ राक्षस्याःसान्त्वसंयुक्तं कुमारीसन्निधौतदा ॥ उवाचराक्षसीत-
त्र साशंकसतदावचः ॥ नीतिशास्त्रेषुसुभगे अविश्वासास्तुयोषितः ॥ स्वकंत्वयापतिंहिंसि साकथंमांनहिंससि ॥ मत्तोरूपाधि-
कंदृष्ट्वा मांचाप्येवंनिपातयेत ॥ सोहंसर्वान्महाभीरु विश्वस्तस्तेनसंशयः ॥ यदिष्टंतवसुश्रोणि तंकुरुष्वममाद्यवै ॥ अद्यवाश्वःप-
रश्वोवा भक्षयस्वनिसाचरि ॥ तवाधीनोस्मिसुभगे कुरुयत्तवरोचते ॥ एतदेवमयाकार्यं न्यायंचोपकृतेत्वया ॥ आत्मानंसर्वथा-
देयं नान्यथाहिकृतंभवेत ॥ मदर्थेनिहतोभर्त्ता त्वयानिःशंकयायतः ॥ ततोहंनान्तरंदद्मि तवभीरुशुभानने ॥ राक्षस्युवाच ॥ वि-
श्वस्तहननेब्रह्मन् ब्रह्महत्यागतिर्भवेत ॥ यद्यप्येवंराक्षसींमां क्रूरांपतिविघातिनीं ॥ मन्यसेनहितत्कर्म विश्वस्तंकाचघातयेत ॥ द-
ग्धाहंपतिनाविप्र इमामाहरतापुरा ॥ भार्यार्थंपापिनाब्रह्मन् तेनव्यापादितामया ॥ विश्वस्तोसियतस्त्वंहि ममसर्वेणचेतसा ॥
ततस्त्वंगोपयिष्येहं सर्वभावेनकामुक ॥ एषतेसमयःसत्यं पञ्चभूतापसाक्षिकः ॥ हृत्पद्मपुरुषस्येह सन्निधौव्याहृतंमया ॥ नकुरु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्वद्दिजश्रेष्ठ अन्यदासविदंक्वचित् ॥ स्थैर्यकार्यंहिमद्वाक्ये सर्वकृत्येषुमानद ॥ तच्छ्रुत्वावचनंदेवी राक्षसीपरिभाषितं ॥ प्रति-
वाक्येवचःसर्वं यदुक्तंहितयातदा ॥ ततःसाराक्षसीसर्वं संहृत्यचगुहाधनं ॥ करेणुरूपिणीभूत्वा पृष्ठेकृत्वापतिंमम ॥ तयासहवि-
शालाक्ष्या याहृताशिवमन्दिरात् ॥ काशीशतनयालोके प्रख्याताररनग्रन्थिका ॥ सुखयानाहियाभूत्वा उवाहपतिमंजसा ॥ तृती-
येनमुहुर्त्तेन संप्राप्ताशंकरालयं ॥ उवाचतांपुरींप्राप्य भर्त्तारमसितेक्षणा ॥ इयंपापमतांकान्त कुठारीसंप्रकीर्त्तिता ॥ तथेयंभव-
गेहस्य चित्रभानुःप्रकीर्तितः ॥ साभूमिःकाञ्चनस्यैषा कान्तप्राप्तवुरोदरं ॥ कर्मवीजोषराज्येषा सर्वेषांसुखदायिनी ॥ आद्यंहिवै-
ष्णवंस्थानं पुराणेपरिपठ्यते ॥ नावैष्णवेभवेन्मुक्तिः सर्वेणाध्युषितेपिच ॥ हत्याविमुक्तोदेवेशो यदासित्रिपुरान्तकः ॥ क्षत्रप्रवि-
ष्टमात्रोपि वैष्णवेपापनाशने ॥ तदाहरेणदेवेशः प्रार्थितोदैत्यसूदनः ॥ सीमायांतिष्ठतोदेव वहिर्हत्यास्थितामम ॥ वस्तुमि-
च्छाम्यहंक्षेत्रे तवचक्रगदाधर ॥ सत्वयामेजगन्नाथ देहिक्षेत्रेसदेवमे ॥ ममनिर्गमनेहत्या पुनरेवप्रवर्त्तते ॥ त्वत्क्षेत्रपावितोह्यद्य
पूजांयास्येजगत्त्रये ॥ तथेतिप्रददौदेवः क्षीरसागरजाप्रियः ॥ ततःप्रभृतिविप्रेन्द्र क्षेत्रंशैवन्निगद्यते ॥ आद्यंहिकेशवक्षेत्रं पुराणे-
कवयोविदुः ॥ तत्रधर्मादयोदेवाः पश्यन्तेतांविहायसा ॥ सूर्यायुतसमप्रख्यां दिगंबरनिषेवितां ॥ विघ्नानिशूलिनाकान्त हृता-
न्यन्यानिषेवने ॥ येर्विघ्नैरावृतामर्त्या यान्तिवैमन्दिरंस्वकं ॥ वहुपुण्यभृतःसन्ति वसन्त्यस्यांद्विजोत्तम ॥ तत्राशितैर्नरैःकान्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्थितिःकार्यापुरोत्तमे ॥ नात्रस्नानंप्रशंसन्ति नमौनंनसुरार्चनं ॥ नापिमानंद्विजश्रेष्ठ प्राणत्यागमृतेविभो ॥ मृत्युंप्राप्यतुकाश्यांवै
कृतकृत्योभवेन्नरः ॥ अविधेयेतुमनसि उपायोकोषमुक्तये ॥ सेयंपुरीमयाप्राप्ता बहुप्राकारतोरणा ॥ भोगिनामपिमोक्षाय किंपुन-
र्व्रतचारिणां ॥ सेयंपुरीपापहरा नाम्नावाराणसीविभो ॥ रत्नावल्याःपिताविप्र काशिराजःप्रतापवान् ॥ अधिपोत्रमहाबाहुर्धर्मज्ञः
प्रियदर्शनः ॥ समर्पयेमांत्ववालां काशीशस्यमहात्मनः ॥ विपोथिताहियापूर्वं तेनदुष्टेनरक्षशा ॥ आत्मनःसुरतार्थाय कुमारीनि-
र्दयाहृता ॥ एषप्रभावोभिहितः शिवक्षेत्रस्यसत्तम ॥ नवधूतीह्हकर्माणि योवसेदत्रमानवः ॥ शुभाशुभप्रभूतानि ज्ञानतोज्ञानतो
पिवा ॥ एषापुरीकर्मविनाशनाय कृष्णेनसर्वेणविनिर्मिताभूत् ॥ यस्यांमृतावन्धुवहिःकृतावा नतेपुनर्यान्तिभवंसपापा ॥ ५७ ॥
इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते काष्ठीलोपाख्याने काशीमाहात्म्यंनाम त्रिंशोध्यायः ॥ ३० ॥ ७ ७ ७
काष्ठीलोवाच ॥ भर्त्तामेतद्वचःश्रूत्वा राक्षस्याधर्मसंहितं ॥ अवतीर्यतयासार्द्धं रत्नावल्याशुभानने ॥ अवतीर्णेचमेकान्ते वभूव
प्रमदावधूः ॥ क्षपाचरीसुरूपातु पीनोन्नतपयोधरा ॥ साकुमारीपुनर्दृष्ट्वा स्वपितुस्तत्पुरंशुभं ॥ वभूवानन्दितातत्र रात्रौप्राप्ताशु-
भान्विता ॥ अथाजग्मूनिशीथेतु रक्षपालामहावलाः ॥ प्रस्खलंतोथधावंतो वन्धतश्चतथापरे ॥ कोलाहलंप्रकुर्वंतो भर्त्तारंप्रतिमे
नघे ॥ तांदृष्ट्वासहसाप्राप्ता कुमारीसाशुभानना ॥ काशिराजस्यदुहिता संप्राप्तामत्तगामिनि ॥ रात्रीचरानुवाचेदं अहंनृपसुते-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिच ॥ निचयैस्तंवृतंशूरैर्दृष्ट्वामुख्यमुवाचसा ॥ ब्रूहितंसत्वरंगत्वा पितरंमेजनाधिपं ॥ रत्नावलीतवसुता याहृतांतत्पुरात्पुरा ॥ र-
क्षसादुष्टभावेन संप्राप्तासाद्विजानृप ॥ अदूषिताजीवमाना समाश्वासिहिमाशुच ॥ संमुखंयाहितस्यास्त्वं मानसंवर्द्धनंकुरु ॥ ब्रा-
ह्मणस्यमहाभाग अर्घपात्रपुरस्कृतः ॥ देवानतकृतौमूर्द्धि चरणौशत्रुभिर्नृप ॥ नावलीद्वंद्वविर्ध्वांक्षै शाशनेनगतास्रजः ॥ स्वाभि-
र्न्निपीतंनृपतेः पञ्चगव्यंतवेप्सितं ॥ अविप्लुतांहिसंप्राप्ता गंगांभइवनिर्मलां ॥ तवप्रसादाद्राजेन्द्र जनन्याःशुद्धिकारिणी ॥ त-
त्क्षणात्सवचःश्रूत्वा रक्षपालस्त्वरान्वितः ॥ सुबाहुरितिविख्यातः प्रविवेशनृपक्षयं ॥ सर्वतःश्रावयामास बाक्यंवाक्यविशारदः ॥
तदद्भुतमंश्रूत्वा निशापालस्यभाषितं ॥ सामात्यसकलत्रश्च सपुरोधाययौनृपः ॥ सतुगत्वापुरद्वारं गंगातीरेव्यवस्थितां ॥ अप
श्यत्सद्दुहितरं द्विजवर्यसमीपतः ॥ सहजेनैववेषेण भूषितांभूषणप्रियां ॥ अम्लानकुसुमितान्दवीं तप्तकाञ्चनसुप्रभां ॥ रोरूयमा-
नापितरं साचैवपरिषस्वजे ॥ चिरंरुदित्वापितरं ववन्देचरणौपितुः ॥ शिरसाचारुसर्वांगी द्विरेफसदृशेनहि ॥ कामायुधनिगू-
ढेन मृदुनाकनकप्रभे ॥ सानमस्कृत्यपितरं इदंवचनमब्रवीत् ॥ सुप्ताहंमन्दिरेतात सखीभिःपरिवारिता ॥ कृत्वाप्रान्तेशिरस्तात
अधोतचरणातथा ॥ गच्छवंतीनृपंयोगं निजार्थेरक्षसाहृता ॥ नीताश्मालयंतेन स्वक्षमाधरमध्यगं ॥ मामुद्वहतुमिच्छावै चक्रेहृ-
दयपीडितः ॥ नह्निमांप्राप्तवान्राजन्शूद्रावेदश्रुतीमिव ॥ तस्याभार्यात्वियंसुश्रूर्यातिष्ठतितवाग्रतः ॥ विश्रुतीमाडुषंरूपं राक्षसीरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षसाप्रिया ॥ अनयाबुद्धियोगेन घातितोसौमहावलः ॥ शक्त्याकुलिशहस्तस्य रौद्रयानृपपुंगव ॥ तत्रैवब्राह्मणःपूर्वं समायातो
भवन्किल ॥ शालवृक्षसमाश्रित्य स्वपन्तस्थौमहामतिः ॥ इयंचनिकृतातेन दुष्टभावेनरक्षसा ॥ सापत्न्यकोतुनिर्विण्णा प्रेषिता-
तेनचांतिकं ॥ ब्राह्मणानयनेभूप ततोपश्यतवैद्विजं ॥ रूपयौवनसंपन्नमभवद्धृक्षयान्विता ॥ पतिमेनंद्विजंकृत्वा स्वपतिंचनि-
हत्यवै ॥ भूत्वाकरेणूराजेन्द्र कृत्वामांपृष्ठतःशुभा ॥ सरलासद्विजाप्राप्ता तवभूपालवैपुरीं ॥ अनयाशक्षितातस्माद्राक्षस्याराक्षसा-
धमात् ॥ तामिमांपूजयस्वेह सत्कारेणमहीपते ॥ ब्राह्मणंचमहाभागं सत्कुरुस्वममाध्यवे ॥ अस्यामतेनमान्देहि विप्रायास्मैम-
हामते ॥ एषमेसम्मतोभर्त्ता भविष्यतिनसंशयः ॥ तथाचश्रूयतेलोके पुराणेसुमहामते ॥ नान्यस्यविहितंरूप नान्योभोक्तुमि-
हार्हसि ॥ यद्यस्यविहितंलोके तस्यचोपनयेत्सदा ॥ साभिलापेतनाचित्तमेतंप्रतिजनाधिप ॥ धर्मतस्तुपतिर्ग्राह्यो भवेद्वैराजस-
त्तम ॥ नान्यंकरोमिभर्त्तारं शास्त्रागमनिदर्शनात् ॥ इमांप्रसादयित्वात्वां खद्योतकक्षयकारिणीं ॥ देहिमांनृपतिश्रेष्ठ ब्राह्मणायम-
हात्मने ॥ सुरूपोयंगुणाशायमुत्पन्नश्चमहाकुले ॥ तस्माद्विशंकांकुरुमां राजेन्द्रसुमहामते ॥ तद्वाक्यंनृपतिःश्रुत्वा दुहितुर्द्धर्मवि-
त्तदा ॥ राक्षसीपूजयामास अक्षयावनतस्तदा ॥ एषासुतामेसुभगा त्वामेवशरणंगता ॥ यदर्थेनिहतःशत्रु स्त्वयापूर्वतरःकिल ॥
कामवाणार्त्तयाभीरु कृतमेताद्विगर्हितम् ॥ सेयमिच्छतिभर्त्तारं योयंविप्रस्त्वयाततः ॥ शरणंतेप्रपन्नास्मि त्राहिमांत्वांवरानने ॥ म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यामप्रणाममावाभ्यां सत्कृतासिनिशाचरि ॥ अनुवेदयभर्त्तारं भूसुरंशुभरूपिणं ॥ त्वद्वाक्याद्भवतिप्रेरव्या सुतामेब्राह्मणस्यहि ॥ सापत्न्यभावंत्यक्त्वात्वं मत्सुतांपरिपालय ॥ ममचैवसुतायाश्च देशस्यस्वजनस्यच ॥ ईश्वरीत्वंमहाभागे कुरुवाक्यंममानघे ॥ तववाक्येस्थिताह्येषा स्थास्यतेतनयामम ॥ एतच्छ्रुत्वातुवचनं काशीशस्यनिशाचरी ॥ अनुजज्ञेतदाविप्रं नृपंसद्भावसंयुतं ॥ यस्मात्त्वंप्रणतोराजन् सद्भावेनगतत्रये ॥ तस्मादेषासुताभार्या भवत्वस्यद्विजन्मनः ॥ अहंचभवतापूज्या कृत्वार्चांदेवमन्दिरं ॥ सर्वेणनगरेणाहं पूजनीयामहीपते ॥ सर्वदेहेनचतथा गवाज्ञाप्यातथानघ ॥ सप्ताहमुत्सवंकार्यमष्टम्यादींचतुर्दशीं ॥ नटनर्त्तकसंयुक्तो गीतवाद्यसमन्वितः ॥ मैरेयमांससहितो बलिपूजामुपस्करः ॥ एवंप्रकुर्वतस्तुभ्यं सर्वक्षेमंभविष्यति ॥ तथेतिनृपतिःप्राह सुताहेतोर्वरानने ॥ प्रतिपन्नेतुवचने राक्षसीहृष्टमानसा ॥ तदाहब्राह्मणंप्रेम्णा इमामुद्वाहयप्रभो ॥ राजपुत्रींद्विजश्रेष्ठ गृह्योक्तविधिनाशुभां ॥ त्यक्त्वेर्ष्यांहंद्विजश्रेष्ठ स्वसेयंमेवरानने ॥ राक्षस्यावचनेनासौ तांतदानृपकन्यकां ॥ उद्वाहयामासतदा भर्त्तामेसमलंकृतां ॥ गार्ह्येणविधिनासुभ्रु वहुवित्तसमन्वितां ॥ उद्वाहयित्वाकन्यांतु नृपेशतनयातदा ॥ आजगामाथविप्रेन्द्रः स्वपुरं स्वमहोदरं ॥ वेगेनासावूह्यमानो राक्षस्यावायुवेगया ॥ सरत्ननिचयोपेतः क्षणेनवरवर्णिनि ॥ गतेपुरंस्वकंविप्रे काशिराजःप्रतापवान् ॥ प्रस्थापयामाससुतां परिवारेणसंयुतां ॥ दासीदासैश्चयानैश्च गोमहिष्यादिभिस्तथा ॥ वसनाभूषणैश्चैव समेतांचा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुहासिनीं ॥ तामागतांनिरीक्षैव मुमुदेब्राह्मणर्षभः ॥ रेमेसचतयापत्न्या राजपुत्र्यासुरूपया ॥ राक्षस्यावयसासार्द्धं सुकृतीनंदनेयथा ॥ ततोमयाश्रुतादेवि भर्त्तावैभूतिराहृता ॥ धनेशस्याक्षयाद्देवी द्रव्यसंपत्तथैवसा ॥ तमागतमहंश्रुत्वा भार्याद्वयसमन्वितं ॥ दुःखेनमहताविष्टा चिन्तयामिसुचेष्टितं ॥ ततोहंवन्धुवर्गेण सखीवर्गेणनिन्दिता ॥ रूक्ष्यैर्वाक्यैःसुवहुशो मर्मच्छेदकरैस्तथा ॥ कथंद्रक्ष्यसिभर्त्तारं धनलुब्धेश्रियान्वितं ॥ यत्वयाभर्त्सितःपूर्वंयाचान्वित्तंसुदीनवत ॥ अवज्ञायचयद्दुष्टे परित्यज्यइहागता ॥ चञ्चलानीहवित्तानि पैतृकानीहयोषितां ॥ कांतेनोपार्जितानीह स्थिराण्येवभवंतिहि ॥ कथंयास्यसिद्धर्वुद्धे पुनस्तद्भर्तृमंदिरं ॥ कथंवदेथाःकठिते वचनात्प्रमदारितं ॥ भविष्यतिकथंकीदृक् तस्यसंभाषणात्तव ॥ अङ्गश्लेषंकथंभीरु करिष्यासिवदस्वनः ॥ रूक्षवाक्यकुठारैस्तु घातितस्यमहात्मनः ॥ प्रवेशोहिगृहेतस्य दुष्करंप्रतिभातिनः ॥ नभर्त्रासहसंवास स्तवभीरुकदाचन ॥ भविष्यतिदुराचारे सुखदंचकदाचन ॥ दाक्षिण्यालोकवादाच्च यदिहित्वांनयिष्यति ॥ स्नेहेनरहितःकान्तस्तथाप्यसुखसेवते ॥ निस्नेहसंगमोलोके पशुनामिवकिंसुखं ॥ नहीदृशंदुःखतरं यादृशंदूनचित्तयोः ॥ दंपत्याःसंगमंवाले विलम्वकरणंमहत् ॥ एवं वहुविधावाचः शृण्वतीस्वजनेरिता ॥ अधोमुखीचपूर्णाक्षी पृथिवीमवलोकयन् ॥ चिंतयालंकृतितदा सर्वलोपेननश्यति ॥ नदत्तंवलयंत्वेकं येनतुष्टिर्व्रजेत्पतिः ॥ नचापिनूपुरंदत्तं नचापिकटिसूत्रकं ॥ वसुमत्यामयातस्य नदत्तैकावराटिका ॥ धनजीवित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योऽस्वामी भर्त्तालोकेषुगीयते ॥ अपह्नवंहितत्कृत्वा कामेवस्थाभविष्यति ॥ कथंयास्यामितद्वेश्म किंवदिष्यामितस्यहि ॥ यो-
मयाहिपुरात्यक्तः शिरोभ्रलोष्टकोयथा ॥ एवंहिचिंतयेयावद्धृदयेनवरानने ॥ संवृतावन्धुवर्गेण तावद्दोलसमागता ॥ छादितार-
क्तवस्त्रैश्चह्युपपन्नासुकोमलैः ॥ पीवरैपुरुषैश्चापि भज्यमानात्वरानने ॥ वेत्रजर्ज्जरहस्तैश्च वृद्धैःपुंभिःसमावृता ॥ छत्रेणशशिवर्णेन
धृयमाणेनभास्वुरा ॥ अथागत्यमहाभागे भर्त्रामेप्रेषितस्तदा ॥ तसंप्राप्यतदासर्वे पुरुषावाक्यकोविदाः ॥ ऊचुःसंहृष्टमनसो दि-
ष्ट्यादिष्ट्येतिचासकृत् ॥ सवित्तःसकलत्रश्च भर्त्ताप्राप्तस्तवानघे ॥ गिरिपृष्ठालयात्सुभ्रु धनमानीतवान्बहु ॥ प्रविष्टस्वगृहंभद्रे प्रे-
षितावयमत्राहि ॥ त्वामानेतुंवरारोहे संस्थितापितृवेश्मनि ॥ भोजनंत्वमकृत्वावै भर्त्तारंपश्यभाविनि ॥ त्वामेवस्मरतेनित्यं का-
न्तस्तेचारुहासिनि ॥ तेषांतद्वचनंश्रुत्वा भर्तुश्चापिकृतज्ञतां ॥ व्रीडिताहंतदादेवि भर्तुःसंवीक्ष्यचेष्टितं ॥ नोत्तरंदत्तवत्यस्मि किंचि-
न्मौनसमन्विता ॥ ततोहंवन्धुवर्गेण भूयोभूयःप्रवोधिता ॥ आहूतायातुवैभर्त्रा क्षीनयातित्वरान्विता ॥ साध्वांक्षीजायतेपुत्रि
दशजन्मानिपञ्चच ॥ एवमुक्तातुमांसुभ्रु वन्धुवर्गस्त्वरान्वितः ॥ दोलामारोपयमास गम्यतामविलंविताः ॥ ततोहिवन्धुवाक्येन
तांदोलांमन्दगामिनि ॥ आरुह्यगमनंतत्र यत्रातिष्ठतिमेपतिः ॥ अवतीर्यगृहंयावत् प्रविशामिशुचिस्मिते ॥ अपश्यंहिगृहंतस्य
सर्वतःकाञ्चनावृतं ॥ आशनंशयनंभाण्डं यत्किंचिद्वेश्ममध्यतः ॥ तत्सर्वंकाञ्चनीभूतं सूर्यतेजोपबृंहितं ॥ ततःसाराक्षसीदेवि सा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चापिनृपनन्दिनी ॥ प्रणम्यमांस्थितादेवि उभेभक्तिसमन्विते ॥ ततस्ताभ्यामहंप्रेम्णा यथाहमभिपूजिता ॥ स्नानासुभक्तमुदि-
ता भर्त्रास्नेहेनवीक्षिता ॥ ततोऽस्तसमयेभर्त्ता समाहूयेदमब्रवीत ॥ गाढमालिंग्यसस्नेहात पर्यंकेसंन्यवेशयत् ॥ प्रवेश्यमांनतोभीरु
भर्त्तामेशुभदर्शनः ॥ विभावरीचरींप्राहतांचराजेन्द्रनान्दिनीं ॥ पादसंवाहनंत्वस्याःकर्त्तव्यंसर्वदैवहि ॥ ममेष्टेयंसुचार्वंगीज्येष्ठाभार्या
सुशोभना ॥ मुहूर्त्तंवचनात्ताभ्यां गृहीतौचरणौमम ॥ ततःप्रेष्यान्समाहूय भर्त्तामेचारुलोचने ॥ अब्रवीत्सतदाहृष्टः सर्वमानीयतां
धनं ॥ यत्किञ्चित्पृथिवीलब्धं मयाप्राप्तंमहद्धनं ॥ नृपेणापिचयद्दत्तं विवाहेममकिंकराः ॥ आनीयतांचतत्सर्वं शीघ्रमेवमहाबलाः ॥
इयंहिस्वामिनीप्राप्ता वित्तस्यममचैवहि ॥ तद्वाक्यात्सत्वरंप्रेष्यैः समानीतंधनंशुभे ॥ तत्सर्वंतेनमेदेवि प्रदत्तंहिसुलोचने ॥ रत्नैर्व-
स्त्रैश्चमांपूज्य शान्तयित्वापुनःपुनः ॥ उभाभ्यांसतदासुभ्रु समक्षंपरिषस्वजे ॥ तदद्भुततमंदृष्ट्वा सन्मानंचारुहासिनि ॥ वस्त्रालं-
कारदानंच व्याकुलाहंतदाभवत् ॥ तेनातिमानेनमम गताःप्राणावरानने ॥ भर्त्राचालिंगिताभद्रे मधुरंजल्पतातदा ॥ उल्लापितो
वहुविधं हृदयेन्यस्यमच्छिरः ॥ मृताहंचपलापांगि यमस्यसदनंगता ॥ ततोऽहंयमनिर्दिष्टां प्राप्तानरकयातनां ॥ तामतीत्यसु-
दुःखार्त्ता काष्ठीलात्वंभवाशुभे ॥ यास्याभिपुनरेवाहं तिर्यग्योनिंसहस्रशः ॥ इमामवस्थामद्यापि ययामेनावमन्यते ॥ नारीयाति
महाभागे सत्यमेतत्तवोदितं ॥ याभर्तुर्गोपयेद्वित्तं जीवितंवाशुभानने ॥ एवंज्ञात्वाक्षरक्षेत् धनंजीवितमेवच ॥ नानाप्रकारगन्नर- ॥ ९३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कान्सुघोरान् प्रयातिनारीसुभगेसुरूपो ॥ यारक्षतेवित्तमथात्मजीवितं भर्तुर्महापापतरान्नृणांसा ॥ १०७ ॥ इतिश्री लघुनारदीय पुराणे रुक्माङ्गदचरिते काष्ठीलोपाख्याने एकत्रिंशोध्यायः ॥ ३१ ॥ ७ ७ ७ ७ ७ ७ ७ ७

सन्ध्यावल्युवाच ॥ जातोमेविस्मयोत्यर्थं काष्ठीलेवचनात्तव ॥ कथंदृष्टामयाभद्रे यास्यसेकुत्सितांगतिम् ॥ कर्मणाकेनमुक्तिस्ते काष्ठीलेवदमाचिरम् ॥ दयामेवर्ततेत्यर्थं त्वांदृष्ट्वादुःखितामिह ॥ मांसपिण्डोपमामद्य नवनीतनिभांतथा ॥ काष्ठीलोवाच ॥ दानंपृथिव्यायदिमे परिकल्पयसेशुभे ॥ तथापिनहिमेशुद्धिर्विनाविष्णोस्तुवासरात् ॥ संप्राप्तेमाघमासेतु तपस्विजनवल्लभे ॥ यस्मिन्क्रोशन्तिपापानि यावद्गच्छतिभास्करे ॥ पुरातिसर्वपापानि त्रिविधानिनसंशयः ॥ ब्रह्महत्यादिकानस्युर्माघस्नानकृतादिह ॥ दुर्लभोमाघमासस्तु बहुपुण्यप्रदस्तथा ॥ देवैस्तेजःपरिक्षिप्तं माघमासेजलेसदा ॥ अतःपवित्रंतद्वारिह्यशेषाघौघनाशनं ॥ नेदृशी शंकरेमुक्तिर्गतिःप्राप्तासुखावहा ॥ यादृशीमाघमासेच प्राप्यतेनियमस्थितैः ॥ सरिन्निर्झरतोयेषु शस्तंस्नानंसुलोचने । वापीकूप तडागेषु मध्यमंसमुदाहृतं ॥ गृहस्नानंमाघमासे कार्यंश्रेयोर्थिनाशुभे ॥ प्रातस्नानंसुशीतेन शस्तंकल्मषनाशनं ॥ नसौख्याद्भवतेपुण्यं पुण्यंक्लेशात्प्रवर्त्तते ॥ नवह्निसेवयेत्प्रातः श्रेयोर्थीवरवर्णिनि ॥ मोहार्थंसेवयेद्वह्निं नसुखार्थंकदाचन ॥ यावत्प्रभाबरारोहे तावत्सूर्योदयःस्मृतः ॥ अभ्रेणाच्छादितःसूर्यः कदाचिन्नहिदृश्यते ॥ नभवेन्नोदितोदेवि एवंप्रातर्विधीयते ॥ सक्तितामप्यभावेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवकुंभस्थितंजलं ॥ वायुनाताडितोरात्रौ गङ्गास्नानसमंविदुः ॥ माघस्नानेवरारोहे दुर्गतिर्नेहविद्यते ॥ माघस्नानंवरारोहे शस्तंवै
निम्नगाजलं ॥ वायुनाताडितंगात्रौ यत्रस्नानाद्विशोधयेत् ॥ अग्निप्रवेशादधिकं माघेस्नानंवरानने ॥ स्नातानांक्लेशमात्रंतु मृता-
नामक्षयंसुखं ॥ एतस्मात्कारणात्सुभ्रु माघस्नानंविशिष्यते ॥ अहन्यहनिदातव्यास्तिलाःशर्करयासह ॥ पावकेचैवहोतव्यास्तिल-
लाःसर्पिसमन्विताः ॥ माघावसानेसुभगे यत्रसंभोजयेद्द्विजान् ॥ भोजयेच्चपलापांगि व्रतस्यपरिपूर्त्तये ॥ स्वयंमेप्रीयतांदेवो
विष्णुमूर्त्तिर्निरञ्जनः ॥ दंपत्योर्वाससीशुक्ले सप्तधान्यमथापिवा ॥ त्रिंशच्चमोदकादेया कृतास्तिलमयाःशुभे ॥ भागमेकंशर्कराया-
स्तिलभागत्रयंतथा ॥ नागरंवेत्रचैलश्च प्रक्षिपेत्तत्रभाविनि ॥ मरीचिसंमितांकृत्वा ब्राह्मणेभ्यःप्रदापयेत् ॥ अभ्यंगंवर्जयित्वातु
माघंनयतियोनरः ॥ स्नानंकरोतिसुभगे प्रातरेवसमाहितः ॥ तस्यैषाविधिरुद्दिष्टश्चाघ्यःपापभयापहः ॥ ब्राह्मणप्रार्थनेमंत्रद्वयंदे-
विनिगद्यते ॥ सर्वपापप्रशमनं श्रद्दधानस्यभाविनि ॥ सर्वतःप्रसवस्येह परंधामजलेमम ॥ त्वत्तेजसापरिभ्रष्टं पापंयातुसहस्र-
धा ॥ दिवाकरजगन्नाथ प्रभाकरनमोस्तुते ॥ परिपूर्णंकुरुष्वेदं माघस्नानंममाच्युत ॥ एवंस्नात्वानरोयाति भित्वाविंबंरवेःशुभं ॥
मोक्षमार्गेवरारोहे माघस्नानात्प्रकीर्त्तितः ॥ एवंविधोमाघमासस्तपस्विजनवल्लभः ॥ तस्यपक्षेतुशुक्लेतु भवत्येकादशीयदा ॥
सूर्यर्क्षेक्षणसंयुक्ता महापातकनाशिनी ॥ विनापिऋक्षसंयोगादुपोष्याकृष्णतुष्टिदा ॥ भीमोनाममहावीर्यः कौरवाणांयशस्क-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रः ॥ औदरेण।मिना।चार्त्त ह्युपवासेह्यथाक्षमः ॥ सत्राप्येतांमहापुण्या मुपोर्ष्यातिमहाफलां ॥ ततःप्रभृतिभीमस्य नाम्नाख्याता-
भविष्यति ॥ एषापुण्यामहाभागे प्राणिनांपुण्यवर्द्धिनी ॥ विनिहन्तिमहत्पापं कुनृपोविषयंतथा ॥ कुपुत्रस्तुकुलंयद्वत् कु-
भार्याचपतिंयथा ॥ अधर्मश्चयथाधर्मं कुमंत्रिश्चयथानृपं ॥ कुज्ञानंचयथाज्ञानं शौचंचाशुचितायथा ॥ असद्वादश्चसद्वा-
दं सत्यंचैवानृतंयथा ॥ हिमंयथोष्णसमयेदनर्थश्चार्थसंचयं ॥ यथाप्रकीर्त्तनाद्दानं तपोवैविस्मयाद्यथा ॥ अशिक्षयाय-
थापुत्रो गावोदूरगतोयथा ॥ संहतेनयथाश्राद्धं यथावित्तमवर्द्धनात् ॥ यथासमीहनाज्ञानं फलानांवरवर्णिनि ॥ तथैवपापसं-
घानां प्रोक्तेयंद्वादशीशुभे ॥ ब्रह्महत्यासुरापानं स्तेयंगुर्वङ्गनागमः ॥ युगपत्सुपपन्नाहि हन्यात्ता।निचपुष्करं ॥ नचापिनैमिषं-
चैव क्षेत्रंकौरवसंज्ञितं ॥ प्रभाषंनगयादेवि नरेवानसरस्वती ॥ कालिन्दीयमुनाचैव देविकानकथंचन ॥ नचान्यत्तीर्थसंघातो
देवितुल्योहरेर्द्दिनात् ॥ नदानंनजपोहोमो नचान्यत्सुकृतंक्कचित् ॥ नालंशुभेपावनाय मुक्त्वैकंहरिवासरं ॥ सकृच्चोपोषणेनास्या
नश्यन्तेपापराशयः ॥ एकतःपृथिवीदानमेकतोहरिवासरः ॥ तन्नास्तित्रिषुलोकेषु सुकृतंकिंचनप्रिये ॥ यत्समंद्वादशीपुण्यं पुरा-
णकविभिःस्मृतं ॥ तस्यांबराहवपुषं कृत्वादेवंतुहाटकं ॥ घटोपरिनवेपात्रे कृत्वावैताम्रभाजने ॥ हृढवीजभृतेदेवि सितवस्त्रावगुण्ठि-
ते ॥ सहिरण्यप्रदीपाद्यै कृतपुष्पवतंसके ॥ बराहायनमःपादौ क्रोडायेतिनमःकटिं ॥ नाभिंगंभीरघोषाय उरःश्रीवत्सधारिणे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाहुसहस्रशिरसे ग्रीवांसर्वेश्वरायच ॥ मुखंसर्वात्मनेपूज्यं ललाटंसुभुवेनमः ॥ केशाःशतमखायेति पूज्यादेवस्यचक्रिणः ॥ वि-
धिनापूजयित्वातु कृत्वाजागरणंतथा ॥ श्रुत्वापुराणंदेवस्य महात्म्यंप्रतिपादकं ॥ प्रातर्विप्रायदत्वातु वैष्णवायकुटुंबिने ॥ तंकुं-
भंकोलसहितं सनैवेद्यपरिच्छदं ॥ पश्चात्तुपारणंकुर्यान्नातितृप्त्यासुहृद्वृतः ॥ एवंकृतेवरारोहे नभूयस्तेभवोभवेत् ॥ बहुजन्मार्जितं-
पापं ज्ञानाज्ञानसमुद्भवं ॥ हन्तिसर्वमशेषेण तमःसूर्योदयेयथा ॥ एवंविधामयादेवि वर्णिताद्वादशीशुभा ॥ त्वयाचापिकृतापू-
र्वमन्यजन्मनिभाविनि ॥ तस्येयंव्युष्टिरतुला तवदेविमहाफला ॥ त्वयाचापिकृतापूर्वे विजयाःसर्वदाशुभे ॥ तस्यास्तुषोडशंभा-
गंददस्वसुकृतामम ॥ येनपूतागमिष्यामि तद्धामपरमंहरेः ॥ वित्तापहरजंपापं यद्भर्तुस्तुकृतंमया ॥ तस्यभावेनहेत्वर्थं षोडशांशं
प्रयच्छमे ॥ जीवितेनाथवित्तेन भर्तारंमुञ्चयेत्तुया ॥ कृमियोनिशतंगत्वा पुष्कलीजायतेततः ॥ शरीरंवाथचित्तंवा यानारीवर-
वर्णिनि ॥ नप्रयच्छतिदुर्मेधा साभवेत्काष्ठकीटका ॥ तत्कर्मणोविशुध्यर्थं देविद्वादशिसंभवं ॥ पुण्यंपुण्यभृतांश्रेष्ठे यद्यस्तिमयि-
तेप्रिया ॥ तस्यास्तद्वचनंश्रुत्वा कृपणायाःपुनःपुनः ॥ कृपामवापसुभगे तामेवाचमिदंतदा ॥ दत्तंमयातेसुकृतं द्वादश्युत्थमनंत-
कं ॥ कोलरूपीहरिर्यत्र पूजितोमेसुपुण्यदः ॥ यच्चयक्रोडकोशंतु कल्पितंसुकृतंमया ॥ तुरीयांशेनपुण्यस्य भवपूताममाग्रवै ॥ पू- ॥ ९९ ॥
र्वजन्मानिरौद्रस्य त्रिवारंवरवर्णिनि ॥ एवमुक्तेतुवचने शतह्रदसमप्रभा ॥ गगनस्थामयादृष्टा गच्छन्तींवैष्णवींपुरीं ॥ पतिर्हि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैवतंलोके स्त्रीणांतुगजगामिनि ॥ देहेनचतथावित्तैर्याइच्छत्युत्तमांगति ॥ सत्यवादिप्रदास्यामि भर्तुरर्थंयथेप्सितं ॥ तवमोहिनि चार्वंगि नमृषाप्रब्रवीम्यहं ॥ कोन्योहिदेवतालोके स्त्रीणांसम्यगभातिन ॥ तस्यार्थेयात्यजेद्वित्तं जीवितंवावरानने ॥ तस्यपुण्यस्यसंख्यानं नास्तिदेविकदाचन ॥ तस्माद्भर्तुःप्रियंकार्यं प्राणैरपिधनैरपि ॥ उद्दाहितंविप्रसुतंसुनिष्ठुरं ग्रस्तंतदातद्वचनैःसुघोरैः ॥ धनार्थिनातेनचयाचितासा लोकार्थिनासागृहमाससाद ॥ हित्वापिदेहंविमलंस्वरूपं यातापिकाष्ठचतथैवकीटा ॥ एतन्मयादृष्टमनंगयष्टे पितुर्गृहेविचरंत्यायथेष्टं ॥ ज्ञात्वेतिहासंसुभगेसुकेशि भार्याचभर्तुःप्रियमेवकर्त्ता ॥ तस्मात्वांकामयेसुभ्रु भर्तुरर्थेप्रसीदमे ॥ व्रतभंगंमाकुरुष्व भर्तुर्मेबरवर्णिनि ॥ धर्मज्ञात्वंकुलीनाथ त्वंभीरुशुभदर्शना ॥ अनार्यायाःस्त्रियोलोके भर्तुःसुखकःराहिताः ॥ सुवृत्तयाःकुलीनाया वृत्तमेवशुभानने ॥ वरंत्वमन्यंवृणुतोनृपस्य धर्मोपघातायभवेन्नसुभ्रु ॥ एवंकृतेमेवचनंकृतंस्याद्भर्तुस्तथाह्लादकरीभवेततु ॥ इत्थंनिशम्याथवचोवभाषे विमोहिनीक्रोधविरक्तदृष्टिः ॥ सन्ध्यावलींतांसविशुद्धभावां निरीक्ष्यमाणां वचनंसुतस्य ॥ ७५ ॥ इतिश्री नारदीयपुराणे मोहिनीवाक्यनाम द्वात्रिंशोध्यायः ॥ ३२ ॥ समाप्तमिदं काष्ठीलोपाख्यानं ॥ मोहिन्युवाच ॥ यद्येवंत्वंविजानासि धर्माधर्मविचक्षणे ॥ भर्तुरर्थेप्रदेहित्वं धर्मंजीवितमेवत्र ॥ याचयेयमहंयच्च जीविनादपिदुर्लभं ॥ देहिपुत्रशिरोमह्यं यदिष्टंहृदयाधिकं ॥ यदिभुंक्तनवैराजा संप्राप्तेहरिवासरे ॥ गृहीत्वासिस्वहस्तेन राजायंरुक्मभूषणः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिरोधर्मांगदस्यैतच्चन्द्रबिंबोपमंशुभं ॥ अजातश्मश्रुकंकान्तं कुण्डलाभ्यांविभूषितं ॥ आच्छिनत्तुप्रहृष्टात्मा मुक्ताश्रुपरिवर्जितं ॥ परिपक्वफलंयद्वद्वृन्तसंगेपातयत्विह ॥ मामकेक्रूपणापांगि तवभर्त्तामहाबलः ॥ एतद्वैक्रयतांसर्वं यद्याह्निनहिभोक्षते ॥ शार्ङ्गिणोहि महाभागे सर्वपापप्रणाशने ॥ तच्छ्रुत्वात्वचनंतस्या मोहिन्याःकटुकाक्षरं ॥ चकम्पेतत्क्षणाद्देवी प्रवातेकदलीयथा ॥ संध्यावली ततोधैर्यमालम्व्यवरवर्णिनी ॥ उवाचमोहिनींवाक्यं साश्रुत्वाप्रहसन्निव ॥ श्रूयतेहिपुराणेषु गाथाःशुकसमीरिताः ॥ द्वादशीप्रतिमासेवै स्वर्गमोक्षप्रदाशुभा ॥ त्यजेद्धनंत्यजेद्दारान् जीवितंगृहमेववा ॥ त्यजेद्भूपंत्यजेद्देशं त्यजेन्मित्रंत्यजेद्गुरुं ॥ त्यजेत्तीर्थं त्यजेद्यज्ञं त्यजेद्धर्मक्रियान्वितं ॥ त्यजेत्तपःसुघोरंच त्यजेत्सौख्यंसुविस्तरं ॥ त्यजेद्योगंत्यजेद्दानं त्यजेद्यन्यच्चसुप्रियं ॥ नत्यजेद्द्वादशींपुण्यां पक्षयोरुभयोरपि ॥ पुत्रभ्रातृसुहृद्बन्धु प्रियादारास्तथाधनं ॥ द्वादशीतिपुनर्देवि उभयोःसाधनीस्मृता ॥ द्वादश्यास्तु प्रभावेण क्षेमंसर्वंभविष्यति ॥ करोमितवतुष्ट्यर्थं धर्मांगदविनाशनं ॥ विनष्टेतनयेमह्यं सुखिनीभवसुन्दरि ॥ नव्यावृष्यतिसत्याद्धि काञ्चनाद्रुद्रभूषणः ॥ सत्याच्च्युतोमनुष्यस्तु श्वपाकादधिकःस्मृतः ॥ इत्येवमुक्त्वाकनकावभासा विमोहिनींपद्मजदेहजातां ॥ संगृह्यभर्तुश्चरणौसुजातौ सन्ध्यावलीचाभिरताबतस्थे ॥ १७ ॥ इतिश्री ल० ना० पु० रु० सन्ध्यावलीवाक्यं त्रयस्त्रिंशोध्यायः ३३

वशिष्ठउवाच ॥ सन्ध्यावलीतथापादौ भर्तुःसंगृह्यभूतले ॥ उवाचवचनंदेवी धर्माङ्गदविनाशनं ॥ अनुशिष्टंवहुविधं मयाभूप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्वेयातथा ॥ नान्यद्रोचयतेसुश्रुमोहिनीमोहसंयुता ॥ भोजनंवाहरिदिने वधंवातनयस्यहि ॥ कुरुष्वराजन्धर्मज्ञ धर्मागदवि-
नाशनं ॥ यादृशीतुजनन्यावै रुजाभवतिभूपते ॥ पुत्रस्यजननीतीव्रा तादृशीनभवेत्पितुः ॥ गर्भसंधारणेदुःखं भूपस्नेहोऽधिक-
स्तथा ॥ मातुर्भवतिभूपाल नतथाहिभवेत्पितुः ॥ जीवनिर्वापकःप्रोक्तः पिताराजेन्द्रभूतले ॥ जननीधारणेक्षीणा वर्द्धनेपालने
क्षमा ॥ पितुःशतगुणंप्रोक्तं कुर्यात्साहिसदानृप ॥ स्नेहाधिकांहिसंप्रेक्ष पुराणेकवयःपुरा ॥ जगुरत्यधिकांलोके जननींजनकात्त-
था ॥ नचतादृक्पितास्नेहं पुत्रप्रतिकरोतिवा ॥ यादृशंजननीलोके कुरुतेरुक्मभूषण ॥ साहंचाद्यगतस्नेहा परलोकजिगीषया ॥
पुत्रस्यनृपशार्दूल सत्यवाक्यानुपालनात् ॥ व्यापादयस्वतनयं त्यक्तास्नेहंसदूरतः ॥ मासत्यलंघनाद्राजन् नात्मानंपातयप्रभो ॥
तन्निकर्षेहृषीकेशो भवतीहफलप्रदः ॥ यस्मिन्जीर्णेरुजादेहे नान्योपिनृपजायते ॥ न्नासौधर्मोमलंयद्वदङ्गसंस्थंनसोभते ॥
दाराःप्राणास्वपुत्रंवा सर्वस्वंवामहीपते ॥ योहिदद्यादधर्मार्थं सपुमान्हीयतेनच ॥ श्रूयतेचपुराराजन् शिविनासुमहात्मना ॥
स्वशरीरंप्रदत्तंवै धर्मार्थश्येनरूपिणे ॥ पुरन्दरायभद्रार्थं नतुत्यक्तोद्विजन्मना ॥ जीमूतवाहनेनापि गरुडायातिरंहसा ॥ स्वशरी-
रंप्रदत्तंवै रक्षताधर्ममुत्तमं ॥ दधीचिनापिदत्तानि स्वान्यस्थीनिमहात्मना ॥ धर्मार्थंराजशार्दूल देवानांहितमिच्छता ॥ एवंमहा-
त्मभिःपूर्वं धर्मएवस्वपालितः ॥ पालनाच्चैवधर्मस्य सर्वेस्वर्गपराभवत् ॥ आपवस्थाहिभूपाल धन्याश्चभुवनत्रये ॥ सत्यसंरक्षणा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थाय संभवंतिनृणांसदा ॥ कीर्त्तिसंरक्षणार्थाय कर्त्तव्यंमनुजैःशुभे ॥ कर्मभूपालशास्त्रोक्तं रागद्वेषविवर्जितं ॥ तदलंपरितापेन सत्यंपालयभूपते ॥ सत्यस्यपालनाद्राजन् विष्णुदेहगतिस्तव ॥ देवैरुत्पादितानूनं सानिकार्थायमोहिनी ॥ तवभूपालसापत्न्यं कृतंतन्नहिबुध्यसे ॥ पुत्रव्यापादनेदेवा भविष्यन्तिपराङ्मुखाः ॥ तेषांदत्वासुतंदेव प्राप्यसेवैष्णवंपदं ॥ विष्णोरुद्धहतांभक्तिं देवताःपरिपन्थिनः ॥ भवंत्येवंश्रुतंपूर्वं नचैतत्प्रकटीकृतं ॥ सर्वेतेविबुधाभूप शेखरैःपरिवेष्टिताः ॥ मोक्षमार्गप्रभेत्तारो नव्यवंतिचलोकतः ॥ तेत्वंभूपदृढोभूत्वा घातयस्वसुतंप्रियं ॥ धर्मंकुरुष्वभावंत्वं सत्यमालोपयप्रभो ॥ लुप्तेस्ववाक्येभवितास्वपाकः समंतथा ब्रह्मवधेनतुल्यं ॥ स्वंसत्यशीलोभविताधरायां यशस्यमेतद्भवितातवेह ॥ २६ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते सन्ध्यावलीवाक्ये चतुस्त्रिंशोध्यायः ॥ ३४ ॥ छ छ छ छ छ छ छ छ

वशिष्ठउवाच ॥ तत्तस्यावचनंश्रुत्वा राजन्रुक्मांगदस्तदा ॥ सन्ध्यावलीमुवाचेदं मोहिन्याःसन्निधौतदा ॥ पुत्रहत्यात्महत्यावा ब्रह्महत्यासमास्मृता ॥ घातयित्वासुतंलोके कागतिर्मेभविष्यति ॥ धर्मज्ञंविनयोपेतं प्रजानांरञ्जकंप्रियं ॥ अप्रजंतमहंहत्वा गंतावैकांगतिंशुभे ॥ क्वगतोमन्दरंशैलं क्वप्राप्तामोहिनीमया ॥ धर्मांगदविनाशाय पश्यदेविविधेर्बलं ॥ कुपुत्रस्यापिनिधनं देविदुःखंभवतिपितुः ॥ किंपुनर्द्धर्मशीलस्य गुरोर्वचनकारिणः ॥ जम्बूद्वीपमिदंभुक्तं मयाहिगजगामिनि ॥ सप्तद्वीपानिभुक्तानि तन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येनतवाधुना ॥ तुष्टेविष्णोवरारोहे पितुरत्यधिकोभवेत् ॥ अतःकमलपत्राक्षि पुराणेकवयोविदुः ॥ सोऽयमत्याधिकःपुत्रो वृषाङ्गद इतिक्षितौ ॥ प्रथितःसमहावाहुश्चक्रवर्त्तिर्महावलः ॥ ममवंशप्रकाशार्थं किंपुनर्भममामसं ॥ अहोदुःखमनुप्राप्तं पुत्राधिजनितं मया ॥ पुनरेववरारोहे शान्तयिष्यामिमोहिनीं ॥ मधुरैर्वचनैर्देवि दुःखशोकप्रदांमम ॥ एवमुक्तातुनृपतिः प्रियांसन्ध्यावलींतदा ॥ समीपंचततोगत्वा मोहिनीमिदमब्रवीत् ॥ नमोक्षेवासरेविष्णोर्नहनिष्येतवात्मजं ॥ आत्मानंघातयेयंवा यास्येवाप्याश्रमान्तरं ॥ अन्यद्वादारुणंकर्म करोमितवशाशनं ॥ आग्रहंकुरुमाभीरु भोजनंचसुतंप्रति ॥ किंफलंभवितादेवि हतेधर्मांगदेतव ॥ भोजयित्वादिनेविष्णोः कोलाभस्तवसुन्दरि ॥ दासोऽस्मितवभृत्योऽस्मि वशगोऽस्मिवरानने ॥ अन्यद्वदस्वसुभगे गतोऽहंशरणंतव ॥ रक्तांगुलितलाभ्यांतु कराभ्यांचारुलोचने ॥ करिष्येन्यत्कर्मशुभ्रु प्रसीदममभाविनि ॥ प्रसादंतवकृत्वातु पुत्रभिक्षांप्रयच्छमे ॥ दुर्लभोगुणवान्पुत्रो दुर्लभोहरिवासरः ॥ दुर्लभंजाह्नवीतोयं दुर्लभाजननीक्षितौ ॥ दुर्लभंहिकुलेजन्म दुर्लभावंशजाप्रिया ॥ दुर्लभंकाञ्चनंदानं दुर्लभंहरिपूजनं ॥ दुर्लभावैष्णवीदीक्षा दुर्लभःस्मृतिसंग्रहः ॥ दुर्लभःशोकविरहो दुर्लभंह्यात्मचिन्तनं ॥ दुर्लभोजागरोविष्णोर्दुर्लभागुरुसत्क्रिया ॥ दुर्लभापात्रसंप्राप्तिर्दुर्लभंपौष्करंजलं ॥ दुर्लभःशिष्टसंसर्गो दुर्लभाभक्तिरच्युते ॥ दुर्लभं कपिलादानं दुर्लभंनीलमोक्षणं ॥ मघात्रयोदशिश्राद्धं दुर्लभंवरवर्णिनि ॥ दुर्लभंवसुधाचीर्णे व्रतंपातकनाशनं ॥ धेनुस्तिलम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्यासुस्नु दुर्लभापापनाशिनी ॥ धात्रीस्नानंवरारोहे दुर्लभाहरिवासरे ॥ दुर्लभंपर्वसंप्राप्ते स्नानंशीतलवारिणा ॥ विशेषान्माघमासे-
तु प्रत्यूषसमयेशुभे ॥ यद्धितंह्यात्मनःकर्म तद्देविभुविदुर्लभं ॥ दुर्लभंस्यादन्नसनं दुर्लभंचौषधंनृणां ॥ व्याधिर्विघातकरणे शा-
स्त्रोक्तकरणंविना ॥ दुर्लभंशरणंविष्णोर्मरणेवरवर्णिनि ॥ एवंमत्वावरारोहे नचहन्मिसुतंनिजं ॥ आत्मनस्तुशिरश्छित्वा ददामि
तवसुन्दरि ॥ प्रसादंकुरुमेभीरु कृतंसर्वंमयावले ॥ सेवितोविषयाःसम्यक् कृतंराज्यमकण्टकं ॥ मयामूर्ध्निपदंदत्तं रिपुणामब्जलो-
चने ॥ अप्रसूतंसुतंभीरु नाहंहन्मिवरानने ॥ विषयास्वादनेवालं मद्दश्यंशुभदर्शने ॥ स्वहस्तेनैववामोरु किंतुपापतरंपरं ॥ मो-
हिन्युवाच ॥ धर्मांगदोनमेशत्रुर्नाहंहन्मिसुतंतव ॥ आदावेवमयेत्युक्तो भुंक्ष्वत्वंहरिवासरे ॥ वसुधास्वेच्छयाराजन् नप्रसाधीहि
सर्वदा ॥ नाहमेवंब्रवीमित्वां पुत्रव्यापादनंप्रति ॥ भोजनंकुरुराजेन्द्र संप्राप्तेहरिवासरे ॥ ममभूमिपतेकृत्यं नैवपुत्रवधेनते ॥ कृ-
त्यंतुभोजनेनाद्य एकादश्यांमहावल ॥ यदिपुत्रप्रियोराजन् भुंक्ष्वत्वंहरिवासरे ॥ वहुनाकिंप्रलापेन वाक्यैरद्यनिरर्थकैः ॥ सत्यं
संरक्षयस्वेह कुरुस्ववचनंमम ॥ एवंब्रुवाणांतांदृष्ट्वा मोहिनींतनुमध्यमां ॥ धर्मांगदउवाचेदं खड्गंन्यस्याऽग्रतःपितुः ॥ स्वर्णसरुं
सुधारंच निर्मलाकाशसन्निभं ॥ माविलम्वेनराजेन्द्र पापंमूर्ध्निह्युपेक्षितं ॥ तन्मातुर्वचनंभूप कुरुष्वस्वर्गसाधनं ॥ आत्मारक्षोध-
नेनेह दारैरपिसुतैरपि ॥ आपद्भ्यश्चापिघोराभ्यः श्रेयस्कामेनभूमिप ॥ त्वदर्थेचमृतस्याद्य गतिस्यादक्षयामम ॥ नवापिनिर्मला-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकाः स्ववाक्यपरिपालनात् ॥ परित्यजस्वदैन्यत्वं सुतव्यापादनोद्भवं ॥ देहत्यागेममविभो नवःकायोभविष्यति ॥ शचीश-
यननिर्मुक्तो यथानृपशतक्रतोः ॥ पितुरर्थेहितायेच मातुरर्थेमहीपते ॥ गवार्थेब्राह्मणार्थेच प्रमदार्थेतथैवच ॥ भूम्यर्थेविकलार्थेच
देवतार्थेतथैवच ॥ धर्मार्थेदुःखिनश्चार्थे तथालोकासनातनाः ॥ तदलंपरितापेन जहिमांत्वंवशासिना ॥ सत्यंपालयराजेन्द्र माभुंक्ष्वह-
रिवासरे ॥ धर्मार्थेतनयंहन्याद्भार्यांवापिमहीपते ॥ श्रूयतेदेववाक्यंतु हन्यात्पुत्रंमखेपिता ॥ सर्वमेधेनृपश्रेष्ठ नदोषोभवितातदा ॥
यद्ब्रूतेत्वांमहीपालजननीमेसुमध्यमा ॥ तत्कार्यमविचारेणधर्मज्ञेयंबहुश्रुता ॥ प्रसीदममराजेन्द्रकुरुवाक्यंमयेरितं ॥ मुक्तोभवस्वे-
वमसत्यघोराद्धत्वाहिमांभूमिपतेजनन्यै ॥ महद्यशःप्राप्स्यसिसत्यवाक्याद्विष्णोःपदंतत्परमंनरेन्द्र ॥ यशःप्रकाशाद्भवितात्हिकीर्त्ति
स्तवाक्षयातातनशंशयोऽत्र ॥ ४८ ॥ इतिश्री नारदीयपुराणे रुक्माङ्गदचरिते धर्माङ्गदवाक्यं पञ्चत्रिंशत्तमोध्यायः ॥ ३५ ॥
वशिष्ठउवाच ॥ तत्पुत्रवचनंश्रुत्वा भूपरुक्माङ्गदस्तदा ॥ सन्ध्यावलीमुखंवीक्ष्य प्रहृष्टमिवपंकजं ॥ मोहिन्यावचनंक्रूरं श्रुत्वा-
सनृपसत्तमः ॥ चकारपुत्रनाशाय मतिंमतिमतांवरः ॥ पुनःसंमोहिनीवाक्यं शुश्रावनृपसत्तम ॥ भुंक्ष्वभुंक्ष्वमहीपाल रक्षधर्मा-
ङ्गदंसुतं ॥ सन्ध्यावल्युवाच ॥ माभुंक्ष्वनृपशार्दूल जहीमंतनयंमम ॥ सन्ध्यावल्याःवचःश्रुत्वा नृपवर्यसभूपतिः ॥ आन्दोलि-
तमनास्तत्र दुःखशोकसमन्वितः ॥ एतस्मिन्नेवकालेतु भगवान्पुरुषोत्तमः ॥ अन्तर्द्धानगतस्तस्थौ व्योम्निस्थैर्यविलोककः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आरुह्यगरुडंदेवो मेघस्यामोनिरञ्जनः ॥ धर्मांगदस्यधीरस्य तथारुक्मांगदस्यच ॥ सन्ध्यावल्याश्चचरितं वीक्षाश्चक्रेवियत्क्षयः ॥
भुंक्ष्वभुंक्ष्वेतिवचनं मोहिन्याह्युदितेतदा ॥ जग्राहविमलंखड्गं राजारुक्मांगदस्तदा ॥ सुप्रहृष्टेनमनसा प्रणम्यगरुडध्वजं ॥ तं
दृष्ट्वाखड्गहस्तस्तु पितरंधर्मभूषणः ॥ प्रणम्यमातृपितरौ देवंचक्रगदाधरं ॥ नारायणंजगद्योनिं योगाधारंनिरञ्जनं ॥ गृवांस-
चात्मनोवीर पितुरग्रेह्यनामयत् ॥ कंबुग्रीवोमहावाहुः सर्वलक्षणसंयुतः ॥ पुनश्चैवमहाबाहुर्ग्रीवास्वांशुभलक्षणः ॥ प्रणम्यपादौस-
पितुः खड्गमार्गेप्रदशयेत ॥ पितुर्भक्त्याप्रहृष्टात्मा जनन्योत्साहितस्तथा ॥ नियोजितेतत्रसुतेनकण्ठे विकाशितेमातृमुखेमहीप ॥
गृहीतखड्गेत्ववनीशनाथे चचालपृथ्वीसनगासवृक्षा ॥ क्षुब्धाःसमुद्राश्चतथामहीपते ववुश्चवाताःप्रवलाःसुघोराः ॥ निपेतुरुल्काः
शतशोधरायां निवातयुक्तानृपतत्रदारुणाः ॥ विवर्णरूपाहिवभूवमोहिनी नदेवकार्यंहिकृतंमयेति ॥ निरर्थकंजन्ममममाधुनाभवत्
कृतंनकार्यंचदिनेशजस्यवै ॥ विमोहनंरूपमिदंविलंवितं नृपेणचानेनसुतंविनिघ्नता ॥ भुंक्तंनवातेन्दचवासरेहरेरघापहेक्षत्रियपुंग-
वेन ॥ साहंत्वकृत्वादिनकृत्सुतस्य त्रिणैःसमाहंभविताञ्त्रिपिष्टपे ॥ मनोरथामेवितथंचकृत्वा तस्याधिकोयास्यतिमोक्षमार्गं ॥ स-
त्वाधिकोयास्यतिमोक्षमेष यास्याम्यहंवैनरकंसुघोरं ॥ एवंतदाचिन्तयन्ती मोहिनीनृपनन्दन ॥ ददर्शनृपतिंखड्गमार्जयन्तं
पुनःपुनः ॥ समुद्यतेतदाखड्गे नृपेणनृपपुंगव ॥ मोहिनीमोहसंयुक्ता पपातधरणीतले ॥ राजापितेनखड्गेन शिरश्छेतुमियेष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सः ॥ सुतस्यनृपशार्दूल धैर्येणमहतायुतः ॥ सकुण्डलंचारुशशिप्रकाशं भ्राजिष्णुवक्त्रंतनयस्यभूपः ॥ विष्णुरुवाच ॥ उक्तंचदेवे-
नगदाभृतातदा गुह्यंममाकर्णयभूपवाक्यं ॥ तुष्टोऽस्मितुष्टोऽस्मिनशंशयोत्र गच्छस्वलोकंममभूमिनाथ ॥ प्रियान्वितःशुद्धसुतेन
पूतः कीर्त्तिंविधायात्रधरापतीश ॥ त्रैलोक्यमापूर्यतथागुणोघैः कृत्वापदंमूर्द्ध्नियमस्यचैव ॥ लीनोभवस्वाघममैवदेहे त्वंसर्वथैका-
दशिपालनेन ॥ सचक्रिणोभूमिपतिःकरेण संस्पृष्टगात्रोष्ठभुजोवभूव ॥ प्रियासमेतस्तनयेनसार्द्धं विमुच्यपापंसफलंसदेहः ॥
देवस्यादिव्यंसनृपोमहात्मा विवेशदेहंगरुडध्वजस्य ॥ विहायलक्ष्मीमवनीप्रभुतां विहायदारांश्चविहायकोषं ॥ विहायनागांश्च
विहायभूपान् विहायवंधुंश्चजनांस्तथासौ ॥ जगामदेहंमधुसूदनस्य ततोम्बरात्पुष्पचयंपपात ॥ अनाहताद्दुंदुभयोविनेदुर्ननृतुस्त-
त्राप्सरसांव्रजश्च ॥ चक्रुश्चगीतंमधुरंलयान्वितं गन्धर्वमुख्यानृपकर्मतुष्टाः ॥ तदद्भुतंविक्ष्यरवेस्तनूजो हरेस्तनुंभूमिपतिंप्रविष्टं ॥
सदारपुत्रस्तुलिपिंप्रमार्य उवाचदेवंचतुराननंरुदन् ॥ यमउवाच ॥ नाहंनियोगीभवितातवेश दिशस्वकृत्यंममयत्करोमि ॥ ना-
हंपुनस्त्वीदृशकार्यकर्त्ता येनेहमेस्यादतिदुःखतापः ॥ ३० ॥ इतिश्री ना० रु० रुक्मांगदसिद्धिर्नाम षट्त्रिंशोध्याय ॥ ३६ ॥
यमउवाच ॥ विबुधेशजगन्नाथ चराचरगुरोप्रभो ॥ मोहिन्याश्चरितंदेव जातंनिष्फलमद्यवै ॥ रुक्मांगदप्रणीतेन मार्गेणकुशके-
तन ॥ लोकःप्रयातिसर्वोयं नमांकश्चित्प्रपद्यते ॥ गतेपिनृपशार्दूले देहंदेवस्यचक्रिणः ॥ सर्वथासर्वभूतानां नबुद्धिःपरिवर्त्तते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपोष्यवासरंविष्णोः सदाधर्मार्त्तमानसाः ॥ प्रयान्तिपरमंलोकं लुप्तपापाःपितामह ॥ इयंतुव्रीडितादेवी मोहिनीचवरांगना ॥ सा-
यातितवसान्निध्यं नभुंक्तेलोकगर्हिता ॥ निष्पपन्नोह्यहंजातः किंकरोमिप्रसाधिमां ॥ प्रेताधिपवचःश्रुत्वा नीरजातासनोब्रवीत् ॥
गच्छामःसहिताःसर्वे मोहिनींप्रतिबोधितुं ॥ मोहिन्याःप्रतिबुद्धायाः करिष्यामोदिवाकरे ॥ तवकार्यंनसन्देहः संभ्रमन्त्यज्यता-
मिदं ॥ ततोदेवगणाःसर्वे संक्रन्दनपुरोगमाः ॥ ब्रह्मणासहिताभूमिं विमानैःसूर्यसन्निभैः ॥ समायातामहीपाल नारींतांप्रतिबो-
धितुं ॥ तेविमानैःसमंतात्तु परिवार्यशुभाननां ॥ तेजोहीनांनिरानन्दां शुष्कतोयांनदीमिव ॥ विनेन्दुनायथारात्रिमृद्धिहीनां-
क्रियांयथा ॥ पराजितंनरंयद्वत् प्रम्लानमिवपंकजं ॥ विनिवृत्तमखंदेवं निर्द्रुमंहिवनंयथा ॥ गतशालिककेदारं तरणिंनिष्प्रभंयथा ॥
पन्थानंनवनीतेतु उद्धृतेचावनीपते ॥ असंस्कृतांयथावाणीं मृदितांचचमुंयथा ॥ हतनाथांचयुवतीं धान्यहीनांप्रजांयथा ॥ श्र-
द्धाहीनविधिंयद्वत् धर्मंचदययाविना ॥ राष्ट्रंभूपालहीनेच मंत्रिहीनंचभूमिपं ॥ धनधान्यविहीनंतु गृहंनरवरोत्तम ॥ जलही-
नंयथाकुंभं बद्धसंगंयथागतिं ॥ गृहस्थंभार्ययाहीनं पथिकंसार्थवर्जितं ॥ मार्जनींपांशुरुषितां नरंतीर्थाप्लुतंयथा ॥ वादित्रंशब्दभ-
ग्नंच दिवादृष्टंचनेत्रजं ॥ भग्नक्रियंचभिषजं भग्नशाखंचपादपं ॥ व्यङ्गीचप्रमितंयद्वन्निर्जलंचयथाघनं ॥ सधूममिववह्निंच वि-
रश्मिमिवभास्करं ॥ प्रभ्रष्टामिवमालांतु सर्वसंगंनरंयथा ॥ पयसाचविहीनांगां पतिहीनंगृहंयथा ॥ कविनाचयथाबन्धं भिक्षाही-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नंचभिक्षुकं ॥ तिरस्कृतंयथाकान्तं जाययेवहतप्रभं ॥ वसन्तंस्वसुरावासे हृतस्वामिवमानसं ॥ भर्माचित्रंगृहमिव पद्मिनीमुद्धृता-
मिव ॥ निर्दानामिवमातंगं भग्नवेगंहयंयथा ॥ मालामिवशिरोभ्रष्टां समलंतुमणिंयथा ॥ प्रभ्रष्टांवालिपिंयद्वद्विस्वरंचयजुर्यथा ॥
सामेवस्वरहीनंतु मंत्रहीनंयथानरं ॥ मार्गंतृणेनसंछन्नं पद्महीनंयथासरः ॥ ज्ञानंममत्वसहितं प्रकृतिंपुरुषंविना ॥ यानिचित्तवि-
हीनानि धर्म्यंदंभावृतंयथा ॥ मोहिनींतेजसाहीनां तथादृष्ट्वादिवौकसः ॥ ध्यायमानांनिरुत्साहां दूयमानांजनैःप्रभो ॥ आक्रोश
वचनैःक्रूरैः पुत्रहत्यासमन्वितैः ॥ भूभर्तृघातिनींपापां सन्ध्यावल्याश्चदुःखदां ॥ दुःशीलांपतिनात्यक्तां तद्वाक्यपरिमोदितां ॥
स्ववाक्यनिरतांचण्डामूचुर्देवाःसमागताः ॥ माशोकंकुरुवामोरु पौरुषंहित्वयाकृतं ॥ नहिसिद्धिंगतंतंच कोपराधस्तवाबले॥ प्रा-
णिनःपरिभूयन्ते यमेनबरवर्णिनि ॥ नहिमाधवभक्तानां भवतोमानखण्डनं ॥ शाशितात्वंविशालाक्षि देवकार्यार्थमागता ॥ त-
न्नसिद्धिंबरारोहे प्रयत्नेनतवाधुना ॥ विघ्नविध्वंसिनीपूर्वं कृतारुक्मांगदेनहि ॥ एकादशीमहापुण्या वैशाखेशितपक्षजा ॥ संव-
त्सरंविशालाक्षि कृच्छ्रपादप्रपूरिता ॥ तस्यैषाव्युष्टिरतुला यत्सत्याञ्चविभ्रोनहि ॥ निर्विघ्नांचेतित्रुवते लोकेषुपरिनिष्ठिताः ॥ अने-
नकारणेनेह जितात्वंतेनभाविनि नकृतंवचनंतुल्यं विष्णुभक्तेनतेनवै ॥ अगणितेहनृपतिः संस्पर्शन्तेनसुन्दरि ॥ कर्मणाम-
नसावाचा पुत्रव्यापादनेस्थितः ॥ खड्गमुद्यम्यहस्तेन स्नेहंकृत्वासुदूरतः ॥ तादृशंनिकषंप्रेक्ष्य भगवान्मधुसूदनः ॥ तुष्टोवभूव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवेशो वरदःसजनार्दनः ॥ सान्निध्यंकल्पयामास नृपस्यपुरतोहरिः ॥ योहनिष्यतिवैपुत्रं नभुक्तेहरिवासरे ॥ भूभुजातेनतेनाद्य
प्रीतिंयाताममातुलां ॥ एवंविचिन्त्यदेवेन दर्शितंवपुरात्मनः ॥ नृपेन्द्रस्यप्रियापुत्र सहितस्यवरानने ॥ विष्णुनापरितुष्टेन नीतं-
चत्रितयंशुभे ॥ स्वकंधाममहाभागे अस्मावर्मिरिवाहितः ॥ प्रारब्धेकर्मणिफलं यदिदेविनसिध्यति ॥ सर्वदोषेणसुभगे दोषःकोत्र
तवाधुना ॥ तस्मात्तेवरदाःप्राप्ता सांप्रतंविबुधाःशुभे ॥ सिध्येकर्मण्यसिद्धेच कर्मदोषोवृथानहि ॥ नदोषोभृत्यवर्गस्य स्वामिना
धर्ममिच्छता ॥ सद्भावादटमानस्य यदिकर्मनसिध्यति ॥ देयंवेतनमात्रंतु नतुतुष्टिफलंभवेत् ॥ योनतस्मैप्रयच्छेत वेतनंजीव-
नायवै ॥ गवांबधमवाप्नोति सनरोनात्रशंसयः ॥ तस्माद्देयंवरारोहे तवाभीष्टसुलोचने ॥ सद्भावेनत्वयाकार्यं कृतंसम्यग्दिवौकसां ॥
किन्नकुर्वन्तिविबुधाः त्वयासहवरानने ॥ द्वादश्याःतेजसाभग्नो यामाहुर्विघ्ननाशिनीं ॥ एवमुक्तातुदेवैःसा मोहिनीनृपसत्तम ॥
निन्दिताचतदात्मानं उवाचेदंवचस्तदा ॥ धिग्देवाजीवितंमह्यं ययाकार्यंनसाधितं ॥ नकृतोयमसंवाधं यमकार्योमयासुराः ॥
नचलुक्षंहरिदिनं नभुक्तंतस्यवासरे ॥ भूभुजातेनवीरेण कृतंपुत्रवधेमनः ॥ गतोमूर्ध्निपदंकृत्वा ममरुक्मांगदोहरिं ॥ अप्रमेयगु-
णंविष्णुं निर्मलंनिर्मलाशयं ॥ हंसंशुचिपदंव्योमं प्रणवंवीजमव्ययं ॥ निराकारंनिराभासं निष्प्रपञ्चंनिरञ्जनं ॥ शून्यंविलब्धरू-
पञ्च ध्येयंध्यानाविवर्जितं ॥ अस्तिनास्तीतियंप्राहुर्नदूरेनातिचान्तिके ॥ मनोग्राह्यंपरंधाम पुरुषाख्यंजगन्मयं ॥ हृत्पंकजसमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सीनं तेजोरूपंनिरीन्द्रियं ॥ तस्मिन्नयमनुप्राप्तः किन्नुमेजीवितेफलं ॥ सुसाधितेतुयोविप्र कार्येगृह्णातिवेतनं ॥ आशामनाशां-
कृत्वातु स्वामिनोनरकंव्रजेत् ॥ नसाधयन्तिकार्याणि प्रभूणांयेदिवौकसाः ॥ भृत्यावेतनभोक्तारो जायन्तेभूतलेंहिसा ॥ कार्यप्र-
साधनापश्चाद्धर्तृपुत्रविनाशिनी ॥ ग्रहिष्येहंवरंदेवाः कथंपापाविगर्हिता ॥ देवाऊचुः ॥ ब्रूहिमोहिनिदास्यामो यत्तेमनसिवर्त्तते ॥
नानृणंभवितासुभ्रु येनास्माकंवरानने ॥ फलंहितस्यकस्मात्त्वं नचाप्नुहिकृशोदरि ॥ ५५ ॥ इति ना० मोहिनीसमागमोनाम ३७
वशिष्ठउवाच ॥ एवमुच्चार्यमाणानां विबुधानांमहीपते ॥ आजगामाथनृपतेः पुरोधाःपावकप्रभः ॥ उषित्वाजलमध्येतु प्राणाया-
मरतोमुनिः ॥ वर्षाणांतुशतंसाग्रं ध्यायन्देवंजनार्दनं ॥ व्रतावसानेनृपते जलादवततारह ॥ निर्गतेनश्रुतंतेन मोहिन्याश्चेष्टितं
नृप ॥ सक्रोधोमुनिशार्दूल देववृन्दमथागमत् ॥ उवाचविबुधान्सर्वान् मोहिन्यावरदायिनः ॥ भवतांहिकदेवत्वं धिग्धर्मंवःसुरे-
श्वराः ॥ वरप्रदानंयैरेवं दीयतेहिनिरर्थकं ॥ मोहिन्याःपापयुक्ताया नयुक्तंभवतामिह ॥ कृत्याहतेयंसुतभर्तृघातिनी विहीनरूपा
सदृशस्वरूपा ॥ तस्याहिशुद्धिर्नहिदृश्यतेवै क्षिप्तेशरीरेपिहिजातवेदसि ॥ विमोहयामासचमोहिनीया रुक्मांगदंधर्मविभूषणंहि ॥
प्रियासमेतंतनयेनयुक्तं ययास्वयंचैवविनाशितंपतिं ॥ कृत्याधरांभूपतिवर्जितंच नष्टस्वधर्मोहरिवासराख्यः ॥ नचैववासोनरकेपि
देवाः कृतेभवेद्वर्षशतेनपुण्ये ॥ लोकापवादेनचकुत्सितायाः स्थानंनवेदास्तिकुतःपरंच ॥ पतिंहत्वासुतंचापि सपत्नींजननीसमां ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हत्वामरांसमस्तांच कांगतिंयास्यतेसुराः ॥ इयंपापसमाचारा तिथिविध्वंसिनीहरेः ॥ मात्सर्यैसहितैरुक्तं यैर्हरेर्वासरेसुराः ॥ भु-
ज्यतामितिदुर्वृत्तेस्तेषामप्यधमागतिः ॥ भुज्यतेवासरेविष्णोर्हन्यतांगौर्द्विजान्विता ॥ अपेयंपीयतामुक्का नवासस्तुत्रिपिष्टपे ॥
एतदज्ञानिनांप्रोक्तं ज्ञानिनांनत्वनिष्कृतिः ॥ अज्ञानाद्व्याहृतेवाक्ये भुज्यतांहरिवासरे ॥ हन्यतांगौर्द्विजोपेता पीयतांमद्यमेव-
वा ॥ विशुद्धिःकविभिःप्रोक्ता प्राणत्यागगतेनहि ॥ अथवाह्युपवासेन ह्येकादश्यांदिवौकसः ॥ तिथ्यन्वितस्यपापस्य ज्येष्ठकुण्ड
प्लुतस्यच ॥ शौकरेस्पर्शनाद्वापि नचव्यूहार्चनादथ ॥ व्याहृतिःकथिताविप्र सेयमस्मिन्सुरोत्तमाः ॥ भोजनेपापनिरता द्विजे-
शस्यदिनेशुभे ॥ भर्तृवाक्यमकृत्वातु घातयामासयापतिं ॥ वाग्यतंवाक्यनिरतं तादृशंनरपुंगवं ॥ विष्णुधर्मप्रलोप्त्रीवै बहुमा-
यासमन्विता ॥ नैषास्पृश्याभवेद्देवा कथंदास्यथवैवरं ॥ भवन्तोन्याययुक्तेषु धर्मयुक्तेषुमत्सराः ॥ पालनंपापयुक्तेषु नकुर्वन्तिदि-
वौकसः ॥ धर्माधाराःस्मृतादेवा धर्मोवेदाद्विनिर्गतः ॥ वेदैःशुश्रूषणंभर्तुः स्त्रीणांधर्मःप्रकीर्त्तितः ॥ यद्वदेत्पतिःकिंचित तत्कार्यम-
विशंकया ॥ शुक्लंशुक्लमितिज्ञेयं कृष्णंकृष्णमितिस्त्रिया ॥ यानारीसाहिविज्ञेया यत्राज्ञाक्रियतेसदा ॥ भर्तुर्विबुधशार्दूलाः सत्यमे-
तद्ब्रवीमिवः ॥ भर्तुराज्ञाकृतादेवास्त्वनयापापशीलया ॥ पापाहीसनसन्देहो मोहिनीदुष्टचेतना ॥ सत्यसंचालनार्थाय सपथैर्य-
न्त्रितोविभुः ॥ उपायैर्विविधैःप्रोक्तोनसत्याच्चालितस्तया ॥ तेनमोक्षंगतोराजा पापमस्यांविसृज्यच ॥ सेयंपापशरीराहि हत्याशत ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समान्विता ॥ विनाशयामाससमम पाद्यंपापसमन्वितं ॥ दातारंसर्वदानानां ब्रह्मण्यंचहरिप्रियं ॥ प्रजानांरञ्जनेयुक्तं हरिवासरसे-
विनं ॥ निषिद्धपरिहर्त्तारं परदारविवर्जकं ॥ परार्थेत्यक्तकामंच सदामखविधिप्रियं ॥ सदादुष्टप्रशमनं वर्त्तमानंधरातले ॥ व्यस-
नैःसप्तभिर्घोरैरनाक्रान्तंमहीपतिं ॥ तंनिरस्यदुराचारा त्वयोग्याकथंभवेत् ॥ योऽस्याःपक्षेप्रवर्त्तेत देवोवादानवोपिवा ॥ तांचापि
भस्मनिचयं करिष्येहंनशंसयः ॥ मोहिन्यारक्षणेयस्तु प्रयत्नंकुरुतेनरः ॥ तस्यतज्जायतेपापं यन्मोहिन्याव्यवस्थितं ॥ सएवमुक्तो
नृपनाथविप्रः संसृज्यपापंहरिसंप्रगीतं ॥ मुमोचदेहेज्वलनप्रकाशं तदंगनायाःकनकावदाभि ॥ क्षिप्तेतुतोयेसहसामहीप ज्वला-
वलीढासहसावभूव ॥ खंपश्यतांनाकनिवासिनांतथा तृणेयथोल्कापतितावभूव ॥ कोपंप्रभोसंहरसंहरेति यावद्गिरःखेमरुतांचरन्ति ॥
तावत्सवह्निर्हरिसंभवोसौ भस्मावशेषांप्रमदांचकार ॥ ३४ ॥ इतिश्री ल० ना० रु० मोहिनीभस्मकरणंनामाष्टत्रिंशोध्यायः ३८
वशिष्ठउवाच ॥ मोहिनीदेहमुत्सृज्य गताविबुधमंदिरं ॥ भर्त्सितादेवदूतेन नास्थितिर्विद्यतेऽत्रते ॥ पापशीलेसुदुर्बुद्धे भर्तृनि-
न्दापरायणे ॥ लुप्तस्तेवासरोविष्णोर्महापापसमन्विते ॥ नारायणस्यभक्तानामिहवासस्त्रिपिष्टपे ॥ पापिनांनरकेवासस्तत्रगच्छ-
स्ववालिशे ॥ एवमुक्तातुदूतेन सक्रूरंवचनंतदा ॥ ताडयित्वातुदण्डेन प्रेषितानरकान्प्रति ॥ ताडिताभर्त्सिताराजन् साप्राप्तान्न-
रकान्प्रति ॥ प्राक्रोशन्नारकाःसर्वे दृष्ट्वातामागतांतदा ॥ नतेवासोऽत्रपापिष्टे परिखिद्यास्मदन्तिके ॥ व्रजान्यत्रहिवासाय नव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यंधारणेक्षमाः ॥ यात्वंधर्मांगदंहंसि धर्मज्ञंसत्पथेरतं ॥ गुरुशुश्रूषणेरक्तं मातॄणांसुप्रियंतथा ॥ विशेषरहितंभास्वद्भूतानांचहितेर-
तं ॥ प्रजाहितंस्थिरंप्रज्ञं स्त्रीसंगेवाविचक्षणं ॥ सप्तद्वीपप्रभोक्तारं महेन्द्रवरुणोपमं ॥ प्राकृतेनापिपुत्रेण निहतेनमहामते ॥ ब्रह्म-
हत्याशतंप्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः ॥ त्वयासद्धर्मनिरतो श्वयःशुश्रूषणेरतः ॥ हतःपुत्रोमहाबाहुस्तेनतेनास्तिनिष्कृतिः ॥ ग-
च्छान्यत्रद्रुतंपापे विरुद्धंतवदर्शनं ॥ एवंसुबहुशोजल्प्य निंदितानिर्गतातदा ॥ निर्धूतानारकैःसातु प्रविष्टाहिरसातलं ॥ रसा-
तलस्थैर्नृपते निषिद्धासासमंततः ॥ क्रंदितातत्रदुःखार्त्ता प्राप्तापार्श्वंदिवौकसां ॥ निवासिताहंलोकैस्तु ताडितामुद्गरादि-
भिः ॥ भवतामर्थसिद्ध्यर्थं रविपुत्रहितायच ॥ मयाव्यवसितंचैव सर्वलोकविगर्हितं ॥ क्लेशयित्वातुभर्त्तारं पुत्रंहत्वानिराकृ-
ता ॥ सन्ध्यावलींवियोज्याथ पुत्रेणपतिनातथा ॥ नगतिर्विद्यतेदेवा धरायांममसांप्रतं ॥ विशेषाद्विप्रशापेन सूतानरक-
वासिनः ॥ विप्रेणापादितानांहि दग्धानांचित्रभानुना ॥ दिवाकीर्त्तिहतानांच दष्टानामहिनातथा ॥ चतुर्गुणम्रितानांच
भक्षितानांचदंष्ट्रिभिः ॥ शतह्रदाविपन्नानां नशुद्धिःसुविमार्गदा ॥ साहंगङ्गाजलभ्रष्टा भूरिपापसमन्विता ॥ अविन्द-
मानानिलयं विष्णोर्वासरनाशिनी ॥ प्राप्ताहंभवतांदेवाः समीपमिहदुःखिता ॥ नास्तिमेपावनंकिंचिद्भर्तृपुत्रविनाशनात् ॥
विष्णोर्वासरलोप्तृत्वात्सत्यमेतन्मयोदितम् ॥ दुरुक्तंनादिनीचण्डा निंदिताचजगत्त्रये ॥ करोम्यहंकिंत्रिदशा ब्रूतदुःखविना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिनीम् ॥ तांदृष्ट्वावादिनींवीक्ष्य मोहिनींचविमोहिनीं ॥ ऊचुःपरस्परंसर्वे सब्रह्मेन्द्रदिवाकराः ॥ क्षिप्रंपुरोधसंक्रुद्धं शान्तयित्वाशनैःशनैः ॥ अस्माभिःप्रेषितान्रह्मन् शून्यंदृष्ट्वात्रिपिष्टपं ॥ नरकाश्चतथादृष्ट्वा वैकुण्ठंवीक्ष्यपूरितं ॥ रुक्मांगदकृतेमार्गे गच्छमानोजनस्तदा ॥ एकादश्यांनचास्नाति कश्चिदेवपदाद्विज ॥ तदास्माभिर्वालारियं प्रेषितानृपसन्निधिं ॥ माननार्थेचतस्यैव वासरेचक्रपाणिनः ॥ धर्मज्ञस्यसुशीलस्य द्विजरुक्मांगदस्यच ॥ वासुदेवेतिभावेन भक्तिरव्यभिचारिणी ॥ भार्यासंबन्धमुत्सृज्य कूटनेत्रकृतोमुनिः ॥ लिपिसम्मार्जनात्सर्वैरस्माभिःप्रेतपश्यतु ॥ अपकारायनृपतेः सत्ययुक्तस्यवैद्विजः ॥ सतेनकर्मणा विप्र प्रियापुत्रसमन्वितः ॥ विष्णोःप्रसादाद्गतवान् पुत्रस्नेहाविवर्जितः ॥ पदंदेवस्यसुकृतां चक्रिणोमुक्तिलक्षणं ॥ यस्मान्नावर्त्ततेजन्तुरानन्दाख्यान्महीपते ॥ तन्नात्रकोपःकर्त्तव्यस्त्वयाद्विजवरोत्तम ॥ त्वंतपस्वीदुराचारः सर्वभूतहितेरतः ॥ नीचैःकृतेयन्महतांव्यलीकं तच्चैवतेषांनभवेत्सुखाय ॥ नप्राप्यतेसांख्यविदैर्मुनीन्द्रैर्नचापितद्योगयुतैःसमस्तैः ॥ अध्यासितंसत्ययुतैर्नरेर्यत्तद्धामविष्णोसतदाजगाम ॥ बुद्धिप्रपञ्चात्पतितात्तुविप्र सद्यःसमूलेतिनशंशयोऽत्र ॥ देवार्थमेषानचबन्धनार्थं रुक्मांगदंदग्धवतीमुनिन्द्र ॥ नचात्मकामेनगताहिवाला यमावसानेनगताहितत्र ॥ दयांकुरुस्वप्रशमंव्रजस्व विनाशितानांनपुनर्वधोऽस्ति ॥ नचापिलोकेनिहतोनिहन्य तेशापदानेननिपातितेयं ॥ कुरुप्रसादंगतिदोभवस्व त्वमद्यविप्रेन्द्रविमोहिताय ॥ अस्मत्कृतेविप्रव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रप्रसीद क्रोधंतुसंहृत्यमहर्षिवर्य ॥ सएषदृष्टिस्त्रिदशालयैस्तु विमृष्यबुध्याविरामकोपात् ॥ उवाचसर्वान्विबुधाःसमेतान् वेदा-
र्थविद्धर्मपरोमहात्मा ॥ ३८ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते विप्रप्रशादनो नामैकोनचत्वारिंशत्तमोध्यायः ३९
पुरोधाउवाच ॥ वहुपापान्वितादेवा भर्तुर्दुःखप्रदायिनी ॥ नस्थितिर्विद्यतेचास्यास्त्रैलोक्येस्थाणुजंगमे ॥ यन्नाक्रान्तंहिभूतोघैरा-
काशंपक्षिभिःस्वैरैः ॥ जंगमाजंगमैर्भूमिर्व्याप्ताद्वीपसमन्विता ॥ तलानिदैत्यनागाद्यैराकाशंपाक्षिभिःस्वैरैः ॥ नाकंप्रक्रांताभिःपु-
ण्यैर्नरकंपापकर्मभिः ॥ ऋष्याद्यैसागराव्याप्ता विहंगैश्चमहीरुहाः ॥ यस्मिन्संस्थाप्यतेपापैः संस्पर्शंयास्यतेनच ॥ विचार्यतद्यथा-
स्थानमस्यसौख्यप्रदंभवेत् ॥ तच्चिन्त्यतांमहाभागास्तत्संभूयप्रमृष्यतां ॥ ततःसुरवराःसर्वे विप्रवाक्यप्रचोदिताः ॥ ऊचुर्ब्रह्मसु-
तांनास्ति स्थानंतवजगत्त्रये ॥ ब्रूहिमोहिनिदास्यामि यदाक्रान्तंनकेनचित ॥ नपुरापापभोक्तारो नसुरासुरचापरे ॥ नचाप-
रोधादवले सपापायावरप्रदाः ॥ मोहिन्युवाच ॥ भवतांहिमयाकार्यं कृतंविबुधसत्तमाः ॥ दग्धायाअपिपापेन विनादेहेनचाप-
राः ॥ यथासूर्यात्मजोहर्षं प्रयातिममचेष्टितैः ॥ पूर्यंतेनरकासर्वे जनोघैःपापसंयुतैः ॥ गच्छाद्भिःपरलोकेहि यममार्गेनिरंतरं ॥
मानुषैस्त्रिदशश्रेष्ठा चित्रगुप्तोनाविश्रमेत ॥ व्यलीकंतुप्रकुर्वाणाः सर्वेममसुसंचयैः ॥ पुरोधसासमेतानामेषवध्वाञ्जलिर्मया ॥ भ-
वतांहितमन्विच्छन् कृतंपापमनन्तकं ॥ पुनरेवचसाबुद्धिर्वर्त्ततेस्वर्गनाशिनी ॥ एकादशीफलंपुण्यं दीयतांविबुधोत्तमाः ॥ व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सतिःसामेविबुधा भवेदेकादशीयथा ॥ निरालंबाहमधुना स्थितांमेदीयतामिदं ॥ सर्वयज्ञाधिकफला सर्वपापप्रणाशिनी ॥ ए-
कादशीमहाभागा यद्यस्तिमयिपुण्यदा ॥ मोहिनीवचनंश्रुत्वा सर्वेभूमिदिवौकसः ॥ दत्तामंगानिधुन्वाना ऊचुस्तांपरुषाक्षरं ॥
अयाच्यंयाचसेभीरु यन्नप्राप्यंसुरासुरैः ॥ एकादशीफलंपुण्यं कोददातितवाधुना ॥ अन्यत्तुसंप्रयच्छामो दातुंह्येकंनशक्नुमः ॥
एकयाह्यपिवाभीरु एकादश्यासुचिन्तया ॥ हत्यायुतंविनश्येत सर्वयज्ञफलंलभेत् ॥ नास्माकंशक्तिरस्तीह दातुंहरिदिनोद्भवं ॥पु-
ण्यंमोक्षप्रदंभीरु जन्ममृत्युनिकृन्तनं ॥ अमृतेनजगद्धातुः पुराणपुरुषस्यतु ॥ तद्दिनंयाचमानायाः कुलिशंतेपतिष्यति ॥ मो-
हिन्युवाच ॥ यद्येवंविबुधश्रेष्ठा नदास्यथहरेर्दिनं ॥ दशम्याःप्रान्तविद्धाय ततोगच्छन्तमेसुराः ॥ देवाऊचुः ॥ दशम्याःप्रान्तवि-
द्धंहि दत्तंजंभासुरस्यहि ॥ ब्रह्मणापरितुष्टेन धूर्जटेर्वचनेनहि ॥ सचापिबलवाञ्जातस्तेनपुण्येनबृंहितः ॥ मोहिन्युवाच ॥ दशम्याः
प्रान्तमासाद्य यदोदेतिदिवाकरः ॥ तेनस्पृष्टंहरिदिनं तद्दत्तमसुरेयदि ॥ सूर्योदयविहीनंतु दृश्यादृश्यंचराचरं ॥ दशम्यंतंप्रय-
च्छध्वं स्पृष्टंहरिदिनेनहि ॥ अग्नेर्विकारकालेच बद्ध्वाउत्थापनेशुभे ॥ गवांदोहनकालेच पक्षिसंनादनेतथा ॥ विरामेसर्वदेवानां
मार्जनीग्रहणेतथा ॥ द्वारोद्घाटनवेलायां स्नानकालेह्युपस्थिते ॥ व्रतीनांदीक्षितानांच सपादेनिनदेतथा ॥ तदाक्रान्तोदशम्यांतु
एकादशिसमन्वितः ॥ प्रदीयतांनिवासार्थं कालेविबुधसत्तमाः ॥ नप्रार्थयेयंह्युदयं नचैवहरिवासरं ॥ वैनतेयोदयामह्यं दीयतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विबुधेश्वराः ॥ दययामुनिनादेवाः क्षीणायाःपापसंचयैः ॥ विश्रामार्थेसुपुष्ट्यर्थं एतत्प्रातःप्रदीयता ॥ स्पृष्टंविष्णुदिनेनेह सर्वपा-
पहरेणहि ॥ यद्येतन्नप्रयच्छध्वं तिथेःप्राभातिकंमम ॥ साहंविष्णुदिनोपेता भविष्येवैसहस्रधा ॥ निराशाकुलिशेनैव विच्छिन्ना
त्रिदशालयात् ॥ पापादीन्विबुधार्थेहि पापसंजननायच ॥ प्राप्यानुज्ञांहिदेवेन्द्रास्तथान्येभ्योविशाम्यहं ॥ वशिष्ठउवाच ॥ तन्मो-
हिनीवचःश्रुत्वा सुराःसर्वेमहीपते ॥ संमंत्र्यसुचिरंकालं दिगंबरपुरोगमाः ॥ यमसंस्थापनार्थाय वैकुण्ठध्वंसनायच ॥ पाखण्डानां
चवध्यर्थं पापसञ्जननायवै ॥ पुरस्कृत्यतुविप्रेन्द्रं तथान्योभूसुरान्नृप ॥ ऊचुस्तेमोहिनींदेवा लोकसंमोहनायवै ॥ दत्तंमोहिनितेस्था-
नं प्रत्यूषसमयान्वितं ॥ दुष्टंहरिदिनोपेतं दशम्याप्रान्तसंज्ञितं ॥ नैतज्जंमेनदुष्टंवै नैतद्दैत्यैर्नदानवैः ॥ विविधैस्तुकृतंसुभ्रु उपवा-
सव्रतस्त्विदं ॥ अस्मिन्स्थितायांत्वयिमाधवस्य पूजांकरिष्यन्तिचयेमनुष्याः ॥ तेषांहियद्वैसुकृतंसमस्तं त्वंभुंक्ष्वदेविनचशंशयोत्र ॥
सूर्योदयविहीनंतु दशम्याःप्रान्तसेवनं ॥ पद्मनाभदिनेसूक्तं नदास्येहंफलंतव ॥ प्रतापंसूर्यहीनंतु दशम्याश्चारुलोचने ॥ एका-
दशीविहीनंतु क्षपयिष्यन्तियेनराः ॥ उपवासैर्व्रतैर्दानैस्तथाजागरणैःशुभैः ॥ सर्वमावर्जितंपुण्यं यास्यतेतवमोहिनि ॥ अप्रभा-
तांकितोह्यन्ता दशम्यांगर्हितंसदा ॥ दृश्यादृश्योमहीपाल युक्तोहरिदिनेनतु ॥ निष्फलंभवतेनृणां सुव्रतस्यार्जनेसदा ॥ देवैः
प्रहृष्टैस्तुतदामहीप स्थानेश्रुतेमोहिनिमोहयुक्ता ॥ वभूवहृष्टासहसूर्यजेन मेनेकृतार्थंशरणंतदातु ॥ संसाधितंकार्यमिदंसुराणां भ- ॥ ६९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्मावशेषेतुकृतेतुदेङ्के ॥ चैतन्यमात्रेपरमात्मकेस्मिन् संमार्जितोरुक्मकृतस्तुपन्थाः ॥ नीतंमयाचात्मकृतंहिवाक्यमुक्तंमयावाक्य-मिदंकरोमि ॥ एवंविमृष्यबहुधासुमतेमहीप प्रणम्यदेवांस्तुतदाचमोहिनी ॥ प्रातस्थितासूर्यविनाकृतेतु कालेदशम्याजनमोह-नाय ॥ इमानिरूपस्यविनानियुक्ते प्रहृष्टरूपामथकामपूर्णा ॥ प्रातस्थितांतांसविलोक्यमोहिनीं सहृष्टरूपोवचनंजगाद ॥ त्वया प्रतिष्ठाममचारुनेत्रे कृतात्रिलोकेषुचयत्तुसम्यक् ॥ विभेदितोरुक्मविभूषणस्य करीणसंस्थःपटहःसुघोषः ॥ हृष्टकार्येजनःसर्वे प्र-त्ययःकुरुतेत्विति ॥ सूर्योदयस्पृशीघोषा दशमीगर्हितातदा ॥ सचाभूत्युदयन्नृणां मोहनायभविष्यति ॥ मोहनाद्धतनिष्पत्ति र्भविष्यतिचयत्फलं ॥ भवितामवितादेवि तवसर्वंनसंशयः ॥ मयाचपापिनांतेषां शासनार्थंपटेक्षरैः ॥ भविष्यतिलिपिंसुभ्रु अलं-घ्यदेवदानवैः ॥ योगोदशम्याश्विनाचयुक्तः प्रसिद्धयेतद्भुवनत्रयेस्मिन् ॥ विहायतांमतिपितृयोगयुक्तां पटेस्थितांदृश्यतिदृश्यसं-ज्ञे ॥ समंहितेनामविशालनेत्रे संमोहिनीत्येवजनोब्रवीति ॥ विमोहयित्वाजननंसमस्तं पटेमदीयेलिखितंकरोषि ॥ दृष्टिस्त्वने-नैवहिकर्मणाते स्थानंस्वकंगच्छसुचारुनेत्रे ॥ इत्येवमुक्तातपनस्यपुत्रः प्रशंस्यतांब्रह्मसुतांप्रहृष्टः ॥ जगामदेवैःसहनाकलोकं करे गृहीत्वासत्रुचित्रगुप्तं ॥ गतेषुदेवेषुविमोहिनीसा विमोहयामासजगत्समस्तं ॥ प्राप्तंसमास्थायदिनेशहीनं प्रध्वंसनंसर्वसुपुण्यग-जन् ॥ इतितेकथितंराजन् पुराणंपापनाशनं ॥ रुक्मांगदस्यचरितं सर्वदुःखक्षयंकरं ॥ श्रोतव्याश्रद्दधानेन परंस्वस्त्ययनंशिवं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणानान्तेनपापानि विलयंयान्तिमानद ॥ सूर्योदयेतमोयद्वद्धहायामपिसंस्थितं ॥ धन्यंयशस्यमायुष्यं सर्वशत्रुनिवर्हणं ॥
श्रोतव्यंराजपुत्रेण श्रद्दधानेनपार्थिव ॥ जयान्विताविशेषेण शौर्यस्यचविवृद्धये ॥ श्रोतव्यंब्राह्मणैराजन पुत्रपौत्रशुभावहं ॥ अ-
पुत्रोलभतेपुत्रं धनार्थीधनमुत्तमं ॥ विद्यार्थीलभतेविद्यां शृण्वञ्चरितमादितः ॥ रुक्मांगदस्यभद्रन्ते राजसूयफलप्रदं ॥ कथितं
तेमयाभूप किमन्यच्छ्रोतुमिच्छसि ॥ वशिष्ठवचनंश्रुत्वा मान्धाताराजसत्तमः ॥ पप्रच्छेदंमहाबाहुर्निश्चयार्थंमहायशाः ॥ एका-
दश्यांतदाराजा चक्रवर्त्तिर्महाबलः ॥ मान्धाताउवाच ॥ भगवन्द्वादशीकल्पं यथावद्वक्तुमर्हसि ॥ उपोष्याकाभवेत्पुण्या कासु-
पोष्याथपातकं ॥ वशिष्ठउवाच ॥ दशमीशेषसंयुक्तामुपोष्यैकादशींफलात ॥ संवत्सरकृताज्जन्तुः सुखाद्धीयेतपार्थिव ॥ दशमी
शेषसंयुक्ता गान्धार्यासमुपोषिता ॥ तस्याःपुत्रशतंनष्टं तस्मात्तांपरिवर्जयेत ॥ दशम्येकादशीयत्र तत्रसंनिहितोनरः ॥ एका-
दशीचपुण्याच तत्रसंनिहितोहरिः ॥ पूर्वविद्धामयायातु पित्रेकर्मणिगण्यते ॥ कलार्द्धेनापिविद्धास्याद्दशम्येकादशीचया ॥
तदाह्येकादशींत्यक्त्वा द्वादशीसमुपोषयेत ॥ द्वादश्यामुपवासेतु त्रयोदश्यांतुपारणे ॥ एकादशीऋषीणांतु द्वादशीचक्रपाणि-
नः ॥ एकादशीयदानस्याद्दुपोष्याद्वादशीतदा ॥ एकादश्याकलात्वेका द्वादश्यास्तुकलाद्वयं ॥ द्वादशद्वादशीहन्ति त्रयोद-
श्यांतुपारणा ॥ कलाद्वयंत्रयंवापि द्वादशींचह्यतिक्रमात् ॥ एकादशीमुपोषित्वा तत्रधर्मफलंलभेत ॥ एकादशीद्वादशीच ति- ॥ ६६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यन्तेचत्रयोदशी ॥ भूस्पृशासातिथिर्ज्ञेया सर्वपापहराशुभा ॥ उपवासःकृतंतस्यां महापातकनाशनः ॥ एकादशीमुपोष्यैव द्वा-
दशीमथवानृप ॥ त्रिमिश्रामपिकुर्वीत नदशम्यायुताक्वचित ॥ द्वादशीसमुपोष्यैव पक्षयोरुभयोरपि ॥ यथाशुक्लातथाकृष्णा
विशेषोनास्तिकश्चन ॥ यथासुपूजितोगौरः कृष्णोवावेदविद्विजः ॥ सन्तारयतिदातारं द्वादशीचतथास्मृता ॥ दिनक्षयेतुसंप्रा-
प्ते उपोष्याद्वादशीशुभे ॥ दशमीशेषसंयुक्तां नकुर्वीतकदाचन ॥ तिथिवृद्धौतथाहन्यां संप्राप्तेवादिनत्रयं ॥ संदिग्धेषुचवाक्येषु
द्वादशीसमुपोषयेत् ॥ नशङ्खेनपिबेत्तोयं नहन्यात्कूर्मशूकरौ ॥ एकादश्यांनभुञ्जीत पक्षयोरुभयोरपि ॥ एकादशीद्वादशीच
एकार्थेकार्यतःपृथक् ॥ नरनारायणौदेवावेकात्मानौयथाद्विधा ॥ सब्रह्महासगोघ्नश्च सुरापोगुरुतल्पगः ॥ एकादश्यांतुयोभुक्ते प-
क्षयोरुभयोरपि ॥ गृहस्थेनविशेषेण कार्यमेकादशीव्रतं ॥ एकादश्याविनारण्डा यतिश्चसुमहामते ॥ पचन्तीत्यन्धतामिस्रे याव-
दाहूतसंप्लवं ॥ नगविद्धातुयाषष्ठी शिवविद्धातुपञ्चमी ॥ दशम्येकादशीविद्धा तत्रनोपवसेन्नरः ॥ सुपोष्याद्वादशीचैषा एका-
दश्याकलापिवा ॥ दिनक्षयेतुसापुण्या नदशम्याकदाचन ॥ एकादशीद्वादशीच विशेषणत्रयोदशी ॥ तत्रक्रतुशतंपुण्यं त्रयो-
दश्यांतुपारणे ॥ द्वादशीद्वादशंहन्ति पूर्वविद्धाउपोषिता ॥ तस्मात्सर्वप्रयत्नेन पूर्वविद्धांविवर्जयेत् ॥ पृथिव्यांवैष्णवान्विप्रान वि-
ष्णुशास्त्रविशारदान् ॥ चीर्णव्रतान्शुचिन्विद्वान् द्वादशींप्रतिबोधयेत ॥ येपुराणंनजानन्ति समासान्नचलक्षणं ॥ तेषांवाक्यंन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्त्तव्यं गर्हितास्तेस्वकर्मभिः ॥ येषांनकारणंदानं नविप्रानजनार्दनः ॥ मन्वादयश्चस्मृतयस्तेषांवाक्यंपरित्यजेत् ॥ मान्धाता-
उवाच ॥ विघ्नविध्वंसिनीनाम वैशाखसितपक्षजा ॥ द्वादशीकेनविधिना कर्त्तव्यावदमेगुरो ॥ किंपुण्या।किंफलाब्रह्मन् भवेद्विघ्नप्र
भञ्जनी ॥ केमन्त्रापूजनेस्नाने दानेचद्विजसत्तम ॥ एतत्सर्वंसमाचक्ष्व प्रसन्नोयदिमेभवान् ॥ वशिष्ठउवाच ॥ शृणुराजन्नवहि-
तो द्वादश्याःपरमंविधिं ॥ येनविघ्नानिनश्यन्ति जन्मकोटिकृतानिवै ॥ वैशाखसितपक्षस्य संपूर्णाद्वादशीयदा ॥ भवेन्नृपतिशा-
र्दूल बुधवारकरान्विता ॥ तदायत्नेनकर्त्तव्या व्रतेन्नृपतिसत्तम ॥ एकभक्तेननक्तेन तथैवायाचितनच ॥ कर्त्तव्यानरशार्दूल द-
शम्यादिदिनत्रयं ॥ द्वादश्यामुपवासस्तु गृह्णीयान्नियमंबुधः ॥ निराशनोहंद्वादश्यां संपूज्यगरुडध्वजं ॥ प्रभातेद्विजसंयुक्तं
भोक्ष्येहंमधुसूदनं ॥ एवंनियमवान्स्नात्वा मध्याह्नेप्रयतात्मवान् ॥ नद्यांतडागेगर्त्तेवा गृहेवानियतःशुचिः ॥ स्नात्वासंपूजयेद्देव-
मुपहारवरैर्नरः ॥ ॐकेशवायनमःपादौ विघ्नविध्वंसिनेनरः ॥ नारायणायेतिशिखां माधवायचमाधविं ॥ गोविन्दायललाटेच
ऊरुभ्यांविष्णुमर्चयेत् ॥ मधुसूदनायजंघेच पादौचश्रीधरायच ॥ हृषीकेशायेतिमुखं नाभिंपङ्कजनाभये ॥ दामोदरायबाहु-
भ्यां कृष्णायेतिशिरस्तथा ॥ त्रिभिश्चविधिवत्कृत्वा पुष्पधूपानुलेपनैः ॥ एवंसंपूज्यदेवेशं गन्धपुष्पानुलेपनैः ॥ ततस्तस्याग्रतः
कुंभं सिततण्डुलपूरितं ॥ अक्षतंतण्डुलंन्नूनं सितवस्त्रावगुण्ठितं ॥ स्थापयेत्तत्रदेवेशं सुवर्णघटितंन्यसेत् ॥ पूर्वोक्तेनैवविधिना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूजयेत्परमेश्वरं ॥ पुष्पधूपादिनैवेद्यैर्देशकालोत्तरैःशुभैः ॥ पुष्पाञ्जलिंततोवद्ध्वा प्रार्थयेत्सुसमाहितः ॥ धर्मार्थकाममोक्षाणां वाच्यायत्कारिताहिवै ॥ विघ्नानितानिनश्यन्तु त्वत्प्रसादाज्जनार्द्दन ॥ एवंप्रसाद्यदेवेशं तंगुरुंपूजयेन्नरः ॥ अलंकारोपहारैश्च दूर्वाश्लक्ष्णक्षतैस्तथा ॥ संपूज्यविधिवत्पश्चाद्देवेशंप्रतिपादयेत् ॥ उत्पत्तिस्थितिसंहार कर्त्ताभोक्ताजगन्मयः ॥ विघ्नविध्वंसकारीमे प्रीयतांमधुसूदनः ॥ अनेनविधिनादत्वा प्रणम्यचपुनःपुनः ॥ ततोदक्षिणयासार्द्धं गृहान्नीत्वासमर्चयेत् ॥ अनेनविधिनाभूप कुर्याद्विघ्नविनाशिनीं ॥ द्वादशीतस्यनश्यन्ति विघ्नानिनरपुंगव ॥ धर्मेवार्थेचकामेच मोक्षेचान्यतमेतथा ॥ अन्येषुचैवकामेषु स्वर्गभुक्तिप्रदेषुच ॥ नविघ्नोजायतेतस्य नयमेतिपरस्परं ॥ एतत्तेकथितंराजन् विघ्नविध्वंसकारणं ॥ व्रतंव्रतवतांश्रेष्ठमुक्तवीज फलप्रदं ॥ यश्चेदंशृणुयान्नित्यं पठेद्वाभक्तिभावनः ॥ सयातिपरमंस्थानं सर्वविघ्नविवर्जितः ॥ भुक्तभोगानतःप्राप्य मरणंस्मरणंहरेः ॥ ततोयातिपरंस्थानं यस्मान्नावर्त्ततेपुनः ॥ ११९ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते विघ्नविनाशिनीनाम द्वादशी चत्वारिंशोध्यायः समाप्तः ॥ ४० ॥ छ छ छ छ छ छ छ छ छ छ छ छ

इदं पुस्तकं नेपालदेशे पं० नरदेव, मोतीकृष्ण शर्मणः आज्ञानुसारेण पं० कपिलदेव शर्मणा श्रीपाशुपत मुद्रणालयेऽङ्कितम् संवत् १९६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूचना ।

यद्यपि भाग्यवद्भोग्यानि वस्तुनि वहूनि प्रतिजनपदं समुपलभ्यन्ते तथापि निजकुल क्षुण्णएव पन्था ज्यायानिति मन्यमानानां नेपालाभिजन महाशयानां अन्यदेशियानांच एतद्देशीय बस्त्राभरण, भाषापुस्तक, पञ्चाङ्गादीनि भि. पि. ब्यवहारेणापि साध्यानि भवन्तु इतिविचार्य वाराणस्यां चौखम्बा सँस्कृत पुस्तकालयाधिपति " हरिदास-गुप्तो " युष्माभिः प्रतिपुरुषी कृतोऽस्ति इति—

आर्यजनानां शुभाभिलाषि—

पं० नरदेव,मोतिकृष्णशर्म्मणः " पाशुपत यन्त्रालय " नेपाल.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिलघुनारदीयपुराणान्तर्गतं रुक्माङ्गदचरितंसमाप्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह. नं. ९६६८S

अथलघुनारदीयपुराणान्तर्गत रुक्माङ्गदचरितप्रारम्भः

मू. २५१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विज्ञप्तिपत्रम् ॥

पुरा महर्षिवेदव्यासेन कलियुगोद्भवाः मनुष्याः विद्यायुर्द्रव्यैश्चानेकोपद्रवैर्यज्ञयागादिकर्मकरणे समर्था न भविष्यन्ति यज्ञादिना विना स्वर्लोकप्राप्तिस्तेषां कथं भविता इति विचार्य दयालुःपरमलोकोपकारिणः महर्षिणा ते मनुष्येभ्यो यज्ञयागादिना भवबन्धनेभ्यो मुक्तोभूत्वोत्तमलोकप्राप्ता भवेयुरित्यभिप्रायेणाष्टादशमहापुराणानि कृतवान् तेषु मध्ये कानिचित् पुराणानि अतीवदुर्लभतरेण मुद्रिता नसन्ति तेषु दुर्लभतरेषुमध्येपि अष्टादशमहापुराणान्तर्गतलघुनारदीयपुराणोयं दर्शनेष्वपि दुर्लभिभूतेनायमन्धकाररूपकलेर्नाशनाय दीपस्वरूपभूतो लघुनारदीयपुराणान्तर्गत रुक्माङ्गदचरितस्य प्रकाशनाय च स्वार्यग्रन्थानां लोपोमाभूदित्यपेक्षया कलौ अपरवेदव्यासस्वरूप परमोपकारि श्रीगुरुपुरोधेति प्रसिद्ध स्वजाक्षीत्युपपद श्रीजनकराजशर्मणा द्विजेन्द्रेण सर्वप्रकारेणास्मत् सहायं दत्तवान् आर्यग्रन्थार्यदेशयोरुन्नतसमृद्धौ आर्यग्रन्थस्य स्वदेशादेव प्रकाशने सर्वभावेनास्मत्सहायं ददुः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आर्यग्रन्थानुरागिजनादपि आर्यग्रन्थं स्वभूषणोयं मत्वा आग्रहंचेत कुर्वंतु तदायं नारदीयपुराणस्यान्यखण्डानपि मुद्रयामस्तथाप्राचीन दुर्लभार्यान्य ग्रन्थानपि आर्यजनसहायेन प्रकाशयितुमिच्छामः ॥

आसास्महे यदस्मिन् विचारपूर्वकं संशोधितेऽपि ग्रन्थेऽज्ञानाद्दृष्टिदोषाद्वा स्थितमस्त्यशुद्धादि तत्सारासारविवेकविद्भिर्विद्वद्भिर्दयार्द्रदृष्ट्या संशोधनीयमिति ॥

श्रीराजकीय पाठशालाध्यापक नेपालेत्युपनामक पं० जीवनाथशर्मणा संशोधिता ॥

वहुपरिश्रमेण कृत्वा लब्धत्वात्परिश्रमपूर्वक संशोधनीयकारितत्वाच्च ग्रन्थोयं पाशुपतयन्त्राधीशेन सर्वभावेन स्वायत्तीकृतमस्ति ॥

शुभाभिलाषि

पं० नरदेव, मोतिकृष्ण शर्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नारदीयपुराणान्तर्गत रुक्माङ्गदचरित खण्डस्थ विषयाना सूचिः ॥

अध्याय.	पत्राङ्क.
१ वशिष्ठंप्रति मान्धातृप्रश्न द्वादशीमहात्म्यवर्णनं एकादश्या महत्वकथनं.	१
२ सूतंप्रति शौनकादि प्रश्नस्तिथिविवर्णंचेति.	१
३ सूतंप्रति शौनकादिप्रश्न रुक्मांगदेन पार्थिवेनासमुद्रान्ते समस्तजनैरेकादश्युपवासनीयामिति पटहं अवादयत् सर्वैर्लोकैरेकादशीसेवनानान्तरं सर्वनरकसून्यं अभवत् तद्राष्ट्रेयेकेचिद मरन्ति ते गरुडारूढा विष्णोःपदं प्रयान्ति यमनारदसंवादं रुक्मांगदवर्णनं यमपारितापंचेति.	२
४ नारायणंप्रति यमचित्रगुप्तयोः सविनयं विलापः	५
५ समवर्तेः स्वेनैवात्मश्लाघा कथनं.	६
६ रुक्मांगदंप्रति ब्रह्मवाक्यं.	७
७ मोहिनी सृष्टिर्मोहिनी शिक्षा प्रस्थापनंचेति.	७
८ मोहिनीबरदानंमोहिनीमन्दरागमनंच.	१०
९ धर्मांगदवर्णनं धर्मांगदेराज्यलक्ष्मीस्थापनं रुक्मांगदमन्दरगमनं.	११
१० मन्दरेवामदेबरुक्मांगदसंवादो नृपः केनकर्मणावासुन्दर्योमामदनेवप्रतिभाति.	१२
११ वामदेवेन रुक्मांगदपूर्ववृत्तान्तकथनं राजामन्दरपर्यटनावसरे मोहिन्याः सप्तस्वरविसिष्टगीतश्रवणम् पश्चात् मोहिनिरुक्मांगदसमागमः	१४
१२ मोहिनी रुक्मांगदसंवाद स्ववंशवर्णनं मोहिनीवरदानं.	१६
१३ नगरंप्रति मोहिन्यानयनं.	१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ १ ॥

अध्याय.	पत्रांक.
१४ ततो महारण्येगच्छतस्तु कस्मिंश्चित् सुष्कपर्णपूरिगरंध्रेमुशली तिष्ठति दैवयोगेन शैन्धवखुरेण विदलीकृतासाहाहेत्यवदत् तदनंतरं शीतलतोयमानीय तामसिञ्चयत् चेतनाप्राप्तासाह्यात्मवृत्तंन्यवेदयत् नृपेण तस्मै विजयासंभवपुण्यंदत्तवान् तदनंतरं सादिव्यरूपाजातेति	१८
१५ नगरप्रवेशानंतरं पुत्रानुशासनं	२१
१६ पितुरादेशान्मोहिनीसेवनंमोहिन्याअनेकाभरणवस्त्रदानम् संध्याबलिप्रबोधनम् साकलपुराधिवासि ब्राह्मणगणिकयोर्वृत्तान्तकथनम्	२२
१७ मोहिनीभोजनेच्छया भांडवीक्षणम् पड्रसकरणम्. राजोपचितव्यंजनादिनाभोजनं मोहिनिसंध्यावल्योःसंवादे मोहिनी एवंगुणान्वितस्यास्याहंशुश्रूषाकर्तुंसमर्थाभवामीवान वेतिचिंतासमाकुलाशीघ्रमाहरनृपंतेन रहितामुहूर्तमपि नतिष्ठामीत्यब्रवीत्	२५
१८ नृपस्तदन्तिकंप्राप्य किंकारणेनाहूतासीत्यभाषत तच्छ्रुत्वा निष्प्रयोजनमानीताक्षीरसागरमहवरात् इत्यादिवाक्यैर्नृपं समर्थैतनयेपिराज्यभारंवीक्षसे संध्यावलीसमात्रैलोक्येनारीदुर्लभा पतिव्रता मांभस्मकरणेसमर्था बहुनाकिमिहोक्तेनतदनंतरं धर्मांगदेनसर्वामातरःसंबोधनम	२७
१९ रुक्माङ्गदक्रीडावर्णनं धर्माङ्गदप्रतापवर्णनं लोकसुखकथनंच	२९
२० धर्माङ्गदविद्याधरयोर्युद्ध धर्माङ्गदविजयोविद्याधरकन्याहरणंच	३०
२१ धर्मांगदविजयवर्णनं धर्मांगदविवाहकरणं प्रजापालनंच.	३१
२२ रुक्मांगदेन सर्वकर्मक्रियां त्यक्त्वाप्येकादशीसेवनंनत्यक्तवानितिवर्णनं.	३३

॥ १ ॥

अध्याय.	पत्रांक.
कार्तिकमासमाहात्म्यकथनंच.	
२३ चातुर्मास्यव्रतवर्णनम्	३५
२४ रुक्मांगदमोहिन्योः संवादेराजनूयदिमेप्रीतोसि चेद्धरिवासरे नृपव्रतभंगेमोहिनीउद्योग मोहिनीसंबोधनं भोजनंकुर्वित्यादिकथनं मोहिनी कथयाति गुर्विणिगृहस्थक्षीणरोगिशिशुचिरजातराजाभारवहसंग्रामाक्षितिसेविनांपतिव्रतानांच उपवासोनयुक्त इत्यादिकथनं.	३५
२५ हरिवासरेभोजनं विहाययदन्यद्रोचसेतत्सर्वं कर्त्तास्मीतिनृपवाक्यानंतरमेतद्व्यतिरिक्तं किमपिनेच्छामि वेदेष्वपिउक्तमस्तीत्यादि मोहिनीवाक्यं.	३८
२६ यदिपातालाच्छीर्यते पृथ्वीजलधिःशोषमायातिहिमवान् परिवर्तयेत् उष्णत्वं पावकस्त्यजेत् तथापिनाहं हरिवासरेन्नं नत्यजामि इत्युक्तएवंधर्मराज्योभवस्वकृतकृत्यागमिष्यामीतिब्रुवतिब्राह्मणैःसहजगाम एतस्मिन्नेवकाले धर्मांगदोवराश्वारूढः समाजगामकोलाहलं श्रुतवान् मोहिनीमपृच्छत देविकेनापमानितासि इत्युक्ते पूर्ववृत्तांतंकथयति.	४०
२७ ततो धर्मांगदःपितुःसमिपं गत्वाइदमूचे तात त्वां सानृतीवदन्ति मयिजीवाति कस्मादनृती भविष्यसि दुर्लभतरमापि अस्यैप्रयच्छ नृपःप्राहकीर्तिर्नस्यतु असत्योवाभवाम्यपि हरिवासरे भोजनं नकरिष्यामीत्यादिकथनं.	४३
२८ ततो उभयोःसंविदंज्ञात्वा संध्यावलीमुवाच मातरेनां शांतवय नृपस्य हरिवासरे भोजनायस्थितांश्लक्ष्णयागिरा संध्यावली सद्वीपवनकाननंराज्यं गृहाणेत्यादिवाक्यैर्बोध्यमानापिसानबुबुधे एवंतवममचप्राणहरं तथालोकानांच	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्याय,	पत्रांक.
प्राणहरंवाक्यं तयशःभर्तुःकीर्तिः पुत्रप्रसंसाममधिग्विवादः	४३
२९ स कीदृशंवाक्यं व्याहर आत्मनोनिधनोवा पुत्रस्यनिधनोवा भर्त्रर्थैकरोमि ममकौमारिभावे मतिपतुः काष्ठपाटकसखीभिःसहिता वनेकाष्ठपाटको यत्रास्ते तत्र मया काष्ठीलाकाष्ठमध्ये दृष्टा नवनीतनिभोदेहोमुखंचाञ्जनसंनिभं साध्वांक्षेण गृहीता सावेपमाना मूर्छनांप्राप्ता मया जलेन संसिक्ता चेतनान्विता मानुषींवाचं व्याहरत् साकळेपुरे कौण्डिन्यइत्येवसर्वकर्मयिद्ब्राह्मण आसीत् तस्य दुहिताहं कुलीनायब्राह्मणाय ददौ मद् भर्ता राजमंदिरं ययौ तत्र वेश्याः नृपगृहं प्रविशत्यस्तेनैका वेश्या समानीता मया तस्याभरणादिकं हारितं सर्वमपि क्षेत्रभांडादिकं विक्रीय नदनदीपतिं नावमारुह्य तरसा लवणोदधिं प्रविष्टोगिरिशृंगमारुरोह तालाधस्तात्ससुष्वाप तत्रागाद्राक्षसोघोरो गर्जमा ने - यथाघनस्तन्वंगीं काशिपतेःपुत्रींरत्नावलीमंकेनादाय आजगाम तस्य भार्याप्रश्रयोपेता अब्रवीत् पतिकामाहं पृच्छामीत्यनेकवाक्यालापकथनं.	४४
३० राक्षस्या ब्राह्मणविश्वमनं राक्षसवधकथनं काशीमहात्म्यवर्णनंचेति.	४९
३१ काशिपतये राक्षसस्य सर्ववृत्तान्त कथनं ब्राह्मणरत्नावल्योर्विवाहकरणं ब्राह्मणेन स्वज्येष्ठपत्नींप्रति भारवाहक प्रेषणं सखीभिर्ब्राह्मण्या निन्दावर्णनं ब्राह्मणी स्वगृहगमनंचेति.	५०
३२ संध्यावलीकाष्ठिलोपाख्यानंमाघस्नान माहात्म्यवर्णनं भीमैकादश्युपवाशफल कथनंच.	५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्याय.	पत्रांक.
३३ एवंचेत् देहि पुत्राशिरो मह्यं यदिष्टं हृदयाधिकं इतिमोहिन्या वचनानंतरं धनजनादिकं सर्वं त्यजामि किंतु द्वादशीसेवनं न त्यजामीति सन्ध्यावली वाक्य कथनम्.	५६
३४ राजन् धर्मपालय द्वादश्यां माभुङ्था पुत्र व्यापादयेत्यादि कथनं.	५६
३५ मोहिनींप्रति राजवाक्यं राजानंप्रति धर्मांगदवाक्यं च.	५७
३६ पुत्रवचनं श्रुत्वा संध्यावल्या मुखंवीक्ष मोहिन्याः क्रूरं वचनं श्रुत्वा पुत्रनाशाय मतिं चकार शंखचक्रगदापद्महस्तो गरुडारूढो सर्वलक्षणलक्षितो नारायणदेहे सराजारुक्मांगदलीनो वभूवेत्यादि कथनं.	५९
३७ यमनारायणयोः संवाद मोहिनीसमागम वर्णनं च.	६०
३८ मोहिनीं भस्मकरणं वर्णनं.	६२
३९ मोहिनी भस्मकरणानंतरं विप्रप्रसादनं वर्णनंचेति.	६३
४० मोहिन्यास्थाननिर्णयस्तिथिविवरणम् विघ्नविनाशिनीद्वादशी माहात्म्य वर्णनंतस्याःप्रभावकथनं चेति.	६४

इति

श्रीककारादिकालीकासहस्रनाम साङ्गोपाङ्ग

अद्य भवदग्रे हर्षदायकद्रव्यं नीत्वा ह्युपस्थितोस्मि. श्रीगुह्यकाल्या कृपया भवतां पूर्णसहायेन श्रीककारादिकालिकासहस्रनामाख्यपुस्तकं मुद्रितमस्ति सान्तिकाल्या ह्यनेकसहस्रनाम्नो लभ्यन्ते किन्त्वयं ककाराद्यप्रभृति नमुद्रित निम्नलिखितमप्यतिदुर्लभ दैववसाल्लब्धांप्यशुद्धत्वात् पाठकरणेतिकष्टः सदुखदूरीकरणायासीतिवर्षसंमितवृद्धेनापि पाठकरणेसमर्था भवेयुरित्यासयेन मुक्ताफलवन्मनोहर स्थूलाक्षरकीलकैः सुष्टुपत्रेषु ककारादिकालिकासहस्रनामाभिधानं मुद्रितमस्ति तस्मादार्यवरैरास्मिन्ग्रन्थे अवश्य प्रीतिपूर्वकसुदृष्टिकरिष्यन्ति मूल्यमपि सर्वेषां सुखेच्छया विदेशीयकागजेषु दशाणकाः स्वदेशीयकागजेषु द्वादशाणकाः स्थापितमस्ति ॥

॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ ॥ पान्तुवो जलदश्यामा शार्ङ्गज्यापातकर्कशाः ॥ त्रैलोक्य मण्डपस्तंभा श्चत्वारोहरिवाहनः ॥ सुरासुरशिरोरत्न निर्घृष्ट मणिरञ्जितम् ॥ हरिपादांबुज द्वंद्वमभीष्टप्रदमस्तुवः ॥ मान्धाताउवाच ॥ पापेंधनस्यघोरस्य शुष्कार्द्रस्य तुभूरिशः ॥ कोवह्निर्दहनेतेषां तद्भवान्वक्तुमर्हसि ॥ नाज्ञातंत्रिषुलोकेषु चतुर्मुखगृहौजसः ॥ विद्यतेतवविप्रेन्द्र त्रिविधश्चसुनिश्चितम् ॥ अज्ञातं पातकंशुष्कं ज्ञातमार्द्रमुदाहृतम् ॥ एष्यवाप्यथवातीतं बर्त्तमानंचतद्भवेत् ॥ बह्निनाकेनतद्भस्म भवेदेतद्ब्रवीहिमे ॥ बशिष्ठउवाच ॥ श्रूयतां नृपशार्दूल बह्निनायेननिर्दहेत ॥ शुष्कार्द्रपातकंघोरं एष्यातीतसमुद्भवम् ॥ संप्राप्य बासरंविष्णो र्योनरःसंयतेन्द्रियः ॥ उपवासपरोभूत्वा पूजयेन्मधुसूदनं ॥ मान्धातर्दानशीलश्च रात्रौजागरणान्वितः ॥ विशोधयति पापानि कितवश्चधनंयथा ॥ एकादशीसमुत्थेन बह्निनापातकेंधनम् ॥ भस्मतांयातिराजेन्द्र आजन्ममरणोद्भवम् ॥ नेदृशंपावनंकिञ्चित् नराणामिहविद्यते ॥ यादृशंपद्मनाभस्य दिनंपापप्रणाशनम् ॥ तावत्पापानिदेहेस्मिन् तिष्ठन्तिमनुजाधिप ॥ यावन्नोपवसेज्जन्तुः पद्मनाभदिनंशुभम् ॥ अश्वमेधसहस्राणि राजसूयशतानिच ॥ एकादश्युपवासस्य कलांनार्हतिषोडशीं ॥ एकादशेन्द्रियैःपापं यत्कृतंभवतिप्रभो ॥ एकादश्युपवासेन तत्सर्वंविलयंब्रजेत् ॥ एकादशीसमंपुण्यं पापत्राणंनविद्यते ॥ व्याजेनापिकृताराजन् नदर्शयतिभास्करी ॥ सर्वसौख्यप्रदाह्येषा सर्वारोग्यप्रदायिनी ॥ सुकलत्रप्रदाह्येषा राजन्पुत्रप्रदायिनी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नगङ्गानगयाभूप नकाशीनचपुष्करम् ॥ नचापिकौरवंक्षेत्रं नरेवानचदेविका ॥ यमुना चन्द्रभागाच पुण्याभूय हरेर्दिनात् ॥
अनायासेनराजेन्द्र प्राप्यतेवैष्णवंपदम् ॥ रात्रौजागरणंकृत्वा समुपोष्यहरेर्दिनम् ॥ दशैवमातृकेपक्षे दशराजेन्द्रपैतृके ॥ प्रि-
यायादशपक्षेषु पुरुषानुद्धरेन्नरः ॥ आत्मनासहराजेन्द्र नयनेवैष्णवंपदम् ॥ सर्वपापविनिर्मुक्तो विष्णुलोकेवसेन्नरः ॥ चिन्ताम-
णिमपिह्येषा अथवापिनिधेःसमा ॥ सकल्पपादपप्रख्या वेदवाक्योपमातथा ॥ द्वादशीतिप्रपन्नाहि नरानरवरोत्तमः ॥ तेद्वंद्ववा-
हवोजाता नागारिकृतकेतना ॥ तद्विद्यापीतवस्त्रीहि प्रयांतिहरिमन्दिरम् ॥ एषप्रभावोहिमया द्वादश्यापरिकीर्तिता ॥ पापेन्ध-
नस्यघोरस्य पावकाख्योमहीयते ॥ हरेर्दिनंसदायोष्यं नरैर्धर्मपरायणैः ॥ यदिच्छेद्विपुलान्कामान् पुत्रपौत्रादिकांस्तथा ॥ हरि-
दिनमुपवासी योनरःसंयतात्मा प्रविशतिनपुनर्वै भूपकोशेजनन्या ॥ बहुवृजिनसमेतः कामभोगाविभूतो व्रजतिपदमचिन्त्यं
लोकवन्द्यस्यविष्णोः ॥ २६ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते द्वादशीमाहात्म्ये प्रथमोध्यायः ॥ १ ॥ छ छ
बशिष्ठउवाच ॥ इममेवमहाप्रश्नं नैमिषारण्यबाशिनः ॥ पप्रच्छुरमलासूतं व्यासशिष्यंमहामुनिम् ॥ सचस्पृष्टोमहातेजा एकाद-
श्याःसविस्तरम् ॥ माहात्म्यंकथयामास उपवासविधिक्रमात ॥ तद्वाक्यंसूतपुत्रस्य श्रुत्वाद्विजबरोत्तमाः ॥ माहात्म्यंचक्रिणोर्हं-
स्य सर्वपापःप्रशान्तये ॥ पुनःपप्रच्छुरमलाः सूतंपौराणिकंतदा ॥ अष्टादशपुराणानि भवाञ्ज्ञानातिमानद ॥ महाभारतमुक्ता- ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नि सकासात्कालिजस्यतु ॥ तत्रास्तियत्रवेदेषु पुराणेषुस्मृतिष्वपि ॥ चरितेरघुनाथस्य शतकोटिप्रविस्तरे ॥ सोस्माकंसंशयःक-
श्चिद् हृदयेपरिवर्त्तते ॥ तद्भवानचिरेणेह प्रब्रवीतुयथार्थतः ॥ तिथेःप्रान्तमुपोष्यंहि अहोस्मिन्मूलमुच्यताम् ॥ दैवेपित्रेसमाख्या-
हि नावेद्यंविद्यतेतव ॥ सूतउवाच ॥ तिथेःप्रान्तंसुराख्यंहि उपोष्यंकवयोविदुः ॥ पैत्र्यंमूलंतिथेःप्रोक्तं शास्त्रज्ञै धर्मकोविदैः ॥
अतःप्रान्तमुपोष्यंति तीर्थधर्मफलेसवः ॥ मूलंहिपितृतृप्त्यर्थं तिथेःप्रोक्तंमनीषिभिः ॥ पूर्वविद्धाप्रकर्त्तव्या तृतीयाषष्ठिसंयुताः ॥
अष्टम्येकादशीभूता धर्मकामार्थवांछसि ॥ पूर्वविद्धाद्विजश्रेष्ठाः कर्त्तव्यासत्तमासदा ॥ दर्शश्चपौर्णमासीच पितुःसांवत्सरंदिनम् ॥
पूर्ववद्धेमकुर्वाणो नरकंप्रतिपद्यते ॥ हानिश्चसन्ततेःप्रोक्ता दौर्भाग्यंसमवाप्नुयात् ॥ एतच्छ्रुतंमयाविप्राः कृष्णद्वैपायनात्पुरा ॥
ऋषीणांधर्मसंवाद स्तिथिसंदेहतेतथा ॥ आदित्योदयवेलायां यास्तोकापितिथिर्भवेत् ॥ पूर्णासात्वनुमन्तव्या प्रभूतानोदयंविना ॥
पारणेमरणेनृणां तिथिस्तात्कालिकीमता ॥ पैत्र्येस्तमपवेलायां स्पृशत्युचैवगम्यते ॥ नतत्रोदयनीग्राह्या दैवेत्युदयिनीतिथिः ॥
षड्हंशोधयेत्प्राज्ञ स्तिथिंदैवज्ञचिन्तकान् ॥ तिथेःप्रमाणंविप्रेन्द्राः क्षपाकरदिवाकरौ ॥ पूर्वायासंगदोषेण नोयोष्यास्नानपूजने ॥
वर्जयन्तिनरास्तज्ज्ञायासान्तुचतुरोद्विजाः ॥ तदूर्ध्वंस्नानपूजादि कर्त्तव्यंतदुपोष्यतेः ॥ नदिवाशुद्धिमाप्नोति तदारात्रौविधीयते ॥
दिनकर्मतुशेषंहि कर्त्तव्यंसर्वरीमुखे ॥ विधिरेष समाख्यातो नराणामुपवासिनाम् ॥ अन्यायामपिविप्रेन्द्रा द्वादश्यामरुणोदये ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 स्नानार्चनक्रियाकार्या दानहोमादिसंयुता ॥ त्रयोदश्यांहिशुद्धायां पारणेपृथिवीफलं ॥ शतयज्ञादिकंचापि नरःप्राप्नोत्यसंशयं ॥
 एतस्मात्कारणाद्विप्राः प्रत्यूषेस्नानमाचरेत् ॥ पितृतर्पणसंयुक्त मल्पांद्दष्ट्वैवद्वादशीं ॥ महाहानिकराह्येषा द्वादशीलंघितानृणां ॥
करोतिधर्माहरणमस्नातेच सरस्वती ॥ क्षयेवाप्यथवावृद्धौ संप्राप्ते हरिवासरे ॥ उपोष्यद्वादशीपुण्या पूर्वविद्धां विवर्जयेत् ॥ ऋ-
षयऊचुः ॥ यदानप्राप्यतेसौते द्वादश्याःपूर्वसंभवा ॥ तदोपवासोहिकथं कर्त्तव्योमानवैर्वद ॥ उपवासदिनंसूत यदाभवतिपूर्वया ॥
द्वितीयेह्नियदानस्यात् स्वल्पाप्येकादशीतिथिः ॥ सन्देहेतत्रसञ्जाते द्वादश्येकादशीभवेत् ॥ तत्रोपवासोविहितः कथंतद्वदसूतज ॥
सूतउवाच ॥ यदानप्राप्यतेविप्रा द्वादश्यांपूर्ववासरः ॥ रविचक्रार्द्धमात्रापि तदोपोष्यं परंदिनम् ॥ बह्वागमविरोधेषु विवदत्सु
द्विजेषुच ॥ उपोष्याद्वादशीपुण्या त्रयोदश्यांतुपारणम् ॥ एकादश्यांतुविद्धायां संप्राप्तेश्रवणेतथा ॥ सोपोष्याद्वादशीपुण्या स-
र्वपापक्षयावहा ॥ एषवोनिर्णयःप्रोक्तो मयाशास्त्रविनिश्चयात् ॥ किमन्यच्छ्रोतुकामाहि तद्वदन्तो वदन्तुमे ॥ ऋषयऊचुः ॥ यु-
गादीनांविधिंसूत वदस्ववदतांवर ॥ रवेःसंक्रमयोगानां नावेद्यंविद्यतेतव ॥ अमावास्याष्टकाकार्या सापिचैकानिरर्थकैः ॥ ए-
वंनसंशयंस्पृष्ठो वक्तुमर्हसिसूतज ॥ सूतउवाच ॥ द्वेशुक्लेद्वेतथाकृष्णे युगाद्ये कवयोविदुः ॥ शुक्लेपूर्वाह्णिकेग्राह्ये कृष्णेग्राह्येपरा-
ह्णिके ॥ अयनंदिनभोगाढ्यं संक्रमःषोडशःकला ॥ पूर्वाङ्कदक्षिणेभागे अतीतेचोत्तरायणे ॥ मध्यकालेतुविषुवे उदयाख्यःप्रकी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्त्तितः ॥ ज्ञात्वातिथिंनराःसम्यक् संवत्सरनिवेदिताम् ॥ कर्त्तव्यउपवासस्तु अन्यथा नरकंव्रजेत् ॥ पूर्वविद्धांप्रकुर्वाणो नरोधर्म
निकृन्तनी ॥ सन्ततेस्तुविनाशाय संपदोहरणायच ॥ परवेधोपिविप्रेन्द्रा दशम्येकादशींत्यजेत् ॥ सुरायाविन्दुनास्पृष्टंगंगांभइव
संत्यजेत् ॥ श्वदृष्ट्यापञ्चगव्यंच दशम्यादूषितांत्यजेत ॥ एकादशीद्विजश्रेष्ठाःपक्षयोरुभयोरपि ॥ पूर्वविद्धाःपुरादत्ता तिथयःकु-
शकेतुना ॥ दानवेभ्योद्विजश्रेष्ठाः प्रीणनार्थंमहात्मना ॥ अकालेयद्भवेद्दत्तं अपात्रेचद्विजोत्तमाः ॥ सक्रोधैश्चैवयद्दत्तं तद्दत्तम-
सुरेषुवै ॥ यद्बुच्छिष्टेनदत्तंवै यद्दत्तंपतितेषुच ॥ स्त्रीजितेषूच यद्दत्तमसूरेषुच यद्भवेत् ॥ यदेकवाससादत्तं यद्दत्तं जलवर्जितम् ॥
पुनःकीर्त्तनसंयुक्तं तद्दत्तमसुरेषुवै ॥ तस्माद्विप्रानविद्धाहि कर्त्तव्यैकादशीक्वचित् ॥ विद्धाहन्तिपुरापूर्वां श्राद्धेचबृषलीपतिः ॥
जप्तंदत्तंहुतंस्नातं तथापूजाकृतंहरेः ॥ पूर्ववेधेक्षयंयाति तमःसूर्योदयेयथा ॥ जीर्णंपतिंयौवनगर्विता यथा त्यजन्तिनार्यो झष-
केतनार्दिता ॥ तथाहिवेधं विबुधात्यजन्ति तिथेर्द्विजाधर्म विशुद्धयेसदा ॥ ४८ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गद च-
रिते तिथिविवरणं नाम द्वितीयोध्यायः ॥ २ ॥ ६ ६ ६ ६ ६ ६ ६ ६

ऋषयऊचुः ॥ विस्तरेणसमाख्याहि विष्णोराराधनक्रियां ॥ ययासन्तोषमायाति प्रददातीसमीहितम् ॥ पूजितापरयाभक्त्या प-
वित्रैरप्युपक्रमै ॥ लक्ष्मीकान्तोजगन्नाथो निःशेषाघौघनाशनः ॥ सूतउवाच ॥ भक्तिग्राह्योहृषीकेशो नधनैर्धरणीसुराः ॥ भक्त्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संपूजितोविष्णुः प्रददातिसमीहितम् ॥ तस्माद्विप्राःसदाभक्तिः कर्त्तव्याचक्रपाणये ॥ जलेनापिजगन्नाथः पूजितःकेशिहाहरिः ॥
परितोषंव्रजत्याशु तृषार्त्तःसुजलैर्यथा ॥ अत्रापिश्रूयतेविप्राः आख्यानंपापनाशनम् ॥ रुक्माङ्गदस्यसंवादं ऋषिणागौतमेनह ॥
आसीद्रुक्माङ्गदोराजा सार्वभौमश्रियान्वितः ॥ भक्तःश्रीरक्षयेदेव नित्यतृप्तेनिरञ्जने ॥ नान्यंपश्यतिदेवेशात् पद्मनाभान्महीप-
तिः ॥ वारणंपट्टनंयज्ञे ददातिहरिवासरे ॥ अष्टवर्षाधिकोमर्त्यं स्त्वशीतिर्नहिपूर्यते ॥ योभुङ्क्तेमामकेराष्ट्रे विष्णोरहनि पापकृत ॥
समेबध्यश्चदण्ड्यश्च निर्वास्येविषयाद्धनम् ॥ पितावायदिवापुत्रो भार्यावाप्यथवासुहृत् ॥ पद्मनाभदिनेभुङ्क्ते निग्राह्योदस्युवद्भ-
वेत् ॥ ददध्वंविप्रमुख्येभ्यो स्नायध्वंजाह्नवीजले ॥ एवंमद्वचनंकुर्वन् नान्नंभुनक्तुमामकं ॥ वासरेवासरेविष्णोः शुक्लपक्षेमहीप-
तिः ॥ अशुक्लेतुविशेषेण पटहंवादयत्यसौ ॥ एवंप्रघुष्टपटहे सार्वभौमेद्विजोत्तमाः ॥ गच्छाद्भिःसंकुलोमार्गः कृतोलोकैर्हरेर्द्विजाः ॥
येकेचिन्निधनंयान्ति भूपालविषयेनराः ॥ प्रमदावाद्विजश्रेष्ठा स्तेयान्तिहरिमन्दिरम् ॥ अवश्यंवैष्णवोलोकः प्राप्यतेवैनरैर्ध्रुवं ॥
व्याजेनापिद्विजाःकृत्वा द्वादशींपापनाशिनीं ॥ सोश्नातिपार्थिवंपापं योश्नातिहरिवासरे ॥ प्राप्नोतिपरमंधर्मं योनाश्नातिहरेर्दि-
ने ॥ ब्राह्मणोनैवहन्तव्यो इत्येषा वैदिकीश्रुतिः ॥ एकादश्यांनभुञ्जीत पक्षयोरुभयोरपि ॥ वैलक्ष्यमगमद्राजा रविसूनुर्द्विजोत्त-
माः ॥ लेख्यकर्मणि विश्रान्त श्चित्रगुप्तोभवत्तदा ॥ मार्जितानिचलेख्यानि पुण्यपापोद्भवानिच ॥ गच्छद्भिर्वैष्णवंलोकं स्वक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्मस्थैर्जनैः क्षणात् ॥ शून्यास्तुनरकाःसर्वे पापप्राणि विवर्जिताः ॥ भग्नोयाम्योभवन्मार्गो द्वादशादित्यतापितः ॥ सर्वेपिगरु-
डारूढा जनायांतिहरेक्षयम् ॥ दिवौकसस्तुयेलोकाः शून्यासर्वेतदाभवत् ॥ त्यक्त्वैवपितृदेवेभ्यो तीर्थदानादि सत्क्रियाः ॥ मुक्त्वै-
कांद्वादशींमर्त्या नान्यंजानन्तिचेदृशीं ॥ शून्येत्रिविष्टपे जाते शून्येषुनरकेषुच ॥ नारदोधर्मराजानं गत्वाचेदमभाषत ॥ ना-
क्रन्दः श्रूयते कस्मान्नराणां नरकेतव ॥ नचापिक्रियते लेख्यं किञ्चिद्दुष्कृतकर्मणाम् ॥ चित्रगुप्तो मुनिरिव स्थितोयं मौनसंयु-
तः ॥ कारणं ब्रूहि राजेन्द्र नयान्ति तव मन्दिरम् ॥ मानवाः पापकर्माणो कलिमाया समन्विताः ॥ एवमुक्ते तु वचने
नारदेन महात्मना ॥ प्राह वैवस्वतो राजा किञ्चित दैन्य समन्वितः ॥ आर्य नारद भूपालः पृथिव्यां सांप्रतंस्थितः ॥
सद्भिभक्तो हृषीकेशे पुराणे पुरुषोत्तमे ॥ पुरोधयति विप्रेन्द्र सकलं पटहेनहि ॥ नभोक्तव्यं नभोक्तव्यं संप्राप्ते हरिवासरे ॥ यः
कश्चिन्मनुजो भुङ्क्ते समेदण्ड्यो भविष्यति ॥ तद्भयाद्धिजनाःसर्वे द्वादशींसमुपासते ॥ व्याजेनापिद्विजश्रेष्ठ द्वादशीसमुपो-
षिता ॥ प्रयातिवैष्णवंलोकं दाहप्रलयवर्जितम् ॥ द्वादशीसेवनाल्लोकाः प्रयान्तिहरिमन्दिरम् ॥ तेनराज्ञाद्विजश्रेष्ठ सर्गोलुप्तो
मयाधुना ॥ कृताहिनरकाःशून्या लोकाश्चत्रिदिवौकसां ॥ विश्रान्तंलेखकंलेख्यं लिखितंमार्जितंजनैः ॥ एकादश्युपवासस्य
माहात्म्यंत्वीदृशंमुने ॥ ब्रह्महत्यादिपापानि नभुक्तानिजनैर्द्विज ॥ समुपोष्य दिनंविष्णोः प्रयान्तिपरमांगतिं ॥ सोहंकाष्ठम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योभूत्वा मृगाधिपइवाधुना ॥ निर्विषोनेत्रकर्णौवा सन्ध्याहीनोथवाद्विजः ॥ स्त्रीजितस्तुपुमान्यद्वत् षण्डोवाप्रमदापतिः ॥ त्यक्तुकामस्त्वहंब्रह्मन् लोकपालत्वमीदृशम् ॥ यास्याम्मि ब्रह्मभवनं धात्रेकथयितुंस्वयं ॥ निर्व्यापारोनियोगीतु नियोगे तिष्ठतेतु यः ॥ स्वामिवित्तंसमश्नातः सयातिनरकंध्रुवम् ॥ सूतउवाच ॥ एवमुक्त्वायमोविप्रा नारदेनसमन्वितः ॥ ययौविरिंचिभवनं चित्रगुप्तान्वितोविभुः ॥ सदद्दर्शसमासीनं मूर्त्तामूर्तैःसमावृतम् ॥ वेदाश्रयंजगद्वीजं सर्वेषां प्रपितामहं ॥ स्वयंभूतान्जनिलयमोंकाराक्षरमव्ययं ॥ शुचिःशुचिपरंहंसं तुरीयंब्रह्मलाञ्छनं ॥ उपास्यमानंविबुधै र्लोकपालैर्दिगीश्वरैः ॥ इतिहास पुराणैश्च वेदैर्वै विग्रहस्थितैः ॥ मूर्त्तिमद्भिःसमुद्रैश्च नदीभिश्चसरोवरैः ॥ देहवद्भिस्तथावृक्षै रश्वत्थाद्यैरशेषतः ॥ वापीकूपतडागैश्च मूर्तिमद्भिश्च पर्वतैः ॥ अहोरात्रैस्तथापक्षै र्मासैःसंवत्सरैर्विभुः ॥ कलाकाष्ठानिमेषैश्च ऋतुभिश्चायनैर्युगैः ॥ मन्वन्तरैस्तथाकल्पै र्निमेषोन्मेषकैस्तथा ॥ ऋक्षैर्योगैश्चकरणैः पौर्णमास्यान्तमिक्षपैः ॥ सुखैर्दुःखैर्द्विजश्रेष्ठा लाभालाभैर्जयाजयैः ॥ अश्वमेधादिभिर्यज्ञै र्मूर्त्तिमद्भिरुपासितं ॥ सत्यानृताभ्यांपापेन धर्मेणोपास्यतेविभुः ॥ कर्मबद्धैश्चपुरुषै रात्मभूतैरुपास्यते ॥ सत्वेनरजसाचैव तमसाचपितामहं ॥ शान्तमूढातिघोरैश्च विकारैःप्राकृतैर्विभुः ॥ इन्द्रियैर्विषयैश्चैव मूर्त्तिमद्भिरुपास्यते ॥ वायुनादेवदेवेशः श्लेष्मपित्तादिभिस्तथा ॥ आनन्दरूपेणविभुः परमेनसमन्वितः ॥ अनुक्तैरपिभूताद्यैः संवृतोलोककृद्विभुः ॥ देवर्विप्रैर्मुनिवरै रितिहासैःस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मभिः ॥ दुरुक्तकटुवाक्यैश्च मूर्त्तिमद्भिरुपास्यते ॥ तेषांमध्येविशच्छौरिः सचीदेववधूर्यथा ॥ विलोकयं धरास्पृष्टं नालमुक्तुंतु किञ्चन ॥ तंप्रविष्टं यमंदृष्ट्वा सकायस्थंसनारदम् ॥ तेविस्मितामिथश्रोचुः किमयं भास्करिरित्विह ॥ संप्राप्तो लोककर्त्तारं द्रष्टंदेवं पितामहं ॥ निर्व्यापारःक्षणमपि योयंनास्तेरवेःसुतः ॥ सोयमद्यागतःकस्मात् कच्चित्क्षेमंदिवौकसां ॥ आश्चर्यातिशयंमन्ये संमार्जितपटस्त्वयं ॥ सलेखकस्तुसंप्राप्तो दैन्येनमहताबृतः ॥ नकेनचित्पटोह्यस्य मार्जितोधर्मभूरिणा ॥ यन्नदृष्टंश्रुतंवापि तदिहैवप्रदृश्यते ॥ एवंकथयतांतेषां भूतानां भूतशासनः ॥ निपपातप्रतोभूमौ ब्राह्मणोरविनन्दनः ॥ भूलंकृतोयमाशाखी त्राहि त्राहि रुदाभिच ॥ पटाभूतास्मि देवेश संमार्जितपटःकृतः ॥ त्वयानाथेनसकलं पश्यामिकमलासन ॥ सूतउवाच ॥ एवंब्रुवन्मुनिश्रेष्ठो वभूवद्विजसत्तमाः ॥ ततोहलहलाशब्दः सभयं समपद्यत ॥ योहिनोदयते सर्वान् लोकांस्थावरजङ्गमान् ॥ सोयं रोदितिदुःखार्त्तः कस्माद्वैवस्वतोयमः ॥ सत्येयंलौकिकीगाथा सर्वथाप्रतिभातिनः ॥ जनसंतापकृत्ताप मचिरेण प्रपद्यते ॥ नहिदुष्कृतकर्त्ताहि नरःप्राप्नोतिशोभनं ॥ ततोनिवारयामास वाहुस्तेषां वचस्तदा ॥ लोकानांसमवेत्तानां मतंज्ञात्वाहि वेधसः ॥ निवार्यलोकसंलापं शनैरुत्थापयंहरिः ॥ भुजाभ्यां साधुपीनाभ्यां लोकमूर्तिरुदारधीः ॥ विह्वलं तस्यचायान्तमासने संन्यवेशयत ॥ सकायस्थमुवाचेदं व्योमव्यापी रवेःसुतं ॥ केनत्वमभिभूतोसि केनस्थानाद्विवासितः ॥ केनापमार्जितोदेव पटोलोक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पटस्तव ॥ ब्रूहिसर्वमशेषेण कुशकेतोस्त्वमग्रतः ॥ यःप्रभुस्तात सर्वेषां सतेकर्त्तासमुन्नतिं ॥ अपनेष्यति मार्त्तण्डो दुःखन्तेह-
दिसंस्थितं ॥ सएवमुक्तस्तु समीरणेन दिनेशसूनुस्तमथाबभाषे ॥ विलोक्यवक्त्रं कुशकेतुसूनो सगद्गदं मन्दमुवाचमन्दः ॥
 ६६ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते यमपरितापो नामः तृतीयोध्यायः ॥ ३ ॥ छ छ छ छ छ
यमउवाच ॥ शृणुमेवचनं शंभो पितामहपितामह ॥ मरणादधिकंदेव यत्प्रतापस्यखण्डनं ॥ नियोगीनानियोगंयः करोतिकम-
लासन ॥ प्रभोर्वेत नमश्नाति सभवेत्काष्ठकीटकः ॥ योहिलोभाद्धरेर्वित्तं प्रजाभ्योवामहामते ॥ नियोगीनरकंयाति यावत्क-
ल्पशतत्रयं ॥ निस्पृहोनाचरेद्यस्तु नियोगंपद्मसंभव ॥ कृमिकूपेषलुल्लुठन् सदासनरकेवसेत ॥ आत्मकार्यपरोयस्तु स्वामिकार्यं
विलुंपति ॥ भवेदश्मनिपापात्मा आखुः कल्पशतत्रयं ॥ नियोगीयस्तुभूत्वावै स्ववेश्मनिचयोजयेत् ॥ भक्त्यावैकर्मकरणे मा-
र्जारो जायतेनरः ॥ सोहंदेवतवादेशात् प्रजाधर्मेणशासयन् ॥ पुण्येनपुण्यकर्त्तारं पापान्यायेनकर्मणा ॥ सम्यग्विचार्यमुनिभि
र्भवद्भिश्चसदाप्रभो ॥ कल्पादौवर्त्तमानस्ययावदद्यदिनंगतं ॥ सोहंत्वदीयंहिविभो नियोगंनैवसक्नुयां ॥ रुक्माङ्गदेनतेभग्नो नि-
योगोभूभुजाक्षितौ ॥ भयाद्यस्यजगन्नाथ पृथिवी सागरांबरा ॥ नभुङ्क्तेवासरेविष्णोः सर्वपापप्रणाशने ॥ विहायसर्वधर्मांस्तु वि-
हायपितृपूजनं ॥ विहायदेवपूजातु सर्वतीर्थादिसत्क्रियां ॥ योगसांख्यावुभौत्यक्ता तथाप्राणनिरोधनं ॥ त्यक्तास्वाध्यायहोमौ ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु कृत्वापापानिभूरिशः ॥ प्रयाति वैष्णवंलोकमुपोष्य हरिवासरे ॥ मनुजाःपितृभिःसार्द्धं तथैवचपितामहैः ॥ तेषामपीहपित-
रः पितृणांपितरस्तथा ॥ तथामातामहायान्ति मातुर्येजनकास्तथा ॥ तेषामपिजनेतारो जनितृणांचपूर्वशः ॥ एतद्दुःखं पुन-
र्देव ममस्तकभेदनं ॥ यत्पूर्वेपितरोयान्ति मार्जयित्वा लिपिंमम ॥ पितृणांवीजयोयेस्युः र्द्धात्र्याःकुक्षौ धृताविभो ॥ यदेकेन
कृतंकर्म तदेकेनैवभुज्यते ॥ तंनिरस्यकृतंदेव वीजंधान्य समुद्भवं ॥ तारयेत्सउभौपक्षौ ध्वंसितोयस्यविग्रहः ॥ वीजभोक्ताभवे-
त्सोमो धाताधार्य विसोदरे ॥ एतस्यात्सक्षयुग्मंतु वारयेन्नरपुंगवः ॥ नभार्यायाभवेद्बीजं नभार्याकुक्षिधारणं ॥ कथंतस्याजग-
न्नाथ पक्षोयातिपरंपदं ॥ यामातुः पुण्यमाहात्म्यं नूनंमेशिरसोव्यथा ॥ नमेप्रयोजनंदेव योगेनशद्दशेनवै ॥ एकादश्युपवासी-
यः समांत्यक्त्वाहरिंव्रजेत् ॥ कुलत्रयं समुद्धृत्य स्वात्मनासहपङ्कज ॥ त्यक्त्वातुममार्गंतु प्रयान्ति हरिमन्दिरं ॥ नयज्ञैस्तादृशं
देव गतिमाप्नोति मानवः ॥ नतीर्थैर्नापिदानाद्यै र्नव्रतैर्विष्णुवर्जितैः ॥ नजलैः पावकैश्चापि मृतःप्राप्नोतितांगतिं ॥ योगैर्वासं
युगैर्वापि भृगोर्वा पतनैस्तथा ॥ यादृशंसमवाप्नोति उपोष्यहरिवासरं ॥ गतिंगतिमतांश्रेष्ठ सत्यमेतदुदीरितं ॥ हरेर्दिनेधातृफ-
लांगलिप्तो विमुच्यवांछारसभोजनोद्भवं ॥ प्रयातिलोकं धरणीधरस्य विभ्रष्टकर्मापिमनुष्यजन्मा ॥ सोहंनिरासस्तु विहीनकर्मा
तवागतःपादसरोजयुग्मं ॥ विज्ञप्तमन्त्रादि यदाप्तकालं कुरुष्वसर्गस्थितिनाशहेतोः ॥ येस्युःसदापापकृतो विहीना यन्मामकैर्भू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तगणैर्मनुष्याः ॥ नियन्त्रिताःशृङ्खलरज्जुबन्धनैः समीपगास्तेवशगाभवेयुः ॥ भमस्तुमार्गो रवितापयुक्तः सदुःखदाताततिरांज-
नेभ्यः ॥ विमुच्यकुंभी सकलाजनौघाः प्रयान्ति तद्धाम परात्परस्य ॥ २९ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते य-
म विलापोनाम चतुर्थोध्यायः ॥ ४ ॥ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७
यमउवाच ॥ दृश्यतांसमनुप्राप्तः पन्थादेबस्यचक्रिणः ॥ कुत्सितैर्गच्छमानैस्तु नरैस्त्रिभुवनार्चितैः ॥ अप्रमाणमहंमन्ये लोकंवि-
ष्णोर्जगत्पते ॥ योह्यपुण्यजनौघैस्तु नसंघोयातिखर्वतां ॥ माधवैःसेवनेहंस समस्तेन पितामह ॥ स्वकर्मस्थाजनाः सर्वे शुचयो
व्याप्यवृत्तयः ॥ उपोष्यवासरंविष्णो र्लोकंयान्ति नृपाज्ञया ॥ सोस्माकंचमहाशत्रु र्भवतांचविशेषतः ॥ निग्राह्योयंजगन्नाथ भ-
वेद्दण्ड्योमहीपतिः ॥ तेनबर्षसहस्रेण शासनात्क्षितिमण्डलं ॥ अप्रमेयोजनोनीतो वैकुण्ठंहरिबल्लभं ॥ आरोपयित्वागरुडे कृत्वाद-
हंचतुर्भुजं ॥ पीतवस्त्रपरीधानं स्रग्विणं चारुलोचनं ॥ यदिस्थास्यतिदेवेशे सोद्यत्वांमाधवप्रियः ॥ समस्तमेष्यतेलोकः पार्थि-
वोनात्रसंशयः ॥ एवं दण्डपटौह्येष तवपत्र्यांनियोजितः ॥ लोकपालत्वमेतत्तु मार्जितंतेनभूभुजा ॥ रुक्माङ्गदेन देवेश ध-
न्यासासधृतोयया ॥ सर्वदुःख विनाशाय मात्राजातोगुणाधिकः ॥ किमपत्येनजातेन मातुःक्लेशकरेणहि ॥ यो नतापयतेशत्रुं
ज्येष्ठमासिविभास्करः ॥ वृथास्त्रीभाववन्ध्यासौ जातावेवकुपूरुषः ॥ प्रोच्यते मातृहासद्भि र्वृथातस्यैवजीवितं ॥ यस्यनस्फुरतेकी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्तिं घनस्थेवशतह्रदाः ॥ यःपितुर्नोद्धरेत्पक्षं विद्ययावावलेनवा ॥ मातुर्जठरजोरोगः सप्रसूतोधरातले ॥ धर्मेचार्थेचकामेच प्रतीतोयोभवेत्सुतः ॥ पापहासस्यते सद्भि र्मद्दूतागोचरोहिसः ॥ एकेत्रवीरसूर्लोके विरिंचेनात्रसंशयः ॥ ययारुक्मांगदोजातो मलिपेमर्जिनायवै ॥ नेदंव्यवसितंदेव केनचित्क्षितिपेनहि ॥ पुराणेपि जगन्नाथ नश्रुतंपटमार्जनं ॥ सोहंनजीवामि जगत्पतेद्य दृष्ट्वाक्षितीशं हरितत्परंतं ॥ प्रवादयन्तं पटहंसुघोरं प्रलोपयन्तं ममदेशमार्गं ॥ १७ ॥ इतिश्री लघुना० रु० पञ्चमोध्यायः ॥ ५ ॥ ब्रह्मोवाच ॥ किमाश्चर्य्यंत्वयादृष्टं कथंवाखिद्यतेत्वया ॥ सद्गुणेष्वपियस्तापः सतापोमरणांतिकः ॥ यस्योच्चारणमात्रेण प्राप्यतेपरमंपदं ॥ तद्दुपोष्यकथंशौरे नगच्छति नरोदिवं ॥ एकोपिकृष्णस्यकृतःप्रणामो दशाश्वमेधावभृथनतुल्यः ॥ दशाश्वमेधीपुनरेति जन्म कृष्णप्रणामी नपुनर्भवाय ॥ कुरुक्षेत्रेणकिंतस्य किंकाश्यासेवयाथवा ॥ जिह्वाग्रेवर्त्ततेयस्य हरिरित्यक्षरद्वयं ॥ ब्राह्मणःस्वापचींगच्छन्विशेषेणरजस्वलां ॥ अश्नातिसुरयापक्कं मरणेहरिमुच्चरन् ॥ प्राणहिंसारतासर्वे मिथ्यावादसमन्विताः ॥ अभक्षाशनसंजातं विहायाघौघसंचयं ॥ हरेरुच्चारणादेव वैकुण्ठंप्रातियांतिहि ॥ प्रयातिविष्णुसायुज्यं विमुक्तोभवकिल्विषैः ॥ यस्योच्चारेभवेन्मोक्षः कथंतस्याउपोषणेः ॥ येनासौगीयतेसोपि विन्दते पुरुषोत्तमं ॥ लीलयाप्राचरेदेवं शृण्वन्वापि जनार्द्दनं ॥ गंगांभःप्लुत पुण्यत्वे सनरःसमतांव्रजेत् ॥ अस्माकंतुजगन्नाथो जनितापुरुषोत्तमः ॥ कथंदूषयासिप्राज्ञ तस्यवासरसेविनम् ॥ यस्त्वंनचूर्णि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्तैस्तु यस्त्वंवद्धोनतैर्द्दढं ॥ तदस्माकंकृतंमान मेतत्त्वंनविबुध्यसे ॥ योनियोगीनजानाति नृपभक्तान्क्षिताविह ॥ सुहृत्स्वजन
संयुक्तः सतैर्निग्राह्यतेपुनः ॥ राजाज्ञानंनियंतव्या सापराधानियोगिना ॥ स्वामीप्रसादाच्छुद्धास्ते नियच्छेयुर्नियोगिनं ॥ त-
थाहिपापकर्त्तारः प्रणतायेजनार्द्दने ॥ कथंसंपदितातेषां भवान्स्याज्ञातु नन्दन ॥ शैवोभास्करभक्तोवा मद्भक्तोवा दिवाकरे ॥
करोतितवसाहायं हरिभक्तो नभास्करे ॥ सर्वेषामेवदेवाना मादिष्ठामधुसूदनः ॥ मधुसूदनभक्तानां निग्रहोनोपपद्यते ॥ व्या-
जेनापिकृतायैस्तु द्वादशीपक्षयोर्द्वयोः ॥ अपमानेकृतेतैस्तु नतवाहंसहायवान् ॥ कृतेतुमार्गे तवसूर्य्यसूनो भवेदनीतिर्ममहर्ष
हन्त्री ॥ विपर्य्ययोब्रह्मसदानपुण्ये कृतेविमर्द्दे सहविष्णुभक्तेः ॥ १८ ॥ इतिश्रीलघुनारदीय पु० रु० चरितेब्रह्मवाक्यं नाम ६
सूतउवाच ॥ स्वयंभुवोवचश्श्रुत्वा नारदोत्थाप्रपीडितं ॥ नम्रुक्तदेवदेवेश धर्मराजोमतिप्रभो ॥ वाक्यंत्वेताहृशंवक्तु नियोगेतव
संस्थितं ॥ सधर्मस्थापनेयुक्तं पापानांनिग्रहेरतं ॥ यमउवाच ॥ प्राप्तंतातमयासर्वं तदंघ्रिनिमिताविह ॥ नाहंयास्येपुनःकर्तुं नि-
योगंतवपद्मज ॥ प्रशासतिमहीपाले ह्माटकांगदसंज्ञके ॥ तमेकंदैवतंश्रेष्ठं संप्राप्ते हरिवासरे ॥ यदिचालयसेधैर्य्या त्ततोहंतवकिं-
करः ॥ समेशत्रुर्महाशंभो तेनलुप्तःसदामम ॥ तमेकंभोजयत्वंहि कार्ष्णेहनि महीपतिं ॥ कृतकृत्योभविष्यामि गयापिण्डकृतो
यथा ॥ अद्यप्रभृतिदेवेश यैर्नरैःसंस्मृतोहरिः ॥ उपोषितस्ततोवापि ननियस्या पितामहं ॥ हरिरितिसकृद्भच रन्तिदस्युच्छलव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शतोपिहियेजनाःकदाचित् ॥ जननिजठरमध्ये मुक्तमार्गा ममनालिंपिंप्रविशन्तितेहिमर्त्या ॥ इत्युदीरितमाकर्ण्य देवर्षिर्नारद-स्तथा ॥ प्रेरयामासदेवेश संसारार्थंयमस्यहि ॥ वशिष्ठउवाच ॥ नारदस्यचवाक्येन यमसंमाननायच ॥ चिंतयामास देवेशो विरिंचिःकुशलाञ्छनः ॥ चिन्तयित्वाक्षणंदेवः सर्वभूतैस्तुदूषितः ॥ भूतसंत्रासनंरूपं जगृहेसतदाविभुः ॥ तस्मिन्नुत्पादयामास प्रमदां लोकमोहिनीं ॥ सर्वयोषिद्वरादेवी मनसानिर्मिताविभोः ॥ सावभूवाग्रतस्तस्य सर्वालङ्कारभूषिता ॥ दृष्ट्वापितामहस्तांतु रूपद्रविणसंयुता ॥ माचेतःपश्यतांह्येषा मामकं काममोहितं ॥ प्रत्यवायभयाद्ब्रह्मा चक्षुषीसंनिमीलयेत ॥ नसरागेणमनसा नसरागेणचक्षुषा ॥ चिन्तयेद्वा निरीक्षेद्वा जननींवाथवासुतां ॥ वधूंश्चभ्रातृदारांवा गुरुभार्य्यांनृपप्रियां ॥ सयाति नरकं घोरंस्वसारं चिन्तयेच्चयः ॥ दृष्ट्वापिप्रमदांह्येता यःक्षोभंव्रजतेनरः ॥ तस्यजन्मकृतंपुण्यं वृथाभवतिनान्यथा ॥ प्रसङ्गेदशसाहस्रं पुण्यमायाति संक्षयम् ॥ पुण्यस्यसंक्षयात्पापः पाषाणाखुर्भवेद्ध्रुवं ॥ तस्मान्नचिन्तयेत्प्राज्ञो नैवरागेणवीक्षयत ॥ जनन्यामपिपादौतुनदद्याद्द्वादशाब्दिकः ॥ सुतस्त्वभ्यंगकरणे किंपुनर्यौवनेस्थितः ॥ षष्ठ्यतीनांसुतोभ्यंगे नियुंजीतविचक्षणः ॥ वृद्धोवापियुवावापि वध्वापादौ नदापयेत् ॥ उभयोःपतनंप्रोक्तं रौरवेंगारसंचये ॥ यावधूदर्शयेद्यंगं विवृतंश्वसुरस्यहि ॥ पाणिपादस्मृतेगजन् कृमिभिर्भक्षतेचसा ॥ वधूहस्तेनयःपापः पादशौचंकरोतिच ॥ स्नानंवाप्यथवाभ्यंगं विवृतंश्वसुरस्यहि ॥ सूचीमुखैःकृष्णर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कै भक्षतेकल्पसंस्थितः ॥ तस्मान्नवीक्षयेन्नारीं वधूंवास्वसुतामपि ॥ साभिलाषेणमनसा पततेनरकेयतः ॥ एवंसंचिन्तयित्वाच
सूक्ष्मांदृष्टिंचकारह ॥ यदिदंवर्तुलंवक्रं सोन्नतंदृश्यतेशुभं ॥ अस्थिपञ्जरमेतद्धि चर्म्ममांसावृतंतथा ॥ वसामेदोस्थिनयने सोज्व-
लेस्त्रिगुणसंस्थिते ॥ अत्युच्छ्रितमिदंमांसं यत्स्तनाख्यं व्यवस्थितं ॥ निर्मांसतांदर्शयति त्रिवलिजठराश्रिता ॥ पुनरेवाधिकंक्षि-
प्तंमांसंजघनकर्म्माणि ॥ मूत्रद्वारमिदंगुह्यं यत्रमुग्धंजगत्त्रयं ॥ अपानवायुनाजुष्टं सर्वदैवातिकुत्सितं ॥ षडङ्गञ्चकृतातद्वज्जंघातद्व-
त्कृताध्रुवं ॥ गुल्फास्थितालितंमांसैः कथंसुन्दरतांव्रजेत् ॥ मांसमेदोवसासारं किंसारंदेहिनांवद ॥ विष्टामुत्रमयेकोषे कएवंरज्य-
तेबुधः ॥ एवंविरिंचिर्बहुधा विचार्य्यज्ञानचक्षुषा ॥ कृत्वाधैर्य्यमुवाचेदं तांनारींगजगामिनीं ॥ यथाहिमनसासृष्टा मयात्वंवर-
वर्णिनी ॥ तथाभूतासिचार्वंगि मनसोन्मादकारिणी ॥ तमुवाचहसन्बाला प्रणम्यचतुराननं ॥ पश्यमूर्च्छांशनं शम्भो जगत्
स्थावरजङ्गमम् ॥ मोहितंममरूपेण स्वयोनिजमकल्मषं ॥ सनास्तित्रिषुलोकेषु यःपुमान्ममदर्शनात् ॥ भवन्तमादितः कृत्वा
नक्षोभंयातिपद्मज ॥ आत्मस्तुतिर्नकर्त्तव्या केनचिच्छुभमिच्छता ॥ स्तवनान्नरकंयाति सुविद्वानपिमानवः ॥ तथापि स्तवनं
ब्रह्मन् कर्त्तव्यंकार्य्यहेतुना ॥ साहंसृष्टात्वयातात कस्यचित्क्षोभनायवै ॥ तदादिशजगन्नाथ क्षोभयिष्येनसंशयः ॥ मांदृष्ट्वाचे-
तनोदेव भूधरोपिविलीयते ॥ किंपुनश्चेतनोपेतः श्वासोच्छ्वासीनरस्त्विह ॥ तथाचोक्तंपुराणेषु नरोवीक्षणकर्त्तनं ॥ उन्मादका- ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णंनृणां दुश्चरव्रतनाशनं ॥ सन्मार्गेतावदास्ते प्रभवतिपुरुषस्तावदेवेन्द्रियाणां लज्जांतावाद्विधत्तेविनयमपिसमा लंवतेतावदेव ॥ भ्रूचापाकृष्टमुक्ताःश्रवणपथगतालीनपक्ष्माणएते यावल्लीलावतीनां हृदिनधृतिमुखाद्दृष्टिवालापतन्ति ॥ धिक्तस्यमन्दमनसःकुक-वेःकवित्वं यस्त्रीमुखंचशशिनश्चसमीकरोति ॥ भ्रूक्षेपविस्मितकटाक्षनिरीक्षितानि कोपप्रसादसहितानि कुतस्तुचन्द्रे ॥ पीतंहिम-द्यंमनुजेनशम्भोः करोतिमोहंत्वविचक्षणस्य ॥ स्मृतावद्दृष्टायुवतीनरेण विमोहयेद्देवसुराधिकाहि ॥ मोहनार्थंत्वयाकस्य निर्मि-ताप्रपितामह ॥ तदादिशजगन्नाथ त्रैलोक्यंमोहयाम्यहं ॥ ब्रह्मोवाच ॥ सत्यमुक्तंत्वयादेवि नासाध्यंभुवनत्रये ॥ त्वांपुरस्कृत्य सुभगे मत्तमातंगगामिनि ॥ सात्वंदूषयतेचेतो ममापिवरवर्णिनि ॥ तन्मयानिगृहीतन्तु भीरुज्ञानांकुशेनहि ॥ सात्वंकथंतुलो-कानां नचेतांस्यवतिष्ठसि ॥ दृष्ट्वावैतद्विशालाक्षि तवरूपैर्विमोहितं ॥ सममेवजगत्सर्वं निश्चेष्टमिवलक्षते ॥ यन्निमित्तंमयासृ-ष्टा तत्साधयवरानने ॥ वैदेशेनगरेराजा नाम्नारुक्मांगदःक्षितौ ॥ यस्यसंध्यावलीभार्य्या तवरूपोपमाशुभा ॥ यस्यांधर्मांगदो जातःपितुरप्यधिकोगुणैः ॥ दशनागायुतवलः प्रतापेतुरविप्रभः ॥ क्षमयायोधरातुल्यो गांभीर्य्ये सागरोपमः ॥ तेजसावह्निव-द्दीप्तः क्रोधेवैवस्वतोपमः ॥ योगेवैरोचनिर्यस्तु गतौचपवनोयथा ॥ सौम्यत्वेसोमतुल्यस्तु रूपेवैमन्मथोयथा ॥ काव्येषूशनस-स्तुल्यो योगीतेराजनन्दनः ॥ पित्राभुक्तंस्वकमिदं जम्बूद्वीपंवरानने ॥ धर्मांगदेनद्वीपानि सप्तभुक्तानिशोभने ॥ पितुस्तुपी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डयानेन नज्ञातंप्रमदासुखं ॥ स्वयंप्राप्ताःपरित्यक्ता येनभार्य्यास्त्वनेकशः ॥ योनवाक्याद्विचलति सदैवेहपितुःशुभे ॥ यस्यत्रीणिशतानीह मातृणांचारुहासिनि ॥ तथाहिकनकाभासे अविशेषेणपश्यति ॥ तस्यधर्मप्रतापस्य पुत्ररत्नान्वितस्यच ॥ समीपंगच्छचार्वंगि मन्दरे पर्वतोत्तमे ॥ तस्मिन्नेजतिराजासौ तुरगेणोपवाहितः ॥ तवगीतेनचार्वंगि मोहितोमुच्यवाजिनं ॥ आरोहतिगिरेःशृंगं ससंगंयास्यतित्वया ॥ तत्रदेवित्वयावाच्यं मिलित्वाभूभुजासह ॥ भार्य्यातेहं भविष्यामि महाराजनसंशयः ॥ यद्यद्ब्रवीम्यहंनाथ तत्तत्कार्य्यंत्वयाध्रुवं ॥ मोहितस्तवरूपेण तथेतिप्रतिपत्स्यते ॥ ततस्त्वंशपथैर्गृह्य दक्षिणेनकरेणवै ॥ वाक्यंकतिपयैःसुभ्रु दिनैरापततस्त्विति ॥ सुरतेतवचार्वंगि यथामुग्धोहिलक्ष्यते ॥ तदाप्रहस्यराजानं स्मरणीयंपुरावचः ॥ यत्त्वयाशपथाराजन् कृतंमद्वाक्यपालने ॥ तत्पालयमहीपाल सत्योयंशपथस्त्विति ॥ एवमुक्तेत्वयामुग्धे सराजासत्यगौरवः ॥ पालयामिनसन्देहो ब्रूहिकिंतेददाम्यहं ॥ एवमुक्तेतुवचने त्वयावाच्यो वरानने ॥ रुक्माङ्गदोमहीपालो धर्मांगदपिताशुभे ॥ नोपवासस्त्वयाकार्य्यः कथंचिद्धरिवासरे ॥ सुरतश्रमकारामे भवत्वंसमुपोषितः ॥ संमुखींयौवनोपेतां स्वभार्य्यांयोनसेवते ॥ सर्वोपेक्षीदुराचारः सयातिनरकंनरः ॥ त्रिरात्रमुपविद्धाहं त्वयाभूपउपोषणात् ॥ नाहंदिवसमेकन्तु शक्नोमिरहितात्वया ॥ श्राद्धकालेतुसंप्राप्ते उपविष्टेद्विजेकिल ॥ याचन्ती संगमंभार्य्या भोक्तव्यानृपपुंगव ॥ एवंसंबोध्यमानोसौ यदाराजावचस्तव ॥ न-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करिष्यतिचार्वंगि तदावाच्यमिदंवचः ॥ यदिनत्यजसेराजन् उपवासंहरेर्दिने ॥ स्वपुत्रस्य शिरस्छित्वा सहसैव वरासिना ॥ धर्मांगदस्यराजेन्द्र ममोत्संगे क्षिपत्विह ॥ यद्येतद्भाषितंत्वंहि नकरिष्यसिभूपते ॥ धर्मक्षीणोभवान्गन्ता नरकं नात्रसंशयः ॥ श्रुत्वात्वदीयंवचनं वराननेनदास्यते प्राणसमंहिपुत्रं ॥ संगृह्यवाक्यंवसुधामराणां संभोक्षतेमाधववासरेसौ ॥ ततोजनो यास्यतिपूर्वमार्गं यमान्तिकं किंकरपाशवद्धः ॥ लिपिप्रमाणं नरकाधिवासी भविष्यतेसाधुकृतेत्वयाहि ॥ निहन्तितनयंराजा यदिसत्वेनसंयुतः ॥ तदशेषमघंत्यक्त्वा पद्मनाभपदंव्रजेत् ॥ ७७ ॥ इतिश्री लघु ना० पु० रु० मोहिनीशिक्षा प्रख्यापनं नाम ७

वशिष्ठउवाच ॥ साश्रुत्वा ब्रह्मणोवाक्यं नारीकमललोचना ॥ उवाचनाममेदेहि येनगच्छामिमन्दरं ॥ पित्रानामप्रकर्त्तव्यं अपत्यानांजगत्पते ॥ नामपापहरं प्रोक्तं तत्कुरुष्व कुशध्वज ॥ तच्छ्रुत्वाच तदाब्रह्मा पुनरेवाब्रवीदिदं ॥ यस्मादिदं जगत्सर्वं त्वयासुन्दरिमोहितं ॥ मोहिनीत्येव तेनाम स्वगुणाढ्यंभविष्यति ॥ मोहावस्थंजगत्सर्वं दर्शनात्तेभविष्यति ॥ यदिनप्राप्यतेसुभ्रू त्वत्संपर्कसुखावहं ॥ एवमुक्ता वरारोहा प्रणम्यकमलासनं ॥ वीक्ष्यमाणामरौघेण प्रतस्थेमन्दराचलं ॥ तृतीयेनमुहूर्त्तेण संप्राप्ता गिरिमस्तकम् ॥ यस्यसंवेष्टनोनागो वासुकिर्नहिपूर्यते ॥ धृतोयोहरिणापूर्वं नधृतोदेवदानवैः ॥ षलक्षयोजनोसिन्धो यस्यवैगह्वरोभवेत् ॥ कूर्मदेहेन संपृक्तो योनभिन्नोगिरिर्महान् ॥ यत्ततायेनराजेन्द्र सिन्धोर्गुह्यंप्रदर्शितं ॥ गताब्रह्माण्डमार्गेण प-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योधेश्चगिरिर्महान् ॥ कूर्मास्थिघट्टनेयेन पावकोजनितोमहान् ॥ यस्मिन्संवसतेदेवः सहभूतैर्दिगंबरः ॥ नदेवै र्दानवैर्वापि दृष्टं
पृष्टंमहीपतेः ॥ दशबर्ष सहस्राख्ये कालेमहतिवर्त्तता ॥ केयूरघर्षणंयेन कृतंदेवस्यचाक्रिणः ॥ रत्नानांमन्दिरंयश्च बहुधातुसमन्वि-
तः ॥ क्रीडाविहारायदिवौकसांसदा तपस्विनांयत्तपसःप्रबृद्धये ॥ सुरांगनानां रतिबर्द्धनंतदा महौषधीनांप्रभवोनरेन्द्रः ॥ सहस्र-
मेकं अयुतंचमूले तत्संख्ययावै पृथुतांगतासौ ॥ दैर्घेपि तावन्तिचयोजनानि त्रैलोक्ययष्टीसमुपस्थितासौ ॥ सकाञ्चनै रत्नभृ-
तैस्तुशृंगैः प्रकाशयन्भूमितलंवियच्च ॥ यस्मिन्नभः कश्यपनन्दनाऽसौ इतस्तुतामेतिनिविष्टतेजाः ॥ काञ्चनंगिरिमत्युग्रं संप्रा-
प्ताकाञ्चनप्रभा ॥ सूर्यतेजोपहन्त्रीसा मन्दरं चारुकन्दरं ॥ कुर्वन्ति नृपकामार्थ मुपविष्टाशिलातले ॥ नीलेकान्तेतदादिव्ये स-
प्तयोजन विस्तृते ॥ तस्यांशिलायांराजेन्द्र लिंगंतिष्ठतिकोटिशः ॥ दशलक्षप्रमाणानि तिष्ठन्तिकोटिकोटिशः ॥ कोटिलिंगेतिवि-
ख्यातं प्रासादंप्रसनंपरं ॥ तस्मिन्बाला महीपाल चक्रेगीतंमनोहरं ॥ तंत्रीलयसमायुक्तं नानास्वरकरंपरं ॥ समीपबर्तिनीतस्य
भूत्वालिंगस्यभाविनी ॥ मूर्च्छनातालसहितं गान्धार ध्वनिसंयुतं ॥ तस्मिन्प्रवृत्तेराजेन्द्र गीतेमन्मथबर्द्धने ॥ सभूधराणांजाता-
हि स्पृहातस्यांमहीपते ॥ नैवचेदं मनोहारि गीतंतादृग्ववभूवनः ॥ यादृशंमोहिनीगीतं सर्वजन्तुमनोहरं ॥ मृगयूथाधिपाःसर्वे त-
स्यागीतिलयंगता ॥ श्रुत्वैवगीतंतु दिगंबरस्तु तेनैवरूपेणवरांगनायाः ॥ चचालधैर्यादथभोक्तुकामो विमोहितो देवबरोभ्यधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वत ॥ २४ ॥ इतिश्री लघुनारदीय पुराणे रुक्माङ्गदचरिते मोहिनी मन्दरागमनं नामाष्टमोध्यायः ॥ ८ ॥ ७ ७ ७
बशिष्ठउवाच ॥ रुक्माङ्गदोपि राजेन्द्र भुक्त्वाभोगान्हिमानुषान् ॥ संपूज्यवहुशोदेवं पीतांबर धरंहरीं ॥ दत्वामूर्ध्निपदंभूप शत्रू-
णां रणशालिनां ॥ कृत्वाशून्यंयमपथं जित्वावैवस्वतंयमं ॥ वैकुण्ठंचपदंभूप कृत्वापूर्णंचमानवैः ॥ आहूयतनयंकान्तं धर्माङ्गद-
मभाषत ॥ एतां बसुमतींपुत्र बसुपूर्णांसमन्ततः ॥ परिपालयबीर्येण स्वधर्मेणकृतश्रमः ॥ पुत्रेसमर्थेयोराजा राज्यंनप्रतिपादये-
त् ॥ तस्यधर्मस्तथाकीर्त्ति र्विनश्यति नसंशयः॥ समर्थेतनयेपुत्र योनयातिपितासुखं॥ पापीयान्सतुविज्ञेयो धर्मांगदजगत्त्रये॥
पितुर्भारक्षमःपुत्रो भारंनोद्वहतेपुनः ॥ मातुर्गोकर्णवज्जातो निर्वीर्यो विषबर्जितः ॥ सपुत्रोयोधिकः पुत्र पितुर्भवतिभूतले ॥ प्र-
काशयति सर्वत्र स्वकरैरिविभास्करः ॥ पुत्रद्दुर्नयजैर्दुःखै र्यस्यजागर्त्तिवैपिता ॥ सपुत्रोनरकंयाति यावदाभूतसंप्लवम् ॥ पितुर्व-
चनमाहृत्य सर्वंयः कुरुतेगृहे ॥ सयातिदेवसायुज्यं स्तूयमानोमहर्षिभिः ॥ सोहंप्रजाकृतैःपुत्र आसक्तः कर्मभिःक्षितौ ॥ नभुक्तं
नैवसुप्तंतु स्वेच्छयापालनेस्थितः ॥ समर्थेत्वयिशत्रुघ्न प्राप्तंसर्वसुखंमया ॥ विष्णुवासरभोक्तॄणां निग्रहेसंस्थितस्यमे ॥ केचिद्व्यव-
स्थितामार्गे सौरेकेचिद्व्यवस्थिताः ॥ विरिंचिमार्गगाश्चान्ये पार्वती संमतापरे ॥ सायंप्रातशिनास्त्वन्ये तथाचान्येग्निहोत्रिणः ॥
प्रवासेसंस्थिताश्चान्ये श्राद्धेष्वन्येव्यवस्थिताः ॥ बालोयुवाथ बृद्धोवा गुर्विणीवाकुमारिका ॥ रोगीवाविकलोवाथ नशक्तोप्यनु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पोषितुम् ॥ इत्येवंजल्पितंयैस्तु तान्निरस्यसमन्ततः ॥ वचोभिस्तुपुराणोक्तै र्दिवसैर्बहुभिस्त्वहं ॥ संबोधयित्वा बहुशः प्रजावैसुख
हेतवे ॥ निगृह्यतान्हरिदिने निराहारान्करोम्यहं ॥ शास्त्रदृष्ट्यातुविदुषो मूर्खंदण्डेनपुत्रके ॥ अनुशास्यकृताः सर्वे निराहारंहरे-
र्दिने ॥ अतोमे नसुखंकिंचि दवलीढंधरातले ॥ प्रजाःकाश्चिन्नदुःखेन भवित्रीकिलपुत्रके ॥ स्वेनधर्मेणवैपुत्र योरक्षेतप्रजानृपः ॥
तस्यमेह्यक्षयालोकाः पुराणाः कवयोविदुः ॥ सोहंप्रजाकृतेपुत्र संस्थितोनात्मनिक्वचित् ॥ सौख्यमिच्छाम्यहंभोक्तुं मृगयादिस-
मुद्भवं ॥ नपानद्यूतजंपुत्र कामयेहं कदाचन ॥ उभयोर्भ्रंस्यतेराजा माभूतेतत्रचास्थितः ॥ त्वत्प्रसादादहंपुत्र मृगव्याजेनप-
र्वतान् ॥ वनानि सरितश्चैव सरांसिविविधानिच ॥ ऋष्याश्रमान्तथाद्रक्षे त्वत्प्रसादान्महीपते ॥ भोक्तुकामःप्रियान्कामान् त्व-
यिभारंनिवेश्यच ॥ एतत्सर्वं मयाप्रोक्तं यत्स्थितंहृदयेमम ॥ अस्मिन्कृतेमहत्कीर्ति रकृतेनरकंव्रजेत् ॥ तस्मात्पालयमेसर्वाः प्रजा
धर्मेणपुत्रक ॥ धर्मांगदउवाच ॥ सर्वमेतत्करिष्यामि भुंक्ष्वभोगान्मनोरमान् ॥ गुर्वींराजधुरंतात त्वदीयामुद्वहाम्यहं ॥ नहिमे-
नास्त्यतोधर्म स्त्वद्वाक्यकरणंविना ॥ पितुर्वाक्यमकुर्वाणो नरोधर्मादधोव्रजेत् ॥ तस्मात्करिष्येवचनं त्वदीयंप्राञ्जलिः स्थितः ॥
एवमुक्तेतुवचने राजाहृष्टोबभूवह ॥ मृगयां गन्तुकामस्तु लघ्वींज्ञात्वात्मनस्तनुं ॥ धर्मांगदोपि हृष्टात्मा प्रजामाहूयचाब्रवीत् ॥
पित्रानियुक्तोभवतां पालनाय हितायच॥ पितृकार्यंमहाकार्यं सर्वथाधर्ममिच्छता॥ नान्योधर्मोहिपुत्रस्य पितृकार्यात्परःप्रजाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयिदण्डधरेशास्ता भवतांनयमः क्वचित् ॥ एवंज्ञात्वातुयुष्माभि राराध्यागरुडध्वजः ॥ ब्रह्मचर्यापयोगेन यष्टव्यस्तुजनार्दनः ॥
ममत्वंहि परित्यज्य स्वजातिविहितेनच ॥ येनवोह्यक्षयोलोका भवेयुर्नात्रसंशयः ॥ पितृमार्गाधिकोह्येष भवतांब्रह्मसंज्ञितः ॥
ब्रह्मार्पणक्रियायुक्ता भवन्तोज्ञानकोविदाः ॥ नभोक्तव्यं हरिदिने पैत्रोमार्गस्तुशाश्वतः ॥ विशेषेहिमयाजातो भवतांब्रह्मसन्ततिः ॥
प्रयुक्तःस्वात्मविषये पुनरावृत्तिदुर्लभः ॥ यद्उपोष्यंहरिदिनं तदवश्यमितिस्थितिः ॥ अनुनीयप्रजाःसर्वाः समाश्वास्यपुनःपुनः ॥
नदिवा नचशर्वर्यां शेतेधर्मांगदःसदा ॥ सर्वत्रहरतेसौर्यात् कुर्वन्निष्कण्टकांमहीं ॥ पटहोरटतेत्यर्थं मृगारिरिपुमस्तके ॥ उपोष्य
द्वादशींलोका ममत्वेनविवर्जिताः ॥ त्रिविधेषुच कार्येषु देवेशश्चिन्त्यतांहरिः ॥ हव्यकव्यवहेचैव तथात्मनि जनार्दनः ॥ तुरी-
येपिहृषीकेशो विशंकंजगतांपतिः ॥ स्वजातिविहितेष्वेवं सन्मार्गेचपितामहः ॥ स्मर्तव्योपि जनैःसर्वै र्धर्मकामार्थवाञ्छिभिः ॥
सएवभोक्ताभोक्तव्यः सएवपुरुषोत्तमः ॥ विनियोगस्तुतस्यैव सर्वकर्मसुपूज्यते ॥ एवंरटतिराजेन्द्र पटहोघननिस्वनः ॥ परंहर्षम-
वापेथ पिताधर्मांगदस्यच ॥ ज्ञात्वापुत्रंनयोपेत मात्मतत्वाधिकंनृपः ॥ उवाचभार्यांसंहृष्टः स्थितांलक्ष्मी मिवापरां ॥ धन्यास-
न्ध्यावलित्वंहि धन्योहंवरवर्णिनि ॥ उभाभ्यांजनितःपुत्रः शशाङ्कधवलःक्षितौ ॥ कर्णाभ्यांश्रूयतेमोक्षो नदृष्टः केनचित्क्वचित् ॥
नोस्माभिरधिकोमोक्षः प्राप्तःसत्पुत्रसंभवः ॥ पुत्रे विनयसंपन्ने धृतिसौर्यसमन्विते ॥ प्रतापिनिवरारोहे पितुर्मोक्षोगृहेध्रुवं ॥ आ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्दं ब्रह्मणोरूपं सदानन्दिसुतेनयः ॥ पिताभवतिचार्वंगि सत्कर्मकरणैःशुभैः ॥ नतत्सौख्यंभवेद्देवि लोकेस्थावरजंगमे ॥ स-
त्पुत्रः पितुरादाय भारमुद्वहतेस्वयं ॥ सोहंगमिष्ये करभोरुहृष्टो विहारलीलो मृगहिंसनार्थं ॥ स्वेच्छाचरश्चारु विशालनेत्रे वि-
मुक्तपापो जनरक्षणाय ॥ ५२ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते धर्मांगदाय राज्यदानंनाम नवमोध्यायः ॥ ९ ॥
वशिष्ठउवाच ॥ ततः प्राहविशालाक्षी भर्तृवाक्यंनिशम्यसा ॥ सत्यमुक्तंत्वयाराजन् पुत्रसौख्यंनतत्परं ॥ तुल्यंभवतिलोकेस्मिन्
शतपुत्रफलाधिकं ॥ पुत्रेभारस्त्वयान्यस्तः सप्तद्वीपसमुद्भवः ॥ मृगहिंसां परित्यज्य यजयज्ञैर्जनार्दनं ॥ भोगस्पृहां परित्यज्य
सेवस्वसुरनिम्नगां ॥ एवंत्याज्यस्तवविभो न्यायोनमृगनिग्रहः ॥ हृदये नखपङ्क्तिस्तु वृद्धायाभूपतेयथा ॥ तथा विषयसेवाहि
पितॄणां पुत्रिणांविदुः ॥ गृहेस्थितोहृषीकेशं पूजयस्वमहीपते ॥ निर्दोषाणांनयुक्तंहि मृगानांभूपमारणं ॥ अहिंसा परमोधर्मः
पुराणेषुप्रकीर्तितः ॥ हिंसायां वर्त्तमानस्य व्ययोधर्मोभवत्यपि ॥ परैरपिहताञ्जन्तून्नोपभुञ्जन्तिमानवाः ॥ षड्विधंनृपतेप्रोक्तं वि-
द्वद्भिर्जीवघातनं ॥ अनुमोदयितापूर्वो द्वितीयोघातकः स्मृतः ॥ विश्वस्ताचतृतीयस्तु चतुर्थोभक्षकःस्मृतः ॥ पञ्चमःपावकःप्रोक्तः
षष्ठोभूपे ह्यविक्रयी ॥ अहिंसासहितोधर्मः सधर्मोनृपतेस्मृतः ॥ हिंसयासहितंधर्मं नधर्मंकवयोविदुः ॥ मापापंकुरुवैभूप पुत्रेभा-
रंनिधायच ॥ धर्मसमाश्रयसम्यक् सञ्जातः पलितस्तव ॥ परित्यज्यस्वभारंत्वं नृपहिंसासमुद्भवं ॥ मृगशीलाहिराजानो विनष्टाः

॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शतशोनृप ॥ तस्माद् दुष्कृतकर्माणो मन्येहंमृगयातिनः ॥ दोषांकुरामृगाराज्ञां धर्मिणामिहभूपते ॥ निवारितोमयात्वंहि सर्व-
दाहितकाम्यया ॥ एवंब्रुवाणां तांभार्यां नृपोवचनमब्रवीत् ॥ नाहंहिंसेमृगान्देवि मृगव्याजेनकाननं ॥ पर्यटिष्ये धनुः पाणिः
कुर्वन्कण्टकशोधनं ॥ वनमध्येसुखंभुज्य मरणेहंवरानने ॥ स्वापदेभ्यश्चदस्युभ्यः प्रजारक्ष्यामहीभृता ॥ आत्मनावाथपुत्रेण गो-
पनीयाःप्रजायतः ॥ प्रजामरक्षन्नृपतिः सधर्मोपिव्रजत्यधः ॥ सोऽहंरक्षणमुद्दिश्य गमिष्यामिवनंप्रिये ॥ विमुक्तभारोऽहमिति रु-
रुःशृंगोयथाशुभे ॥ एवमामंत्र्यतांभार्या मारुरोह हयोत्तमं ॥ दोषांपातिसमंराज न्निर्दोषक्षितिभूषणं ॥ देववाहमिवाशुभं प्रभञ्जन
मिवस्थितं ॥ अग्रेऽमरेभ्योभूपालः करंकृत्वाप्रदक्षिणं ॥ शतकोटिप्रभंभूप कामिनीकुचपालितं ॥ अशोकपल्लवाकारं चक्रांकुशवि-
भूषितं ॥ संप्रतस्थेमहीपाल श्चालमानोमहीतलं ॥ शान्त्वमानोययौवेगात् काननंनिर्जनंस्वयं ॥ वाजिवेगेननिर्धूता वारणाः
स्यन्दनाःहयाः ॥ पत्तयश्चनिपेतुस्ते मूर्च्छिताः क्षितिमण्डले ॥ सराजासहसाप्राप्तो मुनीनामाश्रमंप्रति ॥ योजनानांसमुत्तीर्य
शतमष्टोत्तरंनृपः ॥ प्रविवेशाश्रमंपुण्यं कदलीखण्डमण्डितं ॥ अशोकवकुलोपेतं पुन्नागसमलंकृतं ॥ मातुलिंगैःकपित्थैश्च खर्जूरप-
नसादिभिः ॥ नारिकेलैस्तथातालैः केतकैसिन्दुवारकैः ॥ चन्दनैःस्यन्दनैरेलैः प्रियालैर्जंबुकैर्धवैः ॥ कर्मदैर्दाडिमैश्चैव धात्रीवृ-
क्षैःसमन्ततः ॥ निंबवृक्षैश्चबहुश स्तथाधैर्लोध्रपावकैः ॥ हरीतकीविभीताद्यैरन्यैर्बहुभिरावृतं ॥ हृष्टेनवायुनायुक्तं सुगन्धैःपुष्पपा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दर्पैः ॥ पश्यमानोमुनिंराजा ददर्शहुतभुक्प्रभं ॥ दृष्ट्वा प्रणम्यसहसा अवरुह्यतुरंगमात् ॥ वामदेवंमुनिवरं बहुशिष्यसमावृतं ॥
तेनापिमुनिना राजा अर्घ्याद्यैरभिपूजितः ॥ उपवेश्यासनेकौशे प्रोवाचहृष्टयागिरा ॥ अद्यमेपातकंक्षीणं मद्यपुण्योयमाश्रमः ॥
यत्त्वयाविष्णुभक्तेन दिष्ट्याभूपविलोकितः ॥ कः करोतिनृपस्त्वन्य स्त्वांविना धरणीतले ॥ त्यक्त्वावैवस्वतं मार्गं लोकोनीतोहरेः
क्षयं ॥ उपोषयित्वा नृपते द्वादशींपापनाशनीं ॥ चतुर्भिस्त्वमुपायैस्तु प्रजाः संसाध्यभूतले ॥ स्वकर्मस्थाविकर्मस्था नीताःस-
र्वाभिदः पदं ॥ सोऽस्माकंद्रष्टुकामानां संप्राप्तंदर्शनंनृप ॥ स्वपचोपिमहीपाल विष्णुभक्तोद्विजाधिकः ॥ विष्णुभक्तिविहीनस्तु
द्विजोऽपि स्वपचाधमः ॥ दुर्लभाभूपराजानो विष्णुभक्तामहीतले ॥ नवैष्णवोभवेद्राजा क्षितिलक्ष्मीप्रशाशकः ॥ योराजानहरे-
र्भक्तो भक्तोऽन्येषुसुरेषुहि ॥ सपत्नींयुवतींत्यक्त्वा यथैवान्यासुरज्यते ॥ एवंव्यतिक्रमस्तस्य नृपतेर्भवतिध्रुवं ॥ यस्त्वयान्यायविहितं
कृतंविष्णोः प्रपूजनं ॥ राजोवाच ॥ क्षामयेत्वांद्विजश्रेष्ठ नाहंवन्द्यस्त्वयाविभो ॥ त्वत्पादपांशुनातुल्यो नवाविप्रभवाम्यहं ॥ न-
विप्रेभ्योऽधिकादेवा भवन्तीहकदाचन ॥ परितुष्टैर्द्विजैर्यस्माद्भक्तिर्भवतिमाधवे ॥ द्वेष्योभवतितैरुष्टैः सत्यमेतन्मयेरितं ॥ तमा-
हवामदेवस्तु ब्रूहिकिंतेददाम्यहं ॥ नादेयंविद्यतेराजन् गृहप्राप्तस्यमेधुना ॥ अभीष्टोसिमहीपाल योददासिमहीतले ॥ पटहान्वा-
सरेविष्णोः प्रजाभोजनवारणे ॥ तमाहनृपतिर्विप्रं कृताञ्जलिपुटस्तदा ॥ प्राप्तमेवमयासर्वं त्वदंघ्रियुगदर्शने ॥ एकोमेसंशयोब्र- ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्मन् हृदयेपरिवर्त्तते ।। कर्मणाकेनमेवश्या भार्यात्रैलोक्यसुन्दरी ॥ याविलोकयतीमांवै मन्यतेमन्मथाधिकं ।। यत्रयत्रपदंदेवी ददातिबरवर्णिनी ॥ तत्रतत्रनिधानानि प्रकाशयतिमेदिनी ॥ यस्याःस्पर्शेजराभ्रंशो वलीनांसंक्षयोभवेत् ॥ विनाग्निनाहियो-ब्रह्मन् सिद्धमेत्यवशत्रुसं ॥ अन्नंददातिचार्वंगी यस्मिन्भुञ्जन्तिकोटयः ।' नावज्ञाचकृताब्रह्मन् यथावाक्यासुरुष्टया ।। तथाराजा तुतनयो ममवाक्यकरःसदा ॥ अहमेवधरापृष्ठे पुत्रवान्द्विजसत्तम ॥ एकद्वीपपतिश्चाहं सचसप्तपतिस्त्वभूत ॥ मदर्थेयेनविप्रेन्द्र समानीतानृपात्मजा ॥ विद्युल्लेखेतिविख्याता युधिजित्वामहीभुजः ॥ अयुतेनाधिकेद्वेतु वीर्यद्रविणशालिनी ॥ षण्मासेनरणे जित्वा कृत्वासर्वान्निरायुधान् ॥ योगत्वाप्रमदाराज्यं जित्वासर्वास्तथारणे ॥ आजहारशुभास्तासां मध्यादष्टौवरांगनाः ॥ प्रददावपिताःसर्वा प्रणम्यचपुनःपुनः ॥ यानिवासांसिदिव्यानि यानिरत्नानिभूतले ॥ तानिमेप्रददौपुत्रो जनन्याश्चदृढव्रतः ॥ एकाह्नापृथिवींसर्वा मतीत्यबहुयोजनां ॥ पुनरायातिशर्वर्यां मत्पादाभ्यंगकारणात् ॥ निशीथेमर्दयित्वातु द्वारितिष्ठतिदंशितः ॥ प्रवोधयतिप्रेष्यान्स नमत्तोनिशिसंस्थितः ॥ तथायंरोगहीनोमे देहोदेहभृतांवर ॥ अप्रमेयोममसुने विषयाश्चप्रियागृहे ॥ वाजिनोवारणाश्चैव धनधान्यमनन्तकं ॥ नृपाःसर्वेममैवाज्ञां पालयन्तिक्षिताविह ॥ केनकर्मविपाकेन ममेदंवशगंसुने ॥ कृताञ्जलिपुटोब्रह्मन् यथावद्वक्तुमर्हसि ॥ देहेनरोगाःप्रवराःस्त्रियश्च गृहेविभूतिश्चहरौचभक्तिः ॥ विद्वत्सुपूजाद्विजदानयुक्ता मनोहर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रेवसुतप्रसूतः ॥ ६२ ॥ इतिश्रीलघुनारदीयपुराणे रुक्माङ्गदचरिते वामदेवसमागमोनाम दशमोध्यायः ॥१०॥ वामदेवउवाच
॥ पुरात्वमवनीपाल शूद्रजातिसमुद्भवः ॥ वहुदोषसमायुक्तो दुष्टयाभार्य्ययातथा ॥ निवसन्दुःखसंयुक्तो वर्षाणिसुवहुन्यथ ॥
कदाचिद्विप्रसहित स्तीर्थयात्रांगतोभवान् ॥ तत्रस्थाणुपतेःश्लक्ष्णं श्रुतंधर्मविचारणं ॥ मन्दरेनृपशार्दूल पुराणोक्तंद्विजेरितं ॥ त-
च्छ्रुतंहित्वयाराजन् सत्यंहिशयनव्रतम् ॥ चतुर्भिःपारणंमासै र्यस्यनिष्पद्यतेविभोः ॥ येनचीर्णेनदेवेशो जीमूताभःप्रसीदति ॥
लक्ष्मीभार्य्योजगन्नाथ स्त्वशेषाघौघनाशनः ॥ तत्कृतंभवताराजन् पुनरत्यतिमन्दरे ॥ अशून्यशयनंपुण्यं गृहऋद्धिकरंपरम् ॥
अकृत्वायस्तुराजेन्द्र व्रतंपातकनाशनं ॥ गार्हस्थ्यमनुतिष्ठेत बन्ध्यावन्निष्फलंभवेत् ॥ श्रावणस्यतुमासस्य द्वितीयायांमहीपते ॥
अपिजात्यानुहीनेन अपिग्राह्यंव्रतंशुभम् ॥ चत्वारोवार्षिकान्मासान् मंसुत्येवैजनार्दनं ॥ व्रतंत्वशून्यशयनं करिष्येहंजगत्पते ॥
एवंनियमकृत्स्नात्वा मध्याह्नसारिदादिषु ॥ पश्चात्तुपूजयेद्देवं निशिचन्द्रोदयेसति ॥ षोडशांगुलमानंतु स्थंडिलंचतुरस्रकं ॥ कृत्वा
तत्रन्यसेद्देवं लक्ष्मीभर्तारमच्युतं ॥ लक्ष्मीरौप्यमयींकृत्वा सौवर्णपुरुषोत्तमं ॥ स्थाप्यपञ्चामृतरसै र्गन्धचन्दनवारिणां ॥ स्नापयि-
त्वाथविधिना वेदमंत्रपुरःसरं ॥ लक्ष्मीयुक्तोजगन्नाथः पूजनीयोजनार्दनः ॥ फलैःपुष्पैस्तथादीपै श्चारुगन्धानुलेपनैः ॥ शय्या
दानैर्वस्तुदानै र्विप्राणांभोजनैस्तथा ॥ नैवेद्यैर्विविधाकारैः फेनिकापूपमोदकैः ॥ मुखवासादितांवूलैः प्रार्थयेद्देवमाशिषः ॥ श्रीव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सधारिश्रीकांत श्रीपतेश्रीधराव्यय ॥ त्वंलक्ष्मीसहितोदेव गृहाणार्घ्यंनमोस्तुते ॥ इत्यर्घ्यमंत्र ॥ गार्हस्थान्पापनाशंमे पातु धर्मार्थकामद ॥ अग्रयोमाप्रणश्यंति माप्रणस्यंतुदेवताः ॥ पितरोमाप्रणस्यंतु मानोदंपत्यभेदना ॥ लक्ष्मीवियुज्यतेदेव नकदाचिद्यथाभवेत् ॥ तथाकलत्रसंबन्धो मामेदेववियुज्यतां ॥ लक्ष्म्यानशून्यंवरद यथातेशयनंहरे ॥ शयामयाप्यशून्यातु तथैवमधुसूदन ॥ एवंप्रार्थ्यचदेवेशं प्रणिपत्यपुनःपुनः ॥ नक्तमक्षारलवणमश्नीयात्तदनन्तरं ॥ भोजयेद्द्विजदांपत्यं प्रतिमासंनृपोत्तम ॥ चातुर्मासिकमित्युक्त मशून्यशयनव्रतं ॥ चतुर्भिरेवमासैस्तु व्रतस्यास्यतुपारणं ॥ व्रतांतेशयनंदद्यात्सर्वोपस्कर संयुतं ॥ आसनं पादुकाछत्रं चामरव्यजिनानिच ॥ स्थंडितासर्वसंपूर्णा दर्पणंसप्तधान्यकं ॥ सुखसंजननितूली छादनाचपटीसिता ॥ कुण्डलेद्वेनृपश्रेष्ठ सुकपोलस्थलद्वयोः ॥ दीपिकावरमाल्यानि अञ्जनान्यनुलेपनं ॥ तस्योपरिवितानंतु पञ्चवर्णंनरोत्तम ॥ पूर्वंतुचतुरोमासा स्थंडिलस्थंप्रपूजयेत् ॥ व्रतांतेशयनस्थंतु पूजयेत्पुरुषोत्तमं ॥ पुष्पधूपोपहारैश्च दीपमाल्यादिभूषितैः ॥ नैवेद्यैर्विविधाकारै र्लड्डुकापूपफेनिकैः ॥ अशोकवर्तिसोल्लाशैः खण्डकाद्यैरनेकशः ॥ देशकालोद्भवैर्मिष्टैः फलैःसंपूजयेद्धरिं ॥ अलंकृत्ययथाशक्त्या वस्त्रालङ्कारभूषणैः ॥ मिथुनंनृपशार्दूल वरमाल्यानुलेपनैः ॥ प्रणम्यद्विजदांपत्यं तंदेवंप्रतिपादयेत् ॥ साक्षतंसहिरण्यंच वरनेत्र पटावृतं ॥ अर्चितंप्रार्चितंगन्धै र्जातरूपमयंशुभं ॥ कांस्यपात्रेणसहितं मोदकैःपरिपूरितं ॥ दद्यादेवंसमुच्चार्य्य श्रीधरःप्रीयता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ना०पु० मिति ॥ गावोहिरण्यधान्यानि यद्यदिष्टतमंगृहे ॥ तद्देवंनृपशार्दूल तदेवाक्षयमिच्छता ॥ तत्त्वयासर्वमेतद्धि कृतंराजन्सुविस्तरं ॥
॥ १९ ॥ तस्यैवकर्मणोब्युष्टि रशून्यशयनस्यहि ॥ इयंममाग्रतःप्राप्ति स्तवोक्ताविस्तरानृप ॥ तुष्टेविष्णौसंपदोवै भवेयुर्विविधाहिता ॥ पू- अ० ११
र्वजन्मनिदेवेशो यस्त्वयापूजितोनृप ॥ अस्मिन्जन्मनिराजेन्द्र पुनरर्चयसेहरिं ॥ अवस्यंगंतुकामोसि तस्यसायुज्यतांध्रुवम् ॥
एषभावोमहाराज विख्यातस्तेसुनिर्मलः ॥ प्रभावसंपदेषाते जाताउत्कर्षदायिनी ॥ किमन्यंनेमहीपाल ददामीहकरोमिकिं ॥
त्वंसर्वयोग्योसिनृप भक्तिमांश्चजनार्दने ॥ राजोवाच ॥ समुत्सुकोहंविप्रेन्द्र मन्दरंपर्वतंप्रति ॥ तत्राश्चर्याणिसर्वाणि द्रष्टुकाम-
स्तवाज्ञया ॥ लघूंभूत्वागुरुंत्यक्त्वा पुत्रोपरिद्विजोत्तम ॥ राज्यानुशासनंभारं दुर्वहंतुक्वभूभुजैः ॥ स्वेच्छाचारस्त्वहंराजा मत्कृत्यंतेन-
योऽकरोत ॥ तच्छ्रुत्वावचनंराज्ञो वामदेवोऽब्रवीदिदं ॥ एतद्धिपरमंकृत्यं पुत्रस्यनृपपुङ्गव ॥ यत्क्लेशात्पितरंपुत्रा विमोचयतिसर्व-
था ॥ पितुर्वचनकारीयो विनयेसंस्थितःसुतः ॥ तस्यभागीरथिस्नान महन्यहनिजायते ॥ निरस्यपितृवाक्यंतु व्रजेत्स्नातुंत्रिमा-
र्गगां ॥ नशुद्धिरत्रनिर्दिष्टा पुत्रस्यकवयोविदुः ॥ सत्वंगच्छयथाकामं कृतकृत्योमहीपते ॥ हरिप्रसादस्तेजातो वशेयस्यसुतः
स्थितः ॥ एवमुक्तःसमुनिना समारुह्यतुरंगमं ॥ ययौशिघ्रगतिश्रीमान् सदागतिरिवस्वयं ॥ पश्यमानोगिरिंश्रीमान् सरांसि-
सरितस्तथा ॥ मनोरमानिराजेन्द्र वनान्युपवनानिच ॥ सोऽचिरेणैवकालेन संप्राप्तोमन्दराचलं ॥ कामयित्वागिरिश्रेष्ठं गन्धमा- ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दनमेवच ॥ अतीत्यचमहामेरुं दृष्ट्वाचारूपमारुकुरुन् ॥ शतसूर्य्यप्रतीकाशं सर्वत्रकांचनावृतं ॥ हतैर्द्विजैःसमाकीर्णं स्रवन्तं कांचनंरसं ॥ वहुवृक्षसमायुक्तं वहुधातुविभूषितं ॥ वह्वानिसरसंयुक्तं वहुकन्दरभूषितं ॥ निम्नगायुतसंकीर्णं धौतंगङ्गाजलैःशुभैः ॥ वितुष्टैर्युवतिवृन्दैः कांचनाब्जोपशोभितैः ॥ प्रस्थितैःफललाभार्थं सदृशस्नानमोहितैः ॥ घटप्रमाणैर्नृपते पङ्कजैश्चसुगन्धिभिः ॥ क्षात्रैर्युवतिसंभूतैः कुचैरिवविभूषितैः ॥ द्विरेफगणसंयुक्तः कोकिलस्वरनादितः ॥ अनेकसत्वविरुतैः समन्तान्नादितोगिरिः ॥ सपश्यमानोनृपतिर्विवेश महागिरिंरत्नविभूषिताग्रं ॥ आरूढकामस्तुकुतूहलार्थं मन्वेषयन्केनपथाधिरोहे ॥ यावत्समीक्षांकुरुते समंतात् तावत्समस्तद्रुमपक्षिसंघैः ॥ विसर्प्पमानोध्वनिनागृहीतो विमोहिनीवक्रसमुद्भवेन ॥ उपप्लवंतत्तरसामहीप स्तेनैवराजासहसाजगाम ॥ तस्यापिकर्णेध्वनिराविवेश विमोहिनीयःस्वाविमुच्यवाहं ॥ त्रिविक्रमेणैवविलंवितस्तदा गिरिर्महाराजवरेणतेन ॥ क्षणेनराजासहसाददर्श गिरौस्थितांतप्तसुवर्णभासं ॥ कामस्ययष्टीवस्तुलेखितेयंयमस्यमायेवयशःस्वरूपिणी ॥ शक्रस्य लिङ्गगगनेप्रसस्तंसंपूजयन्तीतदवस्थितासा ॥ जनोयथाह्लादकरोनृणांप्रियःक्षमेवभूमेर्नृपआननन्द ॥ गिरेःसुतेवामरपूजिताच सिंधोस्तुवेलेवस्वरूपयुक्ता ॥ सत्कर्म्मकर्त्तुमनसोभिलाषंव्यवस्थितामोहिनीरूपयुक्ता ॥ प्रतप्तचामीकरबद्धिभातिदेवीशरीरंत्वभिमन्दराद्रिं ॥ विकर्षमाणासहसासुनेत्रैर्लिंगाश्रितालिंगविनोदनार्थं ॥ विमोहितोसौनिपपातराजाविमोहिनीसुन्दरनेत्रपातैः ॥ ज्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेणसंतप्तसमस्तदेहोविसंज्ञतांचैवजगामशीघ्रं ॥ संमूर्छितंभूमिपतिंसुनेत्राविलोकयामासकटाक्षदृष्ट्या ॥ विमुच्यवीणांविररामगी-
तान्प्राप्तंचकार्य्यंसहसैवमेने ॥ विद्रावयन्तीमृतपक्षिसंघामशोकरक्तांगुलिपल्लवाग्राः ॥ सुवाससागन्धभुजोनिवार्य्यशिलीमुखान्श्वा
ससुगन्धलुब्धान् ॥ जगामदेवीनृपतेःसमीपंमुक्ताहरंपूज्यतमंमहीप ॥ गत्वातुतत्पार्श्वंसुमाररूपा विमोहिनीनीरजपत्रलोचना ॥
उवाचवाक्यंमधुरंमनोहरंरुक्माङ्गदंकामसरानुविद्धं ॥ उत्तिष्ठराजेशवशातवाहंकिंमूर्च्छयादेहमिमंक्षिणोषि ॥ यस्त्वंमहाभारमिमं-
महान्तंसमुद्धरेथास्तृणवन्महीप ॥ समामकंरूपमवेक्ष्यराजन् किंरज्यतेदुर्वलगौरिवेह ॥ यद्यास्तिवांच्छातवभूपतीश ममाश्रयावै-
सुरतानुकूला ॥ आदायवैमांरतिधर्मयुक्तां भुक्ष्वस्वदासीमिवहृष्टवित्तां ॥ ६६ ॥ इतिश्री लघुनारदीयपुराणरुक्माङ्गचरिते मो-
हिनीसमागमो नामैकादशोध्यायः ॥ ११ ॥ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७
वशिष्ठउवाच ॥ व्याहृतेशोभनेवाक्ये मोहिन्यानृपतिस्तथा ॥ उन्मील्यनेत्रेराजेन्द्र पद्मपत्रनिभतदा ॥ सगद्गदमुवादेचं मोहि-
नींकान्ताविग्रहां ॥ मयावलाःसुवहुशः पूर्णचन्द्रानिभाननाः ॥ अनुभुक्तास्तथादृष्टा नेदृग्दृष्टंवपुःक्वचित् ॥ यादृशंचपालापांगि
तवसर्वांगसुन्दरि ॥ सोहंऽदर्शनमात्रेण त्वदीयेनवरानने॥ मनोभवशरेणैव पातितःसहसाक्षितौ ॥ अनूक्तवाक्योऽहंदेवि मोहित-
स्तवमायया ॥ कुरुप्रसादंकरभोरुमह्यं दास्यामिसर्व्वंविपुलंचतेवसुः ॥ नादेयमत्रत्वयिविद्यतेमे तवानुरागेणनिरुद्धचेतसः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इमांधरांभूधरभूषितांगीं समुद्रवस्त्रांशशिसूर्य्यनेत्रां ॥ घनस्तनींव्योमसुबद्धदेहां सह्यानननांसांगनिवासशीर्षां ॥ पातालगुह्यांव-
हुनागपादां सप्तार्णवामद्यतवास्मिदाता ॥ सकोषरत्नांगजवाजिपूर्णां सामुद्रभक्तांनगरैःसमेतां ॥ आत्मानमपिदास्यामि तव-
चार्व्वंगिसंगमे ॥ किंपुनर्धनमानादि प्रसीदममशोभने ॥ तद्वचोमोहिनीश्रुत्वा भूपस्यमधुरंशुभं ॥ उवाचसंस्मितंध्यात्वा समु-
त्थाप्यनृपंतथा ॥ नधरांभूधरोपेतां प्रार्थयामिक्षितीश्वर ॥ यत्प्रार्थयाम्यहंभूप तद्देयमविशंकया ॥ मत्प्रत्ययार्थंभूपाल वदस्वसम-
यंविभो ॥ राजोवाच ॥ येनत्वंतुष्यसेदेवि समयन्तंकरोम्यहं ॥ कृच्छ्रावस्थागतंत्वंमां सञ्जीवयसुलोचने ॥ मोहिन्युवाच ॥ दी-
यतांदक्षिणोहस्तो भूरिद्रविणदायकः ॥ अनेकक्रतुकर्त्ताच बहुपुण्यकरःकरः ॥ येनमेप्रत्ययोराजन् भवतीहतवोपरि ॥ राजन्त्वंध-
र्मशीलश्च धर्मकीर्तिर्जगत्त्रये ॥ नवक्तव्यानृतंकिञ्चित मार्गोवैलौकिकस्त्वयं ॥ एवंब्रुवाणांराजेन्द्रो मोहिनींकृच्छ्रयातुरः ॥ अब्र-
वीन्नृपतिःप्रेम्णा तवेदंभाषितंमया ॥ जन्मप्रभृतिवामोरु स्वैरेष्वपिकदाचन ॥ अथतेव्याहृतैर्वाक्यैः किमेभिःप्रत्ययात्मकैः ॥ त-
वद्येषमयादत्तः स्वहस्तश्चारुलाञ्छनः ॥ यन्मयासुकृतंकिञ्चित कृतमाजन्मिकंशुभे ॥ तत्सर्वंतववामोरु यदिकुर्यान्नतेवचः ॥ अ-
न्तरेत्वेषहस्तोवै भवभार्येवरानने ॥ तवरूपेणमेक्षोभः सहसाद्यभवच्छुभे ॥ दर्शनेनत्वदीयेन परायन्तंहिमेवपुः ॥ पूर्वंदृष्टापिनम-
या स्पृष्टाधर्मादिरक्षणे ॥ कात्वंकस्यसुताचासि किमर्थमिहचागता ॥ रुक्मांगदोहंनृपतिः ऋतध्वजसुतःशुभे ॥ इक्ष्वाकुवंशजः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीमान् धर्मांगदपितातथा ॥ मृगव्याजेनगहनं प्रविष्टःकाननंत्वहं ॥ ततोहृष्टोवनेदृष्टः कौशेयस्याश्रमोमहान् ॥ मुनिनाजल्पि-
तश्चाथ तेनचाहंविसर्जितः ॥ आरुह्यवाहनवरं मन्दरंद्रष्टुमागतः ॥ भ्रममाणेनचमया कौतूहलपरेणहि ॥ श्रुतंसुन्दरिगीतंतु
तववक्रविनिर्गतं ॥ गीतेनचाहमाकृष्ट स्त्वत्सकाशमिहागतः ॥ चक्षुःपदमनुप्राप्ता ममत्वंचारुलोचने ॥ ततोहंमूर्छितोदेवि विसं-
ज्ञःपतितःक्षितौ ॥ संप्राप्तचेतनायुक्त स्तववाक्यामृतेनहि ॥ पुनर्जातमिवात्मानं मन्येहंचारुलोचने ॥ इत्युत्तरप्रदानेन प्रसादंक-
र्तुमर्हसि ॥ केनचेहेदृशंरूपं त्रैलोक्यक्षोभनंशुभे ॥ कृतंतवसुचार्वंगी तत्सर्वंवक्तुमर्हसि ॥ एवमुक्तानृपेणाथ मोहिनीव्याजहार-
वै ॥ ब्रह्मणोहंसुताराजन् त्वदर्थमिहचागता ॥ श्रुत्वाकीर्तिंतुतेभूप मन्दरंसमुपागता ॥ परित्यज्यसुरान्सर्वान् दिगंवरपुरोगमा-
न् ॥ समाहितमनाभूप नियतातपसिस्थिता ॥ संपूजयन्तिदेवेशं गीतवाद्येनशंकरं ॥ परितुष्टःपशुपतिः त्रिदिनार्द्धेनभूपते ॥
गीतदानमहंमन्ये सुराणामपिदुर्लभं ॥ सर्वदानाधिकंभूप अक्षयगतिदायकं ॥ गीतज्ञायत्रगीतेन प्राप्नोतिपरमंपदं ॥ रुद्रस्या-
नुचरोभूत्वा तेनैवसहमोदते ॥ संतुष्टोयंपशुपतिः सद्यएवममानघ ॥ ईप्सितोयंमयाप्राप्तो भवानवनिपालक ॥ अभिप्रेतोसिमे-
राजन् अभिप्रेताह्यहंतव ॥ सकामायाःसकामेन संगमोगुणवान्भवेत् ॥ तमेवमुक्त्वाद्विजराजवक्रा करंकरेणाथविगृह्यदक्षा ॥ उ-
त्थापयामासधरातलस्थं रुक्मांगदंसागजगामिनीतदा ॥ ३८ ॥ इतिश्री ल०ना० रुक्माङ्गदसंवादोनाम द्वादशोध्यायः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वशिष्ठउवाच ॥ उत्थापयित्वाराजानं मोहिनीवाक्यमब्रवीत् ॥ माशंकांकुरुराजेन्द्र कुमारींमामकल्मषां ॥ उद्वाहयमहीपाल गृह्योक्तविधिनाहिमां ॥ अविवाहितांतुकन्यां यदिगच्छन्विभर्त्यपि ॥ प्रसूयतिदिवाकीर्त्तिं सर्वत्रवर्णविगर्हितं ॥ चाण्डालयोनयस्त्रिस्रः पुराणाःकवयोविदुः ॥ कुमारीसंभवस्त्वेकः स्वगोत्रायांद्वितीयकः ॥ ब्राह्मण्यांशूद्रजनकस्तृतीयोनृपपुंगव ॥ एतस्मात्कारणाद्राजन् कुमारींमुद्वहेर्दिति ॥ ततस्तांचञ्चलापांगीं नृपोरुक्मांगदोगिरौ ॥ उद्वाह्यविधिवद्राजा बभाषेप्रहसन्निति ॥ नतथात्रिदिवप्राप्तिः प्रीणातिममयानसं ॥ तवप्राप्तिर्यथाह्लादं करोतिममसुन्दरि ॥ मन्येपुरन्दरादेवि आत्मानमधिकंक्षितौ ॥ त्रैलोक्यसुन्दरींप्राप्य त्वांभार्यांचारुलोचने ॥ तस्माद्धदानुकूलंते किंकरोमिप्रसाधिमां ॥ इहैवरंस्यसेवापि अथवानगरेवद ॥ मलयेमेरुशिखरे वनेवानन्दनेशुभे ॥ तच्छ्रुत्वामोहिनीवाक्यं मधुरंभूपतेस्तदा ॥ उवाचवाक्यंसुमुखी राजानंहाटकांगदं ॥ सपत्नीनांकटाक्षाणि क्रूराणिनगरेमम ॥ पतिष्यन्तिमहीपाल कथंगच्छामितेपुरं ॥ नासौसीमन्तिनीकाचित् भवेद्धृपक्षिताविह ॥ यस्याःसपत्नीप्रभवं दुःखमामरणंभवेत ॥ साहंत्यक्त्वामहीपाल तवकीर्त्यानुपुण्यया ॥ ज्ञात्वासपत्नीप्रभवं दुःखंभर्त्ताकृतोमया ॥ रंस्यामिपर्वतेश्रेष्ठे बह्वाश्चर्यसमन्विते ॥ नरंस्यसेहित्वंराजन् सन्ध्यावल्याविनाक्वचित् ॥ तस्याहिविरहेदुःखी सपुत्रायाभविष्यसि ॥ दुःखेनभवतोराजन् भूरिदुःखंभवेन्मम ॥ यत्रैवभवतःसौख्यं तत्राहमपिसंस्थिता ॥ यत्रत्वंरंस्यसेराजन् तत्रमेमन्दरोगिरिः ॥ भर्तुःस्थानेसुवस्तव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋद्धिहीनेपिभार्यया ॥ समेरुःकाञ्चनमय स्तंनिवासंप्रचक्ष्यते ॥ मनोरथानांसतरुर्यत्रत्वंरंस्यसेप्रभो ॥ भर्तृस्थानंपरित्यज्य सवि-
त्तंवित्तवर्जितं ॥ पितृस्थानंचयानारी अर्थार्थमनुगच्छति ॥ इहापनुज्यनरकं पश्चाद्भवतिशूकरी ॥ एवंजानाम्यहंदोषान् कथं-
स्थास्यामिमन्दरे ॥ गमिष्यामित्वयासार्द्धमीशस्त्वंसुखदुःखयोः ॥ मोहिन्यास्तद्वचःश्रुत्वा सराजाहृष्टमानसः ॥ परिष्वज्यवरा-
रोहामिदंवचनमब्रवीत् ॥ भार्याणांममसर्वासामुपरिष्टाद्भविष्यसि ॥ माशंकांकुरुवामोरु नतेदुःखंभविष्यति ॥ जीवनादधिकंसु-
भ्रु भविष्यसिगृहेमम ॥ गच्छावएहितन्वंगि सुखायनगरंप्रति ॥ भुंक्ष्वभोगान्मयासार्द्धं तत्रस्थास्वेच्छयाप्रिये ॥ साचेदमुक्त्वा-
शशिकान्तिगौरी रुक्मांगदेनात्मजनाशनाय ॥ संप्रस्थितान्नूपुरनादयुक्ता विकर्षयन्तीगिरिजातसंघान् ॥ २६ ॥ इतिश्री ल-
घुनारदीयपुराणे रुक्माङ्गदचरिते मोहिन्यानयनंनाम त्रयोदशोध्यायः ॥ १३ ॥ छ छ छ छ छ छ
वशिष्ठउवाच ॥ संप्रस्थितावुभौभूय गिरिप्रस्थाद्धरातलं ॥ पश्यमानोवहून्भावान् गिरिजातान्मनोहरान् ॥ केचिन्नीलोत्पलप्र-
ख्याः केचित्काञ्चनसप्रभाः ॥ केचिद्विद्रुमसंकाशाः केचिद्रजतसन्निभाः ॥ केचित्स्फटिकवर्णाभा हरितालनिभास्तथा ॥ अन्या-
नाश्लेषतांप्राप्ताः शनकैःशनकैर्द्रुमाः ॥ अवरुह्यतुशैलेन्द्रा त्तावुभौधरणीतलं ॥ संप्राप्यसुमहावीर्य्यं वाजिनंतदपश्यतां ॥ खन्यमा-
नंखुरेणोर्वीं कुलिशाग्रेणवेगिना ॥ तस्यदारयतःपृथ्वीं सुतीक्ष्णेनखुरेणहि ॥ गृहगोधाभवेत्तास्मिन् रंध्रेमुखगताकिल ॥ निर्गच्छ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानानृपते खुरेणविदलीकृता ॥ विचार्य्यमाणोनृपतिर्दयावान्समपश्यत ॥ अत्यधावतवेगेनहाहतेतिवदन्प्रियां ॥ बृक्षपत्रेततःसो-
थ कोमलेजगतीपतिः ॥ उद्धारयन्हयखुरान् प्राक्षिपज्जलजेक्षणः ॥ ततस्तांमोहिनींप्राह पश्यमूर्च्छांगतामिमां ॥ शीघ्रंचाहरचा-
र्वंगिजलंजलजलोचने ॥ येनेमांमूर्च्छितांसिंचे गृहगोधांविमर्द्दितां ॥ साभर्तुर्वचनाच्छीघ्रमाहरच्छीतलंजलं ॥ तेनाभिषिञ्चन्नृपति
र्गृहगोधांविमर्द्दितां ॥ सावापचेतनांराजन् शीतलेनजलेनच ॥ अभिघातेषुसर्वेषु शस्तंवारिषुसेचनं ॥ क्लिन्नेनचाथवस्त्रेण वन्ध-
नंहितमुच्यते ॥ साप्राप्यचेतनांभूयो गोधावचनमब्रवीत् ॥ निरीक्ष्यनृपशार्दूलं वेदनार्त्ताशनैःशनैः ॥ रुक्माङ्गदमहावाहो निवो-
धममचेष्टितं ॥ साकरेनगरेरम्ये भार्य्याहंद्विजजन्मनः ॥ रूपयौवनसम्पन्ना तस्यचाहंप्रियाविभो ॥ सदाविद्वेषसम्पन्नोमयिनिष्ठुर
जल्पकः ॥ नान्यस्यकस्यचिद्द्वेष्टामांसुमोचद्विजोनृप ॥ ततोहंक्रोधसंयुक्ता वशीकरणलम्पटा ॥ अपृच्छन्प्रमदाराजन् यास्त्य-
क्ताःपतिभिःकिल ॥ ताभिरुक्ताह्यहंभूप वश्योभर्त्ताभविष्यति ॥ अस्माकंप्रत्ययोजातो भर्तृत्यागीवरानना ॥ पूजिताभेषजैर्वश्या
जाताहिपतयोहिनः ॥ सात्वंपृच्छवरारोहे दाश्यतिभेषजंशुभं ॥ विकल्पंकुरुमाभीरु भवितादासवत्पतिः ॥ ततोहंत्वरितागत्वा
तासांवाक्येनभूपते ॥ प्रसादःकथितस्तस्याः पृच्छंत्याममानवैः ॥ शतस्तंभसमायुक्तः कुट्टिमःसुधयायुतः ॥ उपविष्टांस्तुतेज-
स्कां अपश्यंब्रतचारिणीं ॥ प्रावृतांदीर्घवस्त्रेण सवितैवविकर्त्तना ॥ दीर्घाभिःसाजटाभिस्तु संवृतादीप्तिसंयुता ॥ परिचारस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ना०पु० संयुक्ता वीर्य्यमानाशनैःशनैः ॥ अक्षसूत्रकरासाच जपन्तीभगमालिनीं ॥ सर्ववश्यकरंमन्त्रं क्षोभकंप्रत्ययात्मकं ॥ ततोहंप्रण- अ० १४
॥ १९ ॥ ताभूत्वा पश्चांन्यस्तांगुलीयकं ॥ वज्रमाणिक्यखचित मतिरक्तंप्रभान्वितं ॥ ततोहृष्टाभवद्दृष्ट्वा पादस्थंचांगुलीयकं ॥ अपृ-
ष्ट्यातयाज्ञातं ममभर्तृविमाननं ॥ तथोक्ताहंतयाभूप तापस्याप्रणतौस्थिता ॥ चूर्णोरक्षान्वितोह्येष सर्वभूतवशानुगः ॥ सुभ्रुभ-
र्त्तरिसंयोज्य रक्षांकण्ठेतथाकुरु ॥ काकालयंचसंगृह्य विधिपूर्वमतःपरं ॥ मंत्रवानशुचिर्भूत्वा शवाग्निश्चविनिर्दिशेत् ॥ भविष्य-
तिपतिर्वश्यो नान्यांयास्यतिसुन्दरि ॥ चूर्णंरक्षांगृहीत्वाहं प्राप्ताभर्तृगृहंपुनः ॥ प्रदोषेतपसायुक्तः चूर्णोभर्त्तरियोजितः ॥ ग्रीवा-
यांहिकृतोरक्षा नविचारःकृतोमयाः ॥ यदासपीतचूर्णस्तु भर्तामम्नृपोत्तम ॥ तदैवक्षयरोगोभूत् पतिःक्षीणोदिनेदिने ॥ गुह्येषु
कृमयोजाताः क्षतदुष्टव्रणोद्भवाः ॥ राजन्दिनैःकतिपयै र्दीपद्राविणदर्शनात् ॥ हततेजास्तथाभर्त्तामामुवाचाकुलेन्द्रियः ॥ क्रन्द-
मानोदिवारात्रौ दासोस्मितवशोभने ॥ त्राहिमांशरणंप्राप्तं नयास्येन्यांस्त्रियंक्वचित् ॥ तत्तस्यरुदितंश्रुत्वा भीताहमवनीपते ॥
निवेदितंमयातस्यां कथंभर्त्ताभवेत्सुखी ॥ तयामेभेषजंदत्तं द्वितीयंदाहशान्तये ॥ दत्तेचभेषजेतस्मिन् स्वस्थोभून्मेक्षणात्पतिः ॥
पूर्वचूर्णभवोदाहः शान्तस्तेनौषधेनहि ॥ ततःप्रभृतिभर्त्तामे वश्योभूद्वचनेस्थितः ॥ पञ्चत्वंचगताकाले तथानरकयातनां ॥ ता-
म्रभ्राष्ट्रेचदग्धाहं युगानिदशपञ्चच ॥ सूक्ष्मातिलप्रमाणानि कृत्वाखण्डान्यनेकशः ॥ किंचित्पातकशेषेषु धरायामवतारिता ॥ ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहगोधामयंरूपं कृत्वाभास्करजेनमे ॥ साहमवस्थिताभूप वर्षाणामयुतंसरुक् ॥ यान्यापियुवतीराजन् भर्तुर्वश्यंसमाचरेत ॥ वृथाधर्म्माद्दुराचारा भर्ज्यतेताम्रभ्राष्ट्रके ॥ भर्त्तानाथोगुरुर्भर्त्ता भर्त्तावैदैवतंपरं ॥ तंवश्यंकुरुतेयातु सासुखंकथमाप्नुयात् ॥ तिर्यग्योनिशतंयाति कृमियोनिशतानिच ॥ तस्माद्भूपालकर्त्तव्यंस्त्रीभिर्भर्तृवचस्सदा ॥ साहंयास्येपुनर्योनिंकुत्सितांयातनान्वितां ॥ यदिनोद्धरसेराजन् अद्यमांशरणागतां ॥ सुकृतस्यप्रभावेन निजजन्मानितेनच ॥ यात्वयासंगमेपुण्या कृताश्रवणद्वादशी ॥ शरय्वाश्चैवगंगायाः संगमेपापनाशने ॥ प्रेतनिर्य्यातनीपुण्या ह्यप्सितस्यचदायिनी ॥ यस्यांभूपालस्त्वगृहे स्नातोपिमनुजःकिल ॥ सर्वतीर्थफलप्राप्तिं लभतेनात्रसंशयः ॥ दत्तंजप्तंहुतंयच्च कृतंदेवार्चनादियत् ॥ सर्वंतदक्षयंज्ञेयं यत्कृतंविजयादिने ॥ एवंविधंफलं तस्या स्तदेवसकलंतव ॥ द्वादश्यामुपवासेन त्रयोदश्यांतुपारणे ॥ दशाब्दफलमाप्नोति नरःसम्यगुपोषणैः ॥ दयांकुरुमहीपाल धर्ममूर्त्तिर्भवान्क्षितौ ॥ वैवस्वतपथध्वंसीपरित्राहिसुदुःखितां ॥ गृहगोधावचःश्रुत्वामोहिनीवाक्यमब्रवीत् ॥ स्वकृतंजन्तवोश्नन्ति सुखदुःखादिकंविभो ॥ तस्मात्किमनयाकार्य्यं पापयाभर्तृक्षुद्रया ॥ ययाभर्त्तावशंनीतोरक्षाचूर्णादिभिर्नृप ॥ साधुभ्योयत्कृतंराजन् यशःस्वर्गकरंभवेत् ॥ शर्करामिश्रितंक्षीरंकाद्रवेयेनिवेदितं ॥ विषवृष्टिकरंदृष्टमेवंदुष्टेनियोजितं ॥ पापामिमांपरित्यज्यगच्छावोनगरायवै ॥ जनव्यापादयुक्तानामात्मसौख्यंविनश्यति ॥ रुक्माङ्गदउवाच ॥ ब्रह्मात्मजेकथंवाक्यमीदृशंव्याहृतंत्वया ॥ नसाधुनामि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दंवृत्तंभवेच्चारुविहासिनि ॥ आत्मसौख्यकराःपापा भवन्तिपरदारिकाः ॥ पिताजातोवरारोहे परोपकरणायते ॥ शशीसूर्य्योथपव-
नोमेदिनीहुतभुग्जलं ॥ चन्दनंपादपाःसन्तःपरोपकरणेस्थिताः ॥ श्रूयतेकिलराजाभूद्धरिश्चन्द्रोवरानने ॥ चाण्डालमन्दिरवासी
भार्य्यातनयविक्रयी ॥ असत्यवचनाद्भीतोदुःखाद्दुःखतरंगतः ॥ तस्यसत्येनसन्तुष्टा देवाब्रह्मपुरोगमाः ॥ वरेणशक्रदशीचक्षुर्हरिश्चन्द्रं
महीपतिं ॥ तेनसत्यवताचोक्ता देवाब्रह्मपुरोगमाः ॥ यदितुष्टाहिविबुधा दातुकामोवरंमम ॥ एषाहिनगरीरम्यासद्रूपाससरीसृ-
पाः ॥ आवालवृद्धतरुणा सनारीससुतायदा ॥ मयांतगतपापाहि स्वर्गतींनगरीःमम ॥ अयोध्यापातकंगृह्य गन्ताहंनगरंध्रुवं ॥
एकाकीनहिवांच्छन्ति परित्यज्यजनांक्षितौ ॥ स्वर्गंगन्तुंहिविबुधाः सत्यमेतन्मयेरितं ॥ तस्यतांधिषणांज्ञात्वा सहतेनैवतांपुरीं ॥
आनयन्त्रिदिवंदेवा ब्रह्मणासहिताःकिल ॥ सोद्यापिवसतेराजा स्वपौरेणसमन्वितः ॥ कामगेनविशालाक्षि पूज्यमानोदिवाल-
यैः ॥ अस्थिदानंकृतंदेवी कृपयाहिदधीचिना ॥ देवानामुपकारार्थं ज्ञात्वादैत्यैर्निराकृतान् ॥ कपोतार्थेस्वमांसानि सिविनाभूभु-
जापुरा ॥ प्रदत्तानिवरारोहे श्येनायक्षुधितायवै ॥ जीमूतवाहनोराजा पुरासीत्क्षितिमण्डले ॥ तेनापिजीवितंदत्तं गरुडाय
वरानने ॥ तस्माद्दयालुनादेवि भवितव्यंमहीभुजा ॥ शुचौवर्षातिदेवेशो अमेघेपिसमंशुभे ॥ चाण्डालंपतितंचन्द्रो ह्लादयत्यनि-
जैकरैः ॥ तस्मादहंवरारोहे गृहगोधांसुदुःखितां ॥ उद्धरिष्येनिजैःपुण्यै दौहित्रैर्नाद्युषिर्यथा ॥ विमोहिनींनिराकृत्य गृहगोधामु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाचह ॥ दत्तंमयाकृतंपुण्यं विजयासंभवंतव ॥ गच्छविष्णोःशुभाल्लोकान् निर्द्धूताखिलकल्मषा ॥ तद्वाक्यंसहसाश्रुत्वा दिव्या-
भरणभूषिता ॥ विमुच्यदेहंतंजीर्णं गृहगोधासमुद्भवं ॥ द्वादशादित्यभाजाता दिव्यरूपामनस्विनी ॥ जगाममंत्र्यतंभूपं द्यो-
तयन्तीदिशोदश ॥ श्रीमन्तमिवकुर्वाणा वैष्णवंपदमुत्तमं ॥ यद्योगिगम्यंहुतभुक्प्रकाशं वरंवरेण्यंपरमस्वरूपं ॥ यस्मादिमेदेव
शशिप्रकाशा जगत्प्रकाशायनृपःप्रसूतः ॥ ७६ ॥ इतिश्रीलघुनारदीयपुराणेरुक्माङ्गदचरिते गृहगोधासंवादोनामचतुर्दशः १४
वशिष्ठउवाच ॥ पातकान्मोचयित्वातां गृहगोधांसपार्थिवः ॥ उवाचमोहिनींवाक्यं शीघ्रमारुह्यतांहयः ॥ योजनायुतशोह्येष क्ष-
णात्कृष्णध्वजोयथा ॥ अद्यपश्यासिपुत्रस्य वक्रंपूर्णेन्दुसप्रभं ॥ धार्मिकस्यवरारोहे कृतज्ञस्यमहात्मनः ॥ सुखगामीहयोदेवि वि-
मानप्रतिमःशुभे ॥ तदाकर्ण्यवचोराज्ञो मोहिनीमदलालसा ॥ आरुरोहसमंभर्त्रा तंहयंवातवेगिनम् ॥ उवाचमोहिनीभूयो भ-
र्त्तारंप्रस्मयन्निति ॥ प्रतोदयेनमश्वंत्वं स्वपुरायमहीपते ॥ पुत्रवक्रंस्पृहाद्रष्टुं लंपटातववर्त्तते ॥ तवाधुनानृपश्रेष्ठ गंतुंचत्वरतेमनः ॥
मोहिन्यावचनंश्रुत्वा प्रतस्थेनगरंप्रति ॥ पश्यमानःसुसंहृष्टः पादपान्पर्वतान्नदी ॥ वनानिसुविचित्राणि मृगान्बहुविधानपि ॥
ग्रामान्घोषान्तथादुर्गान् नगराणिशुभानिच ॥ सरांसिचविचित्राणि महाभागान्मनोहरान् ॥ अचिरेणाश्रमंदृष्ट्वा वामदेवस्यभू-
पतिः ॥ आकाशस्थोमहीपालो नमस्कृत्यत्वरान्वितः ॥ ततोययौमहाराजो वायुवेगेनवाजिना ॥ पश्यमानोबहुन्देशान् धनधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ना०पु० न्यसमन्वितान् ॥ आससादपुरंराजा वैदेशेसुरसन्नवत ।' तमाघ्रातंनृपंदृष्ट्वा चारैर्धर्मांगदस्ततः ॥ पितरंधर्मसंयुक्तं भूपालान्वा- अ० १८
क्यमब्रवीत् ॥ एषाप्रकाशमायाति दिशुदीचीनृपोत्तमाः ॥ मत्पितुर्वाजिनाक्रान्ता तेजसातस्यरञ्जिता ॥ तस्माद्गच्छामहेसर्वे सं-
॥ २१ ॥ मुखंनव्रजेत्सुतः ॥ यःसैवैनरकंयाति घोरंनास्त्यत्रसंशयः ॥ संमुखंव्रजमानस्य सुतस्यपितरंप्रति ॥ पदेपदेयज्ञफलं प्राज्ञःपौरा-
णिकाद्विजाः ॥ उत्तिष्ठध्वंप्रयाम्येष भवद्भिःपरिवारितः ॥ अभिवादयितुंप्रेम्णा एषमेदैवतःपरं ॥ तथेत्युक्तस्तुतैःसर्वै र्भूमिपालैर्नृ-
पात्मजः ॥ जगामसंमुखंपद्भ्यां क्रोशमात्रंपितुस्तदा ॥ वृतोराजसहस्रेण मूर्त्तिमानिवमन्मथः ॥ सगत्वादूरमध्वानमाससादनृ-
पात्मजः ॥ संप्राप्यपितरंस्नेहाज्जगामधरणींतदा ॥ शिरसाराजभिःसार्द्धं प्रणाममकरोत्तदा ॥ तंप्रणामगतंप्रेक्ष्य तनयंभूभुजैस-
ह ॥ अवरुह्यहयाद्राजा समुत्थाप्यसुतंविभो ॥ भुजाभ्यांसाधुवृत्ताभ्यां परिष्वज्यसभूमिपः ॥ मूर्द्ध्निचैनमुपाघ्राय उवाचतनयं-
तदा ॥ कच्चित्पासिप्रजाःसर्वाः कच्चिद्ध्वंसयसेरिपून् ॥ न्यायागतेनवित्तेन कोशंपुत्रबिभर्षिवै ॥ कच्चिद्विप्रेधिकावृत्तिरस्तिपुत्र-
त्वयाकृता ॥ कच्चिद्देशान्तशीलत्वं कच्चिद्दुर्गोनानिष्ठुरः ॥ कच्चिद्गावोनदुह्यन्ते पुत्रचाण्डालवेश्मनि ॥ कच्चित्तेविषयेसत्वा विनी-
ताःपितृवत्सलाः ॥ श्वश्रूवाक्येवधूकच्चिद्वर्त्ततेभर्तृतत्परा ॥ कच्चिद्विवादान्विप्रैश्च सहपश्यसिपुत्रक ॥ कच्चिद्गावोनबाध्यन्ते वि- ॥ २१ ॥
षयेतृणवारिषु ॥ तुलामानानिसर्बाणि संपश्यसिदिनत्रये ॥ कुटुंबिनःकरैःपुत्र पीडयन्नातिबर्द्धसे ॥ कच्चिन्नद्यूतपानादि वर्त्तसे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयेतव ॥ कश्चिद्विभ्रसैर्लोका भिन्नधान्यैःपुरेतव ॥ तथाविशीर्णैर्वर्णैश्च वञ्चयन्तिनमानवाः ॥ सुदृष्ट्यापुत्रकच्चिद्वै हस्त्यश्वंपरि-
पश्यसि ॥ कच्चित्तुमातृःसर्वावै नविशेषेणपश्यसि ॥ कच्चिन्नवासरेविष्णोर्नरोभुङ्क्तेपुरेतव ॥ शशिक्षयेतुसंप्राप्ते कच्चिच्छ्राद्धकरोज-
नः ॥ कच्चिच्चापररात्रेषु निद्रांपुत्रविसर्जसे ॥ निद्रामूलमनर्थस्य निद्रापापप्रवर्त्तिनी ॥ निद्रादरिद्रजननी निद्राश्रेयोविनाशिनी ॥
नहिनिद्रान्वितोराजा चिरंभुङ्क्तेवसुन्धरां ॥ पुंश्चलीचयथाभर्तुर्लोकद्वयविनाशिनी ॥ एवमुच्चरमाणेतु तनयोवाक्यमब्रवीत ॥ ध-
र्मांगदोमहीपालं प्रणम्यचपुनःपुनः ॥ सर्वमेतत्कृतंतात पुनःकर्त्तास्मितेवचः ॥ पितुर्वचनकर्त्ताच पुत्रोवन्द्योजगत्त्रये ॥ किंत-
स्मात्पातकंतस्य नकुर्याद्यःपितुर्वचः ॥ नतुतीर्थफलंकुर्यात यःकुर्यात्सेवनंपितुः ॥ त्वदधीनंशरीरंमे त्वदधीनंहिजीवितं ॥ त्वदधी-
नोहिमेधर्मस्तथात्वंदैवतंमम ॥ त्रैलोक्यस्यापिदानेन नशुद्धिर्मेऋणात्तव ॥ किंपुनर्देहवृत्ताभ्यां क्लेशदानादिभिर्विभो ॥ एवंब्रु-
वाणंतनयं बहुभूपालसंवृतं ॥ रुक्मांगदःपरिष्वज्य पुनराहसुतंवचः ॥ सत्यमेतत्त्वयापुत्र व्याहृतंवेदसंमितं ॥ पितुरत्यधिकंकिं-
चिद्दैवतंनसुतस्यहि ॥ देवाःपराङ्मुखास्तस्य पितरंयोवमन्यते ॥ सोहंमूर्ध्नित्वयापुत्र धृतस्तुक्षितिरक्षणात् ॥ जित्वाद्वीपवतींपृथ्वीं
बहुभूपालभूषितां ॥ एतत्सौख्यंपरंलोके स्वर्गस्यैतत्पदंतथा ॥ पितुरत्यधिकःपुत्रो यद्भवेत्क्षितिमण्डले ॥ सोहंपुत्रकृतार्थस्तु कृतः
सद्गुणवर्त्तिना ॥ त्वयासाधयतांपुत्र तथाहरिदिनंशुभं ॥ ततपितुर्वचनंश्रुत्वा पुत्रोधर्मांगदोब्रवीत ॥ कृतस्तुभवात्राजन् निवेद्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयिभूधुरं ॥ कस्मिन्स्थानेत्वियंप्राप्ता सूर्यायुतसमप्रभा ॥ मन्येनिर्वेदमापन्न इमांकृत्वाप्रजापतिः ॥ नेदृग्रूपामहीपाल नारींत्रै-
ना०पु० लोक्यमध्यतः ॥ मेध्यभूधरजादेवी अथवासागरोद्भवा ॥ मायावामयदैत्यस्य प्रमदारूपधारिणी ॥ अहोधातासुनिपुणो येनेयं- अ० १६
॥ २२ ॥ निर्मितापुरा ॥ कलाग्रशतभागंतु व्यलीकंनैवदृश्यते ॥ इयंहियोग्याकनकाब्भासा तथैवधन्याजगतीपतीश ॥ एवंविधामेज-
ननीयथास्यात् कोन्योस्तिमत्तःसुकृतीनरेन्द्रः ॥ ४९ ॥ इतिश्री ल० ना० पु रु० पुत्रानुशासनं नाम पञ्चदशोध्यायः ॥ १५ ॥
वशिष्ठउवाच ॥ धर्म्मांगदवचःश्रुत्वा हृष्टोरुक्मांगदोब्रवीत् ॥ सत्यंतेजननीपुत्र संप्राप्तामन्दरेमया ॥ विधानात्पुत्रवालेयं मदर्थे-
कृतनिश्चया ॥ कुर्वतीदारुणांकिंचि त्तपःपरमदुष्करं ॥ ततःपञ्चदशाहेन हयमारुह्यवेगितः ॥ मन्दरंपर्वतंश्रेष्ठं गतोहंधर्मभूषण ॥
तस्यमूर्ध्निमहाभागा तोषयन्तीदिगंवरं ॥ मयादृष्टासमारुह्य पञ्चांश्चीरोदगह्वरं ॥ ततोहंमूर्च्छयायुक्तः पतितोधरणीतले ॥ अनंग
मार्गणैर्विद्धो व्याधविद्धोमृगोयथा ॥ ततोहमनयादेव्या शांत्वितश्चारुनेत्रया ॥ उक्तोहंभवभर्त्तामे किंचित्प्रार्थनयासह ॥ मया
चापिप्रतिज्ञातं सदक्षिणकरान्वितं ॥ सेयंभार्य्याविशालाक्षी स्थितामन्दरमस्तके ॥ ततोवतीर्यभूपृष्ठं समारुह्यतुरंगमं ॥ तृतीयेन
दिनेनाहं संप्राप्तस्तवमन्दिरं ॥ पश्यमानोगिरिन्देशान् सरांसिसरितस्तथा ॥ इयंतेजननीपुत्र ममभार्य्यासुशोभना ॥ अभिवा-
दयचार्वंगी मिमांसन्ध्यावलीमिव ॥ तत्पितुर्वचनंश्रुत्वा चाग्रसंस्थामवन्दत ॥ शिरसात्वदनींगत्वा विनयेनमहाशयः ॥ उवाच ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोहिनीतत्र प्रहसन्निवभूपते ॥ नमस्करोमित्वामंब सहैभिर्वसुधाधिपैः ॥ प्रसादंकुरुमेदेवि प्रणतस्यकृतांजलेः ॥ तंपुत्रमवनींप्रा-
प्तं मोहिनीप्रेक्ष्यभूपते ॥ दाक्षिण्येनतुसाभर्त्तु रवतीर्य्यतुरंगमात् ॥ अवगृह्यचवाहुभ्यां उत्थाप्यविनतंतुतं ॥ परित्यक्तस्तथामात्रा
पुनरेवाभ्यवादयत् ॥ ततस्तांसुमनोज्ञैस्तु चारुवस्त्रैःसुभूषणैः ॥ भूषयित्वासमारोप्य पुनरेवहयोत्तमं ॥ सपृष्ठेचरणौकृत्वा तस्या
राजीवलोचनः ॥ तेनैवविधिनाभूप पितरंचाप्यरोपयत् ॥ वृतोभूपालसंघैश्च पद्भ्यांधर्म्मांगदाययौ ॥ अश्वस्याग्रेतदात्दृष्टो जन-
नींप्रेक्ष्यमोहिनीं ॥ श्रावयन्सुजनंसर्वं मेघगंभीरयागिरा ॥ धन्यःसतनयोलोके मातरोयस्यभूरिशः ॥ सर्वलक्षणसंपूर्णः पितुरिष्टो
महावलः ॥ यस्यैकाजननीलोके पितातस्येहदुःखभाक् ॥ पितुर्दुःखेनपुत्रस्य नचसौख्यंभवेन्महत् ॥ एकस्यावन्दनेमातुः पृथि-
वीफलमश्नुते ॥ मातॄणांवहुलेसत्यं महत्पुण्यंभविष्यति ॥ दिवसेदिवसेपूजां कुर्वतस्त्वक्षयंफलं ॥ एवमुच्चार्य्यमाणोसाववनीप-
तिसंवृतः ॥ प्रविष्टोनगरंरम्यं वेदिशंऋद्धिसंयुतं ॥ हयस्थेनैवपित्रावै सपद्भ्यामेवभूपते ॥ ततोगृहवरंप्राप्य गृह्यमाणोजनैर्नृपः ॥
अवरुह्यहयात्तस्मात् मोहिनींवाक्यमब्रवीत् ॥ धर्मांगदगृहंगच्छ मत्सुतस्यमनोहरं ॥ एषतेगुरुसुश्रूषां करिष्यतिवरानने ॥ नस-
खीनैवदासीति सुश्रूषामाचरेत्तथा ॥ साह्येवमुक्तापतिना प्रतस्थेसुतमन्दिरं ॥ धर्मांगदेनसातुष्टा गच्छन्तीमन्दिरायवै ॥ दृष्ट्वास-
चमहाभाग स्तानुवाचमहीभुजः ॥ तिष्ठध्वंपितुरादेशात सुश्रूषेजननीमहं ॥ तानेवमुक्त्वानीत्वाच स्वगृहंगजगामिनीं ॥ आरो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पयामासचतां पर्य्यंकेसुमनोहरे ॥ काञ्चनेपट्टसूत्रेण रचितेकोमलेदृढे ॥ सुखास्तरणसंयुक्ते मणिविद्रुमभूषिते ॥ रत्नदीपैश्चबहुशो
मा०पु० भाषितेसूर्य्यसन्निभैः ॥ पादप्रक्षालनंचक्रे ततोवैधर्मभूषणः ॥ सन्ध्यावल्यागुरुत्वेन तामपश्यतसुन्दरीं ॥ नैवतस्याभवद्दृष्टं मो- अ० १७
॥ २३ ॥ हिनींप्रतिमानसं ॥ सुकुमारीसुतत्वंगी पीनोरुजघनस्थली ॥ मेनेवर्षायुतसमा मात्मानंहित्रिवार्षिकं ॥ प्रक्षाल्यचरणौतस्या स्त-
ज्जलंचाप्यवन्दयत ॥ पादोत्थंपरयाभक्त्या कृतकृत्योस्मिभाविनि ॥ ततस्तांस्नापयामास अक्षुब्धेनहचेतसा ॥ स्वयंचवरनारीभिः
श्रमक्लमहरायवै ॥ सर्वभोगैस्तदादेवीं चक्रेधर्मांगदःसुतः ॥ क्षीरोदमथनेजाते मन्दरेचामृतालये ॥ येलब्धदानवान्जित्वा पाता-
लेरत्नमृत्तिके ॥ मोहिन्याःकर्णयोश्चक्रे स्वयमेववृषांगदः ॥ जांबूनदस्यशुद्धस्य निष्कंकुलिशभूषितं ॥ हारादनंतरंमातुर्ददौभूप
सुतस्तदा ॥ अष्टोत्तरसहस्रेण धात्रीफलनिभैःशुभैः ॥ मौक्तिकैराचितःशुभ्रो हारोदेव्याःक्षिपच्छृदि ॥ निष्कपलशतैर्वद्धः कुलिशा
युतभूषितः ॥ हाराल्लघुतरंचक्रे मातुर्नृपसुतस्तदा ॥ वलयावज्रखचिता द्विरष्टौकरयोर्दधत ॥ एकैकेनिस्ककोटिर्हि कृतामुल्यवि-
दैर्नरैः ॥ केयुरनूपुरंतस्या अनन्तोयंनृपात्मजः ॥ प्रददौपितुरिष्ठायां अनेकाभरणंनृपः ॥ कटिसूत्रंचसर्वाण्या यदासीत्तारकप्र-
भं ॥ तद्भ्रष्टंभयभीतायाः संग्रामेतारकामये ॥ कालनेमिस्थितेराज्ये पतितंमलयाचले ॥ तद्गृहीतंतुदैत्येन शतमायेनमायिना ॥
तंहत्वामलयेदैत्यं दैत्यकोटिशतावृतं ॥ सँवत्सररणेघोरे पितुर्वचनकारणात् ॥ अवापकटिसूत्रंतद्दैत्यराजप्रियास्थितं ॥ तद्ददौपि- ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुराज्ञायाः सानन्दपुलकोनृपः ॥ हिरण्यकशिपोःपूर्वं याभार्य्यालोकसुन्दरी ॥ तस्यासीमन्तकस्यासीच्छतविद्युत्समप्रभः ॥
साप्रविष्ठाहिपतिना सहपावकमध्यतः ॥ समुद्रक्षिप्यसीमन्तं दुःखेनमहतान्वितः ॥ सागरस्तत्रसंपूज्य रत्नश्रेष्ठमिदंकिल ॥ ददौ
धर्म्मांगदेरत्नं समुद्रोवीर्य्यतोषितः ॥ जनन्यैप्रददौसोपि सूर्य्यकोटिसमप्रभं ॥ अग्निशौचेशुभेवस्त्रे सकाञ्चनमनोरमे ॥ सहस्त्रको-
टितुल्येतु मोहिन्याःसानिवेदयत् ॥ देवमाल्यंसुगन्धाद्यं तथादेवविलेपनं ॥ लब्धंदेवगुरोःपूर्वं सिद्धहस्तात्सुहृद्यकं ॥ धर्म्मांगदेन
वीरेण द्वीपानामाधिपेनच ॥ तच्चापिप्रददौदेव्या मोहिन्याःकामवर्द्धनं ॥ संपूज्यपरयाभक्त्या पश्चात्षड्रसभोजनं ॥ स्वीकृतंमातृ
हस्तेन भोजयामासभूमिपः ॥ पुरस्तादेवजननीं वाक्यैःसंबोध्यभूरिशः ॥ उवाचमधुरंवाक्यं शिरसोच्यप्रणम्यवै ॥ मयात्वया
चकर्त्तव्यं राज्ञोवाक्यंनसंशयः ॥ यात्विष्टानृपतेर्देवि सास्माकंतुगरीयसी ॥ यात्विष्टाभवतेभर्त्तु स्तस्यांयानिष्ठमाचरेत् ॥ सपत्नी
नरकंयाति यावदिन्द्राश्चतुर्द्दश ॥ सपत्नभावंयाकुर्य्या द्भर्त्तप्राणप्रियातुया ॥ तस्याःस्नेहवशात्सापि पच्यतेताम्रभ्राष्ट्रके ॥ यथा
सुखेवसेद्भर्त्ता तथाकार्य्यंहिभार्य्यया ॥ अनुकूलहितंकार्यं भर्त्तुरिष्टाहिसाभवेत् ॥ यथाभर्त्तातथातांहि वश्येतत्वरवर्णिनि ॥ हीता-
यामपिशुश्रूषां कृत्वायातित्रिविष्टपं ॥ पश्चात्स्थानेभवेत्स्थाहि यस्मिन्नसाह्यभवत्पुरा ॥ ॥सर्वभोगानवाप्नोति भर्त्तुरिष्टाप्रजायते ॥
ईर्ष्यागर्वपरित्यागा त्सर्वेश्वरपदंलभेत् ॥ सपत्नीयासपत्न्याश्च शुश्रूषाकुरुतेसदा ॥ भर्त्तुरिष्टांसमीक्षेत लोकास्तस्याःसदाक्षयाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इष्टापुरान्ब्राह्मणस्य वेश्याभूत्शाकलेपुरे ॥ शूद्राचारप्रदुष्टस्य परित्यक्तक्रियस्यच ॥ तस्यैवतुमहाभागा भार्य्यासाध्वीपतिव्रता ॥
॥ २४ ॥ साधुपर्य्यचरत्साधु सवश्यंब्राह्मणाधमं ॥ उभयोश्चालयेत्पादा वुभयोःप्रियकारिणी ॥ उभयोरप्यधःशेते तयोश्चवचनेस्थिता ॥
वेश्ययावार्य्यमाणानि सर्वप्रायछताधिकं ॥ एवंशुश्रूषयंत्याहि भर्त्तारंवेश्ययासह ॥ जगामसुमहान्कालो दुःखितायामहीपते ॥
अपरस्मिन्दिनेभर्त्तामाहिषंमूलमास्थितं ॥ अभक्षयत्सुधर्म्मेणनिःपावांतिलमिश्रितान् ॥ तदापथ्यमशित्वाथअवमन्यपतिव्रताम् ॥
अभवद्दारुणोरोगः स्त्रीजितस्यभगन्दरः ॥ पीड्यमानस्तुसतदा दिवारात्रौतदातुरः ॥ यावदस्तिगृहेवित्तं तावद्वेश्याहिसर्वशः ॥
गृहीत्वाद्विगुणंवित्तं गतायायान्यमन्दिरं ॥ अन्यस्यचतथासायं गतापार्श्वमनिन्दिते ॥ ततःसदीनवदनो व्रीडयाधोमुखास्थितः ॥
उवाचसरुदन्भार्य्यां रुजाव्याकुलचेतनः ॥ परिपालयमांदेवि वेश्यासक्तंसुनिष्ठुरं ॥ नमयोपकृतंकिञ्चि त्तवसुन्दरिपापिना ॥
योभार्य्यांप्रणतांपापो नानुमन्येतगर्वितः ॥ सषंढोभवतेभद्रे जन्मानिदशपञ्चच ॥ दिवाकीर्त्तिंगृहंप्राप्य गर्भितंसाधुभिर्जनैः ॥
पापांयोनिमवाप्स्यामि देवित्वामवमन्यहि ॥ तवक्रोधेनदग्धोस्मि त्राहिमांपापिनंशुभे ॥ त्राणंमेकुरुभर्त्तारमब्रवीत्सापतिव्रता ॥
नदैन्यंभवताकार्य्यं नव्रीडाकार्यमांप्रति ॥ नचापित्वयिमेक्रोधो येनदग्धानिवक्ष्यसि ॥ पुराकृतानिपापानि दुःखानिप्रभवन्तिहि ॥ ॥ २४ ॥
तानियःक्षमतेविद्वान् सज्ञेयःपुरुषोत्तमः ॥ यन्मयापापयापापं कृतंवैपूर्वजन्मनि ॥ तद्भुंजत्यानमेदुःखं नविसादश्चकश्चन ॥ इ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्येवमुक्त्वाभर्त्तारं सासुभ्रूःसमयालयत् ॥ आनीयजनकाद्वित्तं वन्धुभ्योवरवर्णिनी ॥ क्षीरोदनिलयात्रासं भर्त्तारंसानुगम्यते ॥
मोचयंतिदिवारात्रौ पुरीषंमुत्रएवच ॥ रजन्यांचैववृक्षोत्थं गृह्यनिर्ज्जासजंजलं ॥ नखेनपातयामास क्रमिन्कृष्णान्शनैःशनैः ॥
नसास्वपितिवैरात्रौ नदिवावरवर्णिनी ॥ भर्त्तुर्दुःखेनसातत्रा पश्यन्तीज्वलितंजगत् ॥ भोदेवास्त्रायतांसर्वे पितरोयेचाविश्रुताः ॥
कुर्वंतुरोगहीनंमे भर्त्तारंगतकल्मषं ॥ चण्डिकायैप्रदास्यामि रक्तमाम्ससमुद्भवं ॥ अजाविमाहिषोपेतं भर्तुरिष्टाहिमेभवेत् ॥ साद-
रात्कारयिष्यामि उपवासंतथादश ॥ जननीस्थापयिष्यामि शून्यकण्टकसंस्तरे ॥ नोपभोक्ष्यामिमधुरं नोपभोक्ष्यामिवैघृतं ॥ अ
भ्यङ्गरहितावस्थां रम्येहंनात्रसंशयः ॥ जीवतांरोगहीनस्तु भर्त्तामेशरदांशतं ॥ एवंसाव्याहरद्देवि वासरेवासरेतदा ॥ ततःकाले-
नचान्येन सन्निपातोभवत्पतेः ॥ तस्यापिकटुकंप्रादा दास्येनिःक्षिप्यदेशिनी ॥ तद्दीयमानेकट्ठके अंगुलींतामखण्डयत् ॥ वेश्यां
दृष्ट्वातदाभीत स्तद्गतेनांतरात्मना ॥ उभयोर्द्दन्तयोःश्लेषः सहसासमपद्यत ॥ तांखण्डमंगुलींवक्त्रे स्थितांभर्तुःस्वकोमलां ॥ खण्ड-
यित्वांगुलींभर्त्ता पञ्चत्वमगमत्तदा ॥ शय्यायांलीनमुक्तायां स्मरन्तींपुंश्चलींतदा ॥ मृतंविज्ञायभर्त्तारं साभार्य्याभर्तृतत्परा ॥ वि-
क्रियांगतमेवन्तं गृहीत्वाचैवसातदा ॥ सर्पिर्युतांचितांचक्रे मध्येकृत्वापतिंतदा ॥ अनुगृह्यपदाभ्यांसा पञ्चांदत्वात्रुपावकं ॥ मु-
खेमुखंसमाधाय हृदयेहृदयंतथा ॥ जघनेजघनंदेवी भर्तुःसासंनिवेश्यह ॥ दाहयामासकल्याणी भर्तुर्देहंद्धजान्वितं ॥ आत्मना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 सहचार्वंगी ज्वलितेजातवेदसि ॥ विमुच्यदेहंसहसाजगाम पतिंसमादायसुराधिलोकं ॥ विशोषयित्वावहुपापसंघान् स्वकर्मणा
तेनचदुःकरेण ॥ ६४ ॥ इतिश्रीलघुनारदीयपुराणे सन्ध्यावलीप्रवोधन्नाम षोडशोध्यायः ॥ १६ ॥ छ छ छ छ छ

पुत्रउवाच ॥ तस्मादीर्ष्यांपरित्यज्य मोहिनीमन्नभोजय ॥ नमातरीदृशंपुण्यं त्रैलोक्येप्राप्यतेक्वचित् ॥ गृहस्थेनप्रियांभार्यां भ-
र्तुर्याहिविभोजयेत् ॥ सपत्न्योहिसपत्न्यैतु यद्भक्तंप्रददातिवै ॥ तेनानेनभवेद्देवि प्रीतःकमलजःशुभे ॥ पितुर्मनोरमेतत्वं प्रसीद-
स्वममानघे ॥ तस्यास्तुसौख्यंकर्त्तव्यमावाभ्यांबरवर्णिनी ॥ भवेत्पापक्षयश्चैव स्वर्गप्राप्तिस्तुवाक्षया ॥ श्रुत्वातद्वचनंसातु देवीस-
न्ध्यावलीतथा ॥ अभिनन्द्यपरिष्वज्य तनयंगजगामिनी ॥ मूर्ध्निचैवमुपाघ्राय वचनंचेदमब्रवीत् ॥ करिष्येवचनंपुत्र धर्म्यंहि-
तवमानद ॥ ईर्ष्यामानंपरित्यज्य भोजयिष्यामिमोहिनीं ॥ सदपत्यात्वहंपुत्र त्वयैकेनमहामते ॥ नियमैर्बहुभिर्जातस्तथैवबहुभि-
र्व्रतैः ॥ व्रतराजेनचीर्णेन जातस्त्वमसिपुत्रक ॥ नहीदृशंव्रतवरं पुत्रलोकेषुविद्यते ॥ सद्यप्रत्ययकृद्वत्स महापातकनाशनं ॥ किं-
कार्यंबहुभिःपुत्रैः शोकसन्तापकारकैः ॥ बरमेकःकुलालंवी यत्रविश्रमतेकुलं ॥ त्रैलोक्यादुपरिष्ठाच्च स्थिताहंतवसद्गुणैः ॥ जनयि-
त्वातुत्वांपुत्र धर्मचारिन्नृपभूषण ॥ नकिंचित्कामयेवत्स तृप्तातवगुणत्रयैः ॥ धन्यानितानिपुण्यानि यैर्जातस्त्वंममानघ ॥ सप्त
द्वीपपतिःप्राज्ञः पितुराज्ञाकरस्तथा ॥ नाह्लादयतियस्तातं जननीम्वाथपुत्रक ॥ तंपुत्रंकवयःप्राहुर्महापातकसूचकम् ॥ एवमुक्ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुतनयं देवीसन्ध्यावलीतदा ॥ दीक्षांचक्रेचभाण्डानां षड्रसस्यकृतेततः ॥ तस्यावीक्षितमात्रेण परिपूर्णानिभूपते ॥ षड्रसस्यतथो-
श्वस्य मोहिनीभोजनेच्छया ॥ जलस्यामृतकल्पस्य शीतलस्यमहीपते ॥ घटापूर्णास्तथाचक्रे राज्ञांसन्ध्यावलीनृप ॥ ततःसार्चि-
षमादाय काञ्चनंरत्नसंभवं ॥ तांपर्यन्वेक्ष्यदव्यग्रे मोहिनींप्राहसत्ततः ॥ काञ्चनेभाजनेश्लक्ष्णे सुस्वादान्नंत्वशनन्ने ॥ शनैःशनैश्चभु-
ञ्जाना राजीवदललोचना ॥ उपविश्याशनेरम्ये शातकुंभमयेशुभे ॥ वीज्यमानावरारोहा व्यजनेननराधिप ॥ धर्मांगदगृहीतेन
शिखिपिच्छकृतेनच ॥ साभुक्त्वाब्रह्मतनया तदन्नममृतोपमं ॥ चतुर्गुणंसुशीतेन कृत्वाशौचंजलेनतु ॥ जगृहेपुत्रदत्तंसा तांबूलं
सुरसुन्दरी ॥ वरचन्दनदिग्धेन हस्तेनपरयामुदा ॥ ततःप्रहस्यशनकैः प्राहसन्ध्यावलींनृप ॥ जननीकिंतुदेवित्वं नृपांगदनृप-
स्यतु ॥ नमयाहिपरिज्ञातं श्रमखेदतयाथुभे ॥ तामेवंवादिनींदृष्ट्वा तदासन्ध्यावलींप्रति ॥ धर्मांगदोथनृपतिरिदंवचनमब्रवीत् ॥
उदरेत्वनयादेव्या धृतःसंवत्सरत्रयं ॥ तवभर्तुःप्रसादेन वृद्धिंप्राप्तोहमस्यतु ॥ सन्त्यनेकानिमातॄणां वर्गाणिममसुन्दरि ॥ अस्याः
पीतंपयोदेवि मयासुकृतिनाशुभे ॥ अनयासारुषातीव्रा संप्राप्तप्रसवात्मिका ॥ जनयित्वातुमांदेवी जातापूर्णमनोरमा ॥ त-
न्नास्तित्रिषुलोकेषु येनानृण्यमवाप्नुयात् ॥ मातुस्त्वहंसुचार्वंगि सत्यमेतन्मयोदितं ॥ सोहंधन्यतरोलोके नास्तिमत्तोधिकःपु-
मान् ॥ योहमुत्सङ्गमारुढो मातॄणांयस्यनित्यशः ॥ नोत्सङ्गंयोहिमातॄणां विशतेसाविहकाचित् ॥ मातृसौख्यंनजानाति कुमारी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भर्तृकंयथा ॥ नसोस्तिभूतलेदेवि पितृमातृबहिःकृतः ॥ मातुरुत्संगमारूढः पुत्रोधर्मान्वितोभवेत् ॥ हरोत्तमागंहंतुंतु कराभ्याम-
 भिवाञ्छति ॥ पाल्यमानोजनन्याहि पित्राहीनोपिगर्वितः ॥ समीहतेजगद्धर्तुं सवीर्यंमातृजंपयः ॥ अनयाजठरेनोढो भवतीनां
 सुतस्त्वहं ॥ अम्बाचभवतीनाम्वा विशेषानास्तिमेशुभे ॥ सत्येनानेनमेतातो जीवतांशरदांशतं ॥ एवंब्रुवतिराजेन्द्रे मोहिनीवि-
स्मयंगता ॥ कथंविरुद्धमेतस्य मयाकार्यंसुपापया ॥ धर्मज्ञस्यविनीतस्य मातृभक्तस्यचैवहि ॥ पितृभक्तिपरस्यास्य नचास्यस-
दृशःक्षितौ ॥ एवंगुणान्वितस्योहं कथंकुर्यांजुगुप्सितं ॥ पुत्रस्यधर्मशीलस्य भूत्वातुजननीत्वहं ॥ एवंविमृष्यबहुधा मोहिनीलो-
कसुन्दरी ॥ उवाचवचनंवाला शीघ्रमानयमेपतिं ॥ नशक्नोमिविनातेन मुहूर्त्तमपिजीवितं ॥ ततःसत्वरितोगत्वा प्रणम्यपितरं
नृपः ॥ उवाचपितरंधीमान् सतदानतकंधरः ॥ कनिष्ठाजननीतात शीघ्रमाह्वयतेशुभा ॥ त्वंमहाराजतस्यास्तु समीपंगंतुमर्हसि ॥
तत्पुत्रवाक्यान्नृपतिस्तत्क्षणाद्गन्तुमुद्यतः ॥ प्रहृष्टतनयोराजा तयाजुष्टंगृहंविशेत् ॥ सप्रविश्यमहाराजा ददर्शशयनस्थितां ॥ मो-
हिनींमोहसंयुक्तां तप्तकाञ्चनसन्निभां ॥ उपास्यमानांप्रियया सन्ध्यावल्याशनैःशनैः ॥ पुत्रवाक्यात्परित्यज्य द्वेषंसापत्नजंतदा ॥
दृष्ट्वारुक्माङ्गदंप्राप्तमुत्थितामोहिनीद्रुतं ॥ उत्थायचाब्रवीद्दृष्ट्वा राजानंभूरिदाक्षिणं ॥ इहोपविश्यतांकान्त पर्यङ्केमृदुकाञ्चने ॥ क-
स्मान्निरीक्षतेराजन् राज्यंतत्रतवाधुना ॥ ज्ञातंमयातवाद्यापि राज्येच्छाननिवर्त्तते ॥ मन्येदुष्कृतिनंभूप त्वामहंधरणीतले ॥ यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समर्थंसुतंप्राप्य मातृभृत्यसुहृत्सुच ॥ दक्षेष्वन्येषुधीरेषु स्वयमीक्षेद्यशःश्रियं ॥ तस्माद्दुःखाधिकंनास्ति पापमेवपदेपदे ॥ समर्थेयःसुतेभारं नादत्तेभूपमन्दभाक् ॥ शासिनाराज्ञयोयान्ति पुत्रार्पितकुटुंबिने ॥ केवलंफलभोक्तॄणां विषयासक्तचेतसां ॥ पुत्रानुजपितृभ्रातृ मातृभृत्यमहत्सुच ॥ दक्षेष्वन्येषुवीरेषु बलवत्सुस्थितेषुच ॥ धर्मादिपालनेभूप कथंवीक्षयसेश्रियम् ॥ परित्यज्य प्रियासौख्यं कालाशइवदुर्बलः ॥ यदिपालयसेराज्यं किंमयातेप्रयोजनं ॥ अप्रयोजनमानीता क्षीरगह्वरमस्तकात् ॥ चिटभोज्याभविष्यामि आमिषंत्विवपक्षिभिः ॥ योभार्यायौवनोपेतां नसेवयतिदुर्मतिः ॥ कृत्यासक्तस्तुदुर्मेधाः कुतस्तस्यभवेत्प्रिया ॥ असेवितान्व्रजेद्भार्या तथादत्तंधनंव्रजेत् ॥ अरक्षितंव्रजेद्द्रष्टुमनभ्यस्तंश्रुतंव्रजेत् ॥ नालसैःप्राप्यतेविद्या नभार्यासंस्थितव्रतैः ॥ अनुष्ठानादिनालक्ष्मीर्नामक्तैःप्राप्यतेनृप ॥ नाज्ञानैःप्राप्यतेमोक्षो नात्यागैःप्राप्यतेयशः ॥ नादर्मीसुखमाप्नोति नाभार्यःसन्ततिंक्वचित ॥ नालक्ष्मीःपालयेत्पृथ्वीं नागजीसंगरंव्रजेत ॥ नचागौर्मिष्टमश्नाति नाविद्योभाषतेप्रियं ॥ अपृष्ठोनैवजानाति अगण्डन्नव्रजेत्क्वचित् ॥ अकुर्वन्नप्रियम्त्वेत्ति ननिद्रामेतिजागरी ॥ तस्माद्भूपालमांत्यक्त्वा धर्मांगदगृहंशुभे ॥ वीक्ष्यसेराज्यपदवीं समर्थेतनयेविभो ॥ एवंसुवाणांविबुधेशपुत्री मतिप्रियांचारुविशालनेत्रां ॥ व्रीडान्वितःपुत्रसमीपवर्ती उवाचवृद्धंनृपतिःप्रियान्ताम् ॥ ६२ ॥

इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते मोहिनीवाक्यन्नाम सप्तदशोध्यायः ॥ १७ ॥ ৩ ৩ ৩ ৩ ৩

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 राजोवाच ॥ नाधिकारोमयाभीरु कृतोन्नृपपरिग्रहे ॥ श्रमातुरस्यमेनिद्रा प्रवृत्तासुखदायिनी ॥ धर्मागदोमयात्यक्तो मोहिनीनि-
 यमंदिरं ॥ पूजयस्वयथान्यायमेषापत्नीप्रियामम ॥ निजंकमलपत्राक्ष सर्वरत्नसमन्वितं ॥ वातायनैश्चसंयुक्तं मनोहारिसुखप्रदं ॥
एवंब्रुवनकृतोदेवि निद्रयाशुभलोचने ॥ अवाप्यशयनंश्लक्ष्णं मंदभाग्योदिनंयथा ॥ विबुद्धमात्रःसहसा त्वांप्राप्तःपद्मलोचने ॥
यद्ब्रवीषिवचोदेवि तत्करोमिनसंशयः ॥ ॥ मोहिन्युवाच ॥ प्रसांतयस्वगजेन्द्र इमेदाराःसुदुःखिताः ॥ ममोद्वाहेनानिर्विण्णा
निराशाःकामभोगयोः ॥ ज्येष्ठानांरूपयुक्तानां कलत्राणांहिभूपते ॥ मूर्ध्निकीलंप्रियाख्यंहि यद्राजंतान्निपातयेत् ॥ स्वर्गतिर्नभ-
वेत्तस्य नचान्याविद्यतेगतिः ॥ पतिव्रतासुरुष्टासु कामेशान्तिर्भविष्यति ॥ जनितारंहिपुत्रेमे अस्माकुर्युःपतिव्रताः ॥ किंपुनःप्रा-
कृतामांहि तववाक्यानुरोधिनीं ॥ संध्यावालिसमानारी त्रैलोक्येनास्तिभूमिप ॥ तवस्नेहेनसामांतु भुंजापयातिषड्रसैः ॥ प्रिया-
णिचात्रवाक्यानि वदतेतवगौरवात् ॥ एवंविधाहिशतशो नार्य्यःसंतिगृहेतव ॥ यासान्नपादरजसस्तुल्याहंभूपतेकाचित् ॥ मो-
हिन्यावचनंश्रुत्वा व्रीडितोह्यभवन्नृपः ॥ सपुत्रायाःसमीपेतु सन्ध्यावल्यानृपोत्तमः ॥ इङ्गितज्ञस्तुतनयो ज्ञात्वावस्थांमनोभवां ॥
पितरंकामसंतप्तं मोहिन्यायोविमोहितः ॥ आहूयमातृस्ताःसर्वाः सन्ध्यावालिपुरोगमाः ॥ कृतांजालिपुटोभूत्वा मातृणांसान्निधौत-
दा ॥ उवाचवाक्यंमतिमान् पितुरर्थेचमातरः ॥ विमोहिनीयाजननी व्यूढापित्राशुभानना ॥ साचप्रार्थयतेदेवी राजानंरहसि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितं ॥ क्रीडार्थमात्मनःसुभ्रू स्तामनुज्ञातुमर्हथ ॥ मातरऊचुः ॥ मामैवंव्याहरारिघ्न नैतत्कर्तुंहिशक्नुमः ॥ कोनुमोदयतेपुत्र स-
र्वभक्षणमात्मनः ॥ कोहिदीपयतेवह्निं स्वदेहेवेदिनांवर ॥ कोभक्षयेद्विषंघोरं कश्छिद्यादात्मनःशिरः ॥ कस्तरेत्सागरंवध्वा ग्री-
वायांदारुणांशिळां ॥ कोगच्छेत्सर्पभवनं कःकेशाश्वहरेर्लुनेत् ॥ कोनिषीदातिधारायां खड्गस्यनिशितस्यच ॥ गंतुंमोदयतेकान्तम-
न्यानारीयदिध्रुवं ॥ सर्वस्वंशक्यतेदातुं नतच्छक्यंकथंचन ॥ वरंहिशिरसश्छेद स्तत्क्षणाच्चवराशिना ॥ नेदृशंदयितंकान्तं निरी-
क्षेदन्ययावृतं ॥ नासौसीमंतिनीकाचित मन्यतेतातकुत्रचित् ॥ यातुप्राणसमंकान्त मन्यस्त्रीकुचमर्दिनं ॥ विन्दतेतत्त्वराबाधा किं-
पुनर्वास्वचक्षुषा ॥ सर्वेषामेवदुःखानां दुःखमेतदनन्तकं ॥ भर्त्तायदन्ययायुक्तो दृश्यतेस्वेनचक्षुषा ॥ मरणंत्वाभिनन्दन्ति युगपन्मा-
तरस्तव ॥ नतुमोहिनिसंयुक्तां द्रष्टुंशक्योहिभूपतिं ॥ धर्मांगदउवाच ॥ यदिमेनापितुःसौख्यं कुरुध्वंसर्वमातरः ॥ विषमालोड्यपा-
स्यामि सौख्यंवोस्तुमृतेमयि ॥ कर्मणामनसावाचा यःपितुर्दुःखमाचरेत् ॥ समेशत्रुःस्वयंवध्यो ह्यवध्योसिवरासिना ॥ सर्वासाम-
धिकादेवी मोहिनीमेपितुःप्रिया ॥ क्रीडार्थमाहृतापित्रा मन्दराच्चारुकन्दरात् ॥ तत्पुत्रवचनंश्रुत्वा वेपमानाहिमातरः ॥ ऊचुर्द्ध-
र्मांगदंवाक्यं हितार्थंतनयस्यहि ॥ अवश्यंतववाक्यंहि कर्त्तव्यंन्यायसंयुतं ॥ किंचिद्दत्वाततःस्वस्थो मोहिनींयातुतेपिता ॥ भा-
र्यामुद्वाहयेद्भर्त्ता द्वितीयांयदिपुत्रक ॥ विवाहवित्ताद्विगुणं देयंतस्यभवेद्ध्रुवं ॥ अन्यथाऋणवान्भर्त्ता ज्येष्ठायाभवतेनघ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्रेच्छयाचयोभर्त्ता अन्यामुद्वाहयेत्प्रियां ॥ ज्येष्ठायांहिमतंदेयमेषधर्मविनिश्चयः ॥ इष्टापूर्त्तेवृथातस्य नज्येष्ठांयोहितोषयेत् ॥
धर्मधर्मभृतांश्रेष्ठ नतेमानयतेपिता ॥ तच्छ्रुत्वामातृवचनं प्रहृष्टेनांतरात्मना ॥ एकैकस्यांददौसाग्रं कोटिमष्टादशस्यतु ॥ पृथक्पृ-
थक्चग्रामाणां संघंसंप्रददौतदा ॥ युक्तानस्वतरीभिस्तु चतुर्भिस्तुनृपात्मजः ॥ एकैकस्यांददौचाष्टौ रथान्काञ्चनमालिनः ॥ वा-
ससामयुतंप्रादान्महामुल्यंसधार्मिकः ॥ जांबूनदस्यशुद्धस्य मातृणांप्रददौतदा ॥ लक्षमेकैकशोराजन् पितृभक्त्यामहामतिः ॥ दा-
सानांचेटिकानांच सहस्राणिशतानिच ॥ कुम्भायुतंसर्पिषस्तु तैलस्यचतदेवहि ॥ अजाविकमसंख्यातमेकैकस्यांन्यवेदयेत ॥ स-
हस्रेणेसुवर्णस्य कृत्वावैभूषणंमहत ॥ आखण्डलस्यशस्त्रेण भूषितंमणिभिस्तदा ॥ माणिक्यादिमहाराज प्रददौचपृथक्पृथक् ॥ धा-
त्रीफलनिभान्हारान् मातृणामातृवत्सलः ॥ ददावेकैकशस्तासां तुष्ट्यर्थमनुजर्षभ ॥ वलयानिमहार्हाणि भूषणानितथैवच ॥ कटि-
सूत्राणिशुभ्राणि प्रददौमातृवत्सलः ॥ चन्दनंभूरिकर्पूरं प्रददौप्रस्थसंख्यया ॥ मातृणामविशेषेण पितुःप्रियहितेरतः ॥ भोजनानि
विचित्राणि जलपात्राण्यनेकशः ॥ घृतक्षीरस्यपात्राणि पेयस्यविविधस्यच ॥ प्रददौसमहाभागो ह्येकैकस्याःसभूपतिः ॥ स्था-
लीनांकांचनीनांच कुंभानांसनृपात्मजः ॥ एकैकस्यददौराजन् शतानित्रीणिपंचच ॥ करेणूनांप्रवेगानां सुरूपाणांतथैवच ॥ विं-
शतिर्विंशतिंप्रादादुष्ट्राणांचशतंशतं ॥ शिविकांचतथाप्रादात्तदाधर्मविभूषणः ॥ मातृणांतुचतुष्टयर्थं सुखार्थमरिकर्षणः ॥ एवंद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वावहुविधं धनंताभ्यःसुभ्रूरिशः ॥ वभूवानन्दवान्राजा कृत्वातासांप्रदक्षिणं ॥ कृत्वाभिलषितंतासां कृताञ्जलिपुटोब्रवीत् ॥ ममापरोधाक्रियतांतथैवं सर्वास्तुसंभूयत्वदर्थकंहि ॥ ब्रुवन्तुसत्यंपितरंनरेन्द्रं भुंक्ष्वत्वमेतांनृपमोहिनीमिति ॥ ममोपराधाद्भवतीयुवत्यः पतिंतमुद्दिश्ययथैकपश्या ॥ एवंतुसर्वांगपितरंममाघस्तेनेहतांभुङ्क्ष्वनृपेशमोहिनीम् ॥ तवास्मदीयाभवताहिलज्जा स्वल्पापिकार्यामनसानरेन्द्र ॥ विमोहिनींब्रह्मसुतांसुशीलां गत्वारमत्वंशरदःशतानि ॥ तत्पुत्रवाक्यंहिनिशम्यसर्वा हृष्टास्तदातंनृपराजपत्न्यः ॥ रमस्वराजेन्द्रविमोहिनीमिमां विदेहपुत्र्यासयथाहरिश्च ॥ तच्छालपभूताकुशकेतुपुत्री स्वसेयमस्माकमिहास्तुराजन् ॥ पुत्रेणचानेनविमुक्तशोकाः कृतास्तुवाक्यैःप्रतिबोधिताःस्मः ॥ ५५ ॥ इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते मातृसंबोधनंनामाष्टादशोध्यायः ॥ १८ ॥ छ छ छ छ छ छ छ छ छ छ छ छ

वशिष्ठउवाच ॥ सोनुज्ञातोमहीपालः प्रियाभिःप्रियकामुकः ॥ प्रहर्षमतुलंलेभे धर्मांगदमुवाचह ॥ एतांद्वीपवतींपृथ्वीं परिपालयपुत्रक ॥ दुष्टानांनिग्रहंकृत्वा अप्रमत्तंसदास्थितः ॥ विष्णुवासरभक्तश्च स्वर्गद्वारावलोककः ॥ धर्मवेतनमादाता सदेन्द्रानुजवल्लभाः ॥ सदाभ्रमणशीलश्च सदादानमतिर्भव ॥ भवान्कौटिल्यहीनेन सदाचारवतातथा ॥ तथापरंशृणुष्वाथ यत्कर्त्तव्यंत्वयाधुना ॥ अधिष्ठानञ्चसर्वत्र भूमिपानांप्रसस्यते ॥ कोषस्यचपरिज्ञानं जनानांजनवत्सल ॥ रसवद्द्रव्यमाकृष्यात् पुष्पेभ्यइव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मा०पु० षट्पदाः ॥ त्वयापुत्रेणमेप्राप्तं पुनरेवेहयौवनं ॥ इमामपूर्वांयुवतींविभोहिनीमासाद्यभार्यांद्विजराजवक्त्राम् ॥ सुखेनरम्येत्वमिमां-
॥ २९ ॥ महींतु वोढासिभारंपरिपालयाश्रयम् ॥ क्रीडाकरंतातमनुष्यलोके वृद्धस्यजन्तोःसुरताभिलाषः ॥ भवेज्जनानामतिहास्यकारी अ० १९
जीर्णत्वचःश्वेतशिरोरुहस्य ॥ जीर्णोप्यजीर्णस्तवसौख्ययुक्तो वाञ्छामिचैनामुपभोक्तुमंगनां ॥ संत्यज्यदेवानियमागतास्तु अनं-
गवाणानिहितासुतन्वी ॥ सस्यग्चरिष्याम्यहमेतयाविभो ह्येकान्तशीलःपरिपूर्णदेहः ॥ तदद्रिपुष्पोवननिर्झरौघे रम्येषुदिव्योघन-
दीतटेषु ॥ इयंपुरंध्रीममजीविताधिका सुखेनभार्यात्रिदिवैकचारिणी ॥ अस्यास्तिहेतोर्विबुधाविमूढा यथार्द्धिहेतोर्हिनिधानसं-
घाः ॥ तद्वाक्यमाकर्ण्यपितुःसुबुद्धिः प्रणम्यभक्त्याजननीसमेतां ॥ नृपोत्तमंतंनृपसत्तमोसौ दिदेशभोगार्थमनेकवित्तं ॥ आ-
ज्ञाविधेयान्सहिर्सनियोज्य दासांश्चदासीचहिरण्यकण्ठीः ॥ कृत्वाविधेयान्स्वपितुस्तदर्थे ततोमहींरक्षणमाचचार ॥ नृपोत्तमोधर्म-
विभूषणोसौ शशासतीद्वीपवतींसमग्रां ॥ रक्षांतुतस्याचरितःपृथिव्यां नपापबुद्धिर्भविताजनोहि ॥ नचाफलःपुष्पविनाकृतोन-
गो नचापिक्षेत्रंयवशालिहीनं ॥ कुंभप्रमाणंमुमुचुश्चगावो कृताधिकंशर्करवत्प्रमिष्टं ॥ क्षीरंस्वपेयंसकलार्त्तिनाशं पापापहंपुष्टिवि-
वर्द्धनञ्च ॥ जनोनचासीद्विभवप्रगोप्तो नचापिभार्याविभवप्रभाषिणी ॥ पुत्रोविनीतोदुहितानगेहे वधूःस्थिताहस्तपुटेनसुप्ता ॥
निजोपदेशेहिजनोव्यवस्थितस्त्वन्योपदेष्टुर्हिशिरोनिकृत्यते ॥ नभुञ्जतेमाधववासरेजना नशोषमायांतितथैवनिम्नगाः ॥ संश्रु- ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्यमानानहियान्तिसंपदः प्रदानयुक्तैरपिमानवैःसदा ॥ विवृद्धिमायान्तियथानरेन्द्र वर्षासुदुर्वाबहुविस्तरान्विताः ॥ सुरक्षितस्ते-
ननरेन्द्रसूनुना धर्मांगदेनातुलविक्रमेण ॥ सौख्यानिभुक्त्वानृपयान्तिमानवाः पदंहरेर्द्वादशिसेवनेन ॥ नदस्युभूतामनुजागृहे-
षु स्वपत्तिहृष्टामुदिताःसदानघ ॥ गावस्तुगोपैर्हिविनागुहार्यां स्वेच्छाचरार्गा-दरमाव्रजन्ति ॥ क्षीरंक्षरन्त्योघृतवत्सुभूरि वत्स-
प्रियाश्चैवतुताःसुशीलाः ॥ अकृष्टपच्याधरणीसमस्ता धर्मांगदेशासतिभूमिपाले ॥ मातुःपयोभिःशिशवःसुपुष्टा भोगैश्चभर्तुःप्रम-
दाश्चपुष्टाः ॥ सुराष्ट्रगुप्ताश्चनृपाःसुपुष्टाः सत्येनयुक्तःसवृषःसुपुष्टः ॥ एवंजनेकर्मणिसंप्रवृत्ते धर्मांगदेनाथसुरःप्रमाणः ॥ रुक्मांग-
दोतीवविमोहितोसौ विमोहिनीचेष्टितसौख्ययुक्तः ॥ दिनंनजानातिनचापिरात्रिं मासंनपक्षंनचवत्सरंगतं ॥ अतीवसौख्यंतुर-
तेनतेन विरिञ्चिपुत्र्याःप्रबभूवतस्य ॥ विमोहिनीसंगमनेनृपस्य बभूवशक्तिःप्रचुराहिकामे ॥ यथायथासेवतितांसुरूपां तथातथा-
बर्द्धतिवीर्यमस्य ॥ चन्द्रोयथाशुक्लपक्षेतुवृद्धिं गच्छेदेवंकामयातश्चकामः ॥ वृन्दारकाप्रीतिहितान्वितस्तु संस्पृश्यमानस्तुपुनर्न-
रोसौ ॥ पिबन्तिपानंसुमनोहरंतदा शृण्वन्हिगीतंहृदयंगमंतदा ॥ पश्यन्हिनृत्यंसुनितंबिनीनां समास्पृसन्मोहिनिचक्रचन्द्रम् ॥
विमर्दमानोह्युरसाचतन्व्याः स्तनौसुपीनौसुनिमग्नचूचुकौ ॥ घनौतथाकाञ्चनकुंभतुल्यौ निरंतरौहारविभूषणेन ॥ वलित्रयंनाभियु-
तंसुशोभनंमनोहरंरोमसुराजिचित्रितं ॥ संस्तंभितायावलिराजिरूपयातयातुदेव्यानृपकान्तयातदा ॥ नद्दीदृशंचारुतरंशरीरं नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंविनीनांमनसोभिरामं ॥ यादृग्विधात्राचतदाविनिर्ममे राज्ञश्चसामोहविबर्द्धनाय ॥ मृगेन्द्रशत्रोःकरसंनिकाशे ऊरूतदाकाञ्चन अ० २०
ना०पु० संनिभेसमे ॥ जंघेउभेचैवसुरूपयुक्ते निगूढगुल्फेजनमोहनार्थं ॥ नत्रापिदेहेनृपतिर्विरूपतां संपश्यतेचारुविशालनेत्र्याः ॥ मे-
॥ ३० ॥ नेसुराणामधिकञ्चराजा कृतार्थमात्मानमतीवहर्षात् ॥ इयंसुरूपांसुरसुन्दरींशुभां दास्याम्यहंभूरिधनेनचाल्पं ॥ त्रैलोक्यदानंतृ-
णवन्मनोमे ददामिकिंयाचतिमेदुराङ्गी ॥ एषापदायाचतिजीवितंमे शुभानवद्यानवहेमवर्णा ॥ दास्यामिचैनंनविचारयामि पुत्रं-
विनासर्वमहंचदास्यं ॥ एवंराजाचिंतयित्वामहात्मा पुत्र्याःसर्वंचेतसापद्मजस्य ॥ ३५ ॥ इतिश्री ना० रुक्मांगदक्रीडनंनाम १९
वशिष्ठउवाच ॥ एवंस्मरविमूढस्य राज्ञोरुक्मांगदस्यच ॥ त्रीणिवर्षाणिपञ्चैव व्यतीतानिसुखेनवै ॥ संप्राप्तेनवमेवर्षे पुत्रोधर्मां-
गदोवली ॥ जित्वाविद्याधरात्पञ्च सर्वकामप्रदान्शुभान् ॥ आजहारमणिन्पञ्च सर्वकामप्रदान्शुभान् ॥ कांचनस्यप्रतप्तस्य एवं
कोटिप्रदंशुभं ॥ वस्त्रप्रदंद्वितीयंच सहस्रशतसंख्यया ॥ तृतीयममृतस्राविं पुनर्यौवनदायकं ॥ गृहप्रसादजननं चतुर्थंचान्नसा-
धनं ॥ पंचमंव्योमगादितं त्रैलोक्यपरिमर्षणं ॥ तान्मणीन्गृह्यतरसा विद्याधरसमन्वितः ॥ स्त्रीभिर्विद्याधराणांच साश्रुभिस्ता-
भिरावृतः ॥ ववन्देचरणौमातु स्तथारुक्मांगदस्यच ॥ आगत्यमलयाच्छूर स्तान्मणीन्प्रददौतदा ॥ इमेजितामयातात पञ्चवि-
द्याधरारणे ॥ मलयेभूधरेश्रेष्ठे वैष्णवास्त्रेणभूपते ॥ तइमेप्रेक्षतान्तात प्राप्तास्तवमहामते ॥ एषांदाराःसमेताये विधेयास्तवभूपते ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ तथेमेप्रणयाद्देवीं भूषयंतुतवप्रियां ॥ सर्वकामप्रदास्तात मणयोयौवनःप्रदा ॥ जीर्णादंताःपुनर्वाला भवंतिमणिधारणात् ॥
श्वेताश्चकृष्णतांयान्ति केशानास्त्यत्रसंशयः ॥ चस्त्रहर्म्यसुवर्णानां धनानांचिन्तितस्यच ॥ दातारःसुप्रभाःशुद्धा श्चिन्तामणयश्च-
त्सुत ॥ त्रिंशद्दिनमभूद्युद्धं गन्धर्वाणांमयासह ॥ तवैवतेजसापञ्च जितास्तातमयारणे ॥ कृत्स्नानितानीहमया राज्ञायानिवला-
निच ॥ वरदानिसमस्तानि कृतानितवतेजसा ॥ समुद्रंचप्रविष्टस्य गतःसंवत्सरोमम ॥ जिताभोगवतीनाम मयानागशतावृ-
ता ॥ आहूयतानागकन्या मयातत्रसुविस्तराः ॥ ताभिश्चराजरत्नानि सुवहून्याहृतानिमे ॥ गतोहंपुनरेवाथ तदादानवमन्दिरं
॥ तत्रदानवकन्यानां सुरूपाणांसुवर्चसां ॥ आहूतानिसहस्राणि मयात्रीणिचपञ्चच ॥ दशकोट्यस्तुरत्नानि सुवहून्याहृतानिमे
॥ सस्तुदीपामहीपाल रत्नानांतवमन्दिरे ॥ ततोहंवारुणंलोकं रसातलतलस्थितं ॥ गतोवीर्यवलोपेतं रत्नानामालयंशुभं ॥ तवा-
पिवरुणोदेवः स्थीयतांशासनेपितुः ॥ रुक्मांगदस्यनृपतेर्यदिजीवितुमिच्छसि ॥ कुपितोममवाक्येन वरुणायुयुधेमया ॥ सहते
नचमेयुद्धमभूत्तातरसातले ॥ जितोनारायणास्त्रेण मयासम्वत्सरात्प्रभो ॥ नहतःप्रमदावाक्यैः परिरक्षणतत्परैः ॥ निर्जितेना-
युतंदत्तं वाजीनांवातरंहसां ॥ एकतःश्यामकर्णानां शुद्धानांचन्द्रवर्चसां ॥ तृणतोयविहीनाये जीवंतिवहुलाःसमाः ॥ एका-
कन्यासुरूपाया पुष्कराभाननाशुभाः ॥ भार्यार्थेवरुणःप्रादान्नवोढासाशुभामया ॥ कुमारीतुसमानीता वहुवित्तसमन्विता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंनास्तित्रिषुलोकेषु स्थानंनृपतिसत्तम ॥ यन्मयानिर्जितंतात तेजसापगलितेनते ॥ तदुत्तिष्ठनिरीक्षस्व मयाचोपार्जितंश्रियं ॥
प्रयच्छस्वयथान्यायं एषांवांछसिभूपते ॥ पादांकांकुरुराजेन्द्र यत्नुतावर्जिताप्रियाः ॥ अहंतुसंपदःसर्वा स्त्वदधीनानसंशयः ॥ यः
॥ ३१ ॥ पुत्रःपितुरग्रेतु वहुलक्ष्मीमुपार्जितां ॥ नदद्याद्भूमिदेवेभ्यः सयातिनरकंध्रुवं ॥ स्वीकारस्तुचकर्त्तव्यः पित्रासहसुतेनहि ॥ कुठार
दातृवज्ज्ञेयः पुत्रस्यानिधिसंचये ॥ पितुःशौर्येणपुत्रस्तु सर्वमर्जयतेधनं ॥ गृहीतस्तेजसादात्रं लुनातिपितृसंचयात् ॥ वायुना
पूरिताभस्त्रा तारयेत्पुरुषंतले ॥ यदादारुमयीयोषित् सूत्रयोताविचष्टये ॥ एवंहिपितृवर्येण पुत्रास्तेजोवलान्विताः ॥ तस्मा-
दिमांमाधवदेववल्लभां विलोकयस्वाद्यमयाभिजाता ॥ आत्मेच्छयायच्छविमोहनाया इयंहिमेमातृसमूहचर्या ॥ ३६ ॥ इतिश्री
लघुनारदीयपुराणे रुक्माङ्गदचरिते धर्माङ्गद विजयोनामविंशातितमोध्यायः ॥ २० ॥ ७ ७ ७ ७ ७
मान्धातोवाच ॥ पुत्रस्यवचनंश्रुत्वा किंचकारमहीपतिः ॥ साचापिमोहिनीब्राह्मी किंचक्रेतेनपूजिता ॥ विचित्रेयंकथाब्रह्मन् प्र-
भावोहिमनोहरः ॥ तत्रवक्रेरितापुण्या धर्मसंशयछेदिनी ॥ बसिष्ठउवाच ॥ तस्यतद्वचनश्रुत्वा प्रहृष्टोनृपपुंगवः ॥ उदतिष्ठत्प्रिया-
युक्तस्तांश्रियंचावलोकयत् ॥ अवलोक्यहेररिष्ठामप्रमेयांहरिप्रभां ॥ नागकन्याहिताःसर्वा वारुणीसहिताःप्रभो ॥ प्रददौतनयस्यैव-
भार्यार्थशुभलोचनाः ॥ शेषंदानवनारीभि र्वित्तरत्नसमन्वितं ॥ मोहिन्यैप्रददौराजा सोनंगशरमोहितः ॥ संविभज्यनृपोवित्तं ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मांगदसमाहृतं ॥ पुरोहितमुवाचेदं कालेनाहूयभूपतिः ॥ सर्वासांतनयोमेहि पाणिंगृह्णातुमन्त्रतः ॥ कुमारीणांकुमारोयं मद्वाक्येचस्थितोहियः ॥ सुतिथौसुमुहूर्त्तेच नक्षत्रेसर्वकामदे ॥ वाचयित्वाद्विजवरान् मंगलानिसहस्रशः ॥ विवाहंकुरुपुत्राय एतत्कृत्योत्तमंमम ॥ यःपुत्रंयौवनोपेतं नविवाहयतेसुधीः ॥ समज्जेनरकेघोरे यस्मान्नावर्त्ततेपुनः ॥ तस्मादुद्वाहयेत्पुत्रं बलादपिप्रयत्नतः ॥ आत्मासंस्थापितस्तेन येनसंस्थापितःसुतः ॥ कृतोद्वाहेसुतेब्रह्मन् पितुश्चकृतकृत्यता ॥ पुत्रस्यगुणयुक्तस्य निर्गुणस्यापिमानद ॥ अरूढतनयोयस्य युवासन्तिष्ठतेगृहे ॥ नपुमान्सतुविज्ञेयः परलोकजुगुप्सितः ॥ तस्मात्पित्रासदाकार्याः पुत्रादारसमन्विताः ॥ रमन्तेचयथासौख्यं सन्तुष्टासुप्रियासुच ॥ एतच्छ्रुत्वातुवचनं पुरोधाहर्षसंयुतः ॥ धर्मांगदविवाहार्थं मतिंचक्रेद्विजर्षभः ॥ अनिच्छमानोपितदा स्त्रीशंकेतंनृपात्मजः ॥ नृपवाक्याच्चकाराथ दारसंग्रहणंतदा ॥ वरुणात्मजयासार्द्धं नागकन्यामनोहराः ॥ उपयेमेमहाबाहुःकृतहोमःपुरोधसा ॥ उद्वाहयित्वासर्वास्ता युगपद्योषितांवराः ॥ ववन्देपितरंपश्चात् मोहिनींमातरन्तथा ॥ ततःसन्ध्यावलींदेवीमभिवन्देहसन्निव ॥ पितुर्वाक्येनमेदेवी सञ्जातोदारसंग्रहः ॥ नैतन्मेमनसोजातो पित्रानुरोधितोह्यहं ॥ अव्यग्रः पितरंदेवि सुश्रूसेहंनसंशयः ॥ दारैर्भोगैर्नमेकिंचित् स्वर्गेणापिप्रयोजनं ॥ कार्यामेपितृसुश्रूषा तवदेविदिवानिशं ॥ सन्ध्यावल्युवाच ॥ चिरंजीवस्वमेवत्स भुंक्ष्वभोगान्मनोगतान् ॥ पितुःप्रसादाद्दीर्घायुर्भवपुत्रसदानघ ॥ सत्पुत्रेणत्वयापुत्र जाताहंपुत्रि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णीक्षितौ ॥ नपत्नीनांहिसर्वासां हृदयेसंस्थितस्तथा ॥ एवमुक्त्वापरिष्वज्य मूर्ध्निचाघ्रायचासकृत ॥ विसर्ज्यचततःपुत्रं राज्यतंत्रे
त्वरान्विता ॥ विसर्जितस्तथामात्रा प्रणम्यान्यास्तुमातरः ॥ चक्रेराज्यंमहाराजः पित्रोश्चहितकाम्यया ॥ दुष्टनिग्रहणंचक्रे शिष्टा-
नांपरिपालनं ॥ अटनंसर्वदेशेषु वीक्षणंसर्वकर्मणां ॥ तथैवसर्वकार्याणामासमाप्तेनिवर्त्तनं ॥ हस्त्यश्वपोषणंचक्रे वारंचक्रेपरेणवै ॥
वाजिनांवीक्षणंचक्रे तुलामानानुवेदनं ॥ गृहेनवैधराप्राप्ते चक्रेसंवीक्षणंनृपः ॥ कच्चिद्बालस्तुनपायी स्तनहीनोनरोदिति ॥ कच्चि-
द्वध्वाचस्वश्रूच रुदतानावमानिता ॥ कच्चित्समर्थस्तनयः पितरंनहियाचते ॥ नधर्मशङ्करोराज्ये कच्चिन्ममभवेत्पुनः ॥ बभूववि-
भवोलोके शासनात्तस्यभूपतेः ॥ नकंचुकेनरहिता गच्छेन्नारीसभर्तृका ॥ गृहानिःक्रमणंस्त्रीणांनाभूद्राष्ट्रेतदात्मके ॥ नसकेशाहि
विधवा स्त्वकेशानहिभर्तृकाः ॥ सापत्नीस्यात्महाकेशीमारण्यानगराश्रयाः ॥ अप्रदाताधनीमाभूद्राष्ट्रेमानिर्घृणोजनः ॥ गो-
पालोनगराकांक्षी गुरुर्यस्तुनदेशकः ॥ शास्तिशास्त्रंविनाऋत्विक् सुरान्तोषयतेनरः ॥ योहिविक्रयतेनीलं नीलरक्तंनिषेवते ॥ नि-
र्वास्यौतावुभौपापै यस्तुमद्यंपिबेत्सदा ॥ वृथामांसंतुयोश्नाति पृष्टमांसप्रियोहिसः ॥ तस्यवासोनविषये सुकलत्रंत्यजेत्तुयः ॥ वि-
ष्णुंविहायप्रवरंसुराणां संपूजयेदन्यतमंहिदेवं ॥ निन्देतयोदेववरंमुरारिं दण्ड्यश्चबध्यश्चवहिर्विधास्याः ॥ ३९ ॥ इतिश्री लघुना-
रदीयपुराणे रुक्मांगदचरिते धर्मांगदविवाहः प्रजापालनमेकाविंशोध्यायः ॥ २१ ॥ ७ ७ ७ ७ ७ ७ ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वसिष्ठउवाच ॥ एवंधर्माङ्गदोराजा चकारवसुधातले ॥ पितुर्नियोगाद्राजेन्द्र पालयन्हरिवासरे ॥ नवभूवजनःकश्चिद्योन्यधर्मेऽयवस्थितः ॥ नासुखीनाप्रजाकाचित् करपीडितमानसा ॥ हृष्टपुष्टजनेतस्मिन् क्षमावतिसुधार्मिके ॥ घटोध्नीनृपतेतस्मिन् द्रप्सवत्सासुधेनुषु ॥ पुटकेपुटकेक्षौद्रं द्रोणमात्रेद्रुमेद्रुमे ॥ फलानिसन्तिभेदिन्यां सर्वधान्यसमुद्भवः ॥ कृतेयुगेचत्रेतान्ते युगेचद्वापरागमे ॥ व्यतीतजलदेव्योम्नि विराजेशशिमण्डले ॥ सुगन्धौशालिकेदारे कुंभोद्भवविलोकने ॥ मध्यप्रवाहसंयुक्ताः सरितश्चसमंततः ॥ तीरोत्थैःकाशकुसुमैः शुक्लकेशाइवाङ्गनाः ॥ चन्द्रांशुधवलेलोके नातितीव्रेदिवाकरे ॥ पद्मिनीपत्रसवलैर्जलस्यान्तेविराजिते ॥ रात्र्युत्सुक्यात्प्रयातेस्तु भूमिपालैःसमंततः ॥ प्रबोधसमयेविष्णोराश्विनान्तेजगद्गुरोः ॥ मोहिनीरमयामास संयुक्ताहृदयान्वितं ॥ राजानंविविधैःसौख्यैःसर्वभावेनसुन्दरी ॥ वनेषुगिरिशृंगेषु नदीनांसंगमेषुच ॥ पद्मिनीकुसुमाढ्यासु शरत्सुविविधेषुच ॥ मलयेमन्दरेविन्ध्ये महेन्द्रेविबुधालये ॥ सह्येप्रालयसंज्ञेच दिगंबरगिरौशुभे ॥ अन्येष्वपितुराजानं मनोज्ञेषुशुभेषुच ॥ रमयामासराजेन्द्र दिव्यरूपादिनेदिने ॥ राजापिमोहिनींप्राप्य कृत्यंसर्वमथात्यजत् ॥ मुक्त्वैकंवासरंविष्णोर्जन्ममृत्युनिकृन्तनं ॥ नतल्लोपयेतनित्यमतिमुग्धोपिपार्थिवः ॥ दशम्यादिमहीपाल त्रिदिनंपरिवर्जयेत् ॥ गन्धतांबूलपुष्पाणि स्त्रीभोगञ्चमहामतिः ॥ एवंसंक्रीडतस्तस्य बहुसंवत्सरेगते ॥ कालेकालवतांश्रेष्ठः संप्राप्तःकार्त्तिकःशुभः ॥ निद्राच्छेदकरोविष्णोर्मासःपुण्यप्रदायकः ॥ य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मिन्कृतंहिसुकृतंविष्णवेर्थमानवैर्नृप: ॥ अक्षयंभवतेसर्वंविष्णुलोकप्रदायकं ॥ नकार्त्तिकसमोमासोनकृतेनसमंयुगं ॥ नवेदेनसमं
शास्त्रंनतीर्थंगंगयासमं ॥ नजलेनसमंदानंनसुखंभार्ययासमं ॥ नकृषणेनसमंवित्तंनलाभ:सुरभीसम: ॥ तपोदानसमायुक्तंनधर्मा-
त्परमंसुखं ॥ नधर्मोस्तिदयातुल्यो नज्योतिश्चक्षुष:समं ॥ नतृप्तिरशनादन्यानवाणिज्यंकृषे:समं ॥ नधर्मेणसमंमित्रनसत्येनसमंय-
श: ॥ सर्वसौख्यंसमुत्थानंनमित्रंभार्ययासमं ॥ नक्षेत्रंकाशिकातुल्यंनपुत्रेणसम:सुहृत् ॥ नकार्तिकसमंलोकेपवित्रंकवयोविदु: ॥
कार्त्तिक:प्रवरोमासोविष्णुवादिष्ठुवैसदा ॥ अव्रतेनाक्षिपेद्यस्तुमासंदामोदरप्रियं ॥ तिर्यग्योनिमवाप्नोतिधर्माधर्मवहि:कृत: ॥ मा-
न्धातोवाच ॥ संप्राप्यकार्त्तिकंमासं राजारुक्मांगदोमुने ॥ मोहिनीमोहसंयुक्त: कथंतुवुभुजेवद ॥ विष्णुभक्त:शुचिपर: प्रवर:सम-
हीभृतां ॥ तंस्मिन्पुण्यतमेमासितस्मिन्किमकरोन्नृप ॥ वसिष्ठउवाच ॥ संप्राप्तंकार्त्तिकंदृष्ट्वाप्रबोधकरणंहरे: ॥ अतिमुग्धोप्यसौ-
राजा मोहिनींवाक्यमब्रवीत् ॥ नीतंदेवित्वयासार्द्धंबहुसंवत्सरंमया ॥ तवापमानस्यभयात् नैवमुक्तामयाकिंचित् ॥ सांप्रतंवक्तु-
कामोहंतंनिवोधवरानने ॥ शय्याशक्तस्यमेदेविवहव:कार्त्तिकागता: ॥ नव्रतीकार्त्तिकेजाते मुक्तैकंहरिवासरं ॥ सोहंकार्त्तिकमि-
च्छामि व्रतेनपरिसर्पितुं ॥ अव्रतेनगतोह्येषां कार्त्तिकोमर्त्यधर्मिणां ॥ इष्टपूर्वंवृथातेषां धर्माधर्मभृतांवरे ॥ मांसाशिनोहिभूपाला
अत्यन्तमृगयारता: ॥ तेमासंकार्त्तिकंत्यक्त्वा गतोविष्णवालयंशुभे ॥ प्रवृत्तानांहिभक्ष्याणां कार्त्तिकेनियमेकृते ॥ अवश्यंविष्णु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सायुज्यं प्राप्नुवन्तिमुमुक्षवः ॥ तिष्ठान्तिबहुवित्तानि कृत्यानिवरवर्णिनि ॥ हृदयेविहितंलोके दीपदानंदिवंनयेत् ॥ तस्याप्य-
लाभेशुभगे परदीपप्रतोदनं ॥ कर्त्तव्यंभूतिकामेन सर्वदानाधिकंचतत ॥ एकतःसर्वदानानि दीपदानानिचैकतः ॥ कार्त्तिके-
नसमंप्रोक्तं दीपदस्त्वधिकःस्मृतः ॥ कार्त्तिकेकार्त्तिकीभूत्वा विष्णोर्नाभिसरोरुहे ॥ आजन्मविकृतात्पापात मुच्यतेनात्रसंश-
यः ॥ व्रतोपवासनियमैः कार्त्तिकोयस्यगच्छति ॥ देवोवैमानिकोभूत्वा सयातिपरमंपदं ॥ तस्मान्मोहिनिमोहंतु परित्यज्यम-
मोपरि ॥ तवभूधरपूजायां निरतोनीरजेक्षणे ॥ अहंव्रतपरश्चैव भविष्येद्धरिपूजकः ॥ मोहिन्युवाच ॥ विस्तरेणमयाख्याहि मा-
हात्म्यंकार्त्तिकस्यहि ॥ सर्वपुण्याधिकःप्रोक्तो मासोयंनृपसत्तम ॥ विशेषतःपुष्करेतु द्वारवत्यांचशौकले ॥ श्रुत्वाकार्त्तिकमाहा-
त्म्यं करिष्येहंयथेप्सितं ॥ रुक्मांगदउवाच ॥ माहात्म्यमभिधास्यामि मासस्यास्यवरानने ॥ येनतेभवतेकीर्त्तिर्भक्तियुक्तार्चने-
हरेः ॥ कार्त्तिकेकृच्छ्रसेवीयः प्राजापत्यचरोथवा ॥ एकान्तरोपवासीच त्रिरात्रोपोषितोथवा ॥ षड्वाद्वादशरात्रंवा मासंवावरव-
र्णिनि ॥ क्षपयित्वानरोयाति तद्विष्णोःपरमंपदं ॥ एकभक्तेतथानक्ते तथासुभ्रुअयाचिते ॥ अकृतेवैधराप्राप्तिर्भवतेनात्रसंशयः ॥
तस्मिन्हरिदिनेपुण्ये क्रियतेभीष्मपञ्चकम् ॥ सर्वपापप्रशमनं हरेरिष्टंमहाव्रतं ॥ तत्कृत्वामनुजादेवि नभूयस्तनयोभवेत ॥ प्रबो-
धनंनरःकृत्वा जागरेणशुभानने ॥ श्रवणेनपुराणानां भक्त्यादेवस्यचक्रिणः ॥ पूजयासुभगेरात्र्यैर्यांयातिवरानने ॥ नमातृज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ठेरयान्ति तेपिपारन्विताःनराः ॥ तस्मिन्दिनेबरारोहे मण्डलंयस्तुपश्यति ॥ विनासाख्येनयोगेन सयातिपरमंपदं ॥ कार्त्तिके-
 मण्डलंदृष्ट्वा शौकरेशूकरंतथा ॥ दृष्ट्वाकोकाबराहञ्च नभूयस्तनयोभवेत् ॥ त्रिविधस्यापिपापस्य दृष्ट्वामुक्तिर्भवेन्नृणां ॥ तथाकु-
ब्जाम्रकेदेवि दृष्ट्वादेवंजनार्दनं ॥ कार्त्तिकेवर्जयेत्तैलं कार्त्तिकेवर्जयेन्मधु ॥ कार्त्तिकेवर्जयेत्कांस्य कार्त्तिकेशुक्लशिंविकम् ॥ नि-
ष्पावान्कार्त्तिकेदेवि योभक्षयतिपापकृत् ॥ सम्वत्सरकृतात्पुण्यात् तत्क्षणादेवमुच्यते ॥ प्राप्नोतिराजकींयोनिं सकृदेवतुभक्षणा-
त ॥ अतश्चकार्त्तिकेमासि निष्पावान्वर्जयेद्बुधः ॥ कार्त्तिकेशौकरंमांसं यस्तुखादतिदुर्मतिः ॥ षष्ठिवर्षसहस्राणि रौरवेपरिपच्य-
ते ॥ तन्मुक्तोभवतेपापो विष्ठाशीग्रामशूकरः ॥ नमत्स्यंभक्षयेन्मांसं नकौर्मंनान्यदेवहि ॥ चाण्डालोभवितासजन् कार्त्तिकेमां-
सभक्षणात् ॥ कार्त्तिकःसर्वपापघ्नः किंचिद्व्रतपरस्यहि ॥ कार्त्तिकेतुकृतादीक्षा नृणांजन्मनिकृन्तति ॥ तस्मात्सर्वप्रयत्नेन दी-
क्षाकुर्वीतकार्त्तिके ॥ अदीक्षितस्यवामोरु कृतंसर्वंनिरर्थकं ॥ पशुयोनिमवाप्नोति दीक्षयाचमहाकुले ॥ जन्मप्राप्नोतिसुभगे पञ्च-
रात्रेविदोनरः ॥ नगृहेकार्त्तिकंकुर्याद्विशेषेनतुकार्त्तिकी ॥ तीर्थेषुकार्त्तिकींकुर्यात् सर्वयत्नेनभाविनि ॥ कार्त्तिकेशुक्लपक्षस्य कृ-
त्वाचैकादशींनरः ॥ प्रातर्दत्वाशुभान्कुंभान् प्रयातिहरिमन्दिरं ॥ संवत्सरव्रतानाञ्च समाप्तिर्विधिसंस्मृता ॥ चातुर्मास्यव्रता-
नाञ्च समाप्तिस्तत्रचेष्यते ॥ विवाहश्चैवदृश्यन्ते विष्णोर्नाभिसरोजजे ॥ दिनानित्रीणिचत्वारि तथैवंबरवर्णिनि ॥ उत्तरायणही-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेपि शुद्धिर्लभ्नंविनाशुभे ॥ दृश्यन्तेयत्रसंपन्ना पुत्रपौत्रविवर्द्धनाः ॥ तस्मान्मोहिनिकर्त्तास्मि कार्त्तिकेव्रतमुत्तमं ॥ अशेषपा-
पनाशाय धनप्रीतिविवर्द्धनं ॥ भुक्तिमुक्तिप्रदातारं धर्मस्यपरमंपदं ॥ वैकुण्ठदायिकंमासं कार्त्तिकञ्चवरानने ॥ ६८ ॥ इतिश्री
लघुनारदीयपुराणे रुक्मांगदचरिते कार्त्तिकमाहात्म्यं द्वाविंशोध्यायः ॥ २२ ॥ ७ ७ ७ ७ ७ ७
मोहिन्युवाच ॥ अहोमहात्म्यमतुलं कार्तिकस्यत्वयोदितं ॥ चातुर्मास्यव्रतानाञ्च तद्योगकरणम्वद ॥ पूर्णताचभवेद्येन व्रता-
नामवनीपते ॥ अवैकल्पंभवेद्येन व्रतेपूर्णफलस्यच ॥ कानिदानानिदीयंते कृत्वातान्यवनीपते ॥ राजोवाच ॥ षड्रसंभाजनंदद्या
न्नक्तभोजीतुसुन्दरि ॥ अयाचितेप्यनड्वाहं दद्याच्चसहिरण्यकं ॥ एकभक्तंतथाकुर्य्याद् ब्राह्मणानाञ्चभोजनं ॥ अमांसाशीभवेद्य-
स्तु मांसंदद्यात्सदक्षिणं ॥ जलत्यागेमणिंकुंभान् दद्याद्वैअन्नपात्रकं ॥ सहिरण्यंतिलैर्युक्तं वस्त्रयुग्मसमान्वितं ॥ धात्रीस्नानोदकं-
दद्या द्दधिमाक्षिकमेवच ॥ फलानांनियमेसुभ्रु फलदानंसमाचरेत् ॥ तैलत्यागेघृतंदेयं घृतत्यागेपयःस्मृतं ॥ दधित्यागेसुवर्णञ्च
पयसोरूप्यमेवच ॥ धान्यानांनियमेधान्यमथवाशालयःस्मृताः ॥ दद्याद्भूमिशयःशय्यां सदृशींकन्दुकान्वितां ॥ पत्रभोजीनरो-
दद्याद्भाजनंघृतसंयुतं ॥ मौनीघंटांस्तिलांश्चापि सहिरण्यान्प्रदापयेत् ॥ दंपत्योर्भोजनंकार्यमुभयोःशयनान्वितं ॥ सभागंदक्षि-
णोपेतं व्रतस्यपरिपूरये ॥ नित्यस्नानेहयंदद्या न्निस्नेहेघृतमेवच ॥ केशस्यरक्षणाद्देवि आदर्शंचविकल्प्यत्र ॥ उपानहौप्रदद्याच्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 उपानत्पारिवर्जनात् ॥ लवणस्यतुसंत्यागे दद्याच्चलवणंवहु ॥ आमिषस्यपरित्यागे दातव्याकपिलाशुभा ॥ नित्यदीपप्रदोयस्तु
 भवेद्दैविबुधालये ॥ दीपंतुसघृतंदद्या त्काञ्चनंवाससायुतं ॥प्रदेयंविष्णुभक्ताय व्रतानांपरिपूर्णये ॥ एकान्तरोपवासिच्च सीरोन-
ष्टांप्रदापयेत् ॥ शिलापात्रेतुयोभुक्ते शैर्य्यपात्रंप्रदापयत ॥ ताम्रेभुक्तेततोदद्यात्ताम्रंमधुसमन्वितं ॥ गुडत्यागेगुडंदद्या न्मधुत्या-
गेमधुस्मृतं ॥ तांवुलंवर्जयेद्यस्तु मौक्तिकानिप्रदापयेत् ॥ सवस्त्रांकञ्चनोपेतां सुशय्याञ्चकृतांशुभे ॥ त्रिरात्रमालकंदद्या च्छत्रो-
पानत्सुसंयुतं ॥ अनड्वाहंतथापीनं सीरस्याकर्षणक्षमं ॥ एकान्तरेत्वजादेया फलाहारेतुशालयः ॥ शाकाहारेघृतंदद्यात् पात्रं-
राजतमेवच ॥ सर्व्वेषामप्यलाभेतु यथोक्तकरणंविना ॥ विप्रवाक्यंस्मृतंसुभ्रू व्रतस्यपरिपूर्णये ॥ तथाविभवहीनस्तु व्रतंकुर्यात्स-
दक्षिणं ॥ विप्रवाक्यम्बृथायस्तु गृह्णातिमनुजःशुभे ॥ अदत्वादक्षिणांचापि सयातिनरकंध्रुवं ॥ व्रतवैकल्पमासाद्य कुष्टीचान्धप्र-
जायते ॥ धरामराणांवचनेऽव्यवस्थिता दिवौकसस्तीर्थफलैःसमेताः ॥ कोलंघयेत्सुभ्रुवचोहितेषां श्रेयोभिकामीमनुजःसुविद्वान् ॥
इदंमयाधर्मरहस्यमुक्तं वेदाश्रितंपापविमोक्षणार्थं ॥ फलप्रदंमाधवतुष्टिहेतो र्विकल्पेहतोर्मनसोभिरामं ॥ २५ ॥ इतिश्री लघु-
नारदीयपुराणे रुक्माङ्गदचरिते चातुर्मास्यव्रतवर्णनो नामत्रयोविंशोध्यायः ॥ २३ ॥ ॥ ॥ ॥ ॥ ॥ ॥
मोहिन्युवाच ॥ वाक्यमुक्तंत्वयासाधु कार्तिकंप्रतिमानद ॥ व्रतादिकरणंराज्ञां नेष्टंकिंचिन्महीपते ॥ मुक्त्वैकंरक्षणंलोके परलो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कजयैषिणा ॥ दानंपानंचयुद्धंच त्रितयंभूभुजाःस्मृतं ॥ नव्रतंहित्वयाकार्य्यं यदिमामिच्छसिप्रियं ॥ मुहूर्त्तमपिराजेन्द्र नश-
क्नोमित्वयाविना ॥ स्थातुंकमलपत्राक्ष किंपुनर्माससंख्यया ॥ यत्रोपवासकरणं मन्यसेत्वंमहीपते ॥ तत्रैवभोजनंदेयं द्विजा-
तीनांमहात्मनां ॥ अथवाज्येष्ठपत्नीया साकरोतुव्रतक्रियां ॥ एवमुक्तेतुवचने मोहिन्यारुक्मभूषणः ॥ आजुहावप्रियांभार्य्यां ना-
म्नासन्ध्यावलींशुभां ॥ आहूतातत्क्षणात्प्राप्ता राजानंभूरिदक्षिणं ॥ आसीनंशयनेदिव्ये मोहिन्यावाहुसंवृतं ॥ शुभंस्पृष्टंकुचा-
ग्रेण पूर्णकुंभानिभेनवै ॥ वामेनवामनेत्रायाः सकामायामहीपते ॥ कृताञ्जलिपुटोभूत्वा भक्त्योन्नमितकन्धरा ॥ सन्ध्यावल्याह-
नृपतिं किमाहूताकरोम्यहं ॥ तववाक्येस्थिताभूप सपत्नीदुःखवर्जिता ॥ यथायथाहिरमसे मोहिन्यानृपसत्तम ॥ तथातथामम
प्रीतिर्वर्द्धतेनात्रसंशयः ॥ भर्तुःसौख्येनयानारी सौख्ययुक्तानजायते ॥ साशुनीभविताराजन् त्रीणिजन्मानिपञ्चच ॥ आदेशं
देहिराजेन्द्र मात्रीडांकुरुशाधिमां ॥ राजोवाच ॥ जानामितवशीलंवै कुलंजानामिभाविनि ॥ तववाक्येनहिचिरं मोहिनीरमता
मया ॥ रममाणस्यसुचिरं वहवःकार्तिकागताः ॥ प्रियासौख्येनमुग्धस्य नगतोहरिवासरः ॥ सोहंतृप्तिमनुप्राप्तः सौख्यकृद्धःपु-
नःपुनः ॥ एवंचवर्त्तमानेन कामांधेनमयाशुभे ॥ ज्ञातोयंकार्तिकोमासः सर्वपापक्षयंकरः ॥ कर्तुकामोव्रतंदेवि कार्तिकाख्यंसु-
खःप्रदं ॥ अनयावारितोदेवि मोहिन्यामोहयुक्तया ॥ अस्यानविप्रियंकार्य्यं सर्वथावरवर्णिनि ॥ मामकंव्रतमाधत्स्व कृच्छ्राख्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ना०पु० कृष्णतुष्टिदं ॥ सात्वेवमुक्तानृपहेमवर्णा भर्तातदापीनपयोधराशुभा ॥ उवाचवाक्यंद्विजराजवक्त्रा व्रतंकरिष्येतवधर्महेतोः ॥ अ० २५
॥ ३५ ॥ कृतनयेनाद्यभवेद्यशस्ते कीर्तिश्चसौख्यंतवभूमिनाथ ॥ करोमिसर्वंतवदेवनाथ विशाम्यहंवैज्वलनंत्वदर्थं ॥ नकार्य्यमास्तेममभू-
मिनाथ वाक्येनतेहन्मिसुतंगुणज्ञं ॥ किंत्वेवमेतद्व्रतमेवराजन् करोमितेधर्म्ममनुत्तमंहि ॥ इत्येवमुक्त्वारविपुत्रशत्रुं प्रणम्यसातत्र
विशालनेत्रा ॥ व्रतंचकाराथतदाहिदेवी चाशेषपापौघविनाशनाय ॥ व्रतेतुदत्तेवरकृच्छ्रसंज्ञेप्रियाकृतेहर्षमवापराजा ॥ उवाचवा-
क्यंकुशकेतुपुत्रीं कृतंवचःसुभ्रुमयात्वदीयं ॥ रमस्वकांतंमयिहर्षयुक्ते संपूर्णकामाकरभोरुहृष्टा ॥ विमुक्तकार्यस्तवसुभ्रुहेतोर्नान्या-
स्तिनारीममसौख्यहेतुः ॥ सौचैवमुक्तापतिनासुरूपा प्रहर्षमभ्येत्यउवाचवाक्यं ॥ ज्ञात्वाभवंतंबहुवीर्य्ययुक्तं त्रिपिष्टपान्नाथसमा
गताहं ॥ त्यक्त्वामरान्दैत्यवरांस्तुसर्वान् गन्धर्वनागोरगरक्षसांश्च ॥ तार्क्षांस्तथान्यांस्तुविहायभूपान् स्नेहात्तदाचात्रसमागताहं
॥ एतत्कामफलंलोके यद्द्वयोरेकचित्तता ॥ अन्यचित्तेकृतेकामः कुतोभूयस्तुसंगमः ॥ सफलाहितनुर्मेद्य सफलंरूपमेवहि ॥ त्व-
याकामयताकांत दुर्लभंनजगत्त्रये ॥ प्रोन्नताभ्यांकुचाभ्यांहि कामिनोहृदयंदृढं ॥ संस्पृष्टेनहिशीर्येत मन्येवज्रतमोदृढं ॥ तदेव
मसृतंलोके यत्पुरंध्रीवरासवं ॥ कुचाभ्यांतद्ददिलभाभ्यां मुग्धेनपरिणीयते ॥ एवमुक्तापरिष्वज्य राजानंरहसिस्थितं ॥ रमयामा- ॥ ३६ ॥
सतन्वंगी मुहूर्जनाविधानतः ॥ तस्यैवंक्रीडमानस्य मोहिन्यासहपार्थिव ॥ रुक्माङ्गदस्यश्रोत्राभ्यां पटहध्वनिरागतः ॥ मत्तेभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुंभसंस्थस्तु धर्माङ्गदसुतेजितः ॥ प्रातर्हरिदिनंलोका तिष्ठध्वंचैकचेतताः ॥ अक्षारलवणाःसर्वे हविष्यान्ननिषेविनः ॥ अवनीत-
लपशयनाः प्रियासंगविवर्जिताः ॥ स्मरतोदेवदेवेशं पुराणंपुरुषोत्तमं ॥ सकृद्भोजनसंयुक्ता ह्युपवासाभविष्यथ ॥ तेकृतश्राद्ध-
निचयाः कृतपिण्डोदकक्रियाः ॥ गयाश्राद्धंकृतंतैर्यैर्हरेर्दिनमुपोषितं ॥ एषांवैकार्त्तिकीशुक्ला हरेर्निद्राव्यपोहनी ॥ भवत्येका
दशीप्रातर्माकुर्युर्युगभोजनं ॥ ब्रह्महत्यादिपापानि कामचारकृतानिच ॥ तानियास्यन्तिनिलयं उपोषांगांप्रबोधिनीं ॥ प्रबो-
धयतिधर्मस्तु पापंभस्मीकरोतिच ॥ हरेःप्रबोधमाधत्ते तेनैषाहिप्रबोधिनी ॥ सकृच्चोपोषयत्वेमां निद्रोद्धेदकरींहरेः ॥ स्तनयोन
भवेन्मर्त्यो नयोनौविवसेदिति ॥ कुरुध्वंचक्रिणःपूजमात्मवित्तेनमानवाः ॥ वस्त्राभरणधूपैश्च वरचन्दनकुंकुमैः ॥ सकृद्यपुष्पजा-
तीभि र्यदीच्छथहरेःपदं ॥ योनकुर्याद्वचोस्माकं धर्मंविष्णुगतिप्रदं ॥ समेवध्यश्चदंड्यश्च निर्वास्योविषयाद्धनं ॥ एवंविधेवाद्य
माने पटहेमेघनिस्वने ॥ मुमोचहस्तात्तांबूलं कर्पूरंश्चनृपोत्तमः ॥ मोहिन्याःकुचयोर्लग्नमाकृष्यहृदयंतुवै ॥ उदतिष्ठन्महीपालः
शय्याच्चहाटकाङ्गदः ॥ मोहिनींप्राहकामार्तां सान्त्वयन्सुक्ष्मयागिरा ॥ देविप्रातर्हरिदिनं भविष्यत्यघनाशनं ॥ संयतोहंगमि-
ष्यामि क्षमांकुरुवरानने ॥ तवाज्ञयानैवकृतं व्रतंकार्त्तिकसंभवं ॥ इयमेकादशीकार्या प्रबोधकरणीमया ॥ अशेषसर्वपापस्य छे-
दिनीगतिदायिनी ॥ त्रयाणामपिलोकानां महोत्सवकरीशुभा ॥ तस्माद्धविष्यंभोज्यंहि नियतोगजगामिनि ॥ मयासहत्रिशा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लाक्षि त्वंचापितनुमध्यमे ॥ आराधयहृषीकेशमुपवासपरायणा ॥ येनयास्यसिनिर्वाणं दाहप्रलयवर्जितं ॥ मोहिन्युवाच ॥
साधूक्तंहित्वयाराजन् पूजनंचक्रपाणिनः ॥ जन्ममृत्युजराच्छेद कारकंनात्रसंशयः ॥ वक्ष्येकिंचिदहंभूप तच्छृणुष्वसमाहितः ॥
याप्रतिज्ञाकृतापूर्वं त्वयामन्दरमस्तके ॥ वरप्रदानसहितां भवताहाटकांगद ॥ तस्यास्तुसमयःप्राप्तो दीयतांममभानद ॥ जन्म
प्रभृतियत्पुण्यमश्वमेधशतार्जितं ॥ क्षयंयास्यतियत्सर्वं नतेकर्त्ताभवेद्धवः ॥ रुक्माङ्गदउवाच ॥ ब्रूहिचार्वंगिकर्त्तास्मि यत्तेमन-
सिवर्तते ॥ नादेयंविद्यतेकिंचिदपिजीवितमात्मनः ॥ किंपुनर्ग्रामवित्तादि धराराज्यंचभाविनि ॥ मोहिन्युवाच ॥ कान्तप्रभो-
महाराज जीवितेशरतिप्रिय ॥ नोपोष्याबासरेविष्णो र्भोग्यराजन्ह्यहंप्रिया ॥ नचतेनाविनाराजन् मुहूर्तमपिकामये ॥ नाद्यापि
ममतृप्तिभिस्तवसंयोगजाविभो ॥ एषएववरोदेव योमयाप्रार्थितःपुरा ॥ नचेद्दास्यसिराजेन्द्र भविष्यस्यनृतीविभो ॥ यास्यसेन-
रकंघोरं यावदिन्द्राश्चतुर्दश ॥ राजोवाच ॥ मैवंवदस्वकल्याणि नैतत्त्वय्युपपद्यते ॥ ब्रह्मणस्तुनपापात्वं धर्मविघ्नकरोषिकिं ॥ स्मृ-
तिप्राप्तेनाहिमया नभुक्तंहरिवासरे ॥ सोहमद्यकथंदेवि संजातपलितःशुभे ॥ मर्त्यस्ययौवनेतीते क्षीणेन्द्रियरणस्यहि ॥ स्वच्छंनी
सेवनंयुक्तमथवाहरिवासरं ॥ कृतंयन्नमयाबाल्ये यौवनेनकृतंचयत् ॥ तदहंक्षीणवीर्यस्तु कथंकुर्यांजुगुप्सितं ॥ प्रसीदचपलापांगि
प्रसीदवरवर्णिनि ॥ माकुरुव्रतभंगंमे दाताहंराज्यसंपदं ॥ अथवान्नेच्छसेयज्ञ करोम्यन्यत्सुलोचने ॥ आरोप्यशिविकायांवा त्वा- ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महंगअगामिनि ॥ कलत्रौघेणनेष्यामि विमानप्रतिमांहितां ॥ यत्रकामयसेसुभ्रु त्वाद्धिश्चतदहंव्रजे ॥ अथवानेच्छसेतञ्च मोहमानंमयीकृतं ॥ कृत्वास्वर्णमयौस्तंभौ वक्षाविद्रुमभूषितौ ॥ मुक्ताफलमयीन्दोलां करिष्येहंतवप्रियं ॥ धात्रीफलप्रमाणानां शतलक्ष्यादिसंख्यया ॥ तत्रत्वांदोलयिष्यामि वह्नन्माशानहर्निशं ॥ व्रतभङ्गंवरारोह माकुरुष्वशुभव्रते ॥ भोक्तुस्वमांसहिवरं श्वमांसंहिवरानने ॥ तनयस्यनतैर्भुक्तं नाभुक्तंहरिवासरे ॥ त्रैलोक्यहननेपापं मैथुनेशशिनःक्षये ॥ नृणांव्यवस्थितंदेवि भूतानांकूरकर्माणि ॥ भोजनंवासरेविष्णो नैतेषष्ठ्यांव्यवस्थिता ॥ लवणेतुतृतीयायामष्टम्यांपिशितेशुभे ॥ अक्षेषुपूर्णमास्यांतु सुरायांरविसंक्रमे ॥ गोप्रचारप्रलोपेच कूटसाक्ष्यःप्रदायके ॥ भूमेरंगुलिहारेच मिथ्याविक्रयवादके ॥ निःक्षेपस्यापहारेच कुमारीविघ्नकारके ॥ विल्वस्तमालकेचैव मृतवत्साप्रदोविधिः ॥ दास्यामीतिद्विजंश्राव्य नददातिहियोनरः ॥ ग्रामंक्षेत्रंगृहंवापि दीयमानस्यदुर्मतेः ॥ निर्णयेसमनुप्राप्ते वदतोह्यनृताक्षरं ॥ मानकूटस्तुलाकूटः कन्यानृतगवानृते ॥ संस्थितंकनकाभासे कथंभोज्यंहरेर्दिने ॥ मोहिन्युवाच ॥ एकभक्तेननक्तेन तथैवायाचितेनच ॥ उपवासेनदानेन द्वादशींनहिलंघयेत ॥ गुर्विणीनांगृहस्थानां क्षीणानांरोगिणांतथा ॥ शिशूनांचिरजातानां नयुक्तंसमुपोषणं ॥ राज्ञांभारवहीनांच संग्रामाक्षितिसेवितां ॥ पतिव्रतानांराजेन्द्र नयुक्तंसमुपोषणं ॥ एतन्मेगौतमःप्राह स्थितायामन्दराचले ॥ नव्रतेनदिनंविष्णोर्नयंमनुजदुर्लभं ॥ तेगृस्थाद्विजांज्ञेया येषामग्नेःपरिग्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हः ॥ राजानन्तेतुविज्ञेया येप्रजापालनेस्थिताः ॥ गुर्विण्योज्येष्टमासस्थाः शिशवोज्येष्टवत्सराः ॥ अतिलंघननिक्षीणा यज्ञभा-
गोघनाश्रये ॥ त्रिविधनप्रकारेण भर्तुर्याभिहितेरताः ॥ पतिव्रतास्तुविज्ञेया नज्ञेयायोनिरक्षणात् ॥ किमन्यैर्वहुभिर्भूप वाक्या-
लापैःकृतैर्मया ॥ भोजनेतुकृतेप्रीति रेकादश्यांत्वयानृप ॥ नप्रीतिर्यदिमेछित्वा शिरस्त्वंहिप्रयच्छसि ॥ तृणतुल्यानहंमन्ये त्रि-
लोकान्मनुजाधिप ॥ यत्प्रदास्यसितुष्ट्यर्थं ममराजीवलोचन ॥ स्वयंकृत्वाप्रतिज्ञात्वं सदाक्षिणकरान्वितां ॥ नाद्ययच्छसिराजेन्द्र
नाहंसंसर्पयामिते ॥ वर्णानामाश्रमाणांच सत्यंराजेन्द्रपूज्यते ॥ विशेषाभूमिपालानां त्वाद्धिधानांमहीपते ॥ सत्येनतपतेसूर्यः
शशीसत्येनरोचते ॥ सत्यस्थितिक्षितिर्भूप सत्यंधारयतेजगत् ॥ सत्येनवहतेवायुः सत्येनज्वलतेशिखी ॥ सत्याधारमिदंसर्वं जग-
त्स्थावरजङ्गमं ॥ नसत्याच्चलतेसिन्धुर्नविन्ध्योवर्द्धतेविभो ॥ नगर्भंयुवतीधत्ते वेलातीतंकदाचन ॥ ऋतवःसंस्थितासत्ये फल-
पुष्पार्थदर्शिनः ॥ द्रव्यादिसकलंवस्तु सत्याधारंमहीपते ॥ अश्वमेधसहस्रंच सत्यंचतुलयाधृतं ॥ अश्वमेधसहस्राद्धि सत्यमेवाति-
रिच्यते ॥ सत्याद्विमुक्तोनृपतेमनुष्यः सुरापतुल्योभवतीतिसत्यं ॥ व्रतेनशुद्धिर्यदिवाह्युपैति सत्याच्च्युतोनैतिकृतेनतेन ॥ ६५ ॥
इतिश्रीलघुनारदीयपुराणे रुक्माङ्गदचरिते मोहिनीसम्वादो नामचतुर्विंशोध्यायः ॥ २४ ॥ ७ ७ ७ ७ ७
रुक्मांगदउवाच ॥ यत्त्वयाव्याहृतंवाक्यं ममेदंगौतमेरितं ॥ मन्दरेपर्वतेश्रेष्ठे हरिवासरभोजनं ॥ अजानतापुराणार्थं व्याहृतञ्च- ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजन्मना ॥ क्षुद्रशास्त्रानुसारेण लोलुपेनवरानने ॥ पुराणेनिर्णयोह्येष विद्वद्भिःसमुपाहृतः ॥ नशङ्खेनपिबेत्तोयं नहन्यात्कूर्मंशू-
करौ ॥ एकादश्यांनभुञ्जीत पक्षयोरुभयोरपि ॥ अगम्यागमनेदेवि तथाऽभक्ष्यान्नभक्षणे ॥ अकार्यकरणेजन्तोर्गोसहस्रवधःकृतः ॥
तत्कथंज्ञायमानोहं भोक्ष्यामिहरिवासरे ॥ अभक्षःसर्वथाप्रोक्तः किंपुनस्त्वन्नसंक्रियां ॥ अनुकल्पोनृणांप्रोक्तः क्षीणानांवरवर्णि-
नि ॥ मूलंफलंपयस्तोयमुपभोग्यंभवेच्छुभे ॥ नत्वेवंभोजनेकैश्चिदेकादश्यांप्रकीर्त्तितं ॥ ज्वरिणांलंघनंशस्तं पापीनांसमुपोषणं॥
मनःप्रकोपसुभगे संप्राप्तेहरिवासरे ॥ ज्वरमध्येकृतंपथ्यं निधनायविधीयते ॥ वैष्णवेतुदिनेभुक्ते नरकायप्रकल्पते ॥ माग्रहंकुरुवा-
मोरु व्रतभंगोभवेन्मम ॥ यद्यद्वरोचतेतुभ्यं तत्तत्कर्त्तास्मिसुन्दरि ॥ मोहिन्युवाच ॥ नचान्यद्रोचतेराजन् विनावैभोजनक्रियां ॥
जीवितस्यापिदानेन नमेकिञ्चित्प्रयोजनं ॥ माचरेर्भूपदृष्टोयं नमेकिञ्चित्प्रयोजनं ॥ अभिमन्तोनविद्वांसो नमन्येसमुपोषणं ॥
वेदवाक्यंकथंकर्म भवान्वैकर्तुमर्हसि ॥ वसिष्ठउवाच ॥ तामाहनृपतिःक्रुद्धो वेदोयम्बहुधास्थितः ॥ यज्ञकर्मक्रियावेदः पुराणेषुप्र-
तिष्ठितः ॥ पुराणपुरुषाज्जातं यथेदंजगदद्भुतं ॥ यथाहिवाङ्मयंज्ञानं पुराणेभ्योनसंशयः ॥ वेदार्थादधिकंमन्ये पुराणार्थंवरानने ॥
वेदाःप्रतिष्ठिताःदेवि पुराणेनात्रसंशयः ॥ बिभेत्यल्पश्रुताद्वेदो मामयंघातयिष्यति ॥ इतिहासपुराणैस्तु तद्दृष्टंस्मृतिभिःशुभे ॥
उभाभ्यांयमदृष्टंहि तत्पुराणेषुगीयते ॥ नवेदेग्रहसंचारो लग्नशुद्धिर्नभाविनि ॥ तिथिवृद्धिःक्षयोवापि याज्यायाज्यौनदृश्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रायश्चित्यंनहत्यायामातुरस्यौषधींप्रिये ॥ नचापिपापशुद्धिस्यादात्मानोवापरस्यवा ॥ यदंगैर्दीयतेसुभ्रु तथोपांगैश्चगीयते ॥ पुराणैःस्मृतिभिर्यस्तु वेदोयंपरिपठ्यते ॥ वदन्तीहपुरणानि भूयोभूयोबरानने ॥ नभोक्तव्यंनभोक्तव्यं संप्राप्तेहरिवासरे ॥ पुराणमन्यथाकृत्वा तिर्यग्योनिमवाप्यते ॥ प्रशान्तोपिस्वदान्तोपि नगतिंप्राप्नुयात्क्वचित् ॥ पितरंकोनवन्देत मातरंकोनपूजयेत् ॥ कोनगच्छेत्सरिच्छ्रेष्ठां कोभुंक्तेहरिवासरे ॥ कोहिदूषयतेवेदं ब्राह्मणान्कोजिघांसति ॥ परदारांहिकोगच्छेत्कोभुंक्तेहरिवासरे ॥ नहीदृशंपापतरंजगत्त्रये विमूढजन्तोर्हरिभिर्दिनेशुभे ॥ करोतिदेहस्यविबृद्धेहतोर्भुजिक्रियामेषनरःसदैव ॥ मोहिन्युवाच ॥ पूर्णिकेशीघ्रमाहूय ब्राह्मणान्वेदपारगान् ॥ तेषांवाक्येनपूतोयं करोत्वन्नभुजिक्रियाम् ॥ सातद्वाक्यात्त्वरन्तीच ब्राह्मणान्वेदपारगान् ॥ आहूयचानयामास यत्रतिष्ठतिमोहिनी ॥ तानागतान्ततोदृष्ट्वा वेदवेदाङ्गपारगान् ॥ मोहिनीपतिनासार्द्धं ववन्देभूमिदेवतान् ॥ उपविष्टास्तुतेसर्वे शातकुंभमयेष्वपि ॥ आसनेषुमहीपाल ज्वलनार्कसमप्रभाः ॥ तेषांमध्येवयोबृद्धो गौतमोवाक्यमब्रवीत् ॥ किंनिमित्तंवयंदेवि समाहूतावदस्वनः ॥ सर्वसंशयछेत्तारः प्राप्तास्मोमत्तगामिनि ॥ मोहिन्युवाच ॥ छान्दसस्तुजनोह्येष अर्थवाक्यहतोयथा ॥ सोयंवदतिमोहान्धो नाहंभोक्ष्येहरेर्दिने ॥ अन्नाधारमिदंसर्वं जगत्स्थावरजंगमं ॥ मृताह्यप्यन्नदानेन प्रीयन्तेपितरोदिवि ॥ कर्कन्धुमात्रंविप्रेन्द्राः पुरोडाशंहिदेवताः ॥ कामयन्तेद्विजश्रेष्ठा अत्रचैवामृतोपमं ॥ पिपीलिकापि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षुधिता सुखेनादायतण्डुलान् ॥ चिरंनयतिदुःखेन चान्नंकस्यनदीयति ॥ सोयंविद्धिषयत्यत्र संप्राप्तेहरिवासरे ॥ नितंधर्मंपरित्यज्य यतिधर्मेऽव्यवस्थितः ॥ विधवाचार्यतीनांहि युक्तव्रतनिषेवणे ॥ अव्रताविधवायातु मुनयश्चाव्रतस्तथा ॥ अन्धेतमशिमज्जंते यावादिन्द्राश्चतुर्दश ॥ उपवासादिकरणं भूभुजान्नोदितःक्वचित् ॥ मुक्त्वैकंपालनंराज्ञां चतुर्वर्गप्रसाधनं ॥ नारीणाभर्तृशुश्रूषा पुत्राणांपितृसेवनं ॥ शूद्राणांद्विजशुश्रूषा लोकरक्षामहीभृतां ॥ स्वकंकर्मपरित्यज्य यदन्यत्कुरुतेक्वचित् ॥ अज्ञानाद्वाप्रमादाद्वा पतितःसनसंशयः ॥ सोयमद्यमहीपालो जातिधर्मासमीहते ॥ अव्यापाराहियुवती अमनस्वीसुतस्तथा ॥ एकान्तशीलोनृपतिर्भृत्यःकर्मविवर्जितः ॥ सर्वेतेनरकंयान्ति अप्रतिष्ठंद्विजोत्तमाः ॥ अयंहिनियमोपेतो हरिपूजनतत्परः ॥ आक्रन्देवर्त्तमानेवै कथमेषोभिधास्यति ॥ व्युत्पाद्यहरिपूजान्तु ब्रह्महत्याम्व्यपोहति ॥ क्षीणदेहोरिपूनेष कथंसंयमयिष्यति ॥ अन्नतोभवतिप्राणः प्राणाद्देहविचेष्टितं ॥ चेष्टायांरिपुनाशस्तु ततोन्नंपरिभूयते ॥ एवंज्ञात्वामयाराजा बोध्यमानोनवुध्यते ॥ निजधर्मंपरित्यज्य जातिधर्मेऽव्यवस्थितः ॥ विधवानांव्रतीनांहि युक्तंव्रतनिषेवनं ॥ अव्रताविधवायातु मुनिश्चैवस्तुचाव्रतः ॥ अन्धेतमसिमज्जन्ते यावदिन्द्राश्चतुर्दश ॥ एतदेवनृपेन्यायं यत्प्रजारक्षणंपरं ॥ नव्रतंकिञ्चिदेवेह पुत्रस्त्रीषुनृपेष्ुवा ॥ किंदेवकार्येणनराधिपस्य रक्षामकृत्वा विषयस्थितानां ॥ तद्देवकार्यंसचयज्ञहोमो यदश्रुपातानयनंहिराष्ट्रे ॥ ५० ॥ इतिश्री ना० पु० मोहिनीवाक्यंनाम ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वशिष्ठउवाच ॥ तद्वाक्यंब्राह्मणाःश्रुत्वा मोहिन्याःसमुपाहृतं ॥ तथ्यमित्येवमुक्त्वातं राजानंवाक्यमब्रवीत् ॥ ब्राह्मणाऊचुः ॥ यः
पुरानृपतेपुण्यः कृतोयंसमयःकिल ॥ एकादश्यांनभोक्तव्यं पक्षयोरुभयोरपि ॥ नकृतःशास्त्रदृष्ट्याहि स्वबुध्यावैत्वयाकृतः ॥ सा-
ग्नीनांप्राशनंप्रोक्तमुभयोःसन्ध्ययोःकिल ॥ मोहादुत्सृष्टभोक्तारस्त्रयोवर्णाःप्रकीर्त्तिताः ॥ विशेषाद्भूमिपालानां कथंयुक्तउपोषणं ॥
सर्वत्रोद्यतशस्त्राणां दुष्टसंयमिनांप्रभो ॥ शास्त्रतोशास्त्रतोवापि यःकृतःसमयस्त्वया ॥ परिपूर्णाभवत्वेष वाक्येनाद्यद्विजन्मना ॥
व्रतभंगोनतेस्तीह भुंक्ष्वविप्रानुशासनात ॥ परितापोनकर्त्तव्यो विप्रवाक्यंमहत्तरं ॥ योन्यथामन्यतेतेषां वाक्यंनृपतिपुंगव ॥ स-
यातिरासभियोनिं जन्मानिदशपञ्चच ॥ तच्छ्रुत्वावचनंरौद्रं राजाकोपसमन्वितः ॥ उवाचस्फुरमाणौस्तान् विप्रांश्चश्लक्ष्णयागिरा ॥
सर्वेषामेवभूतानां भवन्तोमार्गदर्शिनः ॥ विमार्गस्थाभवन्तोहि कथंवदथमूर्खतां ॥ यतीनांविधवानाञ्च उपवासउदाहृतः ॥ मि-
थ्यैतत्सर्वदाचैव उपोष्योहरिवासरः ॥ यद्भवद्भिरिदंवाक्यं प्रोक्तंराज्ञामुपोषणे ॥ तन्नास्तिसर्वभूतैस्तु कार्यमेवमुपोषणं ॥ पुराणे-
श्रूयतेचेयं गाथेयंपापकृन्तनी ॥ नशङ्खेनपिवेत्तोयं नहन्यात्कूर्मशूकरौ ॥ एकादश्यांनभोक्तव्यं पक्षयोरुभयोरपि ॥ सुरापानंन-
कर्त्तव्यं नहन्तव्योद्विजस्तथा ॥ नाक्षैःक्रीडेदधर्मंवै नभुञ्जीतहरेर्दिने ॥ अभक्ष्यभक्षणंचैव वर्णाश्रमविवर्जितं ॥ परदाराभिगमनं य-
तेश्चैतद्विगर्हितं ॥ अथवासर्ववर्णानां किंवामन्यथभूसुराः ॥ योषित्प्रसंगसदृशं संप्राप्तेशशिनःक्षये ॥ भोजनंवासरेविष्णोः सद्भि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्विप्राविगर्हितं ॥ कृत्वातुकार्यंजीवेत अप्रमत्तःशरच्छतं ॥ कोहिवैवेष्टमानस्य योभुक्तेहरिवासरे ॥ चतुष्पदेभ्योमनुजैर्न्नांन्नंदत्तंहरे-
र्दिने ॥ उपवासस्थितैर्विप्रा विष्णुधर्मपरायणैः ॥ सोहंकथंकरिष्यामि यत्कृतंनकदाचन ॥ नवोवचःकरिष्यामि नमयाहिनिमं-
त्रिताः ॥ नन्वहंक्षीणदेहस्तु नचरक्षाविवर्जितः ॥ धर्मभूषणसंज्ञेतु रक्षपालेधरातले ॥ प्रशाशतिसुरश्रेष्ठः कोविपक्षोभवेन्मम ॥ ए-
वंज्ञात्वाद्विजश्रेष्ठा नवाच्यंकिंचिदेवहि ॥ अनिच्छमानेयेदद्युः प्रायश्चित्तंद्विजातयः ॥ तेषामेवहितत्पापं स्मृतिर्वैकलिपसंभवं ॥
देवोवादानवोवापि यक्षोगन्धर्वराक्षसा ॥ वृद्धोवाब्राह्मणोवापि पितास्माकमथापिवा ॥ हरिर्वापितरौवापि मोहिनीजनकोपिवा ॥
दिनकृच्छीतकर्त्तावा तुष्यतिनृपतोयदि ॥ नभुंक्तेभूसुराराजन् नाम्नारुक्मांगदस्तुयः ॥ पातालाच्छीर्यतेपृथ्वी हिमवान्परिवर्त्तये-
त् ॥ जलधिःशोषमायाति उष्णत्वंपावकस्त्यजेत् ॥ नाहंत्यजेयंविप्रेन्द्रा एकादश्यानिषेवनं ॥ प्रसिद्धरेखाभुवनत्रयेपि रास्यतेमे-
पटहेतिमात्रं ॥ ग्रामेथवर्गेविषयेपुरेवा विष्णुपतेरुक्मविभूषणस्य ॥ दण्ड्यश्चबध्यश्चसपत्नभूतो नचापिवासोविषयेष्ठतस्य ॥ हरे-
र्दिनेसर्वमखप्रधाने पापापहेधर्मविवर्द्धनश्च ॥ मोक्षप्रदेजन्मनिकृन्तनाख्ये श्रेयोनिधौसर्वजनप्ररूढैः ॥ एवंविधःसंयमसंयुतोहं य-
द्यास्मिकर्त्तावृजिनंहिविप्राः ॥ अमेध्यलिप्तःपटहोभवेन्मे संछादितोनीलपटेनवाससा ॥ उत्पाद्यकीर्त्तिस्त्वयमेवजन्तोर्निकृन्ततेका-
मभयाच्चयोनरः ॥ सयातियोर्निंकृमिकीटजुष्टां विष्ठामयेपञ्चयुगानिसप्त ॥ वृथाशिशूनामपिवैजनित्री भविष्यतेपुत्रवरोनिराशा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 वैवस्वतेहर्षमुपागतेहि सलेखकेभूतपेटप्रपन्ने ॥ किंतेजनातेनपुरात्मनाहि ददातिहर्षंरिपुसुन्दरीणां ॥ कुकर्मणापापमतिंकरोति
 कृतन्नधात्रंपुनरेवयोत्र ॥ शास्त्रंनशास्त्रंनचतत्पुराणं नचापिसन्तःस्मृतयोनचैव ॥ वेदाह्यवेदाश्चभवन्तिविप्रा शुभ्रांक्रियांयःकुरुते-
त्रवासरे ॥ श्राद्धेपितेनापिनतृप्तिरस्ति यद्भुज्यतेवैपितृशेषमन्नं ॥ प्राप्तेह्निनूनंमधुसूदनस्य पित्र्यंहिकर्मेष्टतमंनभाति ॥ वशिष्ठउ-
वाच ॥ श्रुत्वैतद्वचनंभूप मोहिनीप्रज्वलत्यथ ॥ क्रोधसंरक्तनयना भर्त्तारंपर्यभाषत ॥ नकरोषिवचोमह्यं धर्मराज्योभविष्यति ॥
धर्मराजस्तुपुरुषः पांशुनासमतांव्रजेत् ॥ पांशुनापूर्यतेगर्त्तः सगर्त्तोहिनजायते ॥ कृतकृत्यागमिष्यामि प्राप्तोधर्मस्त्वदुद्भवः ॥
नोपधानंकरिष्यामि सुबाहुंचतवाधुना ॥ धिक्त्वांत्वदक्षिणकरं स्ववाक्यपरिलंघनं ॥ म्लेच्छोसिनचराजात्वं म्लेच्छेप्येतन्नविद्यते ॥
सत्याच्चलितमद्यत्वां परित्यज्यस्वपापिनं ॥ एवमुक्त्वावरारोहा उदतिष्ठत्त्वरान्विता ॥ सतीवेशंपरित्यज्य सर्वालंकारभूषिता ॥ प्र-
स्थितासातदातन्वी भूसुरैःसहभूमिप ॥ वदन्तीपरुषंवाक्यं पार्थिवंप्रतिभाविनी ॥ बरंह्यमेध्यसंस्पर्शो नास्यसंगोनृपस्यहि ॥ व-
रंनीलांबरस्पर्शो नास्यधर्मच्युतस्यहि ॥ बरंह्युदक्याशंस्पर्शो नास्यसत्यच्युतस्यहि ॥ एवंविमोहिनीरुष्टा प्रलपन्तीतदाभृशं ॥ गौ-
तमाद्यैःपरिवृता निर्जगामगृहाद्बहिः ॥ निर्गच्छन्तीसुसंक्रुद्धा साक्रोशन्तीतदानृपं ॥ अटित्वासकलामूर्वीं प्राप्तोधर्मविभूषणः ॥
संमुखोहिजनन्यास्तु बराश्वोपरिसुस्थितः ॥ कर्णाभ्यांतस्यशब्दोसौ विश्रान्तपितृवत्सलः ॥ मोहिनीवक्त्रसंभूतो विप्रवाक्योपबृं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हितः ॥ सश्रूत्वाताद्दशंवाक्यं जनन्याधर्मभूषणः ॥ अवरुह्यहयात्क्षिप्रं ववन्देमोहिनींतदा ॥ ब्राह्मणानांचसर्वेषां प्रणाममकरोत्तदा ॥ अनुमन्यचतान्सर्वान् मोहिनींवाक्यमब्रवीत ॥ केनापमानितादेवि कस्मात्वंगर्हसेनृपं ॥ धरासुरैःसमेतात्वं ब्रूहिकिंकरवाणिते ॥ धर्मांगदवचःश्रुत्वा मोहिनीवाक्यमब्रवीत् ॥ अनृतोयंतवपिता कर्ोयेनवृथाकृतः ॥ यःकृतंसुकृतंभीरु रक्ताशोकाकृतिःशुभः ॥ ध्वजांकितोवरश्रीमान् दक्षिणःकनकांगदः ॥ रुक्मांगदेनपित्राते नाहंवस्तुंसमुत्सहे ॥ धर्मांगदउवाच ॥ यद्ब्रवीषिवचोदेवि तत्कर्त्ताहंनसंशयः ॥ माकोपंकुरुदेवित्वं निवर्त्तस्वापितुःप्रिये ॥ मोहिन्युवाच ॥ अनेनसमयेनाहं पित्रोद्दातेमहामते ॥ मन्दरेपर्वतेश्रेष्ठे सन्निधौधूर्जटेस्तदा ॥ समयात्प्रच्युतस्त्वद्य पितातेराजनन्दन ॥ नप्रयच्छतिमेदेयं तस्यैवचविवृद्धये ॥ नयाचेकानिचिद्वस्तु हस्त्यश्वंरत्नवाससी ॥ येनतस्यभवेद्धानिस्तन्नयाचेनृपात्मज ॥ येनासौप्रीणयेद्देवं स्वकीयंवेदिनाम्वर ॥ तन्मयाप्रार्थतेपुत्र समोहान्नप्रयच्छति ॥ उपकारायतस्यैव देहंसंप्रीणनायवै ॥ याचितोब्राह्मणैःसार्द्धं मयानृपतिपुंगव ॥ स्थितोसावनृतेघोरे सुरापानंसमेत्यवै ॥ सत्यच्युतंनिष्ठुरवाक्यभाषिणं विमुक्तधर्मंनृपतस्करंच ॥ परित्यजेयंजनकंतवाधुना नसंगतिर्मेभविताहितेन ॥ तच्छ्रुत्वामोहिनीवाक्यं तदाधर्मांगदोब्रवीत ॥ मयिजीवतितातोमे नभवेदनृतःक्कचित् ॥ निवर्त्तस्वधरातुल्ये करिष्येहंतवेप्सितं ॥ तत्रात्मनानृतन्देवि पूर्वमुक्तंकदाचन ॥ सकथंताद्दशोजातो भविष्यतिनृपोत्तमः ॥ यस्यसत्येनलोकाहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 स्थितावसुमतीतथा ॥ वैवस्वतगृहंयेन शुन्यंसर्वारिणाकृतं ॥ यस्यविस्फुरतेकीर्त्तिः सर्वद्वीपेषुधर्मिणः ॥ सकथंजायतेराजा त्व-
 सत्यवचनान्वितः ॥ कनुश्रुतंत्वयादेवि श्रुतंभूमिपतीरितं ॥ येनत्वंभाषसेभीरु निन्दसेपितरंमम ॥ कृत्वाममोपरिदयां निवर्त्तस्व
बरानने ॥ एतद्धर्मांगदवचः श्रुत्वादेवीविमोहिनी ॥ निवर्त्ततमहीपालः पुत्रस्कन्धावलंबिनी ॥ यत्ररुक्मांगदःशेते मृतकल्पो-
रविप्रभः ॥ तस्मिन्निवेशयामास शयनेकाञ्चनान्विते ॥ दीपरत्नैःसुखचिते मणिवैडूर्यभूषिते ॥ आखण्डलस्यशस्त्रेण कृतपादेसु-
कोमले ॥ विस्तरायामसंपन्ने सुरम्येसुमनोहरे ॥ उवाचप्रणतोभूत्वा पितरंश्लक्ष्णयागिरा ॥ तातैषाजननीमह्यं तांवदत्यनृतीत्वि-
ति ॥ मयिजीवतिकस्मात्वं भविष्यस्यनृतीपितः ॥ सकोषरत्नविषये गोगजाश्वसमाकुले ॥ राज्येप्रशास्यमानेतु सप्तोदधिविभूषि-
ते ॥ देहित्वंसकलंह्यस्या यत्त्वयासमुदीरितं ॥ मयिचापधरेतात व्यलीकंकःकरिष्यति ॥ देहिशक्रपदंदेव्या जितंचैवपुरन्दरं ॥
नचेतुष्यतिकल्याणी तेनशक्रपदेनहि ॥ वित्तेशंवारुणंवापि याम्यंवापृथिवीपते ॥ आग्नेयंनैरृतंवापि वायव्यंवाशिवस्यच ॥ वि-
रिंचिदुर्लभंवापि योगिगम्यंनिरञ्जनं ॥ जित्वापदंप्रदास्यामि उपास्याराध्यपद्मजं ॥ समीहतेयजननी गमाद्यधरणीतले ॥ त्रि-
पिष्टपेवाथपरेपदेवा दास्यामिजित्वादनुजेशमर्त्यान् ॥ भृत्योस्मिदासोस्मिनराधिपेन्द्र मातुस्तथाचाहमदीनकीर्तिः ॥ यद्दुष्करं-
भूमिपदेत्रिलोके तच्चापिदास्यामितवप्रभावात् ॥ तंचापिराजेन्द्रददस्वदेव्या यज्जीवितंवाञ्छतितद्ददस्व ॥ भवस्वनान्योनृपना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थलोके मा कीर्त्तिजंपापमिदंवदस्व ॥ प्रकाशयित्वास्वगुणैर्जनौघं कैरिवात्मप्रभवैःखखोल्कः ॥ कीर्त्तिःप्रसंगेतवभूमिपाल प्रजा- बधोयंनहिसंशयोत्र ॥ उत्पादयित्वाविमलामनन्तां कीर्तिंप्रभोस्वर्गगणानुसारिणीं ॥ नयुक्तमेतत्तवभूमिपाल वाक्यंमृषाकर्तुमि- हेन्द्रकल्प ॥ ८० ॥ इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते धर्माङ्गदवचः षड्विंशतितमोध्यायः ॥ २६ ॥ ७ ७ ७

राजोवाच ॥ कीर्त्तिर्नश्यतुमेपुत्र असत्योवाभवाम्यहं ॥ गंतावानरकंघोरं नभोक्ष्ये हरिवासरे ॥ वदत्येषासुदुर्मेधा भूयोभूयःसुवा- लिशा ॥ समर्थ्येकामयेपुत्र वदस्वान्यत्कथंचन ॥ मुक्त्वैकंभोजनंविष्णोर्वासरेपापनाशने ॥ यद्यहंकुत्सितंयोनिं व्रजेयंकृमिसंयु- तां ॥ कार्यंतथापिनैवाहं भोजनंहरिवासरे ॥ एषाचैवगुरुर्भूत्वा लोकानांशिक्षयान्विता ॥ सुमतिर्भारतिर्यासीत्साकथंचित्तथाभ वेत ॥ अभक्षभक्षणंकृत्वा ह्यगम्यगमनंतथा ॥ पीत्वापेयन्तुयज्जीवेत् किंतेनवदपुत्रक ॥ कृत्वापांशुसमःपुत्र त्यक्तोहमनयाक्षि- तौ ॥ धिक्कृतोद्विजनैःसर्वैः नभोक्षेहरिवासरे ॥ प्रयातुविलयंदेवी मोहिनीब्रह्मणोन्तिकं ॥ वियोगेचपलापद्भ्यां वरंमृत्युर्नभोज- नं ॥ कथंहर्षमहंकर्त्ता मार्तण्डतनयस्यहि ॥ निरुद्धोयस्त्वयैमार्गो हरिवासरसेवनात ॥ याश्चशून्याःकृतास्तात मयानरकपङ्क्तयः ॥ परिपूर्णाभविष्यन्ति जनस्ताबृजिनेकृते ॥ यास्मसीमन्तिनीकाचित् कुक्षौसंधारयेत्सुतं ॥ यःशत्रून्संमुखात्कुर्यान्मित्रद्वेषंक- रोतिकिं ॥ सोहंदेवमनुष्याणां कृत्वामूर्द्ध्निपदंनृप ॥ आपूर्यवैष्णवंलोकं जनोघैःसमुपोषितैः ॥ कथमन्यैचरेद्धर्मं भार्याहेतोःस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामुकः ॥ नान्यमिच्छातिदुर्मेधा धरंशक्रनिसूदनं ॥ भोजनंवासरेविष्णोरेतदेवहियाचते ॥ तंनदास्यामिमोहिन्या याचितोपि-
सुरासुरैः ॥ पिबेविषंविशेवह्निं निपतेपर्वताग्रतः ॥ खड्गेनवाशिरश्छिन्द्यां नभोक्षेहरिवासरे ॥ रुक्मांगदेतिमेनाम प्रसिद्धंभुवन-
त्रये ॥ एकादश्युपवासेन मयाचोपार्जितंयशः ॥ सकथंभोजनंकृत्वा सर्वसंमार्ज्जयेह्यहं ॥ यदिव्रजतिदलतिविलयति तिर्यक्सं-
चरतिखण्डशोयाति ॥ विरमतितदपिनचेता मामकमिहमोहिनिहेतोः ॥ परित्यजामेवनिजंहिजीवितं राज्येनकिंमेस्वजनैःसुते-
न ॥ नत्वेवकर्त्तामधुसूदनस्य दिनेसुपुण्येऽन्ननिषेवनंहि ॥ १८ ॥ इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते सप्तविंशोध्यायः
वशिष्ठउवाच ॥ तत्पितुर्वचनंश्रुत्वा तदाधर्मविभूषणः ॥ आनयामासजननीं तदासंध्यावलिंशुभां ॥ सूर्यायुतशतप्रख्यां तेज-
सासंहतस्तनीं ॥ सययौमन्दिरंदेव्याः पितुर्दुःखेनदुःखितः ॥ चालमानाधरांसर्वां पदविन्यासविक्रमैः ॥ पुत्रस्यवचनात्प्राप्ता त-
त्क्षणात्सानृपान्तिकं ॥ धर्मांगदउवाच ॥ श्रुतंतेमोहिनीवाक्यं पितृवाक्यंतथैवच ॥ उभयोःसंविदंज्ञात्वा मनुःशांत्वयमोहिनीं ॥
भोजनायस्थितामेनां नृपस्यहरिवासरे ॥ यथानच्यवतेसत्याद्यथाभुंक्तेनमेपिता ॥ तथाविधीयतामद्य कुशलंस्याद्यथोभयोः ॥
तत्पुत्रवचनंश्रुत्वा देवीसन्ध्यावलीनृप ॥ उवाचश्लक्ष्णयावाचा प्राहब्रह्मसुतांतथा ॥ माग्रहंकुरुमाभीरु नृपतेर्द्धर्मनाशने ॥ ना-
स्वादयतिपानान्नं संप्राप्तेहरिवासरे ॥ अनुवर्त्तयराजानं गुरुरेषसनातनः ॥ नभार्याबचनेभर्तुर्नारीभवतिभाविनि ॥ तस्यालोका:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभाःप्रोक्ता सावित्र्यास्तुयथामलाः ॥ यद्यनेनपुरादेवि तवदत्तकरोगिरौ ॥ कामार्त्तेनविमूढेन नचतद्देविचिन्तयेत् ॥ यद्देयंत-
द्ददात्वेष अदेयंप्रार्थयस्वमा ॥ विपत्तिरपिचश्लाघ्या सन्मार्गेसंस्थितस्यहि ॥ नभुक्तंयेनशुभगे शैशवेपिहरेर्द्दिने ॥ सोयंशिशु-
त्वाभावेच कथंभोक्षतिसांप्रतं ॥ कामंवरयभद्रेन्यं निवृत्तोभवभोजने ॥ यदिमांमन्यसेदेवि धर्मांगदविमोहिनीं ॥ राज्यंवाजीवि-
तंवास्य वरंयाचयभाविनि ॥ राज्यंगृहाणवामोरु सद्वीपवनकाननं ॥ अथवातेशुभेभद्रे वदान्यत्करवाणिते ॥ ज्येष्ठाहंवाकनि-
ष्ठायाः करिष्येपादधावनं ॥ भर्तुरर्थेविशालाक्षि प्रसीदतनुमध्यमे ॥ वाचाशपथकोशैस्तु संनिवध्याथतंहिया ॥ अकार्यंकारये-
त्पत्यौ सानारीवाग्गुरीभवेत् ॥ प्रत्युतानरकान्घोरान् पञ्चजन्मानिसप्तच ॥ ज्ञात्वाहमेवंसुभगे विक्रियांपापसंभवां ॥ निवारयाम्य-
कार्यत्वात् सखीभावेनसुन्दरि ॥ विपक्षस्यापिसद्बुद्धिर्दातव्याधर्मबुद्धिना ॥ किंपुनःसख्ययायुक्तास्तवपद्मशुभानने ॥ सन्ध्या-
वल्यावचःश्रुत्वा मोहिनीमोहसंयुता ॥ उवाचकनकाभासा भर्तुर्ज्येष्ठांप्रियान्तदा ॥ माननीयासिमेसुभ्रु करोमिवचनन्तव ॥ द्व-
न्द्ववृत्तिर्विवादस्तु गीयतेनारदादिभिः ॥ यदेतन्नाचरेद्राजा भोजनंकृष्णवासरे ॥ क्रियतामपरन्देवि मरणादधिकंतव ॥ ममापि
दुःखैर्दह्येत नतवैववदामिते ॥ कस्येष्टमात्महननं कस्येष्टंविषभक्षणं ॥ पतनंगिरिशृंगाद्वा सर्प्पैःक्रीडाथवाशुभे ॥ व्याघ्रसिंहाभि-
गमनं समुद्रतरणंतथा ॥ द्विरुक्तोनृपवाक्यंवा परदारगमस्तथा ॥ अपथ्यभक्षणंलोके तथैवाभक्ष्यभक्षणं ॥ मृगयापानमक्षैर्वा क्री-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डनंसाहसैस्तथा ॥ छेदनंतृणकाष्ठानां लोकानांखण्डनंतथा ॥ हननंसूक्ष्मजीवानां जलपावकक्रीडनं ॥ निष्ठादेशवरारोहे नरःस-
र्वंकरोतिहि ॥ साहंपापादुराचारा वक्तुकामासुनिर्घृणा ॥ यादृशेनहिभावेन योनौरेतःसमुत्सृजेत् ॥ तादृशेनहिभावेन अपत्यं
जायतेकिल ॥ भ्रंशनार्थमहंराज्ञो देविरुक्मांगदस्यहि ॥ जाताजलजजातेन स्त्रीरूपावरवर्णिनी ॥ दुष्टभावासमुत्पन्ना दुःखार्थं
तनयस्यते ॥ नलमंनग्रहादेवि नाहोवापुण्यदर्शिनी ॥ तत्कालभावनातग्राह्या तद्भावाज्जायतेसुतः ॥ तेनभावेनयुक्तेन दाक्षिण्य
रहितस्यच ॥ नस्नेहोनचव्रीडावै नधर्मादेविविद्यते ॥ युक्तायुक्तंमन्यमानः स्वभावमनुवर्त्तते ॥ वक्ष्येवचःप्राणहरन्तवाधुना भर्तु-
श्चलोकस्यचदारुणंच ॥ धर्मापहंघोरतरंममैव कर्तुंनशक्यंमनसैवभीरु ॥ करोषिवाक्यंयदिमामकंत्वं भवेत्सुकीर्तिर्महतीसुलोके ॥
भर्तुर्यशःस्यात्त्रिदिवेगतिस्तु पुत्रप्रसंसाममाधिग्विवाद ॥ ३५ ॥ इतिश्री ल० ना० पु०रु०मोहिनीवाक्ये अष्टाविंशोध्यायः २८
वशिष्ठउवाच ॥ मोहिन्यावचनंश्रुत्वा देवीसन्ध्यावलीतदा ॥ धैर्यमालंब्यतांतन्वी ब्रूहिब्रूहीत्यभाषत ॥ कीदृशंतद्वचोदेवि येन-
दुःखंभवेन्मम ॥ भर्तुर्मेसत्यकरणे नमेदुःखंव्यथाक्वचित ॥ आत्मनोनिधनोवापि पुत्रस्यनिधनोपिवा ॥ भर्तुर्वाक्यपरायामे रा-
ज्यनाशेनचव्यथा ॥ यस्याःकृतेभवद्भर्ता दुःखग्रहतचेतनः ॥ नार्याःसुन्दरिपापायास्तस्याःप्रोक्ताशुभागतिः ॥ मज्जतेनरकेघोरे
पूपाख्येजन्मसप्ततिः ॥ विमुखींयोनिमासाद्य तिष्ठतेवत्सरत्रयं ॥ भर्तुरर्थेहियावित्तं विद्यमानंनयच्छति ॥ जीवितंवावरारोहे सा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्ठायांभवेत्कृमिः ॥ कृमियोनिविमुक्तास्तु काष्ठीलाभवतेशुभे ॥ ममकौमारिभावेतु मत्पितुःकाष्ठपाटकः ॥ अग्निःप्रज्वलनार्थाय जा-
तुकाष्ठंन्यपातयत ॥ सखीभिःसहितातत्र रममाणाशुभानने ॥ गतोहंतत्रयत्रास्ते सवनीकाष्ठपाटकः ॥ काष्ठंपाटयतस्तस्य पा-
र्श्वेतुस्थितवत्यहं ॥ तत्रतुसामयादृष्टा काष्ठीलाकाष्ठमध्यतः ॥ नवनीतनिभंदेहं मुखञ्चाञ्जनसंनिभं ॥ कनिष्ठिकांगुलीतुल्या स्थौ-
ल्यांमांसत्वचान्विता ॥ तांदृष्ट्वापतितांहन्तुं वेगाद्ध्वांक्षःसमागतः ॥ यावद्गृह्णातिवक्रेण काष्ठीलांक्षुधितःशुभे ॥ तावन्निवारितोध्वां-
क्षो मयालोष्टेणतत्क्षणात् ॥ साचतेनपरित्यक्ता वायसेनवरानने ॥ वक्रप्राप्तापिभीतेन वायसेनपलायता ॥ ततःसावेपमानाच
चंचुस्पर्शसुदुःखिता ॥ मयाजलेनसंसिक्ता तत्क्षणाच्चेतनान्विता ॥ ततःसावेपमानाच मेवचोवरवर्णिनि ॥ उवाचमांवरारोहे व्य-
क्तंमधुरयागिरा ॥ काष्ठिलोवाच ॥ सन्ध्यावलियथापूर्वमहमासीन्निशामय ॥ आसीत्कौण्डिल्यइत्येवं ब्राह्मणःसर्वकर्मवित ॥ तस्या-
हंदुहिताभीरु सुप्रियाचारुलोचने ॥ न्यवसंकान्यकुब्जेतु सर्वैःकामैःप्रपूजिता ॥ जनन्यावन्धुवर्गस्य पितुरिष्टतमाभवत् ॥ ततोहं-
विप्रपुत्राय प्रदत्तालंकृतातदा ॥ कुलीनायसुरूपाय स्त्रीसंगरहितायच ॥ श्वशुरेणचमेदत्तं मणिमुक्ताफलंबहु ॥ अयुतञ्चसुवर्णञ्च
पाणिसंग्रहणेतदा ॥ पितृश्वशुरवित्ताभ्यां परिपूर्णाभवंस्त्वहं ॥ गोमहिष्यादिसंयुक्ता धनरत्नसमन्विता ॥ इष्टादत्तात्वहन्देवि सु-
शीलस्यजनस्यच ॥ कालेनपञ्चतांप्राप्तः श्वशुरोवेदतत्त्ववित ॥ तंमृतंतुपतिंदृष्ट्वा श्वश्रूसामेपतिव्रता ॥ विवेशाग्नौतदादीप्ते भर्त्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 सहशुभव्रता ॥ भर्तामेसजलंदत्वा पित्रोःश्राद्धमथाकरोत् ॥ गतेमासद्वयेदेवि भर्तामेराजमन्दिरं ॥ ययौनिमित्तेकस्मिंश्चित् पि-
॥ ४५ ॥ तृहीनोनिराश्रयः ॥ तत्रवेश्याःसुवर्णाढ्या यौवनिन्यःशुभानना ॥ प्रविशन्त्योनृपगृहं दृष्टस्तेनद्विजन्मना ॥ तासांमध्येसुरू-
पैका सुन्दरीसुस्तनीशुभा ॥ आनीतास्वगृहेतेन रत्यर्थमसितेक्षणा ॥ तयासदैवबुभुजे विषयान्विषयप्रियः ॥ तेनैवकर्मणासार्द्धं
वित्तंनीतंक्षयंशुभं ॥ बर्षत्रयेगतेवित्तं हारीतश्चदुरोदरे ॥ ततोमांप्रार्थयामास देहिमेभूषणंस्वकं ॥ दुरोदरेमयावित्तं हारितंचारुहा-
सिनि ॥ तन्मयातस्यवित्तंन दत्तंस्वस्वामिनेतदा ॥ सर्ववस्तुमयादाय याताहंपितृमन्दिरं ॥ ततोभर्तागृहंकुड्यं सप्तकक्षकमद्भुतं ॥
विक्रीयतच्चवेश्याया दत्तंकिंचिद्दुरोदरे ॥ क्षेत्रंधान्यादिसहितं सभाण्डंसपरिच्छदं ॥ स्वल्पमूल्येनदत्तातु गतोनदनदीपतिं ॥ आ-
रुह्यनावंतरसा प्रविष्टोलवणोदधिं ॥ सगतोदूरमध्वानं पश्यमानोद्भुतानिच ॥ समुद्रजातानिशुभे जीवचेष्टानितानिच ॥ प्रभञ्ज-
नवशात्तौतु तन्मार्गेणगताभृशं ॥ तदासप्तशतानीह योजनानांगताहिसा ॥ तत्राम्येपञ्चतांयाताः क्षुत्पिपाशार्दितानराः॥ वि-
मुच्यवित्तंभाण्डानि निषादैःसहभाविनि ॥ तत्रैकोदैवयोगान्मे नमृतोहिपतिःशुभे ॥ वायुनानीयमानोसौ प्राक्कर्मवशगेनहि ॥
आससादचलंदेवि बहुशृंगविभूषितं ॥ बहुनिस्सरणोपेतं बहुधातुविभूषितं ॥ बहुबृक्षसमाकीर्णं बहुपुष्पफलान्वितं ॥ उल्लिखन्तं ॥ ४९ ॥
हिशिखरैर्मध्यमंयद्धरेःपदं ॥ तंदृष्ट्वापर्वतंदिव्यं त्यक्त्वानावंसमेपतिः ॥ आरुरोहगिरिंश्रेष्ठं क्षुधार्तःशुभलोचने ॥ विश्रम्यचमुहूर्त्तंतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षुधापरिगतस्तदा ॥ उदतिष्ठतभक्षार्थं भूधरंतंव्यलोकयत् ॥ तत्रापश्यत्समृद्धीकां सपंकागौस्तनीमिव ॥ श्रवमाणारसंदिव्यं ज-
रारोगविनाशनं ॥ अभक्षयत्तदाद्राक्षां षड्विंशद्दिनसंख्यया ॥ सोपीतशीतलंतोयं सुरसंनिर्मलंशुचि ॥ तत्पीत्वानिपुनच्छायां
सोपश्यच्छाखिनांपरं ॥ शालंनीलघनप्रख्यं पञ्चाशत्पुरुषोच्छ्रयं ॥ तस्याधस्तात्सुसुप्वाप उत्तरीयंप्रसार्यहि ॥ मेदिन्यांहेगगर्भोगो
निद्राघूर्णितलोचनः ॥ तावत्सुप्तःसुखेनासौ यावत्सूर्यास्तमोगतः ॥ सूर्यास्तमनसंप्राप्ते उन्मीलतिनिशामुखे ॥ तत्रागाद्राक्षसो-
घोरो गर्जमानोघनोयथा ॥ अंकेनादायतन्वंगीं सीतामिवदशाननः ॥ सुप्तांकाशीपतेःपुत्रीं नाम्नारत्नावलीशुभा ॥ शुभंगेविप-
रीतन्तु शयनेवैशिरःकृतं ॥ पतिकामकुमारीसा नाविन्दत्सदृशंपतिं ॥ सर्वयोषिद्वरावाला रुदतीनिद्रयाहृता ॥ तस्याःकृतेतदा-
देवी चिन्ताकृष्टाह्यहर्निशं ॥ दीपच्छायांसमाश्रित्य शयनात्सातदाकिल ॥ अटमानेनपापेन दृष्टासारक्षसाशुभा ॥ वज्रवैडूर्यख-
चिते धारयन्तीचकंकणे ॥ उभाभ्यांदशरत्नानि निष्केथद्दशसप्तच ॥ सीमन्तेसप्तरत्नानि केयूरेष्टौचसप्तच ॥ एवंरत्नान्वितांवालां
शतह्रदसमप्रभां ॥ जहारराजभवनात तांतदाचारुहासिनीं ॥ वायुमार्गसमाश्रित्य क्षणात्प्राप्तःस्वमालयं ॥ तत्पर्वतेशयानस्तु प-
तिर्मेशालमाश्रितः ॥ तत्रतस्यगुहारम्या सर्वैस्वर्यसमन्विता ॥ पश्यमानःपतिंरक्षः प्रविवेशगुहांशुभां ॥ अनेकैर्मयविन्यासैः सं-
युक्तांचित्रमन्दिरं ॥ बहुद्रव्यसमोपेतं सज्जनासनसंभृतं ॥ भोजनपानपात्रैस्तु भक्ष्यभोज्यैरनेकधा ॥ चित्रितंबहुरत्नैश्च बहुवृक्षस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्वितं ॥ तस्यमध्येनदीपुण्या पद्मोत्पलविभूषिता ॥ हंसकारण्डवाकीर्णा चक्रवाकोपशोभिता ॥ वनानिचसुरम्याणि तत्रवैरा-
क्षसीशुभे ॥ आसीनातस्यदुष्टस्य भार्यापरमसंपदा ॥ एवंमनोरमांतान्तु समासाद्यसराक्षसः ॥ सप्रविश्यमुमोचाथ शय्यायांवरलो-
चना ॥ रुदतीभयसंयुक्ता पीनश्रोणिपयोधरा ॥ सातुतद्रुदितंश्रुत्वा आजगामत्वरान्विता ॥ तांदृष्ट्वाहेमगर्भाभां सुरूपांगजगा-
मिनीं ॥ पप्रच्छसाहिभर्तारं किमर्थमिहमाहृता ॥ जीवन्त्यांमयिदुष्प्राज्ञ प्रियमन्यांसमीहसे ॥ नहिभार्यातवेदानीं सपत्नीमित्वया-
कृता ॥ एवंब्रुवाणांतांसुभ्रू तदाकोपसमन्वितां ॥ उवाचराक्षसस्तत्र तांप्रियांचारुलोचने ॥ भक्षार्थमाहृतेयन्ते प्रसादंकुरुमेशुभे ॥
ममापिदैवैरुद्दिष्टो भक्ष्योद्वारिस्थितोद्विजः ॥ सालवृक्षसमाश्रित्य पश्यत्वमसितेक्षणे ॥ तमानयस्वत्वयंगत्वा येनाहंभक्षयेशुभे ॥ रा-
क्षसस्यवचःश्रुत्वा साकुमारीतदाब्रवीत् ॥ मिथ्याराक्षसिभर्तांते वाक्यमीरितवानिदं ॥ गृहात्पितुःसमानीता भार्यार्थेपतिनातव ॥
जरयात्वांपातिर्ज्ञात्वा विरूपामक्षमांरतेः ॥ विक्रम्यरुदतीरात्रौ रत्यर्थमहमाहृता ॥ तस्याःतद्वचनंश्रुत्वा राक्षसीक्रोधसंयुता ॥ हृ-
दयेनावधार्यार्थं तस्यारूपंविलोक्यच ॥ चिन्तयामासतन्वंगी राक्षसीसासुदुःखिता ॥ अवश्यंमूर्ध्निमेकीलं विधास्यतिहिराक्षसः ॥
एवंगतोमयातस्य कर्तव्यंवैरयातनं ॥ भास्मसीमन्तिनीकाचित् भवेद्धिभुवनत्रये ॥ याहिसापत्नकीलेन ताड्यमानेषुजीवति ॥
सर्वेषामेवदुःखानामेतद्दुःखमहत्तरं ॥ समतानद्धिभार्यस्य कदाचिदिहवर्त्तते ॥ तस्येष्टासुखिनीज्ञेया अनिष्टापरिभूयते ॥ एवंसा- ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहुशश्चिन्त्य भर्तारंवाक्यमब्रवीत् ॥ भक्षार्थंचेदिहानीता ममकान्तत्वयाधुना ॥ आनयिष्याम्यहंविप्रं हत्वाब्राह्मणमागतं ॥ शा-
लवृक्षेशयानंतु प्रयाणन्तुसुलक्षणं ॥ रूपंमनोहरंकृत्वा तदाषोडशवार्षिकं ॥ अब्रवीत्तत्प्रहृष्टासा वाक्यंरक्षःसुलोचना ॥ ततःसरा-
क्षसःप्राह गच्छगच्छेतिभाविनि ॥ शृंक्कणीस्फुरितात्यर्थं तस्यभक्षणकाम्यया ॥ सानिर्गत्यगुहायास्तु अपश्यद्द्विजसत्तमं ॥ भर्ता-
रंमेवरारोहा स्वपतिंकर्तुमागता ॥ तांदृष्ट्वाराक्षसींदेवी भर्तामेभवदाकुलः ॥ अब्रवीत्प्रश्रयोपेता भर्तारंतत्रसंस्थितं ॥ राक्षस्युवाच ॥
कस्माद्देशात्समायातः किमर्थमिहतिष्ठसि ॥ पृच्छामित्वांसकामाहं राक्षसीकृच्छ्रयातुरा ॥ निराकृतासुभर्त्राहं त्वांपतिंकर्तुमागता ॥
तच्छ्रुत्वावचनन्देवि भर्तामेभयसंयुतः ॥ रक्षोमानुषसंयोगः कथंराक्षसिसंभवेत् ॥ मानुषाहिस्मृताभक्षा राक्षसानांनसंशयः ॥ सा-
पतिंमेपुनःप्राह संमितंमधुराक्षरं ॥ असंभाव्यमपीहात्र संभवेद्द्विजसत्तम ॥ पुराणेश्रूयतेह्येतत् भविष्येभारतेप्रभो ॥ हिडिंबारा-
क्षसीभार्या भवित्रीखलुमारुतेः ॥ तस्याश्चापिमहावीर्यो भविष्यतिघटोत्कचः ॥ अवध्यःसर्वशत्रूणां शक्त्यामृत्युमवाप्स्यति ॥ या-
चेयंतिष्ठतेशक्तिर्वासवीशालसंस्थिता ॥ पुरन्दरात्समानीता मद्भर्तादस्युकर्मणा ॥ शक्रेगतेमर्त्यलोकं वैरोचनजिघांसया ॥ से-
यमेकमहत्वातु नगच्छन्तिपुरन्दरं ॥ यस्येयंक्षिप्यतेशक्तिः सोमरोपिविनश्यति ॥ सोयमारुह्यशालाग्रं शक्तिमादायपाणिना ॥
तवदास्यामिभद्रंते भर्तुर्निधनकांक्षया ॥ यदित्वमनयाशक्त्या नहन्तासिनिशाचरं ॥ तदात्वांसतुदुर्मेधा भक्षयिष्यत्यसंशयं ॥ त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वशत्रुरयंक्षुद्रो हनिष्यतिनसंशयः ॥ सपत्नीसमयेनापि कृत्वादुर्बुद्धिनातदा ॥ ममाद्यदुःखंसुमहत् कृतंतेनदुरात्मना ॥ व्यापा-
दितःपुनःसंगमावयोर्हिभविष्यति ॥ यद्यन्यथावदेयंचेत् त्वामहंद्विजसत्तम ॥ जन्मार्जितस्यपुण्यस्य नभवामिचभाविनी ॥ या-
गतिर्ब्रह्महत्यायां प्राप्यतेकुत्सितानरैः ॥ गच्छेयंतामहंब्रह्मन् यद्येतदनृतंवदे ॥ मद्यपानेहियत्पापं ब्राह्मणस्यदुरात्मनः ॥ विहितो-
वेदशास्त्रज्ञे तत्पापमहमाप्नुयां ॥ पुराणेयानिपुण्यानि प्रोक्तानिमुनिपुंगवैः ॥ अन्यथानन्यतेयेन तत्पापंममनिश्चितं ॥ गुरुदा-
रप्रसक्तस्य जंतोःपापंयदुच्यते ॥ तेनपापेनलिप्येयं यद्येहंदुष्टमाचरेत् ॥ वंधुन्यासापहरणे मेदिनीहरणेतथा ॥ आत्मनोहत्यया-
याहि विहितामुनिभिर्विभो ॥ गच्छेयंतांगतिंविप्र यद्येतदनृतंवदे ॥ पञ्चम्यांगोचरवरे यत्पापंविहितंस्त्रियां ॥ तरुच्छेदेनवम्यांतु
पर्वणिस्त्रीसमागमे ॥ तेनपापेनलिप्येयं यद्येतदनृतंवदे ॥ यदुच्छिष्टेघृतंदद्यादंगुल्याकर्षयोर्द्विजान् ॥ पुण्येर्ह्निमैथुनंकर्त्ता तत्पा-
पंभवितामम ॥ चरंतीविधवायातु द्विकालंभोजनंविभो ॥ पात्रेकांस्यस्यसंज्ञेतु सतांबूलसतल्पगं ॥ वैश्वदेवमकुर्वाणो गृहस्थो-
भोजनंचरेत् ॥ निर्वांयभिक्षांभिक्षुभ्यो ह्यसत्तर्प्यपितॄनपि ॥ तेनपापेनालिप्येयं यद्येतदनृतंवदे ॥ तैलेनसंक्रमेस्नाति तीर्थंगोभि-
र्व्रजेत्तुयः ॥ पावकेप्युदमानेषु समुद्धृत्यमृदंनरः ॥ करोत्याप्लवनंयस्तु योन्यथावचनंवदेत् ॥ कुशकाशेशिकाभिस्तु क्रियतेचत्व- ॥ ४१ ॥
चंविना ॥ दंतकाष्ठंकरोत्येवं तस्ययद्विहितंत्वघं ॥ तस्याहंभागिनीब्रह्मन् यदिमिथ्यावदामिते ॥ संन्यस्यगांनिजगृहे अदत्वानु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णवारिच ॥ तस्यपर्यद्धिहितंपापं तन्मह्यंभवताध्रुवं ॥ देवार्चामासुरेकाष्ठे उपवेशंकेरातियः ॥ श्राद्धंवाद्विजशार्दूल तत्पापंभविता-
मम ॥ गोद्दीनांमाहिषींयस्तु गृहेधारयतेद्विजः ॥ तस्यपापेनलिप्येयं यद्येतदनृतंवदे ॥ छिन्नासंवीतवस्त्रेण देवार्चाचकरोतियः ॥
यंवृतोधौतदग्धेन पावकेनविशेषतः ॥ तेनपापेनलिप्येयं यद्येतदनृतंवदे ॥ स्वपचारामजातैस्तु कुसुमैरर्चयेत्सुरान् ॥ तेनपापेन
लिप्येयं यद्येतदनृतंवदे ॥ बधूविलोकनेपापं परदारविलोकने ॥ सस्पृहंपरदाराणां यत्पापमवलोकने ॥ तेनपापेनलिप्येयं यद्ये-
तदनृतंवदे ॥ सत्कथायांप्रवृत्तायां विघ्नमाचरतांनृणां॥ तत्पापंतुभवेत्सद्यो यदेतदनृतंवदे ॥ विधवाकंचुकोपेता बधूटीकंचुकंवि-
ना ॥ उभयोःपातकंयच्च तन्मह्यंभविताध्रुवं ॥ हीनयालिंगवेषेण अलिंगीब्राह्मणस्तथा ॥ उभयोपातकंमह्यं यद्येतदनृतंवदे ॥
कूटसाक्षिषुयत्पापं यत्पापंहयविक्रये ॥ स्वजानिर्विक्रयेचैव तत्पापंभवितामम ॥ एवमादीनिपापानि अनुक्तान्यपियानिच ॥ तै-
स्तैःपापैरहंलिप्ये यद्येतदनृतंवदे ॥ एवंसंबोधितंदेवि भर्त्तामेपापयातया ॥ तथेतिनिश्चयंचक्रे भावितार्थेनमोहितः ॥ निर्द्रव्यो
ऽप्यसनेचैव भर्तामेचारुहासिनि ॥ मद्वाक्यकलुषीचैव राक्षसींवाक्यमब्रवीत् ॥ शीघ्रमानयतांशक्तिं करोमिवचनन्तव ॥ दातव्यं
मत्प्रेयासर्वं राक्षसापसदेहते ॥ द्रव्याशयाप्रविष्टोस्मि सागरंतिमिसंकुलं ॥ सैवमुक्तातदाभर्त्ता तथेत्युक्तावरानने ॥ तत्क्षणाद्राक्ष-
सीगृह्य शक्तिंवृक्षाग्रसंस्थितं ॥ ददौसागृह्यविप्राय विमुंचतिमहार्चिषं ॥ एतस्मिन्नंतरेरक्षस्तदाकामेनमोहितः ॥ भोक्तुकामःकु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मारीतां सामिताबाक्यमब्रवीत् ॥ कुमारीसेवनेरक्षो महत्पापंविधीयते ॥ छलेनाहंहृतासुप्ता त्वयाहंपितृमन्दिरात् ॥ नदोषोभवतो
ह्यस्ति ममभाग्यामिहेद्दृशं ॥ गुहामध्यगतीरक्षः कोमेत्राताभवेदिह ॥ पूर्वदत्तोभवेद्भर्ता पूर्वदत्ताप्रियाभवेत् ॥ पूर्वदत्ताभवेद्विद्या-
द्विजस्थानंकृयागृहं ॥ शय्यायाश्चतथादानं वृथाभवतिनिर्ऋतः ॥ प्रतिकूलेविधौपुंसामाहवैनारदोमुनिः ॥ विधिनानीयमानस्तु
जनःसर्वत्रगच्छति ॥ वृथाचेष्टाहिरक्षेन्द्र बन्ध्यायामैथुनंयथा ॥ अवश्यंभविताभर्त्ता त्वमेवरजनीचर ॥ विधानविहितेमार्गे किं-
करिष्यंतिपण्डिताः ॥ तस्माद्दानपवित्रात्वं शालबृक्षाश्रितास्त्विह ॥ अयमग्निर्ज्वलन्नेतद्दर्भान्विप्रंसमानय ॥ विनादर्भैर्विनातो-
यैर्विनावैपावकेनच ॥ ब्राह्मणस्यतुवाक्येन विवाहसफलोभवेत् ॥ नहतोयदिविप्रासौ भार्यायातवराक्षस ॥ निर्वृत्तेहोमकरणे तं
रक्षययथासुखं ॥ एवमुक्तेतुवचने निर्जगामसराक्षसः ॥ सत्वरोत्हृदयाविष्टो निर्जगामगुहामुखात् ॥ चिन्तयामाससतदा नहि
सत्यद्यमेप्रिया ॥ तंब्राह्मणंमहाभागं ततोमेवांछितंभवेत् ॥ एवंविलोक्यसहसा निर्ययौसमहाबलः ॥ तस्यानिर्गच्छतोदेवि स्वकं
जातंक्षतंकिल ॥ सव्यंचप्रास्फुरंनेत्रं स्ववर्णस्खलितंतदा ॥ अनाहृत्यतुतंसर्वं निर्जगामत्वरान्वितः ॥ शालबृक्षसमीपस्थामपस्य-
न्तनुमध्यमां ॥ विभ्रतींमानुषंरूपं तांभार्यासुमनोहरां ॥ घटयन्तीचसामर्थ्यं भर्तृभार्यानुगंतथा ॥ परित्यजेयंतंपापं राक्षसंक्रूरका-
रिणं ॥ मानुषीप्रमदाशक्तं मच्छरीगविदूषकं ॥ तच्छ्रुत्वादारुणंवाक्यं भार्ययासमुदाहृतं ॥ कोपामर्षविवृत्ताक्षस्तामधावतराक्षसः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसार्यवक्रंसमुदीर्यबाहुं हन्तुंतथातांसुमहाबलोसौ ॥ समभ्यधावत्पवनोयथैव समुच्चरद्वाक्यमनर्थयुक्तं ॥ १४० ॥ इतिश्री लघु-
नारदीय पुराणे रुक्मांगदचरिते काष्ठीलोपाख्यानमेकोनत्रिंशोध्यायः ॥ २९ ॥ ७ ७ ७ ७ ७ ७
काष्ठीलोवाच ॥ राक्षसंधावमानन्तु कालान्तकयमोपमं ॥ राक्षसीप्राहभर्तारं साक्षुधाभयकंपिता ॥ क्षिपस्वह्यनलप्रख्यां शक्तिं-
वासववल्लभां ॥ येनायंपञ्चतांयाति दिगंवररिपुःप्रिय ॥ तस्यावाक्यात्पतिर्मह्यं पौरुषेस्वेऽव्यवस्थितः ॥ विमोचविपुलांशक्तिं रक्षो-
वक्षःस्थलंप्रति ॥ ज्वलन्तीज्वलनप्रख्या द्योतयन्तींदिशोदश ॥ शक्त्यानिहत्यभर्तारं द्विजहस्तप्रमुक्तया ॥ कृतकृत्यमिवात्मानं
मेनेसारजनीचरी ॥ अथोवाचद्विजवरं भर्तारंहृष्टयागिरा ॥ एहिकान्तगुहांरम्यां प्रविशस्वयदृच्छया ॥ भुंक्ष्वभोगान्मयासार्द्धं
येदेवायेचमानुषाः ॥ तथेतिकुर्वन्पुरुषः प्राहहृष्टवपुस्तदा ॥ गृहीत्वासाकरेकान्तं प्रविष्टाथगुहांशुभां ॥ अनवेक्षैवतद्भस्म भर्तृ-
देहसमुद्भवं ॥ कुचाभ्यांसापतिंदेवि सोन्नताभ्यामपीडयत् ॥ दर्शयामासतांतन्वीं कुमारींशयनेस्थितां ॥ इमांपश्याशितापांगीं
विंबोष्ठींकाञ्चनप्रभां ॥ विवाहार्थंसमानीतां वाराणस्याःद्विजोत्तम ॥ यस्याःसीमांनलंघंति सर्वपापान्यदोषतः ॥ दूषयंयत्परंबा-
हुः पुण्यपापक्षयंकरं ॥ यद्गृहंत्रिपुरारेस्तु पञ्चगव्यूतिसंख्यया ॥ शिवस्यविष्णोर्धातुश्च भास्करस्यतथैवच ॥ तस्मिन्मृताःपुन-
र्मातुर्जठरंनव्रजन्तिवै ॥ अप्रकाशंचमुनयो हर्म्यमार्गहरस्ययत ॥ अक्षीणकर्मवन्धास्तु यस्यांसिध्यन्तिमानवाः ॥ तत्रस्थयंवरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोहा सुभगाचारुहासिनी ॥ कामिनीरक्षसातेन इहानीताद्विजोत्तम ॥ एनांत्वमद्यस्वगृहं पित्र्यंनयसुलोचन ॥ इमानितवरत्ना-
नि शयनान्यासनानिच ॥ तथाचाहंतवाधीना कुरुनाथयदिच्छसि ॥ त्वदर्थेराक्षसोघोरो मयाब्रह्मन्निसूदितः ॥ कुमारिकाकृते-
भर्त्ता योमयाब्राह्मणर्षभ ॥ समयानिहतोविप्र दृष्ट्वारूपंतवोत्तमं ॥ तस्मान्ममोपरिविभो कुरुविश्वासमात्मना ॥ भजत्वंमांविशाला-
क्ष भक्षादीनांनसंशयः ॥ श्रुत्वैतद्वचनंभीरु भर्त्तामेचारुलोचने ॥ राक्षस्याःसान्त्वसंयुक्तं कुमारीसन्निधौतदा ॥ उवाचराक्षसींत-
त्र साशंकंसतदावचः ॥ नीतिशास्त्रेषुसुभगे अविश्वासास्तुयोषितः ॥ स्वकंत्वयापतिंहिंसि साकथंमांनहिंससि ॥ मत्तोरूपाधि-
कंदृष्ट्वा मांचाप्येवंनिपातयेत ॥ सोहंसर्वान्मद्वाभीरु विश्वस्तस्तेनसंशयः ॥ यदिष्टंतवसुश्रोणि तंकुरुष्वममाद्यवै ॥ अद्यवाश्वःप-
रश्वोवा भक्षयस्वनिसाचरि ॥ तवाधीनोस्मिसुभगे कुरुयत्तवरोचते ॥ एतदेवमयाकार्यं न्यायंचोपकृतेत्वया ॥ आत्मानंसर्वथा-
देयं नान्यथाहिकृतंभवेत ॥ मदर्थेनिहतोभर्त्ता त्वयानिःशंकयायतः ॥ ततोहंनान्तरंदाझि तवभीरुशुभानने ॥ राक्षस्युवाच ॥ वि-
श्वस्तहननेब्रह्मन् ब्रह्महत्यागतिर्भवेत् ॥ यद्यप्येवंराक्षसींमां क्रूरांपतिविघातिनीं ॥ मन्यसेनहितत्कर्म विश्वस्तंकाचघातयेत ॥ द-
ग्धाहंपतिनाविप्र इमामाहरतापुरा ॥ भार्यार्थंपापिनाब्रह्मन् तेनव्यापादितोमया ॥ विश्वस्तोसियतस्त्वंहि ममसर्वेणचेतसा ॥
ततस्त्वंगोपयिष्येहं सर्वभावेनकामुक ॥ एषतेसमयःसत्यं पञ्चभूतोपसाक्षिकः ॥ हृत्पद्मपुरुषस्येह सन्निधौव्याहृतंमया ॥ नकुरु- ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्वद्विजश्रेष्ठ अन्यदासविदंकचित् ॥ स्थैर्यकार्यंहिमद्वाक्ये सर्वकृत्येषुमानद ॥ तच्छ्रुत्वावचनंदेवी राक्षसीपरिभाषितं ॥ प्रति-
वाक्येवचःसर्वं यदुक्तंहितयातदा ॥ ततःसाराक्षसीसर्वं संहृत्यचगुहाधनं ॥ करेणुरूपिणीभूत्वा पृष्ठेकृत्वापतिंमम ॥ तयासहवि-
शालाक्ष्या याहृताशिवमन्दिरात् ॥ काशीशतनयालोके प्रख्यातारत्नग्रन्थिका ॥ सुखयानाहियाभूत्वा उवाहपतिमंजसा ॥ तृती-
येनमुहुर्त्तेन संप्राप्ताशंकरालयं ॥ उवाचतांपुरींप्राप्य भर्त्तारमसितेक्षणा ॥ इयंपापमतांकान्त कुठारीसंप्रकीर्त्तिता ॥ तथेयंभव-
गेहस्य चित्रभानुःप्रकीर्तितः ॥ साभूमिःकाञ्चनस्यैषा कान्तप्राप्तवुरोदरं ॥ कर्मवीजोपराज्येषा सर्वेषांसुखदायिनी ॥ आद्यंहिवै-
ष्णवंस्थानं पुराणेपरिपठ्यते ॥ नावैष्णवेभवेन्मुक्तिः सर्वेणाध्युषितेपिच ॥ हत्याविमुक्तोदेवेशो यदासित्रिपुरान्तकः ॥ क्षत्रप्रवि-
ष्टमात्रोपि वैष्णवेपापनाशने ॥ तदाहरेणदेवेशः प्रार्थितोदैत्यसूदनः ॥ सीमायांतिष्ठतोदेव वहिर्हत्यास्थितामम ॥ वस्तुमि-
च्छाम्यहंक्षेत्रे तवचक्रगदाधर ॥ सत्वयामेजगन्नाथ देहिक्षेत्रेसदेवमे ॥ ममनिर्गमनेहत्या पुनरेवप्रवर्त्तते ॥ त्वत्क्षेत्रपावितोह्यद्य
प्रजांयास्येजगत्त्रये ॥ तथेतिप्रददौदेवः क्षीरसागरजाप्रियः ॥ ततःप्रभृतिविप्रेन्द्र क्षेत्रंशैवन्निगद्यते ॥ आद्यंहिकेशवक्षेत्रं पुराणे-
कवयोविदुः ॥ तत्रधर्मादयोदेवाः पश्यन्तेतांविहायसा ॥ सूर्यायुतसमप्रख्यां दिगंबरनिषेवितां ॥ विघ्नानिशूलिनाकान्त हता-
न्यन्यानिषेवने ॥ येर्विघ्नैरावृतामर्त्या यान्तिवैमन्दिरंस्वकं ॥ बहुपुण्यभृतःसन्ति वसन्त्यस्यांद्विजोत्तम ॥ तत्राशितैर्नरैःकान्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितिःकार्यापुरोत्तमे ॥ नात्रस्नानंप्रशंसन्ति नमौनंनसुरार्चनं ॥ नापिमानंद्विजश्रेष्ठ प्राणत्यागमृतेविभो ॥ मृत्युंप्राप्यतुकाश्यांवै कृतकृत्योभवेन्नरः ॥ अविधेयेतुमनसि उपायोकोषमुक्तये ॥ सेयंपुरीमयाप्राप्ता बहुप्राकारतोरणा ॥ भोगिनामपिमोक्षाय किंपुनर्व्रतचारिणां ॥ सेयंपुरीपापहरा नाम्नावाराणसीविभो ॥ रत्नावल्याःपिताविप्र काशिराजःप्रतापवान् ॥ अधिपोत्रमहाबाहुर्धर्मज्ञः प्रियदर्शनः ॥ समर्पयेमांत्वंवालां काशीशस्यमहात्मनः ॥ विपोथिताहियापूर्वं तेनदुष्टेनरक्षशा ॥ आत्मनःसुरतार्थाय कुमारीनिर्दयाहृता ॥ एषप्रभावोभिहितः शिवक्षेत्रस्यसत्तम ॥ नवधूतीहकर्माणि योवसेदत्रमानवः ॥ शुभाशुभप्रभूतानि ज्ञानतोज्ञानतोपिवा ॥ एषापुरीकर्मविनाशनाय कृष्णेनसर्वेणविनिर्मिताभूत् ॥ यस्यांमृतावन्धुवहिःकृतावा नतेपुनर्यान्तिभवंसपापा ॥ ५७ ॥

इतिश्री लघुनारदीयपुराणे रुक्मांगदचरिते काष्ठीलोपाख्याने काशीमाहात्म्यंनाम त्रिंशोध्यायः ॥ ३० ॥ छ छ छ

काष्ठीलोवाच ॥ भर्त्तामेतद्वचःश्रूत्वा राक्षस्याधर्मसंहितं ॥ अवतीर्यतयासार्द्धं रत्नावल्याशुभानने ॥ अवतीर्णेचमेकान्ते वभूव प्रमदावधूः ॥ क्षपाचरीसुरूपातु पीनोन्नतपयोधरा ॥ साकुमारीपुनर्दृष्ट्वा स्वपितुस्तत्पुरंशुभं ॥ वभूवानन्दितातत्र रात्रौप्राप्ताशुभान्विता ॥ अथाजग्मूनिशीथेतु रक्षपालामहावलाः ॥ प्रस्खलंतोथधावंतो वन्धतश्चतथापरे ॥ कोलाहलंप्रकुर्वंतो भर्त्तारंप्रतिमे नघे ॥ तांदृष्ट्वासहसाप्राप्ता कुमारीसाशुभानना ॥ काशिराजस्यदुहिता संप्राप्तामत्तगामिनि ॥ रात्रीचरानुवाचेदं अहंनृपसुते-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिच ॥ निचयैस्तंवृतंशूरैर्दष्ट्वामुख्यमुवाचसा ॥ ब्रूहितंसत्वरंगत्वा पितरंमेजनाधिपं ॥ रत्नावलीतवसुता याहृतांतत्पुरात्पुरा ॥ र-
क्षसादुष्टभावेन संप्राप्तासाद्विजानृप ॥ अदूषिताजीवमाना समाश्वासिहिमाशुच ॥ संमुखंयाहितस्यास्त्वं मानसंवर्द्धनंकुरु ॥ ब्रा-
ह्मणस्यमहाभाग अर्घपात्रपुरस्कृतः ॥ देवानतकृतौमूर्द्ध्नि चरणौशत्रुभिर्नृप ॥ नावलीढंहविर्ध्वांक्षै शाशनेनगतास्रजः ॥ स्वाभि-
र्न्निपीतंनृपतेः पञ्चगव्यंतवेप्सितं ॥ अविप्लुतांहिसंप्राप्ता गंगांभइवनिर्मलां ॥ तवप्रसादाद्राजेन्द्र जनन्याःशुद्धिकारिणी ॥ त-
त्क्षणात्सवचःश्रूत्वा रक्षपालस्त्वरान्वितः ॥ सुबाहुरितिविख्यातः प्रविवेशनृपक्षयं ॥ सर्वतःश्रावयामास बाक्यंवाक्यविशारदः ॥
तदद्भुततमंश्रूत्वा निशापालस्यभाषितं ॥ सामात्यसकलत्रश्च सपुरोधाययोनृप; ॥ सतुगत्वापुरद्वारं गंगातीरेव्यवस्थितां ॥ अप
श्यत्सदुहितरं द्विजवर्यसमीपतः ॥ सहजेनैववेषेण भूषितांभूषणप्रियां ॥ अम्लानकुसुमितान्दिव्यां तप्तकाञ्चनसुप्रभां ॥ रोरूयमा-
नापितरं साचैवपरिषस्वजे ॥ चिरंरुदित्वापितरं ववन्देचरणौपितुः ॥ शिरसाचारुसर्वांगी द्विरेफसदृशेनहि ॥ कामायुधनिगू-
ढेन मृदुनाकनकप्रभे ॥ सानमस्कृत्यपितरं इदंवचनमब्रवीत् ॥ सुप्ताहंमन्दिरेतात सखीभिःपरिवारिता ॥ कृत्वाप्रान्तेशिरस्तात
अधोतचरणातथा ॥ गच्छवंतीनृपंयोगं निजार्थेरक्षसाहृता ॥ नीताश्मशानमध्यंतेन स्वक्षमाधरमध्यगं ॥ मामुद्धर्तुमिच्छवै चक्रेहृ-
दयपीडितः ॥ नह्रिमांप्राप्तवान्राजन्शूद्रावेदश्रुतीमिव ॥ तस्याभार्यात्वियंसुश्रूर्यातिष्ठतितवाग्रतः ॥ विश्रुतीमाङ्घरूपं राक्षसीरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षसाप्रिया ॥ अनयाबुद्धियोगेन घातितोसौमहाबलः ॥ शक्त्याकुलिशहस्तस्य रौद्रयानृपपुंगव ॥ तत्रैवब्राह्मणःपूर्वं समायातो
भवन्किल ॥ शालवृक्षसमाश्रित्य स्वपन्तस्थौमहामतिः ॥ इयंचनिकृतातेन दुष्टभावेनरक्षसा ॥ सापत्न्यकोतुनिर्विण्णा प्रेषिता-
तेनचांतिकं ॥ ब्राह्मणानयनेभूप ततोपश्यतवैद्विजं ॥ रूपयौवनसंपन्नमभवद्धृक्षयान्विता ॥ पतिमेनंद्विजंकृत्वा स्वपतिंचनि-
हत्यवै ॥ भूत्वाकरेणूराजेन्द्र कृत्वामांपृष्ठतःशुभा ॥ सरत्नासद्विजाप्राप्ता तवभूपालवैपुरीं ॥ अनयारक्षितातस्माद्राक्षस्याराक्षसा-
धमात् ॥ तामिमांपूजयस्वेह सत्कारेणमहीपते ॥ ब्राह्मणंचमहाभागं सत्कुरुस्वममाध्वे ॥ अस्यामतेनमान्देहि विप्रायास्मैम-
हामते ॥ एषमेसम्मतोभर्त्ता भविष्यतिनसंशयः ॥ तथाचश्रूयतेलोके पुराणेसुमहामते ॥ नान्यस्यविहितंरूप नान्योभोक्तुमि-
हार्हसि ॥ यद्यस्यविहितंलोके तस्यचोपनयेत्सदा ॥ साधिलापेतनाचित्तमेतंप्रतिजनाधिप ॥ धर्मतस्तुपतिर्ग्राह्यो भवेद्वैराजस-
त्तम ॥ नान्यंकरोमिभर्त्तारं शास्त्रागमनिदर्शनात् ॥ इमांप्रसादयित्वात्वां खद्योतकक्षयकारिणीं ॥ देहिमांनृपतिश्रेष्ठ ब्राह्मणायम-
हात्मने ॥ सुरूपोयंगुणाश्चायमुत्पन्नश्चमहाकुले ॥ तस्माद्विशंकांकुरुमां राजेन्द्रसुमहामते ॥ तद्वाक्यंनृपतिःश्रुत्वा दुहितुर्द्धर्मवि-
त्तदा ॥ राक्षसीपूजयामास अक्षयावनतस्तदा ॥ एषासुतामेसुभगा त्वामेवशरणंगता ॥ यदर्थेनिहतःशत्रु स्त्वयापूर्वतरःकिल ॥
कामबाणार्त्तयाभीरु कृतमेतद्विगर्हितम् ॥ सेयमिच्छतिभर्त्तारं योयंविप्रस्त्वयाततः ॥ शरणंतेप्रपन्नास्मि त्राहिमांत्वांवरानने ॥ म- ॥ ९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यात्प्रणाममावाभ्यां सत्कृतासिनिशाचरि ॥ अनुवेदयभर्त्तारं भूसुरंशुभरूपिणं ॥ त्वद्वाक्याद्भवतिप्रेरव्या सुतामेब्राह्मणस्यहि ॥ सापत्न्यभावंत्यक्त्वात्वं मत्सुतांपरिपालय ॥ ममचैवसुतायाश्च देशस्यस्वजनस्यच ॥ ईश्वरीत्वंमहाभागे कुरुवाक्यंममानघे ॥ तववाक्येस्थिताह्येषा स्थास्यतेतनयामम ॥ एतच्छ्रुत्वातुवचनं काशीशस्यनिशाचरी ॥ अनुजज्ञेतदाविप्रं नृपंसद्भावसंयुतं ॥ यस्मात्वंप्रणतोराजन्‌ सद्भावेनगतत्रये ॥ तस्मादेषासुताभार्या भवत्वस्यद्विजन्मनः ॥ अहंचभवतापूज्या कृत्वार्चांदेवमन्दिरं ॥ सर्वेणनगरेणाहं पूजनीयामहीपते ॥ सर्वदेहेनचतथा गवाम्बाप्यातथानघ ॥ सप्ताहमुत्सवंकार्यमष्टम्यादींचतुर्दशीं ॥ नटनर्त्तकसंयुक्तो गीतवाद्यसमन्वितः ॥ मैरेयमांससहितो बलिपूजामुपस्करः ॥ एवंप्रकुर्वतस्तुभ्यं सर्वक्षेमंभविष्यति ॥ तथेतिनृपतिःप्राह सुताहेतोर्वरानने ॥ प्रतिपन्नेतुवचने राक्षसीहृष्टमानसा ॥ तदाहब्राह्मणंप्रेम्णा इमामुद्वाहयप्रभो ॥ राजपुत्रींद्विजश्रेष्ठ गृह्योक्तविधिनाशुभां ॥ त्यक्त्वेर्ष्याहंद्विजश्रेष्ठ स्वसेयंमेवरानने ॥ राक्षस्यावचनेनासौ तांतदानृपकन्यकां ॥ उद्वाहयामासतदा भर्त्तामेसमलंकृतां ॥ गार्ह्येणविधिनासुभ्रु बहुवित्तसमन्वितां ॥ उद्वाहयित्वाकन्यांतु नृपेशतनयातदा ॥ आजगामाथविप्रेन्द्रः स्वपुरंस्वमहोदरं ॥ वेगेनासावूह्यमानो राक्षस्यावायुवेगया ॥ सरत्ननिचयोपेतः क्षणेनवरवर्णिनि ॥ गतेपुरंस्वकंविप्रे काशिराजःप्रतापवान्‌ ॥ प्रस्थापयामाससुतां परिवारेणसंयुतां ॥ दासीदासैश्चयानैश्च गोमहिष्यादिभिस्तथा ॥ वसनाभूषणैश्चैव समेतांचा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुहासिनीं ॥ तामागतांनिरीक्षैव मुमुदेब्राह्मणर्षभः ॥ रेमेसचतयापत्न्या राजपुत्र्यासुरूपया ॥ राक्षस्यावयसासार्द्धं सुकृतीनं-
दनेयथा ॥ ततोमयाश्रुतादेवि भर्त्तावैभूतिराहृता ॥ धनेशस्याक्षयाद्देवी द्रव्यसंपत्तथैवसा ॥ तमागतमहंश्रुत्वा भार्याद्वयसम-
न्वितं ॥ दुःखेनमहताविष्टा चिन्तयामिसुचेष्टितं ॥ ततोहंवन्धुवर्गेण सखीवर्गेणनिन्दिता ॥ रूक्ष्यैर्वाक्यैःसुवहुशो मर्मच्छेदकरै-
स्तथा ॥ कथंद्रक्ष्यसिभर्त्तारं धनलुब्धेश्रियान्वितं ॥ यत्वयाभर्त्सितःपूर्वंयाचान्वित्तंसुदीनवत ॥ अवज्ञायचयद्दुष्टे परित्यज्यइहा-
गता ॥ चञ्चलानीहवित्तानि पैतृकानीहयोषितां ॥ कांतेनोपार्जितानीह स्थिराण्येवभवंतिहि ॥ कथंयास्यसिदुर्वुद्धे पुनस्तद्भर्तृ
मंदिरं ॥ कथंवदेथाःकठिते वचनात्प्रमदारितं ॥ भविष्यतिकथंकीदृक् तस्यसंभाषणात्तव ॥ अङ्गश्लेषंकथंभीरु करिष्यासिवदस्व-
नः ॥ रूक्षवाक्यकुठारैस्तु घातितस्यमहात्मनः ॥ प्रवेशोहिगृहेतस्य दुष्करंप्रतिभातिनः ॥ नभर्त्रासहसंवास स्तवभीरुकदाचन ॥
भविष्यतिदुराचारे सुखदंचकदाचन ॥ दाक्षिण्यालोकवादाच्च यदिहित्वांनयिष्यति ॥ स्नेहेनरहितःकान्तस्तथाप्यसुखसेवते ॥
निस्नेहसंगमोलोके पशुनामिवकिंसुखं ॥ नहीदृशंदुःखतरं यादृशंदूनचित्तयोः ॥ दंपत्याःसंगमंवाले विलम्वकरणंमहत् ॥ एवं
वहुविधावाचः शृण्वतीस्वजनेरिता ॥ अधोमुखीचपूर्णाक्षी पृथिवीमवलोकयन् ॥ चिंतयालंकृतितदा सर्वलोपेननश्यति ॥ नद-
त्तंवलयंत्वेकं येनतुष्टिर्व्रजत्पतिः ॥ नचापिनूपुरंदत्तं नचापिकटिसूत्रकं ॥ वसुमत्यामयातस्य नदत्तैकावराटिका ॥ धनजीवित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योऽस्वामी भर्त्तालोकेषुगीयते ॥ अपह्नवंहितत्कृत्वा कामेवस्थाभविष्यति ॥ कथंयास्यामितद्वेश्म किंवदिष्यामितस्यहि ॥ यो-
मयाहिपुरात्यक्तः शिरोभ्रलोष्टकोयथा ॥ एवंहिचिंतयेयावद्धृदयेनवरानने ॥ संवृतावन्धुवर्गेण तावद्दोलासमागता ॥ छादितार-
क्तवस्त्रैश्चह्युपपन्नासुकोमलैः ॥ पीवरैपुरुषैश्चापि भज्यमानात्रराननने ॥ वेत्रजर्ज्जरहस्तैश्च वृद्धैःपुंभिःसमावृता ॥ छत्रेणशशिवर्णेन
धृयमाणेनभासुरा ॥ अथागत्यमहाभागे भर्त्रामेप्रेषितस्तदा ॥ तसंप्राप्यतदासर्वे पुरुषावाक्यकोविदाः ॥ ऊचुःसंहृष्टमनसो दि-
ष्ट्यादिष्ट्येतिचासकृत् ॥ सवित्तःसकलत्रश्च भर्त्ताप्राप्तस्तवानघे ॥ गिरिपृष्ठालयात्सुभ्रु धनमानीतवान्बहु ॥ प्रविष्टस्वगृहंभद्रे प्रे-
षितावयमत्राहि ॥ त्वामानेतुंवरारोहे संस्थितांपितृवेश्मनि ॥ भोजनंत्वमकृत्वावै भर्त्तारंपश्यभाविनि ॥ त्वामेवस्मरतेनित्यं का-
न्तस्तेचारुहासिनि ॥ तेषांतद्वचनंश्रुत्वा भर्तुश्चापिकृतज्ञतां ॥ व्रीडिताहंतदादेवि भर्तुःसंवीक्ष्यचेष्टितं ॥ नोत्तरंदत्तवत्यस्मि किंचि-
न्मौनसमन्विता ॥ ततोहंवन्धुवर्गेण भूयोभूयःप्रबोधिता ॥ आहूतायातुवैभर्त्ता क्षीनयातित्वरान्विता ॥ साध्वांक्षीजायतेपुत्रि
दशजन्मानिपञ्चच ॥ एवमुक्त्वातुमांसुभ्रु वन्धुवर्गस्त्वरान्वितः ॥ दोलामारोपयमास गम्यतामविलंविताः ॥ ततोहिवन्धुवाक्येन
तांदोलांमन्दगामिनि ॥ आरुह्यगमनंतत्र यत्रतिष्ठतिमेपतिः ॥ अवतीर्यगृहंयावत् प्रविशामिशुचिस्मिते ॥ अपश्यंहिगृहंतस्य
सर्वतःकाञ्चनावृतं ॥ आशनंशयनंभाण्डं यत्किंचिद्वेश्ममध्यतः ॥ तत्सर्वंकाञ्चनीभूतं सूर्यतेजोपबृंहितं ॥ ततःसाराक्षसीदेवि सा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 चापिनृपनन्दिनी ॥ प्रणम्यमांस्थितादेवि उभेभक्तिसमन्विते ॥ ततस्ताभ्यामहंप्रेम्णा यथाहमभिपूजिता ॥ स्नानासुभक्तमुदि-
 ता भर्त्रास्नेहेनवीक्षिता ॥ ततोऽस्तसमयेभर्त्ता समाहूयेदमब्रवीत ॥ गाढमालिंग्यसस्नेहात् पर्यंकेसंन्यवेशयत् ॥ प्रवेश्यमांनतोभीरु
भर्त्तामेशुभदर्शनः ॥ विभावरीचर्रीप्राहतांचराजेन्द्रनन्दिनीं ॥ पादसंवाहनंत्वस्याःकर्त्तव्यंसर्वदैवहि ॥ ममेष्टेयंसुचार्वंगीज्येष्ठाभार्या
सुशोभना ॥ मुहूर्त्तंवचनात्ताभ्यां गृहीतौचरणौमम ॥ ततःप्रेष्यान्समाहूय भर्त्तामेचारुलोचने ॥ अब्रवीत्सतदाहृष्टः सर्वमानीयतां
धनं ॥ यत्किञ्चितपृथिवीलब्धं मयाप्राप्तंमहद्धनं ॥ नृपेणापिचयद्दत्तं विवाहेममकिंकराः ॥ आनीयतांचतत्सर्वं शीघ्रमेवमहाबलाः ॥
इयंहिस्वामिनीप्राप्ता वित्तस्यममचैवहि ॥ तद्वाक्यात्सत्वरंप्रेष्यैः समानीतंधनंशुभे ॥ तत्सर्वंतेनमेदेवि प्रदत्तंहिसुलोचने ॥ रत्नैर्व-
स्त्रैश्चमांपूज्य शान्तयित्वापुनःपुनः ॥ उभाभ्यांसतदासुभ्रु समक्षंपरिषस्वजे ॥ तदद्भुततमंदृष्ट्वा सन्मानंचारुहासिनि ॥ बस्त्रालं-
कारदानंच व्याकुलाहंतदाभवत् ॥ तेनातिमानेनमम गताःप्राणावरानने ॥ भर्त्राचालिंगिताभद्रे मधुरंजल्पतातदा ॥ उल्लापितो
वहुविधं हृदयेन्यस्यमच्छिरः ॥ मृताहंचपलापांगि यमस्यसदनंगता ॥ ततोऽहंयमनिर्दिष्टां प्राप्तानरकयातनां ॥ तामतीत्यसु-
दुःखार्त्ता काष्ठीलात्वंभवाशुभे ॥ यास्याभिपुनरेवाहं तिर्यग्योनिंसहस्रशः ॥ इमामवस्थामद्यापि ययामेनात्रमन्यते ॥ नारीयाति
महाभागे सत्यमेतत्तवोदितं ॥ याभर्तुर्गोपयेद्वित्तं जीवितंवाशुभानने ॥ एवंज्ञात्वाकुर्वंशेत धनंजीवितमेवच ॥ नानाप्रकारगन्नर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कान्सुघोरान् प्रयातिनारीसुभगेसुरूपो ॥ यारक्षतेवित्तमथात्मजीवितं भर्तुर्महापापतरान्नृणांसा ॥ १०७ ॥ इतिश्री लघुनारदीय पुराणे रुक्माङ्गदचरिते काष्ठीलोपाख्याने एकत्रिंशोध्यायः ॥ ३१ ॥ ॐ ॐ ॐ ॐ ॐ ॐ ॐ ॐ
सन्ध्यावल्युवाच ॥ जातोमेविस्मयोत्यर्थं काष्ठीलेवचनात्तव ॥ कथंदृष्टामयाभद्रे यास्त्वसेकुत्सितांगतिम् ॥ कर्मणाकेनमुक्तिस्ते काष्ठीलेवदमाचिरम् ॥ दयामेवर्ततेत्यर्थं त्वांदृष्ट्वादुःखितामिह ॥ मांसपिण्डोपमामद्य नवनीतनिभांतथा ॥ काष्ठीलोवाच ॥ दानंपृथिव्यायदिमे परिकल्पयसेशुभे ॥ तथापिनहिमेशुद्धिर्विनाविष्णोस्तुवासरात् ॥ संप्राप्तेमाघमासेतु तपस्विजनवल्लभे ॥ यस्मिन्क्रोशन्तिपापानि यावद्गच्छतिभास्करे ॥ पुरातिसर्वपापानि त्रिविधानिनसंशयः ॥ ब्रह्महत्यादिकानस्युर्माघस्नानकृतादिह ॥ दुर्लभोमाघमासस्तु बहुपुण्यप्रदस्तथा ॥ देवैस्तेजःपरिक्षिप्तं माघमासेजलेसदा ॥ अतःपवित्रंतद्वारिह्यशेषाघौघनाशनं ॥ नेदृशी शंकरेमुक्तिर्गतिःप्राप्तासुखावहा ॥ यादृशीमाघमासेच प्राप्यतेनियमस्थितैः ॥ सरिन्निर्झरतोयेषु शस्तंस्नानंसुलोचने । वापीकूप तडागेषु मध्यमंसमुदाहृतं ॥ गृहस्नानंमाघमासे कार्यंश्रेयोर्थिनाशुभे ॥ प्रातस्नानंसुशीतेन शस्तंकल्मषनाशनं ॥ नसौख्याद्भवतेपुण्यं पुण्यंक्लेशात्प्रवर्त्तते ॥ नवह्निसेवयेत्प्रातः श्रेयोर्थीवरवर्णिनि ॥ मोहार्थंसेवयेद्वह्निं नसुखार्थंकदाचन ॥ यावत्प्रभावरारोहे तावत्सूर्योदयःस्मृतः ॥ अभ्रेणाच्छादितःसूर्यः कदाचिन्नहिदृश्यते ॥ नभवेन्नोदितोदेवि एवंप्रातर्विधीयते ॥ सक्तितामप्यभावेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवकुंभस्थितंजलं ॥ वायुनाताडितोरात्रौ गङ्गास्नानसमंविदुः ॥ माघस्नानेवरारोहे दुर्गतिर्नेहविद्यते ॥ माघस्नानंवरारोहे शस्तंवै
निम्नगाजलं ॥ वायुनाताडितंरात्रौ यत्नस्नानाद्विशोधयेत् ॥ अग्निप्रवेशादधिकं माघेस्नानंवरानने ॥ स्नातानांक्लेशमात्रंतु मृता-
नामक्षयंसुखं ॥ एतस्मात्कारणात्सुभ्रु माघस्नानंविशिष्यते ॥ अहन्यहनिदातव्यास्तिलाःशर्करयासह ॥ पावकेचैवहोतव्यास्ति-
लाःसर्पिसमन्विताः ॥ माघावसानेसुभगे यत्रसंभोजयेद्द्विजान् ॥ भोजयेच्चपलापांगि व्रतस्यपरिपूर्त्तये ॥ स्वयंमेप्रीयतांदेवो
विष्णुमूर्त्तिर्निरञ्जनः ॥ दंपत्योर्वाससीशुक्ले सप्तधान्यमथापिवा ॥ त्रिंशच्चमोदकादेया कृतास्तिलमयाःशुभे ॥ भागमेकंशर्कराया-
स्तिलभागत्रयंतथा ॥ नागरंवेत्रचैलश्च प्रक्षिपेत्तत्रभाविनि ॥ मरीचिसंमितांकृत्वा ब्राह्मणेभ्यःप्रदापयेत् ॥ अभ्यंगंवर्जयित्वातु
माघंनयतियोनरः ॥ स्नानंकरोतिसुभगे प्रातरेवसमाहितः ॥ तस्यैषाविधिरुद्दिष्टश्चार्घ्यःपापभयापहः ॥ ब्राह्मणप्रार्थनेमंत्रद्वयंदे-
विनिगद्यते ॥ सर्वपापप्रशमनं श्रद्दधानस्यभाविनि ॥ सर्वतःप्रसवस्येह परंधामजलेमम ॥ त्वत्तेजसापरिभ्रष्टं पापंयातुसहस्र-
धा ॥ दिवाकरजगन्नाथ प्रभाकरनमोस्तुते ॥ परिपूर्णंकुरुष्वेदं माघस्नानंममाच्युत ॥ एवंस्नात्वानरोयाति भित्वाविंबंरवेःशुभं ॥
मोक्षमार्गेवरारोहे माघस्नानात्प्रकीर्त्तितः ॥ एवंविधोमाघमासस्तपस्विजनवल्लभः ॥ तस्यपक्षेतुशुक्लेतु भवत्येकादशीयदा ॥
सूर्यऋक्षेणसंयुक्ता महापातकनाशिनी ॥ विनापिऋक्षसंयोगाद्पोष्याकृष्णतुष्टिदा ॥ भीमोनाममहावीर्यः कौरवाणांयशस्क-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रः ॥ औदरेण।मेना चार्त्त ह्युपवासेह्यथाक्षमः ॥ सत्राप्येतांमहापुण्या मुपोष्यांतिमहाफलां ॥ ततःप्रभृतिभीमस्य नाम्नाख्याता-
भविष्यति ॥ एषापुण्यामहाभागे प्राणिनांपुण्यवर्द्धिनी ॥ विनिहन्तिमहत्पापं कुनृपोविषयंतथा ॥ कुपुत्रस्तुकुलंयद्वत् कु-
भार्याचपतिंयथा ॥ अधर्मश्चयथाधर्मं कुमंत्रिश्चयथानृपं ॥ कुज्ञानंचयथाज्ञानं शौचंचाशुचितायथा ॥ असद्वादश्चसद्वा-
दं सत्यंचैवानृतंयथा ॥ हिमंयथोष्णसमयेदनर्थश्चार्थसंचयं ॥ यथाप्रकीर्त्तनाद्दानं तपोवैविस्मयाद्यथा ॥ अशिक्षयाय-
थापुत्रो गावोदूरगतोयथा ॥ संहतेनयथाश्राद्धं यथावित्तमवर्द्धनात् ॥ यथासमीहनाज्ज्ञानं फलानांबरवर्णिनि ॥ तथैवपापसं-
घानां प्रोक्तेयंद्वादशीशुभे ॥ ब्रह्महत्यासुरापानं स्तेयंगुर्वङ्गनागमः ॥ युगपत्सुपपन्नाहि हन्यात्ता।निचपुष्करं ॥ नचापिनैमिषं-
चैव क्षेत्रंकौरवसंज्ञितं ॥ प्रभाषंनगयादेवि नरेवानसरस्वती ॥ कालिन्दीयमुनाचैव देविकानकथंचन ॥ नचान्यत्तीर्थसंघातो
देवितुल्योहरेर्दिनात् ॥ नदानंनजपोहोमो नचान्यत्सुकृतंक्वचित् ॥ नालंशुभेपावनाय मुक्त्वैकंहरिवासरं ॥ सकृच्चोपोषणेनास्या
नश्यन्तेपापराशयः ॥ एकतःपृथिवीदानमेकतोहरिवासरः ॥ तन्नास्तित्रिषुलोकेषु सुकृतंकिंचनप्रिये ॥ यत्समंद्वादशीपुण्यं पुरा-
णकविभिःस्मृतं ॥ तस्यांबराहवपुषं कृत्वादेवंतुहाटकं ॥ घटोपरिनवेपात्रे कृत्वावैताम्रभाजने ॥ दृढवीजभृतेदेवि सितवस्त्रावगुण्ठि-
ते ॥ सहिरण्यप्रदीपाद्ये कृतपुष्पवतंसके ॥ बराहायनमःपादौ क्रोडायेतिनमःकटिं ॥ नाभिंगंभीरघोषाय उरःश्रीवत्सधारिणे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाहुसहस्रशिरसे ग्रीवांसर्वेश्वरायच ॥ मुखंसर्वात्मनेपूज्यं ललाटंसुभ्रुवेनमः ॥ केशाःशतमखायेति पूज्यादेवस्यचक्रिणः ॥ वि-
धिनापूजयित्वातु कृत्वाजागरणंतथा ॥ श्रुत्वापुराणंदेवस्य महात्म्यंप्रतिपादकं ॥ प्रातर्विप्रायदत्वातु वैष्णवायकुटुंबिने ॥ तंकुं-
भंकोलसहितं सनैवेद्यपरिच्छदं ॥ पश्चात्तुपारणंकुर्यान्नातितृप्त्यासुहृद्वृतः ॥ एवंकृतेबरारोहे नभूयस्तेभवोभवेत् ॥ बहुजन्मार्जितं-
पापं ज्ञानाज्ञानसमुद्भवं ॥ हन्तिसर्वमशेषेण तमःसूर्योदयेयथा ॥ एवंविधामयादेवि वर्णिताद्वादशीशुभा ॥ त्वयाचापिकृतापू-
र्वमन्यजन्मनिभाविनि ॥ तस्येयंव्युष्टिरतुला तवदेविमहाफला ॥ त्वयाचापिकृतापूर्वे विजयाःसर्वदाशुभे ॥ तस्यास्तुषोडशंभा-
गंददस्वसुकृतामम ॥ येनपूतागमिष्यामि तद्धामपरमंहरेः ॥ वित्तापहरजंपापं यद्भर्तुस्तुकृतंमया ॥ तस्यभावेनहेत्वर्थं षोडशांशं
प्रयच्छमे ॥ जीवितेनाथवित्तेन भर्तारंमुञ्चयेत्तुया ॥ कृमियोनिशतंगत्वा पुष्कलीजायतेततः ॥ शरीरंवाथचित्तंवा यानारीवर-
वर्णिनि ॥ नप्रयच्छतिदुर्मेधा साभवेत्काष्ठकीटका ॥ तत्कर्मणोविशुध्यर्थं देविद्वादशिसंभवं ॥ पुण्यंपुण्यभृतांश्रेष्ठे यद्यस्तिमयि-
तेप्रिया ॥ तस्यास्तद्वचनंश्रुत्वा कृपणायाःपुनःपुनः ॥ कृपामवापसुभगे तामेवाचमिदंतदा ॥ दत्तंमयातेसुकृतं द्वादश्युत्थमनंत-
कं ॥ कोलरूपीहरिर्यत्र पूजितोमेसुपुण्यदः ॥ यच्चयक्रोडकोशंतु कल्पितंसुकृतंमया ॥ तुरीयांशेनपुण्यस्य भवपूताममाद्यवै ॥ ॥ ९९ ॥ पू-
र्वजन्मानिरौद्रस्य त्रिवारंबरवर्णिनि ॥ एवमुक्तेतुवचने शतह्रदसमप्रभा ॥ गगनस्थामयादृष्टा गच्छन्तींवैष्णवींपुरीं ॥ पतिर्हि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवतंलोके स्त्रीणांतुगजगामिनि ॥ देहेनचतथावित्तैर्याइच्छत्युत्तमांगतिं ॥ सत्यवादिप्रदास्यामि भर्तुरर्थंयथेप्सितं ॥ तवमोहिनि चार्वंगि नमृषाप्रब्रवीम्यहं ॥ कोन्योहिदेवतालोके स्त्रीणांसम्यगभातिन ॥ तस्यार्थेयात्यजेद्वित्तं जीवितंवावरानने ॥ तस्यपुण्यस्यसंख्यानं नास्तिदेविकदाचन ॥ तस्माद्भर्तुःप्रियंकार्यं प्राणैरपिधनैरपि ॥ उद्वाहितंविप्रसुतंसुनिष्ठुरं ग्रस्तंतदातद्वचनैःसुघोरैः ॥ धनार्थिनातेनचयाचितासा लोकार्थिनासागृहमाससाद ॥ हित्वापिदेहंविमलंस्वरूपं यातापिकाष्ठचतथैवकीटा ॥ एतन्मयादृष्टमनंगयष्टे पितुर्गृहेविचरंत्यायथेष्टं ॥ ज्ञात्वेतिहासंसुभगेसुकेशि भार्याचभर्तुःप्रियमेवकर्त्ता ॥ तस्मात्त्वांकामयेसुभ्रु भर्तुरर्थेप्रसीदमे ॥ व्रतभंगंमाकुरुष्व भर्तुर्मेबरवर्णिनि ॥ धर्मज्ञात्वंकुलीनाथ त्वंभीरुशुभदर्शना ॥ अनार्यायाःस्त्रियोलोके भर्तुःसुखकराहिताः ॥ सुवृत्तयाःकुलीनाया वृत्तमेवशुभानने ॥ वरंत्वमन्यंवृणुतोनृपस्य धर्मोपघातायभवेन्नसुभ्रु ॥ एवंकृतेमेवचनंकृतंस्याद्भर्तुस्तथाह्लादकरीभवेततु ॥ इत्थंनिशम्याथवचोवभाषे विमोहिनीक्रोधविरक्तदृष्टिः ॥ सन्ध्यावलींतांसविशुद्धभावां निरीक्ष्यमाणां वचनंसुतस्य ॥ ७५ ॥ इतिश्री नारदीयपुराणे मोहिनीवाक्यनाम द्वात्रिंशोध्यायः ॥ ३२ ॥ समाप्तमिदं काष्ठीलोपाख्यानं ॥ मोहिन्युवाच ॥ यद्येवंत्वंविजानासि धर्माधर्मविचक्षणे ॥ भर्तुरर्थेप्रदेहित्वं धर्मंजीवितमेवत्र ॥ याचयेयमहंयच्च जीविनादपिदुर्लभं ॥ देहिपुत्रशिरोमह्यं यदिष्टंहृदयाधिकं ॥ यदिशुक्तनवैराजा संप्राप्तेहरिवासरे ॥ गृहीत्वासिस्वहस्तेन राजायंरुक्मभूषणः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिरोधर्मांगदस्यैतच्चन्द्राबिंबोपमंशुभं ॥ अजातश्मश्रुकंकान्तं कुण्डलाभ्यांविभूषितं ॥ आच्छिनत्तुप्रहृष्टात्मा मुक्ताश्रुपरिवार्जितं ॥
परिपक्कफलंयद्वद्वृत्संगेपातयत्विह ॥ मामकेकृपणापांगि तवभर्त्तामहाबलः ॥ एतद्वैकृयतांसर्वं यद्याह्निनाह्निभोक्षते ॥ शार्ङ्गिणोहि
महाभागे सर्वपापप्रणाशने ॥ तच्छ्रुत्वावचनंतस्या मोहिन्याःकटुकाक्षरं ॥ चकम्पेतत्क्षणाद्देवी प्रवातेकदलीयथा ॥ संध्यावली
ततोधैर्यमालम्ब्यवरवर्णिनी ॥ उवाचमोहिनींवाक्यं साश्रुत्वाप्रहसन्निव ॥ श्रूयतेहिपुराणेषु गाथाःशुकसमीरिताः ॥ द्वादशीप्र-
तिमासेवै स्वर्गमोक्षप्रदाशुभा ॥ त्यजेद्धनंत्यजेद्दारान् जीवितंगृहमेववा ॥ त्यजेद्भूपंत्यजेद्देशं त्यजेन्मित्रंत्यजेद्गुरुं ॥ त्यजेत्तीर्थं
त्यजेद्यज्ञं त्यजेद्धर्मक्रियान्वितं ॥ त्यजेत्तपःसुघोरंच त्यजेत्सौख्यंसुविस्तरं ॥ त्यजेद्योगंत्यजेद्दानं त्यजेद्यन्यच्चसुप्रियं ॥ नत्यजेद्द्वा-
शींपुण्यां पक्षयोरुभयोरपि ॥ पुत्रभ्रातृसुहृद्बन्धु प्रियादारास्तथाधनं ॥ द्वादशीतिपुनर्देवि उभयोःसाधनीस्मृता ॥ द्वादश्यास्तु
प्रभावेण क्षेमंसर्वंभविष्यति ॥ करोमितवतुष्ट्यर्थं धर्मांगदविनाशनं ॥ विनष्टेतनयेमह्यं सुखिनीभवसुन्दरि ॥ नव्यावृष्यतिसत्या-
द्धि काञ्चनाद्वृदभूषणः ॥ सत्याच्च्युतोमनुष्यस्तु श्वपाकादधिकःस्मृतः ॥ इत्येवमुक्त्वाकनकावभासा विमोहिनींपङ्कजदेहजातां ॥
संगृह्यभर्तुश्चरणौसुजातौ सन्ध्यावलीचाभिरताव्रतस्थे ॥ १७ ॥ इतिश्री ल० ना० पु० रु० सन्ध्यावलीवाक्यं त्रयस्त्रींशोध्यायः ३३
वशिष्ठउवाच ॥ सन्ध्यावलीतथापादौ भर्तुःसंगृह्यभूतले ॥ उवाचवचनंदेवी धर्माङ्गदविनाशनं ॥ अनुशिष्टंबहुविधं मयाभूप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्वेयातथा ॥ नान्यद्रोचयतेसुश्रुमोहिनीमोहसंयुता ॥ भोजनंवाहरिदिने वधंवातनयस्यहि ॥ कुरुष्वराजन्धर्मज्ञ धर्मांगदवि-
नाशनं ॥ यादृशीतुजनन्यावै रुजाभवतिभूपते ॥ पुत्रस्यजननीतीव्रा तादृशीनभवेत्पितुः ॥ गर्भसंधारणेदुःखं भूपस्नेहोऽधिक-
स्तथा ॥ मातुर्भवतिभूपाल नतथाहिभवेत्पितुः ॥ जीवनिर्वापकःप्रोक्तः पिताराजेन्द्रभूतले ॥ जननीधारणेक्षीणा वर्द्धनेपालने
क्षमा ॥ पितुःशतगुणंप्रोक्तं कुर्यात्साहिसदानृप ॥ स्नेहाधिकांहिसंप्रेक्ष्य पुराणेकवयःपुरा ॥ जगुरत्यधिकांलोके जननींजनकात्त-
था ॥ नचतादृक्पितास्नेहं पुत्रप्रतिकरोतिवा ॥ यादृशंजननीलोके कुरुतेरुक्मभूषण ॥ साहंचाद्यगतस्नेहा परलोकजिगीषया ॥
पुत्रस्यनृपशार्दूल सत्यवाक्यानुपालनात् ॥ व्यापादयस्वतनयं त्यक्त्वास्नेहंसदूरतः ॥ मासत्यलंघनाद्राजन् नात्मानंपातयप्रभो ॥
तन्निकर्षेहृषीकेशो भवतीहफलप्रदः ॥ यस्मिन्जीर्णेरुजादेहे नान्योपिनृपजायते ॥ नासौधर्मोमलंयद्वदङ्गसंस्थंनसोभते ॥
दाराःप्राणास्स्वपुत्रंवा सर्वस्वंवामहीपते ॥ योहिदद्यादधर्मार्थं सपुमान्हीयतेनच ॥ श्रूयतेचपुराराजन् शिविनासुमहात्मना ॥
स्वशरीरंप्रदत्तंवै धर्मार्थंश्येनरूपिणे ॥ पुरन्दरायभद्रार्थं नतुत्यक्तोद्विजन्मना ॥ जीमूतवाहनेनापि गरुडायातिरंहसा ॥ स्वशरी-
रंप्रदत्तंवै रक्षताधर्ममुत्तमं ॥ दधीचिनापिदत्तानि स्वान्यस्थीनिमहात्मना ॥ धर्मार्थंराजशार्दूल देवानांहितमिच्छता ॥ एवंमहा-
त्मभिःपूर्वे धर्मएवस्वपालितः ॥ पालनाच्चैवधर्मस्य सर्वेस्वर्गपराभवत् ॥ आपवस्थाहिभूपाल धन्याश्चभुवनत्रये ॥ सत्यसंरक्षणा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थाय संभवंतिनृणांसदा ॥ कीर्त्तिसंरक्षणार्थाय कर्त्तव्यंमनुजैःशुभे ॥ कर्मभूपालशास्त्रोक्तं रागद्वेषविवर्जितं ॥ तदलंपरितापेन सत्यंपालयभूपते ॥ सत्यस्यपालनाद्राजन् विष्णुदेहगतिस्तव ॥ देवैरुत्पादितानूनं सानिकार्थायमोहिनी ॥ तवभूपालसापत्न्यं कृतंतन्नहिबुध्यसे ॥ पुत्रव्यापादनेदेवा भविष्यन्तिपराङ्मुखाः ॥ तेषांदत्वासुतंदेव प्राप्यसेवैष्णवंपदं ॥ विष्णोरुद्वहतांभक्तिं देवताःपरिपन्थिनः ॥ भवंत्येवंश्रुतंपूर्वं नचैतत्प्रकटीकृतं ॥ सर्वेतेविबुधाभूप शेखरैःपरिवेष्टिताः ॥ मोक्षमार्गप्रभेत्तारो नव्यवंतिचलोकतः ॥ तत्वंभूपदृढोभूत्वा घातयस्वसुतंप्रियं ॥ धर्मंकुरुष्वभावंत्वं सत्यमालोपयप्रभो ॥ लुप्तेस्ववाक्येभवितास्वपाकः समंतथा ब्रह्मवधेनतुल्यं ॥ स्वंसत्यशीलोभविताधरायां यशस्यमेतद्भवितातवेह ॥ २६ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते सन्ध्यावलीवाक्ये चतुस्त्रिंशोध्यायः ॥ ३४ ॥

वशिष्ठउवाच ॥ तत्तस्यावचनंश्रुत्वा राजन्रुक्मांगदस्तदा ॥ सन्ध्यावलीमुवाचेदं मोहिन्याःसन्निधौतदा ॥ पुत्रहत्यात्महत्यावा ब्रह्महत्यासमास्मृता ॥ घातयित्वासुतंलोके कागतिर्मेभविष्यति ॥ धर्मज्ञंविनयोपेतं प्रजानांरञ्जकंप्रियं ॥ अप्रजंतमहंहत्वा गंतावैकांगतिंशुभे ॥ क्वगतोमन्दरंशैलं क्वप्राप्तामोहिनीमया ॥ धर्मांगदविनाशाय पश्यदेवविधेर्बलं ॥ कुपुत्रस्यापिनिधनं देविदुःखंभवतिपितुः ॥ किंपुनर्द्धर्मशीलस्य गुरोर्वचनकारिणः ॥ जम्बूद्वीपमिदंभुक्तं मयाहिगजगामिनि ॥ सप्तद्वीपानिभुक्तानि तन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येनतवाधुना ॥ तुष्टेविष्णोवरारोहे पितुरत्यधिकोभवेत् ॥ अतःकमलपत्राक्षि पुराणेकवयोविदुः ॥ सोऽयमत्याधिकःपुत्रो वृषाङ्गद इतिक्षितौ ॥ प्रथितःसमहावाहुश्चक्रवर्त्तिर्महावलः ॥ ममवंशप्रकाशार्थं किंपुनर्भममामसं ॥ अहोदुःखमनुप्राप्तं पुत्राधिजनितं मया ॥ पुनरेववरारोहे शान्तयिष्यामिमोहिनीं ॥ मधुरैर्वचनैर्देवि दुःखशोकप्रदांमम ॥ एवमुक्त्वातुनृपतिः प्रियांसन्ध्यावलींत-दा ॥ समीपंचततोगत्वा मोहिनीमिदमब्रवीत् ॥ नभोक्षेवासरेविष्णोर्नहनिष्येतवात्मजं ॥ आत्मानंघातयेयंवा यास्येवाप्याश्र-मान्तरं ॥ अन्यद्वादारुणंकर्म करोमितवशाशनं ॥ आग्रहंकुरुमाभीरु भोजनंचसुतंप्रति ॥ किंफलंभवितादेवि हतेधर्मांगदेतव ॥ भोजयित्वादिनेविष्णोः कोलाभस्तवसुन्दरि ॥ दासोऽस्मितवभृत्योऽस्मि वशगोऽस्मिवरानने ॥ अन्यद्वदस्वसुभगे गतोऽहंश रणंतव ॥ रक्तांगुलितलाभ्यांतु कराभ्यांचारुलोचने ॥ करिष्येन्यत्कर्मशुश्रु प्रसीदममभाविनि ॥ प्रसादंतवकृत्वातु पुत्रभिक्षांप्र-यच्छमे ॥ दुर्लभोगुणवान्पुत्रो दुर्लभोहरिवासरः ॥ दुर्लभंजाह्नवीतोयं दुर्लभाजननीक्षितौ ॥ दुर्लभंहिकुलेजन्म दुर्लभावंशजाप्रि-या ॥ दुर्लभंकाञ्चनंदानं दुर्लभंहरिपूजनं ॥ दुर्लभावैष्णवीदीक्षा दुर्लभःस्मृतिसंग्रहः ॥ दुर्लभःशोकविरहो दुर्लभंह्यात्मचिन्तनं ॥ दुर्लभोजागरोविष्णोर्दुर्लभागुरुसत्क्रिया ॥ दुर्लभापात्रसंप्राप्तिर्दुर्लभंपौष्करंजलं ॥ दुर्लभःशिष्टसंसर्गो दुर्लभाभक्तिरच्युते ॥ दुर्लभं कपिलादानं दुर्लभंनीलमोक्षणं ॥ मघात्रयोदशिश्राद्धं दुर्लभंवरवर्णिनि ॥ दुर्लभंवसुधाचीर्णे व्रतंपातकनाशनं ॥ धेनुस्तिलम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यीसुश्रु दुर्लभापापनाशिनी ॥ धात्रीस्नानंवरारोहे दुर्लभाहरिवासरे ॥ दुर्लभंपर्वसंप्राप्ते स्नानंशीतलवारिणा ॥ विशेषान्माघमासे-
तु प्रत्यूषसमयेशुभे ॥ यद्धितंह्यात्मनःकर्म तद्देविश्रुविदुर्लभं ॥ दुर्लभंस्यादन्नसनं दुर्लभंचौषधंनृणां ॥ व्याधिर्विघातकरणे शा-
स्त्रोक्तकरणंविना ॥ दुर्लभंशरणंविष्णोर्मरणेवरवर्णिनि ॥ एवंमत्वावरारोहे नचहन्मिसुतंनिजं ॥ आत्मनस्तुशिरश्छित्वा ददामि
तवसुन्दरि ॥ प्रसादंकुरुमेभीरु कृतंसर्वंमयावले ॥ सेवितोविषयाःसम्यक् कृतंराज्यमकण्टकं ॥ मयामूर्ध्निपदंदत्तं रिपुणामब्जलो-
चने ॥ अप्रसूतंसुतंभीरु नाहंहन्मिवरानने ॥ विषयास्वादनेवालं मद्धस्यंशुभदर्शने ॥ स्वहस्तेनैववामोरु किंतुपापतरंपरं ॥ मो-
हिन्युवाच ॥ धर्मांगदोनमेशत्रुर्नाहंहन्मिसुतंतव ॥ आदावेवमयेत्युक्तो भुंक्ष्वत्वंहरिवासरे ॥ वसुधास्वेच्छयाराजन् नप्रसाधीहि
सर्वदा ॥ नाहमेवंब्रवीमित्वां पुत्रव्यापादनंप्रति ॥ भोजनंकुरुराजेन्द्र संप्राप्तेहरिवासरे ॥ ममभूमिपतेकृत्यं नैवपुत्रवधेनते ॥ कृ-
त्यंतुभोजनेनाद्य एकादश्यांमहावल ॥ यदिपुत्रप्रियोराजन् भुंक्ष्वत्वंहरिवासरे ॥ वहुनाकिंप्रलापेन वाक्यैरद्यनिरर्थकैः ॥ सत्यं
संरक्षयस्वेह कुरुस्ववचनंमम ॥ एवंब्रुवाणांतांदृष्ट्वा मोहिनींतनुमध्यमां ॥ धर्मांगदउवाचेदं खड्गंन्यस्याऽग्रतःपितुः ॥ स्वर्णसरुं
सुधारंच निर्मलाकाशसन्निभं ॥ माविलम्बेनराजेन्द्र पापंमूर्ध्निह्युपेक्षितं ॥ तन्मातुर्वचनंभूप कुरुष्वस्वर्गसाधनं ॥ आत्मारक्षोध-
नेनेह दारैरपिसुतैरपि ॥ आपद्भ्यश्चापिघोराभ्यः श्रेयस्कामेनभूमिप ॥ त्वदर्थेचमृतस्याद्य गतिस्यादक्षयामम ॥ तवापिनिर्मला-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकाः स्ववाक्यपरिपालनात् ॥ परित्यजस्वदैन्यत्वं सुतव्यापादनोद्भवं ॥ देहत्यागेममविभो नवःकायोभविष्यति ॥ शचीश-
यननिर्मुक्तो यथानृपशतक्रतोः ॥ पितुरर्थेहितायेच मातुरर्थेमहीपते ॥ गवार्थेब्राह्मणार्थेच प्रमदार्थेतथैवच ॥ भूम्यर्थेविकलार्थेच
देवतार्थेतथैवच ॥ धर्मार्थेदुःखिनश्चार्थे तथांलोकासनातनाः ॥ तदलंपरितापेन जहिमांत्वंवरासिना ॥ सत्यंपालयराजेन्द्र माभुंक्ष्वह-
रिवासरे ॥ धर्मार्थेतनयंहन्याद्भार्यांवापिमहीपते ॥ श्रूयतेदेववाक्यंतु हन्यात्पुत्रंमखेपिता ॥ सर्वमेधेनृपश्रेष्ठ नदोषोभवितातदा ॥
यद्ब्रूतेत्वांमहीपालजननीमेसुमध्यमा ॥ तत्कार्यमविचारेणधर्मज्ञेयंवहुश्रुता ॥ प्रसीदममराजेन्द्रकुरुवाक्यंमयेरितं ॥ मुक्तोभवस्वे-
वमसत्यघोराद्धत्वाहिमांभूमिपतेजनन्यै ॥ महद्यशःप्राप्स्यसिसत्यवाक्याद्विष्णोःपदंतत्परमंनरेन्द्र ॥ यशःप्रकाशाद्भविताहिकीर्त्ति
स्तवाक्षयातातनशंशयोऽत्र ॥ ४८ ॥ इतिश्री नारदीयपुराणे रुक्माङ्गदचरिते धर्माङ्गदवाक्यं पञ्चत्रिंशत्तमोध्यायः ॥ ३५ ॥
वशिष्ठउवाच ॥ तत्पुत्रवचनंश्रुत्वा भूपरुक्माङ्गदस्तदा ॥ सन्ध्यावलीमुखंवीक्ष्य प्रहृष्टमिवपंकजं ॥ मोहिन्यावचनंक्रूरं श्रुत्वा-
सनृपसत्तमः ॥ चकारपुत्रनाशाय मतिंमतिमतांवरः ॥ पुनःसंमोहिनीवाक्यं शुश्रावनृपसत्तम ॥ भुंक्ष्वभुंक्ष्वमहीपाल रक्षधर्मा-
गदंसुतं ॥ सन्ध्यावल्युवाच ॥ माभुंक्ष्वनृपशार्दूल जहीमंतनयंमम ॥ सन्ध्यावल्याःवचःश्रुत्वा नृपवर्यसभूपतिः ॥ आन्दोलि-
तमनास्तत्र दुःखशोकसमन्वितः ॥ एतस्मिन्नेवकालेतु भगवान्पुरुषोत्तमः ॥ अन्तर्द्धानगतस्तस्थौ व्योम्निस्थैर्यविलोककः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आरुह्यगरुडंदेवो मेघस्यामोनिरञ्जनः ॥ धर्मांगदस्यधीरस्य तथारुक्मांगदस्यच ॥ सन्ध्यावल्याश्चचरितं वीक्षाञ्चक्रेवियत्क्षयः ॥
भुंक्ष्वभुंक्ष्वेतिवचनं मोहिन्याह्युदितेतदा ॥ जग्राहविमलंखड्गं राजारुक्मांगदस्तदा ॥ सुप्रहृष्टेनमनसा प्रणम्यगरुडध्वजं ॥ तं
दृष्ट्वाखड्गहस्तस्तु पितरंधर्मभूषणः ॥ प्रणम्यमातृपितरौ देवंचक्रगदाधरं ॥ नारायणंजगद्योनिं योगाधारंनिरञ्जनं ॥ गृवांस-
चात्मनोवीर पितुरग्रेह्यनामयत् ॥ कंवुग्रीवोमहावाहुः सर्वलक्षणसंयुतः ॥ पुनश्चैवमहावाहुर्ग्रीवास्वांशुभलक्षणः ॥ प्रणम्यपादौस-
पितुः खड्गमार्गेप्रदेशयेत ॥ पितुर्भक्त्याप्रहृष्टात्मा जनन्योत्साहितस्तथा ॥ नियोजितेतत्रसुतेनकण्ठे विकाशितेमातृमुखेमहीप ॥
गृहीतखड्गेत्ववनीशनाथे चचालपृथ्वीसनगासवृक्षा ॥ क्षुब्धाःसमुद्राश्चतथामहीपते ववुश्चवाताःप्रवलाःसुघोराः ॥ निपेतुरुल्काः
शतशोधरायां निवातयुक्तानृपतत्रदारुणाः ॥ विवर्णरूपाह्विवभूवमोहिनी नदेवकार्यंहिकृतंमयेति ॥ निरर्थकंजन्ममबाधुनाभवत
कृतंनकार्यंचदिनेशजस्यवै ॥ विमोहनंरूपमिदंविलंवितं नृपेणचानेनसुतंविनिघ्नता ॥ भुंक्तंनवातेनचवासरेहरेरघापहेक्षत्रियपुंग-
वेन ॥ साहंत्वकृत्वादिनकृत्सुतस्य त्रिणैःसमाहंभविताग्निपिष्टपे ॥ मनोरथोमेवितथंचकृत्वा तस्याधिकोयास्यतिमोक्षमार्गं ॥ स-
त्वाधिकोयास्यतिमोक्षमेष यास्याम्यहंवैनरकंसुघोरं ॥ एवंतदाचिन्तयन्ती मोहिनीनृपनन्दन ॥ ददर्शनृपतिंखड्गमार्जयन्तं
पुनःपुनः ॥ समुद्यतेतदाखड्गे नृपेणनृपपुंगव ॥ मोहिनीमोहसंयुक्ता पपातधरणीतले ॥ राजापितेनखड्गेन शिरश्छेत्तुमियेष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सः ॥ सुतस्यनृपशार्दूल धैर्येणमहतायुतः ॥ सकुण्डलंचारुशशिप्रकाशं भ्राजिष्णुवक्त्रंतनयस्यभूपः ॥ विष्णुरुवाच ॥ उक्तंचदेवे-
नगदाभृतातदा गुह्यंममाकर्णयभूपवाक्यं ॥ तुष्टोस्मितुष्टोस्मिनशंशयोत्र गच्छस्वलोकंममभूमिनाथ ॥ प्रियान्वितःशुद्धसुतेन
पूतः कीर्त्तिंविधायात्रधरापतीश ॥ त्रैलोक्यमापूर्यतथागुणोघैः कृत्वापदंमूर्द्ध्नियमस्यचैव ॥ लीनोभवस्वाघममैवदेहे त्वंसर्वथैका-
दशिपालनेन ॥ सचक्रिणोभूमिपतिःकरेण संस्पृष्टगात्रोष्ठभुजोवभूव ॥ प्रियासमेतस्तनयेनसार्द्धं विमुच्यपापंसफलंसदेहः ॥
देवस्यदिव्यंसनृपोमहात्मा विवेशदेहंगरुडध्वजस्य ॥ विहायलक्ष्मीमवनीप्रभुतां विहायदारांश्चविहायकोषं ॥ विहायनागांश्च
विहायभूपान् विहायवंधुंश्चजनांस्तथासौ ॥ जगामदेहंमधुसूदनस्य ततोम्बरात्पुष्पचयंपपात ॥ अनाहताद्दुंदुभयोविनेदुर्ननर्त्तत-
त्राप्सरसांव्रजश्च ॥ चक्रुश्चगीतंमधुरंलयान्वितं गन्धर्वमुख्यानृपकर्मतुष्टाः ॥ तदद्भुतंवीक्ष्यरवेस्तनूजो हरेस्तनुंभूमिपतिंप्रविष्टं ॥
सदारपुत्रस्तुलिपिंप्रमार्य उवाचदेवंचतुराननंरुदन् ॥ यमउवाच ॥ नाहंनियोगीभवितातवेश दिशस्वकृत्यंममयत्करोमि ॥ ना-
हंपुनस्त्वीदृशकार्यकर्त्ता येनेहमेस्यादतिदुःखतापः ॥ ३० ॥ इतिश्री ना० रु० रुक्मांगदसिद्धिर्नाम षट्त्रिंशोध्याय ॥ ३६ ॥
यमउवाच ॥ विबुधेशजगन्नाथ चराचरगुरोप्रभो ॥ मोहिन्याश्रितंदेव जातंनिष्फलमद्यवै ॥ रुक्मांगदप्रणीतेन मार्गेणकुशके-
तन ॥ लोकःप्रयातिसर्वोयं नमांकश्चित्प्रपद्यते ॥ गतेपिनृपशार्दूले देहंदेवस्यचक्रिणः ॥ सर्वथासर्वभूतानां नबुद्धिःपरिवर्त्तते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपोष्यवासरंविष्णोः सदाधर्मार्त्तमानसाः ॥ प्रयान्तिपरमंलोकं लुप्तपापाःपितामह ॥ इयंतुव्रीडितादेवी मोहिनीचवरांगना ॥ सा-
यातितवसान्निध्यं नभुंक्तेलोकगर्हिता ॥ निष्प्रपन्नोह्यहंजातः किंकरोमिप्रसाधिमां ॥ प्रेताधिपवचःश्रुत्वा नीरजातासनोब्रवीत् ॥
गच्छामःसहिताःसर्वे मोहिनींप्रतिबोधितुं ॥ मोहिन्याःप्रतिबुद्धायाः करिष्यामोदिवाकरे ॥ तवकार्यंनसन्देहः संभ्रमन्त्यज्यता-
मिदं ॥ ततोदेवगणाःसर्वे संक्रन्दनपुरोगमाः ॥ ब्रह्मणासहिताभूमिं विमानैःसूर्यसन्निभैः ॥ समायातामहीपाल नारींतांप्रतिबो-
धितुं ॥ तेविमानैःसमंतात्तु परिवार्यशुभाननां ॥ तेजोहीनांनिरानन्दां शुष्कतोयांनदीमिव ॥ विनेन्दुनायथारात्रिमृद्धिहीनां-
क्रियांयथा ॥ पराजितंनरंयद्वत् प्रम्लानमिवपंकजं ॥ विनिवृत्तमखंदेवं निर्द्रुमंहिवनंयथा ॥ गतशालिककेदारं तरणिंनिष्प्रभंयथा ॥
पन्थानंनवनीतेतु उद्धृतेचावनीपते ॥ असंस्कृतांयथावाणीं मृदितांचचमुंयथा ॥ हतनाथांचयुवतीं धान्यहीनांप्रजांयथा ॥ श्र-
द्धाहीनविधिंयद्वत् धर्मंचदययाविना ॥ राष्ट्रंभूपालहीनेच मंत्रिहीनंचभूमिपं ॥ धनधान्यविहीनंतु गृहंनरवरोत्तम ॥ जलही-
नंयथाकुंभं बद्धसंगंयथागतिं । गृहस्थंभार्ययाहीनं पथिकंसार्थवर्जितं ॥ मार्जनींपांशुरूषितां नरंतीर्थाप्लुतंयथा ॥ वादित्रंशब्दभ-
ग्नंच दिवादृष्टंचनेत्रजं ॥ भग्नक्रियंचभिषजं भग्नशाखंचपादपं ॥ व्यङ्गीचप्रमितंयद्वान्निर्जलंचयथाघनं ॥ सधूममिववह्निंच वि-
रश्मिमिवभास्करं ॥ प्रभ्रष्टामिवमालांतु सर्वसंगंनरंयथा ॥ पयसाचविहीनांगां पतिहीनंगृहंयथा ॥ कविनाचयथाबन्धं भिक्षाही- ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नंचभिक्षुकं ॥ तिरस्कृतंयथाकान्तं जाययेवहतप्रभं ॥ वसन्तंस्वसुरावासे हृतस्वामिवमानसं ॥ भर्माचित्रंगृहमिव पद्मिनीमुद्धृता-
मिव ॥ निर्दानामिवमातंगं भग्नवेगंहयंयथा ॥ मालामिवशिरोभ्रष्टां समलंतुमणिंयथा ॥ प्रभ्रष्टांवालिपिंयद्वद्विस्वरंचयजुर्यथा ॥
सामेवस्वरहीनंतु मंत्रहीनंयथानरं ॥ मार्गंतृणेनसंछन्नं पद्महीनंयथासरः ॥ ज्ञानंममत्वसहितं प्रकृतिंपुरुषंविना ॥ यानिचित्तवि-
हीनानि धर्म्यंदंभावृतंयथा ॥ मोहिनींतेजसाहीनां तथादृष्ट्वादिवौकसः ॥ ध्यायमानांनिरुत्साहां दूयमानांजनैःप्रभो ॥ आक्रोश
वचनैःक्रूरैः पुत्रहत्यासमन्वितैः ॥ भूभर्तृघातिनींपापां सन्ध्यावल्याश्चदुःखदां ॥ दुःशीलांपतिनात्यक्तां तद्वाक्यपरिमोदितां ॥
स्ववाक्यनिरतांचण्डामूचुर्देवाःसमागताः ॥ माशोकंकुरुवामोरु पौरुषंहित्वयाकृतं ॥ नहिसिद्धिंगतंतंच कोपराधस्तवाबले॥ प्रा-
णिनःपरिभूयन्ते यमेनबरवर्णिनि ॥ नहिमाधवभक्तानां भवतोमानखण्डनं ॥ शाशितात्वंविशालाक्षि देवकार्यार्थमागता ॥ त-
न्नसिद्धिंबरारोहे प्रयत्नेनतवाधुना ॥ विघ्नविध्वंसिनीपूर्वं कृतारुक्मांगदेनहि ॥ एकादशीमहापुण्या वैशाखेशितपक्षजा ॥ संव-
त्सरंविशालाक्षि कृच्छ्रपादप्रपूरिता ॥ तस्यैषाव्युष्टिरतुला यत्सत्याच्चविभ्रोनहि ॥ निर्विघ्नांचेतिज्ञुवते लोकेषुपरिनिष्ठिताः ॥ अने-
नकारणेनेह जितात्वंतेनभाविनि नकृतंवचनंतुल्यं विष्णुभक्तेनतेनवै ॥ अगणित्वेहनृपतिः संस्पर्शन्तेनसुन्दरि ॥ कर्मणाम-
नसावाचा पुत्रव्यापादनेस्थितः ॥ खड्गमुद्यम्यहस्तेन स्नेहंकृत्वासुदूरतः ॥ तादृशंनिकषंप्रेक्ष्य भगवान्मधुसूदनः ॥ तुष्टोवभूव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवेशो वरदःसजनार्दनः ॥ सान्निध्यंकल्पयामास नृपस्यपुरतोहरिः ॥ योहनिष्यतिवैपुत्रं नभुक्तेहरिवासरे ॥ भूभुजातेनतेनाद्य
प्रीतिंयाताममातुलां ॥ एवंविचिन्त्यदेवेन दर्शितंवपुरात्मनः ॥ नृपेन्द्रस्यप्रियापुत्र सहितस्यवरानने ॥ विष्णुनापरितुष्टेन नीतं-
चत्रितयंशुभे ॥ स्वकंधाममहाभागे अमावर्मिरिवाहितः ॥ प्रारब्धेकर्मणिफलं यदिदेविनसिध्यति ॥ सर्वदोषेणसुभगे दोषःकोत्र
तवाधुना ॥ तस्मात्तेवरदाःप्राप्ता सांप्रतंविबुधाःशुभे ॥ सिध्येकर्मण्यसिद्धेच कर्मदोषोवृथानहि ॥ नदोषोभृत्यवर्गस्य स्वामिना
धर्ममिच्छता ॥ सद्भावादटमानस्य यदिकर्मनसिध्यति ॥ देयंवेतनमात्रंतु नतुतुष्टिफलंभवेत् ॥ योनतस्मैप्रयच्छेत वेतनंजीव-
नायवै ॥ गवांबधमवाप्नोति सनरोनात्रशंसयः ॥ तस्माद्देयंवरारोहे तवाभीष्टसुलोचने ॥ सद्भावेनत्वयाकार्यं कृतंसम्यग्दिवौकसां ॥
किन्नकुर्वन्तिविबुधाः त्वयासहवरानने ॥ द्वादश्याःतेजसाभग्नो यामाहुर्विघ्ननाशिनीं ॥ एवमुक्तातुदेवैःसा मोहिनीनृपसत्तम ॥
निन्दिताचतदात्मानं उवाचेदंवचस्तदा ॥ धिग्देवाजीवितंमह्यं ययाकार्यंनसाधितं ॥ नकृतोयमसंवाधं यमकार्योमयासुराः ॥
नचलुङ्घहरिदिनं नभुक्तंतस्यवासरे ॥ भूभुजातेनवीरेण कृतंपुत्रवधेमनः ॥ गतोमूर्ध्निपदंकृत्वा ममरुक्मांगदोहरिं ॥ अप्रमेयगु-
णंविष्णुं निर्मलंनिर्मलाशयं ॥ हंसंशुचिपदंव्योमं प्रणवंवीजमव्ययं ॥ निराकारंनिराभासं निष्प्रपञ्चंनिरञ्जनं ॥ शून्यंविलब्धरू-
पञ्च ध्येयंध्यानाविवर्जितं ॥ अस्तिनास्तीतियंप्राहुर्नदूरेनातिचान्तिके ॥ मनोग्राह्यंपरंधाम पुरुषाख्यंजगन्मयं ॥ हृत्पंकजसमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सीनं तेजोरूपंनिरीन्द्रियं ॥ तस्मिन्नयमनुप्राप्तः किन्नुमेजीवितेफलं ॥ सुसाधितेतुयोविप्र कार्येगृह्णातिवेतनं ॥ आशामनाशां-
कृत्वातु स्वामिनोनरकंव्रजेत् ॥ नसाधयन्तिकार्याणि प्रभूणांयेदिवौकसाः ॥ भृत्यावेतनभोक्तारो जायन्तेभूतलेह्निसा ॥ कार्यप्र-
साधनापश्चाद्भर्तृपुत्रविनाशिनी ॥ ग्रहिष्येहंवरंदेवाः कथंपापाविगर्हिता ॥ देवाऊचुः ॥ ब्रूहिमोहिनिदास्यामो यत्तेमनसिवर्त्तते ॥
नानृणंभवितासुभ्रु येनास्माकंवरानने ॥ फलंहितस्यकस्मात्त्वं नचाप्नुहिकृशोदरि ॥ ५५ ॥ इति ना० मोहिनीसमागमोनाम ३७
वशिष्ठउवाच ॥ एवमुच्चार्यमाणानां विबुधानांमहीपते ॥ आजगामाथनृपतेः पुरोधाःपावकप्रभः ॥ उषित्वाजलमध्येतु प्राणाया-
मरतोमुनिः ॥ वर्षाणांतुशतंसाग्रं ध्यायन्देवंजनार्दनं ॥ व्रतावसानेनृपते जलादवततारह ॥ निर्गतेनश्रुतंतेन मोहिन्याश्चेष्टितं
नृप ॥ सक्रोधोमुनिशार्दूल देववृन्दमथागमत् ॥ उवाचाविबुधान्सर्वान् मोहिन्यावरदायिनः ॥ भवतांहिकदेवत्वं धिग्धर्मंवःसुरे-
श्वराः ॥ वरप्रदानंयैरेवं दीयतेहिनिरर्थकं ॥ मोहिन्याःपापयुक्ताया नयुक्तंभवतामिह ॥ कृत्याहतेयंसुतभर्तृघातिनी विहीनरूपा
सदृशस्वरूपा ॥ तस्याहिशुद्धिर्नहिदृश्यतेवै क्षिप्तेशरीरेपिहिजातवेदसि ॥ विमोहयामासचमोहिनीया रुक्मांगदंधर्मविभूषणंहि ॥
प्रियासमेतंतनयेनयुक्तं ययास्वयंचैवविनाशितंपतिं ॥ कृत्वाधरांभूपतिवर्जितंच नष्टस्वधर्मोहरिवासराख्यः ॥ नचैववासोनरकेपि
देवाः कृतेभवेद्वर्षशतेनपुण्ये ॥ लोकापवादेनचकुत्सितायाः स्थानंनवेदास्तिकुतःपरंच ॥ पतिंहत्वासुतंचापि सपत्नींजननींसमां ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हत्वामरांसमस्तांच कांगतिंयास्यतेसुराः ॥ इयंपापसमाचारा तिथिविध्वंसिनीहरेः ॥ मात्सर्यैसहितैरुक्तं येर्हरेर्वासरेसुराः ॥ भु-
ज्यतामितिदुर्वृत्तेस्तेषामप्यधमागतिः ॥ भुज्यतेवासरेविष्णोर्हन्यतांगौर्द्विजान्विता ॥ अपेयंपीयतामुक्ता नवासस्तुत्रिपिष्टपे ॥
एतदज्ञानिनांप्रोक्तं ज्ञानिनांनतुनिष्कृतिः ॥ अज्ञानाद्व्याहृतेवाक्ये भुज्यतांहरिवासरे ॥ हन्यतांगौर्द्विजोपेता पीयतांमद्यमेव-
वा ॥ विशुद्धिःकविभिःप्रोक्ता प्राणत्यागगतेनहि ॥ अथवाह्युपवासेन ह्येकादश्यांदिवौकसः ॥ तिथ्यन्वितस्यपापस्य ज्येष्ठकुण्ड
प्लुतस्यच ॥ शौकरेस्पर्शनाद्वापि ननव्यूहार्चनादथ ॥ व्याहृतिःकथिताविप्र सयमस्मिन्सुरोत्तमाः ॥ भोजनेपापनिरता द्विजे-
शस्यदिनेशुभे ॥ भर्तृवाक्यमकृत्वातु घातयामासयापतिं ॥ वाग्यतंवाक्यनिरतं तादृशंनरपुंगवं ॥ विष्णुधर्मप्रलोप्त्रीवै बहुमा-
यासमन्विता ॥ नैषास्पृश्याभवेद्देवा कथंदास्यथवैवरं ॥ भवन्तोन्याययुक्तेषु धर्मयुक्तेषुमत्सराः ॥ पालनंपापयुक्तेषु नकुर्वन्तिदि-
वौकसः ॥ धर्माधाराःस्मृतादेवा धर्मोवेदाद्विनिर्गतः ॥ वेदैःशुश्रूषणंभर्तुः स्त्रीणांधर्मःप्रकीर्त्तितः ॥ यद्वदेत्पतिःकिंचित तत्कार्यम-
विशंकया ॥ शुक्लंशुक्लमितिज्ञेयं कृष्णंकृष्णमितिस्त्रिया ॥ यानारीसाहिविज्ञेया यत्राज्ञाक्रियतेसदा ॥ भर्तुर्विबुधशार्दूलाः सत्यमे-
तद्ब्रवीमिवः ॥ भर्तुराज्ञाकृतादेवास्त्वनयापापशीलया ॥ पापार्हासनसन्देहो मोहिनीदुष्टचेतना ॥ सत्यसंचालनार्थाय सपथैर्य-
न्त्रितोविभुः ॥ उपायैर्विविधैःप्रोक्तोनसत्त्याच्चालितस्तया ॥ तेनमोक्षंगतोराजा पापमस्यांविसृज्यच ॥ सेयंपापशरीराहि हत्याशत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समान्विता ॥ विनाशयामासमम पाद्यंपापसमन्वितं ॥ दातारंसर्वदानानां ब्रह्मण्यंचहरिप्रियं ॥ प्रजानांरञ्जनेयुक्तं हरिवासरसे-
विनं ॥ निषिद्धपरिहर्त्तारं परदारविवर्जकं ॥ परार्थेत्यक्तकामंच सदामखविधिप्रियं ॥ सदादुष्टप्रशमनं वर्त्तमानंधरातले ॥ व्यस-
नैःसप्तभिर्घोरैरनाक्रान्तंमहीपतिं ॥ तंनिरस्यदुराचारा त्वयोग्याकथंभवेत् ॥ योऽस्याःपक्षेप्रवर्त्तेत देवोवादानवोपिवा ॥ तांचापि
भस्मनिचयं करिष्येहंनशंसयः ॥ मोहिन्यारक्षणेयस्तु प्रयत्नंकुरुतेनरः ॥ तस्यतज्जायतेपापं यन्मोहिन्याव्यवस्थितं ॥ सएवमुक्तो
नृपनाथविप्रः संसृज्यपापंहरिसंप्रगीतं ॥ मुमोचदेहेज्वलनप्रकाशं तदंगनायाःकनकाबद्धाभि ॥ क्षिप्तेतुतोयेसहसामहीप ज्वला-
वलीढासहसावभूव ॥ खंपश्यतांनाकनिवासिनांतथा तृणयथोल्कापतितावभूव ॥ कोपंप्रभोसंहरसंहरेति यावद्गिरःखेमरुतांचरन्ति ॥
तावत्सवह्निर्हरिसंभवोसौ भस्मावशेषांप्रमदांचकार ॥ ३४ ॥ इतिश्री ल० ना० रु० मोहिनीभस्मकरणंनामाष्टत्रिंशोध्यायः ३८
वशिष्ठउवाच ॥ मोहिनीदेहमुत्सृज्य गताविबुधमंदिरं ॥ भर्त्सितादेवदूतेन नास्थितिर्विद्यतेऽत्रते ॥ पापशीलेसुदुर्वद्धे भर्तृनि-
न्दापरायणे ॥ लुप्तस्तेवासरोविष्णोर्महापापसमन्विते ॥ नारायणस्यभक्तानामिहवासस्त्रिपिष्टपे ॥ पापिनांनरकेवासस्तत्रगच्छ-
त्ववालिशे ॥ एवमुक्तातुदूतेन सक्रूरंवचनंतदा ॥ ताडयित्वातुदण्डेन प्रेषितानरकान्प्रति ॥ ताडिताभर्त्सिताराजन् साप्राप्तान्न-
रकान्प्रति ॥ प्राक्रोशन्नारकाःसर्वे दृष्ट्वातामागतांतदा ॥ नतेवासोऽत्रपापिष्टे परिखिद्यास्मदन्तिके ॥ व्रजान्यत्रहिवासाय नव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यंधारणेक्षमाः ॥ यात्वंधर्मांगदंहंसि धर्मज्ञंसत्पथेरतं ॥ गुरुशुश्रूषणेरक्तं मातॄणांसुप्रियंतथा ॥ विशेषरहितंभास्वद्भूतानांचहितेर-
तं ॥ प्रजाहितंस्थिरंप्रज्ञं स्त्रीसंगेवाविचक्षणं ॥ सप्तद्वीपप्रभोक्तारं महेन्द्रवरुणोपमं ॥ प्राकृतेनापिपुत्रेण निहतेनमहामते ॥ ब्रह्म-
हत्याशतंप्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः ॥ त्वयासद्धर्मनिरतो श्वयःशुश्रूषणेरतः ॥ हतःपुत्रोमहाबाहुस्तेनतेनास्तिनिष्कृतिः ॥ ग-
च्छान्यत्रद्रुतंपापे विरुद्धंतवदर्शनं ॥ एवंसुबहुशोजल्प्य निंदितानिर्गतातदा ॥ निर्धूतानारकैःसातु प्रविष्टाहिरसातलं ॥ रसा-
तलस्थैर्नृपते निषिद्धासासमंततः ॥ क्रंदितातत्रदुःखार्त्ता प्राप्तापार्श्वंदिवौकसां ॥ निवासिताहंलोकैस्तु ताडितामुद्गरादि-
भिः ॥ भवतामर्थसिद्ध्यर्थं रविपुत्रहितायच ॥ मयाध्यवसितंचैव सर्वलोकविगर्हितं ॥ क्लेशयित्वातुभर्त्तारं पुत्रंहत्वानिराकृ-
ता ॥ सन्ध्यावलींवियोज्याथ पुत्रेणपतिनातथा ॥ नगतिर्विद्यतेदेवा धरायांममसांप्रतं ॥ विशेषाद्द्विप्रशापेन सूतानरक-
वासिनः ॥ विप्रेणापादितानांहि दग्धानांचित्रभानुना ॥ दिवाकीर्त्तिहतानांच दष्टानामहिनातथा ॥ चतुर्गुणम्रितानांच
भक्षितानांचदंष्ट्रिभिः ॥ शतह्रदाविपन्नानां नशुद्धिःसुविमार्गदा ॥ साहंगङ्गाजलभ्रष्टा भूरिपापसमन्विता ॥ अविन्द-
मानानिलयं विष्णोर्वासरनाशिनी ॥ प्राप्ताहंभवतांदेवाः समीपमिहदुःखिता ॥ नास्तिमेपावनंकिंचिद्भर्तृपुत्रविनाशनात् ॥
विष्णोर्वासरलोप्तृत्वात्सत्यमेतन्मयोदितम् ॥ दुरुक्तंनादिनीचण्डा निंदिताचजगत्त्रये ॥ करोम्यहंकिंत्रिदशा ब्रूतदुःखविना- ॥ ६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिनीम् ॥ तांदृष्ट्वावादिनींवीक्ष्य मोहिनींचविमोहिनीं ॥ ऊचुःपरस्परंसर्वे सब्रह्मेन्द्रादिवाकराः ॥ क्षिप्रंपुरोधसंक्रुद्धं शान्तयित्वाशनैःशनैः ॥ अस्माभिःप्रेषिताब्रह्मन् शून्यंदृष्ट्वात्रिपिष्टपं ॥ नरकाश्चतथादृष्ट्वा वैकुण्ठंवीक्ष्यपूरितं ॥ रुक्मांगदकृतेमार्गे गच्छमानोजनस्तदा ॥ एकादश्यांनचास्नाति कश्चिदेवपदाद्द्विज ॥ तदास्माभिर्बालारियं प्रेषितानृपसन्निधिं ॥ माननार्थेचतस्यैव वासरेचक्रपाणिनः ॥ धर्मज्ञस्यसुशीलस्य द्विजरुक्मांगदस्यच ॥ वासुदेवेतिभावेन भक्तिरव्यभिचारिणी ॥ भार्यासंबन्धमुत्सृज्य कूटनेत्रकृतोमुनिः ॥ लिपिसम्मार्जनात्सर्वैरस्माभिःप्रेतपश्यतु ॥ अपकारायनृपतेः सत्ययुक्तस्यवैद्विजः ॥ सतेनकर्मणा विप्र प्रियापुत्रसमन्वितः ॥ विष्णोःप्रसादाद्गतवान् पुत्रस्नेहविवर्जितः ॥ पदंदेवस्यसुकृतां चक्रिणोमुक्तिलक्षणं ॥ यस्मान्नावर्त्ततेजन्तुरानन्दाख्यान्महीपते ॥ तन्नात्रकोपःकर्त्तव्यस्त्वयाद्विजवरोत्तम ॥ त्वंतपस्वीदुराचारः सर्वभूतहितेरतः ॥ नीचैःकृतेयन्महतांव्यलीकं तच्चैवतेषांनभवेत्सुखाय ॥ नप्राप्यतेसांख्यविदैर्मुनीन्द्रैर्नचापितद्योगयुतैःसमस्तैः ॥ अध्यासितंसत्ययुतैर्न्नरैर्यत्तद्धामविष्णोसतदाजगाम ॥ बुद्धिप्रपञ्चात्पतितातुविप्र सद्यःसमूलेतिनशंशयोऽत्र ॥ देवार्थमेषानचबन्धनार्थं रुक्मांगदंदग्धवतीमुनिन्द्र ॥ नचात्मकामेनगताहिवाला यमावसानेनगताहितत्र ॥ दयांकुरुस्वप्रशमंव्रजस्व विनाशितानांनपुनर्वधोऽस्ति ॥ नचापिलोकेनिहतोनिहन्य तेशापदानेननिपातितेयं ॥ कुरुप्रसादंगतिदोभवस्व त्वमद्यविप्रेन्द्रविमोहिताय ॥ अस्मत्कृतेविप्रव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रप्रसीद क्रोधंतुसंहृत्यमहर्षिवर्य ॥ सएषदृष्टिस्त्रिदशालयैस्तु विमृष्यबुध्याविरराम कोपात् ॥ उवाचसर्वान्विबुधाःसमेतान् वेदा-
र्थविद्धर्मपरोमहात्मा ॥ ३८ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते विप्रप्रशादनो नामैकोनचत्वारिंशत्तमोध्यायः ३९
पुरोधाउवाच ॥ वहुपापान्वितादेवा भर्तुर्दुःखप्रदायिनी ॥ नस्थितिर्विद्यतेचास्यास्त्रैलोक्येस्थातुजंगमे ॥ यन्नाक्रान्तंहिभूतोघैरा-
काशंपक्षिभिःस्वरैः ॥ जंगमाजंगमैर्भूमिर्व्याप्ताद्वीपसमन्विता ॥ तलानिदैत्यनागाद्यैराकाशंपाक्षिभिःस्वैरैः ॥ नाकंप्रक्रांताभिःपु-
ण्यैर्नरकंपापकर्मभिः ॥ ऋष्याद्यैसागराव्याप्ता विहंगैश्चमहीरुहाः ॥ यस्मिन्संस्थाप्यतेपापैः संस्पर्शंयास्यतेनच ॥ विचार्यतद्यथा-
स्थानमस्यसौख्यप्रदंभवेत् ॥ तच्चिन्त्यतांमहाभागास्तत्संभूयप्रमृष्यतां ॥ ततःसुरवराःसर्वे विप्रवाक्यप्रचोदिताः ॥ ऊचुर्ब्रह्मसु-
तांनास्ति स्थानंतवजगत्त्रये ॥ ब्रूहिमोहिनिदास्यामि यदाक्रान्तंनकेनचित् ॥ नपुरापापभोक्तारो नसुरासुरचापरे ॥ नचाप-
रोधादवले सपापायावरप्रदाः ॥ मोहिन्युवाच ॥ भवतांहिमयाकार्यं कृतंविबुधसत्तमाः ॥ दग्धायाअपिपापेन विनादेहंनचाप-
राः ॥ यथासूर्यात्मजोहर्षं प्रयातिममचेष्टितैः ॥ पूर्यंतेनरकासर्वे जनौघैःपापसंयुतैः ॥ गच्छन्द्विःपरलोकेहि यममार्गेनिरंतरं ॥
मानुषैस्त्रिदशश्रेष्ठा चित्रगुप्तोनाविश्रमेत् ॥ व्यलीकंतुप्रकुर्वाणाः सर्वेममसुसंचयैः ॥ पुरोधसासमेतानामेषवध्वाञ्जलिर्मया ॥ भ-
वतांहितमन्विच्छन् कृतंपापमनन्तकं ॥ पुनरेवचसाबुद्धिर्वर्त्ततेस्वर्गनाशिनी ॥ एकादशीफलंपुण्यं दीयतांविबुधोत्तमाः ॥ व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सतिःसामेविबुधा भवेदेकादशीयथा ॥ निरालंबाहमधुना स्थितिंमेदीयतामिदं ॥ सर्वयज्ञाधिकफला सर्वपापप्रणाशिनी ॥ ए-
कादशीमहाभागा यद्यस्तिमयिपुण्यदा ॥ मोहिनीवचनंश्रुत्वा सर्वेभूमिदिवौकसः ॥ दत्तामंगानिधुन्वाना ऊचुस्तांपरुषाक्षरं ॥
अयाच्यंयाचसेभीरु यन्नप्राप्यंसुरासुरैः ॥ एकादशीफलंपुण्यं कोददातितवाधुना ॥ अन्यत्तुसंप्रयच्छामो दातुंह्येकंनशक्नुमः ॥
एकयाह्यपिवामोरु एकादश्यासुचिन्तया ॥ हत्यायुतंविनश्येत सर्वयज्ञफलंलभेत् ॥ नास्माकंशक्तिरस्तीह दातुंहरिदिनोद्भवं ॥पु-
ण्यंमोक्षप्रदंभीरु जन्ममृत्युनिकृन्तनं ॥ अमृतेनजगद्धातुः पुराणपुरुषस्यतु ॥ तद्दिनंयाचमानायाः कुलिशंतेपतिष्यति ॥ मो-
हिन्युवाच ॥ यद्येवंविबुधश्रेष्ठा नदास्यथहरेर्दिनं ॥ दशम्याःप्रान्तविद्धाय ततोगच्छन्तमेसुराः ॥ देवाऊचुः ॥ दशम्याःप्रान्तवि-
द्धंहि दत्तंजंभासुरस्यहि ॥ ब्रह्मणापरितुष्टेन धूर्जटेर्वचनेनहि ॥ सचापिवलवाञ्जातस्तेनपुण्येनबृंहितः ॥ मोहिन्युवाच ॥ दशम्याः
प्रान्तमासाद्य यदोदेतिदिवाकरः ॥ तेनस्पृष्टंहरिदिनं तद्दत्तमसुरेयदि ॥ सूर्योदयविहीनंतु दृश्यादृश्यंचराचरं ॥ दशम्यंतंप्रय-
च्छध्वं स्पृष्टंहरिदिनेनहि ॥ अग्नेर्विकारकालेच बद्ध्वाउत्थापनेशुभे ॥ गवांदोहनकालेच पक्षिसंनादनेतथा ॥ विरामेसर्वदेवानां
मार्जनीग्रहणेतथा ॥ द्वारोद्घाटनवेलायां स्नानकालेह्युपस्थिते ॥ व्रतीनांदीक्षितानांच सपादेनिनदेतथा ॥ तदाक्रान्तोदशम्यांतु
एकादशिसमन्वितः ॥ प्रदीयतांनिवासार्थं कालेविबुधसत्तमाः ॥ नप्रार्थयेयंह्युदयं नचैवहरिवासरं ॥ वैनतयोदयामह्यं दीयतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विबुधेश्वराः ॥ दययामुनिनादेवाः क्षीणायाःपापसंचयैः ॥ विश्रामार्थेसुपुष्ट्यर्थं एतत्प्रातःप्रदीयता ॥ स्पृष्टंविष्णुदिनेनेह सर्वपा-
पहरेणहि ॥ यद्येतन्नप्रयच्छध्वं तिथेःप्राभातिकंमम ॥ साहंविष्णुदिनोपेता भविष्येवैसहस्रधा ॥ निराशाकुलिशेनैव विच्छिन्ना
त्रिदशालयात् ॥ पापादीन्विबुधार्थेहि पापसंजननायच ॥ प्राप्यानुज्ञांहिदेवेन्द्रास्तथान्येभ्योविशाम्यहं ॥ वशिष्ठउवाच ॥ तन्मो-
हिनीवचःश्रुत्वा सुराःसर्वेमहीपते ॥ संमंत्र्यसुचिरंकालं दिगंबरपुरोगमाः ॥ यमसंस्थापनार्थाय वैकुण्ठध्वंसनायच ॥ पाखण्डानां
चवध्यर्थं पापसञ्जननायवै ॥ पुरस्कृत्यतुविप्रेन्द्रं तथान्योभूसुरान्नृप ॥ ऊचुस्तेमोहिनींदेवा लोकसंमोहनायवै ॥ दत्तंमोहिनितेस्था-
नं प्रत्यूषसमयान्वितं ॥ दुष्टंहरिदिनोपेतं दशम्याप्रान्तसंज्ञितं ॥ नैतज्जंमेनदुष्टंवै नेतद्दैत्यैर्नदानवैः ॥ विविधैस्तुकृतंसुभ्रु उपवा-
सव्रतास्त्विदं ॥ अस्मिन्स्थितायांत्वयिमाधवस्य पूजांकरिष्यन्तिचयेमनुष्याः ॥ तेषांहियद्वैसुकृतंसमस्तं त्वंभुंक्ष्वदेविनचशंशयोत्र ॥
सूर्योदयविहीनंतु दशम्याःप्रान्तसेवनं ॥ पद्मनाभदिनेसूक्ष्मं नदास्येहंफलंतव ॥ प्रतापंसूर्यहीनंतु दशम्याश्चारुलोचने ॥ एका-
दशीविहीनंतु क्षपयिष्यन्तियेनराः ॥ उपवासैर्व्रतैर्दानैस्तथाजागरणैःशुभैः ॥ सर्वमावर्जितंपुण्यं यास्यतेतवमोहिनि ॥ अप्रभा-
तांकितोह्यन्तो दशम्यांगर्हितंसदा ॥ दृश्यादृश्योमहीपाल युक्तोहरिदिनेनतु ॥ निष्फलंभवतेनृणां सुव्रतस्यार्जनेसदा ॥ देवैः
प्रहृष्टैस्तुतदामहीप स्थानेश्रुतेमोहिनिमोहयुक्ता ॥ वभूवहृष्टासहसूर्यजेन मेनेकृतार्थंशरणंतदातु ॥ संसाधितंकार्यमिदंसुराणां भ- ॥ ६९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्मावशेषेतुकृतेतुदेहे ॥ चैतन्यमात्रेपरमात्मकेस्मिन् संमार्जितोरुक्मकृतस्तुपन्थाः ॥ नीतंमयाचात्मकृतंहिवाक्यमुक्तंमयावाक्य-
मिदंकरोमि ॥ एवंविमृष्यबहुधासुमतेमहीप प्रणम्यदेवांस्तुतदाचमोहिनी ॥ प्रातस्थितासूर्यविनाकृतेतु कालेदशम्याजनमोह-
नाय ॥ इमानिरूपस्यविनानियुक्ते प्रहृष्टरूपामथकामपूर्णां ॥ प्रातस्थितांतांसविलोक्यमोहिनीं सहृष्टरूपोवचनंजगाद ॥ त्वया
प्रतिष्ठाममचारुनेत्रे कृतात्रिलोकेषुचयत्तुसम्यक् ॥ विभेदितोरुक्मविभूषणस्य करीणसंस्थःपटहःसुघोषः ॥ दृष्टकार्येजनःसर्वे प्र-
त्ययःकुरुतेत्विति ॥ सूर्योदयस्पृशीघोषा दशमीगर्हितातदा ॥ सचाभूत्युदयन्नृणां मोहनायभविष्यति ॥ मोहनाद्भुतनिष्पत्ति
र्भविष्यतिचयत्फलं ॥ भविताभवितादेवि तवसर्वंनसंशयः ॥ मयाचयापिनांतेषां शासनार्थंपटेक्षरैः ॥ भविष्यतिलिपिंस्तुभ्रु अलं-
घ्यदेवदानवैः ॥ योगोदशम्यारविनाचयुक्तः प्रसिद्ध्येतद्भुवनत्रयेस्मिन् ॥ विहायतांमतिपितृयोगयुक्तां पटेस्थितांदृश्यतिदृश्यसं-
ज्ञे ॥ सर्वंहितेनामविशालनेत्रे संमोहिनीत्येवजनोब्रवीति ॥ विमोहयित्वाजननंसमस्तं पटेमदीयेलिखितंकरोषि ॥ दृष्टिस्त्वने-
नैवहिकर्मणाते स्थानंस्वकंगच्छसुचारुनेत्रे ॥ इत्येवमुक्तातपनस्यपुत्रः प्रशंस्यतांब्रह्मसुतांप्रहृष्टः ॥ जगामदेवैःसहनाकलोकं करे
गृहीत्वासतुचित्रगुप्तं ॥ गतेषुदेवेषुविमोहिनीसा विमोहयामासजगत्समस्तं ॥ प्राप्तंसमास्थायदिनेशहीनं प्रध्वंसनंसर्वसुपुण्यग-
जन् ॥ इतितेकथितंराजन् पुराणंपापनाशनं ॥ रुक्मांगदस्यचरितं सर्वदुःखक्षयंकरं ॥ श्रोतव्याश्रद्दधानेन परंस्वस्त्ययनंशिवं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणानान्तेनपापानि विलयंयान्तिमानद ॥ सूर्योदयेतमोयद्वद्गुहायामपिसंस्थितं ॥ धन्यंयशस्यमायुष्यं सर्वशत्रुनिवर्हणं ॥
श्रोतव्यंराजपुत्रेण श्रद्दधानेनपार्थिव ॥ जयान्वितााविशेषेण शौर्यस्यचविवृद्धये ॥ श्रोतव्यंब्राह्मणैराजन पुत्रपौत्रशुभावहं ॥ अ-
पुत्रोलभतेपुत्रं धनार्थीधनमुत्तमं ॥ विद्यार्थीलभतेविद्यां शृण्वञ्चरितमादितः ॥ रुक्मांगदस्यभद्रन्ते राजसूयफलप्रदं ॥ कथितं
तेमयाभूप किमन्यच्छ्रोतुमिच्छसि ॥ वशिष्ठवचनंश्रुत्वा मान्धाताराजसत्तमः ॥ पप्रच्छेदंमहाबाहुर्निश्चयार्थंमहायशाः ॥ एका-
दश्यांतदाराजा चक्रवर्त्तिर्महाबलः ॥ मान्धाताउवाच ॥ भगवन्द्वादशीकल्पं यथावद्वक्तुमर्हसि ॥ उपोष्याकाभवेत्पुण्या कासु-
पोष्याथपातकं ॥ वशिष्ठउवाच ॥ दशमीशेषसंयुक्तामुपोष्यैकादशींफलात ॥ संवत्सरकृताज्जन्तुः सुखाद्धीयेतपार्थिव ॥ दशमी
शेषसंयुक्ता गान्धार्यासमुपोषिता ॥ तस्याःपुत्रशतंनष्टं तस्मात्तांपरिवर्जयेत ॥ दशम्येकादशीयत्र तत्रसंनिहितोनरः ॥ एका-
दशीचपुण्याच तत्रसंनिहितोहरिः ॥ पूर्वाविद्धामयायातु पित्रेकर्मणिगण्यते ॥ कलार्द्धेनापिविद्धास्याद्दशम्येकादशीचया ॥
तदाह्येकादशींत्यक्त्वा द्वादशीसमुपोषयेत ॥ द्वादश्यामुपवासेतु त्रयोदश्यांतुपारणे ॥ एकादशीरूक्मिणीतु द्वादशीचक्रपाणि-
नः ॥ एकादशीयदानस्याद्उपोष्याद्वादशीतदा ॥ एकादश्याकलात्वेका द्वादश्यास्तुकलाद्वयं ॥ द्वादशद्वादशीहन्ति त्रयोद-
श्यांतुपारणा ॥ कलाद्वयंत्रयंवापि द्वादशींचह्यतिक्रमात् ॥ एकादशीमुपोषित्वा तत्रधर्मफलंलभेत ॥ एकादशीद्वादशीच ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यन्तेचत्रयोदशी ॥ भूस्पृशासातिथिर्ज्ञेया सर्वपापहराशुभा ॥ उपवासःकृतंतस्यां महापातकनाशनः ॥ एकादशीमुपोष्यैव द्वा-
दशीमथवानृप ॥ त्रिमिश्रामपिकुर्वीत नदशम्यायुताक्वचित ॥ द्वादशीसमुपोष्यैव पक्षयोरुभयोरपि ॥ यथाशुक्लातथाकृष्णा
विशेषोनास्तिकश्चन ॥ यथासुपूजितोगौरः कृष्णोवावेदविद्द्विजः ॥ सन्तारयतिदातारं द्वादशीचतथास्मृता ॥ दिनक्षयेतुसंप्रा-
प्ते उपोष्याद्वादशीशुभे ॥ दशमीशेषसंयुक्तां नकुर्वीतकदाचन ॥ तिथिवृद्धौतथाहन्यां संप्राप्तेवादिनत्रयं ॥ संदिग्धेषुचवाक्येषु
द्वादशीसमुपोषयेत् ॥ नशङ्खेनपिबेत्तोयं नहन्यात्कूर्मशूकरौ ॥ एकादश्यांनभुञ्जीत पक्षयोरुभयोरपि ॥ एकादशीद्वादशीच
एकार्थेकार्यतःपृथक् ॥ नरनारायणौदेवावेकात्मानौयथाद्विधा ॥ सब्रह्महासगोघ्नश्च सुरापोगुरुतल्पगः ॥ एकादश्यांतुयोभुक्ते प-
क्षयोरुभयोरपि ॥ गृहस्थेनविशेषेण कार्यमेकादशीव्रतं ॥ एकादश्याविनारण्डा यतिश्चसुमहामते ॥ पचन्तीत्यन्धतामिश्रे याव-
दाहूतसंप्लवं ॥ नगविद्धातुयाषष्ठी शिवविद्धातुपञ्चमी ॥ दशम्येकादशीविद्धा तत्रनोपवसेन्नरः ॥ सुपोष्याद्वादशीचैषा एका-
दश्याकलापिवा ॥ दिनक्षयेतुसापुण्या नदशम्याकदाचन ॥ एकादशीद्वादशीच विशेषणत्रयोदशी ॥ तत्रक्रतुशतंपुण्यं त्रयो-
दश्यांतुपारणे ॥ द्वादशीद्वादशंहन्ति पूर्वविद्धाउपोषिता ॥ तस्मात्सर्वप्रयत्नेन पूर्वविद्धांविवर्जयेत् ॥ पृथिव्यांवैष्णवान्विप्रान वि-
ष्णुशास्त्रविशारदान् ॥ चीर्णव्रतान्शुचिन्विद्वान् द्वादशींप्रतिबोधयेत ॥ येपुराणंनजानन्ति समासान्नचलक्षणं ॥ तेषांवाक्यंन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्त्तव्यं गर्हितास्तेस्वकर्मभिः ॥ येषांनकारणंदानं नविप्रानजनार्दनः ॥ मन्वादयश्चस्मृतयस्तेषांवाक्यंपरित्यजेत् ॥ मान्धाता-
उवाच ॥ विघ्नविध्वंसिनीनाम वैशाखसितपक्षजा ॥ द्वादशीकेनविधिना कर्त्तव्यावदमेगुरो ॥ किंपुण्या।किंफलाब्रह्मन् भवेद्विघ्नप्र
भञ्जनी ॥ केमन्त्राःपूजनेस्नाने दानेचद्विजसत्तम ॥ एतत्सर्वंसमाचक्ष्व प्रसन्नोयदिमेभवान् ॥ वशिष्ठउवाच ॥ शृणुराजन्नवहि-
तो द्वादश्याःपरमंविधिं ॥ येनविघ्नानिनश्यन्ति जन्मकोटिकृतानिवै ॥ वैशाखसितपक्षस्य संपूर्णाद्वादशीयदा ॥ भवेन्नृपतिशा-
र्दूल बुधवारकरान्विता ॥ तदायत्नेनकर्त्तव्या व्रतेन्नृपतिसत्तम ॥ एकभक्तेननक्तेन तथैवायाचितेनच ॥ कर्त्तव्यानरशार्दूल द-
शम्यादिदिनत्रयं ॥ द्वादश्यामुपवासस्तु गृह्णीयान्नियमंबुधः ॥ निराशनोहंद्वादश्यां संपूज्यगरुडध्वजं ॥ प्रभातेद्विजसंयुक्तं
भोक्ष्येहंमधुसूदनं ॥ एवंनियमवान्स्नात्वा मध्याह्नेप्रयतात्मवान् ॥ नद्यांतडागेगर्त्तेवा गृहेवानियतःशुचिः ॥ स्नात्वासंपूजयेद्देव-
मुपहारवरैर्नरः ॥ ॐकेशवायनमःपादौ विघ्नविध्वंसिनेनरः ॥ नारायणायेतिशिखां माधवायचमाधविं ॥ गोविन्दायललाटंच
ऊरुभ्यांविष्णुमर्चयेत् ॥ मधुसूदनायजंघेच पादौचश्रीधरायच ॥ ऋषीकेशायेतिमुखं नाभिंपङ्कजनाभये ॥ दामोदरायबाहु-
भ्यां कृष्णायेतिशिरस्तथा ॥ त्रिभिश्चविधिवत्कृत्वा पुष्पधूपानुलेपनैः ॥ एवंसंपूज्यदेवेशं गन्धपुष्पानुलेपनैः ॥ ततस्तस्याग्रतः
कुंभं सिततण्डुलपूरितं ॥ अक्षतंतण्डुलंन्नूनं सितवस्त्रावगुण्ठितं ॥ स्थापयेत्तत्रदेवेशं सुवर्णघटितंन्यसेत् ॥ पूर्वोक्तेनैवविधिना ॥ ६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूजयेत्परमेश्वरं ॥ पुष्पधूपादिनैवेद्यैर्देशकालोत्तरैःशुभैः ॥ पुष्पाञ्जलिंततोवद्ध्वा प्रार्थयेत्सुसमाहितः ॥ धर्मार्थकाममोक्षाणां वाच्यायत्कारिताहिवै ॥ विघ्नानितानिनश्यन्तु त्वत्प्रसादाज्जनार्द्दन ॥ एवंप्रसाद्यदेवेशं तंगुरुंपूजयेन्नरः ॥ अलंकारोपहारैश्च दूर्वाश्लक्ष्णक्षतैस्तथा ॥ संपूज्यविधिवत्पश्चाद्देवेशंप्रतिपादयेत् ॥ उत्पत्तिस्थितिसंहार कर्त्ताभोक्ताजगन्मयः ॥ विघ्नविध्वंसकारीमे प्रीयतांमधुसूदनः ॥ अनेनविधिनादत्वा प्रणम्यचपुनःपुनः ॥ ततोदक्षिणयासार्द्धं गृहान्नीत्वासमर्चयेत् ॥ अनेनविधिनाभूप कुर्याद्विघ्नविनाशिनीं ॥ द्वादशीतस्यनश्यन्ति विघ्नानिनरपुंगव ॥ धर्मेवार्थेचकामेच मोक्षेचान्यतमेतथा ॥ अन्येषुचैवकामेषु स्वर्गभुक्तिप्रदेषुच ॥ नविघ्नोजायतेतस्य नयमेतिपरस्परं ॥ एतत्तेकथितंराजन्‌ विघ्नविध्वंसकारणं ॥ व्रतंव्रतवतांश्रेष्ठमुक्तवीज फलप्रदं ॥ यश्चेदंशृणुयान्नित्यं पठेद्वाभक्तिभावनः ॥ सयातिपरमंस्थानं सर्वविघ्नविवर्जितः ॥ भुक्तभोगानतःप्राप्य मरणंस्मरणंहरेः ॥ ततोयातिपरंस्थानं यस्मान्नावर्त्ततेपुनः ॥ ११९ ॥ इतिश्री लघुनारदीयपुराणे रुक्माङ्गदचरिते विघ्नविनाशिनीनाम द्वादशी चत्वारिंशोध्यायः समाप्तः ॥ ४० ॥ ३ ३ ३ ३ ३ ३ ३ ३ ३ ३ ३ ३

इदं पुस्तकं नेपालदेशे पं० नरदेव, मोतीकृष्ण शर्मणः आज्ञानुसारेण पं० कपिलदेव शर्मणा श्रीपाशुपत मुद्रणालयेऽङ्कितम्‌ संवत्‌ १९६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूचना ।

यद्यपि भाग्यवद्भोग्यानि वस्तुनि वहूनि प्रतिजनपदं समुपलभ्यन्ते तथापि निजकुल क्षुण्णएव पन्था ज्यायानिति मन्यमानानां नेपालाभिजन महाशयानां अन्यदेशियानांच एतद्देशीय बस्त्राभरण, भाषापुस्तक, पञ्चाङ्गादीनि भि. पि. ब्यवहारेणापि साध्यानि भवन्तु इतिविचार्य वाराणस्यां चौखम्बा सँस्कृत पुस्तकालयाधिपति " हरिदास-गुप्तो " युष्माभिः प्रतिपुरुषी कृतोऽस्ति इति—

आर्यजनानां शुभाभिलाषि—

पं० नरदेव,मोतिकृष्णशर्म्मणः " पाशुपत यन्त्रालय " नेपाल.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिलघुनारदीयपुराणान्तर्गतं रुक्माङ्गदचरितंसमाप्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu